MADRAS UNIVERSITY SANSKRIT SERIES No. 25.

General Editor:

Dr. V. RAGHAVAN, M.A., PH.D.,

Head of the Department of Sanskrit.

MADRAS UNIVERSITY SANSKRIT SERIES No. 25.

BṚHATĪ

OF

PRABHĀKARA MIŚRA

[A COMMENTARY

ON THE MĪMĀṀSĀ SŪTRABHĀṢYA OF ŚABARASWĀMIN]

WITH

ṚJUVIMALĀ PAÑCIKĀ OF ŚĀLIKANĀTHA

PART IV

(Adhyayas 3, 4, and 5 complete)

Edited by:

S. SUBRAHMANYA SASTRI, M.A., SIROMANI

Reader in Sanskrit,

University of Madras

UNIVERSITY OF MADRAS

1964

Printed at
Sri Ramachandra Printing Works, 177, Royapettah High Road,
Madras 14.

मद्रपुरीयविश्वविद्यालयसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः २५.

बृहती

(शबरभाष्यव्याख्या)

श्रीप्रभाकरमिश्रविरचिता

श्रीशालिकनाथमिश्रप्रणीतया ऋजुविमलापञ्चिकया समेता

(तृतीयचतुर्थपञ्चमाध्यायाः)

संपादकः

एस्. सुब्रह्मण्यशास्त्री

पण्डितराजः न्यायवेदान्तविद्वान् मीमांसकशिरोमणिः

मद्रपुरीयविश्वविद्यालयः

१९६४

PREFACE

Bṛhatī of Prabhākaramiśra with Ṛjuvimalā the commentary by Śālikanātha, containing chapters 3, 4, and 5 is now issued as Volume IV of this great work. The following manuscripts were used in editing the volume.

1. Bṛhatī of Prabhākara belonging to G.O.Mss. Library, Madras, which is a copy of the manuscript of the same work, belonging to the Asiatic Society of Bengal.

2. Ṛjuvimalā (R) belonging to G.O.Mss. Library of Madras.

3. Ṛjuvimalā (G) belonging to Dr. Ganganath Jha Oriental Manuscripts Library, Allahabad.

In finding out the correct readings of Bṛhatī, the only manuscript of which is very corrupt, the commentary Ṛjuvimalā was very helpful since Śalikanātha cites whole passages of the text while commenting on it, unlike other commentators who cite only the first word of the text. In edting Ṛjuvimalā, the manuscript belonging to the Ganganath Jha Institute was very useful in getting at the correct readings of the commentary. As Prabhākara treats the Adhikaraṇas independently, very rarely quoting the Bhaṣya text in his work, I have omitted the Bhāṣya text in this volume. I have, however, given the page number of the Bhāṣya, printed in Ānandāśrama at the bottom wherever necessary.

My thanks are due to the Curator of the Oriental Manuscripts Library, Madras and to the Director of the Ganganath Jha Oriental Mss. Library, Allahabad, who lent me the manuscripts in their custody for editing this work.

My thanks are also due to the authorities of the Adyar Mss. Library, Madras, who readily oblige whenever manuscripts of that library are required in the Department. I am grateful to Sri A. S. Nataraja Iyer who helped me a great deal in connection with the edition of this work during my stay at Allahabad. I am deeply indebted to Dr. V. Raghavan, Professor and Head of the Department of Sanskrit, University of Madras, who procured for me the manuscripts from the libraries and helped me with his valuable suggestions at every stage.

I have given here a summary of the Adhikaraṇas according to Prabhākara.

S. SUBRAHMANYA SASTRI.

विषयनुक्रमणिका

तृतीयाध्यायस्य प्रथमः पादः

द्वितीयः पादः

तृतीयः पादः

चतुर्थः पादः

पञ्चमः पादः

सप्तमः पादः

अष्टम: पाद:

चतुर्थाध्यायस्य प्रथम: पाद:

द्वितीयः पादः

तृतीयः पादः

चतुर्थः पादः

चतुर्थः पादः

पञ्चमाध्यायस्य प्रथमः पादः

द्वितीयः पादः

अधिकरणार्थसङ्ग्रहः
तृतीयाध्याये प्रथमः पादः

अथातः। अधिकरणं १--२। पदानां कार्यान्विते शक्तिग्रहात् अन्वित—पदार्थात्मकत्वेन परस्परक्रियाकारकभावादिमात्रत्वाद्वाक्यार्थस्य पदार्थानां शेषत्वे हेतुर्नास्तीति शेषलक्षणं नारम्भणीयं इति पूर्वः पक्षः। सिद्धान्तस्तु गुणप्रधानभावेन हि सर्वत्र शाब्दान्वयःगुणत्वमेव च शेषत्वं कार्यं च प्रधानम्। ततश्च शेषत्वं विना पदार्थानां कार्यसम्बन्धस्यैवानुपपत्तेः शेषत्वसिद्धिः शेषलक्षणं चारम्भणीयमिति सिद्धम्।

३. **द्रव्यगुण।** लोकव्युत्पत्त्यनुसारेण यजेतेत्यादिभिः याग एव कार्यतयाऽव-गम्यते। न च कार्यमन्यार्थं भवतीति नास्ति यागस्य शेषभावः। अतः फले नियोगो नास्ति यागेन फलं साधयेदिति। तथा पुरुषेपि, फलेन पुरुषं सम्बध्नीयादिति पुरुष-विशेषणमात्रतयैव स्वर्गादेः श्रवणात् न पुरुषविशेषणस्य क्रियया साध्यसाधनभावः। अतः यागनिर्वृत्तिमात्रेण कृतः शास्त्रार्थः—इति बादरिमतेन पूर्वः पक्षः। सिद्धान्तस्तु षष्ठाद्ये कर्तृत्वातिरिक्तं नियोज्यत्वमपि पुरुषस्यास्तीति स्थास्यति। नियोज्यश्च ममेदं कार्यमिति नियोगबोद्धा। स्वर्गकामवाक्ये च कामी नियोज्यः। ततश्च कामिनः यागे नियुक्तिः यागस्य फले साधनतामनापादयन्ती न सिद्ध्यतीति नियोज्यविशेषान्वयबलेन याग—स्वर्गयोः साध्यसाधनभावः। एवं आत्मार्थमेव यः स्वर्गं कामयते तस्य नियोगः। तेन स्वार्थमेव स्वर्गं यागेन कुर्यादिति शास्त्रार्थः। तेन कामिनं प्रति फलस्य शेषता। पुरुषश्च स्वर्गकामः स च यजमानसम्मितौदुम्बरी भवतीत्येवमादिषु कर्तृत्वात् फलभागितया कर्मशेषः इति सिद्धान्तः।

४. **कर्माण्यपि।** व्रीहीन् अवहन्ति इत्यादौ साधिकारकार्यसहितं अनधिकारं अवघातादि श्रूयते। तच्च कार्येऽन्वेति। यदि व्रीहीन् इति द्वितीयाश्रुत्या अवघातस्य पदार्थान्वयाधीनतुषविमोकः कार्यं तदा तत् व्रीहिस्वरूपगतं नापूर्वसाधनरूपान्वयी इति नापूर्वानुगुणमवान्तरकार्यं स्यात्। अतः अधिकारानुप्रवेशाय अवघातादेः व्रीहीनिति द्वितीयाश्रुतिं भङ्क्त्वा प्रयाजतुल्यत्वाश्रयणात् प्रकरणविनियोज्यत्वात् आज्यौषधसान्नाय्य--

द्रव्यकसर्वयागार्थत्वात् आज्यादावपि अवघातादिकं कार्यमिति पूर्वः पक्षः। सिद्धान्तस्तु व्रीहीनवहन्ति इति न दर्शपूर्णमासनियोगात् नियोगान्तरमवगम्यते। अपि तु प्रयाजादाविव स एव नियोगः प्रधानार्थव्रीहिद्वारेणानुप्रविशति। अतश्च वाक्यान्तरगतनियोगानुप्रवेशाय तत्सम्बन्धावस्थव्रीह्यादिसंस्कारः तदपेक्षित एवायं प्रतीयते इति तत्कार्यानुप्रवेशात् कार्यान्तरमपीदं न विरोधमावहति। इयांस्तु प्रयाजादेर्विशेषः दृष्टकार्यद्वारकस्त्वयं; तच्च दृष्टं कार्यं तुषविमोकः स च आज्यादौ नास्तीति न तत्रावघातप्रसक्तिः।

५. द्रव्यं च। 'स्फ्यश्च कपालानि च' इति सन्निधापनविधयः। ते किं संयोगाविशेषात् प्रकरणाविशेषाच्च सर्वशक्यक्रियार्थाः उत स्फ्येनोद्धन्तीत्यादिविधिभिः उपसंह्रियेरन् इति संशये सन्निधापनविधिबलेन एते कार्यविशेषनिरपेक्षा एव नियोगार्था अवगम्यन्ते। तत्र केन द्वारेणेत्यपेक्षायां दृष्टमेव द्वारं नियोगोऽनुमन्यते नादृष्टम्। न पुनः दृष्टत्वेपि द्वारविशेषम्। इति पूर्वपक्षः। सिद्धान्तस्तु सम्बन्धविधिना हि शेषिणः सम्बन्धे आपादिते पश्चात् सन्निधापनविधिभिः विनियोगः। अतः यथा शेषिणः सन्निधानापादकस्य सम्बन्धविधेः सन्निधापनविधिः न प्रतिपक्षः तथा स्फ्येनोद्धन्तीत्यस्यापि न प्रतिपक्षः अविशेषादिति सिद्धा अत्रापि व्यवस्था।

६. अर्थैकत्वे। अरुणया एकहायन्या सोमं क्रीणातीत्यत्र आरुण्यस्य न एकहायन्यां वा नियोगे वान्वयसंभवः। एकहायन्यां तावत् नान्वयः आरुण्यैकहायन्योः क्रियार्थयोः परस्परान्वयाभावात्। नापि नियोगेऽन्वयः। युक्तमाकृतेः अमूर्ताया अपि द्रव्यविशेषाध्यवसायहेतुतया क्रियां प्रति साधनभावः गुणस्य तु न कथञ्चित् साधनत्वं; न च गुणस्यापि द्रव्योपादानेऽवच्छेदकतया उपयोगोऽस्ति अनवच्छिन्नस्योपादानासम्भवादिति वाच्यम्। यथा गुणविनियोगाभावेऽपि यत्किञ्चिद्द्रव्यमुपादाय प्रयोगस्सिद्ध्यति तथाऽत्रापि किं न सिद्ध्यतीति नास्ति साधनभावः। अतः वाक्यं भित्वा प्रकरणे सर्वपदार्थेषु आरुण्यनिवेश इति पूर्वपक्षः। सिद्धान्तस्तु क्रयसम्बन्धादारुण्यस्य तत्रैव विनियोगः। क्रयसाधनता च तस्य सम्भवति द्रव्यविशेषणत्वेनारुण्य-

विनियोगात्—यत्रारुण्यं समवेतं तेन क्रयः कर्तव्य इति। न च एकहायनीद्रव्यस्य आरुण्येनाविशिष्टस्योपादानं सम्भवति। न चानुपात्तेन क्रिया निर्वर्त्यते इत्यस्ति क्रियासाधनभावः आरुण्यस्येति सिद्धः क्रये विनियोगः।

७. एकत्वम्। द्रव्यादिविनियोगे चिन्तिते विनियोज्यस्य यो विषयः शेषी तद्गता चिन्ता क्रियते। किं विवक्षितसङ्ख्याकशेषिपर्यन्तो विनियोगः उत नेति। ग्रहं सम्मार्ष्टि इत्यत्र ग्रहगतमेकत्वं विवक्षितं, श्रुतेः यथा शेषिणि ग्रहत्वमाद्रियते तथा एकत्वश्रुतेः एकत्वमाद्रियतां अपेक्षाभावेपि श्रुतिबलेनैवापेक्षा कल्प्यते रक्तपटवत्—इति पूर्वः पक्षः। सिद्धान्तस्तु—यस्य व्यापारान्तरयोगः तस्य संस्कारः ग्रहमात्रं तु व्यापारान्तरयोगि तस्मात् तावन्मात्रस्य संस्कारः। कार्यार्थत्वात् संस्कारस्य। न च ऐन्द्रवायवादिवाक्येषु च एकत्वसंङ्ख्यायुक्ता एव ग्रहाः श्रूयन्ते। यथाभूतः विवक्षितलिङ्गसङ्ख्याकः स्वव्यापारे शेषभूतः तथाभूतस्यैव संस्कारे संबन्धः शेषत्वेन श्रूयते। अतः तेषां शेषित्वेपि सङ्ख्या विवक्षितेति वाच्यम्। सत्यं, शेषिभूतस्य संस्कारः तथापि सङ्ख्यादयः न संस्कारेण संबध्यन्ते। कुतः? यतः पदार्थान्तरसम्बन्धः प्रधानस्यैव भवति न तद्विशेषणस्य राजपुरुषमानयेत्यादिवत् विशेषणस्योपलक्षणमात्रत्वात् इति।

८. संस्कारबाधा। यदि यस्य कार्यमस्ति तस्योपादानं उद्देशकेन पदेन, उपात्तं तु उपलक्षणतया, तदा ग्रहप्रातिपदिकमपि सोमधारकपात्रमात्रोपलक्षणार्थं सोमावसेकनिर्हरण-प्रयोजनस्य चमसेष्वविशिष्टत्वात् इति चमसानामपि सम्मार्गः कार्यः। तथा च ग्रहसम्बन्धा-विवक्षणात् विधिलाघवं इति पूर्वपक्षः। सिद्धान्तस्तु श्रुतितः उपात्तपरिज्ञानं, ग्रहं सम्मार्ष्टीति श्रूयते। तत्र ग्रहेषु सम्मार्गस्य किं प्रयोजनं भवत्विति चिन्तायां सोमावसेकनिर्हरणं दृष्टमिति नान्यत् कल्प्यते। तेन श्रुतिबललब्धसत्ताकं कार्यं न श्रुतिमेवान्यथयितुं समर्थम्। प्रोक्षणादिधर्माणां तु अपूर्वप्रयुक्तत्वात् व्रीहिशब्दः तत्साधनविशेषलक्षणार्थं इति यवेष्वपि प्रोक्षणं युज्यते। इह तु ग्रहेषु चमसेषु च अभ्यासापूर्वभेदात् न तुल्यः साधनभावः।

९. **आनर्थक्यात्।** सप्तदशारत्निर्वाजपेयस्य यूप इत्यत्र किं वाजपेयस्य सप्तदशेत्यन्वयः उत यूपस्य सप्तदशेति। यदि यूपस्येति तदा वाजपेयपदमनन्वितार्थकं स्यात् यूपेन वाजपेयस्यानन्वयात् तस्माद्वाजपेयस्यैवोद्देश्यत्वात् तदर्थतया सप्तदशारत्नित्वविधिः। तत्राश्रयापेक्षायां यूपशब्दः वाजपेयसंबन्धिनं गुणयोगादूर्ध्वपात्रं लक्षयतीति पूर्वपक्षः। सिद्धान्तस्तु चैत्रस्य नप्तेत्यादाविव षष्ठ्याः सम्बन्धिसाम्बन्धवाचित्वसम्भवात् वाजपेस्य परंपरया यूपसंबन्धात् यूपेनैव संबन्धः सप्तदशारत्निताया: इति।

१०. **कर्तृगुणे।** अभिक्रामं जुहोतीति किं कर्मणः कर्मान्वयो विद्यते उत नेति चिन्त्यते। पूर्वपक्षस्तु 'कर्म कर्मसाध्यं न भवति' इति काश्यपोक्तेः अभिक्रमणस्य न जुहोतावन्वयः। अतः वाक्यं भित्वा योग्ये दर्शपूर्णमासकर्तरि अन्वयः। ततश्च प्राकरणिकसर्वक्रियासु कर्तुः अभिक्रमणमिति। सिद्धान्तस्तु णमुलन्तत्वात् अभिक्रामं इत्यस्य जुहोतीत्यनेन संबन्धः प्रतीयते। स च कर्तृद्वारेण निर्वहति। कर्ता च प्रयाजकर्ता सन्निहित एवेति तत्रैवाभिक्रमणमिति।

११. **सन्दिग्धे।** उपव्ययत इत्यत्र उपव्यानं किं सामिधेन्यनुवचनेन सम्बध्यते उत कृत्स्नप्रकरणे इति सन्देहे, इदं पदं अन्विताभिधानाय कर्तारमपेक्षते सामिधेनीकर्ता च सन्निहितः—आकाङ्क्षापूरणसमर्थः इति तत्रैवान्वयः इति पूर्वपक्षः। सिद्धान्तस्तु अनुवादोऽयमनुवचनस्य। न चानुवादेऽनुवाद्यसन्निधिः। ज्ञानान्तरोपस्थापितकालदेशं वस्तु पुनर्वदत्यनुवादः न स्वयं वस्तूपस्थापयति इति असन्निहितमनुवचनं न स्वकर्तारमुपस्थापयति इति प्रकरणात् कृत्स्नप्रकरणे उपवीतनिवेशः इति।

१२. **गुणानां च।** आधानप्रकरणे वारणो यज्ञावचरः इति यज्ञसंबन्धित्वेन श्रूयमाणवारणादिकं आधानाङ्गपवमानेष्टिषु निविशते आनर्थक्यात्तदङ्गेषु इति न्यायात् इति प्राप्ते सिद्धान्तः नैवाधानप्रकरणे पवमानहवींषि श्रूयन्ते। किन्तु प्रकृतितः अग्नयः तेषु प्राप्यन्ते। पवमानेष्टीनां च साध्यभूताग्निसन्निधौ पठितानां अवश्यंभावितादर्थ्यानां गुणभावेन सम्बन्धासम्भवे साक्षात् संबन्धेनैवाग्न्यर्थत्वं; स च संबन्धः प्राधान्यरूपः।

तस्मादनङ्गत्वात् तन्मुखेनाप्याधानानुप्रवेशासंभवात् प्रकरणादुत्कृष्टस्य सतः सर्वार्थता वारणादेर्युक्तेति ।

१३. मिथश्च । सप्तदशारत्निर्वाजपेयस्य यूप इत्यत्र यूपपदश्रवणात् संबन्धिसंबन्धिनि विधानं युक्तं, इह तु वार्त्रघ्नी पौर्णमास्यामनूच्येते वृधन्वती अमावास्यायां इत्यत्र पौर्णमास्यादि-पदं प्रधानवाचकम् । आज्यभागपदं च नास्ति । ततश्च ऋग्द्वयं पौर्णमास्यङ्गत्वेन विधेयं न पौर्णमासीकालिकाज्यभागयोः मन्त्रव्यवस्था इति पूर्वपक्षः । न वाजपेयवाक्ये यूपशब्द-श्रवणात् सप्तदशारत्नित्वस्य विधेयस्याङ्गसंबन्धयोग्यता । अपि तु योग्यतयाप्यन्वयो वाजपेयस्य संभवति इत्येव हेतुः । अत्रापि विधेयमन्त्रयोग्यतानुसारेण व्यवधानेन संबन्धो युक्तः पौर्णमास्यङ्गभूताज्यभागयोः वार्त्रघ्न्यौ इति । तस्मादाज्यभागयोरेव मन्त्रविधानम् ।

१४. आनन्तर्यम् । हस्ताववनेनिक्ते मुष्टीकरोति वाचं यच्छतीत्यादावुक्तं हस्तावनेजनादिकं पुरुषसंस्कारः संस्कृतस्य च कर्मान्तरे योग्यता । ततश्च तेषां सन्निहितो-ऽपराजिस्तरणार्थतेति पूर्वः पक्षः । सत्यं यत्रैव योग्यता कर्तुः । अपि तु कृत्स्नेऽपि प्राकरणिके कर्मणि । आख्यातयोश्च तुमुन्ण्वुलाद्यभावे नैकवाक्यतासंभवः तथा च दर्शपूर्णमासाद्यर्थतेति सिद्धान्तः ।

१४. शेषस्तु । आग्नेयं चतुर्धाकरोति इत्यत्र अनपेक्षितदेवताभावस्य पदार्थ-मात्रस्योपलक्षणत्वात् न विशेषः उपलक्षणस्याग्नेरपेक्षणीयः विधेये तु तद्युक्तम् । तस्मादाग्नेय-पदेनाग्नीषोमीयैन्द्राग्नयोरपि अग्निसंबन्धित्वेन ग्रहणसंभवात् तयोरपि चतुर्धाकरणमिति पूर्वपक्षः । सिद्धान्तस्तु सत्यं यथाभिधेयं लक्षणसंभवे नायथार्थावगतिर्युक्तेति आग्नेयस्यैव चतुर्धा-करणम् ।

अथ द्वितीयः पादः

अर्थाभिधानसंयोगात् । मुख्य एवाभिधेये मन्त्राणां विनियोगः उत गौणेऽपीति विचारः । पूर्वपक्षस्तु अविशेषादुभयाभिधानम् उभयत्र शब्दप्रयोगात् इति । सिद्धान्तस्तु मुख्याभिधानशून्यं गौणाभिधानं नास्ति । तस्मान्मुख्य एव शब्दस्य व्यापारः । गौणे

त्वर्थादवगतिः। अभिधानेन च मन्त्रा उपकुर्वन्ति। मुख्ये चाभिधानम्. न गौणे। अतो न तत्र मन्त्रविनियोगः।

२. वचनात्तु। ऐन्द्रया गार्हपत्यमुपतिष्ठते इत्यत्र किमैन्द्रीमन्त्रेण इन्द्राभिधानं कर्तव्यं उत गार्हपत्याभिधानमिति संशये मुख्यार्थे मन्त्रविनियोगो न्याय्यः। न च मुख्यासंभवात् गौणार्थे विनियोगः। विनियोज्यसामर्थ्यानुसारेण विनियोग इति अनीप्सितार्था द्वितीया, अथ वा गार्हपत्यमुपेत्याभिधत्त इत्यर्थो भवतु इति पूर्वपक्षः। सिद्धान्तस्तु—उपदेशनिबन्धनं कार्यम्। न कार्येऽवगतेऽन्यतः उपदेशवर्णनम्। ऐन्द्रया गार्हपत्यं—इत्युपदेशः अतः उपदेशात् गार्हपत्याभिधानम्। अनीप्सितद्वितीयाङ्गीकारेपि क्रियाफलभागित्वावश्यंभाव एव। अध्याहारस्तु जघन्यः।

तथाह्वानमपीति चेत्। त्रिरवघ्नन्नाह्वयतीत्यत्र किं अवघातकाले इति काललक्षणाभयात् त्रिः इति पाक्षिकोऽनुवादः उत नित्यवदन्वितत्रिरभ्यासबलेन काललक्षणा आश्रीयतामिति संशये त्रिरभ्यासः क्वचित्, द्विरभ्यासः अन्यत्र शाखासु दृश्यते। ततश्च पक्षे परं शब्दार्थहानात् त्रिरिति पाक्षिकानुवादः न पुनर्लक्षणेति पूर्वपक्षः। नित्यवदन्वितस्य त्रिरभ्यासस्य पक्षेऽन्वयबाधः प्राप्नोति। तस्माद्वरं लक्षणेति सिद्धान्तः।

तथोत्थानविसर्जने। पूर्ववदेवात्र पूर्वपक्षसिद्धान्तौ। अधिकाशङ्का तु पूर्वत्र त्रिः इत्येतावद्विधीयते अन्यत्सर्वमनूद्यते इति अवघ्नन्नित्यत्र काललक्षणा युक्ता। इह तु कालसंयोगो न प्राप्तः स विधातव्यः। न च विधौ लक्षणेति ऐन्द्रीमन्त्रवत् लक्षणया प्रैषस्यान्यार्थत्वं इति पूर्वपक्षः। सिद्धान्तस्तु---पूर्वत्र प्रैषार्थानन्वयवत् अत्रापि अचेतनत्वात् उत्थानविसर्जनयोः प्रैषार्थानन्वयः अतः काललक्षणैवेयम्। विधिवाक्ये लक्षणयापि अशेषपदार्थान्वयात् इति।

५. सूक्तवाकेच। सूक्तवाकेन प्रस्तरं प्रहरति इत्यत्र सूक्तवाकस्य हरणे साधकत्वानुपपत्तेः प्रहरणेन होमात्मको यागो लक्षयितव्यः। न चासौ युक्तः आख्यातार्थे प्रधाने

लक्षणाप्रसङ्गात् । वरं सूक्तवाकेन काल एव लक्ष्यतामिति पूर्वः पक्षः । सिद्धान्तस्तु न हरणेन यागो लक्षणीयः यागे सति हरत्यर्थस्य प्राप्तेः । प्रक्षेपो हरणं होमरूपे यागे उपाधिभूतो हरतिः अर्थप्राप्त इति

कृत्स्नोपदेशात्। स च सूक्तवाकः कृत्स्न एव दर्शपूर्णमासे प्रयोक्तव्यः सूक्तवाको वर्तते इति सकले मन्त्रे पठ्यमाने लोके व्यपदेशात् । स चाभिन्नवाक्याभिप्रायेण । अन्यथा बहुवचनप्रसङ्गात् । एवं च सूक्तवाकेन प्रस्तरं प्रहरतीत्यत्र कृत्स्न एवोभयत्र प्रयोज्य इति प्राप्ते सूक्तमनेनोच्यते इति व्युत्पत्तेः सूक्तवाकशब्देन वाक्यमुच्यते । न तत्समूहः वाक्येन हि सूक्तमुच्यते यतः । भिन्नानि चैतानि वाक्यानि । तस्मात् न सकलस्य विनियोगः । एककार्यनिबन्धनस्तु एकवचनप्रयोगः ।

लिङ्गक्रम। लिङ्गमपि श्रुत्यादिवत् प्रमाणान्तरनिरपेक्षं विनियोजकं उत सापेक्षमिति संशये पूर्वपक्षः निरपेक्षं लिङ्गं विनियोजकमिति । ततश्च काम्ययाज्यानुवाक्ययुगलानां न क्रमात् काम्येष्टिमात्रे विनियोगः अपि तु लिङ्गात् सर्वत्रेति प्राप्ते ब्रूमः सामान्यसबन्धे सति शेषिविशेषे लिङ्गं विनियोजकं काम्येष्टिकाण्डं काम्ययाज्यानूवाक्याकाण्डमिति समाख्याभ्यां परस्परसंबन्धे सति लिङ्गं याज्याकार्ये मन्त्रं विनियोजयति ।

अधिकारे च। ज्योतिष्टोमे आग्नेय्या आग्नीध्रमुपतिष्ठत इत्यत्र किं यावल्लिङ्गा मन्त्रा ग्रहीतव्या उत प्रकृता एवेति संशये विधेयस्य प्रकृताभिधानसामर्थ्यं न संभवति इति यावल्लिङ्गग्रहणम् । सिद्धान्तस्तु प्रकृतेऽपि विधेयप्रत्ययो भवत्येव । अतः प्रकृतत्यागे प्रमाणाभावात् प्रकृतस्यैव ग्रहणम् कार्यान्तरविनियुक्तत्वे तु प्रकृतत्वं बाधकं, नेह तथा । नीलोत्पलं, गामानय इत्यादौ सन्निहितप्रतीतेर्दर्शनात् ।

लिङ्गसमाख्यानाभ्याम्। भक्षे हि माविशेत्यादेः भक्षानुवाकस्य कृत्स्नस्य भक्षणे विनियोगः उत तत्तद्भागस्य ग्रहणसम्यग्जरणादिषु इति संशये समाख्यया सामान्यसंबन्धे सति लिङ्गस्य विनियोजकत्वात् भक्षानुवाकसमाख्या लिङ्गं नियमयतीति कृत्स्नस्य भक्षणे विनियोगः ।

ग्रहणादिलिङ्गान्तरं तु विशेषणप्रकाशकं न विरुध्यते। ग्रहणादिविशिष्टभक्षणे विनियोगः कृत्स्नस्येति। सिद्धान्तस्तु—भक्षानुवाकसमाख्या भक्षणद्वारेण प्रवर्तमानापि क्रतुसंबन्धिता-मनुवाकस्यापादयत्येव, सिद्धे च क्रतुसंबन्धे यथालिङ्गं सिद्धो विनियोगः। ग्रहणाद्यपि चोदितं अर्थाक्षिप्तं वा भवतु अनुष्ठेयत्वात् स्मरणीयमेव। न चात्र ग्रहणादिप्रकाशकानां अन्यपरत्वे प्रमाणमस्ति।

गुणाभिधानात्। पूर्ववत् मन्द्राभिभूतिः केतुर्यज्ञानां वाक् जुषाणा सोमस्य तृप्यतु इति अननुष्ठानार्थकतृप्त्यभिधानो मन्त्रः तृप्तिप्रकाशने विनियुज्यतां पूर्ववत् इति पूर्वः पक्षः। अननुष्ठेयस्य स्मरणानर्हत्वात् तत्र तात्पर्याभावात् समाख्यया भक्षण एवास्य विनियोगः न च तृप्तिस्मरणं अदृष्टकल्पनापेक्षया लक्षणाया एव युक्तत्वात्।

लिङ्गविशेष। इन्द्रपीतस्येति किं तृतीयासमासः उत बहुव्रीहिः? आद्ये ऐन्द्र एव समन्त्रकं भक्षणं इतरेषां तु उपदेशतः मन्त्रो नास्ति। सर्वप्रदानानां समानविधानत्वात् ऊहस्याप्यसंभवः। तथापि अनुष्टुप्छन्दस इति षोडशिनि नमनदर्शनात् ऐन्द्रः सोमो गृह्यते मीयते च इति वचनाच्च इतरप्रदानानां विकृतित्वं अङ्गीकृत्य चिन्ता। तथा च यथादेवतमूह इति।

पुनरभ्युन्नीतेषु। सशेषे चमसे पुनस्सोमे देवतान्तरार्थं गृहीते यदाश्रावणं कृतं तेन पूर्वदेवताशेषस्यापि देवतान्तरार्थमुपादानात् पूर्वदेवतापनयात् न सा देवतोपलक्षणी-येति पूर्वः पक्षः। राद्धान्तस्तु—ग्रहणेन हि देवतासंबन्धो द्रव्यस्यापद्यते। तदुद्देशेना-ग्रहणात् तच्छेषः चमसस्थः देवतान्तरोद्देशेन न गृह्यते। यच्च गृहीतं तावन्मात्रस्यैवा-श्रावणमिति पूर्वदेवता उपलक्षणीया।

पात्नीवते। पूर्वाधिकरणव्यतिरेकमात्रमिदम्। योऽसौ आग्रयणे द्विदेवत्यशेषः सोऽप्याग्रयणादस्मात् वक्ष्यमाणदेवतोद्देशेन गृहीतः इति पूर्वदेवतापनयात् तद्भक्षणे इन्द्रवाय्वादयो नोपलक्षणीयाः।

त्वष्टारम्। सजूर्देवेन त्वष्ट्रा सोमं इति सहार्थकसजूश्शब्दश्रवणात् पाने त्वष्टुरनुप्रवेशात् त्वष्टापि देवता। अतस्सोप्युपलक्षणीय इति पूर्वपक्षः। नोपलक्षणीयः, अचोदितत्वात्। चोदिता हि देवता भवति। न च मन्त्रश्चोदितुं प्रभवति। अतः नोपलक्षणम् इति सिद्धान्तः।

त्रिंशच्च। त्रयस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्व इति मन्त्रवर्णात् त्रयस्त्रिंशद्देवताः अग्निदत्तेन हविषा माद्यन्तीति पातृत्वदर्शनात् तासामपि देवतात्वमिति पूर्वपक्षः। मादयितृत्वेनैव अग्नेः प्राधान्यात् स एव देवता न त्रयस्त्रिंशदिति राद्धान्तः।

वषट्कारश्च। देवतात्वात् अनुवषट्कारदेवताप्युपलक्षणीयेति पूर्वपक्षः। सत्यं देवता, तथापि यदुद्देशेन सोमो गृहीतः सा देवतोपलक्षणीया। नानुवषट्कारदेवता तथा इति सिद्धान्तः।

छन्दः प्रतिषेधस्तु। स्थितादुत्तरं पूर्वपक्षिणः—एकयागत्वात्तु समानविधानं स्यात् तस्मादैन्द्र एव समन्त्रकं भक्षणं इतरत्तु अमन्त्रकमेवेति।

ऐन्द्राग्ने तु। ऐन्द्राग्ने अभ्यासे इन्द्रपीतस्येति समन्त्रकं भक्षणम्। आग्नेये देवतातद्धितत्वात् केवलाग्निदेवताको गृह्यते ततश्च नाग्नीषोमीये चतुर्धाकरणमित्युक्तम्। इह तु न देवतात्वेनोपलक्षणं अपि तु पानेन, यत्तु उभाभ्यां पीयते तत् एकेनापि पीतं इति शक्यते वक्तुं—इति पूर्वपक्षः। पाने प्रमाणाभावात् देवतात्वेनैवोपलक्षणम्। अतः ऐन्द्राग्नस्यैन्द्रत्वाभावात् अमन्त्रकं भक्षणम्।

छन्दश्च। देवतया तुल्यं छन्दः। ततश्च अनेकछन्दस्के ज्योतिष्टोमे गायत्रछन्दस इत्यस्यानन्वयात् उत्कर्षो मन्त्रस्येति पूर्वः पक्षः। सोमस्य एकछन्दसोऽभावात् गायत्रछन्दस इति अयोगव्यावृत्त्या विशेषणम्। ततश्च नोत्कर्षः इति सिद्धान्तः।

सर्वेषाम्। स्थितादुत्तरम्। इन्द्रपीतस्येति बहुव्रीह्याश्रयणेन सवनविशेषणत्वात् सर्वे सोमाः समन्त्रकाः। न च तत्पुरुषप्राबल्यम्। तृतीयासमास एव न संभवति। न हि इन्द्राय दत्तः तेन पीयते—इति।

तृतीयः पादः

श्रुतेर्जाताधिकारः स्यात्। उच्चैर्ऋचा क्रियते इत्यस्य किं यदृचा ऋग्वेदेन ऋक्-प्रायशाखाधीतेन विधिना क्रियते यत्तेनानुष्ठेयत्वेन ज्ञाप्यते तदुच्चैः कर्तव्यमित्यर्थः उत यदृचा मन्त्रेण क्रियते तदुच्चैरिति। ऋक्पदस्य ऋचि मुख्यत्वात् मन्त्रधर्मोऽयम्। उपक्रमस्थ-वेदपदमपि वेदसाधनत्वेन ऋक्परमस्तु इति पूर्वपक्षः। राद्धान्तस्तु उपक्रमे यः पदार्थो ज्ञातो भवति तद्विशेषप्रतिपत्तिरेवोपसंहाराद्भवति न पुनस्तद्विरोध्यर्थान्तरम्। ऋक्शब्दस्तु लक्षणया वेदमनुवदति।

गुणमुख्यव्यतिक्रमे। याजुर्वैदिकमाधानं तत्र 'य एवं विद्वान् वारवन्तीयं गायति' इति सामवैदिकमङ्गं विधीयते। तत्र अङ्गविधिः आत्मीयं विधेयं विधाय पश्चात् प्रधानेन एकवाक्यतां भजते ततश्च तत्र सामवैदिकः स्वरः, उत प्रधानेनैकीभूतस्यैव विधेयत्वात् तत्र याजुर्वैदिकमुपांशुत्वं इति संशये पूर्वपक्षः—वाक्यान्तरानपेक्षेण स्ववाक्येनैव स्वार्थो विधेयः अतः सामवैदिकः स्वर इति। सिद्धान्तस्तु सत्यं विहितस्वार्थ एव प्रधानेन एकीभवति न पुनः अङ्गतामपि विधाय। प्रधानविधिरेवाङ्गतां विधत्ते। अङ्गतया च वारवन्तीयस्य प्रयोगः न स्वरूपज्ञानादङ्गानामनुष्ठानम् दुःखरूपत्वात्। अतः अङ्गविधिः प्रयोगविधिनिबन्धनं उच्चैष्ट्वं न बाधितुमर्हतीति।

३. **भूयस्त्वेनोभयश्रुति।** यत्रोभयत्र प्रधानश्रुतिः तत्र क्व प्रधानचोदनेति संशयः अगृह्यमाणविशेषत्वादुभयत्र प्रधानविधिरिति पूर्वपक्षे सिद्धान्तः प्रयोगः प्रमेयः प्रयोगविधिः प्रमाणं, सर्वत्र च प्रमेयेऽवगते प्रमाणमवगम्यते तेन भूयोङ्गानि यत्रावगम्यन्ते तत्रैव प्रयोगविधिः अल्पाङ्गावगमे तु प्रयोगानवगमात् प्रमाणानवगतिरिति।

असंयुक्तं प्रकरणात्। श्रुतेरेव प्रयाजादेरङ्गतासिद्धेः प्रकरणाख्यं प्रमाणान्तरं मास्तु। अधिकारनियोगेन प्रयाजाद्यन्वयात् समिधो यजतीत्येवमादिभिः परमापूर्वमन्वितमेवा-भिधीयते इति श्रौतीयं शेषता— इति पूर्वपक्षः। प्रथमं सामान्येन अपूर्वैदमर्थ्यमात्रेणान्वय-

संभवात् न करणोपकारकतया विशेषान्वयसंभव इति विशेषान्वयाभिधानार्थं प्रकरणं नाम प्रमाणान्तरमभ्युपेयमिति सिद्धान्तः ।

क्रमश्च । क्रमो नाम न प्रमाणान्तरं युक्तम् । यतः ऐदमर्थ्येनान्वयः शाब्दः सोऽविशेषतः सर्वप्रधानार्थताहेतुः न तु क्रमभेदादन्वयभेदः इति दब्धिर्नामासीति मन्त्रः अनुमन्त्रणशक्तः यावत्प्रधानदेवतानुमन्त्रणार्थः न तु क्रमात् उपांशुयाजनिवेशीति पूर्वपक्षः । सिद्धान्तस्तु नियोगैदम्पर्येणान्वयः शाब्दः । स एव स्थानाख्यसन्निधिभेदात् व्यवस्थाप्यते केवलम् अन्यथा विकल्पाद्यापत्तेः ।

आख्या चैवम् । न समाख्यायाः वेदार्थावगमहेतुत्वं संभवति लौकिकत्वात् । अन्यथा पचतीत्यादेरपि वेदार्थाङ्गभूतपाकविधायकत्वं स्यात् इति पूर्वपक्षः । समाख्याया लौकिकत्वेपि वेदार्थावगमहेतुत्वम् । यद्यपि समाख्या लौकिकी तथापि वैदिकपदार्थस्याभिधायिकी । पचतीत्यादिकं तु न वैदिकार्थसंबद्धम् । अतः कर्मसु कर्तृविशेषाश्रवणात् कर्तृविशेषापेक्षायां समाख्यया होत्रादयः कर्तृत्वेन विज्ञायन्ते—इति सिद्धान्तः ।

श्रुतिलिङ्ग । श्रुत्या तावत् ऐन्द्री गार्हपत्योपस्थाने विनियुज्यते लिङ्गेन च इन्द्रोपस्थाने । न च विरोधः । प्रमाणद्वयेन उभयत्र विनियोगाविरोधात् प्रतिप्रधानं गुणावृत्तेः द्विरयं मन्त्रः प्रयोक्तव्य इति पूर्वपक्षः । सिद्धान्तस्तु—अधिकारनियोगसन्निधौ पठितस्य मन्त्रस्य ग्राहकेण गृहीतस्य श्रुत्या प्रथममेव अवगतशेषभावस्य कार्यान्तराकाङ्क्षाभावात् लिङ्गेन विनियोगानुपपत्तिः । न च श्रौतलिङ्गविनियोगयोः तुल्यकालता । शीघ्रप्रवृत्तत्वाच्छ्रुतेः इति ।

लिङ्गवाक्ययोर्विरोधे । पूर्वपक्षः—यावन्ति पदानि प्रयुज्यन्ते तावन्ति संभूय एकमर्थं प्रतिपादयन्ति शक्नुवन्ति चैतान्येकमर्थं प्रतिपादयितुं इति प्रथममेकवाक्यता, पश्चाल्लिङ्गेन विनियोगः । अतो वाक्यमेव प्रथमतरं विनियोगहेतुः इति लिङ्गात् प्रबलमिति । सिद्धान्तस्तु—न पाठमात्रात् यजुः पदानां संभूय बोधकता । किन्तु अनुष्ठेयैकार्थतयैव अनुष्ठेयार्थधीश्च लिङ्गादिति लिङ्गस्यैव प्राबल्यम् ।

वाक्यप्रकरणयोर्विरोधे। कार्यार्थः सकलपदार्थानामन्वयः अतो वाक्येनापि यस्य विनियोगः तस्यापि कार्येणैव, प्रकरणेनापि यस्यान्वयः तस्यापि कार्येणेति तुल्यबलत्वं प्रकरणवाक्ययोः। यद्वा इतिकर्तव्यताकाङ्क्षा हि कार्यम्। तदेव प्रकरणं तद्विरोधे वाक्येनान्वयो बाध्यत इति पूर्वपक्षः। सिद्धान्तस्तु वाक्येन क्लृप्तान्वयस्य विनियोज्यस्य प्रकरणात् अन्वयान्तरं कल्पयितुं शक्यते विनियुक्तस्य विनियोगाभावात्। अतः वाक्यमेव प्रबलमिति।

क्रमप्रकरणयोर्विरोधे। प्रकरणेन प्रमाणेन सर्वकरणसंबन्धे कर्तव्ये अवश्यं सर्वैः सह सन्निधिः कल्प्यः असन्निहितसंबन्धानुपपत्तेः आकाङ्क्षादीनां संबन्धे हेतुत्वात्। न च क्लृप्तं सन्निधिमनादृत्य सन्निधानकल्पना युक्ता। अतः क्रम एव बलीयान् इति पूर्वपक्षः। सिद्धान्तस्तु क्रमात् प्रकरणं बलीयः। नह्यनाकाङ्क्षितस्य क्रमः संबन्धहेतुः। न च सन्निधानमात्रात्सम्बन्धः भार्या राज्ञः पुरुषो देवदत्तस्येत्यादावपि तदापत्तेः। आकाङ्क्षास्वीकारे च तदेव प्रकरणं इति प्रकरणात् विदेवनादीनां सर्वत्रान्वयः।

क्रमसमाख्याविरोधे। शुन्धध्वं इति मन्त्रः स्वसन्निहितसान्नाय्यपात्रशोधनार्थः सन्निधिपाठात्; समाख्यया च पौरोडाशिकमित्यनया पुरोडाशपात्रशोधनार्थः। ततश्च उभयोः विशेषविषयत्वात् उभयत्र विनियोगः इति पूर्वपक्षः। सिद्धान्तस्तु क्रमो बलीयान्। वैदिको ह्यसौ समाख्या पुनः लौकिकी। समाख्या संबन्धनिमित्ता सती सन्निधानमवगमयति लौकिकत्वेन न वेदार्थे साक्षात्सम्बन्धं विदधाति। क्रमः पुनः स्वयमेव सन्निधिः। न च प्रत्यक्षसन्निधाने सति सन्निधानान्तरकल्पना घटते इति।

अहीनो वा। द्वादशाहीनस्येति द्वादशोपसत्ता किं ज्योतिष्टोमस्य उत अहीनस्य विधीयत इति सन्देहे कार्यार्थत्वान्नियोगस्य प्रकृतनियोगसम्बन्ध एव न्याय्यः। न च प्रकरणस्य वाक्यात् प्राबल्यम्। सन्निधानाविशेषे हि वाक्यं बलीयः। अत्र तु अहीनकार्यसन्निधिरेव नास्तीति प्रकरणप्राबल्यमिति पूर्वपक्षः। सिद्धान्तस्तु पदार्थान्वयः ऐदमर्थ्यसंबन्धे कारणम्।

न च वाक्यात् अन्वयावगमे सति प्रकरणात् अन्वयानुमानं युक्तम्। ततश्च अहीनार्थतेति।

द्विबहुत्वयुक्तम्। पूर्ववदेव पूर्वोत्तरपक्षौ। अधिकशङ्का तु प्रकृतेऽपि ज्योतिष्टोमे द्विबहुयजमानकत्वान्वयोऽस्तु एककर्तृकेपि यथाशक्तिप्रयोगे सहायस्वीकारात् पत्नीसंबन्धापेक्षया वा अनेकयजमानकत्वं इति पूर्वपक्षः। सिद्धान्तस्तु—अधिकारस्तावदेकस्यैव ज्योतिष्टोमे। अतो यथाशक्त्यनुष्ठानेपि एकस्यैवाधिकारपूर्वककर्तृत्वं न द्वयोः। न च पत्न्यभिप्रायं बहुवचनं यस्मादेकशेषे केवलायाः स्त्रियः ग्रहणं नास्ति स्त्रीमात्रस्य कचिदप्यधिकाराभावात् एव शेषे अवश्यंभावी द्वितीयोऽपि पुमानेवावगम्यते। न पत्न्यभिप्रायः इतरेतरयोगः। आधाने तु श्रौतासम्भवाल्लक्षणाङ्गीकारः।

जाघनी। किं जाघन्युद्देशेन पत्नीसंयाजा विधीयन्ते उत विपरीतमिति संशयः। पूर्वपक्षस्तु जाघन्युद्देशेन पत्नीसंयाजा विधीयन्ते समानपदोपात्तं पत्नीसंयाजाख्यं कर्म परित्यज्य पदान्तरोपात्तविप्रकृष्टद्रव्यविधानं न सम्भवति। तथा च यत्र जाघनी पशुयागे तत्र पत्नीसंयाजाः प्रतिपत्तितया विधीयन्ते इति अप्रयोजकत्वं, पत्नीसंयाजे जाघनीविधौ प्रकरण एव निवेशात जाघनी उपादेयेति पूर्वपक्षः। सिद्धान्तस्तु जाघन्येव पत्नीसंयाजेषु विधीयते। पशुयागे जाघनीविधाने पत्न्यर्थोऽपरो विधेयः स्यात्। कर्मविधौ प्रकरणान्तरात् कर्मान्तरविधानं च स्यात्। अतः दर्शपूर्णमासयोः पत्नीसंयाजेषु जाघनीविधिः इति।

सन्तर्दनम्। दीर्घसोमे सन्तृद्ये धृत्यै इति विहितं सन्तर्दनं प्रकृतावेव निविशते। तस्यापि यजमानदैर्ध्येण लतादैर्ध्येण वा तदुपपत्तेः इति पूर्वपक्षः। सिद्धान्तस्तु सोमापेक्षयैव दीर्घता मन्तव्या समानाधिकरणसमासप्राबल्यात। धृत्यै इति च सोमातिरेकं विना दारणाशङ्काभावात् नार्थवाद उपपद्यते। अतः संस्थासु विवेश इति सिद्धान्तः।

सङ्ख्यायुक्तम्। न प्रथमयज्ञे प्रवृञ्ज्यात् इत्यत्र प्रथमशब्दः ज्योतिष्टोमपरः उत तदीयप्रथमप्रयोगपर इति सन्देहे एष वाव प्रथमो यज्ञ इति यज्ञशब्दसामानाधिकरण्यात्

ज्योतिष्टोमवचनता। अतस्सर्वस्मिन्नपि ज्योतिष्टोमे न प्रवर्ग्यः इति पूर्वः पक्षः। सिद्धान्तस्तु य एतेनानिष्ट्वा अथान्येन यजेत इत्युक्तेः प्रयोगस्यैव प्रथमत्वमवगम्यते। कथं ? यः इति कर्तृसम्बन्धितया प्रतीयमानत्वात्। कर्तुश्च प्रयोगेण सम्बन्धः न प्रयोज्येन यागेन। तेन प्रथमप्रयोग एव प्रतिषेधः। इति।

पौष्णं पेषणम्। **तत्सर्वार्थम्।** पूषाप्रपिष्टभागः इति श्रुतं पेषणं पौष्णे चरौ पुरोडाशे पशौ च सर्वत्र स्यात् वाक्यसङ्कोचे हेत्वभावात्। यद्यपि पुरोडाशे प्राप्तमेव। पशौ चाकृतिनाशापत्तिः; तथापि आद्ये पौष्णतया अप्राप्तं ; पशौ च वचनान्नायुक्तता इति पूर्वपक्षः। सिद्धान्तस्तु— चरावेव पेषणम्। पुरोडाशे पौष्णतया प्राप्तेरनुपयोगात् कार्यत एव प्राप्तेरिष्यमाणत्वात्। पशौ आकृतिनाशात्। चरौ तु पिष्टकृतेपि चरुताव्यवहारात्।

एकस्मिन्। तदिदं पेषणं किं केवले पौष्णे विधीयते उत अन्यसहितेपि इति सन्देहे द्विदेवताकेपि पेषणं स्यात् अन्यथा प्रपिष्टभागो न स्यात् पूषा। अदन्तकवचनं च देवतानिमित्तकं पेषणं दर्शयति। इति पूर्वपक्षः। सिद्धान्तस्तु कार्यप्रयुक्ता धर्माः कार्ये असम्भवन्तः तत्सम्बद्धे यागेऽवकल्पन्ते। ततश्च पूषदेवताके यागे पेषणविधिः। न च द्विदेवताके पूष्णो देवताभावः सम्भवति। अतः केवलपूषदेवताके विधिरिति।

तृतीयस्य चतुर्थः पादः

विवीतम्। यद्यपि त्रिविवन्निगदाधिकरणेनैव निवीतवाक्यस्यार्थवादत्वं प्राप्तं तथापि प्रकरणाङ्गतया पक्षेप्यप्राप्तेर्विधिरस्तु निवीतादीनामिति अधिकाशङ्का। प्रायेणार्थवादानां न प्रकरणाङ्गयोग्यार्थकत्वमित्यभिप्रायः। सिद्धान्तस्तु प्रकरणाङ्गत्वमशक्यम् मनुष्याणामिति श्रवणात् स्वतन्त्राधिकारापत्तेः। किन्तु पुरुषधर्मता। पुरुषधर्मश्चेत् 'प्रायादि'त्यनेन अर्थवाद इति।

दिग्विभागः। निवीतं प्रायादित्यनेन स्तुत्यर्थं युक्तम्। प्रतीच्यभिमुखत्व—मुदीच्यभिमुखत्वं वा न तथेत्यधिकाशङ्का तद्वदित्यनेन निरस्यते। प्रत्यङ्मुखतया प्रातः,

उदङ्मुखतया मध्यान्हे च सुखं मनुष्याश्चेष्टन्ते इति अत्रापि तत्प्राप्तिर्वर्तत एवेत्यर्थवादता।

परुषिदित। परुषि दिनादिषु मूलाग्रयोरन्तराले बर्हिरादिलवनं सौकर्यप्राप्तम्। अश्नुतः प्रायेण रोगप्रदत्वात रौद्रः, विदग्धः मलिनवर्णः निर्ऋत्यर्हः इति प्राप्तिः प्रदर्शनीया।

अकर्मक्रतुसंयुक्तम्। दर्शपूर्णमासगतः नानृतं वदेदिति प्रतिषेधः पुरुषार्थतया प्राप्तस्य स्मार्तस्यानृतवदननिषेधस्यैवानुवादः न तु प्रकरणात् क्रत्वर्थः। यदि क्रत्वर्थायामेव प्राप्तौ प्रतिषेधः तदा सः क्रत्वर्थः स्यात्। न चैतदस्ति। तस्मात् प्राप्तिमात्रात प्रतिषेधः इति पुरुषार्थ इति पूर्वपक्षः। सिद्धान्तस्तु—नेदं स्मृतिवाक्यस्य मूलं प्रकरणपठितत्वात् प्रकरणाङ्गभूतप्रतिषेधसमर्पकमेव। एवं चेत् अन्तरङ्गक्रत्वर्थतां परित्यज्य अनुवादत्वं न युज्यते। लाघवात् क्रत्वर्थतया अनृतवदने या प्रवृत्तिः तदाश्रयमेवेदं प्रतिषेधशास्त्रम्। तदतिक्रमे च क्रतुवैगुण्यात् श्रौतं प्रायश्चित्तम्।

अहीनवत्। दर्शपूर्णमासयोः 'मलवद्वाससा न संवदेत' इति क्रत्वर्थः प्रतिषेधः उत पुरुषार्थ इति संशये पूर्ववत् क्रत्वर्थ इति पूर्वपक्षः 'तामपरुध्य यजेत' इति तस्या अपरोधविधेः संवादस्याप्राप्तत्वात् पुरुषार्थो निषेध इति सिद्धान्तः। इदं चाधिकरणं न संवदेत इति संवादप्रतिषेध इति कृत्वाचिन्तितम्। वस्तुतस्तु उपगमनप्रतिषेध एवायमिति।

अप्रकरणे तु। हिरण्यं भार्यमिति द्वितीयानिर्देशात् धारणसंस्कृतस्य हिरण्यस्य क्रतौ उपयोगकल्पनात् क्रत्वर्थं हिरण्यधारणमिति पूर्वपक्षः। सिद्धान्तस्तु प्रकृतकर्माभावात न कर्मार्थता। तस्मात द्रव्यसंस्कारानर्थक्यात् पुरुषधर्मोऽयम् इति। फलं तु अदृष्टमेव।

शेषोऽप्रकरणे। येन कर्मणेर्त्सेत् तत्र जयान् जुहुयात् इत्युक्तजयादयः स्मार्तश्रौतसर्वकर्माङ्गम् उत वैदिकस्यैवेति शेष सन्देहः। अविशेषात् सर्वार्थतेति। तत्र

अष्टकादौ आहवनीयाभावेपि गुणलोपे न मुख्यस्येति न्यायेन आहवनीयं परित्यज्यापि अन्यत्र जयाहोम इति पूर्वपक्षः। सिद्धान्तस्तु यस्मिन्नङ्गिनि आश्रीयमाणे विनियोज्यस्वरूपं न बाध्यते तस्यैव शेषित्वं युक्तं आहवनीययुक्तं चाङ्गिस्वरूपं; तदनुरोधेन वैदिकेष्वेव विनियोगः तत्राहवनीयसम्भवात्, स्मार्ते तदभावात्।

दोषात्तु। किं लौकिकेऽश्वप्रतिग्रहे प्रतिग्रहीतुरिष्टि उत वैदिके दाने दातुः इति संशये स्मार्ते अश्वप्रतिग्रहे इयमिष्टिः केवललौकिके प्रीतिदानादौ प्रतिग्रहशब्दाप्रयोगात्। इति पूर्वपक्षः। सिद्धान्तस्तु यथाश्रुतजलोदरव्याधिः नाश्वप्रतिग्रहात् लोकसिद्धः। नाप्येतद्वचनात्, वाक्यभेदापत्तेः। तस्मात् उपक्रमगतं पदजातं अश्वरक्षणपोषणादिक्लेशपरं व्याख्येयम्। तच्च वैदिकेप्युपपद्यते। तस्मात् वैदिके दाने इति सिद्धान्तः।

अचोदितं च। एवं दातुरधिकारे स्थिते किं दातृकर्तृकेयमिष्टिः उत प्रतिग्रहीतृकर्तृकेति संशये पूर्वपक्षः—पोषणादिदोषस्य प्रतिग्रहीतृगतत्वात् विपरिणामे चावश्यके यो गृह्णाति तं निर्वापयेदिति विपरिणामो युक्तः दातुपक्रमात् दातैवाधिकारी सः ऋत्विजं निर्वापयेदित्यर्थः इति। सिद्धान्तस्तु—दातृपरत्वादुपक्रमस्य निर्वापयेदिति कल्पनापेक्षया उपसंहारे प्रतिग्राहयेदिति विपरिणामो युक्तः, उपक्रमानुरोधादिति।

पानव्यापच्च। पूर्वाधिकरणपूर्वपक्षवत् अत्रापि लौकिके सोमवमने इदं प्रायश्चित्तं पूर्वत्र दोषे मानाभाव उक्तः अत्र तु सोमवमने इन्द्रियग्लानिः प्रत्यक्षं दृश्यते इति अधिकाशङ्का। सिद्धान्तस्तु न लौकिके सोमपाने ग्लानेर्दोषता तस्य वमनार्थत्वात्। क्रतुशेषभक्षणं तु न वमनार्थं सम्यग्जरणादिश्रुतेः। अतः क्रतुगतवमने इदं प्रायश्चित्तमिति।

तत्सर्वत्र। किं यावन्तः सोमवामिनः तेषां सर्वेषामपि इदं प्रायश्चित्तं उत यजमानवमने इति सन्देहे अविशेषात् सर्वार्थमिति प्राप्ते स्वामिन एवेदं प्रायश्चित्तं ऋत्विजामप्यङ्गीकारे "यः सोमं वमिति सः सौमेन्द्रं चरुं निर्वपेत्, इति यजमानपक्षे, ऋत्विक्पक्षे तु तं याजयेदित्येवं वाक्यभेदकल्पनापत्तिः। इति सिद्धान्तः।

सर्वप्रदानम्। आग्नेयोऽष्टाकपाल इत्यादौ सर्वस्य हविषस्त्यागः उत द्व्यवदानमात्रस्येति संशये सर्वस्येति पूर्वपक्षः। स्विष्टकृदादयस्तु आग्नेयचोदनानुरोधात् हविर्धर्मकं द्रव्यान्तरमुत्पाद्य कर्तव्याः। अथ वा गौणः यज्यर्थो जुहोत्यर्थश्च ग्राह्य इति पूर्वपक्षः। सिद्धान्तस्तु आग्नेय इत्यादौ द्रव्यदेवतासंबन्धमात्रमवगम्यते। स च सम्बन्धः एकदेशत्यागेनापि। ततश्च स्विष्टकृदादिदर्शनमुपपद्यते। द्व्यवदानस्यैव त्यागः।

अप्रयोजकत्वात्। किमेकस्माच्छेषात् शेषकार्यं कर्तव्यं उत सर्वेभ्यः शेषेभ्यः प्रत्येकं शेषकार्याणि कार्याणीति संशये एकस्माच्छेषात् कृते शेषकार्ये शास्त्रार्थः कृत इति पूर्वपक्षः, सिद्धान्तस्तु यावच्छेषं शेषकार्यावृत्तिः। शेषसंस्कारद्वारं हि प्रधानस्योपकार्यत्वं न च शेषे विशेषोऽवगम्यते अतोऽगृह्यमाणविशेषात् प्रतिप्रधानमावृत्तिः।

एकस्माच्चेत्। तच्च शेषकार्यमविशेषाद्यतः कुतश्चिदादाय कर्तव्यमिति पूर्वपक्षे प्रधाने एव निमित्ते सम्भवति तेनैव नैमित्तिकस्य कृतत्वात् नेतरेषां निमित्ततेति सिद्धान्तः।

भक्षाश्रवणात्। यागं प्रति द्रव्यस्य द्व्यवदानमात्रेणोपसंहारात् शेषस्य अन्यत्राविनियोगात् इदं ब्रह्मणे इति चतुर्थीश्रवणाच्च शेषेण ब्रह्मादीनां परिक्रय इति पूर्वपक्षे; सिद्धान्तः शेषस्यापि द्रव्यस्य द्व्यवदानार्थतयोत्पत्तेः यागार्थत्वं, तेन नान्यत्र विनियोगमर्हति इति नानेन परिग्रह इति।

पञ्चमः पादः

आज्याच्च। उपांशुयाजे संशयः किं ध्रुवास्थादपि आज्यशेषात् अङ्गप्रधानसाधारणत्वात् नावदेयं उत अङ्गप्रधानशेषमपि प्रधानशेषमित्यवदेयमिति संशये, साधारणत्वेपि शेषत्वाविशेषादवदेयमिति प्राप्ते; सिद्धान्तः—न साधारणेऽवदेयं, केवलप्रधानशेषत्वाभावात् केवलप्रधानशेषादेव हि स्विष्टकृदवदानं पुरोडाशादिषु। जुह्वादौ तु सर्वहोमात् न शेषः। चमसे तु शेषे प्रमाणमस्तीति।

साकं प्रस्थाय्ये। युक्तमुपांशुयाजे शेषो नास्तीति। साकं प्रस्थाय्यस्य तु विकृतिभूतत्वात शेषकार्याणि स्युरिति पूर्वपक्षे कुम्भीभिरभिक्रमणस्य दृष्टार्थत्वात् सर्वहोमः। ततश्च शेषाभावान्न शेषकार्याणि।

सौत्रामण्यां। सौत्रामण्यां उच्छिनष्टि न सर्वहुतं जुहोतीति शेषसद्भावश्रवणात् शेषकार्याणि स्युः इति पूर्वपक्षः। तस्य शेषस्य परिक्रीतेन ब्राह्मणेन भक्षणविधानात् शेषाभावान्न शेषकार्याणि।

द्रव्यैकत्वे। सर्वपृष्ठायामिष्टौ पट्कर्माणि। पुरोडाशश्चैकः। तत्र प्रतिप्रधानं शेषकार्यप्राप्तेः शेषकार्यावृत्तिरिति प्राप्ते अगृह्यमाणविशेषतया य एव शेषसंस्कारः कृतः स एव सर्वेशां शेषाणामित्यनावृत्तिः।

ऐन्द्रवायवे। द्विरैन्द्रवायवस्य भक्षयति इत्यत्र भक्षणेन सोमसंस्कारः स च सकृद्भक्षणेनैव कृत इति न द्विः भक्षणोपपत्तिः। तस्मात् प्रयोगान्तरापेक्षया द्विरित्यनुवाद इति प्राप्ते, सत्यं भक्षणेन सोमः संस्क्रियते तथापि वचनात् द्विर्भक्षणमेव कर्तव्यमिति सिद्धांन्तः।

सोमेऽवचनात्। सोमे अग्रबिन्दुनिपातेनैव शास्त्रार्थः कृतः। ततश्च शेषसद्भावात् किं भक्षणेनैव शेषप्रतिपत्तिः उत नेति संशये वचनादृते न भक्षणं शक्यते विधातुं, द्विरैन्द्रवायवस्येति तु यदा भक्षयति तदा द्विः इत्युपपत्तेः इति पूर्वपक्षे सिद्धान्तः। यदि नित्यवद्भक्षणं न प्राप्नोति तदा द्विरैन्द्रवायवस्य भक्षयतीत्येतान्येव विशिष्टभक्षणविधायकानीति सिद्धान्तः।

चमसेषु समाख्यानात्। चमसेषु वचनाभावान्नास्ति भक्ष इति पूर्वपक्षः। यदि भक्षणं न स्यात चमसत्वमेवैषां न स्यात्। तस्मात होतुश्चमस इत्यादिवचनानि भक्षविधायकानि।

उद्गातृचमसम्। प्रोद्गातृणां इत्यत्र किमेकस्योद्गातुश्चमसः, उत सर्वेषां ऋत्विजां उत असुब्रह्मण्यानां उद्गातृगणप्रविष्टानां उत ससुब्रह्मण्यानां तेषां इति संशये, बहुवचनस्य पाशवल्लक्षणया प्रथमः पक्षः, द्वितीयस्तु वचानार्थस्याविवक्षापेक्षया प्रातिपदिकस्य ऋत्विङ्मात्र-परत्वं न्याय्यमिति, तृतीयस्तु उच्चैर्गायन्तीति योगेन त्रयाणामिति। राद्धान्तस्तु योगापेक्षयारूढेः प्राबल्यात् एकोद्गातृप्रवचनाध्येतृत्वात् उद्गातृशब्देन चतुर्णां लक्षणेति।

ग्रावस्तुतः। सर्वे हारियोजनस्य भक्षयन्तीत्यत्र यथाचमसमन्यान् इति चमसि-प्रस्तावात् चमसिनामेव भक्षः ग्रावस्तुतः अतथात्वान्न भक्ष इति पूर्वपक्षे सर्वे इति निस्सन्दिग्ध-प्रकृतसकलर्त्विक्परस्य सर्वशब्दस्य वाक्यशेषाच्चमसिष्ववस्थापनमयुक्तम्। तस्मात्सर्वे भक्षयेयुः इति सिद्धान्तः।

वषटकाराच्च। वषट्कर्तुः प्रथमभक्ष इत्यत्र प्राथम्यस्य अकारकत्वात न भक्ष-विशेषणत्वं, ततश्च विशिष्टविधानासम्भव इति पूर्वपक्षः। सिद्धान्तस्तु सत्यं तथापि पदद्वयेन एकविशिष्टार्थविधानोपपत्तिः विशिष्टार्थस्य पदार्थान्तरेण पश्चात्सम्बन्धः। समासे नीलोत्पल-मानयेत्यत्र नीलोत्पलस्येव। प्राथम्यभक्षयोश्च गुणगुणिभावेन सम्बद्धयोः पश्चात् करोत्युपात्तेन विधिना सम्बन्धः।

होमाभिषवाभ्यां च। अभिषुत्य हुत्वा भक्षयति इति भक्षविधानम्। नात्र पूर्वः पक्षः। प्रकारान्तरासम्भवात भक्षस्यैव विधानात।

प्रत्यक्षोपदेशात्। होतृचमस इत्यादिसमाख्याभिः होत्रादीनां चमससम्बन्धावगतेः तेषामेव तत्र भक्षः। होमाभिषवनिमित्तभक्षणं तु ग्रहादौ इति पूर्वपक्षे; अभिषवनिमित्तकोऽपि भक्षः चमसेषु स्यात एकभक्षणेनेतरस्य बाधायोगात। न च विरोधः, यदि समाख्यया बाधः तर्हि विरोधः स्यात। इह तु वचनात् प्राप्तिः वचनानां च वचनान्तराविरोधेन कल्पना।

एकपात्रे। कः प्रथमं भक्षयेदिति विचारे अध्वर्युहस्तगतत्वात् सोमपात्रस्य स एव प्रथमं भक्षयेदिति शङ्का। वषट्कर्तुः प्रथमभक्ष इति तु न प्राथम्यविधायकः तस्य न्यायप्राप्तप्राथम्यानुवादकत्वादिति प्राप्ते वचनाच्चेति सूत्रं क्त्वाचिन्तोद्धाटनपरम्।

वचनात्। अननुज्ञातेन भक्षणीयं उतानुज्ञातेनेति संशये असति वचनेऽनियमः। इह तु वचनसत्त्वात् तत्र च मन्त्राम्नानात् वैदिकेनैवेति सिद्धान्तः। इदमधिकरणद्वयं उत्तरचिन्ताशेषः।

तत्रार्थात्। प्रतिवचनं तु किं लौकिकवाक्येन उत मन्त्राम्नानात् मन्त्रेणेति संशये लौकिकेन वाक्येनेति पूर्वपक्षः। मन्त्राम्नानस्य उपहूत इत्यस्य उपह्वयस्वेत्येतत्पूर्वभावित्वात् तच्छेषत्वमेव न तु स्वातन्त्र्येण अनुज्ञाने विनियोगः इति प्राप्ते, लिङ्गेन विनियोगे कृते पूर्वतैवाल बाध्यत इति सिद्धान्तः।

तदेकपात्राणाम्। अनुज्ञापनं प्रतिवचनं च अविशेषेण एकपात्राणां भिन्नपात्राणां च भवेदिति पूर्वपक्षे। दृष्टार्थत्वानुरोधेन एकपात्रे भक्षणकाल एवेदमनुज्ञानमिति सिद्धान्तः।

याज्यापनयनेन। यजमानस्य याज्येत्यादौ यत्र यजमानेन याज्यापाठः तत्र वषट्कारः तन्निमित्तकं भक्षणं च होतुरेव इति प्राप्ते यत्रैव होता प्राप्तः तत्रैव यजमानोऽपि नियुज्यते सवषट्कारे च स प्राप्त इति तत्रैव यजमानः इति तन्निमित्तकभक्षोऽपि तस्यैवेति राद्धान्तः।

फलचमसः। फलचमसः भक्षविकारमात्रं उत यागविकारोऽपीति संशयः। पूर्वपक्षस्तु भक्षविकार एव तत्रैव विकारश्रवणात् तमस्मै भक्षं प्रयच्छेत् इति। सिद्धान्तस्तु फलचमसः यागविकारोऽपि। यागीयद्रव्यसंस्कारसंस्कार्यत्वात् स च संस्कारः भक्षणमिति। यागकारणत्वं विना फलचमसस्य भक्षणाङ्गत्वमेवानुपपन्नमिति।

अनुप्रसर्पिषु। राजसूये राज्ञोऽधिकारात् यजमानचमसे किं दश ब्राह्मणा भक्षयेयुः ततश्च शतं ब्राह्मणास्सोमं पिबन्तीति विधिः, उत दश राजन्या भक्षयेयुः शतमिति तु सृष्टिन्यायेनानुवाद इति। तत्र चोदकप्राप्तभक्षानुवादेन शतं ब्राह्मणाः इत्यनेकगुणविधौ वाक्यभेदः स्यात इति प्राप्ते राजन्यानिवृत्तौ ब्राह्मणशब्दस्य अयथार्थानुवादत्वप्रसङ्गात। न च लक्षणा विध्यङ्गीकारेण यथार्थत्वसम्भवे लक्षणायोगात्।

अथ षष्ठः पादः

सर्वार्थमप्रकरणात्। अनारभ्याधीता पर्णता किं प्रकृतिविकृत्योर्निविशते उत प्रकृतावेवेति संशये चोदकादनारभ्य विधिर्बलीयान् ततश्च प्रकृतावुपदेशप्राप्तां विकृतावतिदेशप्राप्तां स्रुचमुद्दिश्य अनारभ्यवाक्येन पर्णताविधिरिति प्राप्ते विकृतौ स्रुक्सम्भवार्थं चोदकापेक्षत्वे अनारभ्यविधिना पूर्वं प्रकृतौ उपदेशेन पर्णताविधानमङ्गीकार्यं सर्वलक्षसम्पाद्यत्वादितिकर्तव्यतायाः। ततश्च पुनः उभयसाधारण्येन पर्णताविधाने द्विरुक्ततापत्तिरिति प्रकृतावेव निवेशः।

प्रकरणविशेषात्तु। सामिधेनीषु पाञ्चदश्यं प्राकरणिकं साप्तदश्यं अनारभ्याधीतं तदुभयमपि श्रुत्या विनियुज्यते। पदार्थसम्बन्धमुखेनाङ्गग्रहणात् न तु सन्निधानमात्रेणेति पूर्वः पक्षः। सिद्धान्तस्तु सन्निधानमात्रेणैव पदार्थानां ग्रहणात् पाञ्चदश्यस्य प्राबल्यमिति।

नैमित्तिकम्। काम्यं गोदोहनादि विकृतौ निविशते प्रकृतौ चमसबाधकत्वे उपदेशबाधः स्यात, ततश्च क्रतोर्वैगुण्यं; विकृतौ पुनः कार्यत एव साद्गुण्यावगतिर्भवति तत्र पुरुषार्थेनापि कार्यनिर्वृत्तौ नास्ति वैगुण्यावगतिः इति प्राप्ते उपदेशस्य दृष्टार्थत्वात् पुरुषार्थेन कृते कार्ये चमसो बाध्यते ततश्च न क्रतुवैगुण्यम्।

इष्ट्यर्थम्। किं पवमानेष्टिषु अधिकारः कल्प्यतां ता एव प्रधानं, उत आधानेऽधिकारकल्पना तदेव प्रधानमिति। तत्राङ्गबाहुल्यात् भूयस्त्वेनोभयश्रुतीति न्यायेन इष्टयः प्रधानं आधानं तदङ्गमिति प्राप्ते सिद्धान्तः द्वयोरप्यधिकाराभावात् अग्नीनां क्रतुद्वारा सप्रयोजनत्वात् द्वयोरग्न्यर्थत्वमिति।

तत्प्रकृत्यर्थं। किं क्रत्वर्थानामग्नीनामाधानं उत आहितानां क्रत्वर्थतेति संशयः प्रथमपक्षे पर्णतादिवत् प्रकृतिक्रत्वर्थमाधानं स्यात् द्वितीयपक्षे अग्न्यर्थमेवाधानं अग्नीनां तु सर्वक्रतुषूपयोगः। पूर्वपक्षस्तु क्रत्वर्थानामाधानं भवितुमर्हतीति। सिद्धान्तस्तु आहिताग्नेरधिकारात् अग्निस्वरूपे अदृष्टरूपे वैयर्थ्याभावाच्च अग्न्यर्थमाधानमिति।

तासामग्निः। इदमत्र चिन्त्यते—योऽयमतिदेशः स किं यावदुपकारकं अङ्गं अनङ्गं वा तत्सर्वमतिदिशति उत अङ्गमेवेति। उपकारकमात्रमतिदिश्यते, ततश्च पवमानेष्टिषु अग्निसद्भावात् तत्साधनानां पवमानेष्टीनामतिदेशः इति पूर्वपक्षः। सिद्धान्तस्तु यावदुपकारजनकमङ्गभूतं तावदतिदिश्यते यत्तु उपकारजनकपदार्थजनकं तत् अनङ्गभूतं नातिदिश्यते इति पवमानेष्टीनामग्न्यर्थानां नातिदेशः पवमानेष्टिषु।

तुल्यः सर्वेषाम्। पशुधर्माणां विशसनादीनां ज्योतिष्टोमे पशुत्रयसाधारण्यं उत पशुद्वयसाधारण्यं उताग्नीषोमीयार्थता इतरयोः अतिदेशात्प्राप्तिरिति सन्देहे ज्योतिष्टोमगतानां धर्माणां आनर्थक्यात्तदङ्गेष्विति न्यायेन पशुत्रयेष्ववतार इति प्रथमः पक्षः। द्वितीयस्तु औपवसथ्येऽह्नि तेषां विधानं अग्नीषोमीयः तत्रानुष्ठीयते सवनीयस्तु तस्मिन् दिने विधीयत इति तस्यापि सन्निहितत्वात् द्वयार्थतेति। सिद्धान्तस्तु सवनीयस्यौपवसथ्ये गुणमात्रविधेः न सन्निधिः अतः क्रमाख्यसन्निधेः अग्नीषोमीयमात्रार्थता।

दोहयोः। यथा पशुधर्माः सन्निधानादग्नीषोमीयार्थाः तथा दोहधर्माः सायं दोहार्थाः इति पूर्वपक्षः। सिद्धान्तस्तु दधिपयसोर्नैव कालभेदेन विधानं किन्तु एककालेनैव।

स्थानं तावत् सायंदोहस्य विद्यते तत्तु प्रकरणाद्दुर्बलम्। अतः दोहधर्माः उभयार्था इति।

तद्वत्सवनान्तरे। ग्रहधर्माणामपि प्रातस्सवनविशेषे सन्निहितत्वात् प्रातस्सवनिकग्रहाणामेवेति पूर्वपक्षे सुत्याकाले धर्मविधिः न सवनविशेषे। सुत्याहः प्रचार एव सवनत्रयविभागेनोपदिश्यते। न पुनः प्रातरादिकालमाश्रित्य धर्मविधय इति सर्वग्रहार्था एव ग्रहधर्मा इति।

रशनाच। अस्तु ग्रहधर्माणां सवनभेदेन सर्वग्रहार्थता। रशना तद्धर्माश्च दैक्षसन्निधौ श्रुतत्वात् तदर्था इति पूर्वपक्षे। उच्यते— यद्यपि अग्नीषोमीयसन्निधानं रशनायाः तथापि सर्वपशूनां यूपस्य तन्त्रत्वात् एकयूपसंबन्धेन सर्वपशुष्वेव रशनायाः शेषत्वं तन्मुखेन तद्धर्माणां च।

आराच्छिष्टम्। ग्रहधर्माः सन्निहिता ये प्रकरणपठिताः ग्रहाः तेष्वेव निविशन्ते न तु अनारभ्याधीतयोः अंशुदाभ्यग्रहयोः इति पूर्वपक्षे न सन्निहितमात्रं उद्देशकेन शब्देनोच्यते। अपि तु प्रयोजनवान् यस्य धर्मविधिः सः। ततश्च यत्सौमिकं ग्रहजातमुपात्तं तत्सर्वं प्रयोजनवदिति उद्देश्यत्वात् तत्रापि ग्रहधर्माः।

अग्न्यर्थम्। इष्टकाधर्माः अकृष्णत्वादयः स्थूलरूपचितिभेदात् यच्चितिसन्निधौ धर्माः श्रुताः तच्चितिशेषभूतेष्टकासु स्युरिति अधिकाशङ्का। सिद्धान्तस्तु यद्यपि चितिभेदः सर्वचितिषु अपूर्वैक्यात् अपूर्वसम्बन्धित्वेन धर्मविधानात् अनारभ्याधीतास्वपि धर्माः स्युरिति।

नैमित्तिकम्। सोमधर्मविधयः फलचमसेषु तथा चमसधर्माः गोदोहने समानविधाना उत नेति सन्देहे तुल्यबलत्वात् प्रकरणस्य समानविधाना इति पूर्वपक्षे, सत्यं प्रकरणं तुल्यं धर्मवन्तस्तु चमसादयः नित्याः गोदोहनादयस्तु नैमित्तिकाः नित्यवदधिकारविधिना

गृहीता धर्माः नित्यद्वारका एवेति युक्तम् आनुगुण्यात । नैमित्तिकेषु तु स्थानापत्तेः धर्मप्राप्तिर्भवतीति सिद्धान्तः ।

प्रतिनिधिश्च । मुख्यधर्माः प्रतिनिधौ कार्यतः प्राप्यन्ते फलचमसादादिवेति पूर्वपक्षे व्रीह्याद्यपचारे नीवाराः न कार्यसाधनतया प्राप्यन्ते, किन्तु स्वरूपेण व्रीह्युपदेश-संपत्त्यर्थम् । तेन व्रीहय एव किञ्चिद्विकृता नीवारा इति औपदेशिका एव धर्माः तेषु ।

नियमार्था । यत्र पुनः प्रतिनिधिः श्रूयते सोमाभावे पूतीकादिः तत्र न समानविधानं सोमधर्माणाम् । यदि प्रतिनिधिरयं तदा कार्यत एव प्राप्तेः विधिवैयर्थ्यं अतः रसान्तरमेवेदं साधनत्वेन विधीयत इति पूर्वपक्षे अत्र प्रतिनिधिर्नियम्यत इति नास्ति विध्यानर्थक्यं इति सामानविध्यमेव ।

संस्थास्तु । दीक्षणीयादिधर्माणां उक्थ्यादिसंस्थासु अग्निष्टोमे च सामानविध्यं उत नेति सन्देहे य एव सोमेन यजेतेति यागश्चोदितः स एवोक्थ्यादिष्वपि; ग्रहविशेषाणामेव च फलाय चोदना । ततश्च यागैक्यात सामानविध्यमिति पूर्वपक्षे; अग्निष्टोमान्ता ये ग्रहणा-ख्यास्संस्काराः तत्पर्यन्तैव यागस्यानुष्ठानचोदना अत ऊर्ध्वं काम्यग्रहाः यागावृत्तिमाक्षिपन्ति । ततश्च उक्थ्यादिषु न यागचोदनया धर्मा ग्रहीतुं शक्यन्ते—कार्यतश्च तेषु धर्मप्राप्तिः इति सिद्धान्तः ।

सप्तमः पादः

प्रकरणाविशेषात् । बर्हिर्धर्माः प्रकरणात् प्रधानार्था इति पूर्वपक्षे सिद्धान्तः श्रुत्यादिभिरेवाङ्गप्रधानार्था इति ज्ञायते बर्हिषि हवींष्यासादयतीति । न च वाक्येन पिण्डपितृयज्ञवर्तिनि बर्हिष्यपि स्यादिति साम्प्रतम् । ग्राहकेण गृहीतं विनियुज्यते ग्राहकश्च दर्शपूर्णमासप्रयोगविधिः तत्सन्निधानाद्धर्माणामिति नान्यत्र प्राप्तिः ।

फलसंयोगात्तु। किं वपनादयः कर्तवस्थस्य पुरुषस्य संस्कारा उत अधिकृतावस्थस्येति संशये कर्तुः कर्माङ्गत्वात् तत्संस्कारा अपि तद्द्वारा कर्माङ्गं भवेयुः अधिकृतसंस्कारत्वे न कर्माङ्गत्वोपपत्तिः तस्य प्राधान्यात्। तस्मात् कर्तृसंस्कारा इति पूर्वः पक्षः। सिद्धान्तस्तु यदर्थः कर्तृभावः तदर्थः संस्कारोऽपीति युक्तम् अधिकारसिद्ध्यर्थं कर्तृत्वम्।

चिकीर्षया च संयोगात्। तथाभिधानेन। प्रधानहविष एव वेद्यामासादनं युक्तम् प्रधानस्यैव चिकीर्षितत्वात्। यदेव चिकीर्षितं तदर्थान्येवाङ्गानीत्येव युक्तम्। तथा चतुर्होत्रा पौर्णमासीमभिमृशेदिति विहिताभिमर्शनं प्रधानहविष एव। पौर्णमासीशब्दस्य प्रधानमात्रवाचित्वात्। अतः नाङ्गहविषामभिमर्शनं मन्त्रेणेति पूर्वपक्षे सिद्धान्तः; को ब्रूते प्रधानं न चिकीर्ष्यत इति। अधिकारनिर्वृत्त्यर्थं तस्य चिकीर्षा साङ्गं च प्रधानमधिकारं निर्वर्तयति। अतः वेद्यभिमर्शनयोः अङ्गप्रधानार्थता।

दीक्षादक्षिणम्। सोमे दीक्षा दक्षिणा च साङ्गादधिकारनिर्वृत्तः साङ्गस्य सोमस्येति पूर्वपक्षः। दीक्षा सोमस्य दक्षिणास्सोमस्येति वचनात् प्रधानार्थेति सिद्धान्तः।

तथा यूपस्य। अर्धमन्तर्वेदि इति विहिता वेदिः यूपाङ्गं उत नेति संशयः। श्रुतेरङ्गमिति पूर्वपक्षे बहिर्वेदिपदेनैकवाक्यत्वात् न श्रुत्यर्थविधानं एकवाक्यताभङ्गात्; किन्तु देशविशेषलक्षणेति सिद्धान्तः।

सामिधेनी। अत्र हविर्धानाङ्गता सामिधेनीनां विपरीतं वा युक्तं न तु पूर्ववत् देशविशेषलक्षणा, पूर्ववत् बहिर्वेदिपदसंबन्धाभावात् इति पूर्वपक्षे हविर्धानमिति हविस्सम्बन्धस्य सामिधेनीरिति समिन्धनसम्बन्धस्य प्रतीतेः श्रौतार्थान्वयानुपपत्तेः देशविशेषलक्षणा।

शास्त्रफलम्। अधिकारविधिसामर्थ्यात् अधिकारिणः कर्तृत्वं श्रूयते। यदि परः पदार्थान् कुर्यात् कर्तृत्वमेव हीयेत। अतः यजमान एव यागीयसर्वपदार्थेषु कर्ता। परिक्रयस्तु गौणः इति प्रथमः पक्षः। स्वयं वा अन्यो वा कुर्यादिति द्वितीयपक्षः। तत्रापि

द्रव्योत्सर्गं स्वयं कुर्यात् शिष्टं तु स्वयं वा अन्यो वेत्यनियमः इति। सिद्धान्तस्तु उत्सर्गं स्वयं कुर्याद्यजमानः। शेषः अन्यैरेव कर्तव्य इति यतः श्रुतिः परिक्रयं नित्यतया ब्रूते।

तत्रार्थात्। उत्सर्गभिन्नविषयेषु परिक्रीतकर्तृत्वे परेषां सङ्ख्याया अनियमः एकस्मिन्नपि बह्वीनां समाख्यानां वरणानां चाविरोधात् इति पूर्वपक्षः। सिद्धान्तस्तु आध्वर्यवादिसमाख्याभेदात् संज्ञिनामपि भेदः चोदनावगतत्वाच्चेषाम्। एकस्यानेकसंज्ञास्तु लोके यत्र दृश्यन्ते तत्र भवतु नाम, वेदे तु संज्ञयैव संज्ञिभेदावगमात् न विप्रतिपत्तिः।

चमसाध्वर्यवश्च। चमसाध्वर्यवः किं ऋत्विगन्तर्भूताः उतान्ये इति संशये अन्तर्भूता एव, होतृकाणां चमसाध्वर्यव इति षष्ठीनिर्देशस्तु परस्परव्यपदेश इति पूर्वपक्षः। सिद्धान्तस्तु सर्वे एव ऋत्विजः षष्ठ्यन्तेन निर्दिश्यन्ते अतः तद्भिन्ना एव ते। उत्पत्तिविधावेव च च संज्ञाभेदादिति।

उत्पत्तौ। ते किं अनियता उत बहव एवेति संशये अनियमः एको वा बहवो वेति पूर्वपक्षः। नित्यवत् चमसाध्वर्यून् वृणीते इति बहुवचनश्रवणात् नियतसङ्ख्याका इति सिद्धान्तः।

दशत्वं च। स्थिते बहुत्वे किं अनियमः उत कपिञ्जलवत् त्रित्वं उत दशैव इति संशये—अनियमे त्रित्वे वा प्राप्ते, दशपेये दशत्वदर्शनात् दशैवेति सिद्धान्तः।

शमिता च। शमिता च संज्ञाभेदात् भिन्न एव इति प्राप्ते नात्र भेदः उत्पत्तिनिबन्धनो हि भेदः उक्तः अत्र च नोत्पत्तिः, संज्ञान्यत्वं तु यौगिकत्वादुपपन्नम्।

उपगाश्च। होतृकाणां चमसाध्वर्यव इतिवत् उपगा इति ऋत्विगन्तरसम्बन्धश्रवणात् इमे ऋत्विग्भ्योऽन्ये इति पूर्वपक्षः। उत्पत्तेरश्रवणात् अर्थान्तराभावात् उपगाः गानोपचयकारिणः ऋत्विगन्तर्भूताः।

विक्रयी त्वन्यः। सोमविक्रयी तु ऋत्विगेव। विक्रयस्याचोदितत्वेपि क्रयोपादानशेषतया विक्रयोऽप्यङ्गं ततश्च ऋत्विक्कर्तृकतेति पूर्वः पक्षः। सिद्धान्तस्तु लोभादेव विक्रेतुराक्षेपतः सिद्धेः द्रव्यार्जनवत् नाङ्गत्वम्। ततश्चान्य एव कर्तेति।

कर्मकार्यात्। सर्वेषां ऋतु-जननिमित्तोपपत्तेः चमसाध्वर्यूणामपि ऋत्विक्त्वमिति प्राप्ते, सौम्यस्य यज्ञक्रतोः सप्तदश ऋत्विजः इत्यत्र उत्पत्तावेव ऋत्विक्शब्दप्रयोगात् यथाश्रुति सप्तदशानामेवर्त्विक्त्वम् न परिसङ्ख्या दोषः ऋतुयजननिमित्तत्वे सर्वेषामापत्तेः इति सिद्धान्तः।

नियमस्तु। के ते ऋत्विज इति संशये ऋत्विग्भ्यो दक्षिणां ददाति इति येभ्यो दक्षिणा निर्दिष्टा त एव नान्ये इति सिद्धान्तः।

स्वामिसप्तदशाः। किं यजमानेन सह सप्तदशर्त्विजः उत अन्ये सप्तदशेति संशये यजमानादन्ये; तेषामेव कर्मकरत्वात् न स्वामी कर्मकरः भृत्यवत् एकधर्मयुक्तानां चावान्तरसङ्ख्या युक्तेति पूर्वपक्षे; स्वामी यजमान एव सप्तदशः यद्यपि स न भृत्यः तथापि यागकर्तृत्वेन यागीयकर्मकरत्वमस्ति इति अवान्तरसङ्ख्योपपत्तिः न च अधिकारित्वेन यजमानः सप्तदश इति सिद्धान्तः।

ते सर्वार्थाः। किं यावत्पुरुषकार्यं तावत तैः कर्तव्यं उत यावद्वचनं इति, अग्नयश्च यावत्कार्यं कर्तुं शक्यते तावत्कार्यार्थाः उत यावद्वचनमिति सन्देहे यावत्कार्यमिति पूर्वपक्षे; सिद्धान्तः यदि वचनानि नित्यानुवादतया कल्प्येरन् तदा सर्वपुरुषकार्यार्थता ऋत्विजां तथा अग्नीनां भवेत् न तु तथा। तस्माद्यावद्वचनमेव कार्यमृत्विग्भिरिति।

तस्योपदेश। यद्येन समाख्यायते तत्तेन कर्तव्यमित्युत्सर्गः वचनात् विशेषसमाख्यानाच्च तस्यापवादः।

प्रैषानुवचनम्। प्रैषमात्रे अनुवचनमात्रे मैत्रावरुणः कर्तेति पूर्वपक्षे सहचरितासहचरितयोः सहचरितप्रत्ययः इति प्रसिद्धेः प्रेष्यति चानुचाह इति द्वयोः सहचारात् प्रैषानुवचने मैत्रावरुणः कर्तेति सिद्धान्तः।

चमसान्। चमसैः चमसाध्वर्यवो जुहुयः नाध्वर्युः। तथा सति तेषां चमसाध्वर्यु-समाख्यानुपपत्तेरिति पूर्वपक्षे; अध्वर्युशब्दस्योत्पत्तिनिमित्तत्वादनेकार्थत्वमन्याय्यमिति चमसेषु अध्वर्युरिव इति विग्रहात् मुख्याध्वर्युणैव होमः कार्यः। तस्यान्यत्र व्यापृतत्वे एते जुहुयुः अत एव समाख्योपपत्तिः इति सिद्धान्तः।

वेदोपदेशात्। किं श्येनः साङ्गः उद्गात्रा कर्तव्यः अध्वर्युणा च वाजपेयः उत षोडशभिरपीति संशये, औद्गात्रं आध्वर्यवं इति समाख्यानात् आद्यपक्षे प्राप्ते–सिद्धान्तः–प्रकृतौ येन पदार्थाः कृताः तेनैव विकृतौ कार्याः इति षोडशभिरेव कार्यम्। विकृतिगतविशेष-समाख्या तु कल्प्यत्वात् दुर्बलः।

अथाष्टमः पादः

स्वामिकर्म। आध्वर्यवसमाख्याते ब्राह्मणे पठितः परिक्रयः आध्वर्यव एव समाख्या-बलादिति प्राप्ते; अधिकारश्रुतेर्यजमानस्य सर्वत्र कर्तृत्वावगमात् प्रधानभूताया विरोधात् समाख्याबाधेन याजमान एव परिक्रयः। अध्वर्युपरिक्रीतऋत्विक्कृतपदार्थेषु यजमानस्य कारयितृत्वस्याप्यसम्भवात्।

संस्कारास्तु। वपनादीनां फलिसंस्काराणामाध्वर्यवत्वात् अध्वर्युणैव करणम् इति पूर्वपक्षे सिद्धान्तः—एते पुरुषसंस्काराः। न संस्कर्तुं पुरुषाः परिक्रीयन्ते अपि तु कारयितुम्। अतः तादर्थ्याभावात् न परिक्रयद्वारेण यजमानस्य वपनादिकर्तृत्वमिति अधिकारश्रुतिविरोधात् समाख्याबाधः।

तपश्च। परिक्रयस्य क्लेशापनुत्त्यर्थत्वात् तपसश्च क्लेशरूपत्वात् तस्य ऋत्विक्कर्तृकता इति प्राप्ते ब्रूमः संस्काररूपत्वसामान्यात् वपनादिवत् तपोऽपि याजमानमेव।

गुणत्वाच्च। हिरण्यमालित्वादिषु तत्तद्वेदपठितेषु न समाख्यया कर्तृनियमः इति प्रतिप्रधानावृत्त्या सर्वैः ऋत्विग्भिः कर्तव्या एव।

तथा कामः । 'यदि वर्षुकः पर्जन्यः स्यात्' इत्युक्तः कामः आर्त्विज्य एव य एव माता तस्यैव काम इति प्रतीतेरिति प्राप्ते यजमान एव साङ्गे कर्मण्यधिक्रियते । अतः गुण-फलमपि यजमानस्यैव । ऋत्विक् तु गुणभावेन सम्बद्ध इति न तस्य फलम् ।

मन्त्राश्च । आयुर्दा अग्नेस्यायुर्मे देहि—इत्यादयः आशीर्मन्त्राः ऋत्विजा प्रयोज्याः तत्फलं च तस्यैव समाख्याबलादिति प्राप्ते प्रबललिङ्गाद्याजमानाः, यजमानस्य हि फलमाशासितव्यमिति ।

द्व्याम्नातेषु । ये मन्त्राः याजमाने चाध्वर्यवे चाम्नाताः ते एकेनैव प्रयोज्याः एककार्यत्वान्मन्त्राणामिति प्राप्ते एकस्यानुष्ठानस्मरणं अन्यस्य प्रत्यवेक्षणमिति प्रयोजनवत्त्वात् द्वाभ्यामपि प्रयोक्तव्या इति सिद्धान्तः ।

ज्ञाते च वचनम् । वल्लप्तीर्यजमानं वाचयतीत्यत्र किं विदुषोऽधिकारः उताविदुषः इति सन्देहे अविदुषः अधिकारे विधेः दृष्टार्थत्वं स्यात । अतः अविदुषोऽधिकार इति प्राप्ते ब्रुवन्तमेव हि वाचयतीति शब्दो ब्रवीति नाब्रुवतः प्रवृत्तिमाह । दृष्टार्थत्वं च उक्तस्योच्चारणेनापि भवति । अतः विदुष एवाधिकारः ।

याजमाने । द्वन्द्वानि किमाध्वर्यवे पदार्थाम्नानात् पदार्थकर्त्रा यजमानेन कार्याणि उत याजमाने समभ्याशीकरणात यजमानेन कार्याणीति संशये आध्वर्यवमिति सामान्य समाख्यायाः याजमानमिति विशेषसमाख्यया बाधात् याजमानानि । पदार्था अपि याजमाना एव इति प्राप्ते ; पदार्थास्तावत आध्वर्यवा एव अक्रियमाणे पदार्थे न यजमानेन समभ्याशः कर्तुं शक्यत इति पदार्था अप्याध्वर्यवा एवेति सिद्धान्तः ।

विप्रतिषेधे । यो होता सोऽध्वर्युः इत्यादौ एकस्य ऋत्विगन्तरकार्योपदेशे प्रत्यक्षविहितेनैककार्यकारिणा आतिदेशिकस्य बाधः प्रत्यक्षविहितस्यानन्यगतित्वात् आतिदेशिकस्य प्रकृतावर्थवत्त्वेति सिद्धान्तः ।

प्रैषेषु। प्रैषप्रैषार्थौ किमेकेन कर्तव्यौ उत द्वाभ्यामिति संशये अग्नीदग्नीन् विहर इति प्राप्तकालार्थमादाय उभयमध्वर्युणा कर्तव्यमिति पूर्वपक्षे मध्यमपुरुषाविवक्षाप्रसङ्गात् न प्राप्तकाले लोट् किन्तु प्रैष एवेति अशक्यत्वात् द्वाभ्यामिति सिद्धान्तः।

अध्वर्युस्तु। किमध्वर्युः प्रैषरूपमर्थं करोतु उतान्य इति संशये यदन्वञ्च स्फ्यं धारयेदिति अर्थवादात् अन्यः प्रैषं करोतीति प्राप्ते अग्नीदग्नीन् विहर इति मन्त्रलिङ्गात् अध्वर्युरेव प्रैषकर्ता। अर्थवादात् मन्त्रस्य अनुष्ठानबोधकत्वेन बलीयस्त्वात्। अर्थवादस्तु गुणवादेन द्रष्टव्यः।

ऋत्विक्फलम्। ममाग्ने वर्चः इति मन्त्रः अध्वर्युणा प्रयोज्यः तत्फलं अध्वर्युगतं लिङ्गादिति प्राप्ते न यशः चोदनातः कर्मफलतयाऽवगम्यते। किन्तु अर्थात् यथार्थादर्थे न स चोदनार्थः। चोदितं च फलं मन्त्रेण प्रकाशनीयम्। अतः यजमानसम्बद्धमेव फलं वर्चः शब्देन प्रकाश्यते।

कर्मार्थं तु। यत्र पुनः दृष्टमेव फलं 'मा मा सन्ताप्त' इत्यादौ असन्तापरूपं तत्र किमृत्विजां उत अत्रापि कर्मफलमेवेति संशये उक्तन्यायेन कर्मफलमेवेति पूर्वः पक्षः। यद्यपि कर्मानुपकारकं फलं न ऋत्विक्सम्बन्धि तथापि असन्तापः कर्मोपकारकः कर्मार्थ इति तत्फलं ऋत्विग्गतमेवेति।

व्यपदेशाच्च। एतच्चापवादमात्रम्। यत्र तन्नौ सह इति उभयगामित्वं श्रूयते तत्र ऋत्विजोऽपि फलमस्ति।

द्रव्यसंस्कारः। निर्देशात्तु। किं विकृतौ अङ्गप्रधानार्थे बर्हिषि प्राकृतकार्यापन्ने अप्राकृतकार्यापन्ने च धर्मा भवन्ति उत प्राकृतकार्यप्रयुक्त एवेति सन्देहे अङ्गप्रधान–सम्बन्धितामात्रेण धर्माः विकृतौ कार्याः इति पूर्वपक्षे; विकृतौ उपकारलक्षणकार्याकाङ्क्षायां प्राकृत उपकारः प्राप्यते। स च पदार्थैर्विना न ज्ञायत इति पदार्थावच्छिन्नः प्राप्यते यूपावटास्तरणबर्हिषि च अपूर्वे प्राकृतोपकाराभावात् न बर्हिर्धर्मप्राप्तिः।

विरोधे च। अप्रच्छिन्नाग्रौ दर्भौ पवित्रे करोति इति विहितपवित्रार्थं दर्भौ स्तरणार्थदर्भादग्राह्यौ इति पूर्वपक्षे अन्यत्र शेषभूतस्य व्यापृतस्यैव सतोऽन्यत्र कारकत्वाभावात् परिभोजनीयादग्राह्यौ इति सिद्धान्तः।

अयनयस्त्वेकदेशस्य। पूर्वाधिकरणन्यायेन पुरोडाशकपालादीनां यागे ऐन्द्र-वायवपात्रनिधाने च शेषभावो न न्याय्य इति नूत्नानामुपादानमिति पूर्वपक्षे ह्यवदान मात्रेण यागोपसंहारात् परिशिष्टस्य अनेकत्र व्यापारोपपत्तिः।

विकृतौ। विकृतौ उपांशुत्वादिधर्माः औपदेशिकाः किमङ्गप्रधानार्थाः उत केवल–प्रधानार्था इति संशये प्रकृतिवदङ्गप्रधानार्था इति पूर्वपक्षे आतिदेशिकानामङ्गानां औपदेशिक-प्रधानस्य च न तुल्यता। प्रधानोपदेशमपेक्ष्य अङ्गातिदेशः। ततश्च प्रधानमात्रमालम्ब्य उपांशुत्वविधौ नाङ्गातिदेशपर्यन्तं तत्प्रतीक्षा।

सन्निधानविशेषात्। दृतिनवनीतमाज्यं भवति इत्युक्तं दृतिनवनीतं तु न पूर्वाधिकरणन्यायेन प्रधानगामि प्रधानस्य सोमयागत्वेनाज्याभावात् अपि तु आतिदेशिकाङ्ग-सम्बन्धीति।

तत्काले वा। तच्च दृतिनवनीतत्वं प्रधानप्रत्यासत्तेः सुत्याकालीनानामङ्गानामेवेति प्राप्ते प्रत्यासन्नानां अप्रत्यासन्नानां च प्रधानसम्बन्धाविशेषात् सर्वत्र नवनीतविधिरिति राद्धान्तः।

मांसं तु। तरसास्सवनीयाः पुरोडाशा भवन्ति इत्यत्र सवनीयपदं सवनीया–सवनीयलक्षक उत पुरोडाशपदं पुरोडाशापुरोडाशलक्षकमिति विचारे पुरोडाशपदस्य जघन्यत्वात् दृष्टव्यभिचारत्वाच्च पुरोडाशापुरोडाशलक्षकत्वमिति सिद्धान्तः।

इति तृतीयाध्याये अष्टमः पादः

चतुर्थाध्याये प्रथमः पादः

अथातः। अत्राधिकरणे उपादानलक्षणो विधिव्यापारः श्रुत्यादिभ्यः प्रमाणान्तरभूतः क्वचिदैदमर्थ्ये क्वचिदनुष्ठाने क्वचिदधिकारे क्वचिदुत्पत्तौ विद्यत इति प्रतिपाद्यते यथा

प्रोक्षणादीनां याागार्थत्वं निमित्तपर्यन्तेऽधिकारे प्रयोगः विश्वजिदादिषु अधिकारः सौर्यं चरुमित्यधिकारविधौ उत्पत्तिः इत्यादिकं औपादानिकम् । उपादानं नाम नियोगाक्षेपः वेदे नियोगश्शब्देन प्रतिपादितः । सन् स्वनिर्वाहायार्थान्तरं कल्पयति । तदिदमुपादाननामकं प्रमाणान्तरम् ।

यस्मिन् प्रीतिः । अस्मिन्नधिकरणे क्रत्वर्थपुरुषार्थयोर्लक्षणमुच्यते । विनियोगेन विना औपादानिकं यस्य शेषत्वं स पुरुषार्थ इति तल्लक्षणम् । विनियोगे सति यस्यौपादानिकं शेषत्वं स क्रत्वर्थ इति तल्लक्षणम् ।

एवं वा । किं नियोगः दृष्टेन द्वारेणोपादत्ते उतादृष्टेन द्वारेणेति चिन्तायां दृष्टस्य शीघ्रभावित्वात् तेनैव द्वारेणोपादत्ते । ततश्च गोदोहनेन पशुकामस्य प्रणयेदित्यत्र गोदोहनं दृष्टप्रणयनार्थं न तु अदृष्टपश्वादिफलकं ततश्च क्रत्वर्थमिति पूर्वपक्षे, विनियोगानुसारेण द्वारकार्यावगमात् पश्वर्थत्वेन विनियोगात् अदृष्टकल्पना नान्तरीयकीति सिद्धान्तः ।

एवं वा । द्रव्यार्जननियमाः क्रत्वर्था उत पुरुषार्था इति संशये, क्रत्वर्थाः तत्साध्यत्वेन क्रतुनियोगस्य ज्ञापनात् तत्रैव प्रवृत्तेः फलतो नियमः सिद्ध्यति । पुरुषार्थत्वे तु नियमानर्थक्यमिति । एवं च प्रतिग्रहाद्यार्जितद्रव्यस्य क्रत्वर्थत्वात् तद्व्यापत्तिमान् क्रत्वनधिकृत इति प्राप्ते । न धनार्जनविधयः अधिकारशून्याः धनाद्यर्थप्रवृत्तस्यैवाधिकारात् विहितोपायातिक्रमे च प्रत्यवायात् । ततश्च विहितोपायार्जितस्य स्वत्वाविशेषात् सर्वपुरुषार्थ-निर्वृत्तौ न विशेषः । अतः पुरुषार्था इति सिद्धान्तः ।

तदुत्सर्गे । नेक्षेतोद्यन्तमादित्यं इत्यादिप्रजापतिव्रतेषु अधिकारिविशेषणस्य स्वर्गादेरश्रवणात् अर्थतश्चानवगमात् अधिकाराभावात् क्रतुसंबन्धीक्षणस्यायं प्रतिषेध इति क्रत्वर्थता इति प्राप्ते, अधिकाराश्रवणेऽप्यधिकारो युक्तः कल्पयितुं न तु क्रतुसंबन्धकल्पना । अत्र क्रियाक्षेपेण गम्यमानकर्त्रवगमात् अधिकारकल्पनैव न्याय्या । अधिकारिविशेषणं च एतावता हैनसा वियुक्तो भवति इत्युक्तेः एनोवियोगः । अतः नित्यः जीवनानुपालनीयो नियमः ।

द्रव्याणि तु। एतानि वै दश यज्ञायुधानीति किमिदं स्फयेनोद्धन्तीत्येवमादिभ्यः शास्त्रान्तरं उत तेषामेवानुवादः इति संशये यज्ञायुधानीति षष्ठी साक्षात्सम्बन्धे संभवति परम्परायां न युक्ता। अतः अग्नेयादिषु पृथक् द्रव्यविधिरयं अपूर्वत्वात्। गुणान्तरावरुद्धत्वेन कर्मान्तरं वेति पूर्वपक्षः। सिद्धान्तस्तु यज्ञायुधानीति लक्षणा। तत्र च साक्षात्परम्परायां वा न कश्चिद्विशेषः। विधिशून्यं चेदं वाक्यं विधिकल्पना च उद्धननादिद्वारकव्यवहित-सम्बन्धाश्रयणेनोपपत्तौ न युक्ता। आग्नेयादिषु विकल्पश्च परिहृतो भवति।

तत्र चैकत्वम्। पशुना यजेत इत्यत्र एकत्वं विनियोगाभावात् द्वारसम्बन्धाभावात् तदभावे सामान्यसंबन्धानिर्वाहात् न यज्ञाङ्गं; करणत्वस्य प्रातिपदिकार्थान्वये एकत्वानन्वयात न नियोगसम्बन्धः। ततश्च कार्यान्वयितयाऽनभिधेयमिति प्राप्ते पशुस्तावत् विनियुक्तः उपादातव्यश्च। स च सङ्ख्यां विना उपादातुं न शक्यते श्रुतं चैकत्वं तदपि कार्यान्वयित्वेन श्रुतम्। तस्य चाश्रयापेक्षायां द्रव्यमेवाश्रय इति विवक्षिता सङ्ख्या। सङ्ख्या हि स्वसामर्थ्येनैव स्वसङ्ख्येयशेषभूतेति।

तथा च लिङ्गम्। वसन्ता प्रातराग्नेयीं कृष्णग्रीवीमालभेत इत्यत्र श्रुतलिङ्गस्यापि पूर्ववदेव कार्यान्वयः। विशेषशङ्का तु, सङ्ख्यान्तरेषूपादीयमानेषु कारकपरिमाणान्यत्वप्रसक्तेः युक्ता तस्याः उपादानशेषता। लिङ्गस्य तु द्रव्यान्तरोपादानाभावेन अनुष्ठानविशेषानापादकत्वात् नोपादानशेषतेति प्राप्ते यथा सङ्ख्या श्रुता तथा लिङ्गमपीति श्रवणाविशेषादुपादानशेषतेति।

आश्रयिषु। उत्तमप्रयाजपशुपुरोडाशस्विष्टकृत्सु दृष्टे द्रव्यदेवतासंस्कारे नादृष्टकल्पनं न्याय्यम्। यज्यर्थोऽनुष्ठानात् दृष्टोपपत्त्यर्थो भविष्यति। अधिकारार्थे उत्पत्तिनियोगविवक्षायां अपूर्वार्थत्वेऽपि पश्चादधिकारनियोगार्थे अङ्गसंबन्धे तद्द्वारेण दृष्टसंस्कारार्थत्वमिति परमतेन पूर्वपक्षे नियोगनिष्पत्तेस्तुल्यत्वाददृष्टार्थत्वमेव समिदादिवत्। किन्तु यद्यपि नियोगसिद्धिः तथापि दृष्टत्वात् द्रव्यसंस्कार एव प्रयोजक इति द्रव्याभावे स्विष्टकृतो लोपः।

अर्थे समवैषम्यम्। अतिक्रान्तस्तृतीयशेषः पारार्थ्यप्रतिपत्तिरूपः । इदानीं केवलमुपादानमेव चिन्त्यते इति प्रतिज्ञैषा ।

एकनिष्पत्तेः। दध्यानयनस्य आमिक्षा वाजिनं चोभयं प्रयोजकं उत एकमेवेति चिन्तायां उपकारकत्वमेव शेषत्वं ततश्च दध्यानयनस्योभयोपकारकत्वादुभयशेषत्वं ततश्चोभयं प्रयोजकमिति प्राप्ते । यस्य यत् शेषभूतं तदेव तस्य प्रयोजकं नान्यदिति आमिक्षायाः शेषभूतं दध्यानयन न वाजिनस्येति तदेव प्रयोजकम् । आमिक्षा च पयः मधुररसप्रत्यभिज्ञानात ।

पद्कर्माप्रयोजकम्। पूर्वत्र दध्यानयनं आमिक्षामात्रनिष्पादकं तच्छेषभूतं वाजिनं तु आमिक्षानुनिष्पन्नं न दध्यानयनप्रयुक्तम् । अत्र तु 'तस्याः सप्तमं पदं' इत्यत्र क्रयप्रयुक्तैकहायनी स्वरूपेणैव पदेन संबध्यते । तथा च क्रमः पद्पांसवश्च एकहायन्याः प्रयोजकाः इति प्राप्ते यत्र संबन्ध्यन्तरं प्रतीतं नास्ति तत्राकाङ्क्षापूर्वकं संबन्धिनि प्रतीतिः । यत्र तु संबन्ध्यन्तरपूर्वक एवोपदेशः तत्र यथावगमं संबन्धावगमात् क्रयार्था एकहायनी पदेन सम्बध्यते ततश्च तस्याः क्रयप्रयुक्तत्वं न पद्पांसुप्रयुक्तत्वमिति ।

अर्थाभिधानकर्म। पुरोडाशकपालेन तुषानुपवपतीत्यत्र पुरोडाशस्य साक्षादेवोपादानं न प्रकृतत्वेन यथैकहायन्याः । तेन स्ववाक्ये श्रुतं पुरोडाशकपालं उपवापेपि संयुज्यत इति कपालस्योभयप्रयुक्तत्वम् । अत्र विनियोगोपलक्षितद्रव्यविनियोगात नास्ति विनियुक्तविनियोगविरोधः । इति प्राप्ते—पुरोडाशसंबन्धित्वेन लक्ष्यमाणं कपालं तदेव लक्ष्यते यस्य पुरोडाशसंबन्धाधिष्ठानता यथा गङ्गापदेन तीरलक्षणेपि वस्तुगत्या गङ्गातीरम् । तच्च कपालं श्रपणार्थमुपात्तमिति उपात्तविषयो नियोगः तच्च कपालं भविष्यत्पुरोडाशश्रपणार्थं स्वीकृतं धारितं च तुषोपवापे विनियुज्यत इति सिद्धं तस्याप्रयोजकत्वम् ।

पशावनालम्भात्। अग्नीषोमीयं पशुमालभेत इति पशोः अवयवद्वारैव यागाङ्गता अवयवाश्च हृदयादयः लोहितादयश्चेति उभयं पशुप्रकृतिकमिति उभयं प्रयोजकम् । इति

पूर्वपक्षे सत्यं न पशोः साक्षाद्यागार्थता तथापि पशुसंबन्धिनां सर्वेषां यागसाधनत्वप्राप्तौ हृदयादिषु उपसंहारः हृदयादीनामेव चावदानसंस्कार्यत्वाद्यागाङ्गतेति लोहितादीनां अप्रयोजकत्वं, प्रतिपत्तिरेवेति।

एकदेशद्रव्यं। उत्तरार्धात्स्विष्टकृते समवद्यति इति यद्यप्युपात्तद्रव्यसंबन्ध्युत्तरार्धमिति प्रतिपत्तिकर्मेति प्रतीयते तथापि आग्नेययागार्थपुरोडाशस्य अन्यार्थत्वे शिष्टाचारविरोधात् द्रव्यान्तरे उत्तरार्धमुपादाय यागः कर्तव्यः इति पूर्वपक्षे, सत्यं यदि यागादन्यत्रोत्तरार्धः विनियुज्येत इह तु यागीयद्रव्यप्रतिपत्तिः यागार्था, यथा देवदत्तधृतस्रजः शुचिदेशनिधानं देवदत्तार्थं अतो नाग्नेयचोदनाविरोधः इति पूर्ववत् अप्रयोजकत्वम्।

अभिघारणे। प्रयाजशेषेण हवींष्यभिघारयति इत्यत्र द्वितीयाश्रवणात् हविरुद्देशेन प्रयाजशेषकरणकाभिघारणमर्थकर्म विधीयते। अन्यार्थद्रव्यस्यापि हविषां प्राधान्यात् प्रयाजशेषधारणप्रयोजकत्वमिति प्राप्ते यद्यपि हवींषीति द्वितीया तथापि हविषां प्राधान्यं न युक्तं तदर्थत्वे अभिघारणस्यादृष्टार्थत्वापत्तेः। प्रयाजशेषप्राधान्ये दृष्टार्थत्वं पात्ररिक्तीकरणात् आज्यभागार्थाज्येनासंस्पर्शः दृष्टं फलम्। तस्मात् प्रतिपत्तिरेवेति। न च दृष्टार्थत्वमात्रेण विभक्तिद्वयस्यान्यार्थत्वं न युक्तम् इति वाच्यम्। अन्यार्थत्वेन अन्यशेषत्वे विनियुक्तविनियोगविरोधात्।

समानयनं तु। बर्हिः पति समानयते जुह्वामौपभृतं इत्यत्र उपरितनप्रयाजद्वयार्थमिदं समानयनं प्रयाजानुयाजार्थाज्यस्य प्रयोजकं उत मिश्रीकरणार्थमेवेदं जौहवसंस्कारार्थम्। इति सन्देहे समानयनमात्रश्रवणात् मिश्रीकरणमदृष्टार्थं विधीयते अष्टावुपभृति इति सर्वप्रयाजार्थं तस्य जौहवेन विकल्पः इति प्राप्ते प्रयाजद्वयसाधनार्थं समानयनं दृष्टार्थसम्भवात् न त्वदृष्टसंस्कारः प्रमाणाभावात्। उपरितनद्वयं प्रयाजशब्दवाच्यं तदर्थमेवेदमिति सिद्धान्तः।

तत्रोत्पत्तिः। चतुर्जुह्वां गृह्णातीति, अविशेषश्रवणात् जौहवमुभयार्थम् औपभृतस्य चानूयाजार्थत्वं तत्र प्रयाजग्रहणमपि अनुवादार्थम् इति पूर्वपक्षे; स्यादेतदेवं यद्युपादानत एव

प्राप्तिः स्यात विनियोगानुसार्युपादानं विनियोगश्च प्रयाजार्थ एव जौहवः। औपभृतश्चोभयार्थ इति।

तदष्टसङ्ख्यम्। अष्टावुपभृति गृह्णातीत्यत्र किमष्टगृहीतमेकं विधीयते उत चतुर्गृहीतद्वयं इति सन्देहे श्रुतत्वादष्टगृहीतमेव। समानयनस्य दृष्टार्थता चोपपद्यते जौहवाज्यस्याधारे प्राचीनप्रयाजत्रये च व्याप्टतस्य स्वकार्यं प्रत्यशक्तस्यानुग्रहात इति प्राप्ते चतुस्सङ्ख्या होमे विहिता चतुरवत्तं जुहोतीति अष्टसङ्ख्या च ग्रहणे इत्युभयमविरुद्धं द्वे एते चतुर्गृहीते इत्यङ्गीकारे। द्वाभ्यां चतुर्गृहीताभ्यां प्रयोजनं अष्टग्रहणेन सम्पद्यत इति।

अथ द्वितीयः पादः

स्वरुस्त्वनेकनिष्पत्तिः। यूपस्य स्वरुं करोति स्वरुणा पशुमनक्ति इत्यत्र स्वरुकरणविधिपूर्वकं पश्वञ्जनवाक्यम् प्रवर्तते। ततश्च श्रुत्या विधानं सम्पद्यते। यदि स्वरुणा पशुमनक्तीति विनियोगः पूर्वभावी तदा अञ्जनकारितयैव स्वरुशब्दो वर्तते। तथा च योऽयमञ्जनकारी स्वरुः सः यूपस्य ग्रहीतव्यः इत्यर्थे सिद्धान्तपक्षे गृहीते यूपसम्बन्धविधिपरत्वाद्वाक्यस्य वाक्येन विनियोगः स्यात्। स च दुर्बलः स्वरुकर्तव्यतैव श्रुत्या विधेयः स च स्वरुः पृथक् यूपोत्पत्तिं प्रयोजयतीति प्राप्ते अञ्जनकारितयैव प्रथमं स्वरुनिष्पत्तिः। ततः किमीयेनाञ्जनं कर्तव्यं इत्यपेक्षायां यूपस्येति विधीयते यूप एव प्रयोजकः न स्वरुः इति सिद्धान्तः। अत्रैव द्वितीयाधिकरणे योऽयं स्वरुः अञ्जने विनियुज्यते स किं उत्पाद्यः उतोपादेय इति सन्देहे पूर्वोक्तरीत्या श्रुतिविधानबलात उत्पाद्य इति पूर्वपक्षः तत्र च यूपपदेन काष्ठलक्षणायां स एव दोषः। अतः यूपानुनिष्पन्न एवोपादेय इति राद्धान्तः।

शाखायाम्। प्राचीमाहरति इत्यत्र विहारदेशात् प्राग्देशादानयनोपादानं उत वृक्षप्राग्देशादुपादानं इति संशये प्राचीशब्दस्य दिग्वाचित्वात शाखानयनमेव दिग्विशिष्टमुपादेयमिति पूर्वपक्षे लक्षणायाः पूर्वपक्षेप्यपरिहार्यत्वात् साक्षात्कर्मभूतशाखानयनमेव युक्तम्।

शाखायाम्। 'मूलतः शाखां परिवास्योपवेषं करोति' इत्यत्र परिवासनस्य मूलमग्रं च प्रयोजकं द्वयोरपि शाखापदाभिधेयत्वात् तथा शाखाहरणस्यापि उभयं प्रयोजकं ; मूलस्य कपालोपधानं अग्रस्य च वत्सापाकरणं प्रयोजनम्। सिद्धान्तस्तु स्यादेतदेवं यदि मूलमुपवेषं करोतीति सम्बन्धः अपि तु मूलतः शाखां परिवासयतीति शाखापरिवासनार्थमेव मूलमुपात्तम्। ततश्च अन्यार्थमुपात्तमूलात् भवत्युपवेषः। स च स्वरुवत् न प्रयोजक इति।

हरणे तु। सह शाखया प्रस्तरं प्रहरति इत्यत्र शाखया सहेति तृतीयाश्रवणात् पूर्वाप्रसिद्धत्वेन सहार्थेऽनुपपन्ना तृतीया कारकलक्षणा वाच्या। अतः शाखाया गुण-भूतत्वादर्थकर्मत्वमिति पूर्वपक्षे सहशब्दश्रवणात् प्रस्तरेण शाखायाः तुल्ययोगित्वमवगम्यते। तस्माच्छाखापि प्रतिपाद्यैव।

उत्पत्त्यसंयोगात्। अपः प्रणयतीत्युक्त्वा तस्य संयवनं निनयनं च द्वयं प्रयोजनमुक्तमिति द्वयोः प्रयोजकत्वं, अपो निनयतीति द्वितीया अनीप्सितकर्मणीति प्राप्ते; न अनीप्सितत्वे हेतुरस्ति। कृतप्रयोजनत्वादपां क्वचिद्देशे त्याग अपेक्षित एवेति निनयनं प्रतिपत्तिः। अतो न प्रयोजकत्वम्।

प्रासनवत्। मैत्रावरुणाय दण्डं प्रयच्छतीत्यत्र द्वितीयादर्शनात् दीक्षितदण्डस्येयं प्रतिपत्तिः। मैत्रावरुणगतप्रीत्युत्पादकत्वात तस्य तं प्रति करणत्वमप्युपपद्यते कर्मणा यमभिप्रैतीत्युक्तेः। दण्डी प्रैषान् इति तु यदृच्छया प्राप्तस्यानुवाद इति प्राप्ते—अत्र चतुर्थ्या मैत्रावरुणस्य प्राधान्यात् दण्डस्य तदर्थं दानं तथा च दण्डी प्रैषानिति दर्शनात् अर्थकर्मैवेदम्। तस्मादनीप्सितकर्मता, दण्डे पाक्षिकत्वप्रसङ्गाच्च नेदं यदृच्छा-प्राप्तानुवादः।

उत्पत्तौ येन संयुक्तम्। नीतासुदक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीत्यत्र न प्रतिपत्तिः। किन्तु अर्थकर्म प्रयोगमध्ये पुनः कण्डूयनसम्भवात् सर्वान्त एव तस्याः

कृतार्थत्वात् इति प्राप्ते; दक्षिणानयनात् प्रागेव कण्डूयनं कृष्णविषाणया कार्यं उत्तरं तु हस्तादिना इति द्वितीयया प्रासनं प्रतिपत्तिरेवेति ।

सौमिके च । यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्तीत्यत्र अवभृथस्तावत् प्रधानकर्मत्वात् न सोमलिप्तार्थस्सम्भवति । न च गुणप्रधानभावमन्तरेण सम्बन्धः सम्भवति । तस्मात् पुरोडाशकपालवत् अधिष्ठानलक्षणया सोमलिप्तस्यैव अवभृथशेषत्वेन विनियोगः इति प्राप्ते; श्रौतसोमलिप्तार्थग्रहणे तावत् अन्यशेषः सोमयागशेषः अवभृथशेषतयाऽवगन्तुं न शक्यते । तत्रापि किं सोमलिप्तशब्दः अधिष्ठानलक्षणया वर्तताम् उतावभृथशब्दो देशलक्षणयेति सन्देहे श्रुत्यर्थलाभात् अवभृथशब्दः तद्देशलक्षक इति निश्चीयते । यन्तीति नयन्तीत्यर्थे । तथा च सोमलिप्तमवभृथदेशं नयन्तीति भावः ।

कर्तृदेशकालानाम् । समादिदेशानां शक्तिमद्द्रव्यत्वेन क्रियारूपत्वसम्भवात् कारकतया अन्विताभिधानोपपत्तिरिति समे यजेतेत्यादीनां विनियोगे नास्य समादेः आनर्थक्यम् । किन्तु प्रयोक्तृव्यापारे उपादानपर्यालोचनया अनुवादकत्वमुच्यते इति प्राप्ते; यदि द्रव्यादन्यत्कारकतयाऽवगम्यते तदा त्वदुक्तं युज्यते । अत्र तु द्रव्यमेव कारकतयाऽवगम्यते । तथा हि—समादय एव क्रियाकारकतयाऽवगम्यन्ते । यदेव हि विभक्त्या द्रव्यं गुणो वा समर्प्यते तदेव कारकम् । तस्माद्विनियोगवशात् प्रयोक्तृत्वेपि नियमसम्भवान्नानर्थक्यम् इति राद्धान्तः ।

तथा द्रव्येषु । कारकविभक्तिरहिते द्रव्यविशेषणतयैव श्रुते शुक्लानां व्रीहीणामित्यादावुपात्तगुणस्य साक्षात् क्रियाङ्गत्वेनाश्रवणात् अनुवादोऽयम् । नियोगसंस्पर्शाभावान्न नियमस्याप्युपपत्तिरिति प्राप्ते भिन्नपदवाच्यतया द्रव्यं गुणक्रियाभ्यां विशेष्यते । तथा च तादृशद्रव्यसाध्यो नियोगः तदन्यगुणोपादाने तथाविधद्रव्याभावान्न सिद्ध्येदिति तयोरप्युपादानं नियमेन कार्यमिति नियमार्थो विधिः ।

संस्कारे च । यः खलु अधिकारनियोगविषयः सः अधिकारविधिना विधीयते । संस्कारक्रिया तु संस्कार्यार्थत्वात न साक्षाद्विधेर्विषयः । तस्मादधिकारविषयत्वाभावात्

नाधिकृतपुरुषार्थता संस्काराणाम्। ततश्च नियोगासंस्पर्शादत्रापि नियमानुपपत्तेरनुवाद इति प्राप्ते यद्यपि न साक्षादधिकारविधिविषयः संस्कारः तथापि संस्कारविशिष्टद्रव्यस्य अधिकारनियोगविषयतया गुणवदेव संस्कारस्यापि नियमविधिविषयत्वमिति सिद्धान्तः।

यजतिचोदना। के पुनस्ते अधिकारनियोगविषयाः इत्याशङ्कायां यागदानहोमा इति समाधानम्। तेषां प्रत्येकस्वरूपमुच्यते—देवतोद्देशेन द्रव्यत्यागो यागः। स एव आसेचनाधिको होमः परस्वत्वापादनं दानमिति।

विधेः कर्मापवर्गित्वात्। यदातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीये इत्यत्र किं उपसदग्नीषोमीयप्रयुक्तं बर्हिः आतिथ्यार्थं धारणीयं उत निरिष्टकस्योपादानं उत पृथगेवो-पादानं उत साधारणमुपादानमिति संशये अन्यशेषस्यान्यत्राविनियोगान्नाद्यः पक्षः। निरिष्टको पादानं शिष्टाचारविरुद्धं, पृथगुपादानपक्षे धर्मातिदेशार्थं लक्षणाश्रयणम्। अतः साधारण-मुपादानमिति सिद्धान्तः।

तृतीयः पादः

द्रव्यसंस्कारकर्मसु। यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति इत्यत्र एवं विधाद्वाक्याल्लोके साध्यसाधनभावोऽवगम्यते तद्वद्वेदेऽपि स्यात्। ततश्च साध्यसाधन-भावस्याधिकारिविशेषणत्वमन्तरेणासम्भवात् औपादानिकोऽधिकारिविशेषणभाव इति पूर्वपक्षे ओदनं पचतीतिवत् वर्तमानापदेशेन सिद्धवदुपदेशात् न साध्यता फलस्योपपद्यते इति सिद्धान्तः।

नैमित्तिके। गोदोहनेन पशुकामस्य प्रणयेदित्यत्र न पशुकामपदत्यागेन वाक्या-न्तरता किन्तु पदत्रयेण पुरुषार्थत्वमेव। परं तु एकस्य विनियोगस्य क्रत्वर्थपुरुषार्थात्मक-प्रयोजनद्वयं सम्भवति इति क्रत्वर्थतापि युक्ता। कार्यद्वयं क्रतुपुरुषार्थौ उपादानहेतुः यस्मात् सम्बन्धानुसार्युपादानम् इति प्राप्ते, न संबन्धमात्रानुसार्युपादानं अपि तु शब्दोपपादितसंबन्धानुसारि शब्दश्च पुरुषार्थत्वमेवावगमयति। अतः न क्रत्वर्थता; पुरुषार्थत्वमेव।

एकस्य तूभयत्वे। यथा अग्निहोत्रं जुहोति अग्निहोत्रं जुहुयात् स्वर्गकाम इति वाक्यद्वयसत्वे न पृथक् प्रयोक्तृत्वम् स्वर्गकामपदान्वयेऽपि होमान्वयात्, ततश्च केवलपुरुषार्थता। एवं दध्ना जुहोति दध्नेन्द्रियकामस्य जुहुयादिति वाक्यद्वयसत्त्वात् इन्द्रियकामान्वयेऽपि दधिसाध्यहोमसंबन्धात् केवलपुरुषार्थतेति प्राप्ते; दध्ना जुहोतीति प्रकृत-होमानुप्रवेशात् तस्य च साधिकारत्वात् तत्प्रयुक्त्यैव प्रयुक्तिसिद्धेः न प्रयुक्त्यन्तराकाङ्क्षेति न पुरुषार्थता। दध्नेन्द्रियकामस्येत्यत्र तु केवलपुरुषार्थत्वं प्रथक् प्रयुक्तेः। अग्निहोत्रवाक्ये तु एक एवाधिकारः। अत्र तु नित्यं नैमित्तिकं चाधिकारद्वयमिति विशेषः।

द्रव्याणां तु। पयो व्रतं ब्राह्मणस्येति ज्योतिष्टोमप्रकरणगतव्रतनियमः प्राणधारणार्थ-त्वात् प्रकरणमुल्लङ्घ्य सामर्थ्यात् पुरुषार्थः इति प्राप्ते। नायं नियमः पुरुषाधिकारकल्पनां सहते। साक्षाच्छ्रुताधिकारसन्निधौ यदश्रूयमाणाधिकारं तत् तदर्थमेव। अतः क्रत्वर्थ एवेति सिद्धान्तः।

चोदनायां फलाश्रुतेः। अधिकारशून्या ये विधयः विश्वजिता यजेतेत्यादयः तत्र अधिकारकल्पना उत निरधिकारतयैव पर्यवसानमिति सन्देहे यावद्वचनं वचनमिति कर्तव्यता-पर्यवसाय्येव नियोगो नाधिकारपर्यन्तो भवितुमर्हति। अधिकारादृते नानुष्ठानमिति चेन्मास्त्वनुष्ठानमिति प्राप्ते, यथा कारकं नियमेन क्रियापेक्षं तथा नियोगोऽप्यधिकारापेक्षः ततश्च अधिकाराध्याहार इति सिद्धान्तः।

तत्सर्वार्थम्। अधिकारकल्पनस्यावश्यकत्वे कः अधिकारीत्याकाङ्क्षायां अर्थिनैवाधि-कारिविशेषणमस्तु इति पूर्वपक्षे सर्वान् प्रत्यविशिष्टत्वात् स्वर्गकामस्यैवाधिकारकल्पना। स्वर्ग इति सुखसामान्यम्।

क्रतौ फलार्थवादमङ्गवत्। यत्र तु फलविशेषाभिधायिनोऽर्थवादाः श्रूयन्ते तत्रापि नियोगादेव स्वर्गः अधिकारहेतुः न तु अर्थवादाभिहितं फलं अर्थवादस्त्वर्थवाद एवेति प्राप्ते अर्थवादाभिहितमेव फलं युक्तम्। इह स्वर्गे कल्प्यमाने अर्थवादस्यप्रतिष्ठापदं स्तुत्यर्थं

स्वर्गपरं कल्पनीयम् इति परोक्षवृत्तिः। प्रतिष्ठायां तु अधिकारिविशेषणतया कल्प्यमानायां स्तुत्यर्थः समञ्जसो भवेदिति सिद्धान्तः।

काम्ये कर्मणि। यत्र प्रतिष्ठाकामश्रवणमस्ति तत्र केवलस्वर्गकामाधिकारिता निषिद्धा, इह तु नियोगसामर्थ्यात् स्वर्गकामाधिकारिता, ब्रह्मवर्चसकामादिपदयोगात् ब्रह्मवर्चसादिकमपि अधिकारिविशेषणं भवतु इति शाकमप्याहरेतिवत् अन्वाचयरूपेणेति प्राप्ते, सत्यं ब्रह्मवर्चसादयः उपाधिकारतया अन्वाचीयेरन् यदि स्वर्गकामाधिकारः निश्चितः स्यात्। तदेव तु न विशेषश्रवणे सति नियोगाक्षेपस्यैवाभावात् तस्मात् विशेषाधिकार एवेति सिद्धान्तः।

सार्वकाम्यम्। सर्वेभ्यो दर्शपूर्णमासौ इति न फलविधिः किन्तु अङ्गफलानामनुवाद इति प्राप्ते शब्दात् साक्षात्सम्बन्धसम्भवे परम्पराश्रयणमयुक्तम्। तस्मात् फलविधिरेवेति सिद्धान्तः।

तत्र सर्वे। किं दर्शपूर्णमासयोः सकृत्प्रयोगे पुत्रपश्वादीनां सर्वेषां फलानां प्राप्तिः उत यावन्तः काम्यन्ते तावन्तः प्रयोगा इति सन्देहे सर्वेषां फलानां श्रुतत्वात् विशेषावधारणस्य संभवात् सकृत्प्रयोगेण सर्वफलप्राप्तिरिति पूर्वपक्षे; यावत्कामं प्रयोगभेदः। कुतः? कामिनोऽधिकारश्रवणात् नियोगस्य फलसाधकत्वं कल्प्यते। तत्र च यदा यैव कामनोत्पन्ना तदा सैवाधिकारिविशेषणम् नान्या। तथा च तदा तदेव फलमुत्पद्यते नान्यदिति सिद्धमिति सिद्धान्तः।

एवं वा। किं चित्रादिविधयः शरीरमाक्षिप्यैव फलमप्याक्षिपन्ति उत केवलं फलमाक्षिपन्ति इति सन्देहे शरीरग्रहणपूर्वकमेव फलमाक्षिपन्ति तत्र कारणान्तरादर्शनात् ततश्च पश्वादिकं जन्मान्तरभावी नात्रेति पूर्वपक्षे; केवलश्रवणावगम्यत्वात् प्रयोक्तृत्वस्य विशेषाश्रवणात् अविशेषेण इह वा अमुत्र वा फलमिति सिद्धान्तः।

समवाये। 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यत्र लक्षणे क्त्वाप्रत्ययात् कालार्थस्संयोग इति प्राप्ते सत्यं लक्षणे पूर्वकालता श्रूयते तथापि सा न धात्वर्थगता अपि तु

प्रतीतिगता। समानकर्तृकता तु धात्वर्थगतैव सा चाङ्गाङ्गिभावं विनाऽनुपपन्नेति अङ्गाङ्गितैवेति सिद्धान्तः।

उभयार्थमिति चेत्। संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपति इत्यत्र संस्थाप्येति परिसमाप्त्युक्तेः साङ्गपौर्णमासीप्रयोगानन्तरं अनुष्ठेयः वैमृधः प्रकरणाद्दर्शपूर्णमासाङ्गमिति प्राप्ते यदि निश्शेषपौर्णमासीसमाप्तिवचनादसम्बन्धो वैमृधस्य तदा प्रकरणादप्यङ्गता न स्यात् यदि पूर्वविहिताङ्गकलापसमाप्त्यभिप्रायः संस्थाशब्दः तदा वाक्यात् पौर्णमास्यङ्गतैव वैमृधस्येति राद्धान्तः।

— **अनुत्पत्तौ तु।** आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति इत्यत्र येषां एकप्रयोगता प्राप्ता तेषां युगपदनुष्ठानासम्भवात् पौर्वापर्यापेक्षायां कालोपदेश इति अङ्गाङ्गित्वसम्बन्ध इति प्राप्ते निर्ज्ञातपराङ्गभावयोरेव सम्बन्धे कालार्थ एव सम्बन्ध इति राद्धान्तः।

उत्पत्तिकालविशये। यत्र वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेति वाजपेयप्रकरणगतं वाक्यं तत्र अङ्गाङ्गिभावस्सम्बन्धः इष्यते। यत्र तु दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत इति उभयमनारभ्याधीतं तत्र नाम्ना दूरस्थकर्मपरामर्शात् कालार्थस्संयोग इति सिद्धान्तः। येषां तु शाखिनां इदमेव वाक्यं दर्शपूर्णमासप्रकरणगतं तत्राङ्गाङ्गिभावो भवतु।

फलसंयोगस्त्वचोदिते। जातेष्टेः नियोज्यस्य पितुः फलं उत पुत्रस्येति संशये अधिकारिणः फलान्वयात् पितुरेव फलं, पुत्रफलान्वयस्तु स्तुत्या नेय इति पूर्वपक्षे यस्य फलान्वयः तस्यैव फलमस्तु। पितुः अधिकारस्तु निमित्ततयापि सिद्ध्यति। कथं? पुत्रजन्मवतः पुत्रगतफलकामस्याधिकारित्वेन श्रवणात्। पितुः पुत्रप्रीत्याधिकारसिद्धेः।

एवं वा। किं पुत्रजननानन्तरं नैमित्तिकी इष्टिः उत अङ्गोपसंहारमपेक्षते इति इति संशये निमित्तानन्तरं नैमित्तिकं कर्तव्यमित्युत्सर्गः तथासति शौचाद्यङ्गलोपात् तादृशमङ्गं त्यज्यतां उत नियोगकालस्योत्कर्ष इति विचारे नियोगस्य प्राधान्यात् नियोगार्थत्वाच्च

विनियोगस्य अङ्गत्वाग विनियोगविदो मन्यन्ते । एतद्बाधनार्थं प्रथममधिकरणम् । युक्तिस्तु कुमारस्य शुचिकाले इष्टिपर्यन्तं प्राणधारणासामर्थ्यात् उत्कर्ष एव । नियोगकाल एवानुष्ठाने कुमारस्यैव लोपापत्तेः कुमारगतफलार्थत्वहानिः इति नियोगस्य वैयर्थ्यम् । द्वितीयाधिकरणं तु—उत्कृष्टा चेत् साङ्गमेवानुष्ठेयेति स्वकाले दर्शादाविष्टिरिति ।

प्रधानेनाभिसंयोगात् । वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र किमेको नियोगः उत नियोगद्वयमिति सन्देहे नियोगद्वित्वे भिन्नप्रयोगाभिसम्बन्धात् अङ्गाङ्गित्वं न स्यात् । अतः एको नियोग इति प्राप्ते विनियोगादङ्गाङ्गिता । अस्ति च भिन्नप्रयोगत्वेन विनियोगान्यत्वं अतः अङ्गाङ्गित्वं प्रयोगभेदश्चोपपद्यते इति सिद्धान्तः । एकशास्त्रत्वेपि प्रयोगभेद इष्यत एवेत्यर्थः ।

चतुर्थः पादः

राजसूयेन स्वाराज्यकामो यजेत इत्यत्र प्रकृतानां यागानां अयागानां विदेवनादीनां च राजसूयपदं नामधेयं उत यजीनामेवेति सन्देहे यजीनां अयजीनां च प्रकृतत्वात् प्रकृतार्थको यजिः दण्डिन्यायेन अयजिष्वपि वर्तते । तस्मात् तेषामपि इदं नामेति प्राप्ते सत्यं प्रकरणान्नियोगैक्यं तथापि तथाभूतेन नियोगेन एकदैव पदार्था गृह्यन्ते । तत्र यागानां करणतया संबन्धः यजिवाच्यत्वात् । अयागानामितिकर्तव्यतात्वमिति निर्णयः ।

मध्यस्थं यस्य तन्मध्ये । अभिषेचनीयसन्निधावाम्नाताः विदेवमादयः । तदीय-प्रयुक्तिमध्यपातात् विनियोगोऽपि तत्रैवेति पूर्वपक्षे यस्याङ्गस्याधिकारविधिरेव प्रयोगं ज्ञापयति न तस्यावान्तरप्रयोगानुप्रवेशः शक्यते । अतः राजसूयार्था एव ते तदधिकार-विधिप्रयुक्ताः अभिषेचनीयसन्निधौ पाठात् तत्रैवानुष्ठेयाः इति सिद्धान्तः ।

प्रकरणाविभागे । पुरस्तादुपसदां सौम्येन प्रचरन्ति इत्यत्र उपसदां सौम्येनेति सम्बन्धः । षष्ठी च शेषे । सम्बन्धश्च अङ्गाङ्गिभावः । पुरस्तादिति तु सम्बन्धापेक्षः । तस्माद्वाक्यादुपसदङ्गतेति प्राप्ते; साधिकारो हि नियोगः अन्विताभिधाननिर्वाहकः इति तदधिकारानुप्रवेशाय नाधिकारान्तरमपेक्षते इति उपसदां न प्रकरणम् । पुरस्तादुपसदामित्येव

संबन्धः उपसदां सौम्येनेत्यन्वये पुरस्तादित्यस्यानन्वयः स्यात् । अतः कालार्थः संबन्धः ।

फलवद्वोक्तहेतुत्वात्। साङ्ग्रहण्यादिसन्निधौ पठिताः आमनहोमा अपि साधिकारा एव फलपदानुषङ्गात् । अतश्च समप्रधानभूतास्ते इति प्राप्ते; असमानजातीयैरपि परिधिमन्त्रैर्व्यवहितत्वात् न फलपदानुषङ्गः संभवति । अतः निरधिकारत्वादङ्गानीति सिद्धान्तः ।

दधिग्रहः। अर्थवादे देवतान्तरायनिर्हरणकीर्तनात् दधिग्रहो नैमित्तिक इति पूर्वपक्षः खादिरवदुभयार्थतेति सिद्धान्तैकदेशी । सिद्धान्तस्तु नित्य एव, न नैमित्तिकः निमित्तसंयोगाभावात् । दोषनिर्हरणश्रवणं तु अर्थवादतयाप्युपपन्नत्वात् न नैमित्तिकत्वाक्षेपकम् । इति सिद्धान्तः ।

वैश्वानरश्च । यदि दोषनिर्हरणमर्थवादतयोपपद्यते तदा वैश्वानरग्रहेपि तत्संभवात् स नित्यः इति प्राप्ते; अत्र यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते स वैश्वानरं निर्वपेत् इति अभृतोख्यपुरुषाधिकारश्रवणात् नैमित्तिकत्वमेव युक्तम् । पूर्वत्र तु पुरुषसंयोगो नास्तीति वैषम्यम् ।

षट्चितिः। संवत्सर एवैनं प्रतिष्ठायै नुदते अथ षष्ठीं चितिं चिनुते इति पूरणार्थकप्रत्ययश्रवणात् षष्ठ्याः नित्यत्वं निमित्तश्रुतिरर्थवाद इति प्राप्ते उपदेशविवक्षयापि पूरणप्रत्ययोपपत्तेः नानुष्ठानापेक्षा; षष्ठी इदानीमुपदिश्यत इत्यर्थः ।

पितृयज्ञः स्वकालत्वात्। अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीत्यत्र किं पिण्डपितृयज्ञस्याधिकार अध्याह्रियतां उत अमावास्यापदेन कर्म लक्षयित्वा तदङ्गं पिण्डपितृयज्ञः इति सन्देहे अध्याहारापेक्षया लाघवात् कर्मलक्षणेति एकाधिकारानुप्रवेशादङ्गाङ्गिभाव इति प्राप्ते नैकनियोगता संभवति यदा दर्शोपदेशपूर्वकः पिण्डपितृयज्ञोपदेशः तदा दर्शस्यामावास्याकालसंबन्धावगमात् कालशब्दः लक्षणया नीयेत । यदा पुनः परस्परनिरपेक्षमुपदेशद्वयं तदा न लक्षणा न्याय्या । ततश्च कालार्थस्संयोग इति राद्धान्तः ।

पश्वङ्गं रशना। पशुमुपाकरोति इति उपाकरणस्य पश्वर्थत्वं प्रतीयते। तथा परिव्याणमपि तत्समानकर्तृकं एकप्रयोगतागमकम्। ततश्च अङ्गाङ्गिभावः इति परिव्याणं पश्वङ्गम्, यूपोऽपि पश्वर्थः इति प्राप्ते; समानकर्तृकत्वमात्रं क्त्वाप्रत्ययादवगम्यते न नियोगैक्यमिति द्वितीयया यूपस्यैव प्राधान्यं युक्तमिति राद्धान्तः।

स्वरुश्चाप्येकदेशत्वात्। यूपस्य स्वरुं करोति इति तादर्थ्यमवगम्यते स्वरुमान् यूप इति प्रतीतेः। तथा च यूपार्थ एव स्वरुः। तस्य स्वरुणा यूपमनक्तीति अञ्जनेन प्रतिपत्तिः इति प्राप्ते यवमतीत्यादिषु तादर्थ्याप्रतीतेः अञ्जने वाक्येन विनियोगः। न चाञ्जनं प्रतिपत्तिः, तस्यापि पशु इति कार्यान्तरश्रवणात् इति सिद्धान्तः।

दर्शपूर्णमासयोः। दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र प्रकृताः सर्वे यागाः दर्शपूर्णमासपदेन ग्राह्याः राजसूयपदवत् इति प्राप्ते; समुदायद्वयस्य प्रकृतत्वात् तदर्थकत्वमेव द्विवचनस्यार्थान्तरानुपपत्तेः इति सिद्धान्तः।

ज्योतिष्टोमे। द्विवचनयोगात् न दर्शपूर्णमासपदस्य सर्वयागपरता, ज्योतिष्टोमे तु तदभावात् न तत्पदस्य प्राकरणिकसर्वयागपरत्वं वारयितुं शक्यते। नामधेयार्थस्तु नान्वयीत्युक्तमिति प्राप्ते; यद्यपि नामधेयार्थः नान्वयी तथापि यजिविशेषोपस्थापकत्वात् त्रिवृदादिस्तोमानां परम्परया येषु यागेषु संबन्धः तेषामेवोपस्थापनात् इतरेषामङ्गतेति राद्धान्तः।

पञ्चमाध्याये प्रथमः पादः

श्रुतिलक्षणम्। योऽयं श्रुत्यादिभिः प्रतिपन्नः वितानः किं तमनतिक्रम्यानुष्ठेयं कर्म उतानियमेनेति सन्देहे वितानाभिधायकशब्दाभावात् आर्थिकस्याशास्त्रार्थत्वात् प्रतीतक्रमस्यानादरः इत्यनियमेनेति पूर्वपक्षः; क्त्वाप्रत्ययः प्रयोगगतां पूर्वकालतां उपाधिं कृत्वा समानकर्तृकतामाह। यच्च पूर्वमवगम्यते तत्पूर्वमनुष्ठीयत इति क्रमसिद्धिः। न चात्र पाठक्रमः अध्वर्युर्गृहपतिं इत्यत्र दीक्षाणां प्राप्तत्वात् वाक्यस्य च प्रतिप्रस्थात्रादिकर्तृविधानार्थत्वात्। क्रमनियमविधिः क्त्वाश्रुत्यैवेति श्रौत एव क्रमः इति सिद्धान्तः।

अर्थाच्च । अनन्यपरतया अस्तु श्रुत्या क्रमावगमः अर्थे तु न किञ्चिदवगतौ प्रमाणमस्तीति प्राप्ते; प्रयोजनमपि अनुष्ठानकालभेदावगमद्वारेण क्रमावगतौ कारणमिति सिद्धान्तः अग्निहोत्रं जुहोति यवागूं पचतीत्युदाहरणम् ।

अनियमोऽन्यत्र । यत्र तु क्रमनियामकप्रमाणाभावः यथा शाखान्तरे उपसंहारे तत्रानियम एवेति प्रत्युदाहरणमात्रम् ।

क्रमेण वा नियम्येत । समिधो यजति तनूनपातं यजति इत्यादिषु न केवलं पाठमात्रात् क्रमावगतिः पदानां वाक्यार्थावगममात्रहेतुत्वात् क्रमवाचकपदाभावात् । तस्मात् यथेष्टमत्र क्रम इति प्राप्ते, यस्मिन् सत्येव यदवगम्यते तत् तत्र निमित्तं यत् प्रथमं पठ्यते तत्प्रथममवगम्यते प्रथममेव प्रयोगकाले स्मर्यते तथैव चानुष्ठीयते इति पाठादेव क्रमावगमात् पाठोऽपि क्रमनियमे प्रमाणमिति सिद्धान्तः ।

प्रवृत्त्या तुल्यकालानाम् । प्रथमपदार्थप्रवृत्तिवशेन द्वितीयादिपदार्थावगम इत्यत्र इयमाशङ्का—यथा प्रवृत्त्यवस्थायां प्रथमपदार्थानुष्ठानं न क्रमनियममपेक्षते तथा द्वितीयादिपदार्थानुष्ठानमपि भवतु न तत्र प्रवृत्तिक्रमापेक्षा युक्तेति पूर्वपक्षे प्रयोगचोदनया सहाङ्गैः प्रधानानां यौगपद्येनानुष्ठानस्य चोदितत्वात् पुरुषाशक्त्या यावद्व्यवधानमनुप्रविशति तावदेव विधिरनुमन्यते नाधिकम् । तत्र प्रवृत्तिक्रमेणानुष्ठाने उत्तरेषामपि पदार्थानां तुल्यं व्यवधानं भवति अन्यथा कस्यचित् अतिसन्निधानं कस्यचिदतिव्यवधानमिति वैषम्यापत्तेः तस्मात्प्रवृत्तिक्रमोऽपि अभ्युपगन्तव्यः इति राद्धान्तः ।

स्थानाच्च । साद्यस्क्रे सह पशूनालभत इति वचनेन त्रयाणामपि पशूनां सहालम्भप्राप्तौ कस्य प्राथम्यमिति विशये अवश्यंभाविनि क्रमे यदि प्रयोगान्तरवर्तित्वात् प्रवृत्तिक्रमः नेष्यते तर्हि पूर्वावगतपाठादेव नियम इति प्रथममग्नीषोमीयः ततः सवनीयः ततः आनुबन्ध्य इति प्राप्ते ; सह पशूनालभत इति वचनेन सवनीयस्थाने सर्वेषामालम्भस्य चोदितत्वात् सवनीयस्थानमबाधितं आश्विनग्रहणोत्तरकालता तस्यैव । तस्मात् स्थानात् सवनीय एव पूर्वमालब्धव्यः इतरयोस्तु प्राकृत एव क्रम इति राद्धान्तः ।

मुख्यक्रमेण। यत्र सारस्वतौ भवतः इत्यादौ अङ्गानां क्रमे उक्तप्रमाणानामभावः तत्र यथेष्टाप्रवृत्तिः तन्त्रेणोच्चारणाच्छास्त्रस्येति प्राप्ते ; प्रधानयाज्ययोः क्रमवत्त्वात् प्रधानयोः क्रमावगतेः यत्क्रमके प्रधाने तदङ्गान्यपि तत्क्रमकान्येव भवितुमर्हन्ति इति मुख्याख्यं प्रमाणान्तरमास्थेयमिति राद्धान्तः।

प्रकृतौ तु स्वशब्दत्वात्। पाठमुख्यक्रमयोर्विरोधे मुख्यक्रम एव स्वीकार्यः मुख्यार्थत्वादङ्गानां, प्रयोगचोदना चानुगृह्यत इति पूर्वपक्षे न प्रतीतस्य त्यागो युक्तः पाठाच्च निरपेक्षात् अवगतः अङ्गानां क्रमः नान्यापेक्षया बाधितुं युक्तः। तस्मात्पाठक्रम एव ग्राह्य इति राद्धान्तः।

मन्त्रतस्तु विरोधे। मन्त्रब्राह्मणपाठक्रमविरोधे उभयोरपि पाठस्वरूपत्वादनियम इति पूर्वपक्षे; मन्त्रक्रमो बलीयान् मन्त्राणां प्रयोगार्थत्वात् यत्क्रमकाः मन्त्राः तत्क्रमका एव प्रयोक्तव्याः मन्त्रैश्च स्मृतं कर्तव्यं इति कर्माण्यपि तत्क्रमकाण्येवेति सिद्धान्तः। ब्राह्मणपाठ-क्रमस्तु विधिक्रमदर्शनात् विधेये कल्प्य इति व्यवहितः।

तद्वचनाद्विकृतौ। किं विकृतौ मुख्यक्रमात क्रमः उत यथा प्रकृतौ निर्ज्ञातः अङ्गानां क्रमः तथैव विकृतावपि इति सन्देहे यद्यपि प्रकृतौ प्रयोगान्तरे क्रमान्तरमवगतं तथापि वैकृतप्रयोगान्तरे यथाविकृति मुख्यक्रमेणैवानुष्ठानं युक्तमिति प्राप्ते; यद्यपि प्रयोगान्तरं तथापि प्रयोज्यानामभेदात य एव तेषां प्रयोगान्तरे क्रमो निर्ज्ञातः स एव तावद्बुद्धिस्थो भवतीति न क्रमान्तरकल्पनाऽवकाशं लभते—इति राद्धान्तः।

विकृतिः प्रकृतिधर्मत्वात। साकमेधे पूर्वदिनकर्तव्यासु अनीकवत्यादीष्टिषु द्व्यह कालत्वसद्यस्कालत्वसन्देहे प्राकृती सद्यस्कालता स्वीकार्या। अहरन्तरवर्तिन्यपि प्राह्लादौ प्रातरादिशब्दोपपत्तेरिति प्राप्ते वैकृतेन कालेन प्राकृतकार्यसिद्धेः न पुनः प्राकृत-कालापेक्षास्तीति सद्यस्कालतैव युक्ता। सवनानि चैकाहस्सम्बन्धान्येव श्रुत्याऽवगम्यन्ते न कारणादृतेऽहरन्तरापेक्षाणि युक्तानि कर्तुं ; तस्मात्सद्यस्कालतेति राद्धान्तः।

अङ्गानां मुख्यकालत्वात्। आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति इत्युत्कर्षः तिष्ठन्तं पशुं प्रयजति इति प्रयाजानामपकर्षश्च तन्मात्रविषयौ न तदादितदन्तविषयौ शब्दमात्रावगम्येऽर्थे अश्रूयमाणानामुत्कर्षापकर्षयोः प्रमाणाभावादिति प्राप्ते। सत्यं पदार्थस्योत्कर्षः अपकर्षो वा श्रूयते न तु तदुपरितनामाधस्त्यं वा अक्रुत्वेति उत्कर्षमात्रश्रवणेपि प्रागवगतक्रमबलेन उपरितनान्यप्युत्कर्षणीयानि।तथाऽपकर्षेपि इति क्रमादेवोत्कर्षसिद्धिः।

प्रवृत्त्या कृतकालानाम्। निर्वापात्पराञ्चः अलङ्करणात्प्राग्भाविनः ये पौरोडाशिकाः पदार्थाः ते किं सवनीयान्निर्वपस्व इति प्रैषोत्तरं कार्याः उत पाठावगताः सौमिकाः प्रचरणीहोमादयः इति सन्देहे यावद्वचनं वाचनिकमिति निर्वापमात्रमेव मध्ये कर्तव्यं ततः परं प्रचरणीहोमादय इति उभयथापि पाठक्रमः अतोऽनियम इति प्राप्ते अलङ्करणप्राग्भाविनः कार्याः प्रकृतौ निर्वापानन्तरं प्रोक्षणादिकमिति क्लृप्तेः तदेव कार्यमिति राद्धान्तः।

असंयोगात्तु। दीक्षासु यूपं छिनत्तीत्यत्र तदन्तापकर्षशङ्कायां प्रकृतौ क्रमस्य क्लृप्तत्वात् प्राकृतस्योत्कर्षापकर्षयोः तदादितदन्तन्यायौ भवतः। इह तु नाद्यापि क्रमकल्पनेति न तदन्तापकर्षः अपि तु यावद्वचनम्।

प्रासङ्गिकम्। योऽयमक्लृप्तक्रमत्वेन क्रमाभिसम्बन्धाभावः तदादिन्यायापवादकः सः प्रासङ्गिकेऽपि तुल्यः इति राद्धान्तः।

तथाऽपूर्वम्। पूर्वेद्युरमावास्यायां वेदिं करोति इति अपकृष्टं वेदिकरणं तदन्तान् पदार्थानपकर्षेत् पाठक्रमस्य पौर्णमास्यामादृतत्वात् क्लृप्तक्रमाया वेदेः प्रतिकर्षादिति प्राप्ते; न पौर्णमासीप्रकृतिकमामावास्यं कर्म तेन पौर्णमास्यां क्रमकल्पनामपेक्ष्य नामावास्यायां शास्त्रार्थवर्णनं न्याय्यम्। तेन वेदिमात्रापकर्षः तदुत्तरकालं तत्र क्रमकल्पनेति।

सान्तपनीया तूत्कर्षेत्। सान्तनीयार्थमग्नौ उद्धृते सति दैवान्मानुषाद्वाऽपराधात् सान्तपनीयोत्कर्षे सायमग्निहोत्रं उत्कृष्टव्यं द्वितीयेऽहनि सान्तपनीयं कृत्वाऽनन्तरमनुष्ठेयं न परार्थमुद्धृतेऽग्नौ तस्मिन्नेव कालेऽनुष्ठेयं अप्रासङ्गिकत्वादग्निहोत्रस्य इति प्राप्ते; निमित्तत्वात्कालस्य

अनुत्कर्ष एवाग्निहोत्रस्य न्याय्यः। निमित्ते सति नैमित्तिकस्यावश्यंभावात् प्रासङ्गिकत्वमिति राद्धान्तः।

षोडशी च। तं पराञ्चमुक्थ्येभ्यो गृह्णाति इति उक्थ्योत्तरकालता षोडशिनो विहिता। दैवात् उक्थ्योत्कर्षे षोडशिनः अनुत्कर्षः समयाध्युषितकालस्य षोडश्याः विहितस्य बाधापत्तेरिति प्राप्ते; अवश्यंभावित्वाच्छास्त्रातिक्रमस्य वरमङ्गशास्त्रातिक्रम इति उत्कर्ष एव षोडशिन इति राद्धान्तः।

इति प्रथमः पादः

अथ द्वितीयः पादः

सन्निपाते प्रधानानाम्। प्राजापत्यपशुषु अङ्गानां काण्डानुसमय एव युक्तः सहानुष्ठानस्य सकलपदार्थानुष्ठानेनापि सम्भवादिति प्राप्ते सर्वपशूनां साङ्गानां सहानुष्ठानस्य चोदितत्वात् एकैकमेवाङ्गं सह कर्तव्यम्। अनेन प्रकारेण यावत्कालव्यवधानमापतति तावदधिकारविधिरनुमन्यते। अधिकं नानुमन्यते। अतः पदार्थानुसमयः।

मुष्टिकपालावदान। चतुरो मुष्टीन्निर्वपति इत्यत्र एकैकमुष्टिनानुसमयः सहत्व-चोदनाबलात् इति प्राप्ते चोदनातः वैदिकेषु पदार्थाध्यवसानं न लोकवत् प्रमाणान्तरावसेयं एकं चेदं शास्त्रं चतुरो मुष्टीन्निर्वपति इति आवृत्तस्यैव निर्वापस्य अङ्गता प्रतिपादितेति तेनैवानुसमयः।

संयुक्तेषु। यदि शास्त्रादनुसमयः तदा द्विर्हविषोऽवद्यति इत्येकत्वाच्छास्त्रस्य तेनैवानुसमय इति प्राप्ते नेदं पदार्थविधानं अपि तु पदार्थसङ्ख्याविधानं, अतः प्रमाणान्तर-प्राप्तावदानोपक्रमप्रदानान्तेनैकपदार्थानुसमय इति।

वचनात्तु। अञ्जनमारभ्य परिव्याणान्तं यूपधारणं प्रकृतौ यजमानेन कृतम्। यूपगणे तदतिदेशो पदार्थानुसमय एव युक्तः प्रकृतौ यजमानधारणस्यार्थिकत्वेन सौकर्य-प्राप्तःवादनतिदेशात् सहानुष्ठानस्य प्राप्तत्वादिति पूर्वपक्षः। यथा विहितानां पदार्थानामुपपत्तिः

भवति तथा शास्त्रार्थो वर्णनीयः । तत्र यदि पदार्थानुसमयः आश्रीयते तदा अञ्जनादि-परिव्याणान्तं यजमानेन यूपानवसर्जनं विहितं बाध्येत । अतः काण्डानुसमयः ।

पशुगणे । अग्नीषोमीये दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवद्यति इत्यादि श्रुतम् । तच्च प्राजापत्यपशुषु चोदकेन प्राप्तम् । तदिह दैवताद्यवदानानां काण्डानुसमयः उत दैवतैः दैवतानामित्येवं पदार्थानुसमयः इति सन्देहे पूर्ववत् शास्त्रबाधप्रसङ्गात् काण्डानुसमय इति प्राप्ते दैवतावदानानुसमये कृतेपि न शास्त्रबाधः । प्रकृतौ एकत्वात् पशोः एकस्मिन् तथा कृतम् । इह तु सह चोदितपशुबहुत्वात् एकमेवावदानं सर्वेषु कर्तव्यमिति नास्ति शास्त्रबाधः ।

नानाबीजेषु । यद्यपि कृष्णाजिनास्तरणादिफलीकरणान्तस्यैकपदार्थत्वं संयुक्ते तु प्रक्रमादित्यधिकरणेन सेत्स्यति तथापि कृष्णजिनास्तरणादीनां पृथक् पृथक् विहितत्वात पृथक्पदार्थत्वं पृथगङ्गत्वं पृथगेवानुष्ठानप्रयुक्तिरिति तावन्मात्रेणानुसमयः इति शङ्कायां व्रीहीनवहन्ति इति वाक्येन तण्डुलीभावहेतुर्व्यापारश्चोदितः । अतः कृष्णाजिनास्तरणादि-फलीकरणान्तः एकः पदार्थ इति राद्धान्तः । ततः उलूखलैक्यं फलितम् ।

विकारे त्वनूयाजानाम् । पशौ पृषदाज्यं उपभृत्येव ग्रहीतव्यं उत पात्रान्तरं सम्पाद्यमिति संशये प्रकृतिवद्ग्रहणे आज्यस्य दध्ना मिश्रीकरणेन विकारापत्तेः मर्यादाकरणे स्रुक्त्वनाशापत्तेश्च कालान्तरे पृषदाज्यग्रहणमिति प्राप्ते उक्तदोषापत्तेः पात्रान्तरमादाय तत्काल एव पृषदाज्यग्रहणं न्याय्यम् ।

प्रकृतेः पूर्वोक्तत्वात् । वैकृतानामङ्गानां पाठक्रमः प्राकृताङ्गैः व्यवधीयते उत नेति संशये प्राकृतानां नारिष्ठहोमानां विकृत्यनन्तरं करणे उपहोमानां व्यवधानापत्तिः इति प्राप्ते वैकृतचोदनार्थपरिज्ञानायैव प्राकृताङ्गयुक्तप्रधानपाठात पाठक्रमत एव वैकृतानां प्राकृतेभ्यः पश्चादेवानुष्ठानम् ।

कृतदेशात्तु पूर्वेषाम् । सर्वत्र वैकृताङ्गानि प्राकृताङ्गेभ्यः पश्चात्कार्याणीति यावन्मात्रमपकृष्यते तावन्मात्रापकर्षः न तु तदन्तापकर्षः । एवं च राजसूये अभिषेकापकर्षे न

विदेवनाद्यपकर्षः इति प्राप्ते विकृतौ विदेवनादीनामभिषेकस्य च क्रमः क्लृप्तोऽस्ति तत्र अभिषेकापकर्षे तत्पूर्वाणां तेषामपकर्षो न्याय्यः न त्वन्तेऽनुष्ठानम् वैकृतपाठ-विरोधात् ।

प्राकृताच्च पुरस्ताद्यत् । प्राकृतानां पदार्थानां प्रकृतावेव यः क्रमः क्लृप्तः तत्र मध्ये विनावचनेन वैकृतस्यानुप्रवेशो न न्याय्यः इति सचयनज्योतिष्टोमप्रकरणपठितसावित्र-होमादीनां अन्तेऽनुष्ठानमिति प्राप्ते यद्यपि क्रमो नाभिधीयते तथापि अनन्यपरपाठबलेन मध्येऽनुप्रवेशः ।

सन्निपातश्चेत् । यथा दीक्षणीयायाः पुनः पाठात् सावित्रहोमादिभिः सह क्रमकल्पना तथा रुक्मप्रतिमोचनादिभिरपीति तस्य दीक्षणीयानन्तरं कर्तव्यत्वे प्राप्ते यः पदार्थः वैकृतः दीक्षणीयायाः पूर्वं पठ्यते तत्रोक्तन्यायः । यस्तु परतः पठ्यते तस्य दीक्षासंस्कारानन्तरकरणेपि परत्वोपपत्तेः अन्त एव करणमिति ।

इति द्वितीयः पादः

अथ तृतीयः पादः

विवृद्धिः कर्मभेदात् । विकृतौ एकादश प्रयाजान् यजतीत्यत्र एकादशत्वं प्रत्येकं निविशते उत समुदाये इति सन्देहे प्रतिप्रधानन्यायात् प्रत्येकमिति प्राप्ते सङ्ख्या तावत्पदार्थः सा च पृथक्त्वे सति निविशते इति पदार्थस्वभावानुसारेण समुदाय एव निविशते । अभ्यासे तु न तादृशं पृथक्त्वमिति न तत्र निवेशः ।

स्वस्थानात्तु । सङ्ख्यासम्पत्त्यर्थमभ्यासे कर्तव्ये समुदायाभिसम्बन्धात् दण्डकलित-वदावृत्तिः षडुपसद इत्यादौ इति प्राप्ते पूर्वप्रतीतक्रमबाधापत्तेः स्वस्थानविवृद्धिरेवेति ।

समिध्यमानवतीम् । यत्र सामिधेनीविवृद्धिः तत्रापि ऋग्वेदात् आनीय आगन्तूनामन्ते निवेश इति प्राप्ते समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्यासंज्ञकानामृचां निवेशः इतरेषामन्ते इति राद्धान्तः ।

स्तोमविवृद्धौ। एकविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादौ विवृद्धस्तोमके क्रतौ बहिष्पवमाने आगम्यमानानां ऋचां प्रागुत्तमान्निवेशः उत अन्ते इति संशये प्राक्पर्यासात् इति प्राप्तं द्वादशाहस्थलिङ्गात् उत्तमः पर्यासो भवतीति उत्तमस्य पर्यासत्वं विधीयते उत्तमं च द्वादशाहातिरिक्तक्रतुष्वपि इति तदङ्गत्वादागन्तूनां ततः पूर्वं निवेश इति पूर्वपक्षे अस्य द्वादशाहप्रकरणस्थत्वात् न क्रत्वन्तरे प्रवेशः। किञ्च द्वादशाहविकारेष्वपि नायं धर्मः किं तर्हि वृषण्वतां मध्ये य उत्तमः तस्य पर्यासत्वं धर्मः। न च ते क्रत्वन्तरेषु सन्ति। तस्मात् तेषु आगन्तूनामन्ते निवेश इति।

अन्ते तूत्तरयोः। द्वादशाह एव'त्रीणि ह वै यज्ञस्योदराणि' इति वचनं, अत्र विशेषाग्रहणात् तद्विकारेषु भवतु अतद्विकारेषु माभूदिति पूर्वपक्षः। अत्र वचने गायत्र्यादयो यज्ञोदरत्वेन स्तूयन्ते तदुपपादनार्थमेतत अत्र ह्येवावयन्तीत्यादि। अत्र वचनानित्यपूर्वत्वादिति न्यायेन विधिकल्पनायां आवापमात्रविषयं कल्प्यं न द्वादशाहिकावापमात्रविषयं इति सर्वार्थता।

ग्रहेष्टकम्। अनारभ्यश्रुतयोः अंश्वदाभ्यग्रहणयोः चित्रिण्याद्युपधानस्य च चिति-सवननिष्पत्तिरेव कार्यं; यागाग्निष्पत्ती तु परम्परया। तस्माच्चितिसवनशेषमिदं द्वयमिति प्राप्ते उपदेशसिद्ध्यर्थत्वात् कार्यस्य उपदेशस्य च यागाग्निविषयत्वात् यागाग्निसिद्ध्यर्थत्वमेव तयोः न सवनचितिशेषत्वमिति न प्रतिसवनं प्रतिचिति चावृत्तिः। किन्तु अन्ते सकृदनुष्ठानम्।

अन्ते स्युः। यद्यपि ब्राह्मणवत्त्वात चित्रिण्यादीनां मध्यमायामुपधानं वचनसिद्धं तथापि सर्वा एव ब्राह्मणवत्यः। अतः वचनमनुवाद इति चित्रिण्यादीनामन्ते निवेश इति पूर्वपक्षे ब्राह्मणवत्यः श्रुतिविनियुक्ताः परिगृह्यन्ते। तस्मात ब्राह्मणवत्त्वात् मध्यमाया-मुपधानमिति।

प्राग्लोकंपृणायाः। औपानुवाक्यकाण्डपठितचित्रिण्यादयः प्राग्लोकंपृणायाः उपधेयाः अन्ते तु बादरायण इति न्यायादिति प्राप्ते; लोकं पृण इति मन्त्रस्य यदेवास्योनं

गच्छिद्रं तदेतया पूरयतीत्यर्थवादस्य च यथार्थत्वात् सर्वान्ते लोकंपृणाः। ततः पूर्व चित्रिण्यादय इति सिद्धान्तः।

संस्कृते कर्म। आहिताग्नेः कर्मण्यधिकारात् आधानमात्रेणैवाग्निसिद्धेः अनन्तरमेव कर्मण्यधिकारः न तु पवमानेष्टिप्रतीक्षा। आहिताग्निव्रतानि च तत एवेति प्राप्ते; आहवनीयादिमुखेनाहिताग्निः। न चेष्टिभिर्विना आहवनीयो भवति इति अकृतपवमानेष्टेः न कर्मण्यधिकारः। व्रतानां तु अग्निनिष्पत्तिमात्रेणाधिकारादनन्तरमेव प्रवृत्तिः।

सञ्चिते। यथा आहिताग्निव्रतानि आधानानन्तरमेव कार्याणि तथा अग्निचिद्व्रतान्यपीति भूततावाचिक्तप्रत्ययबलात् प्राप्ते तत्र अग्न्यर्थमाधानमिति तत्सिद्ध्यनन्तरं व्रतान्युक्तानि। इह तु प्रकरणाम्नानात् अग्निकार्यार्थं चयनं अग्निकार्यं च क्रतुप्रयोगानन्तरमिति क्रत्वन्ते अग्निचिद्व्रतानीति।

परेणावेदनात्। कियद्भिर्दीक्षितो भवति इति प्रश्ने यावद्भिः दीक्षासंबन्धः प्रतीयते दण्डादिभिः तैरेव दीक्षितः तदनन्तरमेव दीक्षितपदार्था इति प्राप्ते 'दीक्षिष्यमाण' इत्यधिकारिविशेषणम् तस्मात्तस्य दीक्षोत्पादकत्वात् अनन्तरमेव तद्धर्माः दण्डादयस्तु तत्संस्कारा इति।

अङ्गवत्क्रतूनाम्। अनेकेषामनुष्ठानेऽवश्यंभावी क्रमः। अनेकानि च काम्यानि कुर्वतः युक्तः पाठात् क्रमनियम इति प्राप्ते यदि पुरुषेच्छायाः क्रमनियमो भवेत् तदा काम्यानां कर्मणां क्रमनियमो भवेत्। इच्छाया अनियमात्तु न क्रमनियमो युक्तः।

य एतेनेति। उपरितनमधिकरणं क्रमचिन्तार्थम्। तदुपोद्घाततया चिन्त्यते "य एतेनानिष्ट्वा अथान्येन यजते" इत्यत्र एतच्छब्दः सर्वेषां ज्योतिष्टोमसंस्थानां वादः विशेषकाभावादिति प्राप्ते नित्यत्वादग्निष्टोमसंस्थस्य प्रकरणमिति तस्यैव वाद इति राद्धान्तः।

अथान्येनेति। य एतेनेत्यग्निष्टोमसंस्थपरामर्शात् अथान्येनेति संस्थान्तरग्रहणं अन्यशब्दस्य उक्तसजातीयान्यबोधकत्वदर्शनादिति प्राप्ते एष वाव प्रथमो यज्ञो यज्ञानां इति यज्ञश्रुतेः यज्ञान्तरमेवान्यशब्देन परामृश्यते न तु संस्थान्तरमिति सिद्धान्तः।

एकस्तोमे वा। अन्येनेत्यनेन सजातीयक्रतूनामेव ग्रहणं एकस्तोमानां प्रकृतत्वादिति प्राप्ते सन्दिग्धे वाक्यशेषान्निर्णयो युक्तः। इह तु असन्दिग्धैव ज्योतिष्टोमान्येष्ववगतिरिति अर्थवादमात्रमेतत् "यो वै त्रिवृदन्यं यज्ञक्रतुं" इत्यादि।

इति तृतीयः पादः

अथ चतुर्थः पादः

क्रमकोपः। अत्र श्रुत्यर्थयोः पाठक्रमेण विरोधे बलाबलचिन्ता। 'आश्विनो दशमो गृह्यते तं तृतीयं जुहोति' इति। अत्र अविधेयत्वात् क्रमस्य अवगतेश्च तुल्यत्वादुभयोर्विकल्प इति प्राप्ते दशमप्रातिपदिकार्थविरोधात् श्रुतेरेव प्राबल्यं; अर्थक्रमे तु यवाग्वा विधेयायाः पाठक्रमेण होमानन्तरं पाके साधनत्वानुपपत्तेः विरोधात् पाठक्रमबाधः।

अवदानाभिघारण। अत्र प्रवृत्तिमुख्यक्रमयोः बलाबलचिन्ता। प्रवृत्तेः पूर्वप्रवृत्तत्वात् तत्क्रमस्य बलीयस्त्वमिति प्राप्ते यथा कार्यं निर्वर्त्यते तथा क्रमो ग्राह्यः कार्यार्थत्वात्तस्य। होमश्चावदानादीनां कार्यं, तदनुसारेण क्रम आदरणीयः इति।

वचनादिष्टिपूर्वत्वम्। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत इति सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रं इति च श्रूयते। तत्र इष्टिपूर्वत्वमेव सोमस्य। न तु आधानानन्तर्यविधिः इति प्राप्ते सोमेन यक्ष्यमाण इति अद्यतनभविष्यति प्रत्ययः अनद्यतनेऽसम्भवादाधानानन्तर्यं लक्षयति। अतः सोमपूर्वत्वेन इष्टिपूर्वत्वस्य विकल्पः।

उत्कर्षाद्वा ब्राह्मणस्य। किं सर्वेषां त्रैवर्णिकानामयं विकल्पः उत ब्राह्मणस्य सोमपूर्वत्वमेवेति सन्देहे कल्पद्वयेपि ब्राह्मणशब्दाश्रवणात् सर्वेषामेव कल्पद्वयमिति पूर्वपक्षः

इष्टिपूर्वकत्वे ब्राह्मणस्य एकप्रधानन्यूनदर्शपूर्णमासप्रयोगापत्तेः इयमपेक्षा जायते केन प्रकारेण ब्राह्मणः सम्पूर्णौ दर्शपूर्णमासौ कुर्यादिति तस्यापेक्षायां अपरः सोमपूर्वत्वकल्प उपदिश्यत इति अपेक्षितविधिपर्यालोचनया ब्राह्मणस्यैव सोमपूर्वत्वमिति तस्यैव कल्पद्वयम् ।

पुरोडाशास्त्वनिर्देशे । एकस्य हविष उत्कर्ष इति स्थिते विशेषावधारणार्थमिदमधिकरणम् ।

विकृतेः प्रकृतिकालत्वात् । अत्र य इष्ट्येति वचनाभावं कृत्वाचिन्ता । पूर्वपक्षः प्रकृतिविकृत्योः द्व्यहकालतायां पौर्णमासीकालस्याल्पत्वात् प्रकृतेर्द्व्यहकालतानुग्रहात् विकृतेः सद्यस्कालत्वमिति । सिद्धान्तस्तु चोदकप्राप्तद्व्यहकालतानुग्रहाय विकृतीनां चतुर्दश्यामुपक्रमः पञ्चदश्यां समाप्तिरिति । वस्तुतस्तु वचनबलात् विकृतीनां सद्यस्कालतैव ।

सान्नाय । तथा सोमविकाराः । नासोमयाजी सन्नयेदिति कृतसोम एव सान्नाय्याधिकारी प्रतीयते । तथा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति कृतदर्शपूर्णमास एव सोमाधिकारी । यन्त्रिते अधिकारिणि कालो नियन्तुं शक्यते नान्यथेति अधिकरणद्वयेपि तुल्यम् । द्वितीयाधिकरणे इष्ट्वेति क्त्वानिर्देशात् कर्तृनिर्देशाभावात् पुनराशङ्का । अत्रापि क्त्वाप्रत्ययेन निर्वृत्तदर्शपूर्णमाससमानकर्तृकता सोमस्यावगम्यमाना तथाविध एव सोमे कर्तेत्यवगमयति । विकृतीष्टिष्वप्येष एव न्यायः ।

बृहती

(शाबरभाष्यव्याख्या)

तृतीयाध्यायस्य प्रथमः पादः

अथातश्शेषलक्षणम् ॥ १ ॥

[1]नानाकर्मलक्षणं वृत्तमिति । **कर्मानुबन्धभेदाच्छास्त्रभेदः, अतः शास्त्रभेदलक्षणं वृत्तमित्यर्थः । ननु च शास्त्रभेदे सत्यैदमर्थ्यं न सिद्ध्यति अङ्गप्रधानानाम् । विनियोगतः कर्मभेद उक्तः ।**

ऋजुविमला

अथातः शेषलक्षणम् । अत्र भाष्यम्-नानाकर्मलक्षणं वृत्तमिति । तदनुपपन्नम् । न हि द्वितीयेऽध्याये नानाकर्मलक्षणं वृत्तं अपि तु नानाशास्त्रलक्षणमित्याशङ्क्याह—**नानाकर्मलक्षणं वृत्तमिति । कर्मानुबन्धभेदाच्छास्त्रभेदः अतश्शास्त्रभेदलक्षणं वृत्तमित्यर्थः ।** अस्यार्थः—साध्यानुबन्धभेदाभ्यां शास्त्रभेद उक्तः । तत्सिध्यर्थं चानुबन्धभूतकर्मभेदः प्रतिपादितः अतो नानाकर्मलक्षणं वृत्तमिति शास्त्रभेदहेतुभूतनानाकर्मलक्षणवृत्तताभिधाने फलत इदमेवोक्तं भवति शास्त्रभेदलक्षणं वृत्तमिति । कर्मणो नियोगस्यानुबन्धावच्छिन्नत्वाच्छास्त्रभेदो भवति । अतो नियोगानुबन्धभूतेन कर्मभेदेन शास्त्रभेदसिद्धेः शास्त्रभेदलक्षणं वृत्तमित्येवं फलत उक्तं भवति । **ननु शास्त्रभेदे सत्यैदमर्थ्यमङ्गप्रधानानां न सिद्ध्यति** न हि भिन्नशास्त्रप्रमेयाणां दर्शपूर्णमासज्योतिष्टामाद्यपूर्वाणां परस्परमङ्गाङ्गित्वमस्ति । तेन हेतुहेतुमद्भावस्तावन्नास्ति, किन्तु वैपरीत्यमेवेति यावत् ।

उत्तरम्—**विनियोगतः कर्मभेद उक्तः ।** परस्परं पदार्थानां विनियोगतः क्रियाकारकगुणगुण्यादिरूपेण सम्बन्धादनुबन्धभूतकर्मणो भेद उक्तः । एतदुक्तं भवति —विनियोगनिबन्धनमनुबन्धभेदमाश्रित्य शास्त्रभेद उक्तः । तन्निबन्धने च शास्त्रभेदे सत्यपि सिद्ध्यत्येवाङ्गप्रधानभावः । सम्प्रति विनियोगशब्दमैदमर्थ्यलक्षणसंबन्धपरं मत्वा चोदयति

---

(1) अत्र भाष्यं न मुद्राप्यते । पुनानगरमुद्रितशाबरभाष्यगता पुटसङ्ख्या भाष्योदाहरणस्थलेषु प्रदर्श्यते । (1) पुट. 647

ननु चेदानीमेव विनियोगश्चिन्त्यते। कथं विनियोगतो भेदः, भेदे सति विनियोगः। अत एव च भेदलक्षणं वृत्तमिति हेत्वर्थतयैव भेदलक्षणोपन्यासः शेषलक्षणस्य। सत्यं, हेत्वर्थतयैव उपन्यासः सत्यं च भेदाद्विनियोगः। तथापि शास्त्रभेदोऽपि विनियोगत एव। किन्त्वसौ विनियोगः पदनिमित्तकः।

किमिदं पदनिमित्तक इति? प्रतिपत्तौ हेतुः पदनिमित्तकः पदार्थानां संबन्धप्रतिपत्तिनिमित्तक इत्यर्थः। यस्त्वयं तृतीये चिन्त्यते स कार्यनिमित्तकः। अतो वाक्यार्थभेदेन शास्त्रभेदे सति वाक्यार्थानां परस्परं शेषशेषिचिन्ता शेषलक्षणमित्युच्यते लक्ष्यते हि शेषशेषिप्रतिपत्तौ न प्रतिपाद्यते[1]। ननु व्रीहीन्

—नन्विदानीमेव विनियोगश्चिन्त्यते कथं विनियोगतोभेदः यावता भेदे सति विनियोगः अत एव च भेदलक्षणं वृत्तमिति हेत्वर्थतयैव भेदलक्षणोपन्यासः शेषलक्षणस्य। संप्रति विनियोगशब्दस्य स्वाभिमतमर्थं प्रकटयति—सत्यं हेत्वर्थतयोपन्यासः सत्यञ्च भेदाद्विनियोगः तथापि शास्त्रभेदोऽपि विनियोगत एव, किन्त्वसौ विनियोगः पदनिमित्तकः न कार्यनिमित्तकः। किमिदं पदनिमित्तक इति? प्रतिपत्तौ हेतुः पदनिमित्तकः वाक्यार्थ-प्रतिपत्तौ हेतुः सम्बन्धः पदनिमित्तकः। वाक्यार्थो हि परस्परान्वितपदार्थरूपः प्रतीयते परस्परान्वयः पदार्थानां पदनिमित्तकः। अन्वितेषु स्वार्थेषु बोध्यमानेष्वन्वयोऽर्थगृहीत इति तद्भूताधिकरणे दर्शितं स्पष्टयति—पदार्थानां संबन्धप्रतिपत्तिनिमित्तक इत्यर्थः। पदार्थानां संबन्ध[1]प्रतिपत्त्या गृह्यत इत्यर्थः। यस्त्वयं तृतीये चिन्त्यते स परस्परसंबन्धप्रतिपत्तिपूर्वकः कार्यनिमित्तकः। ग्रहं सम्मार्ष्टीति क्रियाजन्यफलसंबन्धितामात्रेण पदनिमित्तकः सम्बन्धः। शेषशेषिभावस्तु ग्रहसम्मार्गयोः कार्यनिमित्तकः। कार्यान्तरोपयोगितया हि ग्रहाणां तान् प्रत्येव सम्मार्गस्य शेषत्वम्। अतः पदनिमित्तकपदार्थसंबन्धेन वाक्यार्थभेदेन शास्त्रभेदे सति भिन्नानां वाक्यार्थानां परस्परं शेषशेषिचिन्ता शेषलक्षणमित्युच्यते। ननु व्रीहीन्

(1) A. संबन्धिनि प्रतिपत्त्या गृह्यत इत्यर्थः

प्रोक्षतीति पदार्थानां शेषशेषिचिन्ता। अश्रवणमत्रापराध्यते भवतः। व्रीहिभिर्यजेतेत्यनेन सहास्य शेषशेषिचिन्ता न पुनर्व्रीहिपदार्थमात्रतयैव। किमिति तर्हि शेषलक्षणं? विनियोज्यो हि शेषः तद्विषयाणि श्रुत्यादीनि तस्माच्छेषलक्षणमित्युच्यते। शेषिपरिज्ञानं तर्हि किन्निमित्तं? प्रमाणान्तरनिमित्तकं तत्।

प्रोक्षतीति पदार्थानामपि परस्परं **शेषशेषिचिन्ता** यदि वाक्यार्थानामेव परस्परं शेषशेषिभावश्चिन्त्यते तदा शास्त्रभेदः शेषलक्षणस्य हेतुर्भवेत न त्वेतदेकान्ततोऽस्ति। पदार्थानामपि परस्परं शेषशेषिभावचिन्तनात्[1]। **अश्रवणमत्रापराध्यते भवतः। व्रीहीभिर्यजेतेत्यनेन सहास्य शेषशेषिचिन्ता, न पुनर्व्रीहिपदार्थमात्रतयैव।** व्रीहिभिर्यजेतेत्यनेन विनियोगशास्त्रेण ये व्रीहयो यागे करणतया प्रतिपादिताः शास्त्रार्थीभूताः तैः सह प्रोक्षणस्य शास्त्रार्थी[2]भूतस्य शेषशेषिचिन्तेति। यदि शास्त्रार्थानां सतां शेषशेषिचिन्ता, **किमिति तर्हि शेषलक्षणमित्युच्यते।** यदि तावत् पदार्थानामेव शेषशेषिता स्यात् तदा व्रीहीन् प्रोक्षतीति प्रोक्षणं प्रथममेव व्रीहिशेषतयैव प्रतिपाद्यत इति शेषप्रतिपत्तिपरत्वाच्छेषलक्षणमेवेदं स्यात्। शास्त्रार्थीभूतयोस्तु पश्चात् कार्यनिमित्तकः शेषशेषिभाव इति द्वयोः शास्त्रप्रमितयोः शेषशेषिभावः कार्यनिमित्तक इति न शेषलक्षणमेवेदं स्यात अपि तु शेषिलक्षणमपीति। उत्तरम् —**विनियोज्यो हि शेषः, तद्विषयाणि च श्रुत्यादीनि, तस्माच्छेषलक्षणमित्युच्यते।** यो हि विनियुज्यतेऽङ्गत्वेन प्रतिपाद्यते स शेषः। श्रुत्यादीन्यपि तद्विषयाणि तत्प्रतिपादकान्येव, न शेषित्वप्रतिपादकानि। तथा हि—व्रीहीन् प्रोक्षतीत्यनेन शास्त्रेण शास्त्रान्तरप्रतिपादितान् व्रीहीन् प्रति शेषत्वेन प्रोक्षणं प्रतीयते न शेषितया। यदपि व्रीहिभिर्यजेतेति शास्त्रं तदपि यागशेषतयैव व्रीहीन् प्रत्याययति न प्रोक्षणादिकं प्रति शेषितया। अतः शेषतयैव सर्वत्र चोदनालक्षणोऽर्थः। चोदनालक्षणार्थविचारश्च मीमांसाशास्त्रान्तर्भूत इति। तस्माच्छेषलक्षणमित्युच्यते। यदि तर्हि शेषतयैव चोदनालक्षणं **शेषिपरिज्ञानं तर्हि किं निमित्तं? प्रमाणान्तरनिमित्तकं तत्** यदा हि चोदनया व्रीह्यादीन् प्रति प्रोक्षणादयः शेषतया ज्ञापिताः

---

(1) A. निरूपणात् (2) A. पदार्थीभूतस्य

लक्ष्यते हि शेषी शेषप्रतिपत्तौ, न प्रतिपाद्यते। अतो युक्तं शेषलक्षणम्।

यद्येवं विनियोज्यः शेष इति वक्तव्यम्। किमिदं शेषः परार्थत्वादिति? उक्तमस्माभिः पदनिमित्तकोऽपि विनियोगो विद्यत इति। अतः कार्ये विनियोज्यः शेषः कथं स्यादिति शेषः परार्थत्वादित्युक्तम्। यस्य कार्ये विनियोगः स तदर्थ एव भवति। अतः परार्थत्वादिति लक्षितम्। न च कार्यं परार्थं भवितुमर्हति कार्यमेव हि तन्न स्यात यद्यन्यार्थम्।

तदैवार्थात् व्रीह्यादीनामपि शेषित्वं परिज्ञातं भवति। कस्मात् पुनर्न शेषिता चोदनालक्षणेत्यत्राह—लक्ष्यते हि शेषी शेषप्रतिपत्तौ न प्रतिपाद्यते। यत्प्रतिपादनपरो हि शब्दः स शब्दार्थः व्रीहीन् प्रोक्षतीत्यादिवाक्यानि च व्रीहिशेषभूतप्रोक्षणप्रतिपादनपराणि प्रोक्षणादीनामेव विधीयमानत्वात व्रीहीणां तूद्दिश्यमानत्वात्। अतो युक्तं शेषलक्षणम्। यद्येवं यदि यो विनियुज्यते स शेषः तदापि विनियोज्यः शेष इति वक्तव्यम्। किमिदं शेषः परार्थत्वादित्युच्यते। परिहरति—उक्तमस्माभिः पदनिमित्तकोऽपि विनियोगो विद्यत इति। यदि विनियोज्यः शेष इत्युच्यते तदा पदनिमित्तकोऽपि विनियोगो विद्यत इति तद्योगेनापि शेषता स्यात्। अतः कार्ये विनियोज्यः शेषः कथं स्यादिति परार्थत्वादित्युक्तम्। कार्ये विनियोज्यः संबन्धित्वेन प्रतिपाद्यमानो यः स शेषः इति कथं नाम ज्ञायेतेत्येवमर्थं शेषः परार्थत्वादित्युक्तम्। कथं पुनः परार्थत्वादित्युक्ते यस्य कार्ये विनियोगः स एव प्रतीयत इत्यत आह– यस्य कार्ये विनियोगः संबन्धः स तदर्थ एव भवति। अतः कार्ये विनियोगस्वीकरणाय परार्थत्वादिति लक्षितम्। कस्मात् पुनर्यस्य कार्ये यस्य विनियोगः तस्य कार्यार्थतैव भवति। तत्राह—न कार्यं परार्थं भवितुमर्हति कार्यमेव हि तन्न स्याद्यद्यन्यार्थम्। अस्यार्थः-सर्वो हि संबन्धो गुणप्रधानभावमन्तरेण न संभवति। तत्र कस्य गुणता कस्य प्रधानतेति चिन्तायां यत् कार्यं तन्न तावद्गुणभूतं कार्यत्वावगमविरोधात। यत्त्वकार्यभूतमपरं तत् कार्यार्थमिति युक्तम्। अतस्तत्र पुरुषस्य नियोगः कार्यार्थत्वेनावगम्यते।

अत एव गर्भदासदृष्टान्तो भाष्ये। ननु च परार्थतामात्रं परार्थशब्देनोच्यते। किमिदं अत्यन्तपरार्थ इति। उच्यते। अत एवात्यन्तपरार्थः यस्मात् परार्थतामात्रतैवोच्यते। अतः साधु विवृतम्।

अतो यस्य नियोगेन सह साक्षात्संबन्धः प्रतीयते स नियोगार्थः यस्य च तेन साक्षान्नियोगसंबन्धेनार्थान्तरेण संबन्धः सोऽपि तदर्थ एव। तस्यापि कार्यार्थत्वेन कार्यत्वात्। एवमपरस्यापि तत्सम्बन्धिसंबन्धस्य तादर्थ्यमूहितव्तम्। अतः शेषः परार्थत्वादित्यस्यायमर्थः—कार्ये यस्य विनियोगः स शेषः परार्थलक्षणः। तस्येदं लक्षणमुच्यते। न पुनरुपयुक्तेतरस्य। केन पुनर्हेतुना कार्ये विनियोज्यलक्षणः शेषो ज्ञायते? परार्थत्वात् कार्येण सह संबन्धावगमात्। अत्रेदं व्युत्पाद्यम्। अन्वितपदार्थात्मकत्वाद्वाक्यार्थस्य परस्परक्रियाकारकभावादिमात्रात्मकत्वाद्वाक्यार्थस्य परस्परक्रियाकारकभावादिमात्रात्मकत्वाच्चान्वयस्य पदार्थानां शेषत्वोत्पत्तौ हेतुर्नास्ति। अतो लक्षणारम्भो निर्विषय[1] इति पूर्वः पक्षः। कार्यसंबन्धस्यैवान्यथाऽनिर्वाहात् शेषतोच्यते ततो लक्षणमारम्भणीयमिति राद्धान्तः। ग्राहकव्युत्पत्तिः पुनरनुपयोगिनीति नात्र व्युत्पाद्यते। शेषित्वाभिमतस्य हि कार्यतैव कार्यप्रतियोगिनः शेषस्य शेषत्वे हेतुः न विनियोज्यस्य ग्राहकगृहीततापि। अत आधानादीनामपि विनियोगसिद्धिः। ग्राहकेण पुनरगृहीतानां विनियोगे प्रतिप्रकरणं व्यवस्था न सिद्ध्यतीति सप्तमाद्य एव ग्राहको व्युत्पाद्यः। तथा चाह—"न च षट्केणाप्ययमर्थो निरूपितः। सम्बन्धमात्रपर्यवसायात्। उभयथा च सम्बन्धोपपत्तेः" इति। यत एव च कार्ये विनियोगो यस्य स तदर्थ एव भवति। **अत एव गर्भदासदृष्टान्तो भाष्ये।** अन्यथा गर्भदासतुल्यता निष्प्रमाणिका स्यात्। **ननु परार्थतामात्रं परार्थशब्देनोच्यते किमिदमत्यन्तपरार्थ इति।** अत्यन्तशब्दाभावे कथमत्यन्तार्थो लभ्यत इत्यर्थः। **उच्यते—अत एवात्यन्तपरार्थः यस्मात् परार्थतामात्रतैवोच्यते** यदि परार्थशब्देन परार्थापरार्थाभिधानं स्यात् तदाऽत्यन्तपरार्थता न लभ्येत। अतः परार्थशब्दस्तु परार्थतामात्रं ब्रूते इति। **अतः साधु विवृतम्।** एवं सम्बन्धभाष्यं व्याख्याय प्रसक्तानुप्रसक्तं परिसमाप्य

---

(1) A. निष्फलः

कः शेषः केन हेतुना शेषः[1] इति । **किमिदं प्रश्नद्वयं ? केन हेतुना शेष इत्येतावद्वक्तव्यम् । सिद्ध्यति हि परार्थत्वाच्छेष इति । उच्यते, स्यादेतदेवं यदि सिद्धवदभिधानं हेतोः स्यात् । हेतुरप्यत्र कथनीय एवेत्यदोषः ।**

अत एव को धर्मः कथंलक्षण इत्युक्तम् । किं पुनः सिद्धस्य कथने प्रयोजनं ? उपयुक्तादन्यः शेष इत्येवमादिनिवृत्त्यर्थम् । कथं च विनियुज्यत [2]इति ? **कोऽयं प्रश्नः ? केन विनियुज्यत इति वक्तव्यम् , किमिदं कथं च विनियुज्यत इति ।**

प्रकृतं व्याचष्टे—**कः शेषः केन हेतुना शेष इति । किमिदं प्रश्नद्वयं ? केन हेतुना शेष इत्येतावद्वक्तव्यं सिद्ध्यति हि परार्थत्वाच्छेष** इत्येतावताऽभिमतम् । **उच्यते—स्यादेतदेवं यदि सिद्धवदभिधानं हेतोः स्यात् हेतुरप्यत्र कथनीय एवेत्यदोषः।** अस्यार्थः । यदि शेषत्वे परार्थत्वमेव हेतुरिति सिद्धम् स्यात्तदा कः शेष इति प्रश्नोऽनर्थकः स्यात् । यतस्तु हेतुरप्यत्र कथयितव्यः । न च साध्यमनभिधाय हेतुरभिधातुं शक्यत इति साध्यविशेषनिर्धारणायार्थवानयं प्रश्नः । यत एव साध्यपुरः सरमेव हेतोरभिधानं **अत एव को धर्मः कथं लक्षणश्चेत्युक्तम्** । ननु च शेषः परार्थत्वादिति साध्यभेदो[3] निर्दिष्ट एव । न च शेषशब्दस्यार्थो न प्रसिद्धः, । तदाह—**किं पुनः सिद्धस्य कथने प्रयोजनम् ?** उत्तरम्—**उपयुक्तादन्यो यः स शेषः इत्येवमादिनिवृत्त्यर्थम्** । अथातः शेषलक्षणमित्येतावत्युक्ते उपयुक्तादन्यो यः स शेष इत्येवमाद्यपि प्रतीयेत । न च तादृशस्य परार्थता हेतुः । अतो हेतुविशेषाभिधानाय साध्यविशेषं वक्तुं प्रश्नोऽप्यर्थवान् । **कथं च विनियुज्यत इति ? कोऽयं प्रश्नः ? केन विनियुज्यत इति वक्तव्यम् । किमिदं कथं च विनियुज्यत इति ।**

---

(1) P. 652 (2) P. 652 (3) A. साध्यविशेषो

अत्राभिधीयते। केन विनियुज्यत इत्युच्यमाने श्रुत्यादिव्यापार एव केवलं पृष्टः कथितश्च भवति। न पुनः सविनियोगानां श्रुत्यादीनां, न च नियोगशून्यानि श्रुत्यादीनि शेषतामापादयितुं शक्नुवन्ति। कार्याभावात्। कार्यनिमित्तं च परार्थमित्युक्तम्। अतः कथं च विनियुज्यत इत्युक्तं सहेतुकविनियोगसिद्ध्यर्थम्। अत एव च श्रुत्यादीनि विनियोगे कारणानीत्युक्तम्। न पुनः श्रुत्यादिभिरिति। कथमित्यनुषङ्गः। तेषां बलवदबलवत्तेत्यनेनापि कथं चेत्यनुषक्तव्यम्।

अत्राभिधीयते—**केन विनियुज्यत** इत्येतावत्युच्यमाने **श्रुत्यादिव्यापार एव** तु **केवलं पृष्टः कथितश्च भवति। न पुनः सविनियोगकानां श्रुत्यादीनाम्।** भवत्वेवं तथापि को दोष इत्यत्राह—**न च नियोगशून्यानि श्रुत्यादीनि शेषतामापादयितुं शक्नुवन्ति** [1]कार्याभावे सक्तून् जुहोतीतिवत्। **कार्यनिमित्तं च पारार्थ्यमित्युक्तम्। अतः कथं च विनियुज्यत इत्युक्तम्। सहेतुकविनियोगसिद्ध्यर्थम्।** कार्यरूपत्वेन हि शेषिणः शेषस्य तत्र विनियोगः न पुनः श्रुत्यादिमात्रेण। यत एव च नियोगव्यापारवशेन शेषत्वमवगम्यते। **अत एव च श्रुत्यादीनि च विनियोगे कारणानीत्युक्तम्। न पुनः श्रुत्यादिभिरिति।** कारणमात्रता श्रुत्यादीनां न साधकतमतेत्यर्थः। श्रुत्यादीनि च विनियोगे कारणानीत्यत्रापि कथमित्यनुषङ्गाद्योज्यम्। **एतेषां च बलवदबलवत्तेत्यत्रापि कथमित्यनुषङ्गो वक्तव्यः।** एतदुक्तं भवति—कः शेष इति उपयुक्तेतरो वा, अवयवो वा, परार्थो वा ? तत्रोत्तरं परार्थः शेष इति। केन हेतुना शेषो भवतीति परार्थत्वेन कार्यसंबन्धित्वेन शेषो भवतीत्युक्तम्। कथं च विनियुज्यते ? केन प्रकारेण शेषभावोऽवगम्यत इत्यर्थः। उत्तरम्—श्रुत्यादिसचिवकार्यबलेन। श्रुत्यादीनि च विनियोगे कारणानीति। कथ श्रुत्यादीनि विनियोगज्ञानोत्पत्तौ साहाय्यं यान्तीति। द्वारविशेषसमर्पणेनेत्युत्तरम्। द्वयमप्येतत् प्रत्यधिकरणं वक्ष्यते। तेषां च कथं बलवदबलत्तेत्यत्र श्रुतिलिङ्गाधिकरणे उत्तरं भविष्यति।

---

(1) G. कार्याभावात्

एष तावत् लक्षणार्थः। नैतावता विना शेषपरिज्ञानसिद्धिः। अत एवान्यदपि साधनसिद्ध्यर्थं किञ्चिदुपोद्घातादिना शेषः परार्थत्वादिति सूत्रं सभाष्यं व्याख्यातम्।

[1]अथ तत्र किं वृत्तम्? यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेतेति। उक्तं तच्छेषलक्षणं मन्वानस्यैतच्चोद्यम्। उत्तरं तु नियोगविषयता तत्रापनीता शेषत्वं तु इहैव सर्वेषां प्रतिपाद्यते। कोऽयं विनियोगविषयत्वापन्हवः? न च विनियोगशून्यानि श्रुत्यादीनि शेषतया विनियोक्तुं शक्नुवन्तीत्युक्तम्।

कार्यत एव शेषतोपपद्यते। कार्येणैव श्रुत्यादिसचिवेन ज्ञायत इति तत्त्वार्थः। एष तावल्लक्षणार्थः। नैतावता विना शेषपरिज्ञानसिद्धिः। अन्यदपि साधनसिद्ध्यर्थं किञ्चिदुपोद्घातादिभिः शेषः परार्थत्वादिति सभाष्यं सूत्रं व्याख्यातमेव पूर्वम्। अतो न व्याख्यायते। अथ तत्र किं वृत्तम्? यैस्तु द्रव्यं चिकीर्ष्यते इत्यादि भाष्यं तदनुपपन्नम्। अनेन भाष्येण पुनः पौनरुक्त्य[2]मिवाशङ्क्यते तच्चानुपपन्नम्। तत्र द्रव्यगुणादीनां शेषत्वस्याप्रतिपादितत्वात्। अथ संस्कारस्य तत्र [3]शेषता प्रतिपादितेति एवमपि तेषामर्थेन पौनरुक्त्यम् ततश्च तत्रैवेदं युक्तं वक्तुम्। सर्वेषां हि शेषत्वे तत्रोक्ते अत्र शेषत्वप्रतिपादनप्रतिज्ञाक्षेपो युक्त इत्याशङ्क्याह—यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयते इति। उक्तं शेषलक्षणं मन्वानस्येदं चोद्यम्। एतदुक्तं भवति-संस्कारस्य शेषत्वं तत्रोक्तम्। तेनाविशेषेण [4]इदमयुक्तं वक्तुम् अथातश्शेषलक्षणं वक्ष्याम इति। उत्तरभाष्यम् "तत्रापूर्वार्थता व्यावर्तिता" इति तदनुपपन्नम्। संस्काराणामप्यपूर्वार्थत्वादिति ; अतो व्याचष्टे उत्तरं तु नियोगविषयता तत्रापनीता शेषत्वं तु इहैव सर्वेषां प्रतिपाद्यते। इदानीमाक्षिपति—कोऽयंविनियोगविषयत्वापन्हवः अयुक्त इत्यर्थः। कुतः? न च विनियोगशून्यानि श्रुत्यादीनि शेषतामापादयितुं शक्नुवन्तीत्युक्तम्। चशब्दो हिशब्दस्यार्थे

---

(1) P. 649 (2) R. मित्याशङ्क्यते। (3) R. स्य प्रति (4) इदमुक्तं वक्तुं

तस्माच्छेषत्वं विनियोगापह्नवश्चेति विप्रतिषिद्धम्। अतः शेषत्वं वा नास्त्यपूर्वविषयता वा नापह्नोतुं शक्यते। उच्यते—अनभिज्ञो भवान् विषयनियोज्यानाम्। न ब्रूमो गुणभूतेषु पुंसां नियोज्यता नास्तीति। किं तर्हि? विषयस्तु न भवतीति। कार्यान्तरस्य दर्शनात्। यस्य पुनर्नियोगसिद्धिरेव कार्यः स विषयः 'तेषामर्थेन' इत्यत्र प्रकटतरमेव वक्ष्यामः। अतो युक्तमुक्तं तत्रापूर्वार्थता व्यावर्तितेति।[1]

यस्य हि नियोगः कार्यः तत्र पुरुषो नियुज्यते। अतः तदभ्युपगमेनैव नियोगविषयताप्यस्तीति मन्यते। **तस्माच्छेषत्वं नियोगविषयत्वापह्नवश्चेति विप्रतिषिद्धम्। अतः शेषत्वं वा नास्ति। अपूर्वार्थता वा नापह्नोतुं शक्यते। उच्यते-अनभिज्ञो भवान् विषयनियोज्यानाम्।** अस्यार्थः—गुणकर्मणां तावदवघातादीनां कारकीभूतः पदार्थः साध्यत्वेनावगम्यते। तत्र यदि नियोगोऽप्यपरोऽङ्गीक्रियते तदा साध्यद्वयमेकस्मिन् वाक्ये न संबध्यते परस्पराननुगुणत्वात् न च नियोज्यविशेषणता तस्याश्रयितुं युक्ता। क्रियाफलतया तद्विशिष्टस्य नियोगसंबन्धानुपपत्तेः। तस्माद्यो विषयो नियोगस्य तस्यापरं साध्यान्तरं नास्तीति अभ्युपेयम्। अतो भवान् विषयं न जानाति। येन विषयतां गुणकर्मणामिच्छति। तथा नियोज्यस्वरूपं च न जानाति। यतः परस्परानुगुण्यार्थं क्रियाफलं नियोज्यविशेषणं मन्यते। नियोज्यो हि नियोगार्थं कर्तव्यतयाऽवबुध्यते। तस्य च तदेव साध्यभूतं विशेषणतयाऽन्वेति यन्नियोगादेव सिध्यति। न च क्रियाफलं नियोगादेव सिध्यति। अतः कारकीभूतपदार्थविशिष्टो नियोज्यो भवति। तेन विषयनियोज्याऽनभिज्ञतया गुणकर्मविषयनियोगं भवानभिवाञ्छति। यद्यपि गुणकर्मसु नियोगो नास्ति तथापि किमिति विषयो न भवतीत्यत्राह—**न ब्रूमो गुणभूतेषु पुंसो नियोज्यता नास्तीति। किं तर्हि विषयस्तु न भवतीति।** अधिकारविध्यधीना लिङाद्यनुवाद्यस्ति प्रेरणा। गुणभूतेषु पुरुषस्य विषयस्तु न भवति। यदि प्रेरणाविषयो न नियोगस्य विषयः, कस्तर्हि विषयः, इत्यत्राह—**यस्य पुनर्नियोगसिद्धिरेव कार्यः स विषयः।** तदिदं सर्वं तेषामर्थेत्यत्र प्रकटतरं वक्ष्यामः। **अतो युक्तमुक्तं तत्रापूर्वार्थता व्यावर्तितेति।**

---

(1) P. 660

द्रव्यगुणसंस्कारेषु बादरिः ॥ ३ ॥[1]

कः पुनरत्रास्याभिप्रायो द्रव्यगुणसंस्कारेष्वेव पारार्थ्यं वदतः ? अयमभिप्रायः—विभक्तिभिः तादर्थ्यं प्रातिपदिकार्थस्य प्रतिपाद्यते। तच्च द्रव्यगुणयोरुपलभ्यते एकहायन्या क्रीणातीति अरुणयेति च। संस्कारस्य तु कथं ? तत्रापि विभक्त्यैव व्रीहीन् प्रोक्षति व्रीहीनवहन्ति इति। ननु च प्रातिपदिकार्थस्य प्राधान्यं द्वितीया प्रतिपादयति न कर्मणो गुणभावम्। अकारकज्ञो भवान्। कारकविभक्तयो हि कथं क्रियानिरपेक्षाः। तस्मात् क्रियानिरपेक्षमेव प्रातिपदिकार्थस्य प्राधान्यं गुणत्वं वा। अत एव च विभक्तिविधाने भगवतः पाणिनेः कारकोद्देशः।

द्रव्यगुणसंस्कारेषु बादरिः

'कः पुनरत्राभिप्रायो द्रव्यगुणसंस्कारेष्वेव पारार्थ्यं वदतः'। अनेन पूर्वपक्षमाक्षिपति। एकदेशी समर्थयते—अयमभिप्रायः—विभक्तिभिः तादर्थ्यं प्रातिपदिकार्थस्य प्रतिपाद्यते। तच्च द्रव्यगुणयोरुपलभ्यते एकहान्या क्रीणातीति द्रव्यस्य तादर्थ्यम्। एकहायनीशब्दस्य यौगिकत्वेन द्रव्यवचनत्वात् अरुणयेति च गुणस्य तादर्थ्यं संस्कारस्य तु तादर्थ्यं कथं ? उत्तरम्—अत्रापि विभक्त्यैव तादर्थ्यं व्रीहीनवहन्ति व्रीहीन्प्रोक्षतीति द्वितीयया। ननु च प्रातिपदिकार्थस्य प्राधान्यं द्वितीया प्रतिपादयति न कर्मणः क्रियाया द्रव्यं प्रति गुणभावम्। उत्तरम्—अकारकज्ञो भवान्। कारकविभक्तयो हि कथं क्रियानिरपेक्षाः। क्रियापेक्षित्वात् कारकाणाम्। तस्मात् क्रियापेक्षमेव प्रातिपदिकार्थस्य प्राधान्यं गुणत्वं वा। तेन श्रुत्यैव द्वितीयया प्राधान्यं वदन्त्या क्रियाया गुणभाव उक्त एवेति वैभक्तिकमेव संस्कारस्यापि शेषत्वम्। यत एव विभक्तिभिस्तादर्थ्यं प्रतिपाद्यते। अत एव विभक्तिविधाने भगवतः पाणिनेः कारकोद्देशः। कर्मणि द्वितीया कर्तृकरणयोस्तृतीयेत्यादि। यदि विभक्तयस्तादर्थ्यं न प्रतिपादयेयुस्तदा नैव कारकोद्देशेन विधीयेरन्।

---

(1) P. 660

कथं तर्हि तद्धितादिषु तादर्थ्यावगतिः, कथं चोपपदविभक्तयः। अतोऽन्यदपि विभक्तिव्यतिरिक्तं पारार्थ्ये प्रमाणं द्रव्यगुणसंस्कारेषु वक्तव्यम्।

ननु चोपकारदर्शनमेव द्रव्यगुणसंस्काराणां पारार्थ्ये हेतुरिति बादरेर्मतम्। किमत्र विभक्त्यादिभिः क्रियते। उच्यते—यद्युपकारदर्शनं पारार्थ्ये हेतुः व्रीहयोऽपि प्रोक्षणस्योपकारकाः स्युः। अथ प्रयोजनं प्रति उपकारदर्शनं हेतुः; प्रयोजनवत्ताज्ञानमिदानीं कुतः?

कारकोद्देशेन विधीयमानाः क्रियापेक्षगुणप्राधान्यं वदन्त्यः तादर्थ्यं प्रतिपादयन्त्येव। अतः कारकोद्देशेन विभक्तिविधानादवगम्यते तादर्थ्यं विभक्तिभिः प्रतिपाद्यत इति। यदि विभक्तिभिः तादर्थ्यमवगम्यते कथं **तर्हि तद्धितादिषु तादर्थ्यमवगम्यते** पर्णमयी जुहूर्भवतीति तद्धिते, 'शरैः स्तरितव्य'मिति कृत्प्रत्यये, 'यजमानसंमिता औदुंबरी भवति' इति समासे। **कथं चोपपदविभक्तयस्तादर्थ्यमवबोधयेयुः** अकारकविभक्तित्वात्। अतो विभक्तिव्यतिरेकेणापि तादर्थ्यदर्शनात् तद्व्यतिरिक्तम**न्यदपि** (ताद)**पारार्थ्ये प्रमाणम् द्रव्यगुणसंस्कारेषु वक्तव्यम्।** संप्रति परसमर्थनवाद्याह—**ननु चोपकारदर्शनमेव द्रव्यगुणसंस्काराणां पारार्थ्ये हेतुरिति बादरेर्मतम्। किमत्र विभक्त्यादिभिः क्रियते।** तेनोपकारकत्वाच्छेषता द्रव्यगुणसंस्काराणाम्। तेन विनापि विभक्त्या यस्योपकारकता तस्य शेषतेति। **यद्युपकारदर्शनं पारार्थ्ये हेतुः व्रीहयोऽपि प्रोक्षणस्योपकारकाः स्युः** उत्पत्तेर्व्रीह्यादिभिर्विना प्रोक्षणस्यानुपपत्तेरित्यर्थः। तेन व्रीहयोऽपि प्रोक्षणशेषभूता भवेयुः। न चैवम्। तस्मान्नोपकारदर्शनमात्रं शेषत्वे हेतुरिति। एकार्थेन चोद्यवाद्येव समर्थनवादिनः आशङ्कामाह—**अथ प्रयोजनं प्रति उपकारदर्शनं हेतुः।** तेन निष्प्रयोजनत्वात् प्रोक्षणस्य सत्यप्युपकार्ये कार्यत्वे न शेषिता। प्रयोजनवत्त्वात्तु व्रीहीणामेव शेषित्वे स्थिते प्रोक्षणस्य संस्कारद्वारेण व्रीह्युपकारकतया शेषतेति। दूषयति—**प्रयोजनवत्ताज्ञानमिदानीं कुतः?** प्रयोजनवत्तैव व्रीहीणां कुतोऽव-

नियोगत इति चेत्। एवं तर्हि नियोगनिर्वृत्तिरेव पारार्थ्ये हेतुः किमिदं उपकारदर्शनं करिष्यति। अत एव च विभक्तिव्यत्ययोऽपि प्रयाजशेषेणेत्येवमादिषु सिद्धो भवति। कृत्तद्धितसमासाश्च तद्वशेनैव ऐदमर्थ्यप्रतिपादका भवन्ति। एवमप्युपपदविभक्तेरसङ्करः सिद्धो भवति।

किमिति तर्हि बादरिः द्रव्यगुणसंस्कारेष्वेव शेषभावं मन्यते यदि नियोगनिर्वृत्तिः पारार्थ्ये हेतुः।

गम्यते। पुनराशङ्कान्तरमाह—नियोगत इति चेत्। नियोगो हि कार्यस्वरूपत्वात् स्वयं प्रयोजनभूतः यस्यापि च तत्संबन्धः तस्यापि तद्वशेनैव प्रयोजनवत्तेति नियोगनिर्वृत्त्यैव प्रयोजनवत्तावगमः। दूषयति—एवं तर्हि नियोगनिर्वृत्तिरेव पारार्थ्ये हेतुः किमुपकारदर्शनं क्लिष्टं करिष्यति। यस्मिन् क्रियमाणे नियोगनिर्वृत्तिर्भवति तत् तस्य कार्यमिति यत एव नियोगनिर्वृत्त्या पारार्थ्यमत एव विभक्तिव्यत्ययोऽपि प्रयाजशेषेणेत्येवमादिषु सिद्धो भवति। प्रयाजशेषप्रतिपत्तिर्हि विध्यपेक्षिता न हविषामभिघारणम्। अतः प्रयाजशेषप्रतिपत्तिरियमिति नियोगवशेन स्थिते विभक्तिव्यत्ययो भवति प्रयाजशेषं हविष्षु अभिघारयति इति। अन्यथा विभक्तिव्यत्ययो दुर्भणः स्यात्। कृत्तद्धितसमासाश्च तद्वशेनैवैदमर्थ्यप्रतिपादकाः अन्यथा तेषां स्वभावत एवैदमर्थ्यबोधकत्वाभावात्। एवं चोपपदविभक्तेरसंकरः (संस्कारः) सिध्यति अन्यथा हि अनियमेन शेषशेषिभावः स्यात्। एकग्रन्थेनाह—किमिति तर्हि बादरिः द्रव्यगुणसंस्कारेष्वेव शेषभावं मन्यते यदि नियोगनिर्वृत्तिः पारार्थ्ये हेतुः। यदि नियोगनिर्वृत्त्या पारार्थ्यमवगम्यते तदा यागस्यापि नियोगनिर्वर्तकतया शेषताऽस्त्येव नियोगं प्रति। तथा नियोज्यविशेषणं स्वर्गादिकमपि प्रति नियोगसिद्धिद्वारेण साधकत्वात् यागस्य शेषता युक्तैव। तथा फलनिर्वृत्तिद्वारेण पुरुषमपि प्रति यागस्य शेषता युक्तैव। तथा फलनिर्वृत्तिद्वारेण पुरुषमपि प्रति यागस्य शेषत्वं नानुपपन्नम्। तथा फलस्यापि नियोज्यविशेषणस्य पुरुषं प्रति शेषता नियोगाक्षेपेणैवावगम्यत इति शेषित्वमस्त्येव। तथा फलभागित-

न नियोगं फले पुरुषे च मन्यते याग एव नियोगः तन्निर्वृत्त्या च नियोगनिर्वृत्तिः। द्रव्यगुणसंस्कारैश्च यागो निर्वर्त्यते। अतः तेषामेव पारार्थ्यं एवं मन्यते बादरिराचार्यः। ननु स्वर्गं यागेन कुर्यादात्मार्थं इति नियोगः। आत्मनेपदप्रयोगात्। नैवं शब्दात प्रतिपत्तुं शक्यते द्वितीया हि कारकस्य प्राधान्यं प्रतिपादयति। यस्याः क्रियायाः तत्कारकम्।

यैवौदुम्बरीसंमानादौ पुरुषस्य शेषतेति यागफलपुरुषाणामपि शेषत्वं युक्तमित्यर्थः। संप्रति समर्थनवादी समर्थयते—**न नियोगं फले पुरुषे च मन्यते। याग एव नियोगः तन्निर्वृत्त्या च नियोगनिर्वृत्तिः।** अस्यार्थः—लोकव्युत्पत्त्यनुसारेण शब्दादर्थोऽवगम्यते तत्र लोके ग्रामं गच्छेत्युक्ते ग्रामगमनमनुतिष्ठन् पुरुषो दृश्यते। कार्यप्रतिपत्तिश्चानुष्ठानहेतुरिति सर्वजनस्य संविदितमेव। यद्विषयमेव च कार्यज्ञानं तद्विषयमेव चानुष्ठानमिति क्रियाविषयमनुष्ठानं दृष्ट्वा क्रियाकार्यत्वावगतिहेतुत्वं शब्दस्यावगम्यत इति यजेतेत्येवमादिभिर्याग एव कार्यतया प्रत्याय्यते न च कार्यमन्यार्थं भवतीति नास्ति यागस्य शेषभावः। **अतः फले नियोगो नास्ति यागेन** फलं साधयेदिति नियोगो नास्ति तथा पुरुषेपि नियोगो नास्ति फलेन पुरुषं संबध्नीयादिति, पुरुषविशेषणमात्रतयैव स्वर्गशब्दस्य श्रवणात्। न च पुरुषविशेषणस्य क्रियया सह साध्यसाधनभावः बोधहेत्वभावात्। अतो यागनिर्वृत्तिमात्रेणैव कृतः शास्त्रार्थ इति बादरिर्मन्यते **द्रव्यगुणसंस्कारैश्च यागो निर्वर्त्यत इति। अतस्तेषामेव पारार्थ्यं मन्यते बादरिराचार्यः। ननु यागेन स्वर्गं कुर्यात् आत्मार्थमिति नियोगः आत्मनेपदप्रयोगात्।** अस्यार्थः—यजेतेत्यात्मनेपदप्रयोगात् कर्त्रभिप्राये क्रियाफले तस्य वृद्धव्यवहारे प्रयोगात्। आत्मार्थं यागेन स्वर्गं कुर्यात् इति नियोगः प्रतीयते तेन फलं प्रति यागस्य पुरुषं प्रति फलस्य शेषताऽस्तीति। परिहरति—**नैवं शक्यते शब्दात् प्रतिपत्तुम्।** अयमभिप्रायः—यदि स्वर्गस्य क्रियाफलता स्यात् तदा आत्मनेपदश्रवणात् आत्मार्थता तस्यावगम्येत। न च क्रियाफलता स्वर्गस्यावसीयते। अथ[यथा] ओदनं पचतीत्योदनस्य। कस्मात् पुनः क्रियाफलता नावगम्यत इत्याह—**द्वितीया हि कारकस्य प्राधान्यं प्रतिपादयति यस्याः क्रियायास्तत् कारकं** तत् क्रियापेक्षं हि द्वितीया प्राधान्यं

न च स्वर्गो यागस्य कारकमिति सिद्धम्। न च वेदात् क्रियाकारकसंबन्धावगतिः। सिद्धस्य हि अनुष्ठानं चोद्यते। कथं तर्हि यदाहवनीये जुह्वतीति ? युक्तं प्रमाणान्तरेण संभवदर्शनात्। स्वर्गे पुनर्नैतदुपपद्यते वेदस्याप्रामाण्यप्रसङ्गात्। किञ्च कर्तृविशेषणं चात्र स्वर्ग(काम)शब्दः न कर्तृविशेषणमीप्सिततमं भवति राजपुरुषं पश्येतिवत्।

प्रतिपादयति **न च स्वर्गो यागस्य कारकं** यागोत्पत्तावसत्त्वेनाव्याप्रियमाणत्वात्। ओदनं पचतीत्यत्र तण्डुलानां विकार्यकर्मभूतानामस्ति पाके व्यापारः भाव्यवस्थावाचिना त्वोदनशब्देन तण्डुला एव निर्दिश्यन्ते। अतः कारकत्वं तत्राविरुद्धम्। ननु यद्यप्यसत्वेनाव्यापाराद्यागं प्रति स्वर्गस्य कारकता प्रमाणान्तरेण नावसीयते तथापि वेदादेवावसायिष्यत इत्यत्राह—**न च वेदात् क्रियाकारकरूपसंबन्धावगतिः। सिद्धस्य हि अनुष्ठानं चोद्यते।** अस्यार्थः-कार्येऽर्थे शब्दस्य प्रामाण्यनियमात् न सिद्धं क्रियाकारकसंबन्धं प्रति शब्दस्य प्रामाण्यं, किन्तु प्रमाणान्तरसिद्धमेव क्रियाकारकसंबन्धमाश्रित्य वेदेनानुष्ठानं प्रत्याय्यते इदमनेन कुर्विति। न पुनरिदमनेन सिध्यतीति वेदादवगतिः। यदि वेदात् क्रियाकारकसंबन्धो नावगम्यते **कथं तर्हि यदाहवनीये जुहोतीति** अलौकिकस्याहवनीयस्य होमं प्रति कारकत्वं ? प्रमाणान्तरेणानवगमात्। उत्तरं—**युक्तं प्रमाणान्तरेण संभवदर्शनात्।** अस्यार्थः—यद्यप्याहवनीयशब्दवाच्यता प्रमाणान्तरेण नावगम्यते तथापि तस्य द्रव्यरूपत्वात् विद्यमानत्वाच्च होमं प्रति साधनभावः संभवतीति प्रमाणान्तरेणावगम्यत एव। स्वर्गे पुनर्नैतदुपपद्यते असत्वात्स्वर्गस्य। यदि तथाभूतस्यापि वेदः कारकतां ब्रूयात् तदा प्रमाणान्तरविरोधेन अङ्गुल्यग्रादिवाक्यवत् वेदस्याप्रामाण्यप्रसंगात्। **किञ्च कर्तृविशेषणं चात्र स्वर्गशब्दः न कर्तृविशेषणमीप्सिततमं भवति यथा राजपुरुषं पश्येति।** यदि तावत् द्वितीययैव विभक्त्या स्वर्गो निर्दिष्टः स्यात् तदा क्रियया सोऽपि ईप्सित इति गम्यते कर्तृविशेषणं तु स्वर्गशब्दः। ननु षष्ठाद्ये स्थितं नियोज्यविशेषणसमर्पकः स्वर्गशब्दः इति; कथमुच्यते कर्तृविशेषणता स्वर्गशब्दस्य। उच्यते। अस्याधिकरणस्य पूर्वपक्षे क्रियैव कार्यत्वेनावगम्यते, क्रियां च कार्यतया कर्तैवावबुध्यते इति

अतो न स्वर्गं कुर्यादिति नियोगविषयता शक्यते प्रतिपत्तुम्। कथं तर्हि स्वर्गकामपदसंबन्धात् स्वर्गं भावयेदिति भाष्यम्। एवमेतद्भाष्यं अन्यथा हि स्वर्गमिति श्रवणात् स्वर्गं भावयेदिति स्यात्।

कर्तुरेव नियोज्यतेति। अतः कर्तृविशेषणं स्वर्गः। न कर्तृविशेषणं क्रिययेप्सितं भवति यथा राजपुरुषं पश्यतीति कर्मविशेषणं राजा दर्शनेनेप्सितो भवति। ननु कामिपदसंबन्धात् स्वर्गस्येप्सितताऽवगम्यत एव। सत्यं, न यागेनेप्सितताऽवगम्यते। द्वितीया हि कारकविभक्तिः क्रियापेक्षत्वात् कारकस्य समभिव्याहृतक्रियापेक्षितमीप्सितत्वं ब्रूयात, न कामिरिति निरवद्यम्। उपसंहरति—**अतो न स्वर्गं कुर्यादिति नियोगविषयता शक्यते प्रतिपत्तुत्।** तदिदं **परमरहस्यं** स्वर्गादेः साक्षात् क्रियया सह जन्यजनकभावो न घटते क्रियायाः कारकसमवायिफलजनकत्वनियमात् स्वर्गादेश्चाकारकसमवायित्वात्। यद्यपि प्रीतिरूपत्वात् स्वर्गस्यात्मसमवायित्वं तथापि न कारकदशायां समवैति। न चेदमाशङ्कनीयं पूर्वं कारकता पश्चात् क्रियाजन्यफलभागितेति। यतः क्रियायोगेन कारकमुच्यते सत्यामेव क्रियायां क्रियाफलेनोत्पन्नेनैकार्थसमवायिना क्रिया विरुद्ध्येतेति। अत एव क्रियाफलानामनन्तरभाविताऽऽश्रीयते। कथं तर्हि राद्धान्तेपि स्वर्गादीनामुत्पत्तिः? अपूर्वव्यवधानेनेति न दोषः। न चायमपूर्वेऽपि नियमो दृष्टः अपूर्वत्वादेव। अपूर्वसिद्धिरेव कुतः? क्रियात इति ब्रूमः। ननु कारकसमवायिफलनियमात् क्रियायाः क्व कारके तदपूर्वं समवेतमुत्पद्यते कालान्तरस्थायिन्यात्मनीति न किञ्चित् दुष्यति। न च पुरुषसंस्कारकता दर्शपूर्णमासादीनामापाद्यते संस्कार्यत्वे प्रमाणाभावात्। वस्तुस्वभावेन तु आश्रयमात्रतया पुरुषमपूर्वमाश्रयति इत्यलमतिप्रसङ्गेन। अत्र च नैवं शब्दात् प्रतिपत्तुं शक्यत इत्यनेन ग्रन्थेन स्वर्गयागयोः साध्यसाधनभावशक्तिरेव नास्तीत्युक्तं किञ्चेत्यादिना। अथवेत्यङ्गीकृत्यापि साध्यसाधनभावं द्वितीयाभावादीप्सितत्वानवगमान्न यागस्य शेषताऽस्तीति दर्शितम्। एवं च भाष्यमपि तस्मिंस्तु कृते स्वयमेव तद्भवतीत्यभ्युपगम्यवादेन द्रष्टव्यम्। यदि स्वर्गस्य कारकता नास्ति—**कथं तर्हि स्वर्गकामपदसंबन्धात् स्वर्गं भावयेदिति भाष्यम्।** अत्र हि स्वर्गं भावयेदिति द्वितीयाप्रयोगः कारकत्वाभावे नोपपद्यते। उत्तरं—**एवमेतद्भाष्यम**स्मदीयवादानुगुणं एतद्भाष्यं, न प्रतिपक्षम्। **अन्यथा** हि प्रतिपक्षत्वे **स्वर्गमिति श्रवणात् स्वर्गं भावयेदिति स्यात्** यदि

अत एव स्वयमेव तद्भवतीत्येतदभिप्रायं तत्। निमित्तमात्रकथनं हि तत कर्मणः। अतः प्रयोजनं स्वर्गो यागस्य न कर्म पाकस्येव ग्रासः। अतो द्रव्यगुणसंस्काराणामेव साध्यसाधनभावावगतेः प्रयोजनवत्तया शेषभावः। न पुनः कर्मत्वेनाप्रतीयमानयोः फलपुरुषयोरपि स्यात्। तस्मात सूक्तं द्रव्यगुणसंस्कारेषु बादरिः इति। [1]न चेत फलयागौ गुणभावेन चोद्येते कस्य पुरुषः प्रधानभूतो भविष्यतीति। **कोऽयं प्राधान्यप्रतिषेधः शेषता हि पुरुषस्य प्रतिषेध्या "न यागफलपुरुषेषु" इति प्रतिज्ञानात्। उच्यते। शेषतानिवृत्त्यर्थमेव प्राधान्यं प्रतिषिध्यते। कथं? सति हि प्राधान्ये पुरुषः शेष इति**

स्वर्गमिति श्रवणादित्युक्तं स्यात तदा कारकता स्वर्गस्योक्ता स्यात् न चैवमुक्तम्। कथं तर्हि स्वर्गं भावयेदिति घटते अत्राह—**अतः स्वयमेव तद्भवतीत्येतदभिप्रायं तत** यतः स्वर्गशब्दो हि द्वितीयान्तो नोक्तः। अतः स्वयमेव फलं भवतीत्येतदभिप्रायं न कारकभूतं निष्पद्यत इत्येतदभिप्रायम्। **निमित्तत्वमात्रकथनं हि तत् कर्मणः** स्वर्गोत्पत्तौ निमित्तमात्रता कर्मणः कथ्यते। न पुनः क्रियाकारकभावो विवक्षितः। तेन गौणोऽयं द्वितीयाप्रयोग इति यावत्। **अतः प्रयोजनं स्वर्गो यागस्य न कर्म पाकस्येव ग्रासः** पाकस्य ग्रामः [सः]प्रयोजनं, पाकायत्तत्वात् सूपकार्यग्राम[स]सिद्धेः ओदनं फलम्। अतः नास्ति भाष्यविरोधः। उपसंहरति—**अतो द्रव्यगुणसंस्काराणामेव** क्रिययासह **साध्यसाधनभावावगतेः प्रयोजनवत्तया** क्रियानिवृत्त्या प्रयोजनभूतया प्रयोजनवत्त्वात क्रियायाः शेष(शेषि) भावः। **न पुनः प्राधान्येनाप्रतीयमाने फले पुरुषे वा क्रियायाः फलस्यापि शेषभावः। तस्मात्सूक्तं द्रव्यगुणसंस्कारेषु बादरिरिति।** "न चेत फलयागौ गुणभावेन चोद्येते कस्य पुरुषः प्रधानभूतो भविष्यति" इति। **कोऽयं प्राधान्यप्रतिषेधः? शेषता हि पुरुषस्य प्रतिषेध्या, "न यागफलपुरुषेषु शेषताऽस्ति" इति प्रतिज्ञानात्। उच्यते। शेषतानिवृत्त्यर्थमेव प्राधान्यं प्रतिषिध्यते। कथं? सति हि प्राधान्ये पुरुषः शेष इति**

(1) P. 661-8

शक्यते वक्तुम्। किमिति? पुरुषशब्दो ह्ययं स्वर्गकामे प्रयुक्तः यदि तदर्थः स्वर्गः स्यात् तदा तद्विशिष्टस्य शेषता स्यात्। स्वद्रव्यविशिष्टस्यैव प्रयाजादेः। अतादर्थ्ये पुनः स्वर्गस्य केवलं कर्तृतयैव शेषभावः द्रव्यमात्रतयेत्यर्थः न पुरुषशेषतया। न स्वर्गकामपदवाच्यतयेत्यभिप्रायः। तस्मादनवद्यम्।

कर्माण्यपि जैमिनिः फलार्थत्वात्[1] ॥ ४ ॥

कथं फलार्थता कर्मणः? कामिनो हि अधिकारो यागे। स च फलसाधनतां यागस्यानापादयन् न सिद्ध्यतीति षष्ठे वक्ष्यामः।

शक्यते वक्तुम। किमिति। पुरुषशब्दो ह्ययं स्वर्गकामे प्रयुक्तः यदि च तदर्थः स्वर्गः स्यात् तदा तद्विशिष्टस्य शेषता स्यात्। स्वद्रव्यविशिष्टस्यैव प्रयाजादेः। अतादर्थ्ये पुनः स्वर्गस्य केवलं कर्तृतयैव शेषभावः द्रव्यमात्रतयैवेत्यर्थः न पुरुषशेषतया, न स्वर्गकामपदवाच्यतयेत्यभिप्रायः। अत्रेदमाकूतं—स्वर्गकामशब्देन यः कामनाविषयीभूतस्वर्गविशिष्टः पुरुषोऽभिधीयते स च तथाभूतेन रूपेण तत्रैव कर्ता भवति यदेव तस्य स्वर्गस्य साधनम्। यत्पुनर्न तस्य स्वर्गस्य साधनं तत्राविवक्षितकाम्यार्थसंबन्धिनः केवलं कर्तृतां याति। अतोऽस्मिन् पक्षे द्रव्यतयैव शेषभाव इति। तस्मादनवद्यम्।

कर्माण्यपि जैमिनिः फलार्थत्वात्। कथं फलार्थता कर्मणः? उत्तरं—कामिनोह्यधिकारो यागे। स च फलसाधनतां यागस्यानापादयन् न सिद्ध्यति इति षष्ठे वक्ष्यामः। षष्ठाद्यसिद्धान्तबलेन हि स्थितं कर्तृत्वातिरिक्तं नियोज्यत्वमपि पुरुषस्यास्तीति। स ह्येवं मन्यते ममेदं कार्यमिति। कामी चात्र नियोज्यत्वेन श्रूयते। स च विवक्षितकामिभावः तेनैव कार्येण संबन्धुमर्हति यदेव कार्यं तस्य काम्यसाधनं स्यात। अतः कामिनो(नियोगे)यागे

(1) 661-12

यदि पुनरयं यागः फले साधनभावं न प्रतिपद्यते तत्र को दोषः। न खलु कश्चित्। प्रतीयते तु तथा। ननु शेषलक्षणे शेषता प्रतिपादयितुं न्याय्या, किमिदमुच्यते [1]एनमेवार्थं षष्ठे सूत्रैरेव साधयिष्यति **इति, किं वा श्रुत्यादिव्यतिरिक्तं किञ्चिदन्यत शेषत्वे प्रमाणमस्ति। अथ श्रुत्यादीनामन्यतमं तदिहैवोपन्यसनीयं किमिति सान्यासिकं क्रियते। अत्रोच्यते—अधिकारापेक्षिणी हि सा न श्रुत्यपेक्षोऽधिकार इति सान्यासिकं यागफलशेषत्वं युक्तम्।**

नियुक्तिः ममेदं कार्यमित्यवगतिः फले साधनतां यागस्य अनापादयन्ती न सिद्ध्यतीति नियोज्य-विशेषान्वयबलेन यागस्वर्गयोः साध्यसाधनभावः। अतस्सिद्धं फले यागस्य शेषत्वं आत्म-संबन्धित्वेन फलस्येष्टत्वात नेष्टं परार्थं यतः। **यदि पुनः यागः फले साधनतां न प्रतिपद्यते तत्र को दोषः स्यात्?** यथा नित्याधिकारे विना फलेन अधिकारानुपपत्तिर्नास्ति तथा अत्राप्यस्तु किं फलकल्पनया? उत्तरं—**न खलु कश्चिद्दोषः** प्रतीयते। **प्रतीयते तु तथा** कामिनो नियोज्यत्वात् साध्यसाधनभावाक्षेपः। एवं चात्राधिकरणे स्वर्गयागयोः साध्य-साधनभावोऽस्तीति व्युत्पाद्यते। स्थिते चैतस्मिन् अधिकरणे अपूर्वाधिकरणे क्रियातिरिक्तम-पूर्वमेव कार्यत्वेनोच्यत इति सिद्ध्यति। अतः षष्ठाद्यबादर्यधिकरणापूर्वाधिकरणैः त्रिभिः स्थितैः अपूर्ववाक्यार्थता भवतीति मन्तव्यम्।

ननु शेषलक्षणे शेषताऽस्य युक्ता प्रतिपादयितुम्। किमिदमुच्यते "एनमेवार्थं षष्ठेऽध्याये **सूत्रैरेव साधयिष्यति** इति [2]**किं वा श्रुत्यादिव्यतिरिक्तं किञ्चिदन्यत् शेषत्वे प्रमाणमस्ति। अथ श्रुत्यादीनामेवान्यतमं तदिहैवोपन्यसनीयम्। किमिति सान्या-सिकं क्रियते। अत्रोच्यते—अधिकारापेक्षिणी हि सा** श्रुतिः **न श्रुत्यपेक्षोऽधिकारः इति युक्तं सान्यासिकम्।** अस्यार्थः—कमिश्रुत्या यत्र यागः फले शेषो भवति तत्र नियोगनियोज्यलक्षण एव संबन्धो हेतुः अन्यथा अन्विताभिधानानुपपत्तेः। अतोऽधिकारा-पेक्षित्वादस्याः श्रुतेः युक्तं सान्यासिकत्वम्। उक्तं यागस्य शेषत्वम्।

---

(1) 661-13 (2) G. किञ्चन

फलं च पुरुषार्थत्वात् ॥ ५ ॥[1]

फलमपि पुरुषं प्रत्युपदिश्यते यः स्वर्गो मे स्यादित्येवं कामयते तस्य, नियोगः न स्वर्गः आत्मानं लभेतेति। कुतः आत्मनेपदप्रयोगात् ।[2]

ननु च स्वर्गकामशब्दादेवेदमवगम्यते स्वर्गो मे भवेदिति। किमिदमात्मनेपदप्रयोगादिति। अथायमभिप्रायः परस्य दुःखं कामयत इत्यत्रापि कमेः प्रयोगेनानात्मसंबन्धित्वेनापि दृष्ट इति तदयुक्तम्, तत्र परशब्दप्रयोगात् दुः खस्य च परसम्बन्धित्वेनाभीष्टत्वात्। यत्र पुनः परशब्दो न श्रूयते नाप्यनिष्टं दुः खं तत्र केनान्येन काम्यमानस्य संबन्धोऽन्यत्र कामयितुः।

फलं च पुरुषार्थत्वात्। ननु च यद्यपि स्वर्गो यागात् सिध्यति तथापि कथं तस्य कामिनः प्रति शेषतेत्याह—फलमपि पुरुषं प्रत्युपदिश्यते यः स्वर्गो मे भवेदित्येवं कामयते तस्य नियोगः न स्वर्गः आत्मानं लभेत इति। अस्यार्थः। आत्मार्थमेव यः स्वर्गं कामयते तस्य नियोगः तेन स्वार्थमेव पुरुषो यागेन स्वर्गं कुर्यादिति शास्त्रार्थः। तेन कामिनं प्रति फलस्य शेषता। कुतः पुनः स्वार्थता स्वर्गस्येति। एकदेशिमतेनोत्तरमाह—आत्मनेपदप्रयोगादिति। अस्यार्थः—यदा[3] हि अधिकारलक्षणसंबन्धबलेन स्वर्गफलता कर्मणामवगता तदा आत्मनेपदश्रवणात् कर्तृगामिता फलस्यावगम्यत इति। परमसिद्धान्ती दूषयति—ननु च स्वर्गकामशब्दादेवेदमवगम्यते स्वर्गो मे भवेदिति किमिदं आत्मनेपदप्रयोगादिति। अथायमभिप्रायः परस्य दुःख कामयत इत्यपि कमेः प्रयोगात् अनात्मसंबन्धित्वेनापि काम्यमानस्य प्रयोगो दृष्ट इति। तदयुक्तं तत्र परशब्दप्रयोगात् दुःखस्य च परसंबन्धित्वेन अभीष्टत्वात्। यत्र पुनः परशब्दो न श्रूयते नाप्यनिष्टं दुःखं तत्र केनान्येन संबन्धोऽन्यत्र कामयितुः सर्वाहीच्छा स्वकीयसुखप्राप्तिदुःखपरिहार-

(1) P. 661 (2) P. 662 (3) G. यथा

अथ मन्यसे काम्यमानेनैव कामः संबध्यते स्वर्गो भवत्विति। न हि; तन्निबन्धनसुखास्मरणात्। न कस्यचित् (काममात्रेण) सद्भावमात्रे कस्यचित्कामो भवति। तस्मादात्मनेपदोपन्यासो लिङ्गतया प्रतिपत्तव्यः न पुनः प्राप्ते प्रमाणतया।

पुरुषश्च कर्मार्थत्वात्[1] ॥ ६ ॥

स्वर्गश्चेत्पुरुषार्थः स्वर्गकामपदवाच्यतयैव 'यजमानेन संमितौदुम्बरी भवति' इत्यादिषु कर्तुः शेषत्वं कथं? अधिकृतस्य कर्तृत्वात्।

विषयैवोत्सर्गतः। परशब्दप्रयोगात्तु दुःखस्य च स्वसंबन्धितायां अनिष्टत्वेन परसंबन्धितया काम्यविषया भवति। तदभावे कामयितृसंबन्धिकामविषयैवेति इच्छास्वभावेनैव स्वार्थता स्वर्गस्य लभ्यते।

अथ मन्यसे काम्यमानेनैव कामः संबध्यते स्वर्गो भवत्विति। न पुरुषविशेषणत्वेनेति[2]। परिहरति—**न हि** काम्यमात्रेणैव कामस्य संबन्धः **तन्निबन्धनसुखास्मरणात्।** यन्निबन्धनं हि सुखं स्मर्यते तत्र कामना भवति। न च सद्भावमात्रेण सुखं सुखं भवति अपि तु स्वसंबन्धित्वेन। कथं पुनः सुखहेतुभावेनैव कामनेत्याह—**न हि कस्यचित्** [3]**सद्भावमात्रे कस्यचित्कामो भवति** उपेक्षणीये हेये च कामादर्शनात्। अधुना एकदेशिमतं दूषयित्वा परमसिद्धान्त्येवोपसंहरन्नाह—**तस्मादात्मनेपदोपन्यासो लिङ्गतया प्रतिपत्तव्यः न पुनः प्राप्ते प्रमाणतया।** यत एव स्वार्थता स्वर्गस्य अत एवात्मनेपदमप्युपपद्यत इति।

पुरुषश्च कर्मार्थत्वात्। स्वर्गश्चेत्पुरुषार्थः स्वर्गकामपदवाच्यतयैव यजमानसंमिता औदुंबरी भवति इत्येवमादिषु **कर्तुः शेषत्वं, कथं? अधिकृतस्य** नियुक्तस्य **कर्तृत्वात्**

---

(1) P. 662 (2) G. विशेषेणापीति (3) G. संभव

कर्तुश्च यजमानशब्दवाच्यत्वात्। तस्मात् सूक्तं सूत्रत्रयं जैमिनेः वृत्तिकारमतोपन्यासः पूर्वपक्षापरिज्ञानार्थः। किमिति कल्पान्तरं न भवति। न हि आपेक्षिकं शेषत्वमस्ति। विनियोज्यनिबन्धनं हि तत्। विनियोग एवापेक्षिक इति। सत्यम्। शेषः विनियोज्यं शेषिणं चापेक्षिते न पुनरेकस्य शेषशेषितामापादयति।

कर्तुश्च यजमानशब्दाभिधेयत्वात्। तस्मात् फलभागितयैव कर्मशेषतेति। **तस्मात् सूक्तं सूत्रत्रयं जैमिनेः वृत्तिकारमतोपन्यासः पूर्वपक्षापरिज्ञानार्थः।** यदेतत् भाष्यकारेण वृत्तिकारमतमुपन्यस्तं द्रव्यगुणसंस्काराणामेव नियमेन शेषभावः आपेक्षिको यागफलपुरुषाणामिति असौ वृत्तिकारस्य पूर्वपक्षापरिज्ञानप्रदर्शनार्थः क्रियावाक्यार्थाभिप्रायेणात्र पूर्वः पक्षः। न चात्र पूर्वपक्षे यागादीनामापेक्षिकमपि शेषत्वमस्ति इति। **किमिति कल्पान्तरं न भवति।** तत्र प्रथमसूत्रेण द्रव्यगुणसंस्कारेषु स्वशेषान्तरनिरपेक्षं परशेषत्वमुच्यते तच्च बादरेरपि मतमिति बादरेरुदाहरणं जैमिनेरप्येतत्सम्मतमेव[3]। उत्तरसूत्रैस्तु यागफलपुरुषाणां शेषान्तरापेक्षाणां शेषत्वमुच्यते इत्येवंपरतया सूत्राणां व्याख्यानान्तरमिदमुपन्यस्यते, तत्र वृत्तिकारग्रहणं पूजार्थमिति। उत्तरम्—**नह्यापेक्षिकं शेषत्वमस्ति।** यस्मान्नापेक्षिकं शेषत्वमस्ति तस्मान्नेदं कल्पान्तरं भवतीत्यर्थः। **विनियोज्यनिबन्धनं हि तत्।** यद्धि विनियोज्यं तच्छेष इत्येतावन्मात्रेण शेषत्वं यस्मात्तस्मान्नापेक्षिकं शेषत्वम्। विनियोग एवापेक्षिकः तेन विनियोगनिबन्धनं शेषत्वमप्यापेक्षिकमिति चेत्; सत्यमापेक्षिकं यतः **शेषः विनियोज्यं शेषिणं चापेक्षते। न पुनरेकस्य शेषशेषितामापादयति।** न विनियोगः एकस्य यागस्य स्वशेषापेक्षया शेषितामापादयति शेष्यपेक्षया च शेषतां, किन्तु शेष्यपेक्षया शेषतामेव केवलं आपादयति। तस्मान्न स्वशेषान्तरापेक्षं कस्यचिदपि शेषत्वम्। किञ्च व्रीह्यादीनामपि स्वशेषभूतावघातादिसापेक्षत्वमित्यपि शक्यते वक्तुम्। अतो निरपेक्षत्वसापेक्षत्वकृतो विशेषो नास्ति। तदाह

---

(1) G. संभव　(2) R. पक्ष　(3) G. असंमतमेव

व्रीह्यादीनां च स्वशेषापेक्षतया तुल्यत्वात्। तस्मात् स्वकौशलप्रदर्शनार्थं परमतमुपन्यस्तं भाष्यकारेण।

तेषामर्थेन संबन्धः[1] ॥ ७ ॥

उक्तं नियोगसव्यपेक्षाणि श्रुत्यादीनि विनियोजकानि शास्त्रान्तरविहितसंबन्धितया च कार्यलाभ इत्युक्तम्। शास्त्रान्तरविहितं(युक्तं) हि शेषि भवति न शेषशास्त्रादेव प्राधान्यमवगम्यत इति सक्तुषु दर्शितम्। शास्त्रान्तरविहितानि च व्रीह्यादीनि

—व्रीह्यादीनामपि स्वशेषापेक्षतया तुल्यत्वात्। तस्मात परस्य पूर्वपक्षापरिज्ञानेन स्वकौशलप्रदर्शनार्थं परमतमुपन्यस्तं भगवता भाष्यकारेण पूर्वपक्षापरिज्ञानं तु परस्य स्पष्टत्वान्नोपबृंहितमिति।

तेषामर्थेन संबन्धः। पूर्वपक्षमाक्षिपति—उक्तं नियोगसव्यपेक्षाणि श्रुत्यादीनि विनियोजकानि इत्यादिना सन्दिह्यत इत्ययुक्तमित्येवमन्तेन। उक्तं नियोगसव्यपेक्षाणि श्रुत्यादीनि विनियोजकानीति। श्रुत्यादीनि कार्यभूतशेषिणोऽनपेक्षमाणानि सन्ति नियोगापेक्षाणि विनियोजकानीत्युक्तं आद्ये। शास्त्रान्तरविहितसंबन्धितया च कार्यलाभः शास्त्रान्तरेण यो विहितः स शेषी तत्संबन्धितया च कार्यभूतस्य शेषिणो लाभ इत्युक्तम्। [2]कस्मात्पुनरेवमित्याह—शास्त्रान्तरविहितं हि शेषि भवति न शेषशास्त्रादेव प्राधान्यमवगम्यत इति सक्तुषु प्रदर्शितम्। कथं तर्हि 'सोमेन यजेत' इति [3]स्वशास्त्रप्रमित एव यागः शेषी। उच्यते तत्रापि 'ज्योतिष्टोमेन यजेत' इति शास्त्रान्तरेण यावद्यागस्याधिकारसंबन्धो नावगम्यते तावद्विनियोगो न सिध्यतीति। शास्त्रान्तरविहितानि च व्रीह्यादीनि व्रीहिभिर्यजेतेति

(1) P. 665 (2) G. तस्मात् (3) R. स्ववाक्य

कथं तत्संयुक्तेषु संशयः। कार्यशून्ये हि शेषशास्त्रं कल्प्यं कार्यमपेक्षते। प्रत्यक्षश्रुतकार्यं तु सन्दिह्यत इत्ययुक्तम्। उच्यते। नियोगादन्यत् विनियोगगम्यं कार्यमस्तीति न शक्यते वक्तुम्।

ननु च 'यैस्तु द्रव्यं चिकीर्ष्यते' इति नापूर्वं कार्यमित्युक्तम्। सत्यम्। स्थिते एतस्मिन् शेषत्वे तत्। शेषत्वमेवेदानीं नियोगनिर्वृत्त्या विना नावगम्यते इत्याक्षेपः। किमिति वा न नियोगोनिष्पाद्यते व्रीहीन् प्रोक्षतीति। यद्यत्र नियोगार्थनिष्पत्तिः, दर्शपूर्णमासाभ्यामित्यनेन न

शास्त्रान्तरविहितत्वात्। कथं तत्संयुक्तेष्ववघातादिषु तच्छेषतां प्रति संशयः? यदि शास्त्रान्तरविहिता व्रीह्यादयो न भवेयुः तदा सक्तुन्यायेन तेषां शेषिता न स्यात् तदा हि कार्यशून्यं हि शेषशास्त्रं कल्प्यं कार्यमपेक्षते। प्रत्यक्षश्रुतकार्यं तु सन्दिह्यते इत्ययुक्तम्। अतो निरसन्देहत्वान्नास्ति पूर्वः पक्षः। नचापूर्वप्रयुक्ततया धर्माणां तद्रूपस्य च सर्वत्राभेदात् सत्यपि व्रीह्यादीनां शेषित्वे पूर्वः पक्षः। करणावान्तरव्यापारभूतोत्पत्तिनियोगभेदेन अन्यथाऽन्यथा करणत्वादाग्नेयादीनां प्रतिकरणं धर्माणां व्यवस्थोपपत्तेः। समर्थयते—उच्यते— नियोगादन्यत् विनियोगगम्यं कार्यमस्तीति न शक्यते वक्तुम्। न व्रीह्यादिसंस्कारो विनियोगस्य परस्परपदार्थान्वयस्य कार्यभूतो भवितुमर्हति अनियोगार्थत्वप्रसङ्गात् नियोगार्थत्वेनैव च व्युत्पत्तेः। तस्मात् व्रीहीनवहन्तीत्यादिष्वपि नियोगः कार्यभूतः प्रयाजादिष्विव। अतः प्रकरणविनियोज्यतया सर्वप्रधानयागार्थतेति पूर्वः पक्षः। "ननु च यैस्तु द्रव्यं चिकीर्ष्यते" इत्यत्र नापूर्वं कार्यमित्युक्तम्। अतः कथमत्रापूर्वं कार्यमाशङ्क्यते! उत्तरं—सत्यमुक्तम्। स्थिते एतस्मिन् शेषत्वे तत् एतदधिकरणसिद्धान्ते स्थिते तदित्यर्थः। शेषत्वमेव त्विदानीं नियोगनिष्पत्त्या विना नावगम्यत इत्याक्षेपः। राद्धान्ती चोदयति—किमिति वा नियोगो न निष्पाद्यते व्रीहीन् प्रोक्षतीत्यत्रापि। व्रीहिसंस्कारोत्पत्तिप्रणाड्या नियोगो निष्पद्यत एवेति भावः। पूर्वपक्षी समाधत्ते—यद्यत्र नियोगार्थनिष्पत्तिः दर्शपूर्णमासाभ्यामित्यनेन न

संबध्येत। अथ 'फलवत्सन्निधौ' इति संबन्धः स तु नियोगैक्यलक्षण इति प्रतिपादयिष्यामः। अत्रापि चेत् स एव संबन्धः न तर्हि व्रीहीन् प्रोक्षतीत्येतावतैव नियोगसिद्धिः। अतः तुषकणविप्रमोचनं न स्वर्गावाप्तिवत् नान्तरीयको नियोगस्य।

एवं तर्हि कोऽयमुपन्यासः 'औषधे सान्नाय्ये च कर्तव्या'[1] इति। नैव हि पदार्थानां प्राधान्यमस्मिन् पक्षे। उच्यते—नैव हि

संबध्येत। अस्यार्थः—यदि तण्डुलादिनिर्वृत्तिद्वारेण नियोगनिष्पत्त्यर्थत्वसिद्धये तण्डुलादिनिर्वृत्तिरपि कार्यमाश्रीयेत तदा दर्शपूर्णमासाभ्यामित्यनेन न संबध्येत कार्यान्तरदर्शनादिति[2] भावः। **अथ 'फलवत्सन्निधौ' इति संबन्धः**[3]। निराकरोति—**स तु नियोगैक्यलक्षण इति प्रतिपादयिष्यामः।** अस्यार्थः—दर्शपूर्णमासाधिकारसन्निधौ श्रुताः प्रयाजादियागाः तादर्थ्येन तदन्वयिन एव प्रतिभासन्ते कार्यान्तरस्यादर्शनात्। न च तत्र प्रथममेव कार्यान्तरभूतो नियोगः प्रतीयत इत्यसकृदुक्तम्। **अत्रापि चेत् स एव संबन्धः** योऽसौ कार्यान्तरदर्शनेन नियोगैक्यलक्षणः **न तर्हि व्रीहीन् प्रोक्षतीत्येतावतैव नियोगसिद्धिः।** यदि सन्निपत्योपकारकं प्रोक्षणं स्यात् तदा व्रीहिसंबन्धमात्रेणैव प्रोक्षणस्य नियोगसिद्धौ हेतुभावः इत्येतावतैव नियोगसिद्धिः स्यात् इत्युक्तम्। आरादुपकारकत्वे पुनः न व्रीहिसंबन्धमात्रेणैव नियोगसिद्धौ हेतुभावः। अपि तु अवान्तरापूर्वप्रसिद्ध्येत्येतावति न नियोगसिद्धिरित्युक्तम्। यतोऽवान्तरापूर्वसिद्ध्या नियोगसिद्धिः, **अतः तुषकणविमोको न स्वर्गावाप्तिवत् नान्तरीयको नियोगस्य** यथा स्वर्गावाप्तिः नियोज्यसंबन्धसिद्धये नियोगेनाक्षिप्यमाणा नान्तरीयकी न तथा तण्डुलनिर्वृत्तिः तन्निरपेक्षस्यैवावघातस्यापूर्वसिद्धिद्वारेणाधिकारानुप्रवेशात्। अतो नास्ति द्रव्यचिकीर्षेति। यदि प्रयाजादिवत् प्रकरणविनियोज्यतया पूर्वः पक्षः **एवं तर्हि कोऽयमुपन्यासः 'किं सर्वे आज्ये औषधे सान्नाय्ये च कर्तव्या' इति। नैव हि पदार्थानामाज्यादीनां प्राधान्यमस्मिन् पक्षे** अपि तु यागादीनाम्। तत्राज्यौषधसान्नाय्यरूपपदार्थेऽप्राधान्योपन्यासो युक्त इति।

---

(1) 665-9 (2) G. कार्यान्तरादर्श (3) G. विरोधः

पदार्थानां प्राधान्यपरोऽयं ग्रन्थः किं तर्हि सर्वशेषताभिप्रायपरः। ननु चास्मिन्नपि पक्षे शेषशेषितैव नोपपद्यते अङ्गप्रधानाम्। सर्वशेषाणां नियोगार्थशेषत्वात्। प्रकरणप्रमाणस्वरूपनिरूपणेऽस्य चोद्यस्य परिहारं वक्ष्यामः। इह तु कार्यान्तरासंभवात् पूर्वः पक्षः दर्शपूर्णमासाभ्यामित्यनेन असंबन्धादित्युक्तम्। तस्मात् प्रयाजादीनामेव नियोगो ह्येतल्लक्षणः सर्वेषामभिसंबन्धः। कथं तर्हि व्रीहीन् आज्यं इति च। अस्मिन् पक्षे सक्तुवदेतद्भविष्यति। गां ददाति इतिवद्वा।

उच्यते—नैव हि पदार्थानां प्राधान्यप्रदर्शनपरोऽयं ग्रन्थः किन्तु सर्वयागशेषताभिप्रायपरः आज्यादिशब्देन आज्यादिसाधनको यागः लक्षणयोच्यते इत्यर्थः।

ननु चास्मिन्नपि पक्षे सर्वेषां प्रयाजादिवत् साक्षान्नियोगार्थत्वेन शेषत्वं पक्षे शेषशेषिता अङ्गप्रधानयोः प्रयाजाद्याग्नेयाद्योः नोपपद्यते। सर्वशेषाणां स्ववाक्योपात्तनियोगार्थशेषत्वात्। उत्तरम्—प्रकरणप्रमाणनिरूपणे अस्य चोद्यस्य परिहारं वक्ष्यामः। इह तु कार्यान्तरासंभवात् पूर्वः पक्षः। दर्शपूर्णमासाभ्यामित्यनेन[1]संबन्धादित्युक्तम्। यदि तण्डुलादिकार्यान्तरमाश्रीयेत तदा दर्शपूर्णमासाभ्यामित्यनेन न संबध्येत स्वातन्त्र्येणैव तण्डुलादेः कार्यत्वात्। प्रयाजादिकार्यमवान्तरापूर्वं तु न स्वातन्त्र्येण कार्यतयाऽवगम्यते। किन्तु क्षणिकानां यागानामङ्गत्वानुपपत्तेः अत्रावान्तरापूर्वाण्यङ्गत्वसिद्धये कल्प्यमानानि न स्वातन्त्र्येण प्रतीयन्ते। तस्मात् प्रयाजादीनामिव [2]नियोगो ह्येतल्लक्षणः सर्वैः सर्वेषामभिसंबन्धः। कथं तर्हि व्रीहीन् आज्यमिति च द्वितीयाविभक्तिः। अस्मिन् पक्षे सक्तुवदेतद्भविष्यति इति। विभक्तिव्यत्ययो भवतीत्यर्थः। गां ददातीतिवद्वा अनीप्सितकर्मणि द्वितीयेत्यर्थः। अत्र भाष्यम्— "अवघातादयस्तु पदार्थाः श्रुत्या विधीयन्ते वाक्येनैषां व्रीह्यादिसंबन्धः" इति तदस्मिन्नेव पूर्वपक्षे घटते गुणकर्मत्वाङ्गीकारेण

---

(1) R. नासं (2) R. नियोगाभेदलक्षणः

अत इदमुक्तम् । [1]अवघातादयस्तु पदार्थाः श्रुत्या विधीयन्त इति । भावार्थानां श्रुत्या नियोगसंबन्धश्चेत्यर्थः । वाक्येनैषां व्रीह्यादिसंबन्ध इति भावार्थानुप्रवेशेन द्रव्यादीनां तु नियोगसंबन्ध इत्यर्थः न प्रधानभूतानां, न हि द्रव्यपर्यन्तो नियोगः, स्वय[2]मेवसाध्यत्वात् तस्मात् सूक्तं सर्वे सर्वार्था इति ।

तु पूर्वपक्षे घटते । सिद्धान्ते च न श्रुत्यैव विधानमिति दर्शयन्नाह—**अत इदमुक्तं अवघातादयस्तु पदार्थाः श्रुत्या विधीयन्त इति । भावार्थानां श्रुत्या नियोगसंबन्ध इत्यर्थः ।** तेनायं भाष्यार्थः— विधीयन्ते, विधिना संबध्यन्ते इति । "वाक्येनैषां व्रीह्यादिसंबन्ध" इति **भावार्थानुप्रवेशेन व्रीह्यादीनां नियोगसंबन्ध इत्यर्थः ।** एतत्किल भाष्यं अवघातादीनां व्रीह्यादिसंबन्धिता वाक्येनेति वदति । तदा च व्रीह्यादिशेषतैवावघातादेरिति इदमापद्यत इति मत्वा व्याख्यातम् । एषामवघातादीनां शेषितया वाक्येनैव व्रीह्यादिसंबन्ध इति भाष्याक्षरार्थः **न तु प्रधानभूतानां** व्रीह्यादीनां नियोगसिद्धिरित्यर्थः । कुतः ? **न हि द्रव्यपर्यन्तो नियोगः स्वयमेव साध्यत्वात् ।** न हि द्वयमेकस्मिन् वाक्ये साध्यं भवति एकवाक्यत्वावगमविरोधात् । न च स्वर्गवत् व्रीहयोऽपि साध्यत्वेन संबन्धमर्हन्ति परस्परानानुगुणत्वात् । न हि ते नियोज्यविशेषणत्वेनान्विताः । न च द्वितीयावगतसाध्यत्वानुग्रहाय नियोज्यविशेषणता कल्पयितुमपि शक्या । द्वितीयानिर्देशादेव क्रियाजन्यफलभागित्वेन अनियोगफलत्वात् । यस्य हि नियोज्यविशेषणस्य सतः साध्यत्वमिष्यते न तस्य क्रियाफलत्वं क्रियाफलत्वे तत्कामस्य नियोगेन संबन्धानुपपत्तेः । यदि हि नियोगः तस्य निमित्तं भवेत तदा तत्कामिनः तत्कामितयैव नियोगसंबन्धः स्यात । अन्यथा अविवक्षिततत्कामसंबन्धो द्रव्यमात्रतयैव संबध्येत नियोगफलत्वे च क्रियाफलत्वानुपपत्तिः । यदेव हि क्रियातो व्यवधानानपेक्षं साक्षान्निष्पद्यते तदेव क्रियाफलं कारकसमवायिफलत्वात् क्रियाणाम् । एतेनाधानस्य अन्यर्थता नियोगविषयता चेति प्रत्युक्तम् । कथं तर्हि आश्रयिषु द्रव्यसंस्कारोऽपि विवक्षितः प्रत्यक्षदृष्टत्वात् न तु क्रियाफलत्वादिति । **तस्मात् सूक्तं सर्वे सर्वार्था** इति प्रयाजादिवत्

---

(1) P. 665-9 (2) R. **स्वयमसा**

किमिदमदृष्टं भवतीति । अदृष्टमपूर्वं नियोग इत्येकमिदमित्युक्तं 'अतोऽपूर्वं कृत्वा' इति ।

फलं तु सह चेष्टया शब्दार्थोऽभावाद्विप्रयोगे स्यात ॥ १० ॥

अत्रोच्यते । स्यात् सर्वार्थता यदि हि कार्यार्थे विरोधो नियोगस्य स्यात् । न त्वत्र विरोधो विद्यते । कथं न विद्यते विरोधः ? कथं वा विद्यते विरोधः । उक्तं कार्यान्तरत्वात् तुषकणविप्रमोकस्येति । न च कार्यं कार्यान्तरे संबध्यते यथा स्वर्गः पशुभिः एवं नियोगः कार्यं तुषकणविप्रमोकश्चेति विप्रतिषिद्धम् । अनभिज्ञो भवान् विषयनियोज्यानामित्युक्तम् ।

प्रकरणनियोज्यतया । **किमिदमदृष्टं भवतीति ।** इदं हि भाष्यं द्रव्यनिष्ठत्वेन अदृष्टउपकारो भविष्यति इति इदमाहेति मन्यते । उत्तरं—**अदृष्टमपूर्वं नियोग इत्येकमिदमित्युक्तं तेन 'अपूर्वं कृत्वा'** इत्यत्र । अयमत्र पूर्वपक्षसंक्षेपः—तुषकणविमुक्तेः अधिकारनिरपेक्षाया अपि साध्यत्वसंभवात् तादर्थ्ये सत्यवघातादीनां अधिकारानुप्रवेशासंभवात् तदनुप्रवेशसिद्ध्यर्थं वरं प्रयाजादितुल्यतैवाश्रीयताम् । प्रयाजाद्यवान्तरापूर्वं हि अधिकारापेक्षमेव कार्यमिति तादर्थ्ये युक्त एवाधिकारानुप्रवेश इति ।

फलं तु सह चेष्टया शब्दार्थोऽभावाद्विप्रयोगे स्यात् । अत्रोच्यते—स्यात् सर्वार्थता यदि [1]**कार्यार्थे विरोधो नियोगस्य स्यात् । नत्वत्र विरोधो विद्यते । कथं न विद्यते विरोधः ? कथं वा विद्यते विरोधः ? उक्तं कार्यान्तरत्वात्तुषकणविप्रमोकस्येति । न कार्यं कार्यान्तरेण संबध्यते यथा स्वर्गः पशुभिः । एवं नियोगः कार्यं तुषकणविप्रमोकश्चेति विप्रतिषिद्धम् ।** उत्तरमाह—**अनभिज्ञो भवान् विषयनियोज्यानामित्युक्तम् ।** इदमत्राकूतम् । द्रव्यं तावत अवघातादिषु द्वितीयासंयोगेन साध्यतया प्रतीयते । न च यस्य साध्यान्तरमस्ति तस्य नियोगविषयता, परस्परानगुणसाध्यद्वययोगेन एकवाक्यत्वानुपपत्तेः ।

---

(1) G. कार्यविरोधो

कथं अनभिज्ञः? विषयो हि [1]नामाधिकारसंबन्धी स्वर्गकामो यजेत इति। तस्य च नियोगसिद्धिरेव प्रयोजनम्। दृष्टेऽर्थे संभवत्यपि यथा गोदोहनेन पशुकामस्य प्रणयेदिति।

ननु चात्रापि फलसिद्धिः; नियोगसिद्ध्यर्था फलसिद्धिः इति षष्ठे वक्ष्यामः। अत एव च 'कर्माण्यपि जैमिनिः फलार्थत्वात्'

न च तदेव नियोज्यविशेषणमित्यानुगुण्यं वाच्यम्। अकारकभूतपदार्थविशिष्टस्य नियोज्यत्वात्। का पुनर्युक्तिः अकारकभूतपदार्थविशिष्टस्य नियोज्यत्वे इति। उच्यते। यत्खलु क्रियासम्बन्धि तत्कारकम्। तच्च द्विविधम् किञ्चित्क्रियासाध्यं किञ्चिच्च न, तत्र यत्पूर्वं तत्कर्म द्वितीयं करणादिकं तच्चोभयमपि न नियोज्यविशेषणं भवति। उभयथा हि विशेषणता स्वरूपसंबन्धितया कामनाविषयतया वा, तत्र न तावत् स्वरूपसंबन्धितया, नियोगनियोज्यलक्षणसम्बन्धात्प्रागसिद्धेः। न च कामनाविषयत्वेन करणादि [2]सिद्ध्यति। क्रियाजन्यापूर्वसाध्यत्वानुपपत्तेः। करणादीनि कर्म च क्रियाऽसाध्यतयैव न नियोज्य-विशेषणं, नियोगसाध्यं हि काम्यमानतया नियोज्यं विशिनष्टि नान्यम्[त]। तस्मात् गुणकर्मणां नियोगविषयत्वं यो ब्रवीति सः विषयस्वरूपं नियोज्यस्वरूपं च न जानातीति। इदमेव विवरीतुमुपक्रममाणः पृच्छति—**कथमनभिज्ञ इति**। उत्तरम्—**इत्थमनभिज्ञः। विषयो हि नाम [3]अधिकारसंबन्धी स्वर्गकामो यजेतेति**। यो ह्यधिकारसंबन्धयोग्यः स विषयः। स एव चाधिकारसंबन्धयोग्यः यत्र नियोगः साध्यभूतः प्रतीयते। तथापि किं? इत्याह—**तस्य च** विषयस्य **नियोगसिद्धिरेव प्रयोजनं दृष्टेऽर्थे संभवत्यपि यथा गोदोहनेन पशुकामस्य प्रणयेदिति**। साध्यद्वयस्यैकत्रान्वयविरोधात् साध्यान्तरस्याननुप्रवेशात्। नन्वत्रापि साध्यान्तरं पशवः इत्याह—**ननु च अत्रापि फलसिद्धिः** प्रयोजनं न नियोगसिद्धिः उत्तरं—**नियोग-सिद्ध्यर्था फलसिद्धिरिति षष्ठे वक्ष्यामः** तेनात्रापि नियोगसिद्धिरेव प्रयोजनम्। यत एव च नियोगसिध्यर्था फलसिद्धिः, **अत एव च कर्माण्यपि जैमिनिः फलार्थत्वात्**।

---

(1) कामाधिकार बृ. मा. (2) G. साध्यं (3) G. अधिकारपदसं

'फलं च पुरुषार्थत्वात्' 'पुरुषश्च कर्मार्थत्वात्' इति विषयनियोग[1] एव उपसंहृतं सकलस्य पदार्थजातस्य शेषत्वम्। नियोज्यः इदानीं कः? अकारकभूतपदार्थविशिष्ट इति षष्ठे वक्ष्यामः। कः पुनरसौ? अधिकृतः कर्मणि? किमिदं अधिकृत इति? ननु च कर्तैवाधिकृतः। यथा न कर्तुरधिकारोऽधिकृतस्य कर्तृत्वमिति षष्ठे वक्ष्यामः। यद्येवं किमायातं व्रीहीन् प्रोक्षतीत्यत्र। कार्यान्तरेपि नियोगाविरोध इतीदमेवायातम्।

फलं च पुरुषार्थत्वात्। पुरुषश्च कर्मार्थत्वादिति विषयसिद्ध्या नियोग एवोपसंहृतं सकलस्य पदार्थजातस्य शेषत्वम।

एतदुक्तं भवति—साध्यभूतो विध्यर्थः प्रतीयते स च विषयसिद्ध्या सिद्ध्यति। स एव च विषयानुष्ठाने प्रवर्तते यो विध्यर्थं स्वसंबन्धितया साध्यभूतमवबुध्यते। न चाकामसाधने नियोगे कामी कामितयैव 'ममेदं कार्यं' इति बोद्धृतयाऽन्वयमर्हति इति स्वसिद्धिहेतुभूतविषयसंपादनसमर्थपुरुषलाभाय फलोत्पत्तौ निमित्तभावमवलम्बते स्वयमेव [2]विध्यर्थ इति नियोगसिध्यर्था फलसिद्धिः। अतो न फलं नाम पृथक् प्रयोजनान्तरमिति। नियोज्यः इदानीं कः? अकारकभूतपदार्थविशिष्ट इति षष्ठे वक्ष्यामः। इदं प्रागेव वर्णितम्—कर्तुरन्यो नियोज्यो न भवति कर्ता च कारकभूतपदार्थविशिष्टोऽपि स्यादित्यभिप्रायवान् पृच्छति—कः पुनरसौ? इति। उत्तरं—वक्ष्यमाणन्यायबलेन अधिकृतः कर्मणि इति ईश्वरभूतः कर्मणीत्यर्थः। पुनरपि तेनैवाभिप्रायेणाक्षेपगर्भं पृच्छति—किमिदं अधिकृत इति। एकग्रन्थेनाह—ननु च कर्तैवाधिकृतः नापरोऽधिकृतो नामेति। उत्तरं—यथा न कर्तुरधिकारः। अधिकृतस्य कर्तृत्वं इत्येतदपि षष्ठे वक्ष्यामः। यद्येवं भवेतां नामेदृशौ विषयनियोज्यौ तथापि किमायातं "व्रीहीन् प्रोक्षति" इत्यत्र। उत्तरम्—कार्यान्तरेऽपि द्रव्यगते संस्कारे सति [3]नियोगाविरोध इतीदमायातम्।

(1) नियोगासिद्धिरेव (2) G. सिध्यर्थः (3) G. नियोगविरोधः

व्रीहीन्प्रोक्षतीति प्रधानभूतविषयसंस्पर्शान्नियोगस्य न नियोगान्तरावगतिः समिदादीनामिव। ननु कार्यान्तरमित्युक्तम्। कार्यान्तरत्वे च नियोगान्तरावगतिः सोमेष्टीनामिव। सत्यं यदि कार्यान्तरं स्यात्। कथं न कार्यान्तरं? अधिकार-नियोगाक्षेपात् तण्डुलनिष्पत्तेः स्वर्गसिद्धिवन्न कार्यान्तरम्।

अयमाशयः। यदि यस्यापि कार्यान्तरमस्ति तस्यापि विषयता स्यात् तदा द्रव्यगत-कार्यावगमेऽपि नियोगस्य स्ववाक्य एव श्रुतत्वात् परवाक्यगतनियोगानुप्रवेशाभावात् तदसंस्पर्शी व्रीह्यादिगतं कार्यं तदननुगुणमिति कार्यद्वयविरोधः स्यात्। यथोक्ते तु विषयलक्षणे साध्यान्तरदर्शनेन विषयत्वाभावात् निर्विषयत्वाच्च लिङादेः नियोगज्ञानानुपपत्तेः स्ववाक्ये नियोगाभावात् नियोगसंबन्धसिध्यर्थं वाक्यान्तरगतनियोगानुप्रवेशाय तत्संबन्धावस्थ-व्रीह्यादिसंस्कारः तदपेक्षित एवायं प्रतीयत इति तत्कार्यानुप्रवेशात कार्यान्तरमपीदं न विरोधमावहति। यथोक्तनियोज्यलक्षणाभावे तु यथोक्तविषयलक्षणमेव न भवति। एकस्मिन्नपि वाक्ये नियोज्यविशेषणतया क्रियाफलस्याप्यन्वयोपपत्तेरिति यथोक्तनियोज्यलक्षणस्याप्यस्त्ये-वोपयोगः। कुतः पुनः परवाक्यगतनियोगानुप्रवेश इत्यत्राह—**व्रीहीन्प्रोक्षतीति प्रधानभूत-विषयार्थव्रीहिसंस्पर्शात् नियोगस्य न नियोगान्तरावगतिः** कार्यांशे **समिदादीनामिव** प्रोक्षणं प्रति प्रधानभूत[1]विषयार्था ये व्रीहयः तन्नियोगार्थं संस्पृशति। अतो व्रीहिद्वारेण नियो-गानुप्रवेशसंभवात् न नियोगान्तरं स्ववाक्यगतमवगम्यते यथाकार्यांशे अधिकारांशे समिदादीनाम्।

अभिप्रायं विवरीतुं चोद्यपूर्वकमाह—**ननु च कार्यान्तरमित्युक्तम्। कार्यान्तरत्वे च नियोगान्तरावगतिः सोमेष्टीनामिव।** उत्तरं—**सत्यम्** [2]**यदि** कार्यान्तरावगतिः **स्यात्। कथं न कार्यान्तरं अधिकारनियोगाक्षेपात् तण्डुलनिष्पत्तेः स्वर्गसिद्धिवत् न कार्यान्तरम्।** यथा नियोगाक्षिता स्वर्गसिद्धिः न कार्यान्तरं तथा तण्डुलनिष्पत्तिरपि।

---

(1) G. विष्यर्था (2) G. यदि कार्यान्तरंस्यात् तदा नियोगान्तरावगतिः स्यात्

तस्मादधिकारनियोग एवायं व्रीहीन् प्रोक्षति इति प्रयाजादीनामिव। इयान् विशेषः दृष्टकार्यद्वारकस्त्वयं साक्षान्नियोगकार्य एव प्रयाजादिः न च द्वारमेव प्रतिबन्धकं भवितुमर्हति। विशेषतो दृष्टसाक्षान्नियोगसंबन्धानामपि द्वारं कल्प्यम्। इदं च क्लृप्तमिति विशेषः। तथा च द्वारकल्पनामन्तरेण प्रधानेतिकर्तव्यतासिद्धिर्न भवति तथा प्रकरणप्रमाण एव वक्ष्यामः। तदिदमुक्तं प्रमाणाभावान्न सर्वार्थतेति। न हि दृष्टे संभवति संबन्धहेतौ कल्प्यं हेत्वन्तरमात्मानं लभते इत्यर्थः। ननु च विनियोगतः कार्यं, न कार्यतो विनियोगः

तस्मादधिकारनियोग एवायं साध्यो व्रीहिसंस्कारद्वारेण व्रीहीन् प्रोक्षतीति, प्रयाजादीनामिव। प्रयाजादिभिः इयान् विशेषः। दृष्टकार्यद्वारकस्त्वयम्। साक्षान्नियोगकार्य एव प्रयाजादिः। प्रथमं निरधिकारतया साधिकारनियोगकार्यतया प्रतीयते प्रयाजादिः। पश्चात्तु स्वगतकार्यविमर्शस्तत्रेत्युक्तम्। एवं कार्यान्तरेपि नास्ति विरोध इत्युक्तम्। संप्रति कार्यान्तरं विनाऽनुप्रवेशानुपपत्तेः अवश्यमङ्गीकरणीयं कार्यान्तरमित्याह— न च द्वारमेव प्रतिबन्धकं भवितुमर्हति विशेषतो दृष्टसाक्षान्नियोगसंबन्धिनामपि द्वारं करणोपकारलक्षणं कल्प्यम्। इदं तु [1]क्लृप्तमिति विशेषः। यथा च द्वारकल्पनामन्तरेण प्रधानेतिकर्तव्यतासिद्धिर्न भवति तथा प्रकरणप्रमाणस्वरूपनिरूपणे वक्ष्यामः। अनेनेदमुक्तम्। प्रयाजादितुल्यत्वेपि द्वारस्यावश्यकल्प्यत्वात् किमिति दृष्टद्वारं परित्यज्यत इति। तदिदमुक्तम्—प्रमाणाभावान्न सर्वार्थतेति। न हि दृष्टे संभवति संबन्धहेतौ कल्प्यं हेत्वन्तरमात्मानं लभत इत्यर्थः। ननु च विनियोगतःकार्यं न कार्यतो विनियोग इति। अस्यार्थः—विनियोगापेक्षया कार्यं न पुनः कार्यापेक्षो विनियोगः इति विनियोगानुसारेण व्रीहिमात्रसंस्कार एवायं प्रतीयते। अन्यथा हि व्रीहिशब्दस्य अपूर्वसाधनाङ्गलक्षणापरत्वं स्यात्। अतः कथं कार्यान्तरानुप्रवेश इति।

---

(1) G. दृष्टमिति

परिहृतमेतत् शास्त्रान्तरदृष्टविषयत्वादिति। अत एव भेदाभेदलक्षणं हेतुरिति। तस्मात् सूक्तं फलं तु सह चेष्टयेति। कार्यानुरोधी नियोग इत्यर्थः। अतो ये यत्र श्रूयन्त इति सिद्धम्।

द्रव्यं चोत्पत्तिसंयोगात् तदर्थमेव चोद्येत ॥ ११ ॥ अ. ५ ॥

इदं चिन्त्यते स्फयश्च कपालानि चेति सन्निधापनविधयः संयोगतोऽविशेषात् प्रकरणाविशेषाच्चेति किं सर्वार्थतयाऽवगम्यन्ते उत 'स्फयेनोद्धन्ति' इत्येवमादिभिः उपसंह्रियन्त इति। किं तावद्युक्तं? नोपसंह्रियन्त इति। कुतः? अशक्तेः। कथमशक्तिः?

उत्तरम्—परिहृतमेतत्-शास्त्रान्तरदृष्टविषयत्वादिति। शास्त्रान्तरेण यो दृष्टः कार्यसंबन्धितया स विनियोगस्य विषयः तस्मिन्नपरं विनियुज्यत इत्यनेन इदं परिहृतम्। यथा स्वतन्त्रद्रव्यं शेषि न भवति इति। यत एव शास्त्रान्तरप्रतीतं शेषि भवति अत एव च भेदाभेदलक्षणं हेतुरिति। एतच्च व्याख्यातम्। तस्मात्सूक्तं फलं तु सह चेष्टयेति। दृष्टमात्रेण कार्यस्य स्वीकार इति सूत्रे प्रतीयते तच्चानुपपन्नमिति मत्वा व्याचष्टे —कार्यानुरोधी नियोग इत्यर्थः। अवान्तरकार्यमपि नियोगोऽनुरुध्यते अपेक्षत इत्यर्थः। अतो ये यत्र श्रूयन्ते इति सिद्धम्। अतः सूक्तं फलं तु तत्रैव कर्तव्येति।

द्रव्यं चोत्पत्तिसंयोगात्। अत्र भाष्यकारेण सन्देहः कृतः—किं यो यः शक्यते एभिः कर्तुं तस्मै तस्मै प्रयोजनाय इत यत् येन संयुक्तं तस्मा एवेति। तत्र कारणभूतसन्देहमाह— इदं चिन्त्यते—स्फयश्च कपालानि चेति सन्निधापनविधयः संयोगतोऽविशेषात्। प्रकरणाविशेषाच्चेति किं सर्वार्थतयाऽवगम्यन्ते उत स्फयेनोद्धन्तीत्येवमादिभिरुपसंह्रियन्त इति। अस्यार्थः—येऽमी सन्निधापनविधयः नियोगसंबन्धमात्रविधयः ते किमुपसंह्रियन्ते अथ वा अनुपसंह्रियमाणाः स्वयमेव सर्वत्र कार्ये विनियुज्यन्ते इति। किं तावद्युक्तम्। नोपसंह्रियन्ते इति। कुतः? अशक्तेः उपसंहाराशक्तेः। कथमशक्तिः? उत्तरं—

सन्निधाने हि विनियोगैक्यात् द्वारमात्रानुज्ञानाच्च दृष्टद्वारकत्वमेव शक्यते वक्तुम्। कल्प्यप्रतिपक्षत्वात्। न पुनः दृष्टविशेषद्वारमपि। तस्मात् शक्तितो व्यवस्था। अत्राभिधीयते। स्यादेतदेवं यदि द्वारमात्रमेवानुरुध्यते नियोगेन (ततः) संबन्धानुसारी हि नियोगः। (कथं तर्हि अरुणाद्युपन्यासेन निराकरणं आस्थिते गुणवचनत्वे अरुणादिवद्भविष्यति वाक्ये नियोग इति।) उक्तं शास्त्रान्तरविहितविषयत्वान्नियोगस्येति। अतः सन्निधापनविधयो न संबन्धविधेः प्रतिपक्षाः भवितुमर्हन्ति तन्मूलत्वात् इति। अतः सिद्धमत्रापि ये यत्र श्रूयन्त इति।

सन्निधाने हि सति नियोगैक्यात् द्वारमात्रानुज्ञानाच्च दृष्टद्वारकत्वमेव शक्यते वक्तुम्। कल्प्यप्रतिपक्षत्वात् न पुनः दृष्टविशेषद्वारमपि। अस्यार्थः—सन्निधापनविधिबलेन तावत् एते स्फ्यादयः कार्यविशेषनिरपेक्षा एव नियोगार्था अवगम्यन्ते। तत्र केन द्वारेणेत्यपेक्षायां दृष्टमेव द्वारं नियोगोऽनुमन्यते नादृष्टम्। न पुनः दृष्टत्वेऽपि द्वारविशेषम्। नियोगाननुमतं च न शास्त्रार्थं इति। **तस्माच्छक्तितो व्यवस्था।** अत्राभिधीयते—**स्यादेतदेवं यदि द्वारमात्रमेवानुरुध्यते नियोगेन।** कस्मात्पुनर्नैवमित्याह—**संबन्धानुसारी हि नियोगः** यदि संबन्धं नियोगो नानुरुध्यते नियोगासंबन्धमपि यदि द्वारं स्यात् तदा द्वारमात्रमेव नियोगेनानुरुध्येत संबन्धानुसारी तु नियोगः। **उक्तं शास्त्रान्तरविहितविषयत्वात् (वि)नियोगशास्त्रस्येति।** यो हि शास्त्रान्तरेण नियोगेन संबन्धीक्रियते तद्विषयो नियोगः नान्यविषय इति संबन्धानुसारी नियोगः। नन्वेवमपि माभूदसंबन्धे विनियोगः संबन्धे तु सर्वत्र विनियोगः स्यात् इत्यत्राह—**अतः सन्निधापनविधयो न संबन्धविधेः प्रतिपक्षा भवितुमर्हन्ति तन्मूलत्वात्।** संबन्धविधिना हि संबन्धे शेषिणः आपादिते पश्चात् सन्निधापनविधिभिः विनियोगः। **अतः सिद्धमत्रापि ये यत्र श्रूयन्त इति।** यथा शेषिणः सन्निधानापादकस्य संबन्धविधेः सन्निधापनविधिः न प्रतिपक्षः तथा स्फ्येनोद्धन्तीत्यस्यापि न प्रतिपक्षो भवितुमर्हति अविशेषादिति सिद्धा अत्रापि व्यवस्था न केवलमवघातादीनामिति।

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्[1] ॥ १२ ॥ अ. ६ ॥

संस्कारद्रव्यविधयो ये यत्र श्रूयन्ते ते तत्रैवेत्युक्तम्। गुणे इदानीं चिन्त्यते—किं ये यत्र श्रूयन्ते तत्रैव उत कृत्स्ने प्रकरणे निवेश इति। ननु च अन्वितपदार्थकत्वात् पदानां नैव केवलगुणवचनता संभवति यथा न केवलाकृतिवचनता 'आलभेत' इति न केवलगुणवचनता शक्यते वक्तुं यथा 'वायव्यं श्वेतमालभेत' इति। सत्यं अपरित्यक्तद्रव्यस्यैवान्वयो यत्र दृश्यते अमूर्तस्य नैव तदुदाहरणम्। यत्र पुनः परित्यक्तद्रव्याभिप्राये केवलगुणवचनस्यान्वयः यथा पटस्य शुक्ल इति भवति तत्र संशयः। कारकविभक्तौ सत्यामपि किं क्रियान्वयी गुणवचन उत केवलद्रव्यान्वय्येवेति।

अर्थैकत्वे। संस्कारद्रव्यविधयो ये यत्र श्रूयन्ते ते तत्रैवेत्युक्तम्। गुणे इदानीं चिन्त्यते। किं ये यत्र श्रूयन्ते तत्रैव उत कृत्स्ने प्रकरणे निवेश इति। अनेनावान्तरसङ्गतिमाह। संस्काराणां श्रुत्या विनियोग उक्तः। तदनन्तरं च वाक्येन द्रव्याणां विनियोग उक्तः द्रव्यविनियोगनिर्वाह्यश्च गुणविनियोग इति स तदनन्तरं चिन्त्यते। पूर्वपक्षाभावसंशयं आचिक्षिप्सुराह—ननु चान्वितपदार्थत्वात् पदानां नैव केवलं गुणवचनता संभवति। अन्विताः पदार्थाः पदैः अभिधीयन्ते। तेन द्रव्यान्विता एव गुणा गुणपदैरभिधीयन्ते तथाभूताश्च शक्नुवन्त्येव क्रियासाधनतामुपगन्तुमिति भावः। दृष्टान्तमाह—यथा न केवलाकृतिवचनता आलभेत इति। यथा च वायव्यं श्वेतमालभेत इति न केवलगुणवचनता शक्यते वक्तुं, अन्यथा तदप्यत्रोदाहरणं स्यात्। परिहरति—सत्यं अपरित्यक्तद्रव्यस्यैवान्वयो यत्र दृश्यते अमूर्तस्य नैष तदुदाहरणम्। यत्र पुनः परित्यक्तद्रव्याभिप्राये केवलगुणवचनस्यान्वयः यथा पटस्य शुक्ल इति भवति तत्र संशयः कारकविभक्तौ सत्यामपि किं क्रियान्वयी गुणवचनः उत केवलद्रव्यान्वय्येवेति।

---

(1) P. 673

ननु च केवलगुणवचनता अस्यास्मिन् वाक्ये नैव प्रतीयते पटस्य शुक्ल इति(वत) षष्ठीनिर्देशात् द्रव्यस्य तेन संबन्धावगतेश्च शुक्लशब्दस्य युक्तं केवलगुणवचनस्यान्वयित्वम्। इह पुनः अरुणयेति कारकनिर्देशात क्रियासंबन्धावगतिः। तदवगतेश्च गुणमात्रस्याशक्तेः अपरित्यक्तद्रव्यस्यैवान्वयो युक्तः श्वेतमालभेतेति वत। उच्यते। न द्रव्यसम्बन्धावगतिरेव तत्र गुणवचनत्वे हेतुः द्रव्यान्तरानवगतिरपि द्रव्यान्तरावगतौ हि पटस्य शुक्लो भाग इतिवत् गुणगुणिनोः संबन्धो न स्यात्। यद्येवं किमायातं अरुणयेति?

अयमेवात्र संशयः किं एकवाक्यतया क्रय एवारुणिमा विनियुज्यते उत वाक्यं भित्वा प्रकरणविनिविष्टेषु द्रव्येषु विधीयत इति।

ननु च केवलगुणवचनताऽस्य अस्मिन् वाक्ये नैव प्रतीयते। तत्र हि **पटस्य शुक्ल इति** षष्ठीनिर्दिष्टत्वात् **द्रव्यस्य** तत्संबन्धावगतेश्च **शुक्लशब्दस्य युक्तं केवलगुणवचनस्यान्वयित्वम्।** यदि हि द्रव्यस्य संबन्धः शुक्लशब्दस्य न स्यात तदा न स्यात् केवलगुणान्वयिता। द्रव्यसंबन्धेतु द्रव्यान्तरस्य द्रव्यान्तरसंबन्धाभावात् केवलगुणान्वयिता। **इह पुनः** अरुणया इति **कारकनिर्देशात् क्रियासंबन्धावगतिः** न द्रव्यसंबन्धावगतिरिति न केवलंगुणान्वयित्वम्। युक्त्यन्तरं चाह — **तदवगतेश्च** क्रियासंबन्धावगतेश्च **गुणमात्रस्यापि** क्रियानुष्ठानाशक्तेः। **अपरित्यक्तद्रव्यस्यैवान्वयो युक्तः श्वेतमालभेत इतिवत्।** परिहरति—**उच्यते। न द्रव्यसंबन्धावगतिरेव तत्र केवलगुणवचनत्वे हेतुः।** कस्तर्हि? **द्रव्यान्तरानवगतिरपि हेतुः।** यदि हि द्रव्यान्तरमपि तत्रावगम्यते तदा न स्यात् केवलगुणवचनता पटस्य शुक्लो भाग इतिवत्। तेनोपात्त[1]द्रव्यवत् द्रव्यान्तरानुपादानमपि केवलगुणवचनत्वे हेतुः। कथं पुनरत्र द्रव्यान्तरावगतिर्नास्ति अत्राह—**द्रव्यान्तरावगतौ हि पटस्य शुक्लो भागः इतिवत् गुणगुणिनोः संबन्धो न स्यात्। यद्येवं किमायातं अरुणयेति**

(1) R. द्रव्यत्ववत्

इदमायातम्। अत्रापि एकहायन्या न द्रव्यान्तरं प्रतीयते। अतः एकहायनीशब्दोपात्तत्वात् द्रव्यस्य नारुणाशब्दः द्रव्यान्तरोपनिविष्टं गुणमभिधातुं शक्नोति। एकहायन्युपनिवेशो च न क्रयसम्बन्ध इत्युपरिष्टाद्वक्ष्यते। तस्मात् पदान्तरोपात्तद्रव्यके वाक्ये केवलगुणवचनान्वयितैवेति स्थितम्। अत उपपद्यते संशयः। किं वाक्यं भित्वा प्रकरणे निवेशो गुणस्य द्रव्ययोगित्वात् उत करणनिर्देशात् क्रयण एवेति। कथमेवं स्थिते गुणवचनत्वे "[1]ननु नैवायं गुणवचनः, किं तर्हि ? द्रव्यवचनः इत्याक्षेपः उपपद्यते। उच्यते–स्त्रीलिङ्गनिर्देशात्, द्रव्याश्रितत्वात्। प्रातिपदिकार्थगतत्वाच्च लिङ्गस्य।

इदमायातम्। अत्रापि हि एकहायन्या न द्रव्यान्तरं प्रतीयते। एकवाक्यत्वे सति एकहायन्यवरुद्धे क्रये द्रव्यान्तरानुप्रवेशाभावात्। अतः एकहायनीशब्दोपात्तत्वात् द्रव्यस्य न अरुणाशब्दः द्रव्यान्तरोपनिविष्टं गुणमभिधातुं शक्नोति। एकहायन्युपनिवेशे च न क्रयसंबन्ध इत्युपरिष्टात् प्रदर्श्यते। अतः पदान्तरोपात्तद्रव्यके वाक्ये केवलगुणान्वयितैवेति स्थितम्। अत उपपद्यते संशयः। यस्मादुपपद्यते संशयः किं वाक्यं भित्वा प्रकरणे निवेशः गुणस्य द्रव्ययोगित्वात् किं प्रकरणनिविष्टेषु द्रव्येषु निवेशः उत करणविभक्तिनिर्देशात् क्रयण एवेति। अत्र भाष्यम्। "ननु नैवायं गुणवचन[1]" इति। तदाक्षिपति–कथमिति। एवं भाष्योक्तेन न्यायेन गुणान्वयव्यतिरेकानुविधान–लक्षणेन अरुणाशब्दस्य स्थिते गुणवचनत्वे "ननु नैवायं गुणवचनः किं तर्हि द्रव्यवचनः" इत्याक्षेपः कथमुपपद्यते। उच्यते। स्त्रीलिङ्गनिर्देशात् द्रव्याश्रितत्वाच्च स्त्रीलिङ्गस्य न गुणानां लिङ्गसमवायः। नन्वाक्षिप्तद्रव्यसमवायि लिङ्गं भविष्यति इत्यत्राह–प्रातिपदिकार्थगतत्वाच्च लिङ्गस्य। स्त्रियां यत्प्रातिपदिकं वर्तते तत्र स्त्रीप्रत्यय इति प्रातिपदिकार्थगतमेव लिङ्गं प्रत्ययाभिधेयत्वेऽपि लिङ्गस्य प्रकृत्यर्थसंबन्ध एवेति प्रातिपदिकार्थाश्रितमेव लिङ्गमिति। अत्र

(1) P. 681-6

किमरुणयेत्येवमादिदर्शनं नास्त्याक्षेपवादिनः। न नास्तिदर्शनं, किन्तु अरुणयेत्येवमादिषु नेत्यभिप्रायः। कथं तर्हि अरुणाद्युपन्यासेन निराकरणम्? अरुणादिषु प्रयोगसाधुतेति। कथमरुणावल्लिङ्गमिति द्रव्यवचनतानिराकरणम्। स्थिते गुणवचनत्वे दृढतरेण कारणेन अरुणावल्लिङ्गं भविष्यतीत्यभिप्रायः "अथ क्रीणातिना न सम्बध्येत तस्मिन्नेव वाक्ये एकहायनीशब्देन सम्भन्त्स्यते न भविष्यति वाक्यभेद" इति वदतः कोऽभिप्रायः। अयमभिप्रायः—यदा द्वयोः क्रियासम्बन्धः तदा द्रव्यान्तरनिरोधात् केवलगुणवचनता अरुणयेति। यदा पुनः क्रियासम्बन्धो नास्ति तदा आश्रितत्वाद्गुणानां द्रव्याणां च तदाश्रयत्वेन गुणानां को नाम द्रव्यसंबन्धं निरुणद्धि यथा नीलोत्पलमिति। अत्रोत्तरम्—प्रातिपदिकात्ता-

---

पृच्छति—किमरुणेत्यादिदर्शनं नास्त्याक्षेपवादिनः, गुणमात्रवचनादपि स्त्रीप्रत्ययो भवतीति किमाक्षेपवादी न पश्यति, येन तन्मात्रदर्शनादपि द्रव्यवचनतामिच्छतीत्यर्थः। न नास्ति दर्शनं, अस्त्येव, किन्तु अरुणयेत्येवमादिषु नेत्यभिप्रायः। अभिधेय एव दर्शनात्। कथं तर्हि अरुणाद्युपन्यासेन निराकरणम्? अरुणादिषु प्रयोगसाधुतेति। कथमरुणावल्लिङ्गमिति द्रव्यवचनतानिराकरणम्? उत्तरं—स्थिते गुणवचनत्वे दृढतरेण कारणेन अरुणावल्लिङ्गं भविष्यति इत्यभिप्रायः। "अथ यदि क्रीणातिना न संबध्येत तस्मिन्नेव वाक्ये एकहायनीशब्देन संभन्त्स्यते न भविष्यति वाक्य भेद" इति वदतः कोऽभिप्रायः?। अनेन भाष्यं पठित्वा आक्षिपति। आक्षेपे चायमभिप्रायः केवलगुणवचनत्वात् [1]कथं द्रव्यसंबन्धाशङ्केति। समाधत्ते— अयमभिप्रायः। यदा द्वयोः क्रियासंबन्धः तदा एकहायन्यवरोधेन द्रव्यान्तरनिरोधात् केवलगुणवचनता अरुणयेति। यदा पुनः अरुणिम्नः क्रियासंबन्धो नास्ति तदा द्रव्याश्रितत्वात् गुणानां द्रव्याणां च तदाश्रयत्वेन गुणानां को नाम द्रव्यसंबन्धं निरुणद्धि इति युक्त एवाश्रितत्वेन[2] क्रयसंबन्ध इति मन्यते यथा नीलमुत्पलं इत्यत्र। अत्रोत्तरं—प्रातिपदिकात्ता-

---

(1) G. न (2) G. आश्रयत्वेन

वत गुण एव प्रतीयते पदान्तरसंबन्धात्तु अपरित्यक्तद्रव्यकोऽन्वयः। लिङ्गं च वाक्याद्बलीयः। किमिदं वाक्याल्लिङ्गं बलीय इति। ऐदमर्थ्ये हि बलाबलमुक्तम् न पुनरन्वययोगेऽपि। उच्यते। अन्वययोगे च अन्वयावगतौ सत्यां केन बलाबलं निवार्यते। उक्तं चास्माभिः। पदान्तरेण द्रव्योपादानात् क्रियासंबन्धाच्च पदद्वयस्य केवलगुणान्वयिता न शक्या वाक्येन बाधितुम्। अत्रेदानीमुत्तरम्—क्रियायोगित्वेऽनन्वयमालोच्य अनन्वयाद्दूरं द्रव्यान्वयः द्रव्यान्वयित्वेपि क्रियान्वयो नातिदूरं परित्यक्तो भवति।

वत् गुण एव प्रतीयते पदान्तरसंबन्धात्त्वपरित्यक्तद्रव्यकोऽन्वयः। लिङ्गं च वाक्याद्बलीयः। तेन नास्ति द्रव्यसंबन्ध इति। वाक्याल्लिङ्गं बलीय इत्याक्षिपति—किमिदं वाक्याल्लिङ्गं बलीय इति। ऐदमर्थ्ये हि पारार्थ्यलक्षणे शेषत्वे बलाबलमुक्तं श्रुतिलिङ्गाधिकरणे। न पुनरन्वययोगेपि क्रियाकारकगुणगुण्याद्यन्वययोगेपि बलाबलं नोक्तम्। उच्यते—अन्वययोगे च अन्वयान्तरावगतौ सत्यां केन बलाबलं निवार्यते। यद्यप्यैदमर्थ्य एव बलाबलमुक्तं तथापि तुल्यन्यायतयाऽन्वययोगेऽपि तेन बलाबलं केन वार्यते। चशब्दोऽपिशब्दार्थे। उक्तं चास्माभिः बलाबलम्।

अत्र भाष्यं "रूपादरुणाशब्दस्य गुणवचनता"[1] इति वदति। तदनुपपन्नम्, अन्वितपदार्थत्वात न केवलगुणवचनतेत्यनया शङ्कया भाष्यार्थं दर्शयति—पदान्तरेण द्रव्योपादानात् क्रियासंबन्धाच्च पदद्वयस्य केवलगुणान्वयिता न शक्यते वाक्येन बाधितुम्। क्रियायामेव तावत् न द्रव्यान्वितगुणान्वयार्थं अरुणापदं, पदान्तरेण द्रव्योपादानात्। न च द्रव्य एव गुणान्वयार्थं, क्रियासंबन्धात् पदद्वयस्य परस्परसंबन्धप्रतिपत्तौ निमित्ताभावात्। अतः केवलगुणान्वयिता अरुणापदस्येत्यनेनैवाभिप्रायेण भाष्ये रूपादरुणाशब्दस्य गुणवचनतेत्युक्तम्। अत्रेदानीमुत्तरं क्रियायोगित्वे अमूर्ततयाऽनन्वयमालोच्य अनन्वयाद्दूरं द्रव्यान्वयः। द्रव्यान्वयित्वेपि[2] क्रियान्वयो नातिदूरं परित्यक्तो भवति। तदीयद्रव्य

(1) P. 686 (2) G. द्रव्यान्वयित्वे हि

अवश्यं चैतदेवाभ्युपगन्तव्यम्। अन्यथा हि प्रकरणसंबन्धोऽपि न स्यात् प्रकरणे हि क्रियया द्रव्येण वा अन्वयः। क्रियया तावन्नसंबन्ध इत्युक्तम्। अथ लिङ्गात् द्रव्येणापि न संबध्यते हन्त अनन्वयिताऽभ्युपगताभवति। न च अनन्वयिता अभिधानस्य धर्मो लोके दृष्टः। तस्माद्वरमस्मिन्नेव वाक्ये द्रव्यसंबन्धाभ्युपगमः। अत एव नीलोत्पलादिष्वप्यन्वयो(न) दृश्यते। अन्यथा हि संबन्धाभिधानविभक्तिशून्यानामपि कथं वान्वयः स्यात [1]"नैतदेवमिति"। सत्यमेव वैभक्तिकोऽपि संबन्धः अभिधानलक्षणो भवति यद्यप्रतिपक्षो भवेत् अयं तु सप्रतिपक्षः। अतः तृतीयानुगुणमेवास्यान्वयित्वं

एव निवेशात्। अवश्यं चैतदेवमभ्युपगमनीयम्। अन्यथा प्रकरणसंबन्धोऽपि न स्यात्। प्रकरणेऽपि हि क्रियया द्रव्येण वा संबन्धः। क्रियया तावत् न संबध्यते इत्युक्तं अमूर्तत्वात्। अथ लिङ्गात् द्रव्येणापि न संबध्यते हन्त अनन्वयितैवाभ्युपगता भवति। न चायमनन्वयिता अभिधानलक्षणो धर्मः अभिधानस्य शब्दस्य लोके वृद्धव्यवहारे दृष्ट इत्युक्तम्। तस्मादेकवाक्यतानुग्रहाय तस्मिन्नेव वाक्ये द्रव्यसंबन्धाभ्युपगमो युक्तः। यत एवानन्वयप्रसङ्गाल्लिङ्गेनान्वयः अत एव नीलोत्पलादिष्वप्यन्वयो दृश्यते। अन्यथा हि संबन्धाभिधानविभक्तिशून्यानामपि नीलोत्पलादिशब्दानां कथं वाऽन्वयः स्यात् वाशब्दः इवार्थे। कथमिवान्वयः स्यादित्यर्थः समुद्रो वा महासत्व इतिवत्। अनेन ग्रन्थेन "अत्रोच्यते" इत्यादिभाष्यं "नास्ति वाक्यभेदः इत्यन्तं व्याख्यातम्।

"नैतदेवं" इति प्रतीकेन भाष्यं व्याख्येयं स्वीकृतम्। सत्यमेव वैभक्तिकोऽपि संबन्धः अभिधानलक्षणः भवति यद्यप्रतिपक्षो भवेत्। अयं तु सप्रतिपक्षः तृतीयया। न हि द्रव्यसम्बन्धे तृतीया घटते। अतः तृतीयानुगुणमेवास्यान्वयित्वं

---

(1) 686-15

कल्पयितव्यम्, न पुनः केवलाभिधानानुगुणम्। तस्मात् न नीलोत्पलवत् संबन्ध उपपद्यते। उच्यते। यदि तृतीयार्थः प्रातिपदिकार्थान्वयविरोधी स्यात् स्यादेतदेवम्। स पुनः प्राप्तत्वान्नैव विरुध्यते। अतो यावदप्राप्तमेकहायन्या संबध्यत इति न दोषः। भवेदेतदेवं यद्येकहायनी नान्यार्था, सापि त्वन्यार्थैव। न च द्वयोरन्यार्थयोः मिथः संबन्धः संभवति। किमर्था पुनरेकहायनी? क्रयार्थेति ब्रूमः। किं पुनः कारणं तुल्ये समभिव्याहारे क्रयार्था एकहायनी न पुनः गुणसंबन्धार्था। अत्र भाष्यं "अभिहितमपि पुनः पर्यनुयुज्यत"[1] इति। यद्यभिहितं किमिति पर्यनुयुज्यते। अन्यार्थस्यान्येव संबन्धः विरोधप्रदर्शनार्थं तदर्थमेवोत्तरं तृतीया-

---

कल्पयितव्यम्। न पुनः केवलाभिधानानुगुणम्। तस्मान्न नीलोत्पलवत् संबन्ध उपपद्यते।

अत्रोच्यते। यदि तृतीयार्थः प्रातिपदिकार्थस्यारुणिम्नो द्रव्यान्वयविरोधी स्यात् स्यादेतदेवम द्रव्यसंबन्धो नास्तीति। स पुनः तृतीयार्थः प्राप्तत्वान्न विरुध्यते। अतो यावदप्राप्तमेकहायन्या संबध्यत इत्यदोषः। अतो 'न ब्रूमो न कारकम्। इत्यादिभाष्यं 'नास्ति वाक्यभेदः' इत्यन्तं व्यावर्णितम्। भवेदेतदेवं यद्येकहायनी नान्यार्था सा तु अन्यार्थैव। न च द्वयोः अन्यार्थयोः मिथः संबन्धः संभवति। किमर्था पुनरेकहायती? क्रयार्थेति ब्रूमः। किं पुनः कारणं तुल्ये समभिव्याहारे गुणक्रियाभ्यां सह क्रयार्थैवैकहायनी न पुनः गुणसंबन्धार्थेति। अत्र भाष्यं "अभिहितमपि पुनः पर्यनुयुज्यत" इति आक्षेप्तुं भाष्यं पठित्वा आक्षिपति—यद्यभिहितं किमिति पुनः पर्यनुयुज्यते" यदि तृतीयाविभक्तियोगेन क्रयसंबन्धः आरुण्यस्येत्यभिधानात् अभिहितमेवेदं क्रयार्थैवैकहायनी तृतीयायोगादिति किमर्थं पुनः पृच्छयते कथं क्रयार्थैवैकहायनीति। उत्तरं—अन्यार्थस्याप्यन्येन संबन्धो विरोधप्रदर्शनार्थं तदर्थमेव चोत्तरमपि[2] तृतीया-

---

(1) P. 687 (2) G. तेन न दोषः

संबन्धात् क्रयार्थतेति। अन्यार्थमप्यन्येन संबध्यत इति न दोषः। शक्नोति हि आकाङ्क्षावतः अन्यार्थमपि सन्निहितमाकाङ्क्षां पूरयितुम् सन्निधानाविशेषात्। सत्यं, शक्नोति न पुन र्यदर्थं तत्संबन्धितयैव। ननु च तत्संबन्धिन्यपि सन्निधानमविशिष्टम् इतरस्य चाकाङ्क्षा। भवेदेतदेवं यदि सन्निधानमविशिष्टं इह तु सन्निधानमप्यन्यार्थम्। न चान्यार्थं सन्निधानमाकाङ्क्षति स्वार्थसिद्धये। सत्यमेवम्। तस्यावश्यान्वयभावित्वात्। अभिधानस्य चान्यस्यासन्निधानात् अन्यार्थतामवकृष्य सन्निधानमात्रं परिगृह्यते। तथा च रात्रिसत्रादिषु दृष्टम्।

संबन्धात् क्रयार्थता' इति। पृष्टे तृतीयाबलेनैव उत्तरे दत्ते पुनरन्यार्थस्याप्यन्येन सन्निधानात् संबन्धाविरोध इति इमामाशङ्कां कर्तुं प्रश्नः उत्तरं चेत्यर्थः। अन्यार्थमप्यन्येन संबध्यते[1] इति नैष दोषः। शक्नोति हि आकाङ्क्षावतोऽन्यार्थमपि सन्निहितमाकाङ्क्षां पूरयितुं सन्निधानाविशेषात्। तेन साकाङ्क्षस्यारुण्यस्य आश्रयाकाङ्क्षां एकहायनी पूरयेत्। सत्यम् शक्नोति, न पुनः यदर्थं तत्संबन्धितयैव। तेन यद्यप्येकहायनी सन्निधानात् अरुणिम्ना संबध्यते तथापि क्रयार्थैव सती न संबध्यते इति न क्रयमात्रसंबन्धोऽरुणिम्नः किंन्तु प्रकरणगतसर्वैकहायनीसंबन्धोऽरुणिम्न इति।

ननु च त[2]त्संबन्धिन्यामपि सन्निधानमविशिष्टं इतरस्य चाकाङ्क्षा, तेन तत्संबन्धितयैव संबन्ध इति। भवेदेतदेवम् यदि सन्निधानमविशिष्टं स्यात् इह तु सन्निधानमप्यन्यार्थम्। न चान्यार्थं सन्निधानमाकाङ्क्षति स्वार्थसिद्धये। उत्तरं —ह स्यं वे अवश्यान्वयभावित्वात् अभिधानस्य चान्यस्यासन्निधानात् अन्यार्थतामवकृष्य[3] सन्निधानमात्रं परिगृह्यते। तथा च रात्रिसत्रादिषु दर्शितम्। अस्यार्थः—[4]अरुणा—

---

(1) R. संबन्धः (2) G. तत्संबन्धस्यापि (3) G. अपह्वाप (4) G. अरुणिमा

युक्तमुक्तम्, किन्त्वत्र प्रकरणात् सन्निधानमनन्यार्थं विद्यते। तस्माद्वाक्यभेदादेवान्वयो युक्तः अनन्यार्थस्य संबन्धिनोऽवगमात् अतः प्रकरणे सर्वस्मिन्निवेश इत्येवं प्राप्ते ब्रूमः।

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥ १२ ॥

क्रय एवारुणिमा निविशते। कथं ? तत्संबन्धप्रतिपत्तेः तृतीयातः। ननु केवलगुणवचनत्वात् न क्रियया संबध्यत इत्युक्तम्। दुरुक्तं तत्। कथं दुरुक्तम् ? यस्य हि यादृशं क्रियासाधनत्वं दृष्टं

निधानं तावदवश्यं केनचिदन्वयं भावयितुमुच्चरितम्। तेनावश्यमन्वयेन भवितव्यम्। तत्र केनान्वय इत्यपेक्षायां संनिधानात् एकहायनी क्रयार्थैव संभन्त्स्यते। अन्यार्थतां परित्यज्य तथा रात्रिसत्रे स्तुत्यर्थतया अन्विताऽपि प्रतिष्ठा सन्निधानात् नियोज्यविशेषणतयैव गृह्यते। उत्तरम्—युक्तमुक्तं किन्तु अत्र प्रकरणात् सन्निधानमनन्यार्थं अधिकारविधेर्विद्यते। तेन गृहीतमारुण्यं तदीयेष्वेव सर्वद्रव्येषु संबध्यत इति। तस्माद्वाक्यभेदादेवान्वयो युक्तः। अनन्यार्थस्याधिकारविधेः संबन्धिनोऽवगमात्। अतः प्रकरणे सर्वस्मिन्निवेश इति सिद्धम्। अत्रायं पूर्वः पक्षः—युक्तमाकृतेः अमूर्ताया अपि अध्यवसायहेतुतया क्रियां प्रति साधनभावः। गुणस्य तु न कथंचित् साधनभाव उपपद्यते। ननु चोपादाने गुणस्याप्युपयोगोऽस्ति न ह्यनवच्छिन्नमुपादीयत इति शक्यते वक्तुम्। न च गुणमन्तरेणानवच्छिन्नत्वमुपपद्यत इति। तदयुक्तम्। यथा गुणविनियोगाभावेपि यत्किञ्चिद्द्रव्यमुपादाय प्रयोगः सिध्यति तथाऽत्रापि किं न सिध्यतीति नास्ति साधनभावः। राद्धान्तमुपक्रमते—एवं प्राप्ते ब्रूमः।

अर्थैकत्वे। अत्राभिधीयते—क्रय एवारुणिमा निविशते। कथं ? तत्संबन्धप्रतीतेः तृतीयातः। ननु च केवलगुणवचनत्वात् न क्रियया संबध्यते इत्युक्तम्। दुरुक्तं तत्। कथं दुरुक्तं ? इत्थं दुरुक्तम्—यस्य हि यादृशं क्रियासाधनत्वं दृष्टं लोके

तस्य तथाविधस्यैव विभक्तयः संबन्धमापादयन्ति। द्रव्यविशेषणतया च गुणः क्रियां निष्पादयति। अविशिष्टस्य कारणत्वानुपपत्तेः। ननु चानुपात्तद्रव्यक एवायं प्रयोगः पटस्य शुक्ल इति वदित्युक्तम्। तत्सत्यमुक्तं न पुनरनुपात्तद्रव्यतया क्रियासंबन्धोऽपह्नोतुं शक्यते। स्वव्यापारापेक्षित्वात् क्रियायोगस्य। न चानुपात्तद्रव्यतया व्यापारहानिः शक्यते वक्तुम्। स्वव्यापारापेक्षाणि कारकाणि क्रियया संबध्यन्ते इति न कारकान्तरव्यापारमपेक्षन्ते। नाप्यर्थान्तरगतं हानमुपादानं वाऽभिधानस्य।

तस्य तथाविधस्यैव विभक्तयः संबन्धमापादयन्ति। द्रव्यविशेषणत्वेन च गुणः क्रियां निष्पादयति अविशिष्टस्य कारणत्वानुपपत्तेः। अत्रेदमाकूतम्। क्रयसंबन्धादारुण्यस्य तत्रैव विनियोगः क्रयसाधनता च तस्य संभवति द्रव्यविशेषणत्वेनारुण्यविनियोगात्। तद्धि एवं विधीयते यत्रारुण्यं समवेतं तेन क्रयः कर्तव्यः इति। न च तस्योपादानमारुण्येनाविशिष्टस्य संभवति। न चानुपात्तेन क्रिया निर्वर्त्येत इत्यस्ति क्रियासाधनभावः आरुण्यस्येति सिद्धः क्रये विनियोगः। एतदेव विवरीतुं चोद्यमारभते—**ननु चानुपात्तद्रव्यक एवायं प्रयोगः पटस्य शुक्ल इतिवदित्युक्तम्।** अतः साधनभावो नास्तीत्युक्तम्—**तत्सत्यमुक्तम्। न पुनरनुपात्तद्रव्यतया क्रियासंबन्धोऽपह्नोतुं शक्यते। स्वव्यापारापेक्षत्वात् क्रियायोगस्य** सर्वेषां साधनानां विलक्षणो व्यापार इति। **न चानुपात्तद्रव्यतया व्यापारहानिः** व्यापार एव नास्तीति **शक्यते वक्तुम्।**

ननु च द्रव्यसाधनके कर्मणि कथं गुणस्य साधनतेत्याशङ्क्याह—**स्वव्यापारापेक्षाणि च कारकाणि क्रियया संबध्यन्त इति न कारकान्तरव्यापारमपेक्षन्ते।** अस्यार्थः—न द्रव्यादिवत् कर्मणि गुणः साधनमिति नास्ति विरोधः। ननु च यथा श्वेतमित्यत्र द्रव्योपादानं तथेह नास्तीति कथं साधनभावः अत आह—**नाप्यर्थान्तरगतं** द्रव्यगतं **हानमुपादानं वाऽभिधानस्य।** यद्यप्यभिधानमर्थान्तरमुपादत्ते जहाति वा तथापि साधनभावो न विरुध्यत

तस्माद्भिन्नव्यापारकत्वादेकहायनीद्वारक एव क्रयसंबन्ध उपपन्नः। अत एव च न विकल्पः प्रयोजनवद्द्रव्यान्तर–संबन्धार्थं क्रियायाः प्राधान्यम्। तत्प्राधान्ये तु न प्रत्येकं वाक्यपरिसमाप्तिः। तस्मादेकवाक्यत्वात्सिद्धं द्रव्यगुणयोरैककर्म्या–न्नियम इति।

एकत्वयुक्तमेकस्य श्रुतिसंयोगात्[1] ॥ ३-४-१३ ॥ (अ. ७)

उक्तो द्रव्यगुणसंस्काराणां विनियोगः। इदानीं विनियोज्य-विषयगता चिन्ता क्रियते। एवं श्रूयते 'ग्रहं संमार्ष्टि' इति।

इति । उपसंहरति—तस्माद्भिन्नव्यापारकत्वात्[2] एकहायनीद्वारक एव क्रयसंबन्ध उपपन्नः। यत एव द्रव्यद्वारेण विनियोगः अत एव न विकल्पः प्रयोजनवद्द्रव्यसंबन्धार्थं क्रिया-प्राधान्यं प्रयोजनवता द्रव्यान्तरेण सोमाख्येन संबन्धो यथा स्यादित्येवमर्थमरुणैकहायन्य-पेक्षं क्रियाप्राधान्यमुक्तम्। तत्प्राधान्ये तु न[3] प्रत्येकं वाक्यपरिसमाप्तिः। न हि गुणं प्रति प्रधानमुपदिश्यते किन्तु प्रधानमेव प्रति गुण इति न प्रतिगुणं वाक्यभेदः। तस्मादेकवाक्यत्वात् सिद्धं द्रव्यगुणयोरैककर्म्यान्नियम इति।

एकत्वयुक्तमेकस्य श्रुतिसंयोगात्। ननु असङ्गतैवेयं चिन्ता। नात्रैकत्वस्य श्रुतिनिबन्धनो विनियोग आशङ्क्यत इत्याशङ्क्याह—उक्तो द्रव्यगुणसंस्काराणां विनियोगः इदानीं [4]विनियोज्यविषयगता चिन्ता क्रियते। अस्यार्थः—द्रव्यादिविनियोगे चिन्तिते तस्यैव विनियोगस्य विशेषं चिन्तयितुं विनियोज्यस्य यो विषयः शेषी तद्गता चिन्ता क्रियते-किं विवक्षितसङ्ख्याकशेषिपर्यन्तो विनियोगः उत नेति। तेनाध्यायसङ्गतिरवान्तरसङ्गतिश्चास्ति। कुतः पुनरियं चिन्तेत्यत्र आह—एवं हि श्रूयते 'ग्रहं संमार्ष्टि' इति। एकत्वश्रवणात्

---

(1) P. 699 (2) R. द्वारकत्वात् (3) G. omiss न (4) G. R. विनियोज्यविषया

तत्र संशयः—किं शेषिणो विशेषणं शेषित्वे आद्रियते शेषस्येव शेषत्वे उत नेति। कथं पुनरत्र संशयः? युक्तं तावच्छेषः उपादीयमानत्वात् तदुपयोगिविशेषणम्। शेषिणः पुनः कार्यान्तरे निर्ज्ञातशेषभावस्यैव स्वशेषयोगो युक्त इति न संशयं मन्यामहे। उच्यते। श्रुतितः सर्वं कल्पते नोपादेयत्वात् पशोरेकत्वम्, किं तर्हि? श्रुतेः। श्रुतिश्चेन्नाद्रियते द्वित्वं बहुत्वं वा किमिति शेषितया नोपादीयते। अतः शेषिण्यपि यथैव ग्रहश्रुतिराद्रियते एवमेकत्वश्रुतिरपि अविशेषात्। तदिदमुक्तं—'एकत्वयुक्तमेकस्य श्रुतिसंयोगादि'ति।

संशयः। कीदृशः संशय इत्यत्राह—अत्र संशयः—किं शेषिणो विशेषणमेकत्वादि शेषित्वे[1] आद्रियते शेषस्येव पश्वादेः शेषत्वे उत नाद्रियत इति। कथं पुनरत्र संशयः? प्रष्टा स्वाभिप्रायेण एकग्रन्थेनाह—युक्तं तावत् शेष इति च्छेदः। कथं युक्तं? उपादीयमानत्वाच्छेषस्य तदुपयोगि उपादानोपयोगि विशेषणं, अनवच्छिन्नस्य उपादानाशक्तेः। शेषिणः पुनः कार्यान्तरे होमादौ निर्ज्ञातयागशेषभावस्यैव स्वशेषयोगो युक्तः। शास्त्रान्तरविहितत्वाच्छेषिण इति न संशयं पश्यामः। कार्यान्तरे निर्ज्ञातोपादानाश्शेषिणः नोपादेया इति तदीयविशेषणानामप्यनपेक्षितत्वात् आदराशङ्कैव न युक्तेति। एवं पूर्वपक्षमाक्षिप्य समर्थयमान आह—उच्यते। श्रुतितः सर्वं कल्पते विवक्षितत्वं अविवक्षितत्वं इत्यादि नोपादेयत्वात् पशोरेकत्वं विवक्षितम्। किं तर्हि? श्रुतेः। श्रुतिश्चेन्नाद्रियते द्वित्वं बहुत्वं वा किमित्यवच्छेदकत्वेन नोपादीयते। नाङ्गीक्रियते। अतः शेषिण्यपि यथा ग्रहश्रुतिराद्रियते एवमेकत्वश्रुतिराद्रियताम्, अविशेषात्। तदिदमुक्तं एकत्वयुक्तमेकस्य श्रुतिसम्योगात्। यत्तूक्तमपेक्षा नास्तीति तदयुक्तम्। श्रुतिबलेनैवापेक्षा भवतीति कल्प्यतां रक्तपटवत्। यत एव श्रुतिमात्रेण स्वीकारः सङ्ख्यायाः नोपादेयत्वमपेक्षते,

---

(1) G. आदीयते

अत एव च 'अग्नीनादधीत' इति बहुत्वसिद्धिः यूपं छिनत्ति' इति च एकत्वम् ।

सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् ॥ १४ ॥

अत्रोच्यते—नैतदेवं यदेकस्य संस्कार इति । संस्कारो हि नाम व्यापारान्तरयोग्यता । यस्य संस्कारो व्यापारान्तरयोग्यतालक्षणः संभवति स एव संबन्धितामापद्यते । ननु च ससङ्ख्याक एव संस्कारेण व्यापारान्तरयोग्यः क्रियते । कुतः ? व्यापारान्तरं उपादानशेषत्वात् सङ्ख्याया लिङ्गस्य च । यथाभूतश्चासौ शेषः तथाभूतस्यैव संस्कारसंबन्धः कार्यार्थत्वात् । ऐन्द्रवायवादि-

---

अत एव "अग्नीनादधीत" इति श्रुतेः अग्नीनां बहुत्वमाधाने सिध्यति । "यूपं छिनत्ति" इति चैकत्वं यूपे सिध्यति ।

सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् । अत्रोच्यते—नैतदेवम् यदेकस्य संस्कार इति । संस्कारो नाम व्यापारान्तरयोग्यता । यस्य संस्कारो व्यापारान्तरयोग्यतालक्षणः संभवति स एव संबन्धितां संस्कारं प्रति शेषितां प्रतिपद्यते । यस्य पुनः व्यापारान्तरयोग्यतालक्षणसंस्कारो न भवति व्यापारान्तराभावात् स संस्कारार्हो न भवति । तच्छब्देन पुलिङ्गान्तेन व्यापारान्तरानवमर्शादेवं व्याख्यातम् । एतेनेदमुक्तम्—ग्रहमात्रस्यैव व्यापारान्तरयोगात् तावन्मात्रस्यैव संस्कार इति । एतदेव चोद्यपूर्वकमाविष्कर्तुमाह—ननु च ससङ्ख्याक एव व्यापारान्तरयोग्यः संस्कारेणायं क्रियते । सङ्ख्याया व्यापारान्तरयोगो नास्तीत्यनेनाभिप्रायेण पृच्छति—कुत इति । उत्तरं—व्यापारान्तरं उपादानशेषत्वात् सङ्ख्याया लिङ्गस्य च । यथाभूतश्चासौ विवक्षितलिङ्गसङ्ख्याकः स्वव्यापारे शेषभूतः तथाभूतस्यैव संस्कारे संबन्धः कार्यार्थत्वात् संस्कारस्य । ऐन्द्रवायवादिषु

वाक्येषु च एकत्वयुक्ता एव ग्रहाः शेषत्वेन श्रूयन्ते। अतोऽविवक्षितमित्ययुक्तम्। न च ग्रहमात्रं शेषः एकैकस्य विनियोगात्।

ननु विनियुक्तस्योपादानशेषत्वं सङ्ख्यादयः प्रतिपद्यन्ते यथा च शेषभावे प्राधान्यं तथा शेषिभावेपि। भवतु प्राधान्यं न कश्चिद्विरोधः सङ्ख्याद्यपरित्यागेन तु यथैव शेषतां प्रतिपद्यते तथैव संस्कार्यतामपीति वदामः। अत्रोच्यते—सत्यं शेषभूतस्यैव संस्कारः तथापि सङ्ख्यादयो न संबध्यन्ते। कुतः? सर्वत्र हि पदार्थान्तरसंबन्धः प्रधानस्यैव राजपुरुषमानयेतिवत्। तत्र हि राजार्थः

वाक्येषु चैकसङ्ख्यायुक्ता एव ग्रहाः शेषत्वेन श्रूयन्ते। अतः कार्ययोगित्वादेकत्वस्य संस्कारार्हत्वादविवक्षितमेकत्वमित्ययुक्तम्। न च ग्रहमात्रं शेषः। अस्यार्थः। न चेदमाशङ्कनीयम् यावन्तो ग्रहाः तावन्तो मिलिता एव कार्यान्तरशेषभूता इति येन सर्वेषु मिलितेष्वेव संस्कारः स्यात। कुतः? एकैकस्य विनियोगात्। ननु च विनियुक्तस्य ग्रहस्योपादानशेषत्वं सङ्ख्यादयः प्रतिपद्यन्ते यथा शेषभावे प्राधान्यं तथा शेषिभावेऽपि। अस्यार्थः—उभयसंमतं तावत् विनियुक्तस्य ग्रहस्योपादानशेषभूताः सङ्ख्यादय इति यथा शेषत्वावस्थायां उपादीयमानावस्था(यां)श्रयणेन ग्रहस्य सङ्ख्यादीन् प्रति प्राधान्यं तथा शेषिभावेपि संस्कारयोगेपि प्राधान्यमिति स्यात्। उपादीयमानतयैव सङ्ख्यादीन् प्रति प्राधान्यं स्यादित्यर्थः। उत्तरं—भवतु प्राधान्यं न कश्चिद्विरोधः सङ्ख्याद्यपरित्यागेन तु यथैव शेषतां प्रतिपद्यते तथा संस्कार्यतामिति वदामः। संस्कारं प्रत्युपादीयमानतया भवतु अन्यथा चेति न कश्चिदस्माकं विरोधः। राद्धान्ती परिहरति—अत्रोच्यते। सत्यं शेषभूतस्यैव संस्कारः तथापि सङ्ख्यादयो न संबध्यन्ते संस्कारेण। कुतः? सर्वत्र हि पदार्थान्तरसंबन्धः प्रधानस्यैव भवति राजपुरुषमानयेतिवत्। तत्र हि राजार्थः

केवलमुपलक्षणतयैव भाति। एवमत्रापि द्रव्यमेव प्रधानं, यदन्यत्त-द्रुपलक्षणं जात्यादि। न च उपलक्षणस्य कार्यसंबन्धः। अत इदमुक्तं अविशिष्टं हि लक्षणमिति। नह्येकत्वदीनां विलक्षणत्वे ग्रहान्तरनिवृत्तौ सामर्थ्यमस्ति संबन्धी हि संबन्ध्यन्तरं निवर्तयति। ननु चोक्तं न संबन्धिमात्रं(ता) संबन्धे हेतुः कस्तर्हि? श्रुत्यादि-प्रतिपाद्यतेति। अत्र चैकत्वविशिष्टः श्रुत्या प्रतिपाद्यते शेषी। कथं च शक्यते वक्तुम् श्रुतिप्रमाणके वस्तुनि एकत्वमविव-क्षितमिति। न चोद्दिश्यमानत्वं विधीयमानत्वं वा श्रुतिं विहन्ति। श्रुतिविघाते हि ग्रहेष्वप्राप्तिः स्यात। अथायमभिप्रायः उद्दिश्य-मानस्य विशेषणमविवक्षितमिति। अस्यैवार्थस्यास्मिन्नधिकरणे हेतुर्वक्तव्यः न चासावस्तीत्युक्तमिति। उच्येत—अयमस्ति हेतुः

केवलमुपलक्षणतयैव भाति। एवमत्रापि द्रव्यमेव प्रधानं यदन्यत्तदुपलक्षणं जात्यादि। न चोपलक्षणस्य कार्यसंबन्धो विधेयसंबन्धः द्रव्योपलक्षणत्वाज्जात्यादीनां संस्कारसंबन्धो नास्तीत्यर्थः। अत इदमुक्तं—अविशिष्टं हि लक्षणमिति। कथमविशिष्टतेत्यत्राह —न ह्येकत्वादीनां विलक्षणत्वे ग्रहान्तरनिवृत्तौ सामर्थ्यमस्ति। कुतो नास्तीत्याह —संबन्धी हि संबन्ध्यन्तरं निवर्तयति यथा आरुण्यं अनारुण्यम्। न चोपलक्षणत्वे—नैकत्वादीनां संस्कार[यं]संबन्धोऽस्ति। अतः कथं निवर्तयेयुः द्वितीयादीन्। ननु चोक्तं न संबन्धिमात्रं यदेवोपलक्षणतया संबन्धि न तदर्थान्तरसंबन्धे हेतुः। कस्तर्हि? उत्तरं—श्रुत्यादिप्रतिपाद्यतेति। अत्र चैकत्वविशिष्टः श्रुत्या प्रतिपाद्यते शेषी। कथं च शक्यते वक्तुं श्रुतिप्रमाणके वस्तुनि एकत्वमविवक्षितमिति। न चोद्दिश्यमानत्वं विधीय-मानत्वं वा श्रुतिं विहन्ति। उद्दिश्यमानत्वं न श्रूयत इति नैवमस्ति। विधीमान-ग्रहणमनास्थापरम्। श्रुतिविघाते हि ग्रहश्रुतेरपि विघातात् ग्रहेऽपि संमार्गस्याप्राप्तिः स्यात्। अथायमभिप्रायः उद्दिश्यमानस्य विशेषणमविवक्षितं भवतीति। अस्यै-वार्थस्यास्मिन्नधिकरणे हेतुर्वर्णनीयः न चासावस्तीत्युक्तम्। उच्यते। अयमस्ति हेतुः

कार्यवदुद्दिश्यमानं प्रधानीभवति। प्रधानस्य विधेयेन संबन्धोऽत्र न प्रधानस्य गुणानां, यस्मात् गुणानां प्रधानोपादाननिमित्तं तदुपादानशेषत्वम्।

के पुनरमी गुणाः ये विभक्त्यभिधेयाः प्रातिपदिकार्थस्य। कथं गुणता विभक्त्यर्थानां ? प्रातिपदिकार्थं प्रत्यवच्छेदकत्वात्। विभक्त्यर्थो हि प्रातिपदिकार्थमवच्छिनत्ति। अवच्छेदकतया च उपादानशेषता। तस्मात् सिद्धं सङ्ख्यादेः द्रव्यं प्रति गुणत्वं विभक्त्यभिधेयस्य। न च गुणानां गुणैः सह संबन्धो विद्यते गुणश्चायं संस्कारो नाम। उक्तं च गुणानां च परार्थत्वात्" इति। अथापि नाम प्रातिपदिकाभिधेय एवायमर्थो जात्यादिः विनियोज्यश्च। तथाप्यनुद्दिश्यमानो नैव प्रधानतां शक्नोति प्रतिपत्तुम्। किमिति ? उद्देशोहि नाम

कार्यवदुद्दिश्यमानं प्रधानीभवति। यत्कार्यवदुद्दिश्यते तत्प्रधानीभवति। प्रधानस्य च विधेयेन संबन्धः। न प्रधानस्य गुणानाम्। कुतः ? यस्माद्गुणानां प्रधानोपादाननिमित्तं उपादानशेषत्वम्। अन्यथा उपादानशेषता न स्यात् विनियोगशेषतैव स्यात्। के पुनरमी गुणाः ? उत्तरं—विभक्त्यभिधेयाः प्रातिपदिकार्थस्य सङ्ख्यादयः। कथं गुणता विभक्त्यर्थानां ? प्रातिपदिकार्थं प्रत्यवच्छेदकत्वात् विभक्त्यर्थो हि प्रातिपदिकार्थमवच्छिनत्ति अवच्छेदकतया च उपादानशेषता। तस्मात्सिद्धं विभक्त्यभिधेयस्य सङ्ख्यादेः प्रातिपदिकार्थं प्रति गुणत्वम्। न च गुणानां गुणैस्सह संबन्धो विद्यते सर्वेषां प्रधानसंबन्धित्वात् गुणश्चायं संस्कारो नाम। उक्तं च 'गुणानां च परार्थत्वात्' इति। तस्मात प्रधानप्रातिपदिकार्थ एव संस्कारेण सङ्ख्यादिभिश्च सम्बध्यते न पुनरेकत्वादेः संस्कारसम्बन्ध इति। एवं तावत् विभक्त्यभिधेयतामाश्रित्य सङ्ख्यादेरुक्तम्। अथापि नाम प्रातिपदिकाभिधेय एवायमर्थो जात्यादिः विनियोज्यश्च तथापि अनुद्दिश्य-

कार्यावच्छिन्नस्य वस्तुनो भवति न पदार्थमात्रावच्छिन्नस्य। अतो जात्यादिभिः द्रव्यमेवोपलक्षयितव्यम्। न हि द्रव्यविशेषादृते कार्यविशेषपर्यवसानं भवति। तस्मादुपलक्षणतयैव तत्र जात्यादेरन्वयः न पुनः कारकतया। ननु चैवं सति उपादेयत्वेपि कार्यविशेषानवगात् जात्यादीनामुपलक्षणतैव। न चैवमिष्यते जातिरेवाङ्गमिति मीमांसकाः। अनभिज्ञो भवान् उपात्तोपादेययोः उपात्तद्रव्यलक्षणं ह्युद्दिश्यमानपदार्थो भवति। विधेयं पुनः कमुपलक्षयति? विहितत्वाद्धि कार्यसिध्यर्थं स्वाश्रयं द्रव्यमाक्षिपति नोपलक्षयति। अत उद्दिश्यमानस्य उपलक्षणत्वात् द्रव्ये संप्रत्ययो भवति

मानो नैव संस्कारं प्रति प्रधानतां प्रतिपत्तुं शक्नोति। किमित्युद्दिश्यमानतैव न स्यादिति। उत्तरं—उद्देशो हि नाम कार्यावच्छिन्नस्य वस्तुनो भवति न पदार्थमात्रावच्छिन्नस्य। यावानर्थः पदेनोच्यते न तावानुद्देश्यो भवति। किं तर्हि? यावत्कार्ययोगि द्रव्यं च कार्ययोगि जात्यादिकार्ययोगिवस्तूपादाने हि जात्यादीनां उपयोगः न कार्य एव अतो जात्यादिभिः द्रव्यमेवोपलक्षणीयम्। किमित्येवमित्याह—न हि द्रव्यविशेषादृते कार्यविशेषपर्यवसानं भवति। न हि द्रव्यादृते क्रियासिद्धिरित्यर्थः। अतः कार्ययोगिद्रव्योपलक्षणतयैव उद्देश्यजात्यादेरन्वयः न पुनः कारकतया कर्मतया संस्कार्यतयेति यावत्। ननु चैवं सति उपादीयमानत्वेपि कार्यविशेषानवगमात् द्रव्यस्य च कार्ययोगित्वात् जात्यादीनामुपलक्षणतैव प्राप्नोति। न चैवमिष्यते जातिरेवाङ्गमिति मीमांसकाः। उत्तरं—अनभिज्ञो भवान् उपात्तोपादेययोः उपात्तद्रव्यलक्षणं हि उद्दिश्यमानपदार्थो भवति [1]उद्देश्यं कार्ययोग्युपात्तद्रव्यं लक्षयति[2]। तेन तत्र द्रव्यसंप्रत्ययः। विधेयं पुनः कमुपलक्षयति। न ह्यसौ कार्ययोगि पदार्थोपस्थापनायोच्यते। कथं तर्हि द्रव्यविशेषानुप्रवेश इत्यत्राह—विहितत्वादेव हि कार्यसिद्ध्यर्थं स्वाश्रयं द्रव्यमाक्षिपति नोपलक्षयति। अतः उद्देशे उद्दिश्यमानस्योपलक्षण(पर)त्वात् द्रव्ये सम्प्रत्ययो भवति।

---

(1) G. उद्देश्ये (2) G. लक्ष्यते

न पुनः स्वसंबन्धिन्यभिधेये। तस्मात् कार्यमात्रमेवापेक्षतेऽवच्छेदकतया न पुनः श्रुत्याऽभिहितमेकत्वादिकम्। (तर्हि) उपात्ततैव तत्र विशेषावगमे हेतुः। यत्पुनरुपादेयं तत् श्रुतित एव विशिष्टमवगन्तव्यम्, नान्यत इति विशेषः। सोऽयमुक्तो हेतुः उद्दिश्यमानस्य विशेषणमविवक्षितमित्यत्रार्थे। उपात्तत्वादित्युक्तो हेतुः। का वार्ता अग्नीनादधीत यूपं च्छिनत्तीति? विवक्षिता सङ्ख्या, अत्र हीदमेवोपादानवाक्यम्। ननु चाग्निपदमुद्देशकम्। प्रधानभूताश्चाग्नयः। सत्यं यथा भवानाह। किन्तु द्विविधो ह्युद्देशः उपात्तस्यानुपात्तस्य च। ग्रहं संमार्ष्टीत्युपात्तोद्देशः अग्नीनादधीतेत्यनुपात्तोद्देशः

द्रव्यमेव हि कार्यान्तरयोगितया प्रतीयते न पुनः स्वसंबन्धिन्यभिधेये संप्रत्ययः। यतः कार्यमात्रावच्छिन्नस्य उद्देशः अतः कार्यमात्रमेवापेक्ष्यते अवच्छेदकतया न श्रुत्याभिहितमेकत्वादिकम्। किमित्येकत्वं नापेक्ष्यते इत्याह—उपात्ततैव तत्र विशेषावगमे हेतुः यत्पुनरुपादेयं तच्छ्रुतित एव विशिष्टमवगन्तव्यम्। नान्यत इति। तेन तत्र युक्ताऽपेक्षा इति विशेषः। सोऽयमुक्तो हेतुः उद्दिश्यमानस्य विशेषणं अविवक्षितं भवतीत्यत्रार्थे न पुनरुद्देश एवाविवक्षित इति ततः उपात्तावगतेः। अतो ग्रहश्रुतिरपि न विवक्षणीयेति यदुक्तं तत्परिहृतम्। विशेषणं पुनरविवक्षितं उपात्तत्वादित्युक्तरूपो हेतुः। एतेनेदमुक्तं भवति उपादानशेषतया सङ्ख्या अन्वयं याति आकाङ्क्षया च। यत्पुनरुपात्तं तत्रोपादानाभावात् दूरत एव तच्छेषता नास्ति। अतो निर्विषयतया सङ्ख्यापेक्षैव नास्तीति। का वार्ता अग्नीनादधीत यूपं छिनत्ति इति। अत्राप्युद्देश्यत्वादग्नीनां यूपस्य च अविवक्षिता सङ्ख्या प्राप्नोति इति मन्यते। उत्तरम्—विवक्षिता सङ्ख्येति। कुतः? अत्र हि इदमेवोपादानवाक्यम्। तेन अन्यतोऽनिर्ज्ञातत्वात् अपेक्षिता सङ्ख्येति। ननु चाग्निपदमुद्देशकं प्रधानभूताश्चाग्नयः न सङ्ख्या, अतः कथं विवक्षेति। उत्तरं—सत्यं यथा भवानाह। किन्तु द्विविधो ह्युद्देशः उपात्तस्य अनुपात्तस्य च ग्रहं संमार्ष्टीत्युपात्तोद्देशः

अनुपात्तश्चोद्दिश्यत इति कथमिदं ? विधेयविषयो ह्युद्देश इत्युच्यते, नोपात्तत्वमनुपात्तत्वं च उद्देश्यत्वे हेतुः। अतः प्रमाणान्तरसिद्ध-विशेषणं उद्दिश्यमानमविवक्षितविशेषणं भवति। यत्पुनरविज्ञात-विशेषणमेवोद्दिष्टं तत विधेयवत श्रुतित एव विशिष्टमवगन्तव्यम्। तस्मात् सुष्ठूच्यते उपात्तोद्देशेऽविवक्षितं विशेषणमिति। ननु च ग्रहं संमार्ष्टीति द्वितीयेयं कारकविभक्तिः कारकं च क्रियार्थं भवतीति शाब्दाः। ननु ईप्सिततमे द्वितीये-यम्। सत्यं, सा तु कारके। ननु च विप्रतिषिद्धं

ऐन्द्रवायवादिवाक्येषु उपात्तान् ग्रहानुद्दिश्य संमार्गो विधीयत इत्युपात्तोद्देशः। कचिदप्याह-वनीयादीनामनुपादानात्। अनुपात्तं चोद्दिश्यत इति कथमिदं ? [1]अनुवादं उद्देशे चैकरूपं मन्वानस्येदं चोद्यम्। उत्तरं—विधेयविषयो ह्युद्देश इत्युच्यते यस्मिन् किञ्चि-द्विधीयते तदुद्दिश्यत इत्यर्थः। नोपात्तत्वं अनुपात्तत्वं चोद्देशहेतुः। अतः प्रमाणान्तर-सिद्धविशेषणमुद्दिश्यमानमविवक्षितविशेषणं भवति। यत्पुनरविज्ञातविशेषणमेवोद्दिष्टं भवति तद्विधेयवत् श्रुतित एव विशिष्टमवगन्तव्यम्। तस्मात् सुष्ठु प्रामाणिकं उच्यते —उपात्तोद्देशे विषये ग्रहं संमार्ष्टीत्यत्र अविवक्षितं विशेषणमिति[2]। ननु च ग्रहं संमार्ष्टीति द्वितीयेयं कारकविभक्तिः कारकं च क्रियार्थं भवतीति शाब्दाः। अत्रा-यमाशयः। द्वितीयेयं कारकविभक्तिः कारकं च क्रियार्थं भवति। यच्च यदर्थं तत्सिद्ध्यर्थं तदुपादेयं भवति। यच्चोपादेयं तत्रावच्छेदकाकाङ्क्षा अस्ति। ननु निर्ज्ञातावच्छेदकं नावच्छेदकान्तरमपेक्षते सत्यं, यदि संमार्गं प्रत्युपादानेऽवच्छेदको निर्ज्ञातः स्यात्। न ह्यत्रावच्छेदकता निर्ज्ञाता इति उपादानशेषता सङ्ख्याया इति। राद्धान्तमाह—ननु चेप्सिततमे द्वितीया न चेप्सिततमं क्रियार्थं किन्तु क्रियैव तदर्था तेनेप्सिततमस्य क्रियां प्रत्यनुपादानान्नोपादानशेषतेति। पूर्वपक्षी त्वाह—सत्यं सा तु कारके द्वितीयाविभक्तिः तेन कारकत्वादस्ति क्रियां प्रत्युपादानम्। स एवैकग्रन्थेनाह—ननु च विप्रतिषिद्धमिदं

---

(1) G. अनुपादनं (2) G. अविशिष्टं हि लक्षणमिति

ईप्सिततमं कारकं चेति ? कथं विप्रतिषिद्धं ? किमिदं ईप्सिततमं नाम ? यदि तावत् यतः क्रियासिद्धिः तदीप्सिततमं एवं तर्हि कारकमात्रे प्रसङ्गः ततश्च विशेषाभिधानमनर्थकमिदं कर्म इदं करणमिति । अथ यत्क्रियया आप्यते उत्पाद्यते संस्क्रियते वा तत्कर्मेत्युच्यते । न तर्हि कारकं क्रियापर्यवसानापेक्षो ह्याप्त्यादिको गुणः । पर्यवसिते हि व्यापारे फलं निष्पद्यते न पुनः फल[स्य]साध्यैव क्रिया भवति । अतः ईप्सितं कारकं चेति विप्रतिषिद्धम् । अत्राभिधीयते—न विप्रतिषिद्धम् । आप्त्यादिको गुणः कारकस्थश्चाकारकस्थश्च यदा कारकस्थः

ईप्सिततमं कारकं चेति । अतः कारकत्वमेव परमार्थतोऽर्थः । आर्थं तु कारकस्यापि[1] क्रियाफलयोगित्वम् । राद्धान्ती पृच्छति—कथं विप्रतिषिद्धम ? पूर्वपक्षी विकल्प्य दूषयति—किमिदमीप्सिततमं नाम ? यदि तावत् यतः क्रियासिद्धिः [2]तत्क्रियार्थं ईप्सिततममिति । एवं तर्हि कारकमात्रे कर्मत्वप्रसङ्गः ततश्च विशेषाभिधानमनर्थकं इदं कर्म इदं करणमिति सर्वकारकाणां कर्मत्वापत्तेः । अथ यत्क्रियया आप्यते यथा अध्ययनेन वेदः, उत्पाद्यते यथा पाकेनौदनं, संस्क्रियते, यथा प्रोक्षणेन व्रीहयः, विक्रियते यथा विलयनेनाज्यं, न विलयनेनाज्यमुत्पाद्यते किं तर्हि पार्थिवमाज्यद्रव्यं गन्धवत्वात् घनस्वभावमेवाग्निसंयोगेन द्रवीभवति इत्यष्टमे वक्ष्यामः । तत्कर्मेत्युच्यते । एवं वदतोऽस्य चतुर्विधं कर्माभिप्रेतं संस्कार्यविकार्ययोर्भिन्नत्वात् । दूषयति—न तर्हि कारकं [3]आप्त्याद्यवस्थयेप्सिततमः सन् अकारकमित्यर्थः । कुतः ? क्रियापर्यवसानापेक्षो ह्याप्त्यादिको गुणः क्रियायां निष्पन्नायां पश्चात् क्रियाफलं निष्पाद्यते । हेतोर्हि फलमुत्पद्यते । हेतुफलयोः पौर्वापर्यनियमः । पर्यवसिते हि निष्पन्ने व्यापारे फलमुत्पद्यते न फलस्य साध्यैव क्रिया । अतो न कारकता । राद्धान्ती समाधत्ते—अत्राभिधीयते—नेदं विप्रतिषिद्धं आप्त्यादिको गुणः कारकस्थश्चाकारकस्थश्च । यदा कारकस्थः

---

(1) G. अथापि त्वस्यास्ति　(2) R. क्रियासिद्ध्यर्थं　(3) G. आप्त्याद्यवस्थायस्मिन्नंशे तत्कारकमित्यर्थः

तदा कारकमेव फलम्। किमिदं कारकमेव फलमिति ?। यदा हि कारकमेव कयाचिद्विकारापत्त्या व्याप्यमुत्पाद्यं संस्कार्यं विकार्यं चेष्टं तदा तदेव फलमित्युच्यते तामेवावस्थामङ्गीकृत्य ईप्सिततमव्यपदेशं लभत इति। क्रियासिद्ध्यर्थं फलसिद्ध्यर्थं वा। अतः कारकमीप्सिततममिति न विरुद्धम्। विद्यते हि कारकं न फलसमवायि यथा करणादि। विद्यते च फलं न कारकसमवायि यथा स्वर्गादि। ननु स्वर्गाद्यपि कारकसमवाय्येव कर्तृगामि क्रियाफलमिति वचनात्। न कारकतया फलसमवायो विद्यत इति। अधिकारलक्षणव्यापारोऽयं अधिकारलक्षणे उक्तः। कथं तर्हि भगवतः पाणिनेः सूत्रं कर्त्रभिप्राये क्रियाफले

तदा कारकमेव फलम् तदाऽऽप्त्यादिको गुणो द्विधा अन्यथैकरूप्यमेव स्यात्। पूर्वपक्षी पृच्छति—किमिदं कारकमेव फलमिति ? उत्तरं—यदा हि कारकमेव कयाचिद्विकारापत्त्या व्याप्यं उत्पाद्यं संस्कार्यं विकार्यं चेष्टं तदा तदेव फलमित्युच्यते। तामेवावस्थामङ्गीकृत्य ईप्सिततमव्यपदेशं लभते। क्रियासिद्ध्यर्थं फलसिद्ध्यर्थं वा। यत्कारकं तत् क्रियासिद्ध्यर्थं फलसिद्ध्यर्थं च। तदेव कयाचिद्विकारापत्त्या ईप्सिततमव्यपदेशं लभते। अतः कारकमीप्सिततममित्यविरुद्धम्। कथमविरुद्धं ? विद्यते हि कारकं न फलसमवायि यथा करणादि। विद्यते च फलं न कारकसमवायि यथा स्वर्गादि। तेन यत्कारकं फलसमवायि तत्कर्म यथा स्यादित्युक्तं ईप्सिततमं कारकमिति। एतेन विशेषाभिधानार्थमनर्थकमिति यदुक्तं तत्परिहृतम्। ननु स्वर्गाद्यपि कारकसमवाय्येव कर्तृगामि क्रियाफलमिति। शास्त्रफलं प्रयोक्तरीत्यत्र वचनात् अभिधानात्। उत्तरं—न कारकतया फलसमवायो विद्यत इत्यधिकारलक्षणव्यापारोऽयं अधिकारलक्षणे उक्तः। [1]कथं तर्हि भगवतः पाणिनेः सूत्रं "कर्त्रभिप्राये क्रियाफले"

(1) G. ण इत्युक्तम्

इति ? अस्यापि तत्रैवार्थो निरूप्यते । अतो ग्रहं संमार्ष्टीति यद्यपि ग्रहः संमार्गं निष्पादयति तथापि न तस्यांशस्य वाचिका विभक्तिः ईप्सिततमत्वमाचष्टे फलांशमित्यर्थः क्रियानिष्पाद्यमिति यावत् । तस्मात् श्रुतितो विशेषावगम इति सिद्धम् । अतः उपात्तविषयः संस्कार इति स्थितम् । ननु च व्यभिचार्येतद्दर्शनम् । अनीप्सिततमेऽपि द्वितीया भवत्येव । ततः किम् ? इदं ततो भवति कारकांशाभिधायिनी न फलांशाभिधायिनी । एवं ग्रहमित्यपि कारकमेवाचष्टे । ततश्चैकत्वमविवक्षितमिमि न शक्यते वक्तुम् । कथं तर्हि ग्रहार्थः संमार्गः प्रमाणाभावात् । प्रयोजनवत्वात् यथा पशुपुरोडाशोऽग्नीषोमदेवतार्थः । अत्राभिधीयते–कर्मेप्सिततमत्वं तावत् द्वितीयाऽभिधत्ते । तथा युक्तं चानीप्सितमिति तु ।क्रियानिर्वाह्यमेवेत्यर्थः ।

इति । अस्यापि तत्रैवार्थो निरूप्यते । प्रकृतमुपसंहरन्नाह—अतो ग्रहं संमार्ष्टीति यद्यपि संमार्गं ग्रहो निष्पादयत्येव तथापि न तस्यांशस्य वाचिका द्वितीयाविभक्तिः ईप्सिततमत्वमाचष्टे फलांशमित्यर्थः । क्रियानिष्पाद्यमिति यावत् । अनेनेदमुक्तं यस्मिन्नंशे एकत्वं श्रुतं न तस्याङ्गस्य उपादेयता । यस्य चोपादेयता न तत्र विभक्तिरिति । तस्माच्छ्रुतितो विशेषावगम इति सिद्धम् । अतः उपात्तविषयः संस्कार इति स्थितम् । ननु च व्यभिचार्येतद्दर्शनं ईप्सिततमे द्वितीयेति । अनीप्सिततमेपि द्वितीया भवत्येव उपाध्यायाय गां ददातीति । ततः किं ? इदं ततो भवति । अन्वयव्यतिरेकाभ्यां कारकांशाभिधायिनी न फलांशाभिधायिनी । एवं ग्रहमित्येतदपि कारकमेवाचष्टे । ततश्चैकत्वमविवक्षितमिति न शक्यते वक्तुं उपादेयदशायामेव श्रुतत्वात् । यदि कारकाभिधायिनी द्वितीया कथं तर्हि ग्रहार्थः संमार्गः प्रमाणाभावात् तादर्थ्यमयुक्तमित्यर्थः । उत्तरं—प्रयोजनवत्त्वात् ग्रहाणां संमार्गस्य तादर्थ्यं, यथा पशुपुरोडाशोऽग्नीषोमदेवतार्थः अत्राभिधीयते । ईप्सिततमत्वं तावत् द्वितीयाऽभिधत्ते । तथा युक्तं चानीप्सितमिति तु क्रियानिर्वाह्यमेवेत्यर्थः । अस्यार्थः—द्वितीया तावत् फलांशमभिधत्ते । तथा युक्तं

इयान् विशेषः क्रियान्तरसंबन्धितया एकस्योपादानं एकस्य नेति। एवं तर्हि गां ददातीत्यविवक्षितत्वं सङ्ख्यायाः । भवत्विति चेन्न ; प्रयोजनान्तरकल्पनाप्रसङ्गात् । किमिति कल्पना नेष्यते ? प्रमाणाभावात् । ननु च द्वितीयैव प्रमाणं ; सत्यं, कार्यापेक्षायां विशेषं समर्पयति न पुनः कार्यान्तरमवगमयितुं क्षमा, विनियोगपर्यवसायिन्यो हि विभक्तयः न कार्यपर्यवसायिन्यः नवाऽधिकारशून्यो नियोगोऽस्तीति 'फलवत्सन्निधौ' इत्यत्र वक्ष्यामः ।

मित्यत्रापि तथायोगाभिधानात् क्रियाजन्यफलांशाभिधायित्वमेव इति **इयान् विशेषः क्रियान्तरसंबन्धितयैवैकस्योपादानं** अभिधानं यथा 'व्रीहीन् अवहन्ति' इति नियोगसंबन्धितया व्रीहय उपादीयन्ते तत्रैवेप्सिततमता । **एकस्य नेति** यथा गां ददातीति न गोः क्रियान्तरसंबन्धितयोपादानम् । तच्चानीप्सितं क्रियाजन्यफलयोगि । तथाऽनीप्सिततममपीति क्रियाजन्यफलयोगित्वे नास्ति विशेषः । द्वितीयापि तावन्मात्रमेवाभिधत्ते कार्यतः तदीप्सिततमत्वं व्रीहीणामिति मन्तव्यम् । एवमुभयत्रापि मुख्यार्थैव द्वितीया भवति तेन न कारकांशाभिधायिनी द्वितीयेत्युक्तं भवति । यदि तथा युक्तमित्यत्रापि न द्वितीया कारकांशाभिधायिनी **एवं तर्हि गां ददातीत्यविवक्षा सङ्ख्यायाः** । पूर्वपक्ष्येवाशङ्कामुत्पाद्य निरस्यति—**भवत्विति चेन्न, प्रयोजनान्तरकल्पनाप्रसङ्गात्** । यावद्धि प्रयोजनान्तरं गोर्न कल्प्यते तावदविवक्षिता सङ्ख्येति न शक्यते वक्तुम् अनिर्ज्ञातसङ्ख्यात्वेनावच्छेदकाकाङ्क्षित्वात् । राद्धान्तैकदेश्याह— **किमिति प्रयोजनान्तरं नेष्यते** । उत्तरं—**प्रमाणाभावात्** न कार्यकल्पनायां प्रमाणमस्ति । **ननु च द्वितीयैव** कार्यकल्पनायां **प्रमाणम्—सत्यम्** द्वितीया प्रमाणम् सा तु **कार्याकाङ्क्षायां विशेषं समर्पयति** न पुनर्द्वितीयान्तपदवाच्यस्यार्थस्य **कार्यमेवावगमयितुं क्षमा** सक्त्वादिवत् । कस्मात्पुनर्न क्षमेत्याह— **विनियोगपर्यवसायिन्यः** परस्परसंबन्धमात्रोपक्षीणशक्तयो विभक्तयः न कार्यपर्यवसायिन्यः । ननु च किं प्रयोजनान्तरकल्पनया, अत्रैव वाक्ये नियोगः साध्यो भवतु इत्यत्राह—**नवाऽधिकारशून्यो नियोगोऽस्तीति फलवत्सन्निधावित्यत्र वक्ष्यामः** । अत्र च गोः साध्यत्वदर्शनात् नाधिकारोऽप्यपरः साध्यः शक्यतेऽङ्गी-

संस्कारविधयस्तूक्ताः तेषामर्थेन इत्यत्र। उक्तोत्तरमपि किमिति भवता परिचोदितं ? (भाविकार्य)विस्मरणापराधादिति मन्यामहे तदिदं स्मार्यते अनुपातविषयमिदं प्राधान्यमिति यूपवत् सिद्धं विवक्षितत्वं सङ्ख्यायाः। अमुना च विशेषेण सूत्रान्तरप्रणयनं भगवतः पाणिनेः अकथितमिति। तत्रापि तथायुक्तमित्यनुवर्तते तस्मात् द्वितीयाप्राधान्यं न व्यभिचरतीति स्थितम्। उपात्ते तु विषये विशेषणमविवक्षितमिति सिद्धम्। [1]ग्रहादिष्वेकत्वं ब्रूयात् न द्वितीयादीन् प्रतिषेधेत्" इति। उपात्तविषयत्वात् तु ग्रहश्रुतेः उपादेये ह्येकत्वादयो विशेषणम्। इह पुनः उपात्तैव विशेषावगतौ हेतुरित्युक्तम्।

कर्तुम्। न चाधिकारं विना नियोगोऽस्ति। तस्मादियमपि कल्पनैव नास्ति। यदि यत्र साध्यान्तरमस्ति तत्राधिकारो नास्ति कथं तर्हि संस्कारविधीनामधिकारसंस्पर्शः इत्याह—**संस्कारविधयस्तूक्ताः 'तेषामर्थेन' इत्यत्र।** यथा सत्यपि तेषां कार्यान्तरे अधिकारानुप्रवेशः तथा तेषामर्थेनेत्यत्रोक्तम्। राद्धान्ती परिहरति—**उक्तोत्तरमपि किमिति भवता परिचोदितम् विस्मरणापराधादिति मन्यामहे। तदिदं स्मार्यते अनुपात्तविषयमिदं प्राधान्यमिति यूपवत् स्थितं विवक्षितत्वं सङ्ख्यायाः। अमुना च विशेषेण** कार्यान्तरसंबन्धासंबन्धनिबन्धनेन ईप्सिततमत्वानीप्सिततमत्वलक्षणेन **सूत्रान्तरप्रणयनं भगवतः पाणिनेः 'अकथितं' इति। अत्रापि तथा युक्तमित्यनुवर्तते। तस्मात् द्वितीया प्राधान्यं** क्रियाजन्यफलभागितां **न व्यभिचरतीति स्थितम्। उपात्ते तु विषये** प्रमाणान्तरेण **विशेषणमविवक्षितमिति सिद्धम्।** "ग्रहादिष्वेकत्वं ब्रूयात् न द्वितीयादीन् प्रतिषेधेत्" इति भाष्यम्। तदनुपपन्नम्। यथा पशुगतमेकत्वं विदधत् एकवचनं द्वितीयादीनर्थान् निवर्तयति तथेहापि किं न स्यादित्यत आह—**उपात्तविषयत्वात्तु ग्रहश्रुतेः उपादेयेहि एकत्वादयो विशेषणमिति। इह पुनः उपात्तैव विशेषावगतौ हेतुरित्युक्तं** इति। व्याख्यातार्थम्।

---

(1) P. 706-3

ननु च 'परिसङ्ख्य' इति कोऽभिप्रायः? अयमभिप्रायः—एकत्वमनन्वितं स्यात् नानन्वितानामभिधानमस्तीत्युक्तं तद्भूताधिकरणे। नैतदस्ति सत्यमनन्विताभिधानमेकवचनस्य प्राप्नोति न पुनः परिसङ्ख्या संभवति अप्राप्तत्वात्। ग्रहसंमार्गादेः संबन्धस्य प्राप्तौ सत्यामन्यनिवृत्तौ नियोगः प्रभवति। अप्राप्ते पुनः यथा श्वेति श्रुतिः न काकादीन् निवर्तयितुं क्षमा। न चानन्विताभिधानम् तस्यापि प्राप्त्यवगमात्। ननु च युक्तं श्वादिषु। एकत्वं पुनः बहुषूपादीयमानेषु पक्षेपि न प्राप्नोति। अतोऽनन्विताभिधानं दुष्परिहरमिति। परिहृतमिदं भाष्यकारेण न विभक्तेर्वचनमेवैकं प्रयोजनमिति। कथं पुनरनेन परिहृतमिदं भवति? इत्थमनेन परिहृतं भवति–सङ्ख्याया अनन्वयेऽपि कर्ममात्रे प्रयोगदर्शनात् यथा ब्राह्मणो न हन्तव्य इति। अत्रापि साध्यमिति चेत्,

---

ननु "परिसङ्ख्य" इति कोऽभिप्रायः। त्रिदोषदुष्टा परिसङ्ख्येति मन्यते। अयमभिप्रायः—एकत्वमनन्वितं स्यात्। न चानन्विताभिधानमस्तीत्युक्तं तद्भूताधिकरणे। अतो वरं परिसङ्ख्येति मन्यते। नैतदस्ति। सत्यमनन्विताभिधानमेकत्वस्य प्राप्नोति। न पुनः परिसङ्ख्या संभवति अप्राप्तत्वात्। ग्रहसंमार्गसंबन्धस्य प्राप्तौ सत्यामन्यनिवृत्तौ नियोगः [1]प्रभवति न रागप्राप्ते भक्षण एव "पञ्च पञ्चनखा भक्ष्या" इतिवत्। अप्राप्ते पुनः यथा श्वेति श्रुतिः न काकादीन् निवर्तयितुं क्षमा। न चानन्विताभिधानं, तस्यापि शुनो भक्षणे प्राप्त्यवगमात् तथेहापि न द्वितीयादीनां परिसङ्ख्येति प्रकृतेन संबन्धः। ननु च युक्तं श्वादिषु अनन्वितत्वात् शुनः, एकत्वं [2]पुनः बहुषूपादीयमानेषु पक्षेऽपि न प्राप्नोति सङ्ख्यायां सङ्ख्यान्तरं निवर्त्यैव व्यवस्थानात्। अतोऽनन्विताभिधानं दुष्परिहरम्। परिहृतमिदं भाष्यकारेण—"न विभक्तेर्वचनमेवैकं प्रयोजनं[3] इति वदता। कथं पुनरनेनेदं परिहृतं भवति सङ्ख्याया अनन्वयेऽपि। इत्थं परिहृतं भवति। सङ्ख्याया अनन्वयेपि कर्ममात्रेपि प्रयोगदर्शनात् यथा ब्राह्मणो न हन्तव्य इति। अत्रापि साध्यमिति चेत्

(1) G. संभवति (2) G. येन (3) P. 723

न नञर्थे वधेन संबध्यमाने एकत्वमन्वेतुं क्षमम्। अन्यतः प्रवृत्त्यवगमात। तस्मादेकत्वाभिधानं कर्ममात्रे साध्विति द्रष्टव्यम्।

[1]अयं चापरो दोषः इति। **एकत्वान्विताभिधाने आश्रीयमाणे ग्रहत्वं नोपात्तविषयं स्यात् अनुपात्तविषयत्वे च ग्रहत्वस्यानन्वयः प्राप्नोति। अनन्वीयमाने च संसर्गविधानं निर्विषयत्वादनर्थकम्।**

न, अस्माकमत्रापि सङ्ख्या(न)न्वयोऽभिप्रेत इति चेत, न **नञर्थे वधेन संबध्यमाने एकत्वमन्वेतुं क्षमं, अन्यतः प्रवृत्त्यवगमात्।** अस्यार्थः—वधो हि नञर्थेन संबध्यमानः प्रतिषिध्यमानः अन्यतः प्रवृत्तोऽङ्गीकरणीयः। ततश्चानुपादेयत्वान्न तत्रोपादानशेषता सङ्ख्याया इत्यविवक्षैव। तस्मादेकत्वाभिधानं धर्ममात्रे साधु इति द्रष्टव्यम्। अत्र भाष्यम् "अयं चापरो दोषः" इति। तस्य चायमर्थः—एकत्वग्रहसंबन्धविधानेपि सम्मार्गविषये ग्रहस्यैकत्वं न नियन्तुं शक्यते विषयत्वेन संमार्गस्याविशेषात्। इति। स चायमनुपपन्न इव प्रतिभाति। यस्मादेकत्वश्रवणाद्यथा तस्य कर्मान्वयिता न संभवति तथा वर्णयितुं न्याय्यम्। तेन ग्रहशब्दोऽनुपात्तोद्देश्यक एव भवत्विति। सम्मार्गविषय एव ग्रहस्यैकत्वनियमः सिध्यतीतीमामनुपपत्तिमपनेतुं टीकाकार आह—**अयमपरो दोष इति** प्रतीकेन भाष्यमनुभाषितम्। अनुपपत्तिं परिहरति—**एकत्वान्विताभिधाने आश्रीयमाणे ग्रहत्वं नोपात्तविषयं स्यात्** उपात्तग्रहोपलक्षणार्थं न स्यात् **अनुपात्तविषयत्वे च ग्रहस्य** सम्मार्गेण सह **अनन्वयः प्राप्नोति।** कार्यान्तरानुप्रवेशिनः संस्कारानर्हत्वात्। **अनन्वीयमाने च सम्मार्गविधानं निर्विषयत्वात्** शेषिशून्यत्वाद**नर्थकं स्यात्।** अतो नानेन दोषेणायं[2] अनुपात्तोद्देशः उपात्तोद्देश एवेति स्थितो भाष्योक्तो दोष इति।

"अथैकत्वसम्मार्गसंबन्धो विधीयेत[3]" इत्यादिभाष्यं तदनुपपन्नं, संबन्धे हि विधीयमाने अवश्यं गुणप्रधानभावोऽभ्युपगमनीयः। तत्र यस्यैकत्वं प्रधानं तदेकत्वमुद्दिश्य सम्मार्गो

---

(1) P. 715 (2) G. दूषणायायं (3) P. 715

"अथैकत्वसंमार्गसंबन्धो विधीयेत" तत्रापि द्वयी गतिः स्यात् अनेन गुणफलसंबन्धवद्विधानं न संभवतीति दर्शयति। अन्यत्र स्यादिति कथं? एकत्वं तावन्नोपात्तस्योपलक्षणाय अलं भवति। सम्मार्गेण हि संबध्यमानं प्रधानं वा भवति गुणो वा नान्यः संबन्धोऽस्ति। कथं नास्ति? प्रातिपदिकाश्रितं हि सङ्ख्याभिधानं विभक्तीनामित्युक्तम्। कस्मान्न विषयतया उद्देश्यतया विधेयतया वा संबन्धः संभवति परतन्त्रत्वात्।

विधीयेत। ततश्च ग्रहशब्दोऽनन्वितः स्यात्। अथ ग्रहस्य चैकत्वस्य च उद्देश्यद्वयस्य श्रवणात् प्रत्युद्देश्यं वाक्यसमाप्तेः एकेन ग्रहसम्मार्गसंबन्धं विधाय अपरेणैकत्वसंमार्गसम्बन्धो विधीयेतेत्युच्येत। तन्न। अप्राप्ते ग्रहसम्मार्गसंबन्धे कथमेकत्वसम्मार्गसंबन्धो विधीयेत। सम्मार्गस्य चाप्रधानत्वात् एकत्वस्य प्रधानत्वात्। न हि प्रधानं गुणं प्रति विधीयते। अथ सम्मार्ग एव प्रधानभूतः तत्राप्युद्देश्यभेदेन वाक्यभेदमाश्रित्य ग्रहे सम्मार्गः सम्मार्गे ह्येकत्वं विधीयते। तदनुपपन्नम्। एकत्वस्यामूर्ततया सम्मार्गं प्रति साधनत्वानुपपत्तेः [1]गुणत्वाभावादितीमां शङ्कामनुवदन् व्याख्यानमाह—**अथैकत्वसंमार्गसम्बन्धो विधीयेत तत्रापि द्वयी गतिः स्यादित्यनेन गुणफलसंबन्धवद्विधानं न संभवति** नाप्यरुणावदिति **दर्शयति** एतदुक्तं भवति—यथा गुणफलसंबन्धे प्रधानभूतो वैतानाग्निः गुणभूताधानसंबद्धो विधीयते तथेहाप्येकत्वं[त्ववद्]ग्रहे सम्मार्गसंबन्धो विधीयेतेति या शङ्का सापि न भवति यथा चामूर्तस्याप्यारुण्यस्य क्रयसाधनता तथैकत्वस्यापि सम्मार्गसाधनतया शङ्का या सापि न संभवतीति। कथमसंभवः? **एकत्वं तावत् नोपात्तस्योपलक्षणायालम्।** एकत्वं तावत् स्ववाक्ये उपात्तस्य संमार्गस्य उपलक्षणाय विशेषणाय अलं न भवति। **सम्मार्गेण हि संबध्यमानं प्रधानं वा भवति गुणो वा नान्यः संबन्धोऽस्ति। कथं नास्ति? प्रातिपदिकाश्रितं हि सङ्ख्याभिधानं विभक्तीनामित्युक्तम्। कस्मान्न विषयतया** उद्देश्यतया **विधेयतया वा** सम्मार्गसंबन्ध एकत्वस्य संभवति? **परतन्त्रत्वात्।**

---

(1) गुणत्वाभावाभावात्

अभ्युपगम्याप्यरुणावन्न संभवतीत्युक्तं ग्रहस्य प्रधानत्वात्। ननु च प्रधानेपि संभवत्येव विशेषणं निमित्तभूतं कारकत्वमाश्रित्य। केन चोक्तं न संभवतीति? इह पुनर्विधानासंभवः प्रदर्शितः प्रधानत्वाद्ग्रहस्य। अथोच्येत ग्रहादि लक्षयित्वा तस्यैकत्वसंबन्धो विधीयते न संमार्गसंबन्ध इति। कोऽभिप्रायः? अयमभिप्रायः—कः पुनः पक्षपातः संमार्गोऽन्वयी न पुनरेकत्वमिति। उत्तरं—क्रियाशून्योऽप्यन्वयो न सङ्ख्यादेः संभवति। असति तु विधेये संभवत्यपि न च श्रुत्यान्वयः एकत्वस्यास्तीत्युक्तम्।

प्रातिपदिकाश्रितत्वात् संमार्गेण सह संबन्धाभावात्। किमिति तर्हि भाष्यकारेण ग्रहस्य प्रधानतया सम्मार्गं प्रत्यनुपादानात् उपादानोपयोगितया अरुणावदेकत्वस्य सम्मार्गे गुणभावो न संभवतीत्युक्तम्। अत्राह—**अभ्युपगम्याप्यरुणावन्न सम्भवतीत्युक्तम् ग्रहस्य प्रधानत्वात्। ननु च प्रधानेपि सम्भवत्येव विशेषणं निमित्तभूतं कारकत्वमाश्रित्येति।** अस्य अयमर्थः प्राधान्यमपि ग्रहादेः कारकत्वनिमित्तकमेव। कारकभूता एव ग्रहाः प्रधानभूता भवन्ति। तेन तामवस्थामाश्रित्यैकत्वं ग्रहादेः विशेषणं भवति अरुणावदिति। **केन चोक्तं न संभवति** विशेषणमिति। **इह पुनः विधानासंभव एव प्रदर्शितः प्रधानत्वात् ग्रहस्य।** अस्यार्थः—यदि ग्रहः सम्मार्गं प्रति विधीयेत तदा अस्योपादेयत्वात् विशेषणं स्यात। इह तु ग्रहो न विधीयते प्रधानत्वादिति। अनेन 'प्रधानभूत'मित्यादिग्रन्थेन [1]"ननु प्रधानभूत"मित्यादिभाष्यं "भिद्येत वाक्यं" इत्येवमन्तं व्याख्यातम्। **अथोच्येत ग्रहादि लक्षयित्वा तस्यैकत्वसंबन्धो विधीयते न सम्मार्गसंबन्ध इति—अयमभिप्रायः कः पक्षपातः सम्मार्गोऽन्वयी न पुनरेकत्वमिति।** उत्तरं—**क्रियाशून्योऽप्यन्वयः न सङ्ख्यादेः सम्भवति असति तु** विधेये संभवत्यपि। अस्यार्थः—सम्मार्गे विधेये संभवति सङ्ख्यादेः क्रियाशून्योऽन्वयो न संभवति। असति तु विधेये संभवत्यपि। **न च श्रुत्या** ग्रहगत**स्यैकत्वस्यान्वयोऽस्ति** क्रिययेत्युक्तम्। उत्तरभाष्यमप्येवं व्याख्येयम्। तथा सम्मार्गादीनामध्ययनं प्रमाद इत्यभ्युपगतं स्यात् इति यावद्धि सम्मार्गादीनामध्ययनं प्रमाद इति

---

(1) P. 716

यद्यविवक्षितमेकत्वमिति[1] लक्षणविरोधं दर्शयति। बहुषु बहुवचनमिति शाब्दाः। न वयमेतद्विचारयाम[2]ः इति प्रमाणतः स्थिते लक्ष्ये किं लक्षणं करिष्यतीत्यभिप्रायः। न चात्र लक्षणविरोधः न विभक्तेर्वचनमेवैकं प्रयोजनमिति व्याख्यातम्। अपि च ग्रहः प्रातिपदिकार्थः एकत्वं विभक्त्यर्थः। किमतो यद्येवम्? एतदतो भवति प्रातिपदिकार्थगतं हि विभक्तिः स्वमर्थं श्रुत्यैव वदतीति विभक्त्यभिहितस्य पारतन्त्र्यं दर्शयति। तच्च व्याख्यातम्। अथ यदुक्तं पशुमालभेतेति उपादेयानां श्रुतितो विशेष इत्युक्तम्।

[3]संस्काराद्वा गुणानामव्यवस्था स्यात् ॥ ३-१. १६ ॥ अ. ८.

यदि कार्यत उपादानं उपात्तस्य च लक्षणं

नोच्यते तावद्विधेये सम्मार्गादौ संभवति नैकत्वग्रहसंबन्धविधिमात्रपरता वाक्यस्येति। "यद्यविवक्षितमेकत्वं[3]" इति भाष्येण लक्षणविरोधं दर्शयति। बहुषु बहुवचनमिति शाब्दाः न वयमेतद्विचारयाम इति प्रमाणतः स्थिते लक्ष्ये लक्षणं किं करिष्यतीत्यभिप्रायः। न चात्र लक्षणविरोधः न विभक्तेर्वचनमेवैकं प्रयोजनम्। एतच्च प्रागेव व्याख्यातम्। अपि च ग्रहः प्रातिपदिकार्थः एकत्वं विभक्त्यर्थः। किमतो यद्येवं? एतदतो भवति प्रातिपदिकार्थगतं हि विभक्तिः स्वार्थं श्रुत्यैवाभिवदति। इति। अनेन भाष्येण विभक्त्यभिधेयस्यैकत्वस्य पारतन्त्र्यं प्रातिपदिकार्थपरतन्त्रत्वं [4]दर्शयति। तच्च व्याख्यातम्। अथ यदुक्तं पशुमालभेतेति यथैकत्वं विवक्षितं तद्वदिहापीति तत्र कः परिहारः? उपादेयानां श्रुतितो विशेषः इत्युक्तो विशेषः।

संस्काराद्वागुणानाम्।

यदि कार्यतः उपादानं उपात्तस्य लक्षणं शेषितयेति ततो ग्रहश्रुतिरपि सोमधारणपात्रमात्रलक्षणैव एककार्यत्वात्। अनेनावान्तरसङ्गतिं पूर्वपक्षं चाह— यदि कार्यतः उपादानं यस्य कार्यमस्ति तस्योपादानं उद्देशकेन शब्देन उपात्तस्य च लक्षणं उपलक्षणं

---

(1) P. 723 (2) P. 724 (3) P. 723 (4) G. adds न

शेषितयैवेति ततो ग्रहश्रुतिरपि हि सोमरसाधारे पात्रे लक्षणैव। एककार्यत्वात्। संमार्गस्य च सोमरसावसेकनिर्हरणमेव प्रयोजनमित्युपपन्नं चमसानामपि संमार्जनम्। दर्शितं चैतद्भाष्यकारेण। सामर्थ्यतश्च कार्यसिद्धौ केवलसम्मार्गविधानलाभः प्रकरणे मन्त्रोपदेशवत्। उक्तं चैतद्भाष्यकारेण।

[1]व्यवस्था वाऽर्थस्य श्रुतिसंयोगात् तस्य शब्दप्रमाणत्वात् ॥ ३-१.१७ ॥

अत्राभिधीयते—श्रुतितः उपात्तपरिज्ञानं नोपादानात् श्रुतिः। श्रुतिश्च ग्रहं संमार्ष्टीति। ननु च सोमावसिक्तपरिमार्जनं तुल्यं कार्यमित्युक्तम्। सत्यमुक्तम्।

शेषितयेति। ततो ग्रहश्रुतिरपि ग्रहप्रातिपदिकमपि सोमधारणपात्रमात्रलक्षणार्थमेव ग्रहाणां चमसानां चोपात्तत्वात्। सोमयागशेषभूतसोमधारणैककार्यत्वात् सम्मार्गस्य च सोमावसेकनिर्हरणमेव प्रयोजनम्। तच्च प्रयोजनं ग्रहेषु[चमसेषु] चाविशिष्टं इत्युपपन्नं चमसानामपि सम्मार्जनम्। दर्शितं चैतद्भाष्यकारेण "यस्मिन् गृह्यमाणे सोमो व्यवसिच्येत" इत्यनेन। अनेन सामर्थ्यतश्च कार्यसिद्धौ केवलसम्मार्गविधानलाभः प्रकरणे मन्त्रोपदेशवत्। अस्यार्थः—अविवक्षितग्रहसंबन्धं सम्मार्गमात्रमेव विधीयतां तथा च विधिलाघवं भवतीति। कथं तर्हि शिष्टद्वारसंबन्धः सामर्थ्यात्। सम्मार्गः तावत् सोमावसेकनिर्हरणं शक्नोति कर्तुमिति लिङ्गेन तस्य तत्रैव विनियोगः यथा प्रकरणे मन्त्रस्योपदिष्टस्य लिङ्गेन विनियोगः तथेहापि। उक्तं चैतद्भाष्यकारेण—'सम्मार्गे पुरुषप्रयत्नं' इत्येवमादिना भाष्येण।

व्यवस्थावाऽर्थस्य

अत्राभिधीयते—श्रुतितः उपात्तपरिज्ञानं नोपादानाच्छ्रुतिः। ग्रहाश्च चमसाश्च कार्यतः उपात्ताः इत्येतावता कारणेन न ग्रहश्रुतिः सर्वपात्रपरतया वर्णयितव्या। कार्यस्य हि एतावत्सामर्थ्यं यत् कार्यशून्यस्य संस्काराभाव इति। न पुनः यावदेव कार्यवत् तस्य सर्वस्य संस्कारः। ननु सोमावसिक्तपरिमार्जनं शुद्धावस्थाप्राप्तिः तुल्यं कार्यमित्युक्तं,

---

(1) P. 726

न श्रुतिबाधे तत्समर्थमित्युक्तमस्माभिः। श्रुते यदेव कार्यं तदेव चेत् कार्यं किमित्यश्रुतेऽपि न भवति। न हि कार्यं श्रूयते। श्रूयते हि कार्यमित्युक्तम्। कार्यं चेन्न क्रियते कथं यवेषु प्रोक्षणम्? यथा तत तथा नवमे वक्ष्यामः। यदुक्तं संसर्गमात्रविधानं लाभो लभ्यत इति। तदयुक्तम्। नियोगविषयत्वात नियोगस्य दर्शितं च भाष्यकारेण। विनियोगे सति न

तेन कार्ययोगात् सर्वेषामपि सम्मार्गः स्यादिति। **सत्यमुक्तं न पुनः श्रुतिबाधे तत्समर्थमित्युक्तमस्माभिः।** पूर्वपक्षी ब्रूते—**श्रुतेऽपि हि यदेव कार्यं, तदेव चेत् किमित्यश्रुतेऽपि न भवति।** अस्यार्थः—श्रुते ग्रहे सोमावसेकनिर्हरणमेव सम्मार्गस्य प्रयोजनम्। किमित्यश्रुतेपि न भवति। तत्रापि तस्य कार्यस्याविशेषात् कार्यार्थत्वाच्चानुष्ठानस्य। उत्तरं—**न हि कार्यं श्रूयते। श्रूयते हि कार्यमित्युक्तम्।** अस्यार्थः—ग्रहं सम्मार्ष्टीति श्रूयते। तत्र ग्रहेषु सम्मार्गस्य किं प्रयोजनं भवत्विति चिन्तायां सोमावसेकनिर्हरणं शुद्धावस्थाप्राप्तिलक्षणं प्रयोजनं दृष्टमिति नान्यत् कल्प्यते। न पुनः कार्यमेव श्रूयते। तेन श्रुतिबललब्धात्मकं कार्यं न श्रुतिमेव उन्मूलयितुमलम्। चोद्यमाह—**कार्यं चेन्नाद्रियते कथं तर्हि प्रोक्षणं यवेषु।** व्रीहिषु यवेषु वा तुल्यं प्रोक्षणकार्यम्। अतो यवेष्वपि प्रोक्षणं युक्तमिति चेत न्यायो नाद्रियते, कथं यवेषु प्रोक्षणमिति भ्रान्तश्चोदयति। **यथा तत् तथा नवमे वक्ष्यामः** अपूर्वप्रयुक्तत्वाद्धर्माणां व्रीहिशब्दः तत्साधनविशेषलक्षणार्थ इति यवेष्वपि प्रोक्षणं; इह तु ग्रहेषु चमसेषु च अभ्यासापूर्वभेदात् न तुल्यः साधनभावः इत्यपूर्वप्रयुक्तत्वेऽपि नास्ति चमसेषु सम्मार्गः। यदुक्तं सम्मार्गमात्रविधानं लाभो लभ्यत इति तदयुक्तं, विनियोगविषयत्वात् नियोगस्य। विनियोगः परस्परसंबन्धः। स इह विषयो नियोगस्य। न चासौ स्वविषयोपमर्दे प्रभवति। अन्यथा नियोगस्यैवोपमर्दप्रसङ्गात् ग्रहसंबन्धान्वितश्च विषयः। तदिदमुक्तं भाष्यकारेण—[2]"उत्सृज्यमाने श्रुतिरेव बाध्यते ग्रहमिति"। नियोगश्रुतिर्बाधिता स्यादित्यर्थः। ननु च श्रुत्या सम्मार्गस्य विध्यन्वयो वाक्येन ग्रहस्येति ग्रहं विप्रकृष्टं परित्यज्य सम्मार्गमात्रविधानं भवत्वित्याशङ्क्याह—**विनियोगे हि सति न**

(1) G. सादपूर्वे (2) P. 726

कश्चिद्विरोधो नियोगस्य स्यात् सन्निकर्षस्यापि विशेषात् । स च विरोधे । इह तु विरोधाभावादतन्त्रं विप्रकर्ष इति सिद्धम् । एकत्वं पुनर्यथा नान्वेति तथोक्तम् ।

[1]आनर्थक्यात्तदङ्गेषु ॥ ३-१-१८ ॥ अ. ९

'सप्तदशारत्निर्वाजपेयस्य यूपो भवति' इत्यत्रोद्देशकं पदं किं वाजपेयस्य सप्तदशेति उत यूपस्य सप्तदशेति । पूर्वपक्षवादिनोऽभिप्रायः । यदि यूप इत्युद्देशकं पदं वाजपेयस्येत्यनन्विताभिधानं

न कश्चिद्विरोधो नियोगस्य उभयमपि विदधात्यन्वितपदार्थत्वादित्यर्थः । यो हि विनियोगस्यैव परस्परसंबन्धस्य विशेषः कश्चित् शीघ्रं कश्चित विलम्बेनेति **स च विरोधे** सति विशेषः[2] । '**इह तु विरोधाभावादतन्त्रं विप्रकर्ष इति सिद्धम् । एकत्वं तु यथा नान्वेति तथोक्तं** ग्रहः पुनरुद्दिश्यमानतयाऽन्वेतीति । **अत्रायं विचारः** किमवान्तरकार्यवशेन ग्रहश्रुतिः सोमाधारपात्रमात्रलक्षणार्था भवतु परमकार्यवशेनेव व्रीहिश्रुतिः साधनविशेषलक्षणार्था उत नेति । तत्र पूर्वपक्षवादी कार्यार्थत्वाच्छेषस्य [3]अवान्तरकार्यसंबन्ध इति मन्यते । राद्धान्ती श्रुतिमूलत्वादवान्तरकार्यस्य न तदुपमर्दे सामर्थ्यमपि इति श्रुत्यनुसारेण ग्रहव्यक्तीनामेव सम्मार्ग इति ।

आनर्थक्यात्तदङ्गेषु ।

अत्र भाष्ये सन्देहः किं सप्तदशारत्निता वाजपेयस्य ऊर्ध्वपात्रे निविशते उत तदङ्गस्य पशोः यूपे इति । तत्र कारणसंशयमाह—**सप्तदशारत्निर्वाजपेयस्य यूप इत्यत्रोद्देशकं पदं किं वाजपेयस्य सप्तदश, उत यूपस्य सप्तदशेति** किं वाजपेयपदमुद्देशकं उत यूपपदमिति । **पूर्वपक्षिणोऽभिप्रायः । यदि यूप इत्युद्देशकं पदं** तदा **वाजपेयस्येत्यनन्विताभिधानम्**

(1) P. 727 (2) G. विशेषयितुं (3) G. अपवादकोऽर्थ इति मन्यते

प्राप्नोति यूपेन वाजपेयस्यासंबन्धात्। तस्मात् वाजपेयसंबन्धिनि यूपशब्दो द्रष्टव्यः। एवमन्वितपदार्थको वाक्यार्थः समर्थितो भवति। अत्राभिधीयते। यदि यूपशब्दे श्रौतान्वयिनि वाजपेयस्येत्यनन्वितं स्यात् स्यादेतदेवम्। अत्र पुनः सप्तदशारत्निर्यूप इत्यपि संबन्धे वाजपेयशब्दोऽन्वित एव। कथं ? संबन्धसंबन्धिन्यपि षष्ठ्यन्तस्यान्वयदर्शनात् देवदत्तस्य नप्तेत्येवमादिषु। तस्माद्यूपशब्दस्य लाक्षणिकत्वे नास्ति प्रमाणमिति यूपेनैव संबन्धः। किमिति पुनरत्र वाजपेयस्येत्यनेन कृतम् ? किमस्माकमनेन कृतं न कृतमिति ?

प्राप्नोति यूपेन वाजपेयस्यासंबन्धात्। अस्यार्थः—यदि यूपस्य सप्तदशारत्निता विधीयते तदा वाजपेयस्य यूपेन सहासंबन्धः। न च यूपेन सह संबन्धोऽवकल्पते। वाजपेयस्य षष्ठ्यन्तत्वात् षष्ठ्याश्च संबन्धवाचित्वात् वाजपेययूपयोश्च संबन्धाभावात्। यूपस्य च पशुयागमात्रे पर्यवसितसंबन्धत्वात् परमापूर्वेण सह संबन्धाभावादिति। तस्मात् वाजपेयस्यैवोद्देश्यत्वात् तदर्थतयैव सप्तदशारत्निता विधीयते। तत्राश्रयापेक्षायां यूपशब्दो वाजपेयसंबन्धिनं गुणयोगादूर्ध्वपात्रं प्रतिपादयतीति। तदाह—**तस्माद्वाजपेयसंबन्धिनि यूपशब्दो द्रष्टव्यः। एवमन्वितपदार्थको वाक्यार्थः समर्थितो भवति। अत्राभिधीयते —यदि यूपशब्दे श्रौतान्वयिनि वाजपेयशब्दोऽनन्वितः स्यात् स्यादेतदेवं, अत्र पुनः सप्तदशारत्निर्यूप इत्यपि संबन्धे वाजपेयशब्दोऽन्वित एव। कथं ? संबन्धसंबन्धिन्यपि षष्ठ्यन्तस्यान्वयदर्शनात् देवदत्तस्य नप्ता इत्येवमादिषु।** अत्रायं भावः—पूर्वपक्षे यूपशब्दो न श्रौतार्थः अस्मिन् मते तु मुख्यार्थः। न वाजपेयस्यानन्वयः साक्षात्संबन्धाभावेऽपि षष्ठ्यन्तस्यान्वयदर्शनात्। एतदुक्तं भवति—यद्यपि तेन सह न संबन्धोऽस्ति तथापि षष्ठी न विरुध्यते संबन्धिनापि यस्य संबन्धः तदपेक्षयापि षष्ठीप्रयोग इति। **तस्माद्यूपशब्दस्य लाक्षणिकत्वे नास्ति प्रमाणं इति यूपेनैव संबन्धः** सप्तदशारत्नितायाः। **किं पुनरत्र वाजपेयस्येत्यनेन** कृतमिति पूर्वपक्षी चोदयति। मत्पक्षे हि उद्देश्यसमर्पकतयोपपद्यते इति मन्यते। उत्तरं—**किमनेनास्माकं अनेन कृतं न कृतमिति**

अन्वयस्तावद्विद्यते। विद्यमानान्वये तु वाक्यार्थे किञ्चित्कार्ययोगि भवति किञ्चित् प्राप्तार्थं सदनूद्यत इति न दोषः।

[1]कर्तृगुणे तु कर्मसमवायाद्वाक्यभेदः स्यात् ॥ ३-१-१९ ॥ अ. १०

अभिक्रामं जुहोतीति किं कर्मणः कर्मान्वयो विद्यते उत नेति चिन्त्यते। कथं पुनरन्वयो विद्यते कथं वा न? तत्र पूर्वपक्षवादिनोऽभिप्रायः न कर्म कर्मसाध्यं भवति। तस्माद्यः प्रकरणे कर्ताऽभिक्रामतीत्यन्वयः। ननु च प्रयाजेष्वपि यः कर्ता तत्राप्यन्वयो भवत्येव।

अन्वयस्तावद्विद्यते। विद्यमानान्वये तु वाक्यार्थे किञ्चित्कार्ययोगि भवति। किञ्चित् प्राप्तार्थं सत् अनूद्यत इति न दोषः। एतच्चाभ्युपगम्यवादेनोक्तम्। परमार्थतस्तु पूर्वपक्षेपि पदद्वयमनर्थकं प्रकरणाद्वाजपेयसंबन्धात् योग्यत्वाच्च ऊर्ध्वपात्रप्राप्तेः।

कर्तृगुणे तु समवायात्।

अत्र भाष्ये सन्देहः—किमभिक्रमणं प्रयाजेष्वेव निविशते उत कृत्स्ने प्रकरण इति। तत्र कारणसन्देहमाह—**अभिक्रामं जुहोतीति किं कर्मणः कर्मान्वयो विद्यते उत नेति चिन्त्यते।** यद्य(प्य)न्वयो विद्यते तदा प्रयाजेष्वेव निवेशः। अथ न विद्यते तदा वाक्यं भित्वा योग्यकर्तरि गुणविधिरिति कृत्स्ने प्रकरणे निवेशः। **कथं पुनरन्वयो भवति? कथं वा न?** तत्र यथान्वयो न भवति तथा दर्शयन्नाह—**पूर्वपक्षवादिनोऽभिप्रायः–न कर्म कर्मसाध्यं भवति।** तदाह भगवान् काश्यपः "कर्म कर्मसाध्यं न भवति" इति (वै. सू. १-१-११) यथा गुणस्य साधनभावः तथा न कर्मण इति। **तस्माद्यः** कश्चिदुपात्तः **प्रकरणे कर्ता सोऽभिक्रामं इत्यन्वयः।** परस्परमभिक्रमणहोमयोरन्वयाभावात् वाक्यं भित्वाऽभिक्रामतीत्यनेन कर्मविधिः योग्ये कर्तर्यभिक्रमणं विधीयते। **ननु च प्रयाजेऽपि यः कर्ता तत्राप्यन्वयो** [2]**भवत्येव।** तेन सन्निधानविशेषात् प्रयाजकर्त्रैव संबन्धो भवति।

---

(1) P. 729　(2) G. विद्यत एव

सत्यं भवति यदि जुहोतीत्यभिधायकः स्यात्। अनभिधायकत्वे तस्मिन् न कर्तुरुद्देश्यत्वं संभवति नानृतं वदेदितिवत्। तस्मात् संयोगतोऽविशेषात् प्रकरणाविशेषाच्च वाक्यभेदः। जुहोतिरीदानीं किमर्थः? यदर्थस्तदर्थो भविष्यतीति।

[1]साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण ॥ २० ॥

सत्यमनन्वयः कर्मणः कर्मणा। कर्तृसंबन्धात तु अरुणावत् संभवतीति। ननु च कर्तुरुपादानं नास्ति यथा एकहायन्याः, जुहोतीत्यस्यानभिधायकत्वादि-

---

सत्यं भवति यदि जुहोतीत्यभिधायकं स्यात् अनभिधायकत्वे तस्मिन् न कर्तुरुद्देश्यत्वं संभवति नानृतं वदेदितिवत्। अस्यार्थः-यदि जुहोतीति विभक्तिः अभिधायिका स्यात् तदा गम्यमानकर्तृपर एव प्रयोग इति प्रयाजकर्तुरेव सन्निहितस्योद्देश्यत्वात् तत्रैव निवेशः स्यात्। अनभिधायिका त्वेषा। सिद्धान्ते अभिक्रमणाख्यगुणविधानार्थत्वात्। अतः कर्तुरुद्देश्यत्वं नास्ति नानृतं वदेदिति यथा। तस्मात् संयोगतोऽविशेषात् प्रकरणाविशेषाच्च प्रकरणस्थकर्त्रासंबन्धाद्वाक्यभेदः प्रयाजवाक्यादिदं भिन्नं वाक्यमित्यर्थः। यदि हि तत्रैवाभिक्रमणं निविशेत तदा केवलभावविधानेन सहैकवाक्यतैव स्यादिति। जुहोतिरिदानीं किमर्थः? भिन्नवाक्ये अभिक्रामं इत्येकं वाक्यं जुहोतीत्यपरं तदेवं वाक्यभेदे सति। उत्तरं—यदर्थः तदर्थो भविष्यति किं नः एतेन चिन्तनेन। अभ्यासन्यायेन कर्मान्तरे वा पौर्णमास्यधिकरणन्यायेन वाऽनुवादः इत्येवं प्राप्ते ब्रूमः।

साकाङ्क्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण।

सत्यमनन्वयः कर्मणः कर्मणा साक्षात्। कर्तृसंबन्धात् तु अरुणावत संभवति कर्तृसंबन्धद्वारेण कर्मणोऽपि कर्मान्वय उपपद्यते यथा द्रव्यद्वारेणारुण्यस्य। ननु च कर्तुरुपादानं नास्ति यथा एकहायन्या उपादानं जुहोतीत्यस्यानभिधायकत्वादि-

(1) P. 730

त्युक्तम्। न ब्रूमः कर्तुरुद्देशोऽस्तीति। तन्निमित्तकस्तु कर्मोद्देशोऽप्यन्वयो न विरुध्यत इति, तत्र तस्य संभवात् अरुणाधिकरणवैषम्यम्। तत्र द्वयोरप्यन्वयिनोरुपादानं इह तु संभवमात्रेणैवेति विशेषः। यदुक्तं भाष्यकारेण पूर्वपक्षे संबन्धमात्रपरिज्ञानात् प्रयोगवचनात् कर्तव्यतासिद्धिः इति तत्रैव कर्तुरुद्देश्यत्वं न विरुध्यत इत्यभिप्रायः। राद्धान्तवादी तु संभवमात्रेणान्वयसिद्धेर्न कर्तुरुद्देशेन प्रयोजनमस्तीति मन्यते। अतः सिद्धं कर्मापि कर्मणामुद्देश्यतां प्रतिपद्यत इति।

त्युक्तम्। उत्तरं—**न ब्रूमः** कर्तुरुद्देश्यत्वमस्तीति। तन्निमित्तकस्तु **कर्मोद्देशेऽप्यन्वयो न विरुध्यत इति** ब्रूमः। **तस्य** कर्तुः **तत्र** प्रयाजे **संभवात्**। अस्यार्थः—णमुलन्तत्वादभिक्राममित्यस्य जुहोतीत्यनेन संबन्धः प्रतीयते। स चैवं युज्यते यदि केनचित्प्रकारेण संबन्धो निर्वहति तत्कर्तृद्वारेण च संबन्धो निर्वहति। न च तत्र कर्ता नास्ति। यत एव चात्र कर्ता संबन्धद्वारभूतो नोपात्तः एकहायनी तूपात्ता, अत **एवारुणाधिकरणेन वैषम्यम्**। **तत्रा**रुणाधिकरणे **द्वयोरप्यन्वयिनोः** अरुणैकहायन्योरु**पादानं इह तु संभवमात्रेणैव** कर्तृद्वारतेति **विशेषः**। ननु च भाष्यकारः पूर्वपक्षे "संबन्धमात्रपरिज्ञानात् प्रयोगवचनात् कर्तव्यतासिद्धिः इति वदन् प्रकरणेपि गम्यमानकर्तृद्वारेण कर्मण्येव विधानमिति दर्शयति[तत्] कथं कर्तुरनुपादानात् पूर्वपक्ष इत्याशङ्क्याह **यदुक्तं भाष्यकारेण संबन्धमात्रपरिज्ञानात् प्रयोगवचनात्** [1]कर्त्रवमर्शात **कर्तव्यतासिद्धिरिति, तत्रैव** कर्तुरुद्देश्यत्वं **न विरुध्यत इत्यभिप्रायः** अस्यार्थः—प्रकरणपठितमेकवेद[2]पदमिति तद्योग्येनार्थान्तरेण एकवाक्यतान्वेषणे योग्यश्च संबन्धे[न्धी] कर्तेति कर्तारमुद्दिश्याभिक्रमणं विधीयते। एकवाक्यत्वे च न कर्तुरुद्देश्यत्वसंभवः। जुहोतीत्यनेनैवान्विताभिधानसिद्धेः। एवं वैषम्यप्रदर्शनार्थं पूर्वपक्षे कृते यदि कस्यचिदाशङ्का स्यात् कथं राद्धान्त इति तं प्रत्याह—**राद्धान्तवादी तु संभवमात्रेणैवान्वयसिद्धेः न** कर्तुरुद्देश्यतया **प्रयोजनमस्तीति मन्यते। अतस्सिद्धं कर्मापि कर्मणः उद्देश्यतां प्रतिपद्यत इति।**

---

(1) R. कर्तृवशात् (2) G. मेकमेवेदं

[1]सन्दिग्धे तु व्यवायाद्वाक्यभेदः स्यात ॥ ३-१-२१ ॥ अ. ११

उपव्ययत इत्यत्र सन्दिह्यते—किं सामिधेन्यनुवचनस्य कर्ता उपव्यानेन संबध्यते उत कृत्स्ने प्रकरण इति। ननु नैवात्रोद्देश्यं पदं किञ्चिच्छ्रूयते। अनुद्दिष्टपदार्थं च यत्तत् प्रकरणेनैव संबध्यते संयोगतोऽविशेषात् प्रकरणाविशेषाच्चेत्युक्तम्। उच्यते—आधस्त्ये तावदधिकरणे अनुद्दिष्टेनापि कर्त्राऽन्वयोऽपि न विरुध्यत इत्युक्तम्। एवमत्रापि सामिधेनीनां कर्तुः सन्निधानात क्रियान्तरसाधनतया उपव्यानस्य लोकेऽवगतत्वात् अनुद्दिष्टोऽपि कर्ता सन्निहितः कार्यपरिपूरणायालं भवितुमर्हति।

सन्दिग्धे तु व्यवायात्।

उपव्ययत इत्यत्र सन्दिह्यते—किं सामिधेन्यनुवचनस्य कर्ता उपव्यानेन संबध्यते उत कृत्स्ने प्रकरणे निविशत इति संशयमनुभाषते आक्षेप्तुम्। ननु नैवात्रोद्दशकं पदं किञ्चिच्छ्रूयते अनुद्दिष्टपदार्थकं च यत् तत् प्रकरणेनैव संबध्यते संयोगतोऽविशेषात् प्रकरणाविशेषाच्चेत्युक्तम। अस्यार्थः—असंयुक्तमुपवीतं प्रकरणे च पठ्यते, उपवीतं च वासोविन्यासरूपं वासोविन्यासेन च कर्ता कर्मण्यनाकुलो भवति इति कर्तुरेवायं धर्म उपदिश्यते। तत्र च प्रकरणगतेन कर्त्रास्य संबन्धः कथं पूर्वपक्षाभावेन संशयः? उच्यते—आधस्त्येऽधिकरणे अनुद्दिष्टेनापि सन्निहितेन कर्त्रा अन्वयो न विरुध्यत इत्युक्तम्। एवमत्रापि सामिधेनीनां कर्तुस्सन्निधानात् उक्तेन न्यायेन क्रियान्तरार्थतया उपव्यानस्य लोकेऽवगतत्वात् अनुद्दिष्टोऽपि कर्ता सन्निहितः कार्यपरिपूरणायालं भवितुमर्हति। अस्यार्थः—उपव्ययत इत्येकमिदं पदं अन्वितभिधानाय कर्तारमपेक्षते। विना च कर्त्राऽपरिपूर्णमिदं तत्र सन्निहितेन कर्त्रा परिपूरणसमर्थेन एकवाक्यतां यातीति यः सन्निहितः कर्ता स एवानेन संस्क्रियते इत्यर्थः। कार्यान्तराकाङ्क्षाप्युपव्यानस्य परिपूर्यत इति। आनन्तर्यमचोदनेत्यत्र तु समासत्वात्पदद्वयप्रयोगादन्विताभिधानस्य नानन्तर्यमात्रेण संबन्धः। नन्वेवमभिक्रमणमपि तर्हि पूर्वाधिकरणपूर्वपक्षे सन्निहितकर्तृधर्म

---

(1) P. 732

[1]ननु दर्शपूर्णमासयोरेव प्रकरणमिदम् । परप्रकरणे सामिधेन्यः श्रूयन्त इति । **कोऽस्य भाष्यस्यार्थः ? वर्णितोऽस्माभिरुद्देश्यपदाभावात् प्रकरणाविशेषः ।** " सत्यं, परप्रकरणे श्रूयन्ते । तथापि तासामवान्तरप्रकरणमस्ति" **इति । किमिदमवान्तरप्रकरणम् । एकस्य हि अधिकारविधेः प्रकरणम् । न हि अङ्गविधीनामपि प्रकरणमस्ति । प्रधानविध्यभेदात् । प्रधानविधीनां च अभेदं चतुर्थे वक्ष्यामः ।**

एव स्यात् । न । तस्यानाख्यातत्वात् सिद्धवत्प्रतीतेः न कर्त्राकाङ्क्षाऽस्ति । किं तर्हि प्रकरणानुप्रवेशाय शेषीभूतः क्रियान्तरगतः कर्ताऽपेक्ष्यते तेन च शेषिणाऽन्विताभिधानम् । इह तु प्रथमं कर्तृत्वेनैवापेक्षितेन सन्निहितेनापि परिपूरणमविरुद्धमिति । "ननु च दर्शपूर्णमासयोरेव प्रकरणमिदं परप्रकरणे सामिधेन्यः श्रूयन्त" इति । **कोऽस्य भाष्यस्यार्थः ।** पृच्छतश्चायमभिप्रायः । यद्यपि परप्रकरणे सामिधेन्यः तथापि तदीयः कर्ता सन्निधानात् संबध्यत एवेति युक्त एवोपवीतस्य सामिधेन्यनुवचन एवानुप्रवेशः । उत्तरम्—**वर्णितोऽस्माभिः उद्देशपदाभावात् प्रकरणाविशेषः ।** एतदुक्तं भवति-उद्देशपदाश्रवणात् प्रकरणगृहीतत्वात् तदनुगुणद्वारभूतकर्तृसंबन्धः स्यात् इति सामिधेन्यनुवचनानुप्रवेशशङ्का न युक्तेति पूर्वपक्षाक्षेपः । समाधानभाष्यं तु "सत्यं परप्रकरणे सामिधेन्यः श्रूयन्ते तथापि तासामवान्तरप्रकरणं भवति" इति । **किमिदमवान्तरप्रकरणं नाम ?** अवान्तरप्रकरणमयुक्तं कुतः ? **एकस्य हि अधिकारविधेः प्रकरणं नाङ्गविधीनामपि प्रकरणमस्ति ।** अस्यार्थः —प्रकरणशब्देन नियोगस्य ग्राहकत्वमुच्यते तथा विनियोजकत्वं च प्रकरणं तस्यैवेतिकर्तव्यताकाङ्क्षत्वलक्षणम् । तच्चेदमुभयमपि अधिकारविधेरेव तस्यैव पुरुषाणामनुष्ठेयतया प्रतीतत्वात् । यत्खलु अनुष्ठेयं तत्सन्निधौ यत् समाम्नायते तत् तदर्थमेवेति । तदेतत् (इदं तु) ग्राहकत्वमनुष्ठेयस्यैव अनुष्ठेयस्य च इतिकर्तव्यताकाङ्क्षत्वं इति न निरधिकाराणामवान्तरविधीनामपि प्रकरणमस्ति । ननु निरधिकारतैव कुतः इत्यत्राह—**प्रधानविध्यभेदात् ।** कथमभेद इत्यत्राह—**प्रधानविधीनां चाभेदं चतुर्थे वक्ष्यामः ।** अपि च सामिधेन्यनुवचनं

---

(1) 732-9

संस्कारविधीनां च तेषामर्थेन संबन्ध इत्यत्रानुवादः प्रदर्शितः। तस्मादवान्तरप्रकरणं ग्राहकविनियोजकतया नोपपद्यते। अतः सन्निधानमात्रमवशिष्यते। उच्यते—सन्निधान एवायं प्रकरणशब्दः प्रयुक्तः। कथमवगम्यते। येन तत्सन्निधावभिधीयमानं तस्येति ज्ञायते इति वचनात्। ननु च विनियोजकेऽपि प्रकरणे सन्निधानश्रुतिशब्दः उपपद्यते। केन चोक्तं नोपपद्यत इति। किन्तु तन्न संभवतीत्युक्तम्। वाक्यभेदश्रवणाच्च, व्यवधानं च दर्शयति।

संस्कारकर्म संस्कारकर्मसु चावान्तरनियोग एव न संभवति। प्रयाजादिष्विव प्रधानविधेरेव लिङादिभिरनुवाद इति कुतोऽवान्तरप्रकरणाशङ्का। तदाह—**संस्कारविधीनां च तेषामर्थेनेत्यत्रानुवादः प्रदर्शित इति। तस्मादवान्तरप्रकरणं ग्राहकविनियोजकतया नोपपद्यते अतः सन्निधानमात्रमवशिष्यते।** समाधाताऽह—**उच्यते सन्निधान एवायं प्रकरणशब्दः प्रयुक्तः। कथमवगम्यते** सन्निधान एव प्रयुक्त इति। **"येन तत्सन्निधावभिधीयमानं" इति वचनात्** येन तत्सन्निधौ सामिधेन्यनुवचनसन्निधौ अभिधीयमानमुपव्यानं 'तस्येति ज्ञायत' इति भाष्यकारवचनात् अवगम्यते। सन्निधाने हि संबन्धकारणे सन्निधावभिधीयमानमिति युज्यते वक्तुम्। **ननु च विनियोजकेपि प्रकरणे सन्निधानश्रुतिशब्दप्रयोग उपपद्यत एव।** एतेन नेदमेकान्ततो भाष्यं लिङ्गभूतमिति। परिहरति—**केन चोक्तं नोपपद्यत इति। किन्तु तन्न संभवतीति।** ननु चैवं सति न लिङ्गता भाष्यस्य समर्थिता। उच्यते। आञ्जस्येन सन्निधाना[1]भिप्रायेणैतद्भाष्यमुपपद्यते तथापि[यदि] विनियोजकं प्रकरणं संबन्धकारणं अत्र नोक्तं स्यात् तदा तत्परत्वेनानाञ्जस्येनापि भाष्यं व्याख्यायेत न त्वेतदस्तीति भवत्येव भाष्यं लिङ्गम्। **वाक्यभेदश्रवणाच्च।** राद्धान्ते वाक्यभेदः श्रूयते तेन पूर्वपक्षे एकवाक्यताप्रदर्शिता एकवाक्यता च न विनियोजकत्वात्। नापि ग्राहकत्वात्। किन्तु सन्निधानात् तस्मादतोऽपि हेतोः सन्निधान एव प्रकरणशब्दः। **व्यवधानं च दर्शयति।** राद्धान्तहेतुत्वेन। तत्र विनियोजकं यदि प्रकरणं पूर्वपक्षे हेतु-

---

(1) R. **धान एवाभिप्रा**

परार्थेन व्यवधानमानन्तर्यं विहन्ति न पुनः विनियोगम्। अन्यथा स्वाहाकारस्याविनियोगः स्यात् समिदादिभिर्व्यवधानात्। अथ निवित्पदानामन्यार्थत्वात् ग्राहकस्यापि व्यवधानमिति द्वादशाहीनस्येत्यपि व्यवधानं स्यात्। किञ्च काम्यैरव्यवधानं निवित्पदानां स्यात्। ततश्च निविदर्थता प्राप्नोति। सत्यं यद्यनुवचनव्यवधानमभिप्रेतम्। इह तु सन्निहितकर्तृव्यवधानमभिप्रेतं तच्च गुणफलसंबन्धाभिधाने सति कर्मणो व्यवधानादुपपन्नं कर्तुर्व्यवधानम्।

त्वेनोपन्यस्तं स्यात् तदा नेदमुपपद्यते। अथ तु सन्निधानं पूर्वपक्षहेतुत्वेनोपन्यस्तं स्यात् तदा तस्य व्यवधानं प्रतिपक्षभूतं भवेत्। अतोऽपि प्रकरणशब्देन सन्निधानमेवोच्यते। तदिदमाह—**परार्थेन व्यवधानमानन्तर्यं विहन्ति न विनियोगम्। अन्यथा** हि **स्वाहाकारस्याप्यविनियोगः स्यात्** समिदादिभिः व्यवधानात्। **अथ** मतं **निवित्पदानामन्यार्थत्वात्** ग्राहकान्तरसंबन्धात् **ग्राहकस्यापि व्यवधानमिति**। परिहरति—**द्वादशाहीनस्येत्यनेनापि व्यवधानं ग्राहकस्य स्यात्**। न च तदस्ति। तस्मात् न ग्राहको व्यवधीयते। **किञ्च काम्यैरव्यवधानं निवित्पदानां** ग्राहकस्य व्यवधानाभावात्। **ततश्च निविदर्थता प्राप्नोति** उपव्यानस्य तेन राद्धान्तो न लभ्यते। आनन्तर्यव्यवधाने पुनः न दोषः तेषामपि हि काम्यैर्व्यवधानात्। न चैवं सति यदि निवित्पदव्यवधानं काम्याः सामिधेनीकल्पाः कुर्वन्ति तर्हि सामिधेनीनामव्यवधानं प्राप्नोति न स्वयमसन्निहितं परस्य व्यवधानमावहति तस्माद्व्यवधायकत्वाभ्युपगमे सन्निधानं सामिधेनीनामस्तीत्यभ्युपगनीयम्। ततश्च सामिधेन्यनुवचनार्थतोपव्यानस्य स्यात्। परिहरति—**सत्यं प्राप्नोति। यद्यनुवचनव्यवधानमत्राभिप्रेतं** स्यात तदा तदनुगुणं गुणफलसंबन्धेन अनुवचनं न व्यवहितमिति भवेत् तदर्थमुपव्यानम्। **इह तु सन्निहितकर्तृव्यवधानमभिप्रेतं, तच्च गुणफलसंबन्धाभिधाने सति कर्मणो व्यवधानादुपपन्नं कर्तृव्यवधानम्**। यत्र हि यत्कर्म विधीयते तत्र [1]तदनुष्ठेयत्वेनावगम्यते न च कर्त्रा विना तदवगतिरिति विधाने कर्ता सन्निहितो भवति। अविधाने पुनः कर्मणोऽनुष्ठानबुद्धिविच्छेदात् कर्तुर्व्यवधानमिति।

---

(1) G. कर्तृतानु

एवं स्थिते पूर्वपक्षवादिनोऽभिप्रायः—गुणफलसंबन्धेप्यनुवचनश्रुतौ कर्ता सन्निहित एवेति सामिधेन्यर्थं उपव्यानम्। राद्धान्तवादी तु नाविधीयमानं सन्निहितं भवति स्वस्थानस्थितमनुवदनीयमनूद्यते, न पुनः सन्निधाप्यते। अनूद्यमानवशवर्तित्वादनुवादानाम्। अतः सन्निधानाविशेषात कृत्स्ने प्रकरणे निवेश इति सिद्धम्।

गुणानां च परार्थत्वादसंबन्धः समत्वात स्यात्[1] ॥(३, १. २२-अ. १२)॥

वारणो यज्ञावचर इति यज्ञसंबन्धित्वेन पात्रं श्रूयते आनर्थक्यात्तदङ्गेष्विति स्थितो न्यायः। तदिदानीं पवमान-

---

ननु चैवं सति पूर्वपक्ष एव नास्ति गुणफलसंबन्धे कर्मणोऽविधानात्[2] कर्तृसन्निधानाभावात इत्यत्राह—**एवं स्थिते पूर्वपक्षवादिनोऽभिप्रायः गुणफलसंबन्धेप्यनुवचनश्रुतेः कर्ता सन्निहित एवेति सामिधेन्यर्थमुपव्यानम्।** कर्मणापि कर्ता सन्निधाप्यत इति भावः। **राद्धान्तवादी तु नाविधीयमानं[3] सन्निहितं भवति स्वस्थानस्थितमेवानुवदनीयमनूद्यते न पुनः सन्निधाप्यते। अनूद्यमानवशवर्तित्वादनुवादानाम्।** अस्यार्थः-अनुवादो हि नाम ज्ञानान्तरोपस्थापितमेव वस्तु तदुपस्थापितत्वेनैव पुनर्वदति। न पुनः स्वयमेव वस्तु स्वातन्त्र्येणैवोपस्थापयति इति युक्तमनूद्यमानवशवर्तित्वम्। विधेयं पुनः विधानानुवर्त्येव[4] भवति इति विधानेन सन्निधाप्यते। **अतः सन्निधानाविशेषात् कृत्स्ने प्रकरणे निवेश इति सिद्धम्।**

गुणानां च परार्थत्वात्।

अत्र भाष्ये सन्देहः। किं वारणादीनि पात्राणि पवमानेष्टिषु निविशन्ते उत दर्शपूर्णमासादिषु सर्वयागेष्विति। तदुपपादयन्नाह—**वारणो यज्ञावचर इति यज्ञसंबन्धित्वेन पात्रं** आधानप्रकरणे **श्रूयते**। तेन न तावदाधाने संबध्यते। **आनर्थक्यात्तदङ्गेष्विति स्थितो न्यायः। तदिदानीं** यदि **पवमानहविषां** आधानाङ्गता ततः **पवमान-**

---

(1) P. 736 (2) G. यदविधानं (3) G. नाभिधीयमानं (4) R. नुपपत्त्यैव

हविषां यद्याधानाङ्गता ततः पवमानहविष्ष्वेव पात्रविधानमेतत्। यदि नाङ्गता तदा सर्वयज्ञार्थमिति। किं तावद्युक्तम्? पवमानहविष्षु विधानम्। आधानाङ्गं हि पवमानहवींषि प्रकरणे चैतच्छ्रूयते प्रधाने चासंभवन् धर्मः अङ्गेषु विधेय इत्युक्तम्। ननु च पवमानहवींषि अग्न्यर्थानि यदाहवनीये जुहोतीति वचनात्। अनारभ्यवादोऽयं सर्वहोमानां गुणत्वेनाहवनीयं विदधाति न प्राधान्यं संभवति। तस्मादानर्थक्यात्तदङ्गेष्विति पवमानहविष्षु विधानम्। अत्राभिधीयते—नैवाधानप्रकरणे पवमानहवींषि श्रूयन्ते नाप्यग्न्यर्थान्येव। कथं? यदाहवनीये जुहोतीति वचनात्।

हविष्ष्वेव पात्रविधानं अथ नाधानाङ्गता तदा अङ्गद्वारेणापि आधानाननुप्रवेशात् वाक्यतः उत्कृष्टस्य सर्वयज्ञार्थता इति। किं तावद्युक्तम्? पवमानहविष्षु विधानम्। आधानाङ्गं हि पवमानहवींषि स्ववाक्य एवाधानस्य साध्ययोगित्वात् पवमानहविषां च अफलत्वात् आधानसन्निधौ च श्रवणात् आधानप्रकरणे चैतत् श्रूयते पात्रम्। प्रधाने चासंभवन् धर्मः अङ्गे भवतीत्युक्तम्। ननु च पवमानहवींष्यपि अग्न्यर्थान्येव 'यदाहवनीये जुह्वति' इति वचनात्। तेन अनङ्गता पवमानहविषामिति मन्यते। एतच्च चोद्यं(मयथाश्रुतार्थं) यथाश्रुतं गृह्णतः। परिहारः—अनारभ्य वादोऽयं सर्वहोमानां गुणत्वेनाहवनीयं विदधाति न पुनः पवमानहवींषि प्रत्याहवनीयस्य प्राधान्यमाहेति न प्राधान्यं पवमानहविषां संभवति किन्तु आधानाङ्गतैवेति। तस्मादानर्थक्यात्तदङ्गेष्विति पवमानहविष्षु विधानम्। अत्राभिधीयते—नैवाधानप्रकरणे पवमानहवींषि श्रूयन्ते नाप्यग्न्यर्थान्येव। कथं? यदाहवनीये जुहोतीति वचनात्। प्राकृते यागे आहवनीयो वर्तते। तद्धर्मग्राहिणीष्वपि विकृतिभूतासु पवमानेष्टिषु चोदकेनाहवनीयः प्राप्यते। पवमानेष्टीनां च साध्यभूताग्निसन्निधौ पठितानां अवश्यंभावितादर्थ्यानां गुणभावेन संबन्धासंभवे मति गुणभावमात्रे असंभवेन बाधिते साक्षात्सम्बन्धस्याबाधितत्वात् साक्षात्संबन्धेनैव तादर्थ्यमवगम्यत इति। भवन्ति च पवमानेष्टयोऽप्यग्न्यर्थाः नाधानार्था इति। इममभिप्रायमबुध्वा

ननु च गुणतया विदधात्यनारभ्यवादोऽयमित्युक्तम्। न ब्रूमो न गुणतया विदधातीति। किन्त्वत्र प्रकृतितः प्राप्तिप्रदर्शनार्थं एवं वचनमुपन्यस्तं नोपदेशार्थम्। कथं पुनः प्रकृतेर्प्राप्तौ प्राधान्यं भवतीति ननु च गुणतयैव प्रकृतितोऽपि प्राप्नोति। सत्यमेवम्। आधानोपकारकत्वमग्निनिष्पत्त्या भवति। अग्निनिष्पत्तिश्चेत्प्रयोजनं किमित्याधानोपकारकतया न पुनः साक्षात्प्रकृतितः संबन्धात्। ननु च गुणतया प्राप्तिरित्युक्तम्। सत्यमुक्तं सा पुनराधानाङ्गत्वे न संभवति अनिष्पन्नत्वादग्नेः। निष्पादयतीति चेत् तर्हि साक्षान्निष्पादकत्वम्।

चोदयति—ननु गुणतया विदधात्यनारभ्यवादोऽयमित्युक्तम्। अभिप्रायमाविष्करोति—न ब्रूमो न गुणतया विदधातीति। किन्तु अत्र प्रकृतितः प्राप्तिप्रदर्शनार्थं एवं वचनमुपन्यस्तम् यदाहवनीये जुहोतीति नोपदेशार्थं सति ह्यस्मिन् वचने प्रकृतावङ्गता, ततश्च विकृतावतिदेशतः प्राप्तिरित्येतदर्थं वचनमुपन्यस्तम् न पुनरनेनैव वचनेन प्रधानतया आहवनीय उपदिश्यत इत्येवमर्थम्। कथं पुनः प्रकृतितः प्राप्तौ प्राधान्यं भवति? एकग्रन्थेनाभिप्रायमाविष्करोति—ननु च प्रकृतितोऽप्यङ्गतयैव प्राप्तिः कार्यनिबन्धनत्वात् प्राप्तेः। उत्तरं—सत्यमेवं आधानोपकारकता तु अग्निनिष्पत्त्या भवति। यो हि पवमानहविष्यङ्गत्वमाधानस्येच्छति इच्छत्येवासौ पवमानहविषां अग्न्युत्पादकत्वम्। ततश्च तेष्वग्नेः गुणभावः न संभवति प्रागेव तेभ्यः स्वरूपानिष्पत्तेः। ततश्च गुणभावमात्रे बाधिते साक्षात्संबन्धांशस्याबाधनात यत तदुत्पादकत्वमाधानाङ्गतयाऽध्यवसितं तत्साक्षादेवेति निश्चीयते। तदाह—अग्निनिष्पत्तिश्चेत्प्रयोजनं किमित्याधानोपकारकतया निष्पादयति—न पुनः साक्षात्प्रकृतितः संबन्धात्। ननु च गुणतया प्रकृतितः प्राप्तिरित्युक्तमभिप्रायं स्पष्टयितुं प्रागुक्तमेव चोद्यमुपन्यस्तम्। सत्यमुक्तम्। सा पुनराधानाङ्गत्वेऽङ्गीक्रियमाणे न संभवति अनिष्पन्नत्वादग्नेः पवमानेष्टिभ्यः प्रागिति शेषः। निष्पादयतीति चेत् यदि निष्पादयतीत्यङ्गीक्रियते सिद्धं तर्हि साक्षान्निष्पादकत्वं उक्तेन

न हि साक्षात्संबन्धे संभवति परपृष्ठेन संबन्धो युक्तः। तस्मात्सर्वार्थता वारणादेः युक्तेति।

मिथश्चानर्थसंबन्धात् ॥ ३-१-२३ अ. १३ ॥

तदेव पुनरुदाहरणान्तरे चिन्त्यते केनचित् विशेषेणानर्थक्यात्तदङ्गेष्विति। कः पुनरसौ विशेषः। अयमसौ विशेषः। तत्र यूपशब्दः श्रूयते। इह पुनः नाज्यभागाभिधानम्। अतः पूर्वपक्षवादी मन्यते। युक्तं वाजपेये यूपशब्दाभिधानात् व्यवधानेऽपि वाजपेयेत्यन्वयः। इह पुनः संबन्धिसंबन्ध्यन्वये न किञ्चित् प्रमाणमस्ति। कथ तर्हि द्विवचनम्। द्वयोर्द्विवचनम्। ननु चैकत्वात् प्राधान्यस्यैकैवानुवाक्या। किमिदं एकत्वात्प्रधानस्येति।

न्यायेन। न हि साक्षात्संबन्धसंभवे परपृष्ठेन संबन्धो युक्तः। तस्मादनङ्गत्वात् तन्मुखेनापि आधानानुप्रवेशाभावात् उत्कृष्टस्य सतः सर्वार्थता वारणादेर्युक्तेति।

मिथश्चानर्थसंबन्धः।

ननु च पुनरुक्तमिदमधिकरणं आनर्थक्यात्तदङ्गेष्वित्यनेनाधिकरणेनेत्याशङ्क्याह—तदेवेदं पुनरुदाहरणान्तरे चिन्त्यते केनचिद्विशेषेण आनर्थक्यात्तदङ्गेष्विति। कः पुनर्विशेषः। अयमसौ विशेषः। तत्र यूपशब्दः श्रूयते यः साक्षात्संबन्धे नोपपद्यते इह पुनः नाज्यभागाभिधानमस्ति येन [1]य[त]था स्वभावसंबन्धितया वार्त्रघ्नतां वृधन्वत्तां च विदध्यात् अतः पूर्वपक्षवादी मन्यते युक्तं वाजपेये यूपशब्दाभिधानात् व्यवधानेपि वाजपेयशब्दस्यान्वय इति। इह पुनः संबन्धिसंबन्ध्यन्वये संबन्धिनावाज्यभागौ तत्संबन्धि यदनुवचनं तदन्वये वार्त्रघ्नतावृधन्वत्तयोः नास्ति किञ्चित्कारणमिति। कथं तर्हि द्विवचनं अनूच्येते इति। एकग्रन्थेनाह—द्वयोर्द्विवचनम्। ननु चैकत्वात्प्रधानस्य एकैवानुवाक्या स्यात् ततश्च द्विवचनानुवादो न घटते। किमिदं एकत्वात्प्रधानस्येति। एकग्रन्थे—

(1) G. आज्यभाग

ननु चैकैकत्र प्रधानत्रयमस्ति। न ब्रूमः एकमेव प्रधानमिति। एकैकस्येतिकर्तव्यतासंबन्ध इति वदामः ततः किं द्वयोरसंबन्धः। ननु चाज्यभागयोरेकेन संबन्धः। सत्यमेव, श्रुत्या तु द्वयोत्पत्तेः द्वन्द्वाभिधानमविरुद्धम्। इह पुनः प्रधाने स्वतः एकत्वात् अनुवाक्याया एकैकस्याश्चोत्पत्तेः प्रधानानां द्वन्द्वविरोधः। उच्यते—न विरोधः। किमिव वचनं न कुर्यात् नास्तिवचनस्यातिभार इति। तत्र द्वित्वमयथार्थत्वं च मन्त्रस्य भविष्यति, व्यवधाने प्रमाणाभावादित्युक्तम्।

नाह—ननु चैकत्र] प्रधानत्रयमस्ति पौर्णमास्यामपि त्रीणि प्रधानानि आग्नेयाग्नीषोमोपांशुसंज्ञकानि अमावास्यायामपि त्रीण्येव आग्नेयैन्द्राग्नसान्नाय्यरूपाणि। एतच्च प्रयोगावस्थाभेदेन आग्नेयस्य भेदमङ्गीकृत्योक्तम्।

न ब्रूमः एकमेव प्रधानमिति। किन्तु एकैकस्येतिकर्तव्यतासंबन्ध इति वदामः। ततः किं द्वयोरसंबन्धः द्वयोर्मिलितयोरितिकर्तव्यतासंबन्धो नास्ति प्रत्येकं करणत्वात् करणद्वारत्वाच्चेतिकर्तव्यतायाः प्रतिकरणमितिकर्तव्यतासंबन्ध इति। एकस्मिन् प्रधाने एकैवानुवाक्येति द्विवचनानुपपत्तिः। एवं च सिद्धान्ताशयेन चोदिते पूर्वपक्षाशयेनाह—**ननु चाज्यभागयोरपि एकैकेनेतिकर्तव्यतासंबन्ध** इति तुल्या द्विवचनानुपपत्तिः। **सत्यमेव तत्र श्रुत्या तु द्वयोरुत्पत्तेः द्वन्द्वाभिधानमविरुद्धम्।** अस्यार्थः—आज्यभागौ यजतीत्येकशेषेण आज्यभागयोरितरेतरयुक्तयोरुत्पत्तिः। तेन तामवस्थामालोच्य प्रधानयोरितरेतरयोगो नापवदितुं शक्यते द्वन्द्वशब्देन च द्वन्द्वार्थभूतेतरेतरयोगाभिधायकत्वादेकशेषस्याभिधानं एकशेषोत्पत्तेरेकशेषाभिधानमविरुद्धमित्यर्थः। **इह पुनः प्रधाने स्वत एकत्वात् अनुवाक्यायाः एकैकस्याश्चोत्पत्तेः प्रधानानां द्वन्द्वविरोधः।** एवमाक्षिप्य पूर्वपक्षं समर्थयमान आह **न विरोधो द्वित्वस्य किं हि वचनं न कुर्यात् तत्र हि द्वित्वं अयथार्थत्वं च मन्त्रस्य भविष्यति व्यवधाने प्रमाणाभावादित्युक्तम्।** अस्यार्थः—व्यवधाने प्रमाणाभावात् साक्षादेव प्रधाने विधिरयम्। तत्र हि विभक्त्यर्थभूतद्वित्वविशिष्टमन्त्रविशेषविधिरस्तु। न

अत्रोच्यते—तदिदमयुक्तमभिहितमिति वदामः। कस्मात्? न तत्रापि यूपशब्दाभिधानं हेतुः। किं तर्हि विधेयस्य योग्यता। संभवति च योग्यतयाप्यन्वयो वाजपेयस्येत्युक्तम्। एवमत्रापि संभवति यथायोग्यविधाने यथार्थत्वद्वित्वयोः प्रमाणमस्ति। तस्मादाज्यभागयोरेव मन्त्रविधानमिति सिद्धम्।

यत्पुनरिदमुक्तं भाष्यकारेण[1] ननु प्रधानगामित्वेपि द्वयोः प्रधानयोर्द्वे अनुवाक्ये आग्नेयस्य अग्नीषोमीयस्य चेति तत्कथं? द्वित्वोत्पत्तेर्विरोधात्। अभ्युपगम्यापि युक्त्यन्तरविरोधप्रदर्शनार्थम्।

चानेकगुणविधानदोषः समासन्यायेन श्रुत्यैव प्रत्ययार्थविशिष्टस्य प्रकृत्यर्थस्य विधानादिति। तेनैकस्यामनुवाक्यायां प्राप्तायां द्वे विधीयेते। ननु च सार्ध[स्वार्थ]मनुवाक्ये एकस्मिन् प्रधाने विधीयमाने देवतामभिवदितुं न शक्नुतः। तत्रेदमुत्तरं—अयथार्थत्वं च द्वित्वं च मन्त्रस्य भविष्यति ऐन्द्रीवदिति पूर्वपक्षः। राद्धान्तमाह—अत्रोच्यते तदिदमयुक्तमभिहितमिति वदामः। कस्मात्? न तत्रापि यूपशब्दाभिधानं स्वरूपेणैव तदङ्गत्वे हेतुः। किं तर्हि? यूपशब्दश्रवणात् तद्विशिष्टस्य सप्तदशारत्नित्वस्य विधेयस्याङ्गसंबन्धयोग्यता। संभवति च योग्यतया संबन्धित्वे विधेयस्य वाजपेयस्येत्यस्यान्वय इत्युक्तं तत्रैव। एवमत्रापि संभवति यथायोग्यमन्त्रविधाने(नाय) यथार्थत्वद्वित्वयोः प्रमाणमस्ति। परं विधेयस्य योग्यतानुसारेण व्यवधानेन संबन्धो न पुनः विधेयस्यान्यथाकरणमिति भावः। तस्मादाज्यभागयोरेव मन्त्रविधानमिति सिद्धम्। यत्पुनरिदं भाष्यं—ननु प्रधानगामित्वेऽपि द्वयोः प्रधानयोः द्वे अनुवाक्ये स्यातां आग्नेयस्य चाग्नीषोमीयस्य चेति तत्कथं? द्वन्द्वोत्पत्तेर्विरोधात् द्वन्द्वोत्पत्तिः प्रधानयोरितरेतरयोगः तस्याभावात् द्विवचनविरोधात् कथमिदं भाष्यमित्यर्थः। अभ्युपगम्याप्यविरोधं युक्त्यन्तरेण मन्त्रलिङ्गानुपपत्तिलक्षणेन परपक्षे विरोधप्रदर्शनार्थम्।

---

(1) P. 739

आनन्तर्यमचोदना ॥[1] ३. १. २४-अ. १४ ॥

यदि योग्यता नियमहेतुः इहापि तर्हि स्तरणे दीक्षितावेदने च परिसमाप्ता योग्यता इत्यत्रैवैदमर्थ्यपरिसमाप्तिः ।

अत्रोच्यते—सत्यं यद्यत्रैव योग्यता कृत्स्नेपि प्रकरणे सा । तथैव यदि परमेकवाक्यतां नियन्तुं क्षमा । सा च नास्ति द्वयोराख्यातयोरसंबन्धात क्रियायां क्रियार्थायां तुमुन्ण्वुलौ; तौ च न स्तः अतः कृत्स्ने प्रकरणे निवेशः ।

शेषस्तु गुणसंयुक्तः ॥ ३-१-२५-अ. १५ ॥

कः पुनरत्र पूर्वपक्षवादिनोऽभिप्रायः आग्नेयेपि संभवति ऐन्द्राग्नेपि संभवतीति । अयमभि-

---

आनन्तर्यमचोदना ।

यदि व्यापारान्तरयोग्यता नियमहेतुः इहापि स्तरणे दीक्षितावेदने च परिसमाप्तैव योग्यता इत्यत्रैवैदमर्थ्यपरिसमाप्तिरिति । अनेनावान्तरसङ्गतिं पूर्वपक्षं चाह— अर्थस्तु हस्तावनेजनं वाग्यमनं च पुरुषसंस्कारौ संस्कारश्च कार्यान्तरे योग्यतारूप इति क्रियान्तरापेक्षायां पूर्ववद्विधेयस्य सन्निहितसंबन्धयोग्यत्वात् भवतु सन्निहितकर्मार्थमेव संस्कारविधानमिति । अत्राभिधीयते—सत्यं यद्यत्रैव योग्यता । कृत्स्नेपि प्रकरणे सा, तथैव यदि परमेकवाक्यतां नियन्तुं क्षमा सा च नास्ति द्वयोराख्यातयोरसंबन्धात् तुमुन्ण्वुलौ क्रियायां क्रियार्थायां भवतः तौ च न स्तः अतोऽसंयुक्तत्वात् कृत्स्नप्रकरणे निवेश इति सिद्धम् ।

शेषस्तु । कः पुनरत्र पूर्वपक्षिणोऽभिप्रायः आग्नेयेपि संभवति ऐन्द्राग्नेऽपि भवतीति आग्नेयं चतुर्धा करोतीति श्रूयते । तेनाग्नेये भवितव्यम् नैन्द्राग्ने । यदि वा आग्नेयः केवलो न संभवति तदैवं कल्प्येत । अस्ति च आग्नेयः केवलः अग्निर्देवतेति । अयमभि—

(1) P. 740

प्रायः—उद्देश्ये हि पदार्थमात्रस्यैव उपलक्षणत्वम्। संबन्धिमात्रतयैव सिद्धेर्न विशेषोऽपेक्षणीयः। विधेये पुनः विशेषनिष्ठत्वात्कार्यस्य युक्तं विशेषापेक्षणम्। तस्मादाग्नेयविधौ नैन्द्राग्नविधिः उपलक्षणे पुनः पदार्थानुगमान्न विरोधः। अत एव चाव्यासज्यसंबन्धिडित्थडवित्थदर्शनम्।

व्यवस्था वाऽप्यर्थसंयोगात् ॥ २७ ॥

अत्राभिधीयते—यथा भवानाह तथापि तु यथाऽभिधेयं लक्षणासंभवे नायथार्थत्वं भवति। पूर्वप्रसिद्धं हि लक्षणत्वे(न) हेतुः। अतो नाप्रसिद्धलक्षणा भवितुमर्हति यथाप्रसिद्धासंभवे च

प्रायः—उद्देशे हि पदार्थमात्रस्यैवाग्नेः अनपेक्षितदेवताभावस्योपलक्षणत्वं सम्बन्धिमात्रतयैव विशेषावगमसिद्धेः न विशेष उपलक्षणस्याग्नेरपेक्षणीयः। विधेये पुनः विशेषनिष्ठत्वात्कार्यस्य अनुष्ठानस्य युक्तं विशेषापेक्षणम्। तस्मादाग्नेयस्य विधौ अग्निदैवत्यस्य विधिः न पुनरैन्द्राग्नविधिः। उपलक्षणे पुनः पदार्थमात्रस्योभयत्रानुगतत्वात् न विरोधः आग्नेयशब्दस्य। यत एव संबन्धिमात्रतया अग्नेरुपलक्षणत्वं ऐन्द्राग्ने चास्ति संबन्धित्वं प्रत्येकं परिसमाप्तं अत एव चाव्यासज्यसंबन्धिडित्थडवित्थदर्शनम्।

व्यवस्था वा।

अत्राभिधीयते। यथा भवानाह तथापि तु यथाभिधेयं [1]लक्षणासम्भवे नायथार्थावगतिर्भवतीति। अग्निविधौ देवताभावेन संबन्धीत्युपलक्षणत्वेपि तेनैव संबन्धेनोपलक्षको युक्त इति। न पुनः अन्यथोपलक्षकत्वम्। असंभवे स्यादप्येवं अस्ति त्वत्र संभवः अतो नाप्रसिद्धलक्षणा भवितुमर्हति। यथाप्रसिद्धसंबन्धाभावे तु अप्रसिद्धसंबन्ध-

(1) R. लक्षणसंभवे

अप्रसिद्धनिमित्ततापि गृह्यते। तस्मादाग्नेयस्यैव चतुर्धाकरणमिति स्थितम्। डित्थडवित्थादीनां तु प्रत्येकमेव सिद्धिः आग्नेयस्तु प्रत्युक्तः।

इति बृहत्यां तृतीयाध्यायस्य

प्रथमः पादः

निमित्ततापि गृह्यते। तस्मादाग्नेयस्यैव चतुर्धाकरणमिति सिद्धम्। डित्थादीनां तु प्रत्येकमेव संबन्धित्वेन प्रसिद्धिः। आग्नेयस्तु प्रत्युक्तः [1]आग्नेयस्य मस्तकं विरुज्य इति यः पूर्वपक्षिणोक्तः स राद्धान्तिना निराकृतो भाष्य एव।

इति ऋजुविमलापञ्चिकायां तृतीयाध्यायस्य

प्रथमः पादः

अथ तृतीयाध्यायस्य

द्वितीयः पादः ॥

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात् तस्मादुत्पत्तिसंबन्धोऽर्थेन नित्यसंयोगात्[1] ॥ ३-२-१ अ. १ ॥

युक्तं तावत [2]किं मुख्य एवाभिधेये मन्त्राणां विनियोगः उत गौणेऽपीति। इदन्त्वयुक्तं कः पुनर्मुख्यः को वा गौण इति। कथमिवायुक्तम्? यः परशब्दः परत्र वर्तते स गौण इति स्थितम् तथा च दर्शितम्—[3]कथं पुनः परशब्दः परत्र वर्तते? स्वार्थाभिधानेनेति। तस्मादयुक्तोऽयं प्रश्नः।

अथायमभिप्रायः, लक्षणायामपि परशब्दः परत्र वर्तते तद्व्यावृत्त्यर्थोऽयं प्रश्नः इति।

तृतीयाध्यायस्य द्वितीयः पादः ॥

अर्थाभिधानसंयोगात्।

अत्र भाष्यकारो विचारद्वयं कुरुते—किं गौणेऽपि मन्त्राणां विनियोगः उत मुख्य एवेति। कः पुनर्मुख्यः को वा गौण इति। तत्र द्वितीयविचारमाक्षिपति—**युक्तं तावत् किं मुख्य एवार्थे मन्त्राणां विनियोगः उत गौणेऽपीति। इदन्त्वयुक्तम्—कः पुनर्मुख्यः को वा गौण इति। कथमयुक्तम्? यः परशब्दः परत्र वर्तते स गौण इति स्थितम्**[4]। अतः पुनरुक्तोऽयमर्थ इति मन्यते। तथा च तत्सिद्ध्यधिकरणे **दर्शितम्। कथं पुनः परशब्दः परत्र वर्तते? स्वार्थाभिधानेनेति। तस्मादयुक्तोऽयं प्रश्नः। अथायमभिप्रायः लक्षणायामपि परशब्दः परत्र वर्तते तद्व्यावृत्त्यर्थोऽयं प्रश्नः इति।** अस्यार्थः—योऽयं गौणमुख्यप्रश्नः स लक्षणागौणविवेकार्थः। तत्सिद्ध्यधिकरणोक्तं गौणम्। लक्षणया परशब्दः

---

(1) P. 745 (2) P. 746-1 (3) P. Brhati Part III P. 260
(4) G. इति लक्षणायामप्यविशिष्टम्

तन्नोपपद्यते। यदेव गौणत्वे लक्षणं वक्ष्यति—[1]अनादृत्यैव माणवकप्रत्ययं ज्वलनं अग्निशब्दात् प्रतियन्तो दृश्यन्ते न त्वनादृत्य ज्वलनप्रत्ययं माणवकं प्रतियन्ति इति। लक्षणायामप्येवमेव। नह्यनादृत्य गङ्गाप्रत्ययं गङ्गासमीपं प्रतियन्ति तस्मान्न तन्निवृत्त्यर्थमिति शक्यते वक्तुम्।

अथ मतं लक्षणायामन्वेति लक्षणापदं गौणे पुनः नान्वेति इति। तदयुक्तम्। प्रतीतौ तावत् द्वयमप्यन्वेति। कार्ये पुनर्नैकमपि। अतोऽनेनापि विशेषणेन न विशेषः। अथ वाक्यार्थनिवृत्तये यत्नः,

---

परत्र वर्तत इति स गौण इति लक्षणायामप्यविशिष्टम्। इह एवं गौणमुख्यप्रश्ने कृते गौणस्वरूपं वर्ण्यते यथा मुख्याल्लाक्षणिकाच्च भिन्नमवभासते। तत्र मुख्यात् भेदः तत्सिद्ध्यधिकरणे ज्ञापित इति इह लाक्षणिकात् भेदज्ञानं प्रश्नोत्तरयोः प्रयोजनम्। तन्नोपपद्यते, यदेव हि गौणत्वे लक्षणं वक्ष्यति—'अनादृत्यैव माणवकप्रत्ययं ज्वलनमग्निशब्दात् प्रतियन्तो दृश्यन्ते न त्वनादृत्य ज्वलनप्रत्ययं माणवकं प्रतियन्ति इति लक्षणायामप्येवमेव। न ह्यनादृत्यैव गङ्गाप्रत्ययं गङ्गासमीपं प्रतियन्ति। अस्यार्थः—लक्षणाभेदज्ञानार्थोऽपि नोपपद्यते, यस्मात् यदेव गौणलक्षणं प्रश्नास्योत्तरभाष्यं वक्ष्यति 'अर्थान्तरानपेक्षो मुख्यार्थः, अर्थान्तरसव्यपेक्षश्च गौणः यथाऽग्निप्रत्ययापेक्षोऽग्निशब्दो माणवके' इति तदेव लक्षणायामपि गङ्गाप्रत्ययापेक्ष—एव गङ्गाशब्दात गङ्गासमीपप्रत्यय इति। तस्मादेकलक्षणत्वात् तन्निवृत्त्यर्थं लक्षणानिवृत्त्यर्थमपि प्रश्नोत्तरमिदं न शक्यते वक्तुम्। अथ मतं लक्षणायामन्वेति लक्षणापदं गङ्गासंबद्धस्यैव समीपस्यान्वयात् गौणे पुनः न गुणिपदमन्वेति। अग्निर्माणवक इति अग्निसंबन्धिमाणवकाप्रतीतेः। अतो लाक्षणिकगौणयोः एवं भेदं वक्तुं प्रश्नः। तदयुक्तं प्रतीतौ तावत् द्वयमप्यन्वेति। कार्ये पुनः नैकमपि। गङ्गापि प्रतीतावेवान्वयिनी न कार्ये समीपस्यैव कार्यान्वयात् तथाऽग्निरपि प्रतीतावेवान्वयी अग्निसदृशप्रतीतेः। कार्ये पुनः नैकमप्यन्वयि। अतोऽनेनापि विशेषणेन न विशेषः। अथ वाक्यार्थनिवृत्तये यत्नः। अस्यार्थः

---

(1) P. 748

तन्न; नैवार्थान्तरे वाक्यं वर्तते अन्विताभिधायीनि पदान्येव हि वाक्यम्। अन्विताश्च पदार्थाः वाक्यार्थः। न चानन्विताभिधानमस्ति इति प्रदर्शितम्। एवं तर्हि प्रश्नार्थो व्याख्येयः। एवं च सोपपद—सुष्ठुप्रसिद्ध बहुशः प्रयोगाश्च प्रत्युक्ता भाष्ये अतस्तन्निराकरणार्थोऽप्ययं प्रश्नः नोपपद्यत एव।

—अथ मन्यसे अग्निर्माणवक इत्यस्मात् अग्निसदृशो माणवक इति प्रतीतिरुदेति। सा च न पदमात्रनिबन्धना अग्निशब्दस्याग्निसदृशे लोके संबन्धानवबोधात्। किन्तु पदद्वयप्रयोगात् इयमवगतिर्जायमाना वाक्यनिमित्तिकेति व्यवस्थाप्यते। तेन गौणार्थो वाक्यार्थः इति ये मन्यन्ते तन्निवृत्त्यर्थं स्वार्थसादृश्यात् गौणः प्रतीयत इति इदं गौणस्य स्वरूपं दर्शयितुं अयं प्रश्न इति। **नैवार्थान्तरे वाक्यं वर्तते।** अस्यार्थः—वाक्यादेव गौणः प्रतीयत इति अतिमन्देयमाशङ्का। तथा हि—नैव वाक्यं पदार्थेभ्यः व्यतिरिक्तेऽर्थान्तरे वर्तते। यदि तत् पदार्थेभ्यो व्यतिरिक्ते अर्थान्तरे वाक्यं वर्तते तदा स्यादियमाशङ्का, न त्वेतदस्ति। ननु च स्वरूपमात्रेण व्यवस्थितोऽर्थः पदार्थः। परस्परान्वितास्त्वर्थाः वाक्यार्थः। एवमर्थान्तरे वाक्यं वर्तत इतीमामाशङ्कां अपनयन्नाह—**अन्विताभिधायीनि पदान्येव हि वाक्यम्। अन्विताश्च पदार्थाः वाक्यार्थः।** एकैकमेव पदं स्वमर्थं अर्थान्तरेण योग्येन आकाङ्क्षितेन सन्निहितेन चान्वितं स्वार्थं ब्रवीति। तथाभूतान्येव वाक्यम्। अन्विताश्च पदैरेवार्थाः उच्यन्त इति पदार्था एव वाक्यार्थः। यथा बहुषु पदेषु पदार्थेषु वाक्यमेकं वाक्यार्थश्चैकः तथा **वाक्यार्थमातृकायामुक्तम्।** अन्विताभिधानमेव कुतः इत्याह—**न चानन्विताभिधानमस्तीति प्रदर्शितं** तद्भूताधिकरणे; **वाक्यार्थमातृकायां च** अस्माभिः निर्लोडितमेव। **एवं च सति प्रश्नार्थः व्याख्येयः** प्रश्नप्रयोजनं कथनीयम्। अथ कदाचिदुच्यते सोपपदात् प्रतीयमानो गौणः, मन्दप्रसिद्धो गौणः, अल्पप्रयोगविषयो गौणः, इति इमान् सिद्धान्ताभासिनां गौणहेतून् निराकर्तुमयं प्रश्न इति तत्राह—**एवं सोपपदसुष्ठुप्रसिद्धबहुशः प्रयोगाश्च** यथाबथं गौणहेतु मुख्यहेतु(मत्त)तया **प्रत्युक्ता भाष्ये। अतः तन्निराकरणार्थोऽप्ययं प्रश्नो नोपपद्यत इति।** अस्यार्थः—अतिमन्दत्वात्तेषां हेतूनां

उच्यते। अयं प्रश्नस्य अर्थः वाक्यार्थवगमाद्धि निमित्ततया पदार्थविभागोऽवगम्यते। स चायं माणवकेऽग्नौ च तुल्यः अग्निर्माणवक इत्युक्ते माणवकः पिङ्गलता च निमित्तम्। अग्निर्ज्वलतीत्युक्ते ज्वलनो ज्वलनक्रिया च। तस्मान्न विशेषं पश्यामः अस्य शाब्दो निमित्तभावोऽस्य गौणो निमित्तभाव इति। ननु चाग्निप्रत्ययपुरस्सरा माणवके प्रतीतिः पैङ्गल्यस्य; नैवं शक्यते

तन्निराकरणाय प्रश्नो नोपपद्यत इति। न हि माणवकशब्दोपपदादपि अग्निशब्दादर्थः प्रतीयमानस्तावत् गौणत्वेनावगन्तुं शक्यते यावत्तु स्वार्थसादृश्येन गौणप्रत्यय इति नोपवर्ण्यते। इतरथा प्रतीत्यन्यथानुपपत्त्या बोधकत्वकल्पनैव स्यादिति सोपपदादप्यवाचकान्न प्रतीतिरुत्पद्यते। एवं मन्दप्रसिद्ध्यप्रचुरप्रयोगयोरपि योज्यम्।

उच्यते—**अयं प्रश्नस्यार्थः वाक्यार्थावगमाद्धि निमित्ततया पदार्थविभागोऽवगम्यते।** वाक्यादिति ल्यब्लोपे पञ्चमी विशिष्टार्थप्रतिपादकं वाक्यमुपलभ्य वृद्धव्यवहारे निमित्ततया वाक्यार्थप्रतिपत्तिनिमित्ततया पदार्थानां विभागोऽवगम्यते। विशिष्टरूपो वाक्यार्थ इति विशेषणभूतः पदार्थः तत्प्रतिपत्तौ निमित्तं भवति नाप्रतीते विशेषणे विशिष्टः शक्यते प्रतिपत्तुमिति निमित्ततया पदार्थविभागोऽवगम्यते। ततः किमित्यत्राह—**स चायं** निमित्तत्वेन विभागो **माणवके** माणवकविषये **अग्नौ** अग्निविषये च प्रयुज्यमानस्याग्निशब्दस्य **तुल्यः**। उभयत्रापि वाचकवृत्त्यैव निमित्ततेति यावत्। तद्दर्शयति—**अग्निर्माणवक इत्युक्ते माणवकः पिङ्गलता च निमित्तम्। अग्निर्ज्वलतीति** ज्वलनो ज्वलनक्रिया **च। तस्मान्न विशेषं पश्यामः अस्य शाब्दो निमित्तभावोऽस्य गौणः** इति न तु मुख्यस्य च गौणस्य च भेदं पश्यामः। सर्व एव मुख्य इति यावत्। **ननु चाग्निप्रत्ययपुरस्सरा माणवके प्रतीतिः पैङ्गल्यस्य।** अस्यार्थः—अग्निशब्दस्य तावत् नानेकार्थकल्पना न्याय्या। एकार्थप्रतिपादनशक्त्यैवार्थान्तरप्रतीतिसिद्धेः। तथा हि—अग्निशब्दादग्निः प्रतीतः पिङ्गलतामुपस्थापयति। अतोऽग्निप्रतीतिपुरस्सरैव माणवके प्रतीतिः। परिहरति—**नैवं शक्यते**

वक्तुम्। उक्तमिदं वाक्यान्निमित्तभावावगतिरिति। अग्निर्माणवक इति पिङ्गलतैव केवलं निमित्ततयाऽवगम्यते यथा पिङ्गलो माणवक इति। तस्माद्दुर्निरूपमिदं गौणोऽयं मुख्योऽयमिति मन्वानस्य प्रश्नः। न चोपपदादिभिः संभवतीति प्रदर्शितं भाष्ये। अग्निरिवायं माणवक इत्यत्र युक्तमग्निसादृश्यम् इवादीनां सादृश्ये प्रयोग-

---

वक्तुम। **उक्तमिदं** वाक्यान्निमित्तभावावगतिरिति। तेन वाक्यार्थं प्रति यस्य निमित्तभावोऽवगम्यते स पदार्थः न चात्राग्न्यर्थस्य निमित्तभाव उपपद्यते—**अग्निर्माणवक इति केवलं पिङ्गलतैव निमित्ततयाऽवगम्यते। यथा पिङ्गलो माणवक इति।** अस्यार्थः—न स्वरूपेण तावदग्न्यर्थस्य निमित्तता, वाक्यार्थे असमवायात। न च लक्षणायामिव वाक्यार्थसमवायिपिङ्गलोपस्थापकतया; माणवकवर्तिन्याः पिङ्गलतायाः अग्निना सह संबन्धाभावात्। अर्थो ह्यर्थान्तरं प्रत्यासत्त्या उपस्थापयति। गङ्गाऽपि हि तीरं लक्षयन्ती स्वसंबन्धिनमेव लक्षयति। अतो न साक्षात् नापि परम्परया अग्निनिमित्तता अग्न्यर्थस्य। अतः पिङ्गलतामेव अग्निशब्दः पिङ्गलशब्दवत् प्रतिपादयतीति स्थितम्। **तस्मात् दुर्निरूपमिदं गौणोऽयं मुख्योऽयं इति मन्वानस्य प्रश्नः।** गुणादागत इति तत आगत इत्यण्। मुख्यमिति "शाखादिभ्यो य इति इवार्थे यः। नन्वेवं गौणता निरूप्यते—यदि पिङ्गलशब्दवदग्निशब्दोऽपि पैङ्गल्यं वाचकवृत्त्यैवाह, किमिति तर्हि सोपपदस्तत्र वर्तते? यावता निरुपपदोऽपि तत्र वर्तेत तथा मन्दप्रसिद्धिः किमिति लौकिकानां? तथा किमिति वा अल्पप्रयोगता? सुष्ठ प्रसिद्धिप्रचुरप्रयोगते वा स्यातां अविशेषादित्यत्राह—**न हि चोपपदादिभिरपि** उपाधिभिः **संभवतीति दर्शितं भाष्ये।** अयमभिप्रायः—प्रतीतिर्हि कार्यरूपा अन्यथानुपपद्यमाना कारणं कल्पयन्ती शब्दे वाचकत्वकल्पनायां हेतुर्भवति। अग्निर्माणवक इति च पिङ्गलतावगतिरन्यथा नोपपद्यत इत्युक्तम्। तेन वाचकतैव, अन्यथा सोपपदादपि प्रतीतिर्न स्यात्। अवाचकस्य मनाक्प्रसिद्धिरल्पप्रयोगता च दुर्घटैव। वाचकत्वे तु प्रयोगनियमस्याप्यनादित्वात् नानुपपन्नं किञ्चित्।

ननु यदि पिङ्गलशब्दवदग्निशब्दोऽपि पिङ्गलं माणवकमेव वक्ति कथं तर्हि अग्निसादृश्यं अत्राह—**अग्निरिव माणवक इत्यत्र युक्तमग्निसादृश्यं इवादीनां सादृश्ये प्रयोग-**

दर्शनात्। अग्निर्माणवक इति तु इवार्थशून्योऽर्थः वाक्यार्थः यथा पिङ्गलो माणवक इति च तुल्यो निमित्तभावः। अतो निष्प्रयोजनमेवेदमधिकरणं मन्यामहे। कथं तर्हि गङ्गायां घोषः कूपे गर्गकुलमिति। युक्तं प्रतिवसतीत्यस्य सामर्थ्यं न भवतीति समीपान्वयिता। अग्निर्माणवक इति तु पिङ्गलगुणावगमो न कथञ्चिन्नोपपद्यते। तस्मात् भवतु लक्षणा। गौणत्वे पुनः न किञ्चित् प्रमाणमस्ति। कथं चाग्निप्रत्ययो लोके पैङ्गल्यादप्युपपद्यते

दर्शनात्। अग्निर्माणवक इति तु इवार्थशून्योऽर्थः[1] वाक्यार्थः यथा पिङ्गलो माणवक इति तुल्यो निमित्तभावः। अस्यार्थः—अग्निरिवायं माणवक इत्युक्ते सादृश्यं यत्प्रतीयते तद्युक्तं इवशब्दश्रवणात् तस्य च सादृश्ये प्रयोगदर्शनात्। अग्निर्माणवक इति तु इवशब्दाप्रयोगात् इवार्थशून्यो वाक्यार्थः यथा पिङ्गलो माणवक इति नास्ति सादृश्ये प्रतीतिः इवार्थशून्यत्वात् वाक्यार्थस्याभिमतस्य। तस्मात् गौणमुख्याभिमतयोः तुल्यो निमित्तभावः वाचकवृत्त्यैवेति। अतो निष्प्रयोजनमिदमधिकरणं किं गौणेऽपि विनियोगः उत मुख्य एवेति मन्यामहे गौणमुख्ययोर्भेदाभावादिति। ननु यद्यपि पिङ्गलताऽभिधीयते तथापि तदवगत्या सादृश्यमपि प्रतीयमानं वाक्यार्थेऽन्वितमेव। अतः कथं इवार्थशून्यो वाक्यार्थः। अथाविनाभूतमपि[2] सादृश्यं वाक्यार्थे नान्वेति कथं तर्हि गङ्गायां घोषः कूपे गर्गकुलमिति। अत्र हि अविनाभावात् समीपदेशः वाक्यार्थेऽन्वीयत इति मन्यामहे। युक्तं तत्र प्रतिवसतीत्यस्य सामर्थ्यं न भवतीति समीपान्वयिता[3] नाविनाभावोऽवगत इत्येतावता समीपस्यान्वयिता, किन्तु प्रतिवसतीत्यस्य पदस्य सामर्थ्यं न भवतीति युक्तम्। अग्निर्माणवक इति तु पिङ्गलमाणवकावगतिः न कथं चिन्नोपपद्यते। अतः प्रतीतमपि सादृश्यं वाक्यार्थे नान्वीयते। तस्माद्भवतु लक्षणा संबन्धबलोत्थापितार्थान्तरतात्पर्याश्रयणात्। गौणत्वे तु न किञ्चित्प्रमाणमस्ति। यदि पिङ्गलतामेवाग्निशब्दो वक्ति कथं तर्हि अग्निर्माणवक इत्यत्राग्निप्रत्ययो लोके पैङ्गल्यादप्युपपद्यते। अग्निशब्देन पैङ्गल्यं

---

(1) G. शून्यत्वात् वाक्यार्थस्य (2) G. अविनाभूतमेव (3) G. समीपान्वयित्वेन

पूर्वादिवापरप्रत्ययः। अत्राभिधीयते — इवार्थनिबन्धन एवायं प्रत्ययः कुतः ? तथाऽवगतेः। कथं पुनरिवशब्दमन्तरेणेवार्थः प्रतीयते। इव-शब्दोऽपि तावदिवार्थः किमिति कल्प्यते। प्रयोगदर्शनादिति चेत् अत्रापि तुल्यम्। ननु च पैङ्गल्येऽवगते ज्वलनसादृश्यमवगम्यते अपर-शब्दवदित्युक्तम्। नैतदुपपद्यते। माणवकसदृशोऽग्निरित्यपि प्रत्ययः

यत्प्रतिपादितं तत्किल सातिशयं अग्नौ प्रतीतमित्यग्निप्रत्ययः **पूर्वादिवापरप्रत्ययः।** **अत्राभि-धीयते—इवार्थनिबन्धन एवायं प्रत्ययः।** अस्यार्थः— इवार्थः सादृश्यं तन्निबन्धन एवायं प्रत्ययः। एतदुक्तं भवति। अग्निशब्देनाग्निः प्रतिपाद्यते [1]सा प्रतीतिः सदृशमर्थान्तरमुप-स्थापयति। अतोऽन्यथाप्यर्थान्तरप्रतीतेरुपपन्नत्वात् न शक्त्यन्तरकल्पनोपपद्यते। तेन शब्दादेव यो ज्वलनः प्रतीतः स मुख्यः यस्तु शब्दप्रतिपाद्यज्वलनसादृश्याद्वगम्यते स गौणः। **कुतः** पुनरवगम्यते सादृश्यादयं प्रत्यय इति ? **तथावगतेः** सदृशावगतेः। यदि तावत् पिङ्गलतावगम्यते तदा अग्निशब्दः पिङ्गलतावचन इति कथ्यते। यतस्त्वग्निसदृशा-वगतिः अतः सादृश्यादेवार्थान्तरावगतिः कल्प्यते।

कथं पुनरिवशब्दमन्तरेणेवार्थः प्रतीयते ? उत्तरं—**इवशब्दोऽपि तावत् किमितीवार्थः कल्प्यते।** अस्यार्थः—यथा इवशब्दे प्रयुक्ते सादृश्यं प्रतीयते तथा अत्रापि सादृश्यं प्रत्येष्यते इवशब्दोऽपि प्रातिपदिकोपात्तमेव सादृश्यं प्रतिपादयति न पुनः सादृश्य-शब्दवत् स्वतन्त्र एव ब्रवीति। **प्रयोगदर्शनादिति चेत्।** अथ मन्यसे प्रयोगस्तत्र सादृश्ये प्रातिपदिकस्य दृश्यते इवशब्दबलात्। यत्र पुनः इवशब्दो द्योतको नास्ति तत्र कथं सादृश्ये प्रयोगोऽवगम्यते। दूषयति—**अत्रापि तुल्यं** प्रयोगदर्शनम् माणवकविषये अग्नि-शब्दप्रयोगात् सादृश्ये प्रयुक्तिरवसीयते अन्यथा माणवके प्रयोगानुपपत्तेः। **ननु च पैङ्गल्ये-ऽवगते ज्वलनसादृश्यमवगम्यते अपरशब्दवदित्युक्तम्।** अस्यार्थः—अग्निशब्द; पिङ्गलता-मभिवदति। तस्यां चावगतायां ज्वलनसादृश्यावगतिः। न पुनः ज्वलनसादृश्यपरोऽयं प्रयोग इति न गौणत्वम्। परिहरति—**नैतदुपपद्यते माणवकसदृशोऽग्निरित्यपि प्रत्ययः**

---

(1) G. स प्रतीतः

स्यात् । इह पुनर्विपरीतमिति। अतिपैङ्गल्यात् ज्वलनस्योपमानत्वमिति चेत् नास्यां कल्पनायां प्रमाणमस्ति। यथावगमं निमित्तकल्पना न्याय्या तन्मूलत्वात् निमित्तावगतेः। अतो यद्यपि विपरीतः संभवति तथापि प्रसिद्धप्रतिपक्षत्वात् नात्मानं लभते। अप्रतिपक्षो हि संभवः संभवः। तस्मादुपपन्नं प्रयोगप्रत्ययाभ्यां गौणमुख्याभिधानम्। किं मुख्य एवाभिधेये मन्त्राणां विनियोगः, उत गौणेऽपीति। तस्मात् युक्तो विचारः।

किं तावत्प्राप्तं ? अविशेषादुभयाभिधानं; अग्निर्ज्वलतीत्यपि प्रयोगो दृष्टः अग्निर्माणवक इति च। तस्मान्न विनिगमनायां

स्यात्। पिङ्गले माणवकेऽवगते माणवकसदृशोऽग्निरित्यपि प्रत्ययः स्यात्। तथा हि—माणवकः पिङ्गलोऽग्निसदृशः तथाऽग्निरपि माणवकेन सदृश इति माणवकसदृशोऽग्निरिति प्रतीतिः स्यात्। नियमेव तु अग्निसदृशतायामेव प्रतिपत्तिः तदाह—इह तु पुनर्विपरीतम्। अतिपैङ्गल्याज्ज्वलनस्योपमानत्वमिति चेत्। उपमीयते येन तदुपमानं अतिपिङ्गलत्वादग्नेः तेनैवान्यदुपमीयते न पुनरसावन्येनेति चेत्। उत्तरं—नास्यां कल्पनायां प्रमाणमस्ति। यस्यातिशयो गुणः तस्यैवोपमानत्वमिति। नन्वेवमपि अवगतिरस्तु माणवकसदृशोऽग्निरिति ; भवतु पिङ्गलतावाचक एवाग्निशब्दः तत्राह—यथावगमं हि निमित्तकल्पना न्याय्या। तन्मूलत्वान्निमित्तावगतेः। अस्यार्थः—यथाऽभिमतं हि वादिनः तथा निमित्तकल्पना नास्ति। किन्तु यथावगमं, अवगमलक्षणकार्यनिबन्धनत्वात् निमित्तभावावगतेः। अतो यद्यपि विपरीतोऽर्थः संभवति माणवकसदृशोऽग्निरित्येवंरूपः तथापि प्रसिद्धप्रतिपक्षत्वान्नात्मानं लभते। प्रतिपक्षस्तस्य अग्निसदृशो माणवक इति प्रसिद्धिः। अतो नात्मानं लभते माणवकसदृशोऽग्निरिति। अप्रतिपक्षो[1] हि संभवः संभवः। न हि संभवमात्रेण प्रतिपक्षत्वं, माणवकसदृशोऽग्निरित्यस्य संभवति। तस्मादुपपन्नं प्रयोगप्रत्ययाभ्यां गौणमुख्याभिधानम्। स्थिते गौणमुख्यत्वे किं मुख्य एवाभिधेये मन्त्राणां विनियोगः उत गौणेऽपीति युक्तो विचारः। किं तावत्प्राप्तम् ? अविशेषादुभयाभिधानं गौणस्य च मुख्यस्य च शब्दात्प्रतीयमानतया अविशेषादुभयोः मन्त्राभिधानं युक्तम्। तदाह—अग्निर्ज्वलतीत्यपि प्रयोगो दृष्टः अग्निर्माणवक इत्यपि। तस्मान्न विनिगमनायां

---

(1) G. क्षोऽग्निसंभवः

हेतुरस्ति। अत्राभिधीयते—अयमस्ति मुख्याभिधानशून्यं नास्ति गौणाभिधानमिति प्रदर्शितम्। तस्मान्मुख्य एव शब्दस्य व्यापारः। अभिधानेन मन्त्रा उपकुर्वन्ति मुख्ये चाभिधानं न गौणे। कुतस्तर्हि गौणप्रत्ययः? सादृश्यादिति। सत्यमुक्तम्, तत्तु उपायत्वेन न पुनर्निमित्तनिराकरणतयापि। केन चोक्तं निमित्तता निराक्रियत इति। मुख्ये संभवति न गौणे विनियोगः क्षम इति एतावदुच्यते। यत्र पुनर्मुख्ये न संभवति तत्र गौणेऽभ्युपायत्वमिष्यत एव। न तर्हि पूषाद्यनुमन्त्रणादीनां उत्कर्षः। समाख्यया विनियुक्तानां

हेतुरस्ति। अत्राभिधीयते—अयमस्ति विनिगमनायां हेतुः मुख्याभिधानशून्यं नास्ति गौणाभिधानमिति प्रदर्शितम्। तस्मान्मुख्य एव शब्दस्य व्यापारः गौणे त्वर्थादवगतिः भवतु मुख्य एव शब्दव्यापारः तथापि किमित्यत्राह- अभिधानेन च मन्त्रा उपकुर्वन्ति। मुख्ये चाभिधानं न गौणे। अतो न मन्त्रविनियोगः। कुतस्तर्हि गौणप्रत्ययः। यदि शब्दात् गौणप्रत्ययो न भवति कुतस्तर्हि स इत्यर्थः। उत्तरं— सादृश्यादिति। प्रतीतोऽग्निः सदृशमुपस्थापयतीत्यर्थः। पूर्वपक्ष्याह— सत्यमुक्तं सादृश्याद्गौणावगतिरिति। तत्तूपायत्वेन न पुनः निमित्तनिराकरणतयापि[1]। तथापि निमित्तता न निराकृतेत्यर्थः। अतो निमित्तत्वस्योभयत्राविशेषात् गौणेपि मन्त्राणां विनियोगः। राद्धान्ती तु ब्रूते— केन चोक्तं निमित्तता निराक्रियत इति। मुख्ये प्रथमोपनिपातिनि विनियोगसंभवात् न गौणेपि पाश्चात्ये विनियोगः क्षमः ग्राहकग्रहणमन्त्राम्नानयोः कृतार्थत्वात् इत्येतावदुच्यते यत्र पुनः मुख्ये विनियोगो न संभवति तत्र गौणेपि विनियोगः। यदि तस्य मुख्ये विनियोगो न संभवति तस्य गौणे विनियोगः न तर्हि पूषाद्यनुमन्त्रणादीनां उत्कर्षः प्रकरणे पूष्णोऽभावात्। अन्यत्र पौष्णे कर्मणि सामान्यसंबन्धाभावेन लिङ्गाद्विनियोगानुपपत्तेः। परिहरति—समाख्यया विनियुक्तानां अनुमन्त्रणमन्त्र इत्यनया समाख्यया सामान्यानुमन्त्रण-

---

(1) G. R. करणयैव

मुख्य एव संभवतीत्युत्कर्षः। तस्मात् मुख्ये यत्र संप्रत्ययो न तत्र गौणेऽपि मन्त्रनियमे प्रमाणमस्ति। किमर्थं मुख्यं प्रत्याययतीत्येवमादिना प्रदर्शितम्।

॥ २ ॥ [1]वचनात्त्वयथार्थमैन्द्री स्यात् ॥ ३-२-३ ॥

ऐन्द्र्या गार्हपत्यमुपतिष्ठते इत्यत्र संशयः किमैन्द्रेण मन्त्रेण गार्हपत्यस्याभिधानं उतेन्द्रस्येति। कथं पुनः गार्हपत्यमुपतिष्ठत इति स्पष्टायां श्रुतौ संशयः? मुख्येऽर्थे मन्त्रो विनियुज्यत इति स्थितमाधस्त्येऽधिकरणे। ननु च मुख्यासंभवे गौणेपि च विनियुज्यत एव। एतदेव न विजानीमः संभवो विद्यते नेति। [ननु] गार्हपत्यमुपतिष्ठत इति स्पष्टैव श्रुतिः। विनियोज्यसामर्थ्यानुसारी विनियोग इति अनीप्सितार्था द्वितीया भवतीति ब्रूमः।

संबन्धसिद्धेः लिङ्गान्मुख्य एव प्रकरणान्तरवर्तिनि विनियोगः संभवतीत्युत्कर्षः। उपसंहरति —तस्मात् मुख्ये यत्र संप्रत्ययः न तत्र गौणेपि मन्त्रेणैव प्रकाशनं कार्यमिति नियमे प्रमाणमस्ति इति। तदिदं सर्वं किमर्थं मुख्यं प्रत्याययतीत्येवमादिना प्रदर्शितमिति।

वचनात्त्वयथार्थमैन्द्री स्यात्।

'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्र संशयः किमैन्द्रेण मन्त्रेण गार्हपत्यस्याभिधानं कर्तव्यं उतेन्द्रस्येति। अनेन संशयभाष्यगतमुपस्थानपदं व्याख्यातम्। कथं पुनः गार्हपत्यमुपतिष्ठत इति स्पष्टायां द्वितीयाश्रुतौ संशयः। उत्तरं—मुख्येऽर्थे मन्त्रो विनियुज्यत इति स्थितमाधस्त्येऽधिकरणे। तेन गार्हपत्योपस्थानं न संभवतीति मन्यते। ननु च मुख्यस्यासंभवात् गौणेपि च विनियुज्यत एव। एतदेव न विजानीमः संभवो विद्यते नेति। ननु "गार्हपत्यमभिधत्त" इति स्पष्टैव श्रुतिः उत्तरं—विनियोज्यसामर्थ्यानुसारी विनियोग इति। अनीप्सितार्था द्वितीया भवतीति मतिः। अस्यार्थः —यद्यत्र शक्तं तत्र तत् कारकतया विनियुज्यते। न गार्हपत्याभिधाने समर्थोऽयं मन्त्र इति

---

(1) P. 752

तथा च स्मर्यते 'तथा युक्तं चानीप्सितं' इति। अयमेव चास्य विषयः विनियोज्यवशात् कारकपर्यवसाय्येव। यद्वा गार्हपत्यमुपेत्याभिधत्त इति द्वितीयोपपद्यत एव। तस्मादिन्द्राभिधानम्। युक्तं चैतदेवं अन्यथा अलौकिकी अभिधानशक्तिः कल्पनीया। ननु गौणमभिधानं भविष्यति। नास्ति गौणमभिधानम्। सिद्धे हि प्रयोगे गौणमभिधानं न पुनर्गौणात् प्रयोगसिद्धिः। न चात्र गार्हपत्ये इन्द्रशब्दप्रयोगोऽन्यतः सिद्धः कर्तव्यतोपदेशात्। अतो यथाभिधानं विनियोगः। अत्राभिधीयते। गार्हपत्याभिधानं मन्त्रेण कर्तव्यम्। कुतः? यथोपदेशं हि कार्यं न यथाकार्यमुपदेशः। अतिदेशो हि सः।

न गार्हपत्ये विनियोगमर्हतीति अनीप्सितार्था द्वितीया भविष्यति। तथा च स्मर्यते तथा युक्तं चानीप्सितमिति। अयमेव चास्य विषयो विनियोज्यवशात् विनियोज्यस्य मन्त्रस्य सामर्थ्यवशात् गार्हपत्ये विनियोगाभावात् कारकपर्यवसाय्येवैतत् सूत्रम्। परिहारान्तरमाह—यद्वा गार्हपत्यमभ्येत्य अभिधत्ते इति द्वितीयोपपद्यत इति। तस्मादिन्द्राभिधानम् युक्तं चैतदेवं यदिन्द्राभिधानं अन्यथा हि अलौकिकी अभिधानशक्तिः कल्पनीया। ननु विनापि शक्तिकल्पनया गौणमभिधानं भविष्यति। तेन गार्हपत्ये विनियोगो निर्वहति। परिहरति—नास्ति गौणमभिधानं सिद्धे हि प्रयोगे गौणमभिधानम् न पुनर्गौणात् प्रयोगसिद्धिः। यत्र प्रमाणान्तरेण परत्र परशब्दप्रयोगसिद्धिः तत्र गौणमभिधानम्। न पुनः गौणोऽस्तीत्येतावता प्रयोगः कल्प्यते। न चात्र गार्हपत्ये इन्द्रशब्दप्रयोगोऽन्यतः सिद्धः कर्तव्यतोपदेशात् अनेन मन्त्रेणाभिधानं कर्तव्यमित्येवंपरमिदं वाक्यं ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति, न पुनर्गार्हपत्ये इन्द्रपदं प्रयुक्तमित्येवं परम्। अतो निरपेक्षत्वादभिधानवृत्तेः यथाभिधानं विनियोगः। अत्राभिधीयते-गार्हपत्याभिधानमेव कर्तव्यं मन्त्रेण। कुतः? यथोपदेशं हि कार्यं, न यथा कार्यमुपदेशः। अस्यार्थः—उपदेशनिबन्धनं कार्यं न कार्येऽवगतेऽन्यतः उपदेशवर्णनम्। अतिदेशो हि सः यः कार्यानुरूपः। ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति चायं उपदेशः। अतः उपदेशात् गार्हपत्याभिधानमेव

ननु च यथाकार्यमुपदेशोऽपीति सप्तमाद्ये उक्तम्। नियोगार्थः तत्र कार्यशब्देनोक्तः न पुनराप्त्यादयः। ननु च विनियोग एव सन्दिह्यत इत्युक्तम्। किमिति न निश्चित इति चेत। अनीप्सितेऽपि द्वितीयादर्शनात। किमिदमनीप्सितमिति? तथा युक्तं चानीप्सितमिति। सुतरां तर्हि धात्वर्थं प्रति प्राधान्यम्। अन्यथा हि तथायोगो न स्यात्। तरवर्थः इदानीं किमर्थः? अनीप्सितमपि प्रधानमिति।

कार्यमिति मन्यते। **ननु च यथाकार्यमुपदेशोऽपीति सप्तमाद्य उक्तम्** इत्यनेन पूर्वापरविरोधमाशङ्कते। परिहरति—**नियोगार्थः तत्र कार्यशब्देनोक्तः न पुनराप्त्यादयः** तेन भिन्नत्वात्कार्यस्य नास्ति विरोधः। सप्तमाद्ये नियोगार्थं कार्यमङ्गीकृत्य कार्यानुगुण उपदेश उक्तः। इह तु आप्त्यात्मकं कार्यमभिप्रेत्य यथोपदेशं कार्यमुक्तम्। **ननु च विनियोग एव सन्दिह्यते।** यदि हि उपदेश एव निश्चितः स्यात तदा यथोपदेशं कार्यमिति गार्हपत्योपस्थानं कार्यं निश्चीयेत। न चोपदेशो निश्चितः। **किमिति न निश्चित इति चेत्। अनीप्सितेपि द्वितीयादर्शनात्।** कारकमात्रे द्वितीया दृश्यत इत्यर्थः। परिहरति—**किमिदं अनीप्सितमिति।** उत्तरं—**तथा युक्तं चानीप्सितमिति।** राद्धान्ती ब्रूते—**सुतरां तर्हि धात्वर्थं प्रति** प्राधान्यम्। यदि हि तथायुक्तसूत्रेण इयं द्वितीया तदा सुतरां धात्वर्थापेक्षया साध्यत्वं गार्हपत्यस्य, क्रियानन्यफलभागिता च प्राधान्यशब्देनोच्यते। **अन्यथा हि तथायोगोऽपि न स्यात्।** तथायुक्तं चानीप्सितमित्यत्र तथा युक्तशब्देनैवमुच्यते यथा ईप्सितं क्रियया युक्तं क्रियाफलभागितया तथाऽनीप्सितमपि क्रियाफलभागितया क्रियया युक्तं तत्र द्वितीयेति। तत्र यदि गार्हपत्यस्योपस्थानलक्षणफलयोगिता नाङ्गीक्रियते तदा तथायोगो न स्यात्। ततश्च तेनापि सूत्रेण द्वितीया न भवेत् अतो द्वितीयादर्शनात् गार्हपत्यस्य क्रियाफलभागिताऽवगम्यते। यद्यनीप्सितस्य प्राधान्यं तदा सुतरामिति यदुक्तं तत्रेदानीं कस्तरवर्थः? एतावत्तत्र वक्तव्यम् धात्वर्थं प्रति प्राधान्यमिति। उत्तरं—**अनीप्सितमपि प्रधानमिति।** अस्यार्थः—यद्यप्यनीप्सितता तथापीह प्राधान्यं अन्यत्र ईप्सितत्वे प्राधान्यं

ननु चोक्तं नादृष्टा शब्दशक्तिः कल्पयितुं शक्यत इति ? किमत्रादृष्टं वचनाद् दृश्यत एव। न वचनात् पदार्थानां शक्तिः शक्या अवगन्तुम्। कथं तर्हि योगादेः नियोगार्थसिद्धौ शक्तिः ? कार्यावगम्यत्वात्। इह तु विपरीतम्। यद्यत्रापि प्रतिपत्तव्यमिति वचनं स्यात भवेत् कार्यदर्शनम्। इदन्त्वन्यपरमेव वचनं ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति। तदिदमुक्तं–संबन्धस्याशास्त्रहेतुत्वात्[1] इति। गौणं तर्ह्यभिधानं भविष्यति। ननु प्रयोगसिद्धौ गौणमभिधानमित्युक्तम्। अत्रापि कार्य-

अतः सुतरां प्राधान्यमित्युच्यते। ननु चोक्तं नादृष्टा शब्दशक्तिः शक्यते कल्पयितुमिति। अनेनेदमाह—यद्यप्युपस्थेयता गार्हपत्यस्य गम्यते तथापि मन्त्रस्याशक्तेः तथा विनियोगो न निर्वहतीति विभक्तिव्यत्ययो वा भवेत्। उपेत्येति वा अध्याह्रियतामिति। अत्र राद्धान्ती —किमत्रादृष्टं वचनात् दृश्यत एव यदा वचनेनेदं कार्यं अवगतं तदा तद्बलेन यथा निर्वहति तथा क्रियते। निर्वहरति चेदं गौणत्वेनेन्द्रशब्दस्येति नादृष्टकल्पना दोषः वचनादेव गौणत्वाश्रयणेन शक्तिदर्शनादित्युक्तत्वात्। पूर्वपक्ष्याह—न वचनात् पदार्थ-शक्तिः शक्यतेऽवगन्तुमिति। सिद्धरूपायां शक्तौ कार्यैकविषयस्य शब्दस्य प्रामाण्यं नोपपद्यत इत्यर्थः। यदि शब्दाच्छक्तिर्नावगम्यते कथं तर्हि यागादेर्नियोगार्थसिद्धौ शक्तिः। उत्तरं—कार्यावगम्यत्वात्। कार्यभूतेन नियोगेन सहान्विताभिधानात् साधनतया यागादयोऽभिधीयन्ते। न चाशक्तानां तदिति तेषां तत्र शक्तिर्निश्चीयते इह तु तद्विपरीतम्। यद्यत्रापि प्रतिपत्तव्यमिति वचनं स्यात् भवेत्कार्यदर्शनम्। प्रतिपत्तिर्हि कार्यभूता। सा चेत्थं कार्यत्वेनावगम्यते। यदि इन्द्रशब्दात गार्हपत्यः प्रत्येतव्य इति वचनं भवेत् एन्द्र्या गार्हपत्यमुपतिष्ठत इति इदन्त्वन्यपरं वचनं ऐन्द्र्या गार्हपत्यमभिधत्त इति मन्त्रस्य कार्यमाचष्टे न पदस्येत्यर्थः। यदिदमस्माभिरुक्तं मन्त्रविनियोगपरत्वेन पदकार्यप्रतिपादकत्वाभावाद्वचनस्य न वचनात शक्तिर्दृश्यत इति। तदिदमुक्तं संबन्धस्याशास्त्रहेतुत्वादिति। ननु माभूत् शब्दस्य शक्तिः गौणं तर्ह्यभिधानं भविष्यति परिहरति—ननु प्रयोगसिद्धौ गौणमभिधानमित्युक्तम्। राद्धान्तमाह—अत्रापि कार्य-

(1) G. स्य शास्त्र

तथा सिद्ध इत्यविशेषः। गुणश्रवणं प्रदर्शनार्थं सूत्र इति मत्वा योगाच्चेत्युक्तं भाष्यकारेण।

॥ ३ ॥ तथाह्वानमपीति चेत्[1] ॥ ३-२-५ ॥

अत्रापि 'अवघ्नन्नाह्वयति' इत्याह्वानेन अवघातं कुर्यादित्यर्थः गुणाद्वाऽभिधानं भविष्यति योगाद्वा आह्वयतीत्यनुवादः। यो ह्येहीति ब्रूते स आह्वयत्येव। त्रिरिति कथं? शाखान्तरे पाठात्

तथा सिद्ध इत्यविशेषः[1] अस्योर्थः—अनेन मन्त्रेण येयं गार्हपत्योपस्थापनकार्यशेषता तयैवेन्द्रशब्दस्य गार्हपत्ये प्रयोगस्सिद्धः। अन्यथा गार्हपत्यः कथमनेन मन्त्रेणाभिधीयत इत्यर्थात् गौणीवृत्तिः। ननु सूत्रे गुणाद्वेति गौणीवृत्तिरुक्ता, कथं भाष्यकारः[2] इन्दतेरैश्वर्यकर्मणः, इत्यादिना यौगिकत्वमाहेति तत्राह—गुणश्रवणं[3] प्रदर्शनार्थं सूत्रे इति मत्वा योगाद्वेत्युक्तं भाष्यकारेण।

तथाऽऽह्वानमपीति चेत्। ननु कथमत्र पूर्वः पक्षः यावता हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीत्याह्वाने मन्त्रो विनियुज्यत इति प्रतिभाति इत्यत्राह—अत्राप्यवघ्नन्नाह्वयतीत्याह्वानेन आहूयते अनेनेति व्युत्पत्त्या मन्त्रेणावघातं कुर्यादित्यर्थः। अनेन मन्त्रेणावघातं कुर्वन्नाह्वयतीत्यर्थः। तेनावघातस्य मन्त्रस्य च संबन्धो विधित्सितः। ननु कथं मन्त्रोऽवघातं वक्ति इत्यत्राह—गुणादभिधानं भविष्यति योगाद्वा, हविष्कृत्पत्नी तद्गुणयोगात् अवहन्तिरप्युच्यते। यद्वा हविः करोतीति व्युत्पत्त्या मुख्ययैव वृत्त्या योगादभिधानम्। ननु चानेनावघातो नाह्वातुं शक्यते अतः कथमाह्वयतिरित्यत्राह-आह्वयतीत्यप्यनुवादः यो ह्येहीति ब्रूते स आह्वयत्येव। अस्यार्थः—चेतनविषयेप्येतदेवाह्वातुराह्वानं यदेहीति शब्दोच्चारणं, आहूयमानस्तु आत्मानमवबुध्यतां मा वा। अस्ति चात्र एहीति शब्दप्रयोगः तस्मादाह्वयतीत्यनुवादः। यदि मन्त्रावघातसंबन्धो हि विधीयते कथं तर्हि त्रिरिति शब्दोऽन्वेति। न ह्यविहितस्त्रिरभ्यासो लभ्यते। विधीयते चेद्वाक्यभेदः। उत्तरं—शाखान्तरे पाठात्

---

(1) R. & G. इत्यदोषः (2) P. 755 (3) R. ग्रहण

त्रिरित्यप्ययमनुवाद एव। अत्राभिधीयते—त्रिरित्येतावद्विधीयते। अन्यत् सर्वमनूद्यते। ननु च त्रिरित्यपि प्राप्तं, न, अनियमात् क्वचित् द्विः पठ्यते। तस्मादवघ्नन्निति लक्षणैषा। नायं दोषः, अन्यतः प्राप्तेः। ननु च प्रवृत्तावघातस्य नैष मन्त्रः प्राप्नोति। इदमप्यन्यतः प्राप्तत्वादेवाचोद्यम्। तस्मान्न गौणे विनियोगे प्रमाणमस्ति।

प्राप्तत्वादयमप्यनुवाद एव। एवं शाखान्तरे त्रिरावृत्तो मन्त्रः पठ्यते। अतोऽप्ययमनुवादः। उच्यते—**त्रिरित्येतावद्विधीयते अन्यत्सर्वमनूद्यते।** अस्यार्थः—आह्वानस्य मन्त्रस्य चात्र संबन्धः स च मन्त्रो रूपादेवाह्वाने प्राप्नोति इति न विधेयः। तथा 'अवघ्नन्नाह्वयति' इत्यत्र अवघातकालोपि प्राप्त एव। कार्यकाल एव हि सहायान्वेषणं प्राप्नोति। केवलमन्त्रस्य त्रिरावृत्तिः अप्राप्ता सा विधीयते। **ननु त्रिरित्यपि** शाखान्तरे पाठात् **प्राप्तं न** नित्यवत्प्राप्तं, **अनियमात्।** कथमनियमः? **क्वचित् द्विः पठ्यते** अयं मन्त्रो यतः तस्मादनियमः। अतोऽवघातादिवन्नियमार्थं वचनम्। उपसंहरति—**अतोऽवघ्नन्निति लक्षणैषा** अवघातेन कालो लक्ष्यत इत्यर्थः। **ननु** चायमेव राद्धान्तपक्षे दोषः यदुत लक्षणा; **नायं दोषः अन्यतः प्राप्तेः।** यदा त्रिरिति विधीयते तदा पदान्तरं यथान्वयं याति तथा वर्णयितव्यम्। तत्रावघ्नन्निति मुख्यया वृत्त्या अन्वयासंभवात् लक्षणाश्रयणमदोषः। **ननु च प्रवृत्तावघातस्य नैव मन्त्रः प्राप्नोति** हविष्कृदाह्वानकालोऽपि नित्यवन्न प्राप्नोति। तेन सोऽपि[तस्यापि] विधेयतया वाक्यभेदापत्तिरिति। परिहरति—**कालस्यान्यतः प्राप्तत्वादिदमचोद्यम्।** कार्यकाल एव हि सहायान्वेषणेत्युक्तम्। **तस्मान्न गौणे विनियोगे प्रमाणमस्ति।** तस्मादयमत्र विचारार्थः—किं काललक्षणाभयात् त्रिरिति पाक्षिकोऽनुवादः उत नित्यवदन्वितत्रिरभ्यासबलेन काललक्षणा आश्रीयतां इति। पूर्वपक्षवादी वदति—पक्षे परं शब्दार्थहानात् पक्षिकानुवादः न पुनर्लक्षणेति। राद्धान्ती वदति—नित्यवदन्वितस्य पक्षेऽन्वयबाधः प्राप्नोति। तस्माद्वरं लक्षणा। तस्यां हि सत्यां सर्वपदानां नित्यवदन्वय

यदि पुनरयं मन्त्रोऽवघाते मुख्यार्थः स्यात् नावघाते लक्षणा कल्पिता भवेत् । शक्यते च हविष्कृच्छब्देनावघातो वक्तुं पत्नीवत् । सत्यम् शक्यते, आह्वानन्तु अनन्वितार्थं प्राप्नोति । त्रिभिरिति च अनियतं स्यात् । तस्माद्वरं लक्षणैव । तथा च लिङ्गमैकान्तिकम् ।

[1]तथोत्थानविसर्जने ॥ ३-२-१०, अ. ४ ॥

ननु चोदाहरणमेवेदं, किमत्रातिदिश्यते । न हि अन्यत्वादृते सादृश्यमुपपद्यत एव । इदमस्त्यन्यत्वं पूर्वस्मिन्नधिकरणे

इति । एवं तावत् गौणपक्षमाश्रित्य राद्धान्तितम् । यदि पुनरयं मन्त्रोऽवघात एव मुख्यार्थः स्यात् नावघाते लक्षणा कल्पिता भवेत् । शक्यते च हविष्कृच्छब्देन अवघातो वक्तुं पत्नीवत् । यथा पत्नी यौगिकेन हविष्कृच्छब्देनोच्यते तथा अवघातोऽपि । अतो मन्त्रोऽवघाते प्राप्तत्वात् न विधीयते त्रिरावृत्तिरेव केवला विधायिष्यत इति । सत्यं शक्यते । आह्वानं तु अनन्वितार्थं प्राप्नोति । मन्त्रगतमेहीतिपदं[2] आह्वानात्मकं अनन्वितार्थं प्राप्नोति । तेन लिङ्गात्तावत् तन्मात्रस्य प्राप्तिर्नास्ति । अथाप्राप्तोऽवघातमन्त्रोऽपि विधीयते तत्राह—त्रिरिति च अनियतं स्यात् । तस्माद्वरं लक्षणैव । तथा च लिङ्गमैकान्तिकम् । तथा पत्नी हविष्कृदिति शक्या हविष्करणयोगेन वक्तुं वाक्सादृश्यं च हविष्कृत उच्यते । तच्च स्त्रीत्वेन । तच्च पत्न्यां ऐकान्तिकं [3]पुलिङ्गस्यावघातशब्दस्य दर्शनात् ।

तथोत्थानविसर्जने । ननु चोदाहरणान्तरमेवेदं किमत्रातिदिश्यते । न हि अन्यत्वादृते सादृश्यमुपपद्यते । अन्यथा तदेव हि स्यात् इदमस्त्यन्यत्वं पूर्वस्मिन्नधिकरणे

(1) P. 758 (2) G. इन्तिपदं (3) G. अनैकान्तिकम्

त्रिरित्येवद्विधीयते। अन्यत्सर्वमनूद्यते। इह पुनः कालसंयोगो विधातव्यः अप्राप्ते सयोगविधाने लक्षणा न न्याय्येति पूर्वपक्षवादी अधिकरणवैषम्यं मन्यते। राद्धान्तवादी तु प्रैषार्थानन्वयतुल्यत्वात् तथेत्युक्तवान्।

[1]सूक्तवाके च कालविधिः परार्थत्वात् ॥ ३-२-११ अ. ५ ॥

त्रिरित्येतावद्विधीयते अन्यत्सर्वमनूद्यते। इह पुनः कालसंयोगो विधातव्यः अप्राप्ते च कालसंयोगविधाने लक्षणा न न्याय्येति पूर्वपक्षवादी अधिकरणवैषम्यं मन्यते। अस्यार्थः—त्रिरित्येतावति विधीयमाने सर्वस्यानूद्यमानत्वात् अवघ्नन्तित्यस्य लक्षणा युक्ता। इह पुनः कालसंयोगोन प्राप्तः स विधातव्यः। न च विधौ लक्षणा युक्तेति विशेषः पूर्वाधिकरणादिति। राद्धान्ती तु प्रैषार्थानन्वयतुल्यत्वात् तथैवेत्युक्तवान्। यथा पूर्वत्र प्रैषार्थो नान्वीयते तथाऽत्राप्यचेतनत्वात् [2]उत्थानविसर्जनयोः प्रैषार्थानन्वयः। ननु विधिवाक्ये मुख्यत्वाश्रयणेन मन्त्रे किमिति प्रैषार्थो विवक्षितो न भवति। उच्यते—विधिवाक्ये लक्षणयापि हि पदार्थानामशेषाणामन्वयः। मन्त्रे तु सर्वथैव प्रैषार्थोऽन[3]न्वितः इत्यविवक्षाऽऽश्रयणीयेति।

सूक्तवाके च। इह सूक्तवाकेन प्रस्तरं प्रहरतीत्युदाहरणे किं हरतौ[4] सूक्तवाकश्चोद्यते उतात्रापि काललक्षणेत्युदाहरणदर्शनेन संशयः समर्थितः। सूक्तवाकेनेति तृतीयया मुख्यसूक्तवाकशब्दश्रवणात् हरतौ साधनत्वेन सूक्तवाकः चोद्यत इति प्रतीयते। हरतेश्च प्रहरणमात्रवाचित्वात् न सूक्तवाकः साधनत्वेनैवान्वयं यातीति काललक्षणेति च प्रतिभातीति। किं तावद्युक्तं? अग्नीदग्नीन् विहरेतिवत् अन्यार्थत्वान्मन्त्रस्य यथा प्रैषार्थत्वान्मन्त्रस्योत्थाने न विनियोगः तथा सूक्तवाकस्य देवताप्रकाशकत्वात् हरतौ च देवताया अनन्वयात् न विनियोगो युक्तः। अयं चापरो विशेषः यथा तत्र 'अग्नीदग्नीन् विहर' इत्यनेन शक्यते उत्थानं वक्तुं अग्निमिन्धे इत्यनया व्युत्पत्त्या यथाऽग्नीच्छब्देनोत्थानं शक्यते वक्तुं न तथा

---

(1) P. 759 (2) G. आह्वान (3) G. विवक्षित इत्यर्थः अतो विवक्षा नाश्रयणीयेति (4) G. हरणे

अत्राभिधीयते, नेयं काललक्षणा। किं तर्हि? मन्त्रोपदेशोऽयम्। ननु चान्यार्थो मन्त्र इत्युक्तम् न हरतेरभिधातेति। माभूत् हरतेर्वाचकः हरतिदेवतावाचको भविष्यति। ननु च निर्वृत्तयागदेवतावचनोऽयम्। न च हरतिर्यजतिः। उच्यते-निर्वृत्तदेवतावचनत्वेऽपि तत्संस्कारो यागो भविष्यति। पशुपुरोडाशवत्। ननु चायं हरतिर्न यजतिरित्युक्तम्। हरतिर्यजतिः मन्त्रसंबन्धात्।

सूक्तवाकेन हरतिः केनचित्प्रकारेणाभिधातुं शक्यते। तस्मात् कालविधिप्रतिपत्तौ च संभवन्त्यां नार्थकर्म कल्पितं भवति। यदि सूक्तवाको हरतौ साधनत्वेन चोद्यते तदा देवताप्रकाशकत्वात् सूक्तवाकस्य देवतायाश्च यागेऽनन्वयात् यागरूपता हरतेरङ्गीकरणीया; ततश्चार्थकर्मता। प्रतिपत्तौ च संभवन्त्यां नार्थकर्म कल्पितं भवति।

उपदेशो वा। अत्रोच्यते—नेयं काललक्षणा। किं तर्हि मन्त्रोपदेशोऽयम्। अयमाशयः—सूक्तवाकशब्देन मन्त्रविशेषः श्रुत्या उच्यते। कालस्तु लाक्षणिकः। न च श्रुतिसंभवे लक्षणा न्याय्येति मन्त्र एव करणं विधीयते। ननु चान्यार्थो मन्त्र इत्युक्तं, न हरतेरभिधातेति। मा भूत् हरतेर्वाचकः हरतिदेवताया वाचको भविष्यति। यद्यपि न साक्षाद्धरतिं अयं मन्त्रोऽभिधातुं शक्नोति तथापि तत्साधनभूतदेवताप्रकाशनद्वारेण भविष्यति हरणे करणम्। ननु च निर्वृत्तयागदेवतावाचकोऽयं, निवृत्ता ये यागाः तेषां या देवताः ता एव मन्त्रो वक्ति ततश्चान्यदीयसाधनवचनः कथं हरतिः देवतावाचको भविष्यति। न च हरतिर्यजतिः हरणं प्रक्षेपणमात्रमुच्यते न यागः। न चायागे देवता साधनं भवति। तस्मान्न साधनद्वारेणापि प्रकाशनसंभवः। उच्यते—निर्वृत्तयागदेवतावचनत्वेपि तत्संस्कारो यागो भविष्यति पशुपुरोडाशवत्। यथा पशुपुरोडाशः अग्नीषोमस्मरणार्थः तथाऽयमपि यागः पूर्वयागसंप्रतिपन्नदेवतात्वात देवतास्मरणार्थो भविष्यति। ननु चायं हरतिर्न यजतिरित्युक्तम्। तेनायागस्य सतो न देवतासंस्कारार्थत्वं भविष्यति। परिहरति—हरतिर्यजतिः मन्त्रसंबन्धात्। तथाहि-स्पष्टेन वाक्येन हरतौ मन्त्रो विनियुज्यत

ननु चैवं सति सैव लक्षणा प्राप्नोति। न लक्षणा, यागे सति हरत्यर्थस्य प्राप्तत्वात्। आलभेतेतिवत्। अन्यथा हि वृत्तमिदमा निर्देश्यं स्यात्। आशास्त इति च भूतनिर्देशः।

इत्यवगम्यते तेन हरतिरेव यजतिर्भविष्यति। ननु चैवं सति सैव लक्षणा प्राप्नोति, यस्या दृष्टत्वात् पूर्वपक्षपरित्यागः प्रक्षेपमात्रवचनेन हरतिना यजतिर्लक्षणयोपस्थापनीय इति। परिहरति—**न लक्षणा यागे सति हरत्यर्थस्य प्राप्तत्वात्। आलभेतेतिवत्।** अस्यार्थः—न हरतिना यजतिर्लक्ष्यते। किन्तु हरत्यर्थोऽयं यागे सति प्राप्त एवानूद्यते यथा अग्नीषोमीयं पशुमालभेतेत्यालम्भः। ननु च युक्तं तत्र द्रव्यदेवतासंबन्धेन यागस्य कल्प्यमानत्वात्। इह तु यागोपस्थापने न किञ्चित् प्रमाणमस्ति। उच्यते—सूक्तवाकेन प्रस्तरं प्रहरतीति सूक्तवाकहरणयोः संबन्धोऽवगम्यते। स च संबन्धोऽत्र विधीयते। तेनायमर्थः संपद्यते तथा यतेत यथा सूक्तवाकहरणयोः संबन्धः संपद्यत इति। तत्र सूक्तवाकेन होमात्मके यागे देवताप्रकाशनद्वारेण क्रियमाणे भवति सूक्तवाकस्य हरणस्य च क्रियाकारकलक्षणः संबन्धः। होमात्मकेपि यागे अनुष्ठीयमाने उपाधिभूतः प्रक्षेपः संपद्यते। मन्त्रेण च देवतामुद्दिश्य होमात्मको यागः शक्यते कर्तुं इति पारम्पर्येणास्ति साध्यसाधनभावः। तस्माद्यथा द्रव्यदेवतासंबन्धविधानेनार्थाद्यागलाभः तथेहापि मन्त्रहरणसंबन्धविधानेन यागलाभः। तेनैवात्र पूर्वपक्षसिद्धान्तविरचना—सूक्तवाकस्य हरणे साधकत्वानुपपत्तेः प्रहरणेन होमात्मको यागो लक्षयितव्यः। न चासौ युक्तः आख्यातार्थे प्रधाने लक्षणाप्रसङ्गात्। वरं सूक्तवाकेन काल एव लक्ष्यतामिति पूर्वः पक्षः। राद्धान्तस्तु न हरणेन यागो लक्षणीयः संबन्धविधानादेव होमात्मको यागः कल्प्यतां; तथा सति सर्वपदान्येव श्रौतार्थानि संभविष्यन्तीति। अत्र च यजत्यात्मकत्वात् हरत्यात्मकत्वं यजतेरेव यदुच्यते तदुपचारेण द्रष्टव्यम्। प्रक्षेपो हि हरणं; न च यागः प्रक्षेपात्मकः। वस्तुतस्तु होमरूपे यागे उपाधिभूतो हरतिः अर्थप्राप्त इति। एवं च सति 'इदं हविरजुषत अवीवृधत, अयं यजमान आयुराशास्ते' इत्युपपन्नार्थः मन्त्रो भविष्यति। **अन्यथा हि वृत्तमिदमा(न) निर्देश्यं स्यात्।** पूर्वपक्षे हि वृत्तं हविः सूक्तवाकेन कीर्तनीयम्। तत्र सन्निहिताभिधायक इदंशब्दो नोपपद्यते। राद्धान्ते तु वर्तमानं प्रस्तराख्यं हविरुच्यत इति युक्तः इदमा निर्देशः। **आशास्त इति च भूतनिर्देशः** पूर्वपक्षे सूक्तवाकस्य कर्मान्तरा-

तस्मात्सुष्ठूच्यते हरतिर्यजतिरिति। यदुक्तं प्रतिपत्तौ सम्भवन्त्यां नार्थकर्म न्याय्यमिति। स्विष्टकृद्वदविरोधो भविष्यतीत्युक्तम्।

[1]कृत्स्नोपदेशादुभयत्र सर्ववचनम् ॥ ३-२-१६ अ. ६ ॥

हरतिर्यजतिः सूक्तवाकमन्त्रस्येति स्थितम्। इदमिदानीं चिन्त्यते। किं सकलस्य सूक्तवाकस्य पौर्णमास्याममावास्यायां च प्रयोग उत देवतापदविभागेनेति।

ननु चिन्तैवेयं नोपपद्यते। स्थितमर्थैकत्वादेकवाक्यत्वम्। श्लिष्टपठितानां प्रधानदेवतापदानां न चात्रैकार्थत्वं संभवति। नापि विभज्यमानसाकाङ्क्षत्वम्।

संबन्धात् वृत्तकर्मगतैवाशीरुच्यते। तत्र वर्तमाननिर्देशो नोपपद्यते। राद्धान्ते तु कर्मान्तरगता वर्तमा(ने)नैवाशीरुच्यत इति नानुपपन्नं किञ्चित्। उपसंहरति—तस्मात् सुष्ठु शोभनं उच्यते हरतिर्यजतिरिति। एष चोपचारवादो भाष्यकारस्येति मन्तव्यम्। यदुक्तं प्रतिपत्तौ संभवन्त्यां नार्थकर्म न्याय्यमिति। भाष्यकारेण स्विष्टकृद्वदविरोधो भविष्यतीत्युक्तम्। यथा स्विष्टकृति द्रव्यमपि प्रतिपाद्यते देवताश्चेष्टाः स्मर्यन्ते तथेहापि प्रस्तरश्च प्रतिपाद्यते देवताश्चेष्टाः स्मृता भवन्ति यागेपि सतीति नास्ति विरोधः प्रस्तरमिति द्वितीयायाः प्रहरणस्य च प्रहार्यप्रधानतयेति।

कृत्स्नोपदेशात्। स्थितं तावत् वचनाद्धरतिर्यजतिः सूक्तवाकमन्त्रस्येति। इदमिदानीं चिन्त्यते—किं सकलस्य सूक्तवाकस्य पौर्णमास्याममावास्यायां च प्रयोगः उत देवतापदविभागेनेति। अनेनावान्तरसङ्गतिमाह संशयं च पूर्वपक्षाभावेनाक्षेप्तुं अनुभाषते। स्थिते हि वाक्येन प्रहरणे सूक्तवाकस्य विनियोगे पूर्वपक्षाशङ्का नान्यथा। आक्षेपमाह—ननु चिन्तेयं नोपपद्यते स्थितमर्थैकत्वादेकवाक्यत्वम्। न चात्र प्रधानदेवतापदानां प्रश्लिष्टपठितानामत्र अर्थैकत्वं संभवति। नापि विभज्यमानसाकाङ्क्षत्वम्।

(1) P. 764

तस्माद्भिन्नान्येतानि। भिन्नानां त्वेकवचननिर्देशे सति कथं कृत्स्नप्रयोग आशङ्क्यते। यथा आग्नेय्येत्युक्ते न कृत्स्ना आग्नेय्यः प्रयोक्तव्या इत्याशङ्का भवति। मुख्ये च संभवति न गौणे विनियोग इत्यपि स्थितम्। उच्यते। यथा भवानाह। किन्तु पूर्वपक्षवादी मन्यते सूक्तवाको वर्तेत इति वाक्यसमूहे एकवचनमिदं, एवमत्रापि सूक्तवाकेनेति समूहगतमेवेदमेकवचनं, अतः समुदाय एवात्र करणम्।

तस्माद्भिन्नान्येतानि वाक्यानि भिन्नानां चैकवचननिर्देशे सति कथं कृत्स्नः प्रयोग आशङ्क्यते। अस्यार्थः—प्रश्लिष्टपरिपठितानां मन्त्राणामर्थैकत्वात् विभागे च साकाङ्क्षत्वात् एकवाक्यत्वमुक्तम्। न चात्र प्रधानदेवतापदानामर्थैकत्वम्। न च विभागे साकाङ्क्षता। अतो भिन्नान्येवैतानि वाक्यानि। भिन्नेषु वाक्येषु एकवचनान्तेन शब्देन एकस्यैव वाक्यस्य विनियोगो न सर्वेषां एकवचनविरोधात् यथा पशुनेत्येक एव पशुर्गृह्यते। अतः सकलमन्त्रप्रयोगाशङ्का नोपपद्यते। यथा आग्नेय्या आग्नीध्रमुपतिष्ठते इत्यत्र आग्नेय्येत्युक्ते न कृत्स्ना आग्नेय्यः प्रयोक्तव्या इत्याशङ्का भवति। मुख्ये च संभवति न गौणे विनियोग इत्यपि स्थितम्। यदि सकलस्योभयत्र विनियोगः स्यात् तदा उभयदेवतावाचिनां पदानां परस्परं उभयत्र गौणार्थता स्यात्। न च मुख्येनैव विनियोगेन मन्त्रे कृतार्थेपि गौणे विनियोग इत्यपि स्थितं गौणमुख्याधिकरणे। अतो विभज्यैव विनियोगो युक्तः। उच्यते—यथाह भवान्, किन्तु पूर्वपक्षवादी मन्यते। सूक्तवाको वर्तेत इति वाक्यसमूहे एकवचनमिदम्। एवमत्रापि सूक्तवाकेनेति समूहगतमेवेदमेकवचनम्। अतः समूह एवात्र करणम्। अस्यार्थः—सूक्तवाको वर्तेत इति सकले मन्त्रे पठ्यमाने अध्येतृणामध्यापकानां श्रोतृणां च [आ]यत एव लोके व्यपदेशः। स चाभिन्नवाक्याभिप्रायेण। अन्यथा बहुवचनप्रसङ्गात्। तस्मादेकवचनदर्शनादवगच्छामः समूह एव सूक्तवाकशब्द इति। एवं च सूक्तवाकेन प्रस्तरं प्रहरतीत्यत्रापि समूह एव विनियुक्त इति कृत्स्न एवोभयत्र प्रयोज्यः।

ननु समूहस्यैकार्थता न संभवति। वचनात् कल्प्यते यथा उत्तमप्रयाजे। इमामाशङ्कां निवर्तयितुं इदमधिकरणम्। कृतः पूर्वपक्षः। इदानीं राद्धान्तोऽभिधीयते— नात्र समूहविनियोगे प्रमाणमस्ति सूक्तवाको वर्तत इति अन्यथाप्येकवचनोपपत्तेः। एकाभिधानाद्धि पाठकानां सूक्तवाको वर्तत इति युज्यतेऽभिधानम्। इह पुनः सूक्तवाकेन प्रस्तरं प्रहरतीति न लिङ्गबाधेनैकवाक्यत्वं शक्यते कल्पयितुम्, यथालिङ्गं विनियोगोपपत्तेः। तस्माद्विशेषाग्रहणात् येन

ननु च समूहस्यैकार्थता न संभवति न भिन्नदेवतावाचिनां पदानामेकार्थभावः संभवतीत्यर्थः। परिहरति—वचनात् कल्प्यते यथोत्तमे प्रयाजे। अस्यार्थः —यथा उत्तमे प्रयाजे, उत्तमशब्दः स्वभावात् त्रिप्रभृतीनामन्त्यमाह। तेन स्वाहाकारे यथा नानादेवतावाचिनामपि पदानामेकार्थभावः तथेहापि वचनात् कल्प्यत इतीमामाशङ्कां निवर्तयितुं इदमधिकरणम्। कृतः पूर्वपक्षः। इदानीं राद्धान्तोऽभिधीयते। नात्र समूहविनियोगे प्रमाणमस्ति। कुतः? सूक्तवाको वर्तत इत्यन्यथाप्येकवचनोपपत्तेः। अस्यार्थः—सूक्तमनेनोच्यत इति सूक्तवाकशब्देन वाक्यमुच्यते वाक्येन हि सूक्तमुच्यते न वाक्यसमूहेन, तस्माद्वाक्यमेव सूक्तवाकः। भिन्नानि चैतानि वाक्यानि। तस्मादेकवचनश्रवणात् न सकलस्य विनियोगः। कथं तर्हि सूक्तवाको वर्तत इति सकल एकवचनमुपपद्यत इति। एकाभिधानाद्धि पाठकानां सूक्तवाको वर्तत इति युज्यतेऽभिधानम्। सर्वाण्यपि तानि सूक्तमेकं वदन्ति। तेन तदेकत्वात् कारकरूपतामेवाश्रित्य बहुष्वप्येकवचनप्रयोगो न विरुध्यते यथा पदं वाक्यमिति बहुष्वपि वर्णेषु पदेषु च एककार्यनिबन्धनः एकवचनप्रयोगः इह पुनः सूक्तवाकेन प्रस्तरं प्रहरतीति, न लिङ्गबाधेनैकवाक्यत्वं कल्पयितुं शक्यं यथालिङ्गं विनियोगोपपत्तेः। येन ह्येकमिदं वाक्यं प्रस्तरप्रहरणे विनियुज्यत इत्याश्रीयते तेनापि भिन्नदेवतावाचिनां पदानां स्वसामर्थ्यबाधेनैकार्थत्वं कल्पयितव्यम्। तच्चानुपपन्नम्। यथालिङ्गमपि विनियोगोपपत्तेः। तस्मात् सर्वेषां सूक्तवाकवचनेन विशेषाग्रहणात् येन

केनचित सूक्तवाकेन प्रहृते प्रहृतं भवति सूक्तवाकेन प्रस्तरं प्रहरतीति। समुदायाभिप्रायस्तु हेयतयोपन्यस्तः।

[1]लिङ्गक्रमसमाख्यानात् काम्ययुक्तं समाम्नानम् ॥ ७ ॥

आधस्त्येऽधिकरणे उक्तं प्रकरणात् प्रत्येकं शेषत्वे प्राप्ते लिङ्गाद्विभाग इति। इहेदानीं प्रकरणाद्यत् बलीयः तत्क्रमसमाख्याभ्यां नितरां बलीय इति पूर्वपक्षवादी मन्यते। लिङ्गाच्छेषत्वे अतन्त्रे क्रमसमाख्ये।

ननु नैव लिङ्गं केवलं विनियोजकं राद्धान्ते वक्ष्यति विनियोजकत्वे तु बलाबलम्।

केनचित् सूक्तवाकेन कृते प्रहरणे कृतं भवति सूक्तवाकेन प्रस्तरं प्रहरतीति यथाचोदितानुष्ठानम्। ननु भाष्यकारेण दर्शपूर्णमाससमुदाये सूक्तवाकसमुदायविनियोगात् विभज्य विनियोगो भवतीति राद्धान्तोपक्रमे किमिति दर्शितं यदि पूर्वोक्तो राद्धान्तमार्गः इत्याशङ्क्याह—समुदायाभिप्रायस्तु हेयतयोपन्यस्तः। राद्धान्ताभासनिराकरणायेदमुक्तमित्यर्थः।

लिङ्गक्रमसमाख्यानात्। आधस्त्ये अधिकरणे उक्तं—प्रकरणात् प्रत्येकं शेषत्वे प्राप्ते लिङ्गाद्विभाग इति इदानीं प्रकरणात् यद्बलीयः तन्नितरां क्रमसमाख्याभ्यां बलीय इति पूर्वपक्षवादी मन्यते। अनेनावान्तरसङ्गतिमाह। लिङ्गाच्छेषत्वे अतन्त्रे क्रमसमाख्ये। लिङ्गेन मन्त्रस्य शेषत्वे संभवति क्रमः समाख्या च कारणमेव न भवतीति न विशेषोपसंहारः। तस्माद्यावदैन्द्राग्नकर्म मन्त्रस्य विनियोगः। ननु च लिङ्गं नैव केवलं विनियोजकमिति राद्धान्ते वक्ष्यते यदि हि केवलं लिङ्गं विनियोजकं स्यात् तदा क्रमसमाख्यानिरपेक्षं सर्वत्र विनियुञ्जीत। न चैवमिष्यते। तत्कथं सर्वत्र विनियोजकाशङ्का। विनियोजकत्वे च बलाबलम्। अस्यार्थः—स्थिते विनियोजकत्वे क्रमस्य समाख्यायाश्च लिङ्गेन सह

(1) P. 772

किमर्थं वा प्राक् श्रुतिलिङ्गाधिकरणात् बलाबलचिन्ता। अत्राभिधीयते। नैवेयं बलाबलचिन्ता। सापेक्षं लिङ्गं विनियोजकमित्यत्र प्रतिपाद्यते। कथं तर्हि पूर्वः पक्षः? लिङ्गमपि श्रुत्यादिवत् प्रमाणान्तरनिरपेक्षमिति बलाबलसूत्रे अनुक्रमणात् पूर्वपक्षोऽयम्। राद्धान्तस्तु—सामान्यसंबन्धे सति शेषिविशेषे लिङ्गं विनियोजकमिति। यथा लिङ्गं न केवलं विनियोजकं तथा श्रुतिलिङ्गाधिकरणे निपुणतरमुपपादयिष्यामः। अतः क्रमसहितं च लिङ्गं विनियोजकम्।

बलाबलचिन्ता न चाद्यापि तयोः विनियोजकत्वमुक्तम्। तेन नेदमधिकरणमारब्धुमधुनोचितम्। **किमर्थं च प्राक् श्रुतिलिङ्गाधिकरणात् बलाबलचिन्ता।** **अत्राभिधीयते—नैवेयं बलाबलचिन्ता।** यदि बलाबलचिन्ता स्यात् तदा स्यादेव पूर्वोक्तदोषः। न त्वेषा बलाबलचिन्ता। **किन्तु सापेक्षं लिङ्गं विनियोजकं इत्यत्र प्रतिपाद्यते।** तर्हि निरपेक्षं लिङ्गं विनियोजकमिति पूर्वपक्षेण भवितव्यम्। न चायं पूर्वपक्षो युक्तः। सामर्थ्यमात्रस्य विनियोजकत्वानुपपत्तेः। इदमनेन कर्तव्यमिति न सामर्थ्यमात्रात ज्ञानमुत्पद्यते। तदिदमाह—**कथं तर्हि पूर्वः पक्षः।** उत्तरं—**लिङ्गमपि श्रुत्यादिवत् प्रमाणान्तरनिरपेक्षमिति बलाबलसूत्रे** 'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये' इत्यत्रानुक्रमात् आपाततः **पूर्वपक्षोऽयम्।** तुल्यवदनुक्रमणात् कस्यचिदियमाशङ्का श्रुत्यादिवन्निरपेक्षं लिङ्गमिति। **राद्धान्तस्तु—सामान्यसंबन्धे** 'अनेन मन्त्रेणेदं कर्तव्यं' इत्येवं रूपे प्रमाणान्तरावसिते सति **शेषिविशेषे लिङ्गं विनियोजकमिति। यथा च लिङ्गं न केवलं विनियोजकं तथा श्रुतिलिङ्गाधिकरणे निपुणतरमुपपादयिष्यामः।** एतच्च भाष्यकारायमाणो **निबन्धकार** आह—यतः सापेक्षं लिङ्गं विनियोजकं **अतः क्रमसहितं** समाख्यासहितं च **विनियोजकमिति।** ननु च समाख्यानमात्रादपि प्रकृतमुदाहरणं सिद्ध्यति। तथा हि—काम्ययाज्यानुवाक्याकाण्डमिति समाख्यायां सत्यां काम्यायामिष्टौ याज्याकार्ये विनियोगः सिद्ध्यति। ननु चैक-

उभयलिङ्गप्रमाणसाहित्ये च प्रयोजनमुक्तं भाष्ये ।

[1]अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात् ॥ ८ ॥

स्मिन्नपि कर्मणि अनेकयाज्यानुवाक्यायुगलस्य विनियोजकत्वं स्यात् । तथा द्वितीयेऽपि कर्मणि प्रथमपठितस्य युगलस्य विनियोगः । नैतदेवम् । एकेन युगलेन कर्मणां कृतार्थत्वात् नानेकयुगलविनियोगे प्रमाणमस्ति । तेनैकेनैवैकत्र भवितव्यम् । तत्र विनापि लिङ्गं क्रमाख्येन प्रमाणेन प्रथमपठिते कर्मणि प्रथमस्यैव विनियोगो भविष्यति, प्राथम्यात् । अनेनैव न्यायेन द्वितीये द्वितीयस्य विनियोग इति । तथा लिङ्गक्रमादप्ययमर्थो लभ्यते तत्र क्रमेण संबन्धे सति लिङ्गेन याज्याकार्ये विनियोगसिद्धेः । न च सामिधेनीकार्ये विनियोगः शङ्कनीयः, ऐन्द्राग्नत्वादासां ऋचां आग्नेयत्वाच्च सामिधेनीनाम् । तस्मात् किमर्थं लिङ्गक्रमसमाख्यानादिति ? लिङ्गक्रमात् समाख्यानादिति च उभयं सहितमुक्तं यावता एकमेवोच्यतामित्याशङ्क्याह—**उभयप्रमाणसाहित्ये च प्रयोजनमुक्तं भाष्ये** । तद्यथा [2]यदि लिङ्गक्रमादित्येतावदुच्येत तदा पाथिकृतीये कर्मण्याग्नेयस्य युगलस्य सामिधेनीकार्येऽपि विनियोगः स्यात्" । तथाहि तद्युगलं अग्निदेवताके पाथिकृतीये कर्मणि याज्याकार्ये[3]पर्याप्तं सामिधेनीकार्येऽपि स्यात् । आग्नेय्यो हि सामिधेन्यः तस्माद्याज्याकार्य एव विनियोगो यथा स्यादिति वक्तव्यं समाख्यानादिति । नन्वेवं तर्हि तदेवास्तु किं लिङ्गक्रमादित्यनेन ? उच्यते । काम्ययाज्यानुवाक्याकाण्डमिति या समाख्या तया याज्याकार्ये विनियोगो भवेत् । अथ पुनः निर्वृत्ते याज्याकार्ये लिङ्गक्रमात् सामिधेनीकार्ये विनियोगस्सिद्धो भवति । समाख्या तु काम्ययागसंबन्धमात्रहेतुतया आदरणीयेत्यतः एतदवस्थितं यत्र लिङ्गक्रमानुगुणा समाख्या तत्र तद्वशेन लिङ्गक्रमविनियोगः संभवति । यत्र पुनः समाख्या लिङ्गक्रमविनियोगविरोधिनी तत्र तद्वशेन सामान्यसंबन्धमात्रपरेति वर्ण्यत इति ।

अधिकारे च । अत्र भाष्यम्—किं प्रकृताभिः लिङ्गवतीभिरुपस्थातव्यम् ; उत उत दाशतयीभ्यः एवंलिङ्गा आगमयितव्याः इति । तत्र दाशतयीग्रहणं न प्रकृतत्यागाय

---

(1) P. 773 (2) P. 772 (3) R. याज्याभावे

आग्नेय्याऽऽग्नीध्रमुपतिष्ठत इत्येवमादिषु लिङ्गनिर्देशेषु किं यावल्लिङ्गा ग्रहीतव्याः उत प्रकृतानां ग्रहणमात्रमिति। पूर्वपक्षवादी तु विधेयस्य प्रकृताभिधानसामर्थ्यं न संभवति इति मन्वानो यावल्लिङ्गं ग्रहणमित्याह। उद्देश्यपदं हि प्रकृतापेक्षं भवति न पुनर्विधेयार्थसमर्पकमपि। उद्देश्यत्वं हि नाम प्रयोजनवदर्थता। न च सामान्यं प्रयोजनवद्भवति उपात्तविषयत्वात् प्रयोजनवत्तायाः। ननु च सामान्यमेवोपादीयते। नापरिमितस्योपादानं संभवति। तस्माल्लक्षणतयैव तत्र सामान्यम्। यथोक्तं ग्रहाधिकरणे विधेयं पुनः सपरिमाणं शब्दादेवावगन्तव्यम्। अन्यतोऽनवगमादिति पूर्वः पक्षः।

किन्तु विप्रतिपन्नत्वेनोपादानायेति मत्वा संशयं कुर्वन्नाह—आग्नेय्या आग्नीध्रमुपतिष्ठत इत्येवमादिषु लिङ्गनिर्देशेषु किं यावल्लिङ्गं ग्रहीतव्या उत प्रकृतानां ग्रहणमिति। तत्र पूर्वपक्षवादी विधेयस्य प्रकृताभिधानसामर्थ्यं न संभवतीति मन्वानो यावल्लिङ्गग्रहणमित्याह । का पुनर्युक्तिः विधेयस्य प्रकृताभिधानसामर्थ्यं न संभवतीति तत्राह—उद्देश्यपदं हि प्रकृतापेक्षं भवति न पुनर्विधेयार्थसमर्पकमपि। किमिति? उद्देश्यत्वं हि नाम प्रयोजनवदर्थता। प्रयोजनवांश्चासौ अर्थश्चेति पयोजनवदर्थः तस्य भावः तत्ता प्रयोजनवानर्थः उद्देश्यो भवतीत्यर्थः। न च सामान्यं प्रयोजनवद्भवति न व्रीह्यादिसामान्यं प्रयोजनवद्भवति उपात्तविषयत्वात् प्रयोजनवत्तायाः। य एवोपात्तो विशेषः स एव प्रयोजनवत्ताया विषयः। स एव प्रयोजनवानित्यर्थः। भवत्वेवं तथापि सामान्यं प्रयोजनवदेव तस्यैव विनियोगात् विनियुक्तस्य चोपादानात्। तदाह— ननु च सामान्यमेवोपादीयते। परिहरति—[1]नापरिमितस्योपादानं संभवति। सामान्यं हि अपरिमितं भवति। न चापरिमितोऽर्थः उपादातुं शक्यते तस्माल्लक्षणतयैव तत्र सामान्यम् उपात्तविशेषोपलक्षणतयैव तत्रोद्देश्यप्रयोगे सामान्यम्। यथोक्तं ग्रहाधिकरणे विधेयं पुनः सपरिमाणं सङ्ख्यादिसहितं शब्दादेवावगम्यते अन्यतोऽनवगमादिति पूर्वः पक्षः। आग्नेयीमात्र-

(1) G. नातिरिक्तस्य

प्रकृतमप्रकृतं वा यावल्लिङ्गं विधेयम्। किं प्रकृताभिर्लिङ्गवतीभिरुपस्थातव्यं उत दाशतयीभ्य एवंलिङ्गा आगमयितव्या इति दाशतयीग्रहणं न प्रकृतप्रतिपक्षतया। एतदुक्तं भवति। किं यावल्लिङ्गा ग्रहीतव्या उत प्रकृता एवैवंलिङ्गा आगमयितव्या इति।

'किमिदं [1]उपदिष्टोपदेशो न न्याय्यः'? इदमिदम्। उपदिष्टतैव हि तस्य विशेषः। न चासौ विधेयाङ्गमित्युक्तम्। प्रकृतत्वं पुनरभिधानात्तुल्यम्। अत्राह–[2]विरोधे सति लिङ्गेन प्रकरणं बाध्यते

स्यापि विनियोगे न कश्चिद्विरोधः। तेन किमिति सामान्यवचनश्शब्दो विशेषेऽवस्थाप्यत इति। अतः प्रकृतमप्रकृतं च यावल्लिङ्गं मन्त्रजातं विधेयम्। कथं तर्हि भाष्यकारो दाशतयीभ्य आगमयितव्या इत्याह नन्वेवमेव वक्तव्यं यावल्लिङ्गं विधेयमिति तत्राह —किं प्रकृताभिर्लिङ्गवतीभिरुपस्थातव्यं उत दाशतयीभ्यः एवंलिङ्गा आगमयितव्या इति दाशतयीग्रहणं न प्रकृतप्रतिपक्षतया। प्रकृतत्यागाय न दाशतयीग्रहणं किन्तु विप्रतिपन्नत्वात् तेषां तदेवोक्तम्। एतदुक्तं भवति भाष्ये किं यावल्लिङ्गं ग्रहीतव्या उत प्रकृता एवैवं लिङ्गा इति। अत्र भाष्यं— उपदिष्टोपदेशो ह्येवंजातीयकस्य न न्याय्य" इति। तदयुक्तम्। उपदिष्टा ऋचस्तत्र तत्रोपदिश्यन्ते विनियोगविधिभेदे च कथमन्याय्यता अनेनाभिप्रायेणाह—किमिदमुपदिष्टोपदेशो न न्याय्य इति। उत्तरं—इदमिदं उपदिष्टतैव हि तस्य विशेषः न चासौ विधेयाङ्गमित्युक्तम्। अस्यार्थः—येन हि प्रकृतानामेव विनियोग इत्याश्रितं तेनैवं वक्तव्यं उपदेशेन विशिष्टा विधीयन्ते इति। उपदेशेन यदि विशिष्टा विधीयन्ते तदा प्रकृतता लभ्यते। न चासावुपदेशो विधेयाङ्ग, न विधेयमुपलक्षयितुमसावुपदेशः किन्तु विधातुमेवेत्युक्तम्। अभिधानात्तु यत् प्रकृतत्वं तत्तुल्यं तदाह—प्रकृतत्वं पुनरभिधानात् तुल्यम्। अत्र भाष्यमाह—विरोधे सति प्रकरणं लिङ्गेन बाध्यते

---

(1) P. 774 (2) P. 775

न चैतयोर्विरोध" इति। कोऽभिप्रायः? अयमभिप्रायः प्रकृतेऽपि गृह्यमाणेऽभिहित एवार्थो गृहीतो भवति। यथैकस्यामपि गव्युपादीयमाने चरितार्थैव गामालभेतेति श्रुतिः। नैतदेवमिति। नात्र लिङ्गवत्ता शब्दार्थ इति मन्यते। उच्यते, तल्लिङ्गवत्ताऽनेनेति हेयतयाऽस्य पक्षस्योपन्यासः। दाशतय्यां पुनः मन्त्रव्यक्ताविति प्रकृत एव संपन्ने लिङ्गार्थे निष्प्रमाणकः प्रकृतबाध इति मन्यते।

न चैतयोर्विरोध इति तदनुपपन्नं, यतोऽस्त्येवात्र विरोधः लिङ्गेन हि अप्रकृतानामपि विनियोगः प्रतिभाति। प्रकरणेन तु न विनियोगस्तासामुपपद्यत इत्यनेनाभिप्रायेण पृच्छति—**कोऽभिप्राय इति।** उत्तरं—**अयमभिप्रायः-प्रकृतेपि गृह्यमाणे अभिहित एवार्थो ग्रहीतव्यः यथा एकस्यामपि गव्युपादीयमाने चरितार्थैव गामालभेतेति श्रुतिः।** तेन प्रकृतग्रहणेपि लिङ्गार्थोऽनुगृहीत एवेति नास्ति विरोधः। [1]"नैतदेवं" इत्यादिभाष्यं व्याचष्टे—**नात्र लिङ्गवत्ता शब्दार्थ इति मन्यते** यथा गवादेराकृतिरर्थः तस्याश्च साधनभावः। स चैकस्मिन्नपि गव्युपादीयमाने कृत एव। इह तु लिङ्गोपलक्षितव्यक्तयो विनियुज्यन्ते। तेनास्ति विरोधः इति। अत्र भाष्यं—[2]"उच्यते। लिङ्गवत्ताऽनेन" इत्यादि तदनुपपन्नम्। न हि उपस्थानं लिङ्गवत्ताया अनुग्रहाय अपि तु आग्नीध्रप्रकाशनाय। अतः कथमेतदित्यत्राह—**तल्लिङ्गवत्ताऽनेनेति हेयतयाऽस्य पक्षस्योपन्यासः।** एतदुक्तं भवति—यद्ययं स्थायी पक्षः स्यात् तदा अत्र यथास्थितं वस्तूच्येत। हेये त्वस्मिन् पक्षे अपसिद्धान्ताभिधानमपि न दोषः।

"दाशतय्यां पुनः मन्त्रव्यक्तौ"[3] इत्यादिभाष्यम्। तदनुपपन्नमिव प्रतिभाति यस्मात् पूर्वपक्षेपि दाशतय्यां मन्त्रव्यक्तावुपादीयमानायां नैव प्रकृतमन्त्रप्रतीतिर्बाध्यते। तल्लिङ्गवतीनां सर्वासामेव ग्रहणमिति पूर्वपक्षकरणात् इत्याशङ्क्य व्याचष्टे—**दाशतय्यां पुनः मन्त्रव्यक्ताविति प्रकृत एव संपन्ने लिङ्गार्थे निष्प्रमाणकः प्रकृतबाध इति मन्यते।** अस्यार्थः—लिङ्गस्य

---

(1) P. 775 (2) P. 776 (3) P. 776

[1]लिङ्गजनितस्तु प्रत्ययः कश्चिन्मिथ्येति । **लिङ्गार्थसंपत्तौ सत्यां कोऽयं मिथ्याभावः । अयमभिप्रायः—नायं सामान्योपसंहारः शब्दार्थ इति । 'स्वर्गकामो यजेत' इति न सम्पत्या अन्यप्रयोगार्होऽपि शास्त्रार्थः पर्यवसित इति शक्यते वक्तुम् । ननु च व्यक्तिरपदार्थ इति सामान्योपसंहृतिरेवोपन्यस्ता[1] । एतदेव न विजानीम इति प्रत्ययार्थप्रधानत्वात् तद्धितान्तानां न तद्वृत्ताऽङ्गमिति**

ह्येतत्सामर्थ्यं यत् लिङ्गवती मन्त्रव्यक्तिः विनियोज्येति । सा च प्रकरणवशेन प्रकृतैव ग्राह्येति प्रतिभाति । तत्र यदि दाशतय्यपि मन्त्रव्यक्तिः प्रतिगृह्येत प्रकृतैव मन्त्रव्यक्तिर्ग्राह्येति प्रतीतिरपबाधिका स्यात् । बाधश्च निष्प्रमाणकः । अपरमपि भाष्यम्—[1]"लिङ्गजनितस्तु प्रत्ययः" इत्यादि तदाक्षिपति—**लिङ्गार्थसंपत्तौ सत्यां कोऽयं मिथ्याभावः** यदि लिङ्गार्थस्त्यज्येत स्याल्लिङ्गजनितस्य प्रत्ययस्य मिथ्याभावः प्रकृतग्रहणे तु संपन्न एव लिङ्गार्थः । समाधत्ते—**अयमभिप्रायः–नायं सामान्योपसंहारार्थः शब्द इति स्वर्गकामो यजेतेतिवत् न** [2]**संपत्त्यान्यप्रयोगार्होऽपि शास्त्रार्थः पर्यवसित इति शक्यते वक्तुम** । अस्यार्थः–योऽयमाग्नेयीशब्दः नासौ सामान्योपसंहारार्थः सामान्यं लिङ्गवत्त्वं तत् प्रकृते उपसंह्रियतामिति नैवमर्थः । किं तर्हि या एवंलिङ्गा[3]मन्त्रव्यक्तिः तस्या विनियोगः स्यादित्येवमर्थः । ततश्च यथा स्वर्गकामो यजेतेति शास्त्रार्थः पुरुषान्तरप्रयोगार्होऽपि केनचिदुद्दिष्टमित्येतावता शास्त्रार्थसंपत्त्या पर्यवसित इति न शक्यते वक्तुं सर्वस्वर्गकामिव्याप्यत्वात् । तथा अयमपि सर्वलिङ्गवन्मन्त्रव्यापित्वात् । अतः प्रकृतमात्रग्रहणे भवत्येव लिङ्गजनितस्य प्रत्ययस्याशेषमन्त्रविनियोगविषयस्य मिथ्याभाव इति । ननु च "[4]व्यक्तिरपदार्थ" इति भाष्यम्–तदनुपपन्नं यद्यपि व्यक्तिरपदार्थः तथापि कथं प्रकृतानामेव ग्रहणं इत्याशङ्क्य व्याचष्टे—**ननु व्यक्तिरपदार्थ इति सामान्योपसंहृतिरेवोपन्यस्ता** । प्रकरणवशेन प्रकृत एव मन्त्रे सामान्यमुपसंह्रियत इत्यर्थः । 'एतदेव' इति भाष्यम् । तस्यार्थः—न लिङ्गवत्ता शब्दार्थो भवतीति । तदुपपादयति **—एतदेव न विजानीम इति प्रत्ययार्थप्रधानत्वात् तद्धितान्तानां न तद्वृत्ता अङ्गमिति**

---

(1) P. 776 (2) G. संपदा (3) R. मन्त्रलिङ्गा (4) P. 776

मन्यते। तस्मान्न सामान्योपसंहारार्थमिदं शास्त्रम्। नन्वेततदुक्तं कार्यान्तरे प्रकृतस्योपदेशो नासावर्थान्तर उपदेक्ष्यत इति उपदिष्टोपदेशपरिहारायायमुपन्यासः। किमिति? लिङ्गवन्मात्रग्रहणादिति दर्शितम्। नात्रोपदिष्टता हेतुः। ननु चैवं सति प्रकृतबाधः। भवत्वभिधानात् प्रकृतबाधो न दोषः।

मन्यते। 'सास्य देवता' इत्यधिकारे अग्नेर्ढक इति ढक्प्रत्ययः तद्धितः अग्निशब्दात् अग्निरस्य देवतेत्यर्थे विहितः। तेन यस्याग्निः देवता मन्त्रस्य स आग्नेयशब्देनोच्यते। न पुनरस्यान्यार्थाभिधानसामर्थ्ययोगिता। यश्च अस्य शब्दार्थः तस्य विनियोगोऽवगतः मन्त्रश्चास्यार्थः तेन मन्त्रः अङ्गं न तद्वचा। तस्मात् न प्रकृतोपसंहारार्थं न प्रकृतविनियोगार्थमिदं शास्त्रं—आग्नेय्याऽऽग्नीध्रमुपतिष्ठत इति। [1]"नन्वेतदुक्तं कार्यान्तरे प्रकृतस्योपदेश' इत्यादिभाष्यम्। तदनर्थकं प्रतिभाति पूर्वमप्यस्यार्थस्योक्तत्वात्। अथ पूर्वोक्तमपि परिहर्तुमुपन्यस्यते तन्न, परिहारादर्शनात्। अथोच्येत "अनन्तरमेवोच्यत" इत्यादिना परिहारो दत्त इति। तन्न। न हि लिङ्गवन्मात्रग्रहणादुपदिष्टोपदेशः परिहृतो भवति। तस्मादनर्थकमित्येतदेवमाशङ्क्याह—नन्वेतदुक्तं कार्यान्तरे प्रकृतस्योपदेशात् नासावर्थान्तरे उपदेक्ष्यत इत्युपदिष्टोपदेशपरिहारायायमुपन्यासः। परिहाराभावान्न परिहारार्थ इति मन्वानः पृच्छति—किमितीति। लिङ्गवन्मात्रग्रहणादिति दर्शितम्। अस्यार्थः- लिङ्गेनोपलक्षितानां मन्त्राणां ग्रहणाद्धेतोः उपदिष्टोपदेशपरिहारोऽयमिति दर्शितं भाष्ये। कथं पुनः परिहृत इत्यत्राह—नात्र उपदिष्टता हेतुः। मन्त्रग्रहणे हि यद्युपदिष्टता हेतुः स्यात् तदा उपदिष्टेनैव रूपेण विनियोगो वक्तव्यः। स च विनियुक्तविनियोगविरोधान्न न्याय्यः। यदा पुनः उपदेशानन्तरापेक्षेण लिङ्गेनोपलक्षणेन विनियोगः तदा न किञ्चित् दुष्यतीति, ननु चैवं सति प्रकृतबाधः प्रकरणबलेन प्रकृता एव ग्राह्या इति येयं प्रतीतिः तस्या बाधः उत्तरं—भवत्वभिधानात् प्रकृतबाधो न दोषः श्रुतिबलेन प्रकृतबाधो भवन्नपि न दोषः।

---

(1) P. 777

अपि च न लिङ्गं प्रकरणं वाऽनुग्रहीतव्यमिति नानुग्रहार्था शास्त्रार्थोपसंहृतिरिति यदुक्तं तदिदम्।

[1]तदाख्यो वा प्रकरणोपपत्तिभ्याम्॥ ३-१-२२ अ. ८॥

अत्रोच्यते—राद्धान्ती तु प्रकृतेऽपि विधेयप्रत्ययो नैव न घटत इति मन्वानः प्रकृतस्यैव ग्रहणमित्युक्तवान्। कथं? उद्देश्यत्वं हि नाम प्रयोजनवतो भवति।

"[2]अपि च न लिङ्गं प्रकरणं वाऽनुग्रहीतव्यं" इत्यादि भाष्यम्। तस्यार्थः—न प्रकरणानुग्रहायानुष्ठानं, किं तर्हि प्रकृतस्य फलवत्त्वात् सर्वाश्च मन्त्रव्यक्तयो विनियोगेन फलवत्य इति सर्वासामेव ग्रहणमिति। इममस्य भाष्यस्यार्थं व्याचष्टे—**अपि च न लिङ्गं प्रकरणं वाऽनुग्रहीतव्यमिति नानुग्रहार्था शास्त्रार्थोपसंहृतिरिति** यदुक्तं तदिदं क्वचिदप्यनुग्रहात् शास्त्रोपसंहृतिर्नास्ति स्वर्गकामादिवदिति।

तदाख्यो वा प्रकरणोपपत्तिभ्याम्। अत्रोच्यते। राद्धान्ती तु प्रकृतेपि विधेयप्रत्ययो विनियोगप्रत्ययः **नैव न घटते** अपि तु घटत एव इति **मन्वानः प्रकृतस्यैव ग्रहणमित्युक्तवान्।** अस्यार्थः—यदि विनियुक्तविनियोगविरोधेन प्रकृते विधेयप्रत्ययो न घटते। अतो विनियुक्तविनियोगबाधकपरिहाराय लिङ्गवन्मन्त्रो विनियुज्यते। यतस्तु खलु प्रकृतेपि विनियुज्यमाने विधेयप्रत्ययो घटते अतः प्रकृतत्यागे प्रमाणाभावात् प्रकृतस्यैव ग्रहणमिति। ननु यद्युपदिष्टत्वेनोपदेशो भवति तत्र प्रकृतमात्रग्रहणम्। उपदिष्टत्वेन चोपदेशो दुष्परिहरो विनियुक्तविनियोगविरोधदोषः। अनेनाभिप्रायेणाह—**कथमिति।** उत्तरं—**उद्देश्यत्वं हि प्रयोजनवतो भवति।** यत्र ह्युद्देश्यता तत्रोपदिष्टैनैव रूपेण ग्रहणम्। इह तु विधेयत्वान्न कार्यान्तरसंबन्ध उपकरोति। तस्मात् कार्यान्तरविनियोगनिरपेक्षेण रूपेणोपादानात् प्रकृतानामपि विनियोगे नास्ति विनियुक्तविनियोगविरोधः। तदाह

(1) P. 778 (2) P. 778

प्रकृतत्वं पुनः विधेयेपि प्रकृतप्रत्ययं नैव बाधते। न हि सन्निहिते विशेषे सामान्यशब्दः तमतिवर्तते। नीलोत्पलमितिवत् गामानयेतिवद्वा। तस्मात् प्रकृतप्रत्यर्थी न सामान्यशब्दो भवितुमर्हति। प्रकृता एवैवं लिङ्गव्यक्तयः परिगृह्यन्त इति सिद्धम्। सर्वेषां चोपदिष्टत्वादिति। यदुक्तं तदिदम्। यद्युपदेशमात्रं सर्वत्रास्ति प्रकृतग्रहणेऽप्युपदेशो न विशेषणमित्युक्तम्।

—[1]प्रकृतत्वं पुनः विधेयेपि प्रकृतप्रत्ययं नैव बाधते। यथा उद्देश्ये प्रकृतप्रत्ययं नैव बाधते तथा विधेयेपि नैव बाधते कार्यान्तरविनियुक्तत्वं हि बाधकं न प्रकृत[त्व]मात्रं, अविरोधात्। प्रकृतप्रत्यय एव तर्हि कुत इत्यत्राह—न हि सन्निहिते विशेषे सामान्यशब्दः तमतिवर्तते नीलोत्पलमितिवत् गामानयेतिवद्वा सामान्येनोपाधिना शब्दः सामान्यशब्दः विशेषवर्ती सन्निहिते विशेषे सन्निहितं विशेषं नातिवर्तते सामान्येनोपाधिना देवतासंबन्धेन चायमभिनिर्वृत्त आग्नेयीशब्दः सामान्यशब्दः सन्निहिते मन्त्रे न तमतिवर्तितुमर्हति। प्रकृतमात्रग्रहणे दृष्टान्तमाह—नीलोत्पलवदिति। अत्र नीलगुणसंबन्धार्हत्वात् व्यक्तेः आकृतिवचनोऽप्युत्पलशब्दः आकृतिसंबन्धलक्षणसामान्योपाधिप्रवृत्तोऽपि व्यक्तिपरः सन्निहितायामेव व्यक्तौ वर्तते। दृष्टान्तान्तरमाह—गामानयेतिवद्वेति। पूर्वत्र गुणयोगाद्व्यक्तिवचनता। इह पुनः आनयनलक्षणक्रियायोगादिति दृष्टान्तद्वयोपादानम्। उपसंहरति—तस्मात् न प्रकृतप्रत्यर्थी सामान्यशब्दो भवितुमर्हतीति। प्रकृता एवैवं लिङ्गव्यक्तयः परिगृह्यन्ते इति सिद्धम्। [2]अत्र सूत्रं "सर्वेषां चोपदिष्टत्वात्" इति। तस्यार्थं व्याचष्टे सूत्रं पठित्वा—यदुक्तं यदस्माभिः पूर्वमुक्तं राद्धान्तवादी पुनरित्यादिना तदिदम्। तदाह—यद्युपदेशमात्रं वस्तुस्थित्या तत् सर्वत्रास्ति। अथोपदेशान्तरेणैवोपदिष्टेनैव रूपेणोपदेशः अतो (न)दोषः। इह तु उपदिष्टेनैव रूपेणोपदेश इति तदसिद्धं, प्रकृतग्रहणेऽप्युपदेशो न विशेषणमित्युक्तम्।

---

(1) G प्रत्यायकत्वं (2) P. 781

[1]लिङ्गसमाख्याभ्यां भक्षार्थतानुवाकस्य ॥ ३-१-२५ अ. ९ ॥

इदमिदानीं चिन्त्यते—यथा प्रकृततया लिङ्गमुपसंहृतं किमेवं समाख्यापि स्वनिमित्त एवोपसंहरति उत यथालिङ्गं विनियोग इति। किं तावद्युक्तम्? समाख्यापि प्रकृतवन्नियमयत्येव विशेषे लिङ्गम्। ननु लिङ्गान्तरविरोधः प्राप्नोति। न, विशेषणतयापि लिङ्गान्तरस्याविरोधात्। यतः स्वार्थे परार्थे वाऽभिधानमविशिष्टम्। ननु च पारार्थ्ये लक्षणा प्राप्नोति। तथाप्यभिधानमविशिष्टं इदंपरताविशेषोऽयं नाभिधानविशेषः।

लिङ्गक्रमसमाख्याभ्यां। इदमिदानीं चिन्त्यते यथा प्रकृततया लिङ्गमुपसंहृतं किमेवं समाख्यापि स्वनिमित्त एवोपसंहरति उत यथालिङ्गं विनियोग इति। अनेनावान्तरसङ्गतिं भाष्यकारीयसंशयकारणं चाह। यथा आग्नेय्येत्यत्र लिङ्गं प्रकरणेनोपसंहृतं प्रकृतानामेव विनियोगात् तथा किं भक्षणानुवाकसमाख्यापि स्वनिमित्ते भक्षण एव उपसंहरति उत यथालिङ्गं विनियोग इति। **किं तावद्युक्तं समाख्यापि प्रकृतवन्नियमयत्येव[2] विशेषे लिङ्गं?** अस्यार्थः—समाख्यया सामान्यसंबन्धे सति लिङ्गस्य विनियोजकत्वात् समाख्या लिङ्गं नियमयतीति कृत्स्नस्यानुवाकस्य भक्षण एव विनियोगः। **ननु लिङ्गान्तरविरोधः प्राप्नोति।** ग्रहणावेक्षणलिङ्गविरोधः स्यादित्यर्थः। परिहरति—**न** प्राप्नोति विरोधः। कुतः? **विशेषणतयापि लिङ्गान्तरस्याविरोधात्।** यदि भक्षणविशेषणतयापि ग्रहणाभिधानं तथापि न विरोध इति। यस्मात् **स्वार्थे** यदि स्वनिष्ठतया **परार्थे** यदि **च** परविशेषणतया तथाप्यभिधानं ग्रहणादीनाम**विशिष्टम्।**

ननु पारार्थ्ये ग्रहणादीनां लक्षणा प्राप्नोति। परिहरति—यद्यपि लक्षणा **तथाप्यभिधानमविशिष्टं** ग्रहणप्रकाशकेन हि ग्रहणमेव प्रकाश्यते नान्यत् तत्र परविशेषणार्थं न स्वनिष्ठं इतीदंपरताविशेषोऽयं नाभिधानविशेषः। यथा गङ्गायां घोष इत्यभिधान-

---

(1) P. 782　(2) नियामक इत्येवं

तस्मान्नियन्तुमर्हति समाख्या।

[1]तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात् ॥ ३-२-१६ ॥

सत्यमविरोधि लिङ्गान्तरम्—किन्तु अनिदंपरतायाः प्रमाणं न विद्यते। भक्षणवल्लिङ्गान्तरविषयस्यापि स्मरणार्हत्वात्। प्रयोगो हि स्मरणीयः। ग्रहणाद्यपि च प्रयोग एव। तस्माद्यथालिङ्गं व्यवस्था। ननु च समाख्याशून्यं लिङ्गं विनियोजकतामेव न प्रतिपद्यते। नैव समाख्याशून्यं भक्षनिमित्तापि समाख्या क्रतुसंबन्धितामापादयत्येव।

विशेषः तथेह नास्तीत्यर्थः। तेनाभिधानविरोधाभावात् न लिङ्गविरोधः। उपसंहरति—**तस्मान्नियन्तुमर्हति समाख्या।**

तस्य रूपोपदेशाभ्यां। अत्रोच्यते—**सत्यमविरोधिलिङ्गान्तरं, किन्तु अनिदंपरतायाः प्रमाणं न विद्यते।** यस्य शब्दस्य योऽर्थः स तत्पर इति लोकप्रसिद्धमेतत् औत्सर्गिकं कारणान्तरेण अन्यथा भवति। न चात्र ग्रहणादिप्रकाशकानां ग्रहणादिपरत्वाभावे किञ्चन प्रमाणमस्ति। ननु प्रतीयमानानामपि ग्रहणादीनामचोदितत्वात् प्रकाश्यता न युक्तेति न तत्परता युक्ता, तत्राह—**भक्षणवल्लिङ्गान्तरविषयस्यापि स्मरणार्हत्वात्।** कुत इत्याह—**प्रयोगो हि स्मरणीयः ग्रहणाद्यपि च प्रयोग** एवानुष्ठानं स्मरणीयं चोदितं अर्थाक्षिप्तं वा भवतु। तस्मात् **यथालिङ्गं व्यवस्था** विभज्य विनियोग इत्यर्थः।

ननु समाख्याशून्यं लिङ्गं विनियोजकतामेव न प्रतिपद्यते। तेन समाख्यानिबन्धनत्वात्[2] लिङ्गविनियोगस्य किमिति कृत्स्नस्य मन्त्रस्य समाख्याबलात् न विनियोगो भवतीत्यत्राह। परिहरति—**नैव समाख्याशून्यं भक्षनिमित्तापि समाख्या क्रतुसंबन्धितामापादयत्येव** अस्यार्थः—भक्षणानुवाक इति समाख्या भक्षणद्वारेण प्रवर्तमानापि क्रतुसंब-

---

(1) P. 784 (2) G. समाख्याधीनत्वात्

लौकिकी लक्षणेत्यस्योक्तः परिहारः ।

[1]गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात् तयोरेकार्थसंयोगात् ॥ १० ॥

पूर्वाधिकरणापवादोऽयम् । अप्रयोगाभिधानो मन्त्रः प्रयोगाभिधानेन सह एकवाक्यतं नीयते समाख्यया । लिङ्गं हि दृष्टार्थतया समाख्ययोपसंहृतम् । यत्र पुनः दृष्टार्थता नास्ति तत्रादृष्टकल्पनायां प्रमाणं नास्ति इति समाख्यैव विनियोक्त्री। सा च स्वनिमित्तैवेति सिद्धं लक्षणेनैकवाक्यत्वमित्येकमन्त्रत्वम् ।

न्धितामनुवाकस्यापादयत्येव । सिद्धे च क्रतुसंबन्धे यथालिङ्गं सिद्धो विनियोगः । ननु लक्षणापि लौकिक्येव, तेन किमिति लक्षणया भक्षण एव विनियोगः कृत्स्नस्य मन्त्रस्य समाख्याबलान्न भवतीत्यत्राह—**लौकिकी लक्षणेत्यस्योक्तः परिहारः।** श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणेति ।

गुणाभिधानात् । पूर्वाधिकरणापवादोऽयमित्यनेनावान्तरसङ्गतिं पूर्वपक्षञ्चाह—पूर्वाधिकरणन्यायेनैवात्र पूर्वः पक्षः । लिङ्गबलेन तृप्तिप्रकाशनेपि मन्त्रस्य विनियोगं मन्यते। यथापवादः तथाऽऽह—**अप्रयोगाभिधानो मन्त्रः** अननुष्ठानार्थकतृप्त्यभिधानो मन्त्रः **प्रयोगाभिधानेन** भक्षाभिधानेन **सहैकवाक्यतां नीयते समाख्यया** । सा हि कृत्स्नमेवानुवाकं भक्षणसंबन्धमापादयन्त्यपि लिङ्गेन बाधिता । यत्र पुनः लिङ्गं बाधितुमेवं न शक्नोति अननुष्ठेयस्य स्मरणानर्हत्वात् तत्र तात्पर्याभावात् तस्य समाख्यया भक्षणे विनियोग इति । ननु च लिङ्गात् तदभिधान एव मन्त्रोऽस्तु तदभिधानादेव चादृष्टं कल्प्यतां इत्यत्राह—**लिङ्गं हि दृष्टार्थतया समाख्ययोपसंहृतम् । यत्र पुनः दृष्टार्थता नास्ति तत्रादृष्टकल्पनायां प्रमाणं नास्तीति समाख्यैव विनियोक्ती।** अदृष्टकल्पनातो हि लक्षणा श्रेयसी । लक्षणया तृप्त्यभिधानो हि मन्त्रः भक्षण एव विनियुज्यते। समाख्यया च **स्वनिमित्त** एव विनियुक्त इति **सिद्धं भक्षणेनैकवाक्यत्वादेकमन्त्रत्वम्** ।

---

(1) P. 785

[1]लिङ्गविशेषनिर्देशात् समानविधानेष्वनैन्द्राणाममन्त्रत्वम् ॥ ११ ॥

इह पानोपलक्षणप्रकरणे समानविधाने स्थिते ' अनुष्टुप्छन्दस ' इति नमनदर्शनात् " ऐन्द्रः सोमो

लिङ्गविशेषनिर्देशात्। अत्रेदृशी स्थितिः इन्द्रपीतस्येति किमयं तृतीयासमासः उत बहुव्रीहिः। इन्द्रेण पीतमिति किं सोम उच्यते, इन्द्रेण पीतं यस्मिन् सवन इति सवनमेवोच्यत इति मूलविचारः। अत्र च तृतीयासमासस्य उत्तरपदार्थप्रधानत्वात् बहुव्रीहेः दुर्बलतेति पूर्वः पक्षः। अस्मिंश्च पूर्वपक्षे ऐन्द्र एव सोमे समन्त्रकं भक्षणं इतरेषां पुनः उपदेशतस्तावत् भक्षणमन्त्रो नास्ति अतिदेशतोऽपि परमार्थतो नास्त्येव। सर्वप्रदानानां समानविधानत्वात् उपदेश एव निराकाङ्क्षत्वात्। तथापि षोडशिनि[2]नमनविशेषविधानात् ऐन्द्रस्य प्रकृतित्वं इतरेषां च विकृतित्वमित्याशङ्क्य[3]—विपरिणामे हि प्राप्ते तद्विशेषविधिरुपपद्यते। आतिदेशिके हि धर्मे विपरिणामो नौपदेशिके। तस्मात् प्रकृतिविकारभावः। तथा "ऐन्द्रः सोमो गृह्यते मीयते च" इति प्रतीयते ग्रहणमानयोः ऐन्द्रस्य मन्त्रस्य समानत्वम्। यत्र मन्त्रः तत्रैव ग्रहणमाने यत्र च ग्रहणमाने तत्र सोमः तेनान्यानि प्रदानान्तराणि अन्यतो द्रव्यं तत्संस्कारांश्चापेक्षन्त इति विकारभावः। उपपद्यते चासौ अभ्यासापूर्वाणां भेदाभ्युपगमादिति अतिदेशेन प्राप्तिमभ्युपगम्य चिन्ता कृता कस्योहेन उपलक्षणं कस्य नेति। परमार्थतस्तु समानविधानान्येतानि सर्वप्रदानानि। सोमेन यजेतेति यागस्य सोमद्रव्ययोगित्वात् तस्यैव च यागस्याभ्यस्यमानत्वात्। अतः सर्वत्रोपदेशेन द्रव्यलाभात् द्रव्याश्रितत्वाच्च संस्काराणां संस्कारनिराकाङ्क्षत्वान्नास्ति प्रकृतिविकारभावः। नमनविशेषविधानं तु विशिष्टविधानं भविष्यति। तस्मादतिदेशतो मन्त्रो नास्तीत्युक्तम्। मूलाधिकरणराद्धान्ते तु इन्द्रपीतस्येति बहुव्रीह्याश्रयणात् सवनवचनत्वादिन्द्रपीतशब्दस्य सर्वेषां समन्त्रकं भक्षणमित्युक्तम्। इह **पानोपलक्षणप्रकरणे** पानं देवतयोपलक्ष्यत इति यत्र प्रकरणे चिन्त्यते तस्मिन् **समानविधाने** सर्वसोमयागाभ्यासानां **स्थिते अनुष्टुप्छन्दस इति नमनदर्शनात् ऐन्द्रः सोमो**

(1) P. 786 (2) G. नाम (3) G. ङ्क्याह

गृह्यते मीयते च " इति प्रकृतिविकारशङ्कायां कृत्वाचिन्ता ।

[1]पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात् ॥ १२ ॥

अत्र आश्रावणादपनयः प्रस्थितदेवताया इति पूर्वः पक्षः । अग्रहणान्नेति सिद्धान्तः ।

[2]पात्नीवते तु पूर्ववत् । [3]त्वष्टारं तूपलक्षयेत् । लिंगाच्च ॥

आग्रयणात् पुनरनाग्रयणस्यापि तदुद्देशेन ग्रहणमित्यपनय एव । त्वष्टरि सहवचनात् पूर्वः पक्षः । नाचोदितत्वादिति राद्धान्तः

गृह्यते मीयते च इति प्रकृतिविकारशङ्का । ऐन्द्रप्रदानं प्रकृतिभूतं शेषाणि विकृतिभूतानीत्याशङ्का । तेनातिदेशिके कृत्वाचिंता का देवता ऊहेनोपलक्ष्यतामित्यादिका ।

पुनरभ्युन्नीतेषु । अत्र आश्रावणादपनयः प्रस्थितदेवताया इति पूर्वः पक्षः । सशेषे चमसे पुनस्सोमे देवतान्तरार्थं गृहीते यदाश्रवणं कृतं तेन पूर्वदेवताशेषस्यापि देवतान्तरार्थमुपादानात् पूर्वदेवतापनयनात् न सा देवता उपलक्षणीयेति पूर्वः पक्षः । अग्रहणान्नेति राद्धान्तः । ग्रहणेन हि देवतासंबन्धो द्रव्यस्यापाद्यते । तदुद्देशेनाग्रहणात् तच्छेषः चमसस्थो देवतान्तरोद्देशेन न गृह्यते । यच्च गृहीतं तावन्मात्रस्यैवाश्रावणमिति पूर्वदेवता उपलक्षणीयेति ।

पात्नीवते तु । आग्रयणात् पुनरनाग्रयणस्यापि तदुद्देशेन ग्रहणमित्यपनय एव । अनेन पूर्वाधिकरणव्यतिरेकमात्रमिदमित्याह—योऽप्यसावाग्रयणे द्विदेवत्यसोमशेषः [4]सोप्यनाग्रयणात् रसात् यक्ष्यमाणदेवतोद्देशेन गृहीतः इत्यपनीता पूर्वदेवता इत्यनुपलक्षणीया ।

त्वष्टारन्तूपलक्षयेत् । त्वष्टरि सहवचनात् पूर्वपक्षः सजूर्देवेन त्वष्ट्रा सोमं पिबेति सजूश्शब्दस्य सहार्थत्वात् पाने सहभावेन त्वष्टुरनुप्रवेशात् देवतातद्धितविरोधानापादकत्वात् त्वष्टापि देवता । अतः सोप्युपलक्षणीय इति पूर्वः पक्षः । नाचोदितत्वादिति राद्धान्तः

---

(1) Bhashya P. 788 (2) P. 791 (3) P. 793 (4) G. सोऽप्याग्र

त्रयस्त्रिंशति त्वग्नेः मादयितृत्वदर्शनात् पुनराशङ्का। मादयितृतैव तत्प्राधान्यात् देवताभावमापादयति इति राद्धान्तः। एवमनुवषट्कारदेवतापि तदुद्देशेनाग्रहणान्नोपलक्ष्या।

स्थितादुत्तरम्— एकयागत्वात्तु समानविधानम्। तस्मादैन्द्रमेव समन्त्रकम् इतरदनाम्नानादमन्त्रकमेव।

नोपलक्षणीयः अचोदितत्वात्। चोदिता हि देवता भवति। न च मन्त्रः चोदितुं शक्नोति। स्तुत्याप्युपपत्तेः।

[1]त्रिंशच्च। त्रयस्त्रिंशति तु त्रयस्त्रिंशतमित्यत्र अग्नेः [2]मादयितृत्वदर्शनात् पुनराशङ्का। अग्निः मादयितृमन्त्रे कीर्त्यते न पाता तेन त्रयस्त्रिंशद्देवताः प्रधानतया कीर्त्यन्त इति देवताभावाशङ्का। [3]मादयितृतैव तत्प्राधान्यात् देवताभावमापादयतीति राद्धान्तः। यदेतत् अग्नेः मादयितृत्वं तदेवान्यथा नोपपद्यते यद्यग्निः प्रधानो न भवति। ईशानो हि विलम्बयितुकामः [4]हीनमाह्वयति। तेन [5]मादयितृत्वेनेशानत्वात् अग्नेः देवतात्वमवगम्यते। नह्यन्येन प्रकारेण तस्येशानताऽस्ति इत्यग्निरेवानेन मन्त्रेण देवतात्वेन कीर्त्यत इति न त्रयस्त्रिंशतो देवताभावः। अतो नोपलक्षणीयेति राद्धान्तः।

[6]वषट्कारश्च। अनुवषट्कारदेवतापि तदुद्देशेनाग्रहणान्नोपलक्ष्या। देवतात्वादनुवषट्कारदेवताप्युपलक्षणीयेति पूर्वः पक्षः। सत्यं देवता, तथापि यदुद्देशेन सोमो गृहीतः सा देवता उपलक्षणीयेत्येतत्। स्थानपतिताऽनुवषट्कारदेवता नोपलक्ष्यते।

[7]छन्दः प्रतिषेधस्तु। स्थितादुत्तरम्—एकयागत्वात्तु समानविधानं स्यात्। तस्मादैन्द्र एव समन्त्रकः सोमः इतीतरत् प्रदानममन्त्रकं अनाम्नानात्। प्रकृतिविकारहेतुभूतं

---

(1) P. 794 (2) आह्वातृत्व (3) आह्वातृतैव (4) अर्थिनमा (5) आह्वातृत्वेना (6) P. 797 (7) P. 798

ऐन्द्राग्ने पुनः पानमेवोपलक्ष्यते न देवतेति । आग्नेयं चतुर्धा करोतीति स्थिते पूर्वः पक्षः देवतैवोपलक्षणं पानाभावादिति राद्धान्तः ।

[1]छन्दश्च देवतावत् ॥ ३-२-४२ अ. १८ ॥

देवतया तुल्यं च्छन्द इति मन्वानस्य पूर्वः पक्षः एकच्छन्दसो न विद्यत इति राद्धान्तः । अनुष्टुप्छन्दस इति छन्दोन्तरविधानात् नमतीत्यस्य परिहारः । ऐन्द्रः सोमो मीयते गृह्यते च इति समानविधाने स्थिते यथालिङ्गं मन्त्र इति स्थितम् । तस्मादिदमप्यकारणं प्रकृतिविकारभावस्य ।

यदुक्तं पूर्वपक्षिणा तदपरिहृत्याधिकरणान्तरमारब्धम्— ऐन्द्राग्ने पुनरिति । अत्रायमभिप्रायः —उपदेशः ऐन्द्रवत् ऐन्द्राग्नेपि नास्तीत्युपदेशोपपादनात् इदमेव वक्तव्यम् । पुनश्चोपदेशाभावे स्थिते अतिदेशोऽपि नास्तीत्येवमर्थं प्रकृतिविकारभावापादिका युक्तिः निराकरणीयेति । **ऐन्द्राग्ने पुनः पानमेवोपलक्षणं न देवतेति "आग्नेयं चतुर्धा करोति" इति स्थितेऽपि पुनः पूर्वः पक्षः ।** आग्नेये देवतातद्धितः अतः केवलाग्निदेवताको गृह्यते । इह तु न देवतात्वेनोपलक्षणं किन्तु पानेन । यत्तु उभाभ्यां पीयते सोऽपि इन्द्रपीत इति शक्यते वदितुं इति । **देवतोपलक्षणम् पानाभावादिति राद्धान्तः ।** पाने प्रमाणाभावात् विग्रहवत्तादिनिराकरणात् देवतात्वेनैवोपलक्षणम् । न च द्विदेवता, इन्द्रदेवत्या इत्याग्नेयतुल्यता । एकसंबन्धेऽपि तुल्यश्रुतेरसंभवेनानेकसंबन्ध्यपि गृह्यत इति प्रत्युदाहरणमात्रमेतत् ।

छन्दश्च देवतावत् । देवतया तुल्यं छन्द इति मन्वानस्य न पृथग्व्याख्यानम् । **अनुष्टुप्छन्दस इति छन्दोन्तरविधानात् नमनीत्यस्य परिहारः** विशिष्टविधानमिदमित्यर्थः । **ऐन्द्रः सोमो गृह्यते मीयते च इति समानविधाने स्थिते यथालिङ्गं मन्त्रः ।** तत्र समन्त्रकं ग्रहणं मानं च । अन्यत्र मन्त्रशून्यम् । **तस्मादिदमप्यकारणं प्रकृतिविकारभावस्य ।**

---

(1) Bhashya 801

इदानीमिन्द्रपीतस्य इति स्थिते सवनसामानाधिकरण्यात् सर्वे मन्त्रवन्त इति राद्धान्तः।

इति बृहत्यां तृतीयाध्यायस्य
द्वितीयः पादः

अतः स्थितं समानविधानम्। स्थिते समानविधाने इदानीमिन्द्रपीतस्येति **सवनसामानाधिकरण्यात् सर्वे मन्त्रवन्त इति राद्धान्तः।** अस्यार्थः—इन्द्रपीतशब्दोऽयं बहुव्रीहिः इन्द्रेण पीतं यस्मिन् सवन इति। ननु सर्वोपसर्जनो बहुव्रीहिः तृतीयासमासाद्दुर्बलः। उच्यते। तृतीयासमास एवात्र न संभवति। योऽपीन्द्राय दत्तः नासौ भक्ष्यते। यश्च भक्ष्यते न स इन्द्रपीत इत्यसंभवात्। बहुव्रीह्याश्रयणेन सवनसामानाधिकरण्यात् सर्वे सोमाः समन्त्रका इति।

इति ऋजुविमलायां तृतीयाध्यायस्य
द्वितीयः पादः

अथ तृतीयः पादः ॥

[1]श्रुतेर्जाताधिकारः स्यात ॥ ३-३-१ अ. १ ॥

[1]श्रुतेर्जाताधिकारः स्यात । **'उच्चैर्ऋचा क्रियते' इति किमयं वेदधर्मः उत ऋग्धर्म इति संशयः। कोऽयं वेदो नाम? ननु चर्गपि वेद एवेति। उच्यते—विधायकं वेदशब्देनोच्यते। एतदुक्तं भवति—यदृग्वेदशब्दवाच्यं विधायकं तद्विधेयधर्मः उत यत्र पादव्यवस्था तस्मिन् मन्त्र इति।**

ऋजुविमलायां तृतीयाध्यायस्य तृतीयः पादः

श्रुतेर्जाताधिकारः स्यात्।

अत्र भाष्यकारेण सन्देहः कृतः—किमृग्जातिमधिकृत्य एते शब्दाः इत्यादिना। तद्व्याचष्टे—**उच्चैर्ऋचा क्रियत इति किमयं वेदधर्मः उत ऋग्धर्म इति संशयः।** आक्षिपत्ति—**कोऽयं वेदो नाम? ननु चर्गपि वेद एव** इत्येकग्रन्थः। अस्यार्थः—कोऽयं वेदो नाम न च विधिवाक्यमेव केवलं वेदशब्देनोच्यते किन्तु ऋगपि। ततश्च वेदधर्मत्वेपि ऋग्धर्मता न निराक्रियते। तेनाप्रतिपक्षत्वात् संशय एवानुपपन्नः। समाधत्ते—**उच्यते—विधायकं वाक्यं वेदशब्देनोच्यते।** संशयवाक्ये वेदशब्दोऽयं विधायकवाक्यपरत्वेन प्रयुक्तः तेनात्र विधायकं वाक्यं वेदशब्देनोच्यते। नन्वेवमपि संशयोऽनुपपन्न एव। किं विधायकधर्मः उतर्ग्धर्म इति। ऋचामपि कासांचित विधायकताऽस्त्येव यथा कपिञ्जलाना—लभत इति। किञ्च विधायकस्य वाक्यस्यानङ्गत्वात् तत्र धर्मा विधीयमाना विध्यसंस्पर्शिनः अनर्थका एवापद्यन्त इतीमामाशङ्कामपनिनीषुराह—**एतदुक्तं भवति—यदृग्वेदशब्दवाच्यं विधायकं वाक्यं तद्विधेयधर्मः उत यत्र पादव्यवस्था तस्मिन् मन्त्र इति।** अस्यार्थः—उच्चैर्ऋचा क्रियत इत्यस्य वचनस्य किमयमर्थः यदृचा यदृग्वेदेन ऋक्प्रायशाखाधीतेन विधिना क्रियते यत्तेनानुष्ठेयत्वेन ज्ञाप्यते तदुच्चैः कर्तव्यम्। यत ऋग्वेदाधीतेन विधिनाऽनुष्ठेयत्वेन

---

(1) B. P. 803

अथ तृतीयः पादः ॥

[1]श्रुतेर्जाताधिकारः स्यात ॥ ३-३-१ अ. १ ॥

[1]श्रुतेर्जाताधिकारः स्यात । 'उच्चैर्ऋचा क्रियते' इति किमयं वेदधर्मः उत ऋग्धर्म इति संशयः । कोऽयं वेदो नाम ? ननु चर्गपि वेद एवेति । उच्यते — विधायकं वेदशब्देनोच्यते । एतदुक्तं भवति — यदृग्वेदशब्दवाच्यं विधायकं तद्विधेयधर्मः उत यत्र पादव्यवस्था तस्मिन् मन्त्र इति ।

ऋजुविमलायां तृतीयाध्यायस्य तृतीयः पादः

श्रुतेर्जाताधिकारः स्यात् ।

अत्र भाष्यकारेण सन्देहः कृतः—किमृग्जातिमधिकृत्य एते शब्दाः इत्यादिना । तद्व्याचष्टे—उच्चैर्ऋचा क्रियत इति किमयं वेदधर्मः उत ऋग्धर्म इति संशयः । आक्षिपत्ति —कोऽयं वेदो नाम ? ननु चर्गपि वेद एव इत्येकग्रन्थः । अस्यार्थः—कोऽयं वेदो नाम न च विधिवाक्यमेव केवलं वेदशब्देनोच्यते किन्तु ऋगपि । ततश्च वेदधर्मत्वेपि ऋग्ध-र्मता न निराक्रियते । तेनाप्रतिपक्षत्वात् संशय एवानुपपन्नः । समाधत्ते—उच्यते—विधायकं वाक्यं वेदशब्देनोच्यते । संशयवाक्ये वेदशब्दोऽयं विधायकवाक्यपरत्वेन प्रयुक्तः तेनात्र विधायकं वाक्यं वेदशब्देनोच्यते । नन्वेवमपि संशयोऽनुपपन्न एव । किं विधायकधर्मः उतर्ग्धर्म इति । ऋचामपि कासांचित विधायकताऽस्त्येव यथा कपिञ्जलाना- लभत इति । किञ्च विधायकस्य वाक्यस्यानङ्गत्वात् तत्र धर्मा विधीयमाना विध्यसंस्पर्शिनः अनर्थका एवापद्यन्त इतीमामाशङ्कामपनिनीषुराह—एतदुक्तं भवति—यदृग्वेदशब्दवाच्यं विधायकं वाक्यं तद्विधेयधर्मः उत यत्र पादव्यवस्था तस्मिन् मन्त्र इति । अस्यार्थः —उच्चैर्ऋचा क्रियत इत्यस्य वचनस्य किमयमर्थः यदृचा यदृग्वेदेन ऋक्प्रायशाखाधीतेन विधिना क्रियते यत्तेनानुष्ठेयत्वेन ज्ञाप्यते तदुच्चैः कर्तव्यम् । यत ऋग्वेदाधीतेन विधिनाऽनुष्ठेयत्वेन

---

(1) B. P. 803

किं तावद्युक्तम्—उच्चैः ऋचा क्रियत इति वचनादृग्धर्मोऽयमिति। ननु वेदोपक्रममेतद्वाक्यम्। को दोषः? ऋक्ष्वप्ययं वेदशब्दो वर्तत एव। एवं च न विकल्पो भविष्यति वेदान्तरपठितस्य ऋग्जातस्य।

[1]वेदो वा प्रायदर्शनात् ॥ ३-३-२ ॥

अत्रोच्यते—वेदधर्मोऽयम्। कुतः? वेदशब्दोपक्रमत्वाद्वाक्यस्य। ननु च उपक्रमोपसंहारवशात् ऋक्षु वर्तत इत्युक्तम्। सत्यमुक्तम्। तत्तु नोपपद्यते। कथं नोपपद्यते? एवं नोपपद्यते। उपक्रमे यः पदार्थः परिज्ञातो

ज्ञाप्यतेऽधिकारविधिः तस्योच्चैष्ट्वं धर्मः स च साक्षादनेन संबद्धुमशक्तः तदङ्गे शब्दे निविशते। अथ यदृचा मन्त्रेण क्रियते तदुच्चैरिति कार्यान्तरस्मरणजनकतया व्यापृताया ऋचः उच्चैष्ट्वं विधीयत इति। किं तावद्युक्तं? उच्चैर्ऋचेति वचनात् ऋग्धर्मोऽयं इति। अस्यार्थः—उच्चैः ऋचा क्रियत इति वचनात् ऋक्शब्दस्य मुख्यया वृत्त्या मन्त्रवचनत्वान्मन्त्रधर्मोऽयमिति। ननु वेदोपक्रममेतद्वाक्यं तेनोपक्रमानुगुणतया ऋगादिशब्देनापि वेदश्चोच्यत इति। परिहरति—को दोषः ऋक्ष्वप्ययं वेदशब्दो वर्तत इति। अस्यार्थः—वेद्यते अनेनेति व्युत्पत्त्या वर्तमानो वेदशब्दः प्रयोगवशेन अपौरुषेयशब्दविषयतया पङ्कजादिशब्दवन्नियम्यमानः ऋक्षु विधिषु च मुख्यः। तत्राविरोधाद्वेदशब्दोऽपि मन्त्रपर एव। तेनायं मन्त्रधर्मः। एवं च मन्त्रधर्मत्वे सति न विकल्पो वेदान्तरपठितस्य ऋग्जातस्य। विधेयधर्मपक्षे तु अनेकधर्मविधेयतया एकत्रापि मन्त्रे अनेकधर्मप्रसङ्गात् विकल्प आपद्यते।

वेदो वा प्रायदर्शनात्। अत्रोच्यते—वेदधर्मोऽयम्। अधिकारविधिधर्मः इति यावत्। कुतः? वेदशब्दोपक्रमत्वाद्वाक्यस्य। तेनोपक्रमवशेनोपसंहारगतऋक्शब्दो विधिलक्षणार्थः इति। ननु चोपक्रमोपसंहारवशात् ऋक्षु वर्तत इत्युक्तम्। सत्यमुक्तम्। तत्तु नोपपद्यते। कथं नोपपद्यते? एवं नोपपद्यते। उपक्रमे यः पदार्थः परिज्ञातो

---

(1) P. 805

भवति तद्विशेषप्रतिपत्तिरेव केवलमुपसंहारादपेक्ष्यते । न पुनस्तद्विरोध्यर्थान्तरम् । अतोऽविरोधिधर्मविधानमेव केवलं वेदेन संबध्यते । ऋक्छब्दस्तदानुगुण्यादनुवादः । कथं पुनर्नर्ग्वेदशब्देनोच्यते ? केन चोक्तं नोच्यत इति ? किन्तु विधेयतया न विधायकवत् । दृष्टश्चायं ऋक्-शब्दो वेदे—ऋग्भिः प्रातर्दिवि देव ईयते[1] इति । कुत एतत् ? यजुर्वेदे तिष्ठति मध्ये अह्न इति सहयोगात् ।

भवति तद्विशेषप्रतिपत्तिरेव केवलं उपसंहारादपेक्ष्यते । न पुनः तद्विरोध्यर्थान्तरम् । यः खलु पदार्थः प्रथमश्रुतः तमपरित्यज्यैव तद्विशेष एव केवलमुपसंहारेण अपेक्ष्यते न पुनस्तदुपमर्द्यप्यर्थान्तरम् । अतोऽविरोधिधर्मविधानमेवोच्चैष्ट्वादिविधानमेव केवलं वेदेनोपक्रमप्रतीतेन संबध्यते । ऋक्शब्दस्त्वानुगुण्यादनुवादः । उपक्रमगतवेदशब्दानुगुण्यात वेदानुवाद एव ऋक्शब्दो वेदमनुवदति लक्षणया । कथं पुनः नर्ग्वेदशब्देनोच्यते । अस्यार्थः—उपक्रमवशेनोपसंहारगतर्क्शब्दो लक्षणया वर्ण्यत इति वदतः तव सिद्धान्तवादिनः अयमाशयो लक्ष्यते—वेदशब्दोऽयं न ऋक्षु वर्तत इति । तच्चेदमनुपपन्नम् कथं वेदशब्दो नर्क्षु वर्तते यावता वर्ततैव । ततश्चाविरोधात ऋक्पर एव वेदशब्दो भविष्यति । उत्तरं-केन चोक्त नोच्यत इति । किन्तु विधेयतया न विधायकवत् । अस्यार्थः—वेदशब्दोऽयं यौगिको वेदयतीति तत्र विधायकवाक्यस्य निरपेक्षं वेदत्वं विधेयस्य तु मन्त्रजातस्य विनियोगापेक्षमर्थ-प्रकाशनकरणत्वमिति सापेक्षनिरपेक्षतया न तुल्या वेदशब्दस्य प्रवृत्तिः विधिविधेयमन्त्रविध्योः । अतः उपक्रमगतेन वेदशब्देन निरपेक्षतया विधिरेवोच्यते । ततश्चोपक्रमगतविधिवाचिवेद-शब्दानुगुण्यात ऋक्शब्दोऽपि विधिपर एवेति अधिकारविधिधर्मोऽयम् । दृष्टश्चायं ऋक्शब्दो वेदे ऋग्भिः प्रातर्दिवि देव ईयते इति । तेन लक्षणाप्येषा नातीवाप्रसिद्धेति दर्शयति । कुत एतत् ? वेदे ऋगादिशब्द इति यजुर्वेदे तिष्ठति मध्ये अह्नः इति सह्योगात्

---

(1) G. मेदेन

धर्मोपदेशश्च साम्नां पृथक्त्वेनैवमेवेदमुपपद्यते। अन्यथा हि ऋग्विधानात्सिद्धेः पृथग्वचनमनर्थकम्।

[1]त्रयीविद्याख्या च तद्विदि-इति ॥

त्रयीविद्यशब्दश्च वेदत्रयविदि वर्तते। ततः किं? इदं ततो भवति। वेदे ऋगादिशब्दानां प्रयोगो दृष्ट इति। यत्पुनर्वेदान्तरोक्तस्य स्वरान्तरापत्तिरिति। विधानान्न दोषः। प्रकरणबाधश्च वाक्यादिष्यत एव। किं पुनः कारणं वेदसंयोगेपि प्रकरणं नानुगृह्यते, ऋग्धर्मविधानवत्। उच्यते-ऋचामङ्गत्वात्तद्धर्मः प्रकरणेन गृह्यत इति युक्तं;

वेदपर एवायं ऋक्शब्द इत्यर्थः। धर्मोपदेशश्च साम्नां पृथक्त्वेन यस्साम्नः उच्चैष्ट्वोपदेशः स एवमेवोपपद्यते अन्यथा मन्त्रधर्मपक्षे हि ऋग्विधानात् ऋक्शब्देनोच्चैष्ट्वविधानसिद्धेः पृथग्विधानमनर्थकं स्यात्। न च प्रजापतेर्हृदयादिषु अनृगाश्रितेषु सामसु विधानमर्थवत् ज्योतिष्टोमे तेषामभावात्। मन्त्रधर्मपक्षे हि ज्योतिष्टोम एव निवेशः। न च तत्र प्रजापतेर्हृदयादीनां संभव इति।

त्रयीविद्याख्या च तद्विदि[1]। त्रयीविद्यशब्दश्च तद्विदि वेदत्रयविदि वर्तते। किं ततः? इदं ततो भवति वेदे ऋगादिशब्दानां प्रयोगो दृष्ट इति यो वेदत्रयवित् सः त्रयीविद्य इति उच्यते ऋगादिशब्दश्च त्रय्यां प्रयुक्तः ऋग्यजुस्सामानि त्रीणि त्रयीति। तस्मादृगादिशब्दो वेदे दृष्ट इति। यत्पुनर्वेदान्तरोक्तस्य विहितस्य स्वरान्तरापत्तिरिति विधानान्न दोषः प्रमाणबलादायातो विकल्पः न दोषाय भवतीत्यर्थः। प्रकरणबाधश्च वाक्यादिष्यत एव। तेन प्रकरणालोचनासमुत्थां ज्योतिष्टोमाङ्गतां वाक्येन बाधित्वा सकलक्रत्वङ्गतेति। किं पुनः कारणं वेदसंयोगेपि प्रकरणं नानुगृह्यते ऋग्धर्मविधानवत्। यथा ऋग्धर्मविधौ प्रकरणानुग्रहः तथाऽत्रापि किं न स्यादिति। उच्यते— ऋचामङ्गत्वात् तद्धर्मः प्रकरणेन गृह्यत इति युक्तम्। अङ्गाश्रितो हि धर्मोऽधिकारविधिना गृह्यत इति युक्तम्।

(1) Bhashya P. 808

वेदधर्मत्वे पुनः विधानमुपलक्षणम् । न च तदङ्गमिति याव-द्विधानं धर्मविधिः ।

[1]गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ २ ॥

"य एवं विद्वानग्निमाधत्ते" इति याजुर्वैदिको विधिः । "य एवं विद्वान् वारवन्तीयं गायति" इति आधानप्रकरणे सामवैदिक इति कृत्वा चिन्त्यते । याजुर्वैदिके भवतूपांशुत्वं, सामवैदिके चोच्चैष्ट्वं, सत्यमेवं यद्यङ्गप्रधानविधी भिद्येते यथात्वभेदः तथा फलवत्सन्निधौ अफलं तदङ्गमित्यत्र वक्ष्यति । अभेदे चोभयवेद-विधानात् भवति संशयः । उभयवेदविधानात् विकल्पो भवतु । न विकल्पः संभवति । एवं सति अङ्गविधिरनुवाद

वेदधर्मत्वे पुनर्विधानमुपलक्षणम् । न च तदङ्गमिति यावद्विधानं धर्मविधिः । वेदप्रमेयाधिकारविधिधर्मपक्षेऽधिकारविधिरुपलक्षणं, तत्र धर्मसंबन्धासंभवात् । तदङ्गेषु संबन्धेषु धर्मः । न चाधिकारविधिरङ्गमिति यावदधिकारविधि धर्मसंबन्धः ।

गुणमुख्यव्यतिक्रमे । 'य एवं विद्वानग्निमाधत्ते' इति याजुर्वैदिको विधिः 'य एवं विद्वान् वारवन्तीयं गायति' इत्याधानप्रकरणे सामवैदिक इति कृत्वाचिन्त्यते । याजुर्वैदिके प्रधाने सामवैदिकमङ्गमिति कृत्वाचिन्तेयम् । किमत्र चिन्त्यते ? याजुर्वैदिके भवतूपांशुत्वं सामवैदिकेचोच्चैष्ट्वं भिन्नाधिकरणत्वे चोपांशुत्वोच्चैष्ट्वयोरविरोध इति । अत्र समाधिः—सत्यमेवं यद्यङ्गप्रधानविधी भिद्येते तदा विधिभेदात् तन्निबन्धनो धर्मविधिः स्यात् यथात्वभेदः तथा फलवत्सन्निधावफलं तदङ्गमित्यत्र वक्ष्यति । अभेदेचोभयवेद-विधानाद्भवति संशयः । आक्षेप्ताऽऽह—तथापि न संशयः उभयवेदविधानात् विकल्पो भवतु । परिहरति—न विकल्पः संभवति । एवं सति अङ्गविधिरनुवादः

---

(1) B. P. 809

इत्यङ्गविधेः प्रधानविधितन्त्रत्वं दर्शयति। तथापि कः संशयः ? अय-मस्ति संशयः किमङ्गविधिराक्षिप्तस्वविधेय एव प्रधानविधितन्त्रो भवति, उत प्रधानेनैकीभूतो विधेयं विधत्त इति। पूर्वपक्षवादी मन्यते। स्वार्थं विधाय प्रयोजनवशात् प्रधानेनैकीभवति वारवन्तीय गायतीत्यस्य यः स्वार्थः। अतः सामवैदिकस्वरयुक्तस्यैवाङ्गभावः। अत्राभिधीयते—विहितस्वार्थ एव प्रधानेनैकीभवति। न पुनरङ्ग-तामपि विधाय। प्रधानविधिरङ्गतां विधत्त इति सप्तमाद्ये वक्ष्यामः

इत्यङ्गविधेः प्रधानविधितन्त्रतां दर्शयति। अस्यार्थः—स्याद्विकल्पः यद्युभयधर्मप्राप्तिः स्यात्। विधिभेदे चोभयधर्मप्राप्तिः। न प्रधानविधितोऽङ्गविधीनां भेदोऽस्ति। तेन प्रधानैकविधिधर्मेणैव भवितव्यमिति न विकल्पः। आक्षेप्ताऽऽह—**तथापि कस्संशयः** निश्चित एव प्रधानविधेर्धर्मः। समर्थयिता संशयमाह—**किमसावङ्गविधिराक्षिप्तस्वविधेय एव प्रधानतन्त्रो भवति उत प्रधानेनैकीभूतो विधेयं विधत्त इति।** यद्यात्मीयं विधेयं विधाय पश्चादेकतां याति तदा प्रथमावस्थायां [1]विहितत्वाद्वारवन्तीयस्य सामवैदिकेनैव स्वरेण भवितव्यम्। अथ प्रधानेनैकीभूतस्यैव विधेयत्वं तदा याजुर्वैदिकेनोपांशुत्वेन भवितव्यमिति संशयः। तत्र **पूर्वपक्षवादी मन्यते स्वार्थं विधाय प्रयोजनवशात् प्रधाने-नैकीभवति वारवन्तीयं गायतीत्यस्य स्वार्थः। अतस्सामवैदिकस्वरयुक्तस्यैवाङ्गभावः।** अस्यार्थः—स्ववाक्येनैव वाक्यान्तरनिरपेक्षेणैव स्वार्थो ज्ञाप्यते। तस्य तु निरधिकारतया प्रयुक्त्यभावेनाप्रयोजकत्वात् वाक्यस्यार्थान्तरानुप्रवेशः। अतः प्रधानविध्यननुप्रविष्टेनैवाङ्ग-विधिना अङ्गस्य विहितत्वात् तन्निबन्धनस्वरयुक्तस्यैव प्रधानविधावङ्गतेति वारवन्तीयस्य साम-वैदिकेन स्वरेण भवितव्यम्। **अत्राभिधीयते।** सत्यं, **विहितस्वार्थ एव** निर्ज्ञापित-स्वार्थ एव **प्रधानेन** विधिना **एकीभवति। न पुनरङ्गतामपि विधाय।** तेनाङ्गत्वस्य अङ्गविधिना अनवबोधितत्वात्। तेन तत्र क्रियते न स्वार्थज्ञानमात्रेणाङ्गानुष्ठानम्। किं तर्हि अङ्गत्वज्ञानेन। अतः तन्निबन्धनो न भवति स्वरः। यद्यङ्गविधिरङ्गतां न ज्ञापयति कस्तर्हि ज्ञापयतीत्यत्राह—**प्रधानविधिरङ्गतां विधत्त इति सप्तमाद्ये वक्ष्यते।** स एवाधि-

---

(1) G. अभिहितत्वात्

अङ्गतया च वारवन्तीयस्य प्रयोगः न वारवन्तीयं गायतीत्यस्य विधेर्विषयतया। अतो न स्वार्थविधिः प्रधानविधिं बाधितुमर्हति स्वार्थस्य प्रयोगार्थत्वात्। तदिदमुक्तम्—"[1]गुणस्यानुष्ठानेन मुख्यः सगुणः कथं स्यादिति गुणे प्रवर्तते। गुणप्रवृत्त्या चेन्मुख्यस्य गुणहानिर्भवति गुणप्रवृत्तौ फलमेव नावाप्तं भवति। अथ प्रधानं सगुणं करिष्यामीति गुणे प्रवर्तमानो गुणस्य गुणं विनिपातयति नास्य स्वार्थो हीयते नासौ गुणं सगुणं कर्तुं प्रवर्तत" इति न गुणविधौ स्वार्थे प्रवृत्तिरित्युक्तं भवति। प्रयोगाङ्गत्वाच्च गुणविधेः प्रधान-गुणेन भवितव्यमित्युक्तम्।

[2]भूयस्त्वेनोभयश्रुति ॥ ३-३-१० अ. ३ ॥

स्थितं तावत् प्रधानविधिनिबन्धनो गुणः गुणविधि-

कारविधिः सन्निहितमर्थं स्वार्थतया ज्ञापयति। न पुनरवान्तरविधयः स्वार्थानामङ्गभावं ज्ञापयन्तीति ग्राहकव्युत्पत्त्या सप्तमाधे वक्ष्यति। अङ्गतया च वारवन्तीयस्य प्रयोगः न वारवन्तीयं गायतीत्यस्य विधेर्विषयतया। न स्वरूपज्ञानादनुष्ठानं कर्मणाम् विनोपयोग-ज्ञानात्, दुःखात्मकत्वात् कर्मणामिति। उपसंहरति— अतो न स्वार्थविधिः प्रयोगविधिं बाधितुमर्हति स्वार्थस्य प्रयोगार्थत्वात्। अङ्गविधिः प्रयोगविधिनिबन्धनं न धर्मं बाधितुमर्हति तदर्थत्वात् प्रयोगविध्यर्थत्वादङ्गविधेः। अनेन चैतदुक्तं भवति। यद्यप्यङ्गविधिः स्वार्थे प्रवृत्तः तथापि प्रधानविधिनिबन्धनेनैव धर्मेण भवितव्यं तस्य प्रधानगुणत्वादिति। तदिदं द्वयं भाष्यकारेणोक्तम्—गुणस्यानुष्ठानेन मुख्यः सगुणः कथं स्यादिति गुण-स्यानुष्ठाने प्रवर्तत इत्यनेन ग्रन्थेन [3]न गुणविधेः स्वार्थे प्रवृत्तिरित्युक्तं 'गुणप्रवृत्त्या चेत्' इत्यादिना भाष्येण। प्रयोगाङ्गत्वाच्च गुणविधेः प्रधानगुणेन भवितव्यमित्युक्तम्। प्रयोगः प्रधानविधिः।

भूयस्त्वेनोभयश्रुति। स्थितं तावत् प्रधानविधिनिबन्धनो गुणः गुणविधि-

---

(1) P. 810 (2) P. 815 (3) G. गुणविधेयार्थे

निबन्धनं गुणं बाधत इति। इदमिदानीं चिन्त्यते— यत्रोभयत्र प्रधानश्रुतिः तत्र क प्रधानचोदनेति। यत्र प्रधानचोदना तन्निबन्धनेन गुणेन भवितव्यम्। तत्सिध्यर्थैषाचिन्ता तत्रा-गृह्यमाणविशेषत्वादुभयत्रेत्युक्त्वा भूयस्त्वेनैकत्र निरूपितं वालव्यजनादिना बहुषु राजप्रतिमेषूपविष्टेषु राजाऽवगम्यत इति दृष्टान्ताभिधानम्। तदिदमुभयमयुक्तम्। क भूयस्त्वेन प्रधानस्य प्रयोगाभिधानं दृष्टम्। न च वालव्यजनं श्वेतच्छत्रं वा भूयस्त्वेना-वगमयति। किं तर्हि? असाधारणतया। तस्मादसंबद्धमेवेदं भाष्यं मन्यामहे।

अत्राभिधीयते—नेदमसंबद्धम्। भूयस्त्वेन हि प्रयोगा-वगमस्सूच्यते सकलप्रयोगोऽवगम्यत इत्यर्थः। अल्पाङ्गा-

---

निबन्धनं गुणं बाधत इति। अनेनावान्तरसंगतिरुक्ता। अध्यायसङ्गतिश्च प्रधानस्वर-नियोगार्थाचिन्तेत्यर्थः। इदमपीदानीं चिन्त्यते यत्रोभयत्र प्रधानस्य श्रुतिः तत्र क प्रधान-चोदनेति यत्र वेदे प्रधानचोदना तन्निबन्धनेन स्वरेण भवितव्यम् तत्सिध्यर्था एषा चिन्ता। तत्रागृह्यमाणविशेषणत्वात् उभयत्र वेदे प्रधानचोदनेत्युक्त्वा भूयस्त्वेनैक-त्रेति निरूपितम्। तथा दृष्टान्ताभिधानं कृतम्। बालव्यजनादिना बहुषु राजप्रति-मेषूपविष्टेषु राजावगम्यत इति। तदिदमुभयमयुक्तं न भूयस्त्वं हेतुः न वालव्यजनादि-दृष्टान्तः। हेतुदोषमाह—क भूयस्त्वेनाङ्गानां प्रधानस्य प्रयोगाभिधानं दृष्टम्। क्वचिदपि न भूयस्त्वं प्रयोगाभिधाने हेतुः न च वालव्यजनं श्वेतच्छत्रं च भूयस्त्वादवगम-यति। किं तर्हि? असाधारणतया राजव्यतिरेकेणान्यत्राभावात् विपक्षाद्व्यावृत्ततया च असाधारणाभिधानं, गन्धवत्वादितुल्यत्वे तु अनवगमकतैव स्यात्। तस्मादसंबन्धमिदं भाष्यं मन्यामहे—अत्राभिधीयते। नेदमसंबद्धं, भूयस्त्वेन हि प्रयोगावगमः सुच्यते सकलप्रयोगोऽवगम्यत इत्यर्थः। यत्राङ्गभूयस्त्वं तत्र सकलप्रयोगो ज्ञायते। अल्पाङ्गा-

(1) P. 810

भिधाने पुनः न सकलप्रयोगावगतिर्भवति। सकले च प्रयोगेऽवगम्यमाने प्रयोगाभिधानमतिर्भवति। प्रयेयाद्धि प्रमाणानुमानमिति स्थितम्। यदपि च बालव्यजनमुपन्यस्तं तद्गमकसामान्यतया भूयस्त्वेनेति सूक्तम्।

असंयुक्तं प्रकरणात् इति कर्तव्यतार्थत्वात् ॥ अ. ४ ॥

[1]किमेतावन्त्येव प्रमाणानि? कोऽयं प्रश्नः? यदि तावत् सूत्रार्थ एव न शक्यते व्याख्यातुं प्रश्नेन विनेत्यभिप्रायः। तदयुक्तम्। प्रश्नेन किमत्र; यदसंयुक्तं तत्प्रकरणेन विनियुज्यत इति

भिधाने पुनः न सकलप्रयोगावगतिर्भवति सकले च प्रयोगेऽवगम्यमाने प्रयोगाभिधानमतिर्भवति। कुतः प्रमेयाद्धि प्रमाणावगतिरिति स्थितम्। प्रयोगो हि प्रमेयः, प्रयोगविधिः प्रमाणं, सर्वत्र च प्रमेयेऽवगते प्रमाणमवगम्यते। तेन सकलप्रयोगावगमे प्रमेयस्यावगतत्वात् प्रमाणावगतिर्भवतीति तत्रैव प्रयोगविधिः। अल्पाङ्गावगमे तु प्रयोगानवगमात् प्रयोगविध्यनवगतिरिति स्थितं भूयस्त्वेन प्रयोगविधिज्ञानम्। यदपि बालव्यजनमुपन्यस्तं दृष्टान्तत्वेन तद्गमकसामान्यतया तच्च अस्त्येवेति सूक्तम्। यथा बालव्यजनादिना राजावगतिः तथा भूयस्त्वेनापि प्रयोगविध्यवगतिरिति दृष्टान्तदार्ष्टान्तिकयोः साम्यं [2]न पुनरुभयोरेकप्रकारं [3]गमकत्वमिति विवक्षितम्।

असंयुक्तं प्रकरणात्। "किमेतावन्त्येव प्रमाणानि" इति भाष्यम्। तदाक्षिपति—किमेतावन्त्येव प्रमाणानीति कोऽयं प्रश्नः। यदि तावत् सूत्रार्थ एव न शक्यते व्याख्यातुं प्रश्नेन विनापि इत्यभिप्रायः तदयुक्तम्। किमत्र प्रश्नेन यावता यदसंयुक्तं तत् प्रकरणेन विनियुज्यत इति। शक्यत एव सूत्रार्थो व्याख्यातुम्।

---

(1) Bhasya P. 816 (2) G. omits न (3) R. प्रधानत्वगमक

ननु केनासंयुक्तमिति न विद्मः। एवं तर्हि एतदेव प्रष्टव्यम्। केनासंयुक्तमिति। क्वेदमुपयुज्यते किमेतावन्त्येव प्रमाणानीति? अथायमभिप्रायः। किमिति श्रुत्या लिङ्गेन वाक्येन वा यदसंयुक्तं तत्प्रकरणेन विनियुज्यत इति। किमेतावन्त्येव प्रमाणातीति, तथाप्युत्तरं तावदसंबद्धं अन्यदप्यस्तीति। यद्यन्यदप्यस्ति किमिति तर्हि श्रुत्या लिङ्गेन वाक्येन वाऽसंयुक्तमित्युच्यते। अथाज्ञानमेव नैव श्रुतिलिङ्गवाक्येभ्यः प्रमाणमन्यद्विज्ञायत इति तथापि स्वरूपं वक्तव्यम्। नासंयुक्तं प्रकरणादिति युज्यते कर्तव्यस्य इतिकर्तव्यताकाङ्क्षस्येति वक्ष्यमाणवद्वक्तव्यम्।

ननु च केनासंयुक्तमिति न विद्मः? एवं तर्हि एतदेव प्रष्टव्यम केनासंयुक्तमिति। क्वेदमुपयुज्यते किमेतावन्त्येव प्रमाणानीति। अथायमभिप्रायः, किमिति श्रुत्या लिङ्गेन वाक्येन वा यदसंयुक्तं तत्प्रकरणेन विनियुज्यत इति। किमेतावन्त्येव चत्वार्येव प्रमाणानि। यद्यन्यदपि स्यात् तदा तेनापि विनियोगो भवत्येवेति। यद्यप्येवं प्रश्नो घटते तदापि उत्तरं तावदसंबद्धम् अन्यदप्यस्तीति। कथमसंबद्धं? यद्यन्यदप्यस्ति किमिति श्रुत्या लिङ्गेन वाक्येन चासंयुक्तं प्रकरणेन विनियुज्यत इत्युच्यते, चतुष्टयातिरेकेणापि विनियोगो वक्तव्य एवेति। एतच्च प्रश्नस्योपपत्तिमभ्युपगम्योच्यते। परमार्थतस्तु प्रश्नोऽपि नोपपद्यते एवेति श्रुतिलिङ्गवाक्यैः असंयुक्तं प्रकरणेन विनियुज्यत इति तेनान्यप्रमाणानिराकरणात प्रश्नोऽपि नोपपद्यत इति। एतच्च "तथाप्युत्तरं तावत्" इत्यत्र तथापीति शब्दप्रयोगादवगम्यते। अथाज्ञानमेव नैव श्रुतिलिङ्गवाक्येभ्यः प्रमाणमन्यद्विज्ञायते इति तेन प्रमाणान्तरमजानत एष प्रश्नः किमेतावन्तीति तथाप्येवमपि व्याख्यायमाने स्वरूपं वक्तव्यं नासंयुक्तं प्रकरणादिति युज्यते कर्तव्यस्येतिकर्तव्यताकाङ्क्षस्येति वक्ष्यमाणवद्वक्तव्यम। यथा कर्तव्यस्येति प्रकरणस्वरूपं वक्ष्यति तथा वक्तव्यं न पुनरसंयुक्तं

अतः प्रश्नोऽर्थेऽनौपयिक इव दृश्यते। अत्राभिधीयते—अयमभिप्रायो भाष्यकारस्य। लक्षणादावुक्तं "[1]शेषलक्षणमुच्यते। श्रुत्यादीनि विनियोगे कारणानि" इति। तत्र तावत् श्रुतिलिङ्गवाक्यैः विनियोज्यं शेषत्वमुक्तं प्रकरणेन विनियोज्यं पुनः किमत्र भविष्यति। ननु च प्रयाजादयः सन्त्येव किमिति प्रश्नः। बाढं प्रश्नार्थः विद्यते प्रयाजादीनां हि एकनियोगलक्षणसंबन्धं चतुर्थे वक्ष्यति दर्शपूर्णमासादिभिः किमत्रान्यत्संबन्धे प्रमाणं मृग्यते। एवं च तद्भूताधिकरण एवोक्तः संबन्धः अन्विताभिधायिभिः पदैः सर्वत्र शब्दार्थावगमे हेतुरिति व्यापकं भवति। प्रमाणान्तरे पुनरन्विष्यमाणे नान्विताभिधाननिबन्धनः

प्रकरणादिति वक्तुं युज्यते। अतः प्रश्नार्थोऽनौपयिक इव दृश्यते। अत्राभिधीयते—अयमभिप्रायो भाष्यकारस्य। लक्षणादावुक्तं शेषलक्षणमुच्यते श्रुत्यादीनि च विनियोगे कारणानीति च। तत्र तावत् श्रुतिलिङ्गवाक्यैः विनियोज्यं शेषत्वमुक्तम्। प्रकरणविनियोज्यं पुनः किमत्र भविष्यति। ननु च प्रयाजादयः सन्त्येव प्रकरणविनियोज्याः किमिति प्रश्नः? बाढं प्रश्नार्थः प्रश्नस्य प्रयोजनं विद्यते प्रयाजादीनां हि एकनियोगलक्षणसंबन्धं चतुर्थे वक्ष्यति दर्शपूर्णमासादिभिः किमत्रान्यत् प्रमाणान्तरं मृग्यते। अस्यार्थः:—एकेनैवात्राधिकारनियोगेन सर्वेषां प्रयाजाग्नेयादीनां संबन्धं चतुर्थे वक्ष्यति ततश्च 'समिधो यजति' इत्येवमादिभिः करणोपकारकतयाऽन्वितैः परमापूर्वमन्वितमुच्यत इति श्रौत एवायं विनियोगः किमत्रान्येन प्रमाणेन। एवं च तद्भूताधिकरणोक्त एव संबन्धोऽन्विताभिधायिभिः पदैः सर्वत्र शब्दार्थावगमहेतुरिति व्यापकं भवति। तद्भूताधिकरणोक्त एव संबन्धोऽन्विताभिधानद्वारकापूर्वान्वयप्रतिपादकपदलभ्यः सर्वत्र शब्दार्थावगमहेतुरिति व्यापकं भवति। एवं च सति प्रमाणान्तरे पुनरन्विष्यमाणे नान्विताभिधाननिबन्धनः

---

(1) Bhashya 652

शक्यते प्रदर्शयितुम्। प्रकरणादिभिर्हि वाक्यार्थानां संबन्धावगतिः। न च वाक्यार्थस्य वाक्यार्थस्य च संबन्धे पदाभिधानलक्षणः संबन्ध उपपद्यते। अन्वितं हि पदार्थान्तरेण पदार्थमाचष्टे पदं, न वाक्यार्थं वाक्यार्थान्तरेण। अतो दर्शपूर्णमासार्थतया प्रयाजादि-वाक्यार्थान्वयं अशाब्दं मन्यमानस्य प्रश्नः।

ननु चैतान्येव प्रमाणातीति अशाब्दं मन्वानस्य प्रश्नेनैव भवितव्यम् न पुनः किमेतावन्त्येव प्रमाणानीव। उच्यते—एत-देवोक्तं यद्यसंयुक्तं न तर्हि विनियोज्यम्। अतोऽसंयुक्तमिति वदता एतावन्त्येव प्रमाणानीत्युक्तं भवति। तस्मात् युक्तोऽयं प्रश्नः

संबन्धः शक्यते दर्शयितुम्। कुतः इत्यत्राह—प्रकरणादिभिर्वाक्यार्थानां संबन्धा-वगतिः प्रयाजादिनियोगानां वाक्यार्थानां, वाक्यार्थभूतस्याधिकारनियोगस्य च संबन्धः प्रकरणादिभिरवगम्यते। न च वाक्यार्थस्य च वाक्यार्थस्य संबन्धे पदाभिधानलक्षणः संबन्धः। कस्मादित्याह—अन्वितं पदं पदार्थान्तरेण पदार्थमाचष्टे। तेन पदार्थाना-मेवान्विताभिधानलक्षणः संबन्धः न पुनर्वाक्यार्थं वाक्यार्थान्तरेणान्वितमभिधत्ते वाक्यम्। वाक्यस्याखण्डस्यावाचकत्वात्। भागशो हि वाक्याद्वाक्यार्थावगतिरिति तत्र तत्रोक्तम्। उपसंहरति—अतो दर्शपूर्णमासार्थतया प्रयाजादिवाक्यार्थान्वयमशाब्दं मन्वानस्य प्रश्नः। वाक्यार्थान्वयमशाब्दं मन्यते। पदार्थान्वयस्तु भवति शाब्दः तस्मिंस्तु पक्षे न श्रुत्याद्यतिरिक्त-प्रमाणसिद्धिरिति मन्वानस्यायं प्रश्नः। ननु चैतावन्त्येव प्रमाणानीति अशाब्दं वाक्यार्थ संबन्धं मन्वानस्य प्रश्नेन भवितव्यम्। न पुनः किमेतावन्त्येव प्रमाणानीति। उच्यते —एतदेवोक्तं यद्यसंयुक्तं श्रुत्यादिभिः न तर्हि विनियोज्यमपि अशाब्दत्वाद्वाक्यार्थयोः संबन्धस्येति प्रमाणान्तराक्षेप एवायं यतस्त्वया सिद्धान्तवादिना [1]असंयुक्तमिति वदता एतावन्त्येव प्रमाणानि इत्युक्तम्। अतः उपपन्नोऽयं प्रश्नः असंयुक्तग्रहणे सति

---

(1) G. संयुक्त

—किमेतावन्त्येव प्रमाणानीति। इतरस्तु नावश्यं पदार्था-न्तरान्वितमेव शाब्दम्। ऐदमर्थ्येनापि शब्दः संबन्धं प्रतिपादयत्येवेति मन्वानो नेत्युक्तवान्। इतरस्तु पृच्छति [1]किमपरं कारणमिति प्रश्नेनैवोपक्रमः पूर्वपक्ष इति, पूर्वोक्तप्रश्नार्थविवरणं

किमेतावन्त्येव प्रमाणानीति। अस्यार्थः—सिद्धान्तवादिनैवासंयुक्तग्रहणे तु कृते पूर्वपक्ष-वाद्याह —किं तवाप्येतावन्त्येव प्रमाणानीति सम्मतं येन श्रुत्याद्यसंयुक्तं[2] असंयुक्तमिति ब्रूषे। अन्यथा श्रुत्याद्यसंयुक्तमपि किमित्यसंयुक्तं स्यात् इत्येवं प्रश्नः। **इतरस्तु** राद्धान्तवादी **नावश्यं पदार्थान्वितमेवेदं शाब्दम्। ऐदमर्थ्येनापि शब्दः संबन्धं प्रतिपादयत्येवेति मन्वानो नेत्युक्तवान्।** अस्यार्थः—न मया असंयुक्तशब्दं प्रयुञ्जानेन सर्वथाऽसंप्रयुक्तत्व-मुक्तम्। किन्तु प्रकरणस्य पृथक् प्रमाणत्वदर्शनाय श्रुत्याद्यसंयुक्तं प्रकरणेन विनियुज्यत इत्युक्तम्। यस्तु तवाभिप्रायः वाक्यार्थानां परस्परसंबन्धोऽशाब्द इति सोऽप्ययुक्तः नावश्यं पदार्थान्वितमेव शाब्दं शब्दप्रमेयम्। किन्तु ऐदमर्थ्यान्यथानुपपत्त्या गम्यमानमपि शाब्दं भवत्येव। कस्मादित्याह—**ऐदमर्थ्येनापि शब्दः संबन्धं प्रतिपादयत्येवेति।** अस्यार्थः —न प्रथममेव पदार्थैरितिकर्तव्यताभावेनान्वितैः अन्वितं परमापूर्वमभिधीयते, किन्तु ऐदमर्थ्य-मात्रेणान्वितैः। प्रधानविधिरेव स्वार्थमवान्तरवाक्यार्थैरन्वितं अभिधत्ते। अवान्तरविधयस्तु स्वार्थान् स्वरूपमात्रेणैव सन्निधापयन्ति। अत एव च सप्तमाद्ये प्रधानविधिरेवाङ्गतां विधत्त इत्युक्तम्। तेन स्ववाक्येनोपात्तकरणावरुद्धे परमापूर्वे प्रकारान्तरेणान्वयानुपपत्तेः करणोपकार-कतयैवान्वयात् न प्रमाणान्तरमस्तीति पूर्वपक्षिणोक्ते सामान्येनैदमर्थ्यान्वयासंभवात् करणो-पकारकतया विशेषान्वयासंभवात् शेषान्वयाभिधानेन अर्थभेदो विद्यत इति करणान्वयसिध्यर्थं प्रकरणं नाम प्रमाणान्तरं अस्तीति मन्वानो राद्धान्ती नेत्युक्तवान्। इतरस्तु राद्धान्तिनो भावमनवबुध्यमानः पृच्छति—**किमपरं कारणमिति** "प्रश्नेनैवोपक्रम" इति भाष्यम्। तस्यार्थः प्रश्नेनैवोपक्रमः पूर्वपक्ष इति तद्व्याचष्टे—**पूर्वोक्तस्य प्रश्नार्थस्य** विवरणमेतत्।

---

(1) Bhashya P. 817 (2) असंयुक्तमात्रं

का नामेयं नदीति च। न चानिर्ज्ञातनद्यर्थस्यैवोपपद्यते प्रश्न इति प्रकटीकृतः प्रश्नार्थः 'कथं पुनरसंयुक्तस्यैव विनियोगः'। तदिदमैदमर्थ्यलक्षणं कथयति इति कर्तव्यतार्थित्वादिति। ऐदमर्थ्येनापि शब्दः सबन्धं प्रतिपादयत्येवेति।

ननु चैकनियोगलक्षणसंबन्धोऽयमित्युक्तम्। किमिदमितिकर्तव्यतार्थित्वं नाम? उच्यते—एकनियोगलक्षण एव संबन्धो नोपपद्यते यदीतिकर्तव्यता लक्षणः संबन्धो न स्यात्। न ह्यसंबन्धविधेयस्य एकनियोगता उपपद्यते विधेयनानात्वात्।

का नामेयं नदीति। कस्यचित् ज्ञातनद्यर्थस्यैवाक्षेपाभिप्रायः प्रश्न उपपद्यत इति। स चायं प्रश्नार्थः "कथं पुनरसंयुक्तस्यैव विनियोग" इत्यनेन ग्रन्थेन प्रकटीकृतः। तदिदमैदमर्थ्यलक्षणं कथयति। इति कर्तव्यतार्थित्वात् इति। यदीतिकर्तव्यतार्थित्वादित्यनेन शेषत्वमुक्तं तदा ऐदमर्थ्यलक्षणं ऐदमैर्थ्यं लक्षणं प्रमाणं यस्य तत तथोक्तम्। ननु चोक्तं एकनियोगलक्षणसंबन्धोऽयं, किमिदमितिकर्तव्यतार्थित्वं नाम। एकनियोगत्वेनैव संबन्धसिद्धेरितिकर्तव्यतार्थित्वं नाम न प्रमाणान्तरमिति। उच्यते—एकनियोगलक्षणसंबन्धो नोपपद्यते यदीतिकर्तव्यतालक्षणः संबन्धो न स्यात् इति। अस्यार्थः—एकं साधिकारनियोगं प्रति ऐदमर्थ्येऽवगतेऽपि यावदितिकर्तव्यतालक्षणः संबन्धो नावगम्यते तावन्निर्विशेषविषयस्यैदमर्थ्यस्यान्यथानुपपत्तेः करणावरुद्धत्वाच्च एकनियोगलक्षण एव संबन्धो-नोपपद्यते। कथं नोपपद्यते इत्यत्राह—न ह्यसंबन्धविधेयस्य एकविधानता उपपद्यते। असंबन्धो विधेयो यस्य विधेः, यद्विधिर्विधेयेन सह स विधिः तेन सहैकविधानतामेव न लभते विधेयनानात्वात्। स्वभावतो नानाभूतयोर्विध्योः विधेयेन नानाभूतेन नानाभूतविधेययोश्च येयमेकविधानता सा विधेययोः परस्परसंबन्धं विना नोपपद्यते। तेनावान्तरविध्यर्थानां स्वविधिविधेयानां प्रधानविधेरितिकर्तव्यतार्थित्वलक्षणेन प्रकरणेन प्रधानविधिविधेयेन करणेन सह करणेतिकर्तव्यतालक्षणः संबन्धः प्रधाननियोगेनैदमर्थ्यलक्षणस्संबन्धोऽन्विताभिधाननिबन्धन

उपपद्यते च करणेतिकर्तव्यतया संबन्धः। अन्यत्रापि साध्ये दर्शनात्। साध्यश्चायं नियोगार्थः। तस्मादुपपन्नं इतिकर्तव्यतार्थित्वादिति विधेयसंबन्धकारणम्। किमिति तद्भूताधिकरणे वाक्यस्यैवार्थेनौत्पत्तिकः संबन्धो दर्शितः। उच्यते—असूत्रार्थज्ञो भवान्। क्रियार्थेनेति वदता सर्वस्यैवास्य प्रामाण्यं दर्शितम्। तस्मादैदमर्थ्यलक्षणमेव संबन्धं वेदे वेदविदो मन्यन्ते। तत्सिद्ध्यर्थं तु पदार्थानामपि अन्विताभिधानं दर्शितम्। ऐदमर्थ्यमेव हि

एव। तदाक्षिप्तस्तु यः करणेतिकर्तव्यतालक्षणस्संबन्धः सोऽपि शाब्द एव। अत्र चेयं प्रक्रिया—अवान्तरविध्यर्था विधेयाः प्रधानविधिं प्रत्युपादीयमानत्वात् यद्धि यत्सिद्ध्यर्थमुपादीयते तत् तद्विधेयमिति तन्त्रे व्यवहारः प्रधानविधिस्तु न विधेयः। ननु प्रधानविध्यनुप्रवेशः कथमितिकर्तव्यतायाः यावता[2] करणमात्रपर्यवसायिन्येव सेत्यत्राह—**उपपद्यते च करणस्येतिकर्तव्यतया संबन्धः।** करणस्येतिकर्तव्यतया नियोगस्य **संबन्धः अन्यत्रापि लौकिके साध्ये दर्शनात्।** लौकिकस्यापि साध्यस्येतिकर्तव्यतया संबन्धः करणं तु द्वारमात्रमिति लोकप्रतीतम्। **साध्यश्चायं नियोगार्थः।** उपसंहरति—**तस्मादुपपन्नं इतिकर्तव्यतार्थित्वादिति विधेयसंबन्धकारणम्।** विधेययोः संबन्धकारणमिति। व्याख्यातं चेदम्। यदि वाक्यार्थयोरपि संबन्धः शाब्दः **किमिति तर्हि वाक्यस्यैवार्थेन औत्पत्तिकः संबन्धो दर्शितः** यावता वाक्यसमूहस्यापि दर्शयितव्यः। **उच्यते--असूत्रार्थज्ञो भवान् क्रियार्थेनेति वदता सर्वस्यैवास्य प्रामाण्यं दर्शितम्।** यावद्धि क्रियार्थतया नियोगार्थतया प्रतिपाद्यते तस्य सर्वस्यान्वयः शाब्द एव न प्रतिभामात्रकल्पित इति सर्वस्यास्य पदार्थान्वयलक्षणस्य वाक्यार्थान्वयलक्षणस्य च प्रामाण्यं दर्शितम्। नन्वेवं वदता नियोगार्थेन सहैदमर्थ्यलक्षणः संबन्ध एव शाब्द इत्युक्तं न पुनर्विधेयानामपि परस्परसंबन्ध इत्यत्राह—**ऐदमर्थ्यलक्षणमेव संबन्धं वेदविदो मन्यन्ते। तत्सिद्ध्यर्थं तु पदार्थानामपि अन्विताभिधानं दृष्टम्।** अस्यार्थः—पदार्थानामपि यः परस्परसंबन्धः स ऐदमर्थ्यलक्षणसंबन्धसिध्यर्थ एव। सर्वस्यात्र

(1) G. कारण

प्रमाणान्तरत्वे हेतुः। अन्विताभिधानं तु प्रमाणान्तरपूर्वकेष्वपि तुल्यम् देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्येवमादिषु लौकिकेषु वाक्येषु। अतः प्रकरणविनियोज्यमपि शेषत्वमस्तीति सिद्धम्।

[1]क्रमश्च देशसामान्यात्॥ सू. १२. अ. ५॥

अत्रेदानीं कः प्रश्नार्थः ऐदमर्थ्यलक्षणमेव हि संबन्धं वेदविदो मन्यन्त इत्युक्तम्। ननु चैतावन्त्येव प्रमाणानीत्याक्षेपेण भवितव्यं किमिदं 'किमेतावन्त्येव प्रमाणानी'ति। अत्रोच्यते–अत्राप्यसंयुक्त-

---

नियोगैदमर्थ्यलक्षण एव संबन्धः तेनेहापि वाक्यार्थानां नियोगैदमर्थ्यलक्षणस्संबन्धः। तत्सिद्ध्यर्थस्तु विधेयसंबन्ध इति। नियोगैदमर्थ्यमेव च शब्दस्य प्रमाणान्तरत्वे हेतुः तत्र प्रमाणान्तरानवगमात्। अन्वितार्थाभिधानं तु लोकेऽपि तुल्यम्। देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्येवमादिषु लौकिकेष्वपि। अधिकरणार्थमुपसंहरति—अतः प्रकरणविनियोज्यमपि शेषत्वमस्तीति सिद्धम्। प्रयोजनं तु सप्तमाद्यपूर्वपक्षन्यायेन व्याख्यातमिति न व्याख्यातम्।

क्रमश्च देशसामान्यात्। अत्रेदानीं कः प्रश्नार्थः पूर्वाधिकरणे हि प्रकरणं नाम प्रमाणान्तरं नास्तीत्यनेनाभिप्रायेण युक्तः प्रश्नः। अत्र पुनः कः प्रश्नार्थः। उत्तरं—ऐदमर्थ्यलक्षणमेव संबन्धं वेदे वेदविदो मन्यन्त इत्युक्तम्। स च संबन्धमात्रमेवापादयितुं समर्थः तावन्मात्रेणैवोपपत्तेः न पुनः करणविशेषसंबन्धमपि। अपि च ऐदमर्थ्यव्यतिरेकेण देशसामान्यमेव न संबन्धोऽस्ति योऽन्यथानुपपद्यमानः विशेषकरणसंबन्धं कल्पयतीति प्रमाणान्तरभूतक्रमाक्षेपरूपः[2] प्रश्नः। ननु चैतावन्त्येव प्रमाणानीत्याक्षेपेण भवितव्यम्। किमिदं 'किमेतावन्त्येव प्रमाणानि' इति। अत्रोच्यते–अत्राप्यसंयुक्त-

---

(1) Bhashya P. 819 (2) R. क्षेपपरः

ग्रहणं विषयान्तरप्रदर्शनार्थम्। सत्यमैदमर्थ्यव्यतिरेकेण संबन्धो नास्ति, तथापि प्रमाणान्तरमस्ति ऐदमर्थ्यविशेषावगतौ स्थान-सामान्यं नाम तदिदमुक्तं—क्रमश्च देशसामान्यादिति। प्रयोजनं तु दर्शितमेव।

[1]आख्या चैवं तदर्थत्वात॥ सू. १३. अ. ६॥

अत्रेदानीं प्रश्नार्थो नोपपद्यते ऐदमर्थ्ये सति स्थानवत् विशेषावगमे हेतुत्वात् समाख्यायाः। उच्यते—अस्त्यत्र विशेषः युक्तं तावत्स्थानस्य विशेषावगहेतुत्वं वैदिकत्वात्।

ग्रहणं विषयान्तरप्रदर्शनार्थतयाऽनुवर्तते। तस्मिन् सत्ययं प्रश्नः पूर्ववदित्यनवद्यम्। इतर आह—सत्यमैदमर्थ्यव्यतिरेकेण संबन्धो नास्ति तथापि प्रमाणान्तरमस्त्येव ऐदमर्थ्य-विशेषावगतौ स्थानसामान्यं नाम। तदिदमुक्तं क्रमश्च देशसामान्यादिति। अस्यार्थः—दब्धिर्नामासीदित्यनुमन्त्रणमन्त्रः केनचिदनुमन्त्रणीयेन सहैकावाक्यतामाकाङ्क्षति तेन सन्निहितेनैकवाक्यतां याति। यत्रैव स्थानेन एकवाक्यतापूर्वकः शेषभावः तत्र स्थानेनैव विशेषकरणसंबन्धः इति। प्रयोजनं तु दर्शितमेव।

आख्या चैवं तदर्थत्वात्। अत्रेदानीं प्रश्नार्थो नोपपद्यते ऐदमर्थ्ये सति स्थानवत् विशेषावगमे हेतुत्वात् समाख्यायाः। अस्यार्थः—अध्वर्य्वादयः प्रकरणे परिपठिताः नियोगेनैदमर्थ्यापन्ना कथमैदमर्थ्यं भजन्तामिति आध्वर्यवमित्यादिभिः [2]कर्मविशेषा-भिधायिनीभिः समाख्याभिः विशेषकार्यसंबन्धावगमात तद्द्वारेणैव शेषत्वमिति समाख्यायाः प्रामाण्यात तदाक्षेपाय न प्रश्न उपपद्यते। उच्यते—अस्त्यत्र विशेषः स्थानसमाख्ययोः युक्तं तावत् स्थानस्य विशेषावगमहेतुत्वं वैदिकत्वात्। वेद एव हि उपांशुयाजक्रमे 'दब्धिर्नामासि' इत्यनुमन्त्रणमन्त्रः पठ्यते। तत्र सन्निहितेनान्विताभिधानं लोके व्युत्पन्नमिति

---

(1) Bh. P. 803 (2) G. धर्म

समाख्या पुनः लौकिकी। न च लौकिकमभिधानं वेदार्थावगमे हेतुर्भवति। यथा 'पचति' इत्येवमादिषु। अत इदं किमेतावन्त्येव प्रमाणानीति। अत्रोच्यते। समाख्याया लौकिकत्वेपि वैदिकस्यार्थस्य विशेषावगमे हेतुत्वं प्रतिपद्यते। कुतः? अभिधानं हि कृत्तद्धितसमासानां संबन्धिनि प्रसिद्धं वैदिकस्यार्थस्य चेदमभिधानं यद्यपि स्वयं लौकिकम्। अतो विशेषमवगमयति। न चेदं स्मृतिवत् प्रमाणान्तरापेक्षं औत्पत्तिकत्वात् शब्दार्थ-

---

सन्निहितोपांशुयाजदेवतयैव असीति मन्त्रगतं पदं संबध्यते। तेन युक्तं स्थानस्य विशेषावगमहेतुत्वम्। **समाख्या पुनः लौकिकी** आध्वर्यवमित्यादिका। **न च लौकिकमभिधानं वेदार्थावगमहेतुर्भवति। यथा पचतीत्येवमादिषु।** अस्यार्थः—लौकिकमभिधानं वेदाननुप्रविष्टं न पदार्थावगमहेतुर्भवति यथा पचतीत्यादिः। अन्यथा पचतीत्यादेरपि वेदार्थाङ्गभूतपाकविधायकत्वं स्यात् इति यतः समाख्यायाः वेदार्थावगमहेतुत्वं नास्ति अतः अप्रमाणत्वात् समाख्यायाः इदमुक्तं **किमेतावन्त्येव प्रमाणानीति। अत्रोच्यते—समाख्याया लौकिकत्वेपि वैदिकस्यार्थस्यावगमहेतुत्वम्।** आध्वर्यवादिसमाख्या तु कर्मविशेषाणां कर्तृविशेषावगमहेतुत्वं प्रतिपद्यते। कुतः? **अभिधानं हि कृत्तद्धितसमासानां संबन्धिनि प्रसिद्धं वैदिकस्यार्थस्य चेदमभिधानं यद्यपि स्वयं लौकिकम्।** अस्यार्थः—यथा पचतीत्यादि लौकिकमभिधानं न वैदिकार्थसंबद्धं न तथा हौत्रादिसमाख्या वैदिककर्मविषयत्वात् इयं च समाख्या तद्धितान्ता तद्धितान्तैश्चाभिधानं प्रकृत्यर्थसंबन्धिनि दृष्टम्। कर्मसु च कर्तृविशेषाश्रवणात् कर्तृविशेषापेक्षायां समाख्यया कर्मसंबन्धित्वेनावगता हौत्रादयः एव कर्तारो विज्ञायन्ते। अतस्समाख्या **विशेषमवगमयति।** समाख्याया बुद्धिस्थत्वेन [1]कर्तृविशेषणैतानि कर्माण्यभिधीयन्त इत्यर्थः। ननु च लौकिकमिदमभिधानं, तच्च प्रमाणान्तरपूर्वकं तेन प्रमाणान्तरेण विशिष्टपुरुषसबन्धमवगम्य लौकिकमभिधानं प्रयोक्तव्यम्। न च प्राक् समाख्यायाः संबन्धोऽवगतः इति कथं समाख्यया नियमः इत्यत्राह—**न चेदं स्मृतिवत् प्रमाणान्तरमपेक्षते औत्पत्तिकत्वाच्छब्दार्थ-**

---

(1) G. कर्तृविशेषाण्येतानि

संबन्धस्य। तस्माद्युक्तं आख्या चैवं तदर्थत्वात इति यतो विशेषावगमे हेतुः। प्रयोजनमुक्तम्।

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ॥ ७ ॥

[1]का पुनरत्र श्रुतिः ? किं लिङ्गमिति। **ननु चायं प्रश्नो नोपपद्यते। किमिति नोपपद्यते ? यस्मात् उक्तानि विनियोगे कारणानि इयुक्तम्। न चानिर्ज्ञातस्य उक्तता संभवति। तस्माद्विप्रतिषिद्धं "उक्तानि विनियोगे कारणानीति। का पुनरत्र श्रुतिः किं लिङ्गं" इति च।**

संबन्धस्य। अस्यार्थः—स्मृतौ हि वाक्यं पुरुषप्रणीतम्। तच्च वाक्यं पुरुषप्रणीतमुच्यते यत्पुरुषेण प्रमाणान्तरेणार्थं प्रतीत्य तत्प्रतिपादनाय प्रयुज्यते। तदुक्तं[1] "कृतिश्चात्र प्रमाणान्तरदृष्टार्थप्रतिपादनम्। न च वर्णादिकार्यता" इति। तेन तत्र प्रमाणान्तरापेक्षा। इह त्वाध्वर्यवमित्यादिपदं, न च पदं पौरुषेयं अनादित्वात्। अतोऽत्र न प्रमाणान्तरापेक्षा। **तस्माद्युक्तं आख्या चैवं तदर्थत्वात् इति।** कुतो युक्तम्—**यतो विशेषावगमहेतुः** सामान्यतः क्रियाक्षेपेण कर्तृमात्रेऽवगते विशेषापेक्षायां समाख्या यस्माद्विशेषावगमहेतुः, तस्माद्विशेषान्विताभिधानसिद्ध्यर्थं कर्तृविशेषमुपस्थापयतीति समाख्यापि प्रमाणमित्यर्थः। **प्रयोजनमुक्तम्।**

श्रुतिलिङ्गवाक्यप्रकरणस्थान। अत्र भाष्यम्—का पुनरित्यादि। तदाक्षिपति —**का पुनरत्र श्रुतिः किमिदं लिङ्गम्। ननु चायं प्रश्नो नोपपद्यते। किमिति नोपपद्यते ? यस्मादुक्तानि विनियोगे कारणानीत्युक्तम्।** अत्रैव भाष्यकारेण। **न चानिर्ज्ञातस्योक्तता संभवति। तस्माद्विप्रतिषिद्धं उक्तानि विनियोगे कारणानीति का पुनरत्र श्रुतिः किं लिङ्गमिति च।** उक्तानीति पदं निर्ज्ञाततामाह। का पुनः श्रुतिः किं लिङ्गमिति च अनिर्ज्ञातताम्। न चैकस्यार्थस्य युगपत् निर्ज्ञानं अनिर्ज्ञानं च संभवति।

---

(1) Bhashya 824

अथायमभिप्रायः विनियोग एव श्रुत्यादिभिरुक्तो, न पुनः श्रुत्यादीनां स्वरूपमिति। यद्येवं तर्हि वक्तव्यं उक्तः श्रुत्यादिभिर्विनियोग इति। न विनियोगे कारणान्युक्तानीति। किञ्च विनियोगोक्त्या विनियोगकारणान्युक्तानि भवन्त्येव। कार्यतः कारणपरिज्ञानात्। अर्थावच्छेद्यमेव हि शाब्दं विशेषतो भवति। स्वरूपतो वर्णमात्रग्रहणात्। अतो विनियोगोक्त्यापि[1] नैव प्रश्नो न घटते। श्रुतिलिङ्गयोश्च स्वरूपमभिधाय पुनर्वाक्यप्रश्ने कोऽभिप्रायो न विद्मः। अथायमभिप्रायः संहत्यार्थमभिधति पदानि वाक्यं

अथायमभिप्रायः विनियोग एव श्रुत्यादिभिरुक्तः न पुनः श्रुत्यादीनं स्वरूपमिति तेनोक्तता च प्रश्नश्चोपपद्यते इति यद्यपि विनियोग एवोक्तो न श्रुत्यादीनां स्वरूपं, एवं **तर्ह्येवमेव वक्तव्यं उक्तः श्रुत्यादिभिर्विनियोग इति न पुनरेवं** वक्तव्यं उक्तानि **विनियोगे कारणातीति। किञ्च विनियोगोक्त्यापि विनियोगे कारणान्युक्तान्येव भवन्ति।** कुतः? **कार्यतः कारणपरिज्ञानात्** विनियोगः कार्यं श्रुत्यादीनि विनियोगे कारणानीति कार्ये चावगते कारणमवगतं भवति। श्रुतिविनियोगो यस्य कार्यं तत् श्रुत्याख्यं प्रमाणमिति। इतरप्रमाणेभ्यश्च शाब्दस्यायं विशेष इत्याह—**अर्थावच्छेद्यमेव हि शाब्दं विशेषतो भवति स्वरूपतो वर्णमात्रावगमात्।** इदं पदं वाक्यं इति योऽयं विभागः स कार्यविभाग-निबन्धन एव। न चार्थावगमादृते कार्यात् स्वरूपत एव शाब्दस्य भेदः स्वरूपतो वर्णमात्रावगमात। तेन विनियोगेऽप्युक्ते कारणज्ञानस्योद्भूतत्वात प्रश्नो नोपपद्यते। आक्षेपान्तरं चाह—**श्रुतिलिङ्गयोश्च विशेषमभिधाय पुनर्वाक्यप्रश्ने कोऽभिप्राय इति न विद्मः।** ययोरेव हि प्रमाणयोर्यस्मिन् विषये बलाबलसंप्रधारणा तयोरेव स्वरूपप्रश्नः तत्र युक्तः, नापरस्य। **अथायमभिप्रायः** पृच्छतः वाक्यस्वरूपे पृष्टे—**संहत्यार्थमभिदधति पदाति वाक्यं** इत्युत्तरे उक्ते श्रुतिलिङ्गयोर्वाक्याद्विशेषानुपपत्तिः। अतो वाक्यस्य वाक्यस्य चैषा संप्रधारणेति चोद्यं कर्तव्यमित्येवमर्थं इदं वाक्यविषयं प्रश्नोत्तरं प्रश्नश्च उत्तरं च

---

(1) विनियोगोक्त्याविनैव प्रश्नो न घटते

मिति स्पष्टमेवान्यत्वमुपलभामहे। तस्मादसंबद्धमेवेदं भाष्यमिति अर्थज्ञानमानिनो मन्यते।

अत्राभिधीयते—सत्यमर्थात् प्रमाणावगतिस्तथापि उपपद्यत एवायं प्रश्नः का पुनरत्र श्रुतिरिति। कथमुपपद्यते? सत्यं गार्हपत्य-श्रवणं श्रुतिः सत्यं च इन्द्राभिधानसामर्थ्यं लिङ्गं तथापि पदान्तर-निरपेक्षं नैवोभयं शक्यतेऽवगन्तुम्। ऐन्द्र्या गार्हपत्यः उपस्था-तव्य इति। नापीन्द्रपरता मन्त्रस्य। तुल्ये पदान्तरसव्यपेक्षत्वे

प्रश्नोत्तरम्। तदपि नोपपद्यते यस्माद्गार्हपत्यश्रवणं श्रुतिः, इन्द्रशब्दस्याभिधानसामर्थ्यं च लिङ्गं, संहत्यार्थमभिदधति पदानि वाक्यं इति स्पष्टमेव त्रयाणां परस्परमन्यत्वमुपलभामहे। ननु संहत्येति वदन् मिलितं पदजातं अपूर्वमर्थमभिधत्ते इतीव ग्रन्थो दृश्यते। स चायमनुपपन्नः। समुदायस्य वाचकत्वनिषेधात्। एकैकमेव हि पदमन्वितं स्वार्थमभिधत्त इति तत्र तत्रोक्तम्। उच्यते—अभिदधतीति वहुवचनप्रयोगात् एकैकश एव अभिधान-मुक्तम्। किन्तु एकैकेनैव पदेनान्वितं स्वार्थमभिदधता येनान्वितं तदुपस्थापकं पदमपे-क्षितम्। अतोऽर्थान्तरोपस्थापकतया पदान्तरापेक्षितया संहत्येत्युक्तम्। एतच्च वाक्यार्थमातृकायां तद्भूताधिकरणे चोक्तमस्माभिः। तस्मादन्धपदमेवेदं भाष्यमिति ग्रन्थज्ञानमानिनो मन्यन्ते। अत्राभिधीयते। सत्यमर्थात् प्रमाणावगतिः तथापि तूपपद्यत एव प्रश्नः का पुनरत्र श्रुतिरिति। अत्रायमाशयः— विनियोगाभिधानेन प्रमाण-स्वरूपमप्युक्तं भवति तदभिप्रायेणैवेदमुक्तं उक्तानि विनियोगेकारणानीति। न च स्वरूप-ज्ञाने सति श्रुतिलिङ्गप्रश्नस्यानवकाश इति उपपद्यते प्रश्नः। कथमुपपद्यते? उत्तरं —सत्यं गार्हपत्यश्रवणं श्रुतिः सत्यं चेन्द्राभिधानसामर्थ्यं लिङ्गं तथापि पदान्तरनिरपेक्षं नैव शक्यतेऽवगन्तुम्। ऐन्द्र्या गार्हपत्य उपस्थातव्य इति श्रुतिविनियोज्यत्वं, नापीन्द्रपरता मन्त्रस्य लैङ्गिकी पदान्तरनिरपेक्षा। अतः तुल्ये पदान्तरसव्यपेक्षत्वे

विशेषं अजानन् पृच्छति—का पुनरत्र श्रुतिः किं लिङ्गमिति। अथ किमित्यादावेव एतन्न निरूपितं श्रुत्यादीनि विनियोगे कारणानीत्यस्मिन् भाष्य एव। अत्रोच्यते—तत्राप्येतत् उत्सूत्रमेव वक्तव्यम्। इयांस्तु अत्र विशेषः 'श्रुतिलिङ्ग' इत्यस्य सूत्रस्य व्याख्यातव्यतया औपोद्घातिकतया संबद्धमभिधानं भवति। कथं पुनरिदानीं तुल्ये पदान्तरसंबन्धे गार्हपत्यशब्दस्य श्रुतितोच्यते? इयमुच्यते पदान्तरसंबन्धस्तु इन्द्राभिधाने गार्हपत्याभिधाने वा अविशिष्टः। गार्हपत्यश्रवणमेव गार्हपत्याभिधाने व्याप्रियते। ननु द्वितीया व्याप्रियत इत्युक्तम्। सत्यमुक्तम् गार्हपत्यश्रवणे सति। अतः पदस्यैव

कार्यगम्ययोः श्रुतिलिङ्गयोर्विशेषमजानन् पृच्छति—का पुनरत्र श्रुतिः किं लिङ्गमिति। अथ किमिति अध्यायादौ इदं न निर्णीतं श्रुत्यादीनि च विनियोगे कारणानीत्यस्मिन्नेव भाष्ये अत्रोच्यते—तत्राप्येतदुत्सूत्रमेव वक्तव्यम्। यदि हि तत्रेदं सूत्रोक्तं तदा सूत्रं विवृण्वन् भाष्यकारो ब्रूयात् तत्राप्येतदुत्सूत्रमिति विशेषाभावादिहैवोक्तम्। इयांस्त्वत्र विशेषः श्रुतिलिङ्ग इत्यस्य सूत्रस्य व्याख्यातव्यतया औपोद्घातिकतया संबद्धमभिधानं भवति। ज्ञातस्वरूपयोर्हि भेदावगमे सति बलाबलविवेकस्यावसर इति भवति स्वरूपज्ञानमौपोद्घातिकम्। कथं पुनरिदानीं तुल्ये पदान्तरसंबन्धे गार्हपत्यशब्दस्य श्रुतितोच्यते? यावता वाक्यमेव[1] द्वयमप्येतदिति। इयमुच्यते। पदान्तरसंबन्धो मन्त्रगतो विनियोगवाक्यगतश्च इन्द्राभिधाने गार्हपत्याभिधाने वाऽविशिष्टः। गार्हपत्यश्रवणमेव तु गार्हपत्याभिधाने व्याप्रियते। तेनान्वयव्यतिरेकाभ्यां गार्हपत्यश्रवणमेव गार्हपत्याभिधाने व्याप्रियते। ननु द्वितीया व्याप्रियत इत्युक्तम्। इन्द्रेऽपि ह्युपस्थेये गार्हपत्यशब्दः सप्तम्यन्ततयाऽन्वयं यात्येव। न पुनर्द्वितीयेति सैव गार्हपत्योपस्थाने कारणम्। सत्यं गार्हपत्यश्रवणे सति। सापि न प्रातिपदिकार्थनिरपेक्षा गार्हपत्यविनियोगे प्रभवति,

---

(1) G. वाक्येनन्वयम

निदर्शितं न प्रातिपदिकमात्रस्य। एवमिन्द्राभिधानेपि मन्त्रे पदान्तरमुदास्ते। एवं च सति वाक्ये प्रश्नोत्तरमेतद्विवेकार्थेत्युपपन्नमेव। अतोऽसाधारणप्रतिपत्तिनिमित्ततया संहत्यार्थाभिधाने सत्यपि श्रुतिर्लिङ्गमिति चोच्यते। तस्मादुपपन्नं श्रुतिलिङ्गयोर्विरोधे किमुभयं विनियोजकं उत श्रुतिरेवेति। प्रकरणप्रश्नाभिप्रायं तु स्वस्थाने वक्ष्यामः, क्रमसमाख्ययोश्च।

ननु चैवं सति वक्तव्यं श्रुतिः लिङ्गं चोभयं प्रमाणं उत श्रुतिर्बलीयसीति। इह पुनः श्रुतिलिङ्गयोः किं श्रुतिर्बलीयसी आहोस्वित् लिङ्गमिति न घटते। यस्मादिदमपि कारणं श्रुतिः लिङ्गमपीति।

इन्द्रेऽपि द्वितीयार्थोपपत्तेः। अतः पदस्यैव दर्शितं न प्रातिपदिकमात्रस्येति। द्वितीया अनुक्ताप्युपलक्ष्यते। द्वितीयोपादानेपि प्रातिपदिकमपि इति पदमेव गार्हपत्याभिधाने व्याप्रियते। एवमिन्द्राभिधाने इन्द्रोपस्थाने विनियोगेपि मन्त्रे पदान्तरमुदास्ते गार्हपत्याभिधानेपि तुल्यत्वात्। तस्मात् पदान्तराणामुदासीनत्वात् श्रुतिलिङ्गयोर्वाक्यात् भेदः। एवं च सति [1]पदान्तरापेक्षत्वेन वाक्यत्वे संभाव्यमाने सति एतद्विवेकज्ञानार्थैव वाक्येपि प्रश्नोत्तरमित्युपपन्नमेव। उपसंहरति— अतोऽसाधारणप्रतीतिनिमित्ततया सत्यपि संहत्यार्थाभिधाने श्रुतिर्लिङ्गमिति चोच्यते। यतो भेदः श्रुतिलिङ्गयोः। तस्मादुपपन्नं श्रुतिलिङ्गयोर्विरोधे किमुभयं विनियोजकं उत श्रुतिरेवेति। प्रकरणप्रश्नाभिप्रायं तु स्वस्थाने प्रकरणप्रश्नस्थाने वाक्यप्रकरणविरोधाधिकरणे वक्ष्यामः व्याख्यास्याम इत्यर्थः। स्थानसमाख्ययोश्च प्रश्नाभिप्रायं वक्ष्याम इत्यनुषङ्गः। ननु चैवं सति श्रुतिलिङ्गयोर्भेदे सति संप्रधारणमेवं वक्तव्यं किं श्रुतिर्लिङ्गं चोभयं प्रमाणं उत श्रुतिर्बलीयसीति। इह पुनर्भाष्ये श्रुतिलिङ्गयोः किं बलीयसी श्रुतिः आहोस्विल्लिङ्गमिति न घटते। कुतः? यस्मादिदमपि कारणं इदमपि श्रुतिरपि कारणं लिङ्गमपि कारणं इति वक्ष्यति इति

---

(1) पदार्थापेक्षत्वेन

तस्माद्यथैवोपन्यस्तमस्माभिः तथैवोपन्यसनीयम्, न तु किं श्रुतिर्बलीयसी आहोस्वित् लिङ्गमिति। तुल्यबले एते कारणे इति च पूर्वपक्षहेतुदर्शनात्। तस्मादन्यथैवोपन्यासोऽन्यथैवोपसंहार इति। विरुद्धं फलमप्येवमेवोपन्यस्तम् किमिन्द्रस्य गार्हपत्यस्य चोपस्थानं कर्तव्यं, उत गार्हपत्यस्यैवेति। तस्मादुपक्रमोपसंहारयोः साम्यं वक्तव्यम्।

यदपि च एवं तर्हि लिङ्गवाक्ये विरुध्यमाने इह संप्रधार्येते न श्रुतिलिङ्गे इति तदप्ययुक्तमिव, सर्वत्र समवेतं विविक्तं च दृश्यत इत्युक्तत्वात् विवेकस्य। या श्रुतिः सा लिङ्गेन विरुध्यत इति वाक्यं पुनः लक्षणयाप्युपपद्यत एवेत्युक्त्वा अथवेति श्रुत्यन्तरोपन्यासः किमपरितोषात् उत विकल्पार्थ इत्येतदपि नैव ज्ञायते।

तस्मात्तदनुसारेण द्वयोरपि विनियोजकत्वं उत श्रुतेरेवेति संशयो युक्तः। तस्माद्यथैव पूर्वमुपन्यस्तमस्माभिः तथैवोपन्यसनीयम्। न तु किं श्रुतिर्बलीयसी आहोस्विल्लिङ्गमिति। यदि तुल्यबले एते कारणे इति च पूर्वपक्षहेतुदर्शनात्। तदनुरूपेण हेतुमता उभयविनियोजकत्वेन भवितव्यम्। आक्षिप्योपसंहरति— तस्मादन्यथैवोपन्यासोऽन्यथैवोपसंहार इति। विरुद्धं फलमपि पूर्वपक्षसिद्धान्तयोः एवमेवोपन्यस्तम्— किमिन्द्रस्य गार्हपत्यस्य चोपस्थानं कर्तव्यं उत गार्हपत्यस्यैवेति। तस्मादुपक्रमोपसंहारयोः साम्यं वक्तव्यमिति। आक्षेपान्तरं चाह— यदपि चैवं तर्हि लिङ्गवाक्ये विरुध्यमाने इह संप्रधार्येते न श्रुतिलिङ्गे इति तदप्ययुक्तमेव। सर्वत्र समवेतं विविक्तं च दृश्यत इत्युक्तत्वात् विवेकस्य। आक्षेपान्तरमाह— या त्वत्र श्रुतिः सा लिङ्गेन विरुध्यते। वाक्यं पुनः लक्षणयाप्युपपद्यत एवेत्युक्त्वा अथवेति पुनः श्रुत्यन्तरोपन्यासः किमपरितोषात् उत विकल्पार्थ इति एतदपि न ज्ञायते। पूर्वं गार्हपत्यश्रवणं श्रुतिमुक्त्वा अथवेति द्वितीयाश्रुतिं दर्शयति। तत्र किमपरितोषेणेदमुच्यते अथ वा पक्षान्तरविभवेनेति न ज्ञायते।

(1) G. द्वितीयां

उच्यते—यस्तावदुपन्यासः किं बलीयसी श्रुतिः आहोस्विल्लिङ्गमिति तत्रायमभिप्रायः। किं लिङ्गोन्मर्दनेनैव यथा श्रुतिः प्रमाण तथा लिङ्गमपि। यदि च उभयमुभयोपमर्दनेनैव प्रमाणं तदोपपद्यत एवायमुपन्यासः किं बलीयसी श्रुतिः आहोस्विल्लिङ्गमिति।

एतदुक्तं भवति—न विद्मः किं बलीय इति। तस्मादुभयं प्रमाणं उभयप्रामाण्ये चोभयोरभिधानम्। अत एव चानियम इत्युक्तम् "यदि तुल्यबले एते कारणे" इति च विशेषाग्रहणात्। "ततो विकल्प"[1] इति। कोऽयं विकल्पः? ननु चास्मिन् पक्षे समुच्चय एव। अभिधानविकल्पमङ्गीकृत्यैतदुक्तं न प्रयोगविकल्पम्

उच्यते—यस्तावदयमुपन्यासः किं बलीयसी श्रुतिः आहोस्विल्लिङ्गमिति तत्रायमभिप्रायः किं लिङ्गोपमर्दनेनैव श्रुतिः यथा प्रमाणं तथा लिङ्गमपि श्रुत्युपमर्दनेनैव प्रमाणमिति। यदा चोभयं उभयोपमर्दनेनैव प्रमाणं तदोपपद्यत एवायमुपन्यासः किं श्रुतिर्बलीयसी आहोस्विल्लिङ्गमिति। कथमुपपद्यत इत्याह—एतदुक्तं भवति न विद्मः किं बलीय इति। तेनायं भाष्यार्थः—किं लिङ्गात् श्रुतिरेव बलीयसी आहोस्विच्छ्रुतिस्तावद्बलीयस्येव। एवं लिङ्गमपि श्रुतेर्बलीय इति। तस्मादुभयं प्रमाणम्। उभयप्रामाण्ये च उभयोरभिधानम्। अत एव चानियम इत्युक्तम्। यदि तुल्यबले एते कारणे इति च विशेषाग्रहणादुक्तमित्यनुषङ्गः। भाष्यमनुभाष्याक्षिपति—ततो विकल्प इति। कोऽयं विकल्पः। ननु चास्मिन् पक्षे समुच्चय एव इन्द्रे च गार्हपत्ये च विनियोगान्मन्त्रस्य। समर्थयते—अभिधानविकल्पमङ्गीकृत्यैतदुक्तं न प्रयोगविकल्पम्। अस्यार्थः—यदा गार्हपत्याभिधानाय प्रयुज्यते तदा मन्त्रेणेन्द्रो नाभिधीयते। यदा इन्द्रोपस्थानाय न तदा गार्हपत्यस्य इत्यभिधानस्य व्यवस्थितो विकल्पः। मन्त्रप्रयोगस्य तु अग्नौ इन्द्रे च समुच्चय

---

(1) Bh. P. 824

यदि तु लिङ्गं बलीयः' इत्येतदपि भाष्यमुपन्यासवत् द्रष्टव्यम्। एवं तर्हीत्युक्ते विशेषे पुनः प्रश्नः केनाभिप्रायेण? न केवलात् गार्हपत्यश्रवणात तदुपस्थानावगतिः। तावन्मात्रस्य च श्रुतित्वमुपदर्शितम्। तदिदानीं राद्धान्तवाद्यभिप्रायं विवृणोति— सत्यं वाक्यादृते नायमवगमः गार्हपत्यश्रवणात तदुपस्थानावगतिरिति। याऽत्र श्रुतिरित्युक्तम् इन्द्राभिधानेपि तुल्यत्वात्। कथं? बलीयस्यपि हि लिङ्गे ऐन्द्र्योपतिष्ठत इत्येतत् गार्हपत्यशब्देन सहैकवाक्यतामुपेत्यैव। यदि हि नोपेयात ततो लिङ्गेन विरुध्येत तस्मात् श्रुतिलिङ्गयोर्विरोधः। अथ वा नात्र एकवाक्यत्वादिति

एव शेषिभेदेन प्रतिप्रधानं गुणावृत्तेरिति। 'यदि तु लिङ्गं बलीय' इत्येतदपि भाष्यं उपन्यासवत् द्रष्टव्यम्। बलीयस्त्वं च श्रुतिवत् स्वविषये निरपेक्षविनियोजकत्वम्। उक्तेऽपि श्रुतिलिङ्गे वाक्यानां विवेकः। एवं तर्हीति पुनः प्रश्नो न केवलात् गार्हपत्यश्रवणात् तदुपस्थानावगतिः पदमात्रस्यावाचकत्वात्। तावन्मात्रस्य श्रुतित्वमुपदर्शितम् तच्चावाचकम्। यच्च वाचकं तद्वाक्यमिति। एवं चोदिते तदिदानीं राद्धान्तवाद्यभिप्रायं विवृणोतीति वदन् पूर्वोक्तविवरणमेतदिति दर्शयति—सत्यं वाक्यादृते नायमवगमः गार्हपत्यश्रवणात् तदुपस्थानावगतिरिति। एतच्च या त्वत्र श्रुतिरित्यनेन ग्रन्थेनोक्तम् इन्द्राभिधानेपि तुल्यत्वात् पदान्तराणाम्। कथं तुल्यत्वं? बलीयस्यपि हि लिङ्गे इन्द्रेप्युपस्थेये ऐन्द्र्योपतिष्ठत इति एतत् गार्हपत्यशब्देन सहैकवाक्यतामभ्युपेत्यैव यदि हि नोपेयात् तदा लिङ्गेन वाक्यं विरुध्येत वाक्यलिङ्गविरोध एवेह भवेत् न श्रुतिलिङ्गविरोधः। इह गार्हपत्यश्रवणादनन्तरं योऽर्थः प्रतीयतेऽग्निविशेषात्मकः स लिङ्गेन विरुद्धयते। अतः श्रुतिलिङ्गयोरेवायं विरोधः। [1]अथ वा नात्रैकवाक्यत्वादिति

---

(1) G. कथं वा

पक्षान्तरोपन्यासः सकलपदप्रदर्शनार्थ इति व्याख्यातम्। किं पुनरत्र युक्तम्? उभयत्र स्वार्थावगमात्। लिङ्गादपि लिङ्गार्थोऽवगम्यते श्रुतेरपि हि श्रुत्यर्थः। वाक्यस्य चौदासीन्यात् उभयत्राभिधानमात्रं विरुध्यते। न चाभिधाने कश्चिद्विशेषोऽवगम्यत इत्यतः तुल्यबले एते कारणे इत्युक्तम्। [1]"ननु लिङ्गस्य भङ्गुरस्येव रूपं सविचिकित्सो हि लिङ्गात्प्रत्यय" इति। केयं विचिकित्सा नाम? असम्यक् प्रत्ययः। किमत्रासम्यक्त्वम्। नहीन्द्राभिधानात् इन्द्रोऽभिधातव्य इति प्रत्ययो भवतीत्यर्थः। भवति तु गार्हपत्यश्रवणात् विधायकवाक्यगतत्वात गार्हपत्यशब्दस्य। ननु चाविधायकत्वात लिङ्गस्य प्रामाण्यमेव नास्ति, कथं

पक्षान्तरोपन्यासः सकलपदप्रदर्शनार्थ इति व्याख्यातम्। नापरितोषेण नापि पक्षान्तरतया श्रुत्यन्तरोपन्यासः। किन्तु पूर्वं केवलं प्रातिपदिकमुक्तं, अधुना विभक्तिसहितम्। विभक्तिसहितस्य च विनियोजकत्वमिति दर्शितं प्राक्। किं पुनरत्र युक्तं? उभयत्र स्वार्थावगमात्। विवृणोति—लिङ्गादपि लिङ्गार्थः इन्द्रोपस्थानात्मकोऽवगम्यते। श्रुतेरपि श्रुत्यर्थो गार्हपत्योपस्थानात्मकोऽवगम्यते। वाक्यस्य चौदासीन्यात् उभयत्राभिधानमेव[2] पदमात्रमेवोभयत्र मन्त्रे विनियोजके च विरुद्ध्यते। न चाभिधाने कश्चिद्विशेषोऽवगम्यते इत्यतस्तुल्यबले एते कारणे इत्युक्तम्। एवं चात्र पूर्वपक्षकरणे 'वचनात्त्व यथार्थं' इत्यनेन सह स्पष्टमपौनरुक्त्यम्। तत्र हि पूर्वपक्षे लिङ्गस्यैव विनियोजकत्वमुक्त्वा सिद्धान्ते श्रुतिस्तावद्विनियोक्तुं शक्नोतीत्युक्तम्। इहेदानीं श्रुतेः स्थिते विनियोजकत्वे लिङ्गस्यापि विनियोजकत्वमाशङ्क्यत इत्युक्तम्। अत्र भाष्यं—"ननु लिङ्गस्य भङ्गुरस्येव रूपं सविचिकित्सो हि लिङ्गात् प्रत्यय" इति। तदाक्षिपति—केयं विचिकित्सा नाम? उत्तरं—असम्यक्प्रत्ययः। किमत्रासम्यक्त्वं? उत्तरं—नहीन्द्राभिधानात् इन्द्रोऽभिधातव्य इति प्रत्ययो भवति। न हि शक्तिमात्रेण इदमनेन कार्यमिति कर्तव्यताज्ञानं भवति। भवति तु गार्हपत्यश्रवणात् अनेन गार्हपत्य उपस्थेय इति कर्तव्यताज्ञानं विधायकवाक्यगतत्वात् गार्हपत्यशब्दस्य। ननु चाविधायकत्वाल्लिङ्गस्य प्रामाण्यमेव नास्ति कथं

---

(1) Bhashya 842 (2) G. adds एवमेव

विरोध इति। सत्यं—अभिधानसामर्थ्यमात्रं नैव प्रमाणम्—इतिकर्तव्यतावगमे सत्यन्यतो विशेषावगमे प्रमाणं, कर्तव्यतावगमात् प्रकरणादिभिः। कर्तव्यतावगमे चाभिधानमात्रमवशिष्यत इत्युक्तम्। तस्मात तुल्यबले एते कारणे इति। "[1]बलीयानपि हि हेतुः" इति न च तावत बलीयान्, अन्वारुह्यापि न विरोधोऽस्तीति मन्यते।

नन्वयमेव विरोधः सकृत् उपस्थानं चोदितम् असकृदभिनिर्वर्त्यत इति। नैवम्—उपस्थेयभेदात् प्रतिप्रधानमावर्तन्ते गुणा इति न्याय एवैषः न विरोधोऽर्थः। **ननु चेदं अविरोधोत्तरं न घटते। नह्यत्रोपस्थेयद्वयं श्रूयते ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति गार्हपत्य एवैकः उपस्थेयतया श्रूयते नेन्द्रोऽपीति। तस्मादनुत्तरमिदम्।**

विरोधः। नाप्रमाणेन प्रमाणस्य विरोध इत्यर्थः। परिहरति—**सत्यं, अभिधानसामर्थ्यमात्रं नैव प्रमाणं इतिकर्तव्यतावगमे सति अन्यतो विशेषावगमे**[2] **प्रमाणम्**। कैः कर्तव्यतावगमः? प्रकरणादिभिः सामान्येनात्रोपकर्तव्यमित्यवगते किं कुर्वेतेति विशेषाकाङ्क्षायां यच्छक्नोति कर्तुं तत्कुर्वेतेति विशेषकार्ये लिङ्गं विनियोजकं भवत्येव। [3]**कर्तव्यतावगमे चाभिधानमात्रमवशिष्यत** इत्युक्तं भाष्ये। तदिदं लिङ्गक्रमाधिकरणे सन्यासिकीकृतं प्रकटीकृतम्। पूर्वपक्षमुपसंहरति—**तस्मात् तुल्यबले एते कारणे इति**। अत्रापरं भाष्यं "बलीयानपि हेतुः" इति तद्व्याचष्टे—**न च तावत् बलीयान्**। उक्तेन न्यायेन श्रुतिलिङ्गयोस्तुल्यबलत्वात्। **अन्वारुह्यापि न विरोधोऽस्तीति मन्यते**। "ननु चायमेव विरोधः सकृदुपस्थानं चोदितं असकृदभिनिर्वर्त्यत इति। नैवम्। उपस्थेयभेदात् प्रतिप्रधानमावर्तन्ते गुणा इति न्याय एवैषः न विरोधः" इति भाष्यमनुभाष्य आक्षिपति—**ननु चेदमविरोधोत्तरं न घटते न ह्यत्रोपस्थेयद्वयं श्रूयते। गार्हपत्यमुपतिष्ठत इति गार्हपत्य एवैकः उपस्थेयः श्रूयते नेन्द्रोऽपि**। न लिङ्गात् कर्तव्यतावगमोऽस्तीति। **तस्मादनुत्तरमिदं** भाष्यम्।

---

(1) Bh, P. 844 (2) G. वगमः (3) G. कर्तव्यनवगमे

उच्यते—प्रकरणात् कर्तव्यतावगमात् इन्द्रपदात् इन्द्राभिधानं प्रतीयत इति मन्वानेन 'उपस्थेयभेदात' इत्युक्तम्। वाक्यसामान्यात्। एवं तर्हि गौणमुख्यता नोपपद्यत इति पुनर्विरोधोपन्यासः। ननु च प्रतिप्रधानं गुणावृत्तौ सत्यां नैवासौ विरोधो घटते। अविनियुक्तमन्त्रापेक्षोऽयं विरोधः। विनियोगे त्वविरोधः इति सिद्धोऽत्र पूर्वपक्षः।

अत्रोच्यते—श्रुतिलिङ्गयोर्विरोधे श्रुतिर्बलीयसी इति। कुतः? अर्थविप्रकर्षात्। किमिदं अर्थविप्रकर्षादिति अर्थस्य विप्रकर्षः अर्थविप्रकर्षः। कः पुनरर्थः? श्रुत्यर्थः

उच्यते—प्रकरणात् कर्तव्यतावगमात्। इन्द्रपदादपीन्द्राभिधानं प्रतीयत इति प्रकरणसव्यपेक्षाल्लिङ्गादपि कर्तव्यतावगमः इति मन्वानेन [1]उपस्थेयभेदादित्युक्तम्। वाक्यसामान्याद्वा। अस्यार्थः—विनियोजकेऽपि पदमात्रमेव गार्हपत्यं इति विनियोजकं पदान्तराणामुदासीनत्वात् मन्त्रेऽपि इन्द्रपदमविशिष्टमिति तदपि विनियोजकं संभवति वाक्यसामान्यात् साधारण्यात्; उभयत्रापि तुल्यत्वादित्युक्तं प्रागेव। एवं तर्हि गौणमुख्यता नोपपद्यत इति पुनर्विरोधोपन्यासः। ननु च प्रतिप्रधानं गुणावृत्तौ सत्यां नैवायं विरोधो घटते। अस्यार्थः—प्रमाणद्वयेनोभयत्र विरोधात् प्रतिप्रधानं गुणानामावृत्तेः द्विरयं मन्त्रः प्रयोक्तव्यः। तत्रैकस्मिन् प्रयोगे मुख्यता अन्यस्मिंश्च गौणतेति न विरोधः। यदि ह्येकस्मिन् प्रयोगे गौणमुख्यार्थतोच्यते ततो विरोधो भवेदिति। परिहरति—अविनियुक्तमन्त्रापेक्षोऽयं विरोधः। अविनियुक्तो यो मन्त्रः तदपेक्षोऽयं गौणमुख्यार्थतापत्त्या विरोधः। एतदुक्तं भवति—स्वाध्यायकाले यस्य मन्त्रस्यैकः प्रयोगः स गौणमुख्यार्थौ न युक्त इति। कथं तर्हि न विरोध इत्यत्राह—विनियोगे तु अविरोधः। प्रधानभेदेन विनियोगभेदात्। तद्भेदे च प्रतिप्रधानं प्रयोगभेदादविरोध इति सिद्धोऽत्र पूर्वः पक्षः राद्धान्तमुपक्रमते—अत्रोच्यते श्रुतिलिङ्गयोः श्रुतिर्बलीयसी। कुतः अर्थविप्रकर्षात्। किमिदं अर्थविप्रकर्षादिति। अर्थस्य विप्रकर्षोऽर्थविप्रकर्षः। कः पुनरर्थः श्रुत्यर्थः

---

(1) G. इन्द्रोपस्थेय

गार्हपत्यमुपतिष्ठत इति सन्निकृष्टः श्रुत्यर्थः। इन्द्रः उपस्थेय इति विप्रकृष्टः। कथं? 'कदाचन स्तरीः' इत्यनेन मन्त्रेणेन्द्र उपस्थातव्य इति न श्रूयते। सत्यपीन्द्राभिधानसामर्थ्ये वचनाभावात् अनुपस्थानीयः इन्द्र इत्यवगम्यते। **ननु पूर्वमेवोक्तं सत्यां कर्तव्यतायां इन्द्राभिधानं प्रमाणं, ततश्चोभयत्राभिधाने तुल्यतैव। अतो द्वयोः प्रामाण्यमिति। किमिदं पुनराक्षिप्तम् समाहितं च?** "धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात इति। यदेतत् प्रकरणं लिङ्गं च उभयमप्येतदशाब्दम्। न चातिक्रान्तप्रत्यक्ष एव एवंलक्षणकेऽर्थे शब्दमन्तरेण परिच्छेदोऽवकल्पते। अतो मन्यामहे विप्रकृष्टं श्रुत्यर्थाल्लिङ्गमिति" **उच्यते— अशाब्दमेतदिति विशेषं प्रदर्शयितुम्। ननु चैवं सति प्रामाण्यमेवास्य हीयते। कुतो**

अनेनेदं कर्तव्यमित्येवंरूपः। **अत्र गार्हपत्यमुपतिष्ठत इति सन्निकृष्टः श्रुत्यर्थः** प्रमाणान्तरानपेक्षत्वाच्छ्रुतेः **इन्द्र उपस्थेय इति विप्रकृष्टः।** कथं? उत्तरं— "कदाचन स्तरीरसि" इति मन्त्रेणेन्द्र उपस्थेय इति न श्रूयते सत्यपीन्द्राभिधानसामर्थ्ये वचनाभावात्। अनुपस्थानीय इन्द्र इत्यवगम्यते" इति भाष्यमनुभाष्याक्षिपति—**ननु च पूर्वमेवोक्तं सत्यां कर्तव्यतायां** इन्द्रोऽभिधीयते येन लिङ्गेन सामर्थ्यलक्षणेन **तदिन्द्राभिधानं प्रमाणम्। ततश्चोभयोः** इन्द्रगार्हपत्ययोरभिधाने **स्यात्तुल्यतैव। अतो द्वयोः** श्रुतिलिङ्गयोः **प्रामाण्यमिति।** किमिदं पुनराक्षिप्तम्? लिङ्गप्रामाण्यं **समाहितं च** समर्थनमुच्यते "**धर्मस्य** शब्दमूलत्वादशब्दमनपेक्षं स्यात इति यदेतत् प्रकरणं लिङ्गं च उभयमेतदशाब्दम्। न चातिक्रान्तप्रत्यक्षविषय(एव) एवंलक्षणकेऽर्थे शब्दमन्तरेण परिच्छेदोऽवकल्पते। अतो मन्यामहे विप्रकृष्टं श्रुत्यर्थाल्लिङ्गमिति" **उच्यते**—अनेन भाष्येण **अशाब्दमेतदिति** [1]**विशेषं प्रदर्शयितुं** पुनराक्षिप्तं लिङ्गस्य प्रामाण्यं समाहितं च। उच्यते— शब्दश्च पूर्वत्र योज्यः। **ननु चैवं सति** अशाब्दत्वे लिङ्गस्य **प्रामाण्यमेव हीयते।**

---

(1) G. विशेषं

विरोधः। अथायमभिप्रायः असति विरोधे स्मृतिवल्लिङ्गस्य प्रामाण्यमिति। तदयुक्तम्। कुतः? स्मृतेर्हि अर्थमवगम्य विरोधाद्विपर्ययः कल्प्यते। इह पुनः उपस्थानं नैवावगम्यत इत्युक्तम्। कथमनवगम्यमानेऽर्थेऽनुमानम्। तस्माद्दुर्गृहीतस्तेनसंभाषितवदसंबन्धं प्रतिभाति। पुनरपि कर्तव्यतापेक्षाल्लिङ्गादेवार्थावगतिं दर्शयति। श्रुतिसंभवे वा अवगतिवाक्यसाधारण्ये सति कथमयं विशेष इति वक्तव्यम्। अत्राभिधीयते—कर्तव्यस्येतिकर्तव्यताकाङ्क्षस्य वचनं प्रकरणमिति प्रकरणादैदमर्थ्यलक्षण एव संबन्धः न पुनः अन्वितपदार्थलक्षण इत्युक्तम्। ततः किम्? अन्वितपदार्थ-

---

कुतो विरोधः? प्रामाण्ये हि विरोधो भवति विरुद्धार्थोपस्थापकत्वात्। **अथायमभिप्रायः असति विरोधे** श्रुत्या **स्मृतिवत् लिङ्गस्य प्रामाण्यं** यथा श्रुत्यविरोधविषये स्मृतेः प्रामाण्यं तथा लिङ्गस्यापि इति। **तदयुक्तम्। कुतः? स्मृतेर्ह्यर्थमवगम्य** [1]**विरोधाद्विपर्ययः कल्प्यते** औदुंबरी सर्वा वेष्टयितव्येति सर्ववेष्टनं स्मृतेरवगम्य श्रुतिविरोधादर्थस्य विपर्ययः कल्प्यते। **इह पुनरुपस्थानं नैवावगम्यत इत्युक्तम्। कथमनवगम्यमानेऽर्थेऽनुमानं** संभाव्यते **तस्मात् दुर्गृहीतस्तेनसंभाषितवदसंबन्धं प्रतिभाति।** दुर्गृहीतं दुराचरितं येन स्तेनेन तद्भाषितवत् असंबद्धमिदं भाष्यमित्यर्थः। **पुनरपि** भाष्यकारः प्रकरणावगत**कर्तव्यतापेक्षाल्लिङ्गादेवार्थावगतिं दर्शयति—श्रुतिसंभवे च अवगतिवाक्यसाधारण्ये सति कथमयं विशेष इति वक्तव्यम्।** वाक्यस्य श्रुतौ लिङ्गे च साधारण्येनोदासीनत्वात् द्वयोरप्यवगतिर्युक्तेति भावः।

अत्राभिधीयते—कर्तव्यस्येतिकर्तव्यताकाङ्क्षस्य वचनं प्रकरणमिति प्रकरणस्य लक्षणम्। तेन **चैदमर्थ्यलक्षणः** करणैदमर्थ्यलक्षण **एव संबन्धः** प्रकरणेन प्रतीयते, **न पुनरन्वितपदार्थलक्षणः** अन्विताः पदार्था लक्षणं प्रमाणं यस्य पदार्थान्वयलक्षणस्य स प्रकरणान्नावगम्यत इत्युक्तं प्रकरणाधिकरणे। **ततः किं?** इदं ततः। **अन्वितपदार्थ-**

---

(1) G. विपर्ययविरोधः

लक्षणः संबन्धः पदार्थेभ्य एवावसीयते। ऐदमर्थ्यलक्षणस्तु केवलं कार्यत एवेति न पदार्थान्वये व्यापारोऽवगम्यते। एवमपि को विशेषः? अयमस्ति विशेषः—[1]पदार्थान्वितलक्षणः तस्मिन् सति पश्चात्कार्ययोगः पदार्थान्वयलक्षणस्तु प्रथमत एव। सोऽयमर्थविप्रकर्षः। अन्वयप्रदर्शनार्थं च तार्तीयं प्रमाणषट्कं शेषशेषिविदो मन्यन्ते। स चान्वयः श्रुतौ प्रथमतरमवगम्यत इति न कार्यतः पाश्चात्यायां पदार्थान्वयावगतौ प्रमाणमस्ति। नह्यन्वितस्यान्वयो दृश्यते यतः। तस्मात् सूक्तं लिङ्गात् श्रुतिर्बलीयसीति। आनुमानिकमभिधानं च पदार्थान्वयापेक्षमेव द्रष्टव्यम्।

लक्षणः संबन्धः [2]पदार्थेभ्य एवावसीयते। ऐदमर्थ्यलक्षणस्तु केवलं कार्यत एव न पदार्थान्वये[1] व्यापारोऽवगम्यते कार्यस्य। प्रकरणस्य कार्यतो हि करणैदमर्थ्यमेवावगम्यते। न पदार्थान्वयः कार्यमेवेतिकर्तव्यताकाङ्क्षं प्रकरणम्। तेन प्रकरणात् केवलकरणैदमर्थ्यावगमात् पदार्थान्वयो नावगम्यते। एवमपि को विशेषः? अयमस्ति विशेषः पदार्थान्वितलक्षणः। केवलसंबन्धे पदार्थैरन्वितो यो वाक्यार्थः सः लक्षणं यस्य पदार्थान्वयरूपसंबन्धस्य तस्मिन् सति पश्चात् कार्ययोगः कार्येण सहेतिकर्तव्यतालक्षणः संबन्धः पदार्थान्वयलक्षणस्तु प्रथमत एव। कार्ये तु प्रकरणरूपे सति पश्चात् पदार्थान्वयः सामर्थ्यरूपलिङ्गबलेनेति सोऽयमर्थविप्रकर्षः। श्रुतौ प्रथमं पदार्थान्वयः लिङ्गे तु पश्चादिति। भवतु पदार्थान्वयविप्रकर्षो लिङ्गस्य तथापि कथं श्रुतेर्बलीयस्त्वं इत्यत्राह—अन्वयप्रदर्शनार्थं च तार्तीयं प्रमाणषट्कं शेषशेषिविदो मन्यन्ते। तथापि किमित्यत्राह—स चायमन्वयः श्रुतौ प्रथमतरमवगम्यते। तावतैव ग्राहकस्य मन्त्रसमाम्नानस्य च कृतार्थत्वात्। न कार्यतः पाश्चात्यायां पदार्थान्वयावगतौ प्रमाणमस्ति। कुतः? न हि अन्वितस्यान्वयो दृश्यते यतः। तस्मादुक्तं लिङ्गाच्छ्रुतिर्बलीयसीति। अत्राधिकरणे भाष्ये आनुमानिकाभिधानं च पदार्थान्वयापेक्षम्। पदार्थान्वयो हि प्रकरणलिङ्गाभ्यां पाश्चात्य इति पाश्चात्यात्म-

---

(1) पदार्थान्वय (2) पदार्थेभ्यः

[1]विकल्पस्य चान्याय्यत्वादिति मन्त्रवाक्यापेक्षम् । नेन्द्रशब्दस्याभिधानद्वयं न्याय्यमित्यभिप्रायः । अतो न विनियुक्तस्य विनियोगो घटत इति प्रदर्शितो हेतुः । यदुक्तमविरोध इति ; एवमुक्तो विरोधः यदुतेन्द्रशब्दस्य मन्त्रवाक्यापेक्षया नाभिधानद्वयमुपपद्यत इति । ऐदमर्थ्यस्यान्वयलभ्यत्वात् श्रुतावुपरता कर्तव्यतापेक्षेति नाकाङ्क्षाद्वयमुपपद्यत इति विरोधः । तदिदमकृतसामर्थ्यत्वं मन्त्रवाक्यस्य नियोगस्य चोक्तं वाक्यप्रकरणशब्दाभ्याम् ।

करत्वात् अनुमान इवानुमानिक इत्युच्यते । अशाब्दं चोच्यते साक्षादन्वितपदार्थलक्षणत्वाभावात् । ननु समुच्चयेनात्र पूर्वः पक्षः कथं विकल्पस्य चान्याय्यत्वात् इति राद्धान्तेऽभिधीयते इत्यत्राह—**विकल्पस्य चान्याय्यत्वादिति मन्त्रवाक्यापेक्षम्** । एतदेव विवृणोति—**नेन्द्रशब्दस्याभिधानद्वयं न्याय्यमित्यभिप्रायः** । इन्द्रशब्दो हि कदाचिद्गार्हपत्यमभिधत्ते कदाचिच्चेन्द्रमिति न न्याय्यमिति । **अतो** विकल्पस्यान्याय्यत्वात् **विनियुक्तस्यैव मन्त्रस्य विनियोगो न घटत इति दर्शितो हेतुः** विकल्पस्यान्याय्यत्वलक्षणः । **यदुक्तं अविरोध इति** पूर्वपक्षानुभाषणम् । सोऽयं विरोधो **यदुत इन्द्रशब्दस्य मन्त्रवाक्यापेक्षयाऽभिधानद्वयं नोपपद्यत इति** । सकृदुच्चरितं मन्त्रवाक्यम् तेन चैक एवार्थोऽभिधातव्यः न पुनरर्थद्वयं सकृदुच्चरितस्यानेकार्थत्वानुपपत्तेः । ननु च विनियोगद्वयेन प्रयोगद्वयान्न विरोधः इत्यत्राह—**ऐदमर्थ्यस्य च अन्वयलभ्यत्वात् श्रुतावुपरतैव कर्तव्यतापेक्षेति नाकाङ्क्षाद्वयमुपपद्यत इति विरोधः** । अस्यार्थः—श्रुतौ पदार्थान्वयात् प्रथममवगतात् करणैदमर्थ्यस्य लभ्यत्वात् प्रथममवगतेन श्रौतेन कार्यविशेषेण उपरतैव कार्यविशेषापेक्षेति नाकाङ्क्षाद्वयमुपपद्यत इति उभयत्रापि विनियोगात् अस्ति मन्त्रवाक्यापेक्षया विरोधः । यदिदं श्रौताद्विनियोगात् प्राक् कार्यापेक्षित्वं मन्त्रस्य ग्राहकग्रहणस्य च **तदिदमकृतसामर्थ्यत्वं मन्त्रवाक्यस्य विनियोगस्य चोक्तम् वाक्यप्रकरणशब्दाभ्यां** भाष्यगताभ्याम् । वाक्यशब्देन मन्त्रवाक्यमुच्यते । प्रकरणशब्देन ग्राहकनियोग इत्यर्थः । कृतं सामर्थ्यं ययो-

---

(1) Bh. P. 846

अत उपपन्नोऽर्थविप्रकर्षः। [1]"लिङ्गवाक्ययोर्विरोधे किमुदाहरणम् ? स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन् सीद अमृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः इति"।

ननु चार्थविप्रकर्षादित्युक्तो हेतुः सापेक्षनिरपेक्षत्वं च लिङ्ग-वाक्ययोः।

स्तौ कृतसामर्थ्यौ मन्त्रनियोगौ न कृतसामर्थ्यौ अकृतसामर्थ्यौ तयोर्भावस्तत्त्वम्। अतः उपपन्नोऽर्थविप्रकर्षः।

अत्र चेदं पूर्वोत्तरपक्षसारम्—श्रुत्या तावदैन्द्रो मन्त्रो गार्हपत्योपस्थाने विनियुज्यते। तथा प्रकरणापादिते कार्यमात्रे विशेषकार्यनियामकतया लब्धप्रमाणभावेन लिङ्गेनापि इन्द्रोपस्थाने विनियुज्यते। न च विरोधः, विनियोगद्वयबलेन प्रयोगद्वयादुभयत्राभिधानोपपत्तेरिति पूर्वपक्षः। राद्धान्तस्तु अधिकारनियोगसन्निधौ पठितस्य मन्त्रस्य ग्राहकेण गृहीतस्य श्रुत्या प्रथममेवावगतशेषभावस्य पश्चादुपादानेनावगतकरणैदमर्थ्यस्य कार्यान्तराकाङ्क्षाभावात् विनियो-गानुपपत्तेः न लिङ्गेनापि विनियोगो युक्तः। न च श्रौतलिङ्गविनियोगयोस्तुल्यकालता। ग्राहकग्रहणे सति शीघ्रत्वात् श्रुतिविनियोगस्य। प्रकरणविनियोगापेक्षित्वाच्च लिङ्गविनियोग-स्येति।

लिङ्गवाक्ययोर्विरोधे किमुदाहरणम् ? "स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि। तस्मिन् सीदामृते प्रतितिष्ठ। व्रीहीणां मेध सुमनस्यमानः" इत्यनेन भाष्यमनुभाषितमाक्षेप्तुम्। ननु चार्थविप्रकर्षादित्युक्तो हेतुः सापेक्षनिरपेक्षत्वं च लिङ्गवाक्ययोः। तथा—हि लिङ्गं वाक्यनिरपेक्षं सदनकरणे पुरोडाशप्रतिष्ठापने च विभज्य मन्त्रं विनियोक्तुं क्षमते। वाक्यं तु लिङ्गविनियोगापेक्षं विनियोक्तुं क्षमते विनियो-जकेन लिङ्गेन हि एकस्मिन् भागे विनियुक्ते वाक्येनापरस्यापि भागस्य तदनुप्रवेशिता कल्प्यते।

---

(1) Bh. P. 847

अतः प्रकट एवार्थविप्रकर्षः किमित्यधिकरणान्तरमारभ्यते। न केवलमिदमधिकरणं, सर्वाधिकरणाक्षेप एवायम्। सुज्ञानो ह्यर्थविप्रकर्षः। कथं ? लिङ्गं तावदुक्तं निरपेक्षत्वादिति। वाक्यमपि पदार्थान्वयावगम्यमानसंबन्धं ऐदमर्थ्यलक्षणात् बलीय इति प्रदर्शितम्। प्रकरणमपि तदपेक्षित्वात् क्रमस्य क्रमाद्बलीयः। एवं क्रमोऽपि संबन्धकृत्तया वेदावगम्यत्वाच्च समाख्याया बलीयानेव। अतो नारम्भणीयान्येवैतानि अधिकरणानीत्यर्थविप्रकर्षज्ञानाभिमानिनो मन्यते। अत्रोच्यते—यत्तावदिदमुक्तं निरपेक्षत्वाल्लिङ्गं बलीय इति। तदयुक्तम्। कस्मात् ? सकलस्य हि मन्त्रस्य कर्तव्यतावगमात् न केवलात् पदात् कर्तव्यतावगमो भवति।

अतः प्रकट एवार्थविप्रकर्षः। किमित्यधिकरणान्तरमारभ्यते ? न केवलमिदमेवाधिकरणम्। सर्वाधिकरणाक्षेप एवायम् [1]सुज्ञानो ह्यर्थविप्रकर्षः सर्वत्र। कथं ? लिङ्गं तावदुक्तं निरपेक्षत्वादिति वाक्यमपि पदार्थान्वयावगम्यसंबन्धं ऐदमर्थ्यलक्षणात् प्रकरणसंबन्धात् बलीय इत्युक्तम्। अन्वितपदार्थावगम्यो हि वाक्यार्थान्वयः वाक्यार्थयोः प्रकरणेन करणैदमर्थ्यलक्षणः संबन्धः प्रतीयते, न पदार्थान्वयलक्षणः। तेन पदार्थान्वयलक्षणसंबन्धे प्रकरणं लिङ्गमपेक्षत इति दर्शितं श्रुतिलिङ्गविचारे। प्रकरणमपि तदपेक्षत्वात् क्रमस्य क्रमाद्बलीयः प्रकरणेन हि सामान्यसंबन्धे सिद्धे क्रमेण विशेषकरणसंबन्धः। क्रमोऽपि विशेषकरणसंबन्धकृत्तया वेदावगम्यत्वाच्च समाख्याया बलीयानेव। सन्निधानं हि अन्विताभिधानव्युत्पत्तौ उपाधित्वेन स्वीकृतं संबन्धकारणम्। तदा वेदादेव अवगम्यत इति शीघ्रं संबन्धं प्रतिपादयतीति समाख्यातो बलीयान्। अतो नारम्भणीयान्येतान्यधिकरणानि इत्यर्थविप्रकर्षज्ञानाभिमानिनो मन्यन्ते। अत्रोच्यते—यत्तावदुक्तं निरपेक्षत्वाल्लिङ्गं बलीय इति। तदयुक्तम्। कस्मात् ? सकलस्य हि मन्त्रस्य कर्तव्यतावगमान्न केवलात् पदात् कर्तव्यतावगमो भवति।

(1) G. ह्यन्यत्र

अतो वाक्यमेव प्रथमतरं पदानां परस्परसंबन्धावगमे हेतुः। संबन्धस्य च कार्यावगतिः। तस्माद्वाक्यमेव बलीय इति भवति मतिः। अवश्यं चैतदेवमभ्युपगन्तव्यम्। अन्यथा हि अविरोधिस्योनादिपदान्तरसंबन्धोऽपि निरपेक्षत्वाल्लिङ्गस्य विनियोगे न स्यात्। अतो दुर्ज्ञानोऽयं वाक्यलिङ्गयोः विप्रकर्ष इति प्रारब्धमिदमधिकरणम्। अयमेव च पूर्वपक्षवादिनोऽभिप्रायः पदान्तरसव्यपेक्षं लिङ्गं विनियोजकमित्युभयत्र विनियोगः। यत्पुनरिदमुक्तं[1] लिङ्गस्य श्रुत्यापि बाधितत्वादिति। कोऽयं हेतुः? न हि श्रुत्या बाधितस्यान्येनापि बाध्यता।

अयमाशयः—यावन्ति हि पदानि प्रयुज्यन्ते तावन्ति संभूयैकमर्थं प्रतिपादयन्ति। शक्नुवन्ति चैतान्येकमर्थं प्रतिपादयितुं इति प्रथममेकवाक्यता अवसीयते। तथाभूतस्य पश्चाल्लिङ्गेन विनियोग इति। अक्षरार्थस्तु सकलमन्त्रवाक्यस्य कर्तव्यतावगमात् अनुष्ठानावगमकत्वात् न केवलात् पदात् अनुष्ठानावगमः। अतो वाक्यमेव प्रथमतरं पदानां परस्परसंबन्धावगमहेतुः। एकवाक्यार्थप्रतिपादकतया। संबन्धस्य च पदजातस्य पश्चाल्लिङ्गात् कार्यावगतिः। तस्मात् वाक्यमेव बलीय इति भवति मतिः। अवश्यं चैतदेवं पदानां स्वत एव प्रथमतरमेकार्थप्रतिपादकतया संबन्ध इत्यभ्युपगमनीयम्। अन्यथा हि [2]अविरोधिस्योनादिपदान्तरसंबन्धोऽपि न स्यात्। एकमेव सदनपदं विनियुज्येत। कुतः? विनियोगे पदान्तरनिरपेक्षत्वाल्लिङ्गस्य। अतो दुर्ज्ञानोऽयं वाक्यलिङ्गयोर्विप्रकर्ष इति प्रारब्धमिदमधिकरणम्। ननु भाष्ये पूर्वपक्षवादी वाक्येन कृत्स्नस्य मन्त्रस्य विनियोग इत्याह, न पुनर्लिङ्गेनेति तत्राह—अयमेव च पूर्वपक्षवादिनोऽभिप्रायः पदान्तरसंबन्धसव्यपेक्षं लिङ्गं विनियोजकमिति। अस्यार्थः—यदेतत् पूर्वपक्षवादिना वाक्यस्य विनियोजकत्वमुक्तं न तल्लिङ्गनिरपेक्षम्। किन्तु लिङ्गमेव विनियोजकम्। तत्तु परस्परसंबद्धस्य पदजातस्येति। उभयत्र सदनकरणे पुरोडाशप्रतिष्ठापने च कृत्स्नमन्त्रस्य विनियोगः। यत्पुनरिदमुक्तं भाष्यकारेण लिङ्गस्य श्रुत्यापि बाधितत्वादिति कोऽयं वाक्येन लिङ्गस्य बाधहेतुः। न हि श्रुत्या बाधितस्यान्येनापि बाध्यता युक्ता।

---

(1) Bhasya P. 849 (2) G. स्वविरोधि

तस्मात् बालिशभाषितमेवेदं प्रतिभाति। नेदं बालिशभाषितम्। अन्योऽभिप्रायश्चोदकस्य। यथैव श्रुत्या पदार्थान्वयसंबन्धज्ञानकारणत्वेन लिङ्गं बाधितं कार्यैक्यविनियोज्यत्वादेवं वाक्येनापीति पूर्वपक्षितम्। अत्राभिधीयते—यजुषस्तावद्विनियोगः प्रतिपदम्। कार्यतः पुनरैक्यं पदानां, यावदेकं कार्यं तावदविरुद्धः पदान्तरसंबन्धः। कार्यान्तरे तु प्रत्यर्थिनि न कार्यान्तरसंबन्धिता शक्यते प्रतिपत्तुं प्रतिपदविधानादेव। अत्र हि कार्यतो मन्त्रत्वम्। न मन्त्रतः कार्यं

तस्मात् बालिशलिखितमेवेदं प्रतिभाति। नेदं बालिशलिखितम्। अन्योऽभिप्राश्चोदकस्य। यथैव श्रुत्या पदार्थान्वयसंबन्धज्ञानकारणत्वेन लिङ्गं बाधितं कार्यैक्यविनियोज्यत्वात् एवं वाक्येनापि इतिकर्तव्यताकाङ्क्षकार्यैक्यविनियोज्यत्वान्मन्त्रस्येत्यर्थः इति पूर्वः पक्षः। अत्राभिधीयते—यजुषस्तावद्विनियोगः प्रतिपदम्। अस्यार्थः—प्रश्लिष्टपरिपठितानां यजुषामवच्छेदो नान्यतः। यावदेकार्थं वर्णजातं तावदेकं पदम्। अर्थावगमस्तु विनियोगतः। विनियोगश्चानुष्ठानप्रकाशकतया तद्येनानुष्ठानं प्रकाश्यते तस्य विनियोगः। एकेन च पदेनानुष्ठानं प्रकाश्यते इति तावन्मात्रस्य विनियोगः। अथान्विताभिधायितया पदानां द्वितीयपदापेक्षत्वं तथापि द्वयोरस्तु विनियोगः। कथं तर्ह्यविरोधिपदान्तराणामनुप्रवेशः तत्राह—कार्यतः पुनः ऐक्यं पदानां यावदेकं कार्यं तावदविरुद्धः पदान्तरसंबन्धः। अस्यार्थः—पदान्तराण्यपि प्रकरणाधीतानि केन द्वारेणानुप्रविशन्तीत्यपेक्षायां यावतामन्वयवतामेकार्थान्वयित्वं प्रतीयते तावन्ति [1]लिङ्गाविरोधेन प्रविशन्ति। लिङ्गावगते कार्यान्तरे तु प्रत्यर्थिनि न कार्यान्तरसंबन्धिता शक्यते प्रतिपत्तुम्। न हि स्वत एव कार्यलाभे परोपजीवित्वं युक्तम्। कुतः स्वतः कार्यलाभ इत्यत्राह—प्रतिपदं यजुषां विधानादेव। कस्मात्पुनः प्रतिपदं यजुषां विधानं इत्यत्राह—अत्र हि कार्यतो मन्त्रत्वम्। कार्यमपेक्ष्य मन्त्रविभागः। न मन्त्रतः कार्यम्। कार्यात्प्रागेकमन्त्रत्वे अवगते न पश्चात् कार्यम्।

---

(1) G. लिङ्गेता वि

यथा ऋक्षु सामसु च। अतः कार्यनिरपेक्षकेवलपदार्थान्वय-संबन्धितां वाक्यनिबन्धिनीं बाधते लिङ्गम्।

ननु च श्रुतावप्येवमेव प्राप्नोति। सत्यं प्राप्नोति यदीदं यजुः स्यात् तत्तु श्रुतिविनियोज्यत्वं ऋक्षु प्रदर्शितम्। ऋचां तु मन्त्रतः कार्यमित्युक्तम्। यजुषां पुनः यत्रापि इषे त्वेति विनियोगः तत्राप्युपादानवशाद्विच्छेदः न पुनः कार्योपादानाभ्यां अन्यो यजुष्ट्वे हेतुरस्ति। तस्माद्युक्तो वाक्यभेदः। यत्पुनरिदं भाष्य-कारेण प्रदर्शितं—[1]"ननु चैकवाक्यत्वेपि लिङ्गमेव व्याप्रियत" इति। तदयुक्तमिव प्रतिभाति। किमिति, कार्यतोऽत्रार्थनिर्णयः। कुतः?

कार्यात्प्रागेकमन्त्रत्वे प्रमाणाभावात् यथा ऋक्षु सामसु चेति विपरीतयोजना। अन्यत एव ऋचां साम्नां च परिमाणज्ञानात्। अतः कार्यनिरपेक्षां केवलपदार्थान्वयसंबन्धितां वाक्यनिबन्धिनीं बाधते लिङ्गम्। कार्यशून्या या केवलेन पदार्थान्वयेन पदानां परस्पर-संबन्धिता वाक्यनिबन्धिनी तां लिङ्गं बाधत इत्यर्थः। ननु च श्रुतावपि ऐन्द्र्या गार्हपत्य-मुपतिष्ठत इत्यत्राप्येवमेव प्राप्नोति। विभज्यैवेन्द्रस्य पदस्य इन्द्रोपस्थाने विनियोगः प्राप्नोति। परिहरति—सत्यं प्राप्नोति यदीदं यजुः स्यात् तत्तु श्रुतिविनियोज्यत्वमृक्षु दर्शितम्। ऋचां च मन्त्रतः कार्यं, छन्दोवन्मन्त्रोपस्थापनावशेनावगतानामेवर्चां विनियोगेन कार्य-मित्युक्तं अर्थैकत्वादित्यत्र। यजुषां पुनः यत्रापि इषेत्वेति विनियोगः तत्राप्युपादानव-शात् विच्छेदः। यावदेव कार्येणोपादीयते तावदेवैकं यजुरित्युपादानाद्विच्छेदः। न पुनः कार्योपादानाभ्यामन्यो यजुष्ट्वे हेतुरस्ति। कार्यपदस्य तावत् कार्यत एवानुप्रवेशः तदेकवाक्यतयाऽन्येषां कार्यशून्यानां उपादानत इति तस्माद्युक्तो वाक्यभेदः कार्यभेदात्।

यत्पुनरिदं भाष्यकारेण दर्शितं—ननु चैकवाक्यत्वेपि लिङ्गं व्याप्रियत इति तदयुक्तमिव प्रतिभाति। किमिति?। उत्तरं—कार्यतोऽत्रार्थनिर्णयः। कुतः? तेन

---

(1) Bhashya P. 824

न सामर्थ्यमात्रात्, कार्यसव्यपेक्षं हि सामर्थ्यं लिङ्गमिति निरूपितम्। यदपि च परिहृतं–"अर्थविप्रकर्षोऽत्र बाध्यत्वे हेतुः। अस्ति चैकवाक्यभूतस्य लिङ्गस्याभिधानाल्लिङ्गात् विप्रकर्षः" इति। तदप्ययुक्तमिव। एकवाक्यताहेतोर्लिङ्गस्यालिङ्गत्वादित्युक्तम्। अत्रोच्यते—प्रतिपदं विनियोगात् एकवाक्यतयापि च कार्योपपत्तेः युक्ता लिङ्गताशङ्का। परिहारश्चार्थ-विप्रकर्षात। तस्मान्नात्र श्रुतिर्लिङ्गं वाक्यमिति तन्त्रं, विप्रकृष्टं अप्रापकमिति सूत्रार्थः। अतः सिद्धं कार्यभेदाद्वाक्यभेद इति। तर्हि तस्मिन् सीदेति किमालम्बनमिदं? पूर्वप्रकृतालम्बनमेवेति ब्रूमः। ननु चैवं सति परार्थतैव पूर्वस्य प्राप्नोति ततश्च वाक्यं बलवदित्युक्तं भवति। नावश्यं परामर्शे तादर्थ्यमेव

कार्यभेदात द्वावर्थौ न सामर्थ्यमात्रादर्थनिर्णयः येन स्वसामर्थ्यवशेनैकार्थत्वं स्यात्। कार्यसव्यपेक्षं हि सामर्थ्यं लिङ्गमिति निरूपितम। न कार्यनिरपेक्षम्। यदपि च परिहृतं अर्थविप्रकर्षो ह्यत्र बाध्यत्वे हेतुः अस्ति चैकवाक्यभूतस्य लिङ्गस्याभिधानात् लिङ्गाद्विप्रकर्ष इति। तदयुक्तमिव। एकवाक्यताहेतोर्लिङ्गस्यालिङ्गत्वादित्युक्तम्। कार्यशून्यं हि न लिङ्गम्। अलिङ्गस्य च बाधचिन्ताऽनुपपन्ना। अत्रोच्यते। प्रतिपदं विनियोगात् एकवाक्यतयापि च कार्योपपत्तेः युक्ता लिङ्गताशङ्का। एकवाक्यत्वेपि नातीव कार्यशून्यता कार्यविशेषणत्वेन स्योनादिपदानामिव कार्यलाभादिति युक्ता लिङ्गताशङ्का। परिहारश्च युक्तः अर्थविप्रकर्षात् यस्माल्लिङ्गादपि लिङ्गं बलीयः। तस्मान्नात्र श्रुतिर्लिङ्गं वाक्यमिति तन्त्रमेकान्ततो विवक्षितम्। किन्तु विप्रकृष्टं श्रुत्यर्थात् पदार्थान्वयात् यत्तदप्रापकं अविनियोजकमिति सूत्रार्थः। अतः सिद्धं कार्यभेदात् वाक्यभेदः। यदि वाक्यभेदः तर्हि तस्मिन् सीद इति सर्वनाम किमालम्बनम? उत्तरं—पूर्वप्रकृतालम्बनमिति ब्रूमः। पूर्ववाक्ये यत्प्रकृतं तदेव तच्छब्देनोच्यत इत्यर्थः। ननु चैवं सति परार्थतैव पूर्वस्य प्राप्नोति ततश्च वाक्यं बलीय इत्युक्तं भवति। परिहरति—नावश्यं परामर्शे तादर्थ्यमेव

भवति। अन्यार्थमप्यन्यार्थेनावमृश्यतें एव सर्वनाम्नेत्यदोषः। यथा तत्प्रयोजको हेतुरिति, यथा च वेदे एतस्यैव रेवतीष्विति। तस्माद्बलीयोऽभिधानमिति सिद्धम्। अथ [1]वाक्यप्रकरणयोः कथमिति। किं पुनः प्रकरणं नामेति। कोऽयं प्रश्नः? इतिकर्तव्यतार्थित्वादित्येवं निर्ज्ञाते प्रकरणे न विद्मः किमर्थोऽयं प्रश्न इति। अत्रोच्यते—इति कर्तव्यतार्थित्वादित्युक्तम्। न विद्मः कस्येयमिति कर्तव्यतार्थितेति। यस्येयमितिकर्तव्यताकाङ्क्षा तदत्रोच्यते —कर्तव्यस्येति नियोगार्थस्येत्यर्थः। तस्येतिकर्तव्यताकाङ्क्षस्य येयं तृतीयाकाङ्क्षा तत्प्रकरणं तेन विनियोगः। तद्विनियोगे कारणं न कर्तव्यतामात्रं नाप्यन्यत। तस्मादुपपन्नःप्रश्नार्थः, उत्तरं च।

भवति। यस्मादन्यार्थमप्यन्यार्थेनावमृश्यत एव सर्वनाम्ना इत्यदोषः। यथा स्वतन्त्रः कर्तेत्येतत् तत्प्रयोजको हेतुश्चेति तच्छब्देनावमृश्यते, यथा वेदेपि 'एतस्यैव रेवतीषु' इति तस्माद्बलीयोऽभिधानं लिङ्गमिति सिद्धम्। अथ वाक्यप्रकरणयोः कथमिति अधिकरणसूचनम्। अत्र भाष्यं किं पुनः प्रकरणं नामेति तदाक्षिपति—कोऽयं प्रश्नः नायं प्रश्न उपपद्यत इत्यर्थः। कथं? इतिकर्तव्यतार्थितया विनियोगः प्रकरणमित्युक्तम्। विनियुज्यते येन स विनियोगः इतिकर्तव्यतार्थितया येन विनियुज्यते तत्प्रकरणमित्युक्तम् प्रकरणादितिकर्तव्यतार्थित्वादित्येवं निर्ज्ञाते प्रकरणे सति [न विद्मः किमर्थोऽयं प्रश्न इति। समर्थयते—अत्रोच्यते—इतिकर्तव्यतार्थित्वादित्युक्तं, न विद्मः कस्येयमिति-कर्तव्यतार्थितेति। यस्येयमितिकर्तव्यताकाङ्क्षा तदत्रोच्यते कर्तव्यस्येति नियोगार्थ-स्येत्यर्थः। अत्र कर्तव्यस्य त्रितयाकाङ्क्षस्य किं केन कथमिति नियोज्यविशेषणकरणेति कर्तव्यताकाङ्क्षस्य येयं तृतीयाकाङ्क्षा कथमित्येवंरूपा तत्प्रकरणं तेन विनियोगः प्रयाजादीनाम् तद्विनियोगे कारणं न कर्तव्यतामात्रम् इतिकर्तव्यताकाङ्क्षारहितं नाप्यन्यत् तस्मादुपपन्नः प्रश्नार्थः। आकाङ्क्षितविशेषाज्ञानेन इतिकर्तव्यतार्थित्वलक्षणप्रकरणस्वरूप-स्यैवाज्ञानात्। उत्तरं चोपपन्नम्। एतच्च पूर्वपक्षौपयिकं पृष्टम्। विनियोगाकाङ्क्षा-

---

(1) Bh. P. 851

इदानीं वाक्यप्रकरणयोःविरोधे "[1]तुल्यबले एते कारणे" इति कोऽभिप्रायः ? कार्यार्थत्वादन्वयस्य उभयं कार्येण विनियुज्यत इति। यद्वा कार्यादृतेऽन्वयस्य बाधितत्वात् प्रकरणमेव बलीयः। तत्प्रत्ययत्वाद्वाक्यस्य। एवं मन्यानेनोक्तं वाक्यस्य बाधितत्वादिति।

प्रकरणमित्युत्तरे दत्ते पूर्वपक्षलाभो भविष्यतीति। भाष्यार्थस्तु—"कर्तव्यस्य विध्यर्थस्य इतिकर्तव्यताकाङ्क्षस्य यद्वचनं प्रतिपादनं तत्प्रकरणम्"। कथं तत्प्रकरणं इत्यपेक्षिते सत्याह —"प्रारम्भो हि सः तस्य कर्तव्यस्य वचनक्रियायाः" प्रतिपादनक्रियायाः कर्तव्यं परिपूर्णं प्रतिपादयितव्यं, तस्य च परिपूर्णता इतिकर्तव्यताभागेन विना न भवतीति तदाकाङ्क्षस्य अभिधानं भवति प्रारम्भः। तदाकाङ्क्षितैव कथमित्याह—"स एष विध्यादिर्विध्यन्तापेक्षः" स एव कर्तव्यतारूपो विध्यादिः विध्यन्तं इतिकर्तव्यतां आकाङ्क्षति। तेन विना प्रत्येतुमनुष्ठातुं चाशक्यत्वात् इति। ननु भाष्ये इतिकर्तव्यताकाङ्क्षनियोगप्रतिपादनं प्रकरणमुक्तं न पुनरितिकर्तव्यताकाङ्क्षो नियोगः। अतः कथमितिकर्तव्यतार्थित्वलक्षणं प्रकरणमुच्यते। कथं कार्यमेव इतिकर्तव्यताकाङ्क्षं प्रकरणं वक्ष्यतीति—उच्यते। भाष्यकारेण यत्प्रतिपादनं प्रकरणमुक्तं तत्प्रतिपाद्यमानावस्थ एव कर्तव्यतारूपो विधिः इतिकर्तव्यताकाङ्क्ष इति दर्शयितुम्। अतश्च नियोग एवेतिकर्तव्यताकाङ्क्षः प्रतिपाद्यमानः। तस्य च या तृतीयाकाङ्क्षा प्रकरणमित्यविरोधः। **इदानीं वाक्यप्रकरणयोर्विरोधे तुल्यबले एते कारणे इति** यद्वदति तत्र **कोऽभिप्रायः ?** पृच्छतश्चायमाशयः। वाक्यमेव बलीयः पदार्थान्वयसंबन्धकारणत्वादिति। [2]प्रष्टुरभिप्रायं कथयति—**कार्यार्थत्वादन्वयस्य उभयं कार्येण विनियुज्यत इति।** अयमर्थः —कार्यार्थस्सकलपदार्थानामन्वयः अतो वाक्येनापि यस्य विनियोगः तस्यापि कार्येणैव। प्रकरणेनापि यस्य विनियोगः तस्यापि कार्येणेवेति उभयविरोधे विनियोगस्तुल्य इति। **यद्वा कार्यादृते अन्वयस्य बाधितत्वात्** प्रत्युत **प्रकरणमेव बलीयः। तत्प्रत्ययत्वाद्वाक्यस्य। एवं मन्यानेनोक्तं** भाष्यकारेण लिङ्गेन **वाक्यस्य बाधितत्वादिति।** अस्यार्थः—इतिकर्तव्यताकाङ्क्षा हि कार्यमेव प्रकरणम्। तद्विरोधे चान्वयो बाध्यत इति। यथा प्रया-

---

(1) Bh. P. 853 (2) R. प्रपृष्टमभि

अत्रोच्यते— अत्राप्यर्थविप्रकर्षादित्युक्तो हेतुः। कथमर्थविप्रकर्षः उक्तः? कार्यार्थतयान्वयः कल्प्यः। न च क्लृप्तान्वयस्य कार्यार्थत्वे सिद्धेऽन्वयान्तरं विनियुक्तविनियोगविरोधात् लिङ्गवच्छक्यते प्रतिपत्तुम्। तस्माद्वाक्यं बलीयः। दुर्ज्ञानविप्रकर्षज्ञापनायाधिकरणप्रपञ्चोऽयं लिङ्गवत् सर्वत्र द्रष्टव्यः। उदाहरणमुक्तम्। "[1]अथ प्रकरणस्य क्रमस्य च विरोधे किमुदाहरम्" इति। अत्रापि पूर्वपक्षवादी मन्यते क्रमप्रकरणयोस्तुल्यबलत्वमिति।

नशेषेणेत्यत्र सक्तूनिति च। अतः प्रत्युत वाक्यात् प्रकरणमेव बलीयः कार्यप्रत्ययत्वाद्वाक्यस्य। प्रतीयतेऽनेनेति प्रत्ययः कार्यमेव वाक्येन प्रत्याय्यते। अतस्तद्विरोधे वाक्यं दुर्बलम्। प्रधानविरोधे गुणानां दुर्बलत्वादिति। अनेनाशयेनोक्तं भाष्यकारेण—"[1]लिङ्गेन बाधितत्वाद्वाक्यस्य प्रकरणेनापि बाधो युक्त" इति। अत्रोच्यते—अत्राप्यर्थविप्रकर्षादित्युक्तो हेतुः। कथमर्थविप्रकर्ष उक्तः? कार्यार्थतयाऽन्वयः कल्प्यः उक्तमेतत् श्रुतिलिङ्गाधिकरणे "प्रकरणेनान्विताभिधानावगतया कार्यार्थतया इतिकर्तव्यतात्वेनान्वयः कल्प्यः"। न च क्लृप्तान्वयस्य कार्यार्थत्वे सिद्धेऽन्वयान्तरं, विनियुक्तविनियोगविरोधात् लिङ्गवच्छक्यते कल्पयितुं क्लृप्तान्वयस्य विनियोज्यस्य वाक्येन पुनः प्रकरणात् अन्वयान्तरं न शक्यते कल्पयितुं विनियुक्तस्य विनियोगविरोधात्। यथा लिङ्गे श्रुतिविरुद्धे। यदि यावद्वाक्यार्थान्वयानुसारेण नियोगार्थता न स्यात् तदा प्रकरणेनान्वयान्तरं कल्प्येतापि। इह पुनः वाक्यावगतान्वयानुग्रहे न कार्यार्थताऽपैति[2] इति प्रथमावगतत्वात् वाक्यगम्य एवान्वयो बलीयात्। तस्माद्वाक्यं बलीयः। ननु यद्यर्थविप्रकर्षादेव प्रकरणबाधः तदा श्रुतिलिङ्गाधिकरणेनैव गतार्थता। तत्रैवार्थविप्रकर्षेणास्योक्तत्वादिति तत्राह—दुर्ज्ञानविप्रकर्षज्ञापनायाधिकरणप्रपञ्चोऽयं लिङ्गवद्द्रष्टव्यः। अस्यार्थः —सत्यं विप्रकर्षेण दुर्बलत्वं सतु विप्रकर्ष एव दुर्ज्ञान इति तत्परिज्ञानाय अधिकरणप्रपञ्चोऽयमिति उदाहरणमुक्तं भाष्ये सूक्तवाकनिगदः। अथ प्रकरणस्य च क्रमस्य च विरोधे किमुदाहरणमिति। अधिकरणसूचनैवात्रापि। पूर्वपक्षवादी क्रमप्रकरणयोस्तुल्यबलत्वं मन्यते

(1) Bh. P. 853 (2) G. कार्यार्थताऽन्वेति

कथं ? भाष्यकारस्तावत् अज्ञानमेव व्यपदिशति[1]। किमज्ञानात्तुल्य-बलत्वं सिध्यति ? ज्ञानस्य हि तुल्यबलत्वं अतुल्यबलत्वं वा विषयः नाज्ञानस्य। ननु चाज्ञानमपि प्रमाणतयोपन्यस्तमेव। न, व्यवहार-मात्रं तदित्युक्तम्। प्रमाणान्तरप्रमेयाभावमात्रं प्रमेयम्। इह तुल्यबलत्वं अतुल्यबलत्वं च न प्रमाणान्तरप्रमेयभावमात्रं शक्यते वक्तुम्। कथं तर्ह्येतद्भाष्यं "न तावद्विशेषमुपलभामहे" इति। भाष्यकार एवात्र प्रष्टव्यः।

अत्रोच्यते—दुर्विदग्धवचनमात्रमिदम्। अयमभि-प्रायो भाष्यकारस्य। नात्रानयोर्विशेषो ज्ञायत इति

कथं ? समर्थनैकदेश्युत्तरमाह—भाष्यकारस्तावत् अज्ञानमेव तुल्यबलत्वे प्रमाणं व्यपदिशति "न तावद्विशेषमुपलभामहे" इति। आक्षेप्ता दूषयति—किमज्ञानात्तुल्यत्वं सिद्ध्यति। न सिध्यत्येवेति भावः। ज्ञानस्य हि तुल्यबलत्वमतुल्यबलत्वं वा ज्ञेयतया विषयः। तथा नाज्ञानस्य। एकदेश्येवाह—ननु चाज्ञानमपि प्रमाणतयोपन्यस्त-मेव अभावे[2]। आक्षेप्तैवाह—व्यवहारमात्रं तदित्युक्तं प्रथमपादे। अपि चाभावस्य ये प्रमाणतामपीच्छन्ति तेषामपि मते प्रमाणान्तरप्रमेयाभावमात्रं च प्रमेयम्। प्रमाणान्तरेण यत्प्रतीयते घटादि तस्याभावमात्रं अभावस्य प्रमेयम्। न पुनरन्यत्। अत इह —तत्तुल्यबलत्वमतुल्यबलत्वं च न प्रमाणान्तरप्रमेयाभावमात्रं शक्यते वक्तुं अतो नाभावः प्रमेयम्। संप्रति निराकृत एकदेश्याह—कथं तर्हि एतद्भाष्यं "न तावद्विशेषमुपलभामहे" इति। आक्षेप्ता आह—भाष्यकार एवात्र प्रष्टव्यः। समर्थनवाद्याह—अत्रोच्यते दुर्विदग्धवचनमात्रमेवेदं 'भाष्यकार एवात्र पृच्छ्यतां' इति। यस्मादयमभिप्रायो भाष्यकारस्य—नात्रानयोर्विशेषो ज्ञायत इति। अनयोः क्रमप्रकरणयोः अत्र विदेवनादि-विनियोजकत्वे विशेषो न ज्ञायत इति। यदि विशेषो ज्ञायेत तदा एकमेव विनियोजकं

---

(1) Bh. P. 854 (2) G. भाष्ये

सर्वत्र प्रकरणानुस्यूतेः क्रमोऽपि कार्यवानवगम्यते एव। कार्यतश्च सन्निधिरन्वितमवगमयतीति। प्रत्युत प्रकरणमेवात्र बाध्यतयाव-गम्यते। विशेषोपसंहारात् सन्निधेः। न हि क्लृप्तस्य सन्निधेः कल्पना शक्यते वक्तुम्। अन्वयस्येव। तत्पुनरिदमन्वारुह्य-वचनमित्युक्तमाधस्त्येऽधिकरणे। सर्वत्र चैवं द्रष्टव्यम्।

स्यात न विशेषं जानीमः। तस्मादुभयं विनियोजकम्। ननु च प्रकरणमेवेतिकर्तव्यत-याऽन्वयं सकलकरणसंबन्धितया विदेवनादीनां बोधयतीति विशेषः गम्यते इत्यत्राह—**सर्वत्र प्रकरणानुस्यूतेः क्रमोऽपि कार्यवानवगम्यत एव।** सर्वत्र प्रकरणस्य अधिकारनियो-गस्यानुस्यूतेः अनुस्यूतत्वात् क्रमोऽपि कार्यवानेव क्रमेणापि विनियोगः कार्यत एव। **कार्यतश्च भवन् सन्निधिरन्वितमवगमयति।** यदि हि कार्यसंबन्धो न भवेत् तदा सन्निधिरन्वयं न गमयेदेव। यतस्तु कार्यवान् सन्निधिः। अतोऽन्वयं गमयत्येव। **प्रत्युत प्रकरणमेवात्र बाध्यतयाऽवगम्यते। विशेषोपसंहारात् सन्निधेः।** प्रकरणेन हि सामान्येन सकल-करणसंबन्धो बोध्यः। तत्र सन्निधानलक्षणेन क्रमेण विशेषकरण एवोपसंहारः क्रियते। कस्मात् पुनर्विशेषेणोपसंहारः क्रियते इत्यत्राह—**न हि क्लृप्तस्य सन्निधेः कल्पना शक्यते वक्तुम्।** अस्यार्थः—प्रकरणेन प्रमाणेन सर्वकरणसंबन्धे कर्तव्ये अवश्यं सर्वैः सह सन्निधिः कल्प्यः असन्निहितसंबन्धानुपपत्तेः। आकाङ्क्षासन्निधियोग्यत्वानां संबन्धे हेतुत्वात्। न च क्लृप्तं सन्निधिमनादृत्य सन्निधानकल्पना युक्ता **अन्वयस्येव।** यथाऽन्वये क्लृप्ते न संबन्धस्य कल्पना एवमत्रापीति। अतः क्रम एव बलीयानिति मन्यते। ननु च सत्यपि सन्निधाने आकाङ्क्षा-विशेषाभावात् न संबन्धित्वेन भवितव्यमिति क्रमस्यापि प्रकरणापेक्षास्ति तथा नाकाङ्क्षापि सन्निधानमन्तरेण संबन्धहेतुरिति परस्परापेक्षित्वात् द्वयोः तुल्यबलत्वमेव युक्तम् न तु क्रमस्य बलीयस्त्वमिति तत्राह—**तत्पुनरिदमन्वारुह्यवचनमित्युक्तमाद्येऽधिकरणे।** प्रौढवाद एवायं न पुनः परमार्थतः। एवं तुल्यबलत्वेनायं पूर्वपक्षः इत्येतत् श्रुतिलिङ्गाधिकरणे दर्शितम्। **सर्वत्र चैवं द्रष्टव्यम्।**

अत्रोच्यते—क्रमात्प्रकरणं बलीयः । कुतः ? न ह्यना-काङ्क्षितस्य क्रमः संबन्धे हेतुः । सन्निधिमात्रं हि क्रमः । न च सन्निधिमात्रात् संबन्धो भार्या राज्ञः पुरुषो देवदत्तस्येतिवत् । आकाङ्क्षा च प्रकरणवतां तुल्येति सर्वप्रधानसंबन्धो विदेवनादीनाम् क्रमाद्धि आकाङ्क्षा, आकाङ्क्षातोऽन्वयः अन्वयाच्च तादर्थ्यमिति । सोऽयमर्थविप्रकर्षः । यदुक्तं क्रमादाकाङ्क्षोपसंहार इति तदयुक्तम् । सर्वार्थत्वेपि कस्यचित्सन्निधानमवश्यंभावीति पाठार्थमेव तत् ।

अत्रोच्यते—क्रमात् प्रकरणं बलीय इति । कुतः ? नह्यनाकाङ्क्षितस्य क्रमः संबन्धहेतुः यस्याकाङ्क्षा नास्ति न तेन सह क्रमेण संबन्धः **सन्निधानमात्रं हि क्रमः । न च सन्निधानमात्रात् संबन्धोऽवगम्यते भार्या राज्ञः पुरुषो देवदत्तस्येतिवत् ।** यथा भार्यापद-संबन्धेनैव निराकाङ्क्षेण राज्ञ इत्यनेन पुरुषस्य संबन्धो न भवति तथेत्यर्थः । भवत्वाकाङ्क्षात एव संबन्धः तथापि किमित्याह—**आकाङ्क्षा च प्रकरणवतां तुल्येति सर्वप्रधानसंबन्धो विदेवनादीनाम् ।** ननु च क्रमवतोऽपि आकाङ्क्षातः किमिति संबन्धो न भवतीत्याह —**क्रमाद्ध्याकाङ्क्षा । आकाङ्क्षातोऽन्वयः अन्वयात्तादर्थ्यमिति सोऽयमर्थविप्रकर्षः ।** अस्यार्थः—सन्निधिसमुच्चारणेन हि स्ववाक्योपात्तपदपदार्थसंबन्धनिराकाङ्क्षस्य अभिषेचनीय-वाक्यार्थस्यापि विद्यमानतैव विदेवनादिपदार्थान्तराकाङ्क्षा कल्पयितव्या । कल्पयित्वा चान्वयः कल्प्यः । कल्पिते चान्वये तादर्थ्यं कल्प्यम् । तदिदं क्रमनिबन्धनं तादर्थ्यं विलम्बितम् । प्रकरणवतां तु इतिकर्तव्यताकाङ्क्षा उत्थितैव अपरिपूर्णत्वात् । तया च करणैदमर्थ्यं कल्प्यत इति शीघ्रं प्रकरणतस्तादर्थ्यम् ।

यदुक्तं क्रमादाकाङ्क्षोपसंहार इति । तदयुक्तम् । सर्वार्थत्वेपि कस्यचित् सन्निधानमवश्यंभावीति पाठार्थमेव तत् । अस्यार्थः—[1]यदि तद्गतानामवान्तरविधीनामिति-कर्तव्यताकाङ्क्षा स्यात् तदा यस्य सन्निधावाम्नानं तत्रैवेतिकर्तव्यतात्वमुपसंह्रियते इह त्वेकस्य राजसूयाधिकारविधेरितिकर्तव्यता इति नोपसंहारस्संभवति । तस्मादेकाधिकारविधिसंबन्धिभिः

---

(1) G. परिहितानामवा

बाधितस्य ह्यनुग्रहो न्याय्य इत्युक्तम्। "प्रकरणवतः साकाङ्क्षत्वात् सन्निधाने चाम्नातेन परिपूर्णेनाप्यवकल्पत एकवाक्यत्वं इति। किमिदं परिपूर्णेनापि इति? एतदुक्तं भवति—न चेत्क्रमः प्रकरणं एकवाक्यतैव नास्ति। ननु आकाङ्क्षा सन्निधिर्योग्यत्वमिति चैकवाक्यत्वे हेतुः। सत्यं वाक्यार्थावगतौ, इह पुनर्वाक्यार्थस्य वाक्यार्थस्य च संबन्धः। स चेतिकर्तव्यतार्थितयैव संबध्यत इत्युक्तम्। क्रमः पुनः वाक्यार्थस्य च सन्निधानमित्युक्तम्। यथा भार्याराज्ञः पुरुषो देवदत्तस्येत्यत्र प्रदर्शितम्।

करणैः इतिकर्तव्यतया विदेवनादयस्संबध्यन्ते। एकसन्निधानं तु अवश्यंभावि अन्यथा पठितुमशक्तेरिति पाठार्थमेव सन्निधानं, न पुनः संबन्धोपसंहारार्थं बाधितस्यह्यनुग्रहो न्याय्य इत्युक्तम्।

अत्र भाष्यं—"प्रकरणवतः सन्निधौ आम्नातेन परिपूर्णेनापि अवकल्पेत एकवाक्यत्वं" इति। ननु विनापि परिपूर्णेनेत्यनेन सिध्यत्येवाभिमतं किमिदं परिपूर्णेनापीति। समाधत्ते-एतदुक्तं भवति—न चेत्क्रमः प्रमाणं एकवाक्यतैव नास्ति इति। ननु आकाङ्क्षा-सन्निधिर्योग्यत्वमिति एकवाक्यत्वे हेतुः सत्यं वाक्यार्थावगतौ त्रयमेव हेतुः इह पुनर्वाक्यार्थस्य वाक्यार्थस्य च संबन्धः। स चेतिकर्तव्यतार्थितयैव संबध्यत इत्युक्तम्। क्रमः पुनः वाक्यार्थस्य च सन्निधानमित्युक्तम्। भार्या राज्ञः पुरुषो देवदत्तस्येत्यत्र प्रदर्शितम्। अयमभिप्रायः—चोद्यनिराकरणार्थमिदमुक्तं परिपूर्णेनापीति। एवं हि परः परिचोदयति क्रमप्रकरणे परस्परापेक्षया तुल्यबले एव। न हि प्रकरणेनापि इतिकर्तव्यतात्वेन संबन्धः आपाद्यमानो विना सन्निधानेनापाद्यते। यस्मा-दाकाङ्क्षासन्निधियोग्यत्वानां मिलितानामेव संबन्धावगतिहेतुत्वम्। तेन प्रकरणेन क्रमोऽपेक्षणीय इति। तत्रेदं निराकरणम् परिपूर्णेनेयमेकवाक्यता। वाक्यार्थीभूतस्य हि साध्यात्मनः विध्यर्थस्य वाक्यार्थभूतेनैव अङ्गविधिना इतिकर्तव्यतांशनिवेशिना संबन्धः। या च परिपूर्णेनैकवाक्यता सा इतिकर्तव्यतार्थितया; एकस्य चाधिकारविधेरितिकर्तव्यतार्थिता

"अथ क्रमसमाख्ययोः कथं ?" क्रमो ह्याकाङ्क्षावतः सन्निधौ भवति विशेषावगतौ हेतुः। समाख्या पुनः विशेषनिमित्तैवेति तुल्यबले एते कारणे इति। तस्मादुभयं विनियोजकम्।

नाङ्गविधीनामिति सर्वैकरणैरेव संबन्धो विदेवनादीनामिति। अक्षरार्थस्तु— यदि क्रमः प्रमाणं नाङ्गीक्रियते एकवाक्यतैव सर्वैकरणैरपि सह विदेवनादीनां न स्यात्। आकाङ्क्षा सन्निधिः योग्यत्वमिति त्रयं मिलितमेकवाक्यत्वे हेतुः। तस्मात् क्रमोऽप्यादरणीय इति। परस्परापेक्षायां तुल्यं प्रकरणं आकाङ्क्षालक्षणसन्निधानं च द्वयमपीति क्रमेणापि विनियोगो युक्त इति। उत्तरं—सत्यं **वाक्यार्थावगतौ** त्रयमेव हेतुः। **इह पुनः वाक्यार्थस्य वाक्यार्थस्य च संबन्धः स चेतिकर्तव्यतार्थितयैव संबध्यते** न पुनः क्रियाकारकाद्यपेक्षितयेत्युक्तं प्रकरणाधिकरणे। एकस्य चाधिकारविधेरितिकर्तव्यतार्थितेति तद्द्वारेणैव सर्वत्र प्रकरणसंबन्धो न्याय्यः। **क्रमः पुनः** इतिकर्तव्यताकाङ्क्षाशून्योऽवान्तरप्रकरणाभावात् **सन्निधानमात्रं** क्रमः। न च सन्निधानमात्रात् संबन्धः **यथा भार्या राज्ञः पुरुषो देवदत्तस्येति दर्शितम्।**

अथ क्रमसमाख्ययोर्विरोधे किं बलीय इति चिन्त्यते—**क्रमोऽह्याकाङ्क्षावतः सन्निधौ भवति विशेषावगमहेतुः। समाख्या पुनः विशेषनिमित्तैवेति तुल्यबले एते कारणे इति। तस्मादुभयं विनियोजकम्।** अस्यार्थः—'शुन्धध्वं' इति मन्त्रः शुन्धनं प्रकाशयति। तत्र ये शुध्यन्ते ते आकाङ्क्ष्यन्ते। तैर्विना वाक्यस्यापरिपूर्णत्वात्। अतस्सन्निधौ सान्नाय्यपात्राणि संबध्यन्ते। तेन तेषां शुन्धनप्रकाशकत्वात् सान्नाय्यपात्रेषु मन्त्रस्य विनियोगः। समाख्यया पुरोडाशपात्रेषु, विशेषवर्तित्वात् समाख्याया इत्याकाङ्क्षावतः शुन्धनमन्त्रस्य सन्निधौ सान्नाय्यपात्राणां पठितत्वात् क्रमोऽपि भवति विशेषविनियोगावगमहेतुः। समाख्या पुनः पौरोडाशिकमिति विशेषनिमित्तैव। "अधिकृत्य कृते ग्रन्थे' इत्यस्मिन्नधिकारे "पौरोडाशपुरोडाशात् ष्ठन्" इति पौरोडाशशब्दात् पुरोडाशमधिकृत्य कृते ग्रन्थे इत्यस्मिन्नर्थे ष्ठन् विहितः। पौरोडाशशब्देन पुरोडाशसंबन्धीन्युच्यन्ते। तेन तत्प्रतिपादकं काण्डमिति

अत्राभिधीयते—क्रमो बलीयान् वैदिको ह्यसौ सन्निधिः। समाख्यापुनर्लौकिकी। ननु चैवं वदता समाख्या नैव प्रमाणमित्युक्तं भवति। मैवं वोचः अर्थविप्रकर्ष एवानेन प्रकारेणोच्यते। कथं? समाख्या हि संबन्धनिमित्ता सती सन्निधानाद्यवगमयति। क्रमः पुनः स्वयमेव सन्निधिः। न च प्रत्यक्षस्य सन्निधेः पुनः सन्निधानान्तरकल्पना घटते इति सोऽयमर्थविप्रकर्षः। कथं तर्हि समाख्या? समवायादिभिः उपपद्यते ब्राह्मणग्रामवत्।

विशेषपात्रसंबन्ध एव मन्त्रस्येत्यवगम्यते। तस्मादुभयं क्रमसमाख्यात्मकं विनियोजकमिति। एवं प्राप्ते **अभिधीयते—क्रमो बलीयान् वैदिको ह्यसौ, समाख्या पुनर्लौकिकी।** अस्यार्थं तत्वतोऽनवबुध्यमानश्चोदयति—**ननु चैवं वदता समाख्या नैव प्रमाणमित्युक्तं भवति।** अस्यार्थः—त्वं किल सिद्धान्तिन् लौकिकी समाख्येत्येवं वदसि। एवं वदता लौकिकत्वेन समाख्या वेदार्थनिर्णयहेतुर्न भवतीत्यभ्युपगतम्। तथा च सर्वत्रैव समाख्यायाः प्रामाण्योच्छेद इति परिहरति—**मैवं वोचः। अर्थविप्रकर्ष एवानेन प्रकारेणोच्यते। कथं** पुनर्लौकिकत्वेनार्थविप्रकर्षः? उच्यते—**समाख्या हि संबन्धनिमित्ता सती सन्निधानाद्यवगमयति।** लौकिकत्वेन तावत् समाख्या वेदार्थे न साक्षात्संबन्धं विदधाति। किन्तु संबन्धनिबन्धना सती संबन्धसिध्यर्थं आकाङ्क्षासन्निधियोग्यतां कल्पयति। **क्रमः पुनः स्वयमेव सन्निधिः। न च प्रत्यक्षस्य सन्निधेः पुनः सन्निधानान्तरकल्पना घटत इति।** प्रत्यक्षस्य सन्निधेरित्यनादरे षष्ठी। प्रत्यक्षं सन्निधानमनादृत्य न सन्निधानान्तरकल्पना युक्तेत्यर्थः। **सोऽयमर्थविप्रकर्षः। कथं तर्हि समाख्या?** संबन्धं विनेत्यर्थः। **समवायादिभिरुपपद्यते ब्राह्मणग्रामवत्।** तस्मिन् काण्डे पुरोडाशस्य समवायात् भूयस्त्वात् प्राथम्याद्वा पौरोडाशिकव्यपदेशः ब्राह्मणग्रामवत्।

[1]"अथ यत् तत्र तत्राभिधीयते इदमनेन बाध्यं इदमनेन बाध्यमिति तत्र यद्बाध्यते किं तद्बाधकविषयं प्राप्तं उताप्राप्तमिति"। कस्य व्याख्यानमेतत् ? न कस्यचिदपीति ब्रूमः। किं तर्हि अनेन अत्र क्रियते। भाष्यकार एवात्र प्रष्टव्यः। अत्राभिधीयते —श्रुत्यादीनां बलाबलचिन्ताशेषभूतमिदं भाष्यम्। कथं कृत्वा ? बलाबलचिन्ता हि बाध्यापेक्षिणी। तदिदानीं बाध्यं किं बाधकविषयं प्राप्तं सत बाध्यते उताप्राप्तमिति। उभयथाऽभिहितो दोषः। ननु च प्राप्तबाधो दशमे दर्शित एव। किमिति प्राप्तौ सत्यां विरोधो दर्शितः। उच्यते—कार्यतः प्राप्तौ न दोषः।

अथ यत तत्र तत्राभिधीयते 'इदमनेन बाध्यते' 'इदमनेन बाध्यत' इति तत्र यद्बाध्यते किं तत् बाधकविषयं प्राप्तं उत अप्राप्तमिति कस्य व्याख्यानमिदं भाष्यमिति। भाष्ये आक्षिप्ते एकदेश्याह—न कस्य चिदपीति ब्रूमः। श्रुतिलिङ्गेत्यस्य न कश्चिदवयवो व्याख्यायतेऽनेन। अतो न कस्यचिदपीदं व्याख्यानमिति। आक्षेप्ता आह—किं तर्हि अनेनात्र क्रियते। निराकृत एकदेश्याह—भाष्यकार एवात्र प्रष्टव्यः येनेदमुक्तम्। परमसमर्थनवाद्याह—अत्राभिधीयते–श्रुत्यादीनां बलाबलचिन्ताशेषभूतमिदं भाष्यम। कथं कृत्वा ? उत्तरं—बलाबलचिन्ता हि बाध्यापेक्षिणी यत्किलाबलं तद्बाध्यम्। यच्च बलवत् तद्बाधकम्। तेन बाध्यं विना बलाबलचिन्ता नास्ति। तदिदानीं बाध्यं किं बाधकविषयं प्राप्तं सत् बाध्यते उताप्राप्तमेव उभयथा चाभिहितो दोषः। यदि प्राप्तं कथं बाध्यते अशक्यत्वात्। अथाप्राप्तं किं बाध्येत बाध्यस्याभावात। ननु प्राप्तबाधो दशमे प्रदर्शितः। किमिति प्राप्तौ सत्यां विरोधो दर्शितः। तत्किल विरुद्धमुच्यते यत्क्वचिन्न दृश्यते। प्राप्तता च बाध्यता च दृश्यत एव। तत्कथमनयोर्विरोधः। दशमे हि प्राप्तस्य प्राकृतस्य पदार्थजातस्य बाधो दर्शितः। समाधत्ते—कार्यतः प्राप्तौ न दोषः। प्राप्तस्यापि बाधे न दोषः। कार्यतो हि प्राप्तस्य न कार्यान्तरं कल्पयितव्यम्। तेन कलस-

---

(2) P. 858

इहोपदेशश्चिन्त्यते। उपदेशेन च प्राप्तिः दुर्बाधेति तत्रैव दशमे प्रदर्शयिष्यामः। इह कस्मात्तन्न प्रदर्श्यते? प्रदर्शितमेव "प्रतिप्रधानमावर्तन्ते गुणा" इति। कथं प्रतिप्रधानावृत्त्यभिधानेनाबाधः प्रदर्शितो भवति। द्वयोः प्रामाण्याभ्युपगमेन प्रतिप्रधानाभिधानात्। प्राप्तेश्चाविशेषात्। तस्मात् अयुक्तमिदमनेन बाध्यमिति अप्राप्तेऽपि। अत्रेदानीमुपदेशबाधविदोऽभिदधति। सामान्यतः प्राप्तिं मन्वाना विशेषमपश्यन्तः स्मृतिप्रमोषनिमित्तं प्राप्तिज्ञानं व्यपदिशन्ति शुक्तिकायामिव रजतज्ञानम्। विशेषावगमात्तु तत्तेषां निवर्तत इति बाधशब्दः।

कार्यपुरस्सरत्वात् प्राप्तेः कार्यलोपेन कृतकृत्यत्वेन वा बाधो युक्तः। अनुष्ठानबाधात्मकः—इह तूपदेशः चिन्त्यते तथापि किमित्याह—उपदेशेन च प्राप्तिर्दुर्बाधा। कुतः? तत्रैव दशमे दर्शयिष्यामः। उपदेशो हि यथोपदेशं कार्यमित्यशक्यः कार्यतोऽपि बाध इति। इहैव कस्मात् तन्न प्रदर्श्यते। प्रदर्शितमेव "प्रतिप्रधानमावर्तन्ते गुणा" इत्यनेन भाष्येण दर्शितमेवेदं उपदेशेन प्राप्तिर्दुर्बाधेति। कथं प्रतिप्रधानावृत्त्यभिधानेन अबाधितता दर्शिता भवति। उत्तरं—द्वयोः प्रामाण्याभ्युपगमनेन प्रतिप्रधानाभिधानात् दर्शितमेव। द्वयोः श्रुतिलिङ्गयोः प्रामाण्येऽभ्युपगते प्रतिप्रधानं गुणा आवर्तन्त इति यस्मादभिहितं तस्मादशक्यो बाध इति दर्शितम्। एवं हि वदता यथोपदेशं कार्यमित्याश्रितं भवति। तस्मादुपदेशेन प्राप्तं उपदेशान्तरेण न शक्यं बाधितुम्। प्राप्तेश्चाविशेषान्नोपदेशतः प्राप्तस्य बाधः। कार्यतः प्राप्तस्य तु अतिदेशतः प्राप्तेः उपदेशप्राप्तेन बाधो युक्तः। तस्मादिदमयुक्तं अनेन बाध्यमिति। न केवलं प्राप्त एवायुक्तं अप्राप्तेप्ययुक्तं प्रसक्त्यभावात्। यत्खलु प्रसक्तं तद्बाधमर्हति नान्यत्।

अत्रेदानीं उपदेशबाधविदोऽभिदधति। सामान्यतः प्राप्तिं मन्वाना विशेषमपश्यन्तः स्मृतिप्रमोषनिमित्तं प्राप्तिज्ञानं व्यपदिशन्ति शुक्तिकायामिव रजतज्ञानम्। विशेषावगमात्तु तत्तेषां निवर्तत इति बाधशब्दप्रयोगः। अस्यार्थः—बर्हिर्देवसदनं

ननु चायमुक्तो बाधः प्रथमपाद एव 'यस्य च दुष्टं करणं' इत्यत्र किमिति पुनरुपन्यस्तः ?।

दामीत्येवमादौ या लिङ्गस्य स्वविनियोगविषये प्राप्तिः प्रमाणतोऽवधृता विनियोजकाविनियोजकयोः यत्समानं रूपं लिङ्गयोः ततस्सामान्यतः तामविनियोजके प्राप्तिं प्रमाणतां मन्वानाः स्मरन्तः प्राप्तिस्मरणस्य च प्राप्तिज्ञानाद्विशेषमपश्यन्तः **स्मृतिप्रमोषनिमित्तं प्राप्तिज्ञानं** स्मरामीत्यस्यांशस्य प्रमोषो निमित्तं यस्य व्यपदेशस्येति क्रियाविशेषणम् । प्राप्तिं जानीम इति भ्रान्ता व्यपदिशन्ति । शुक्तिकायामिव रजतज्ञानं यथा रजतसाधारणं यद्रूपं शुक्तिकायां तावन्मात्रेण तस्यां गृहीतायां यद्रजते स्मरणज्ञानमुपजायते तस्य स्मृतिरूपताया अग्रहात् विशेषमपश्यन्तो रजतज्ञानात् रजतस्मरणमेव रजतं ज्ञानमुपदिशन्ति रजतं जानीम इति । तथेहापि प्राप्तिस्मरणं प्राप्तिज्ञानं व्यपदिशन्ति । **विशेषदर्शनात्** प्राप्तिस्मरणमेतन्न प्राप्तिज्ञानमिति विशेषदर्शनात् **तत्तेषां निवर्त्यते** परमार्थतोऽत्र प्राप्तिर्न ज्ञायते प्राप्तिसामग्रीविरहात् सामग्रीविरहश्चार्थविप्रकर्षेणेति दर्शितः । तस्माच्च प्राप्तिरियं स्मर्यते न तु ज्ञायत इति ज्ञानतः प्राप्तिनिबन्धनोऽपि व्यवहारो निवर्त्यत इति **बाधशब्दप्रयोगः** । **परमार्थतस्तु** स्वरूपज्ञानमेवेदं इत्येतत् सप्रपञ्चं प्रथमपाद एव निर्णीतम् । **तदयमत्रार्थसंक्षेपः**—विनियोजकाविनियोजकयोः साधारणं यद्रूपं अविनियोजकस्य लिङ्गादेः तद्रूपेण प्रमाणतां विनियोजकलिङ्गवर्तिनीं स्मरतः तस्याश्च स्मृतेः विशेषाग्रहणेन ग्रहणाद्विशेषमननुसन्दधतः अविनियोजकमपि लिङ्गादि विनियोजकप्रमाणमिति व्यपदेशव्यवहारौ प्रवर्तेते । तत्रार्थविप्रकर्षेण लिङ्गादेः श्रुत्यादिविरोधे प्रमाणता नास्ति असति प्रमाणत्वे प्रमाणता न ग्रहीतुं शक्यते किन्त्वन्यत्र दृष्टा स्मर्यत इति विशेषालोचनेन व्यवहारव्यपदेशौ निवर्तेते । एवं चाप्राप्तैव लिङ्गादेः प्रमाणता स्मर्यमाणा विशेषाग्रहणेन व्यवहारं गृह्यमाणेव प्रवर्तयन्ती व्यवहारापहारेण बाध्यत इति व्यपदिश्यते ।

ननु चायमप्राप्तबाधलक्षणो बाधः प्रथमपाद एवोक्तः 'यस्य च दुष्टं करणं' इत्यत्र किमिति पुनरुपन्यस्तः । अप्राप्तबाधसिद्ध्यर्थं नारब्धव्यमिदमधिकरणमित्यर्थः । **समाधानं**

अस्त्यत्र विशेषः तत्र हि शुक्तिकार्थस्याग्रहणात् रजते च स्मरामीति प्रमोषात् व्यपदेशसिद्धिः। इह पुनरागमिकत्वेन द्वयस्यापि तुल्यतापत्तिर्भवत्येवेति पुनरारब्धम्। किं पुनरागमिकत्वे द्वयस्यापि तुल्यतापत्तिः। तुल्यतापत्तौ वा बाधः। अत्रोच्यते—स्वतो विपर्ययाभावात्। न शुक्तिकादिष्विव स्वयमेव वियर्पयो भवति अपरीक्षितकारणस्वभावस्यापि।

—अस्त्यत्र विशेषः तत्र शुक्तिकार्थस्याग्रहणात्। रजते च स्मरामीति प्रमोषात् व्यपदेशसिद्धिः। अस्यार्थः—शुक्तिका रजतसाधारणेन रूपेण गृह्यते। सा च रजतात् भिन्नापि न भिन्नेत्यवगम्यते भेदप्रतीतिहेतुभूतरूपान्तराप्रतीतेः। तदुक्तं—रूपान्तरनिबन्धना ह्यन्यत्वबुद्धिः न वस्त्वन्तरनिबन्धनेति। तस्यां च तथाभूतायां रजते स्मृतिराविर्भवति। तदपि च रजतं न शुक्तिकातो भिन्नमित्यनुसन्धीयते। अतो गृह्यमाणस्मर्यमाणयोः शुक्तिकारजतयोः विवेको नावसीयते। तथा याप्यसौ रजतस्मृतिः सापि ग्रहणाद्भेदेन नावसीयते। स्मृतिरियमिति परिकल्पनाविरहात्। अतः ग्रहणाच्छुक्तिविषयात् भेदेनानवसीयमाना स्मृतिः शुक्तिकायां ग्रहणनिबन्धनावेव व्यपदेशव्यवहारौ प्रवर्तयति। अतः तन्मात्रस्मरणादेव व्यपदेशसिद्धिरिति घटेतापि अप्राप्तबाधः। **इह पुनः आगमिकत्वेन द्वयस्यापि तुल्यतापत्तिर्भवत्येवेति पुनरारब्धम्।** अस्यार्थः—श्रुतिलिङ्गयोर्द्वयोरपि प्रमाणत्वात् तुल्यतापत्तिर्भवति। तेन विनियोगः स्मर्यते इति न शक्यते वक्तुम् यावता लिङ्गेनापि प्रमाणेन प्रमीयत इत्येतदेव कस्मान्न भवतीति शङ्काऽस्तीति तदपनोदनायेदमारब्धम्। **किं पुनः कारणं आगमिकत्वे द्वयस्य तुल्यतापत्तिर्भवति** (तुल्यतापत्तौ चाबाधकेन पुनः कारणेन श्रुत्या लिङ्गादिद्वयस्यापि तुल्यताप्रतीतिर्भवति) **तुल्यतापत्तौ च** सत्यां केन **कारणेन बाधः? अत्रोच्यते—स्वतो विपर्ययाभावात्।** यदि हि स्वत एवाम्नाविनियोजकमेतल्लिङ्गमिति विपर्ययज्ञानमुत्पद्येत सदा तुल्यताबुद्धिर्न भवति। **न चात्र शुक्तिकादिष्विव स्वयमेव विपर्ययो भवति यथा अपरीक्षितकारणस्वभावस्यापि** पुरुषस्य शुक्तिकादिषु स्वयमेव विपर्ययज्ञानं भवति नेदं रजतमित्यादि न तथेह। कथं तर्हि

इह पुनः कारणपरीक्षाद्वारको विपर्यय इति प्रारब्धमिदमधिकरणम्। तद्विशुध्यर्थं चेदं भाष्यम्। सोऽयं अप्राप्तबाध इति सूक्तम् ॥ ८ ॥

॥ ६ ॥ अहीनो वा प्रकरणाद्गौणः ॥ १५ ॥

इदमिदानीं चिन्त्यते—किं नियोगसन्निधिर्बलीयान्

भवतीत्याह—इह पुनः कारणपरीक्षाद्वारकः विनियोगविपर्यय इति प्रारब्धव्यमिदमधिकरणं विनियोगकारणस्वरूपपरीक्षानिबन्धनोऽत्र विपर्ययः अकृतार्थयोर्ग्राहकग्रहणप्रकरणसमाम्नानयोः। विनियोजकत्वं श्रुत्यादीनां, कृतार्थत्वात् तयोरविनियोजकत्वमिति विनियोजकप्रमाणस्वरूपपरीक्षायां अर्थविप्रकर्षेण लिङ्गादीनां, सन्निकर्षेण श्रुत्यादीनामेव विनियोजकत्वमिति स्थिते तावतैव ग्राहकग्रहणप्रकरणसमाम्नानयोः कृतार्थत्वात अविनियोजकं लिङ्गादीति विपर्ययं पुरुषो जानातीति विनियोजकस्वरूपपरीक्षार्थं अर्थविप्रकर्षज्ञापनार्थं चेदमधिकरणमारब्धव्यम्। तद्विशुद्ध्यर्थं चेदं भाष्यं योऽसौ तेनाधिकरणेन बाध उक्तः तद्विशुध्यर्थमिदं भाष्यम्। कीदृशी पुनरनेन बाधशुद्धिः कृतेत्याह—सोऽयमप्राप्तबाधः। यथा चाप्राप्तस्य बाधः तथा दर्शितमेव। तेनायं भाष्यार्थः "[1]प्राप्तं बाधकविषयं पूर्वविज्ञानमिति ब्रूमः"। बाधकस्य श्रुत्यादेर्यो विषयः तत्पूर्वविज्ञानं लिङ्गादिज्ञानं प्राप्तमिति ब्रूमः। नैव परमार्थतः प्राप्तम्। किन्तु अप्राप्तमेव परमार्थतः प्राप्तमिति ब्रूमः प्राप्तिग्रहणस्मरणयोः विवेकानवधारणात्। कथं प्राप्तिस्मरणमित्याह —"[2]सामान्यस्य कारणस्य विद्यमानत्वात"। प्रमाणभूतलिङ्गादिगतस्य साधारणरूपस्याप्रमाणेपि सत्वात्। "[3]अथ कथं निवर्तते नैव निवर्तते" प्राप्तिस्मरणं किन्तु "मिथ्याज्ञानमेव तदिति प्रत्ययान्तरं भवति" स्मरणमेव ग्रहणव्यवहारप्रवर्तकं मिथ्याज्ञानमुच्यते एवं च स्वरूपज्ञानमेव बाधकं भवति। तस्मिन्नवगते तन्निबन्धनव्यवहारनिवृत्तेः इति कृता बाधविशुद्धिः।

अहीनो वा प्रकरणाद्गौणः। इदमिदानीं चिन्त्यते—किं नियोगसन्निधिर्बलीयान्

---

(1) Bh. P. 859 (2) ibid 859 (3) ibid 861

उत विनियोगसन्निधिरिति । पूर्वपक्षवादी कार्यार्थत्वाद्विनियोगस्य प्रकृतकार्यसंभवे प्रकृतकार्यसंबन्धो युक्त इति मन्यते । कथं तर्हि विनियोगः ? कार्यार्थत्वात्, तदनुगुणो व्याख्यायते । एवं तर्हि प्रकरणाद्वाक्यं दुर्बलमित्युक्तम्, न, सन्निधानाविशेषे हि वाक्यं बलीयः । यत्र पुनः कार्यसन्निधिरेव नास्ति किं तत्र वाक्यं करिष्यति ।

उत विनियोगसन्निधिरिति । वाक्यप्रकरणयोर्विरोधे वाक्यं बलीय इति स्थिते ज्योतिष्टोमप्रकरणपठितद्वादशोपसत्ताविषये किं वाक्यप्रकरणयोर्विरोधोऽस्ति नास्तीति चिन्त्यते । तत्सिद्ध्यर्थमिदं चिन्त्यते— किं नियोगस्य ज्यौतिष्टोमिकस्य यस्सन्निधिः स बलीयान् किं तेन सन्निधानेन ज्यौतिष्टोमिकनियोगार्थता द्वादशोपसत्तायाः प्रतीयताम्, उत विनियोगतः सन्निधिः विनियोगतः पदार्थसंबन्धः तेन यस्सन्निधिः [1]अहीननियोगस्य स बलीयान् तेनाहीननियोगार्थता । अहीनशब्देन हि द्वादशाहपरिमितयागो द्वादशरात्रात्मक उच्यते, अहीनशब्दस्य तन्नामधेयत्वात् । न पुनरहीनाधिकारविनियोगः । तेन द्वादशोपसत्ता अहीनस्येति यागसंबन्धोऽवगम्यते । तत्संबन्धेन च तदधिकारनियोगसन्निधिरवगम्यते । तद्वशेन तत्संबन्ध इति । एतदुक्तं भवति—ज्योतिष्टोमाधिकारापूर्वसन्निधानात् तत्संबन्धपुरस्सरा प्रकरणेन किं सोमयागाङ्गता उत पदार्थान्वयवशेन अहीनापूर्वगृहीततेति । तत्र **पूर्वपक्षवादी कार्यार्थत्वात् विनियोगस्य प्रकृतकार्यसम्भवे प्रकृतकार्यसंबन्धो युक्तः इति मन्यते ।** अस्यार्थः--सर्वो हि विनियोगः पदार्थः संबन्धोऽधिकारनियोगार्थः । तेन प्रधानत्वात् प्रकृतनियोगसंबन्ध एव न्याय्यः । **कथं तर्हि विनियोगः ?** पदार्थसंबन्धः । उत्तरं—**कार्यार्थत्वाद्विनियोगस्य तदनुगुणः** प्रधानभूतकार्यसंबन्धानुगुणः **व्याख्यायते** गौण्या वृत्त्या । अनेन सोमयाग एवोच्यते । **एवं तर्हि वाक्यं प्रकरणाद्दुर्बलमित्युक्तं भवति ।** परिहरति—**नेति ।** कुतः ? **प्रकरणाविशेषे (सन्निधानाविशेषे हि) बलीयो वाक्यम् ।** [2]एकप्रकरणिसंबन्धे हि स्थिते यदि तस्मिन्नेव प्रकरणे वाक्येन प्रकरणेन च विनियोगः तदा वाक्यं बलीयः यथा सूक्तवाके । **यत्र पुनः कार्यसन्निधिरेव नास्ति किं तत्र वाक्यं करिष्यति ।** न चात्राहीनकार्यसन्नि-

---

(1) G. अहीनयागस्य (2) G. एकप्रकरण

तस्मात् कार्यानुगुणैव पदार्थव्याख्येति युक्तं न हीयत इत्यहीनः।

[1]असंयोगात्तु मुख्यस्य तस्मादपकृष्यते ॥ १६ ॥

अत्र भण्यते—उक्तमस्माभिः पदार्थान्वयः संबन्धकारणं कार्यतोऽप्यन्वय एवावगम्यते। न चान्वयावगमे प्रतीतान्वयत्यागो युक्तः। न च दृष्टे हस्तिनि तत्पादेनानुमानं संभवति। तस्मादप्रतिपक्षमेव पदार्थव्याख्यानं युक्तम्। पदार्थ एव हि पदार्थप्रतिपक्षो भवति न पुनः कार्यम्। अन्यथा हि अर्थवादपदानामपि कर्तव्यताभिधानतैव स्यात्। तस्मादहीनस्येति क्रत्वन्तरार्थतैव न्याय्या।

धिरस्ति। तस्मात् कार्यानुगुणैव पदार्थव्याख्या न्याय्या न पदार्थानुगुणेति युक्तं न हीयत इत्यहीन इति।

असंयोगात्तु मुख्यस्य।

अत्र भण्यते—उक्तमस्माभिः पदार्थान्वयस्संबन्धकारणं पदार्थयोरन्वयो यः सः ऐदम्पर्थ्यसंबन्धस्य कारणमित्युक्तमस्माभिः। कार्यतोऽप्यन्वय एव गम्यते। यावद्धि पदार्थान्वयो नावगम्यते तावत् कार्यान्वयस्यानिर्वाहः। तेन कार्यतोऽप्यन्वयोऽवगम्यते। नचान्वयावगमे प्रतीतान्वयत्यागो युक्तः। न हि दृष्टे हस्तिनि हस्तिपदेनानुमानं संभवति। तस्मादप्रतिपक्षमेव पदार्थव्याख्यानं युक्तम्। ननु कार्ये प्रतिपक्षे कथमप्रतिपक्षता तत्राह —पदार्थ एव हि पदार्थप्रतिपक्षो भवति न पुनः कार्यम्। अन्यथा हि यदि कार्यमपि प्रतिपक्षं स्यात् तदा अर्थवादपदानामपि कर्तव्यताभिधानतैव स्यात्। सर्वेषामप्यर्थवादपदानां कार्यान्वयितैव स्यात् न प्रतीत्यन्वयितामात्रम्। पदार्थान्वयसंबन्धवशेन हि तेषां स्तुत्युपयोगिता। कार्यसंबन्धबलेन तु सर्वेषामप्यनुष्ठानोपदेशतैव स्यात्। कर्तव्यताशब्देन अनुष्ठानमुच्यते। तस्मादहीनस्येति पदार्थान्वयबलेन क्रत्वन्तरार्थतैव न्याय्या।

(1) Bhashya P. 863

ननु च तुल्यमेवात्र श्रौतत्वं एकत्र न हीयत इत्यहीनः अन्यत्राह्नां समूह इति। किमस्माकमनया चिन्तया। एकत्र श्रौतोऽन्यत्र गौण इति कृत्वा चिन्तितम्। न चेदत्र संभवति उदाहरणान्तरं संभविष्यति। यद्वा रूढिं मन्यते भाष्यकारः सत्रेष्वदर्शनात्।

ननु चात्र तुल्यमेव श्रौतत्वं, एकत्र सोमयागे न हीयत इत्यहीनः, अन्यत्र अहीने अह्नां समूह इति। एकत्र नञ्समासः अन्यत्र तद्धितः "अह्नः खः क्रतौ" इति खः। ननु च स्वरविरोधेन नञ् समासोऽनुपपन्नः नञ्समासे हि 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमाना-व्ययद्वितीया कृत्याः' इति पूर्वपदप्रकृतिस्वरत्वेन समासान्तोदात्तत्वे बाधिते आद्युदात्तोऽहीन-शब्दः स्यात मध्योदात्तश्चायमाम्नायते। तद्धितपक्षे प्रत्ययाद्युदात्तत्वे मध्योदात्तता उपपन्नेति तद्धितान्त एवायम्। स च मुख्यया वृत्त्या न ज्योतिष्टोमे वर्तते इति कथमुभयत्र श्रौतत्वमुच्यते। अभ्युपगम्याप्युभयत्र श्रौतत्वं कृत्वाचिन्ता-न्यायेनापि न्यायव्युत्पत्तिरिति दर्शयितुमिदमुक्तम्। तदाह-**किमस्माकमनया चिन्तया एकत्र श्रौतोऽन्यत्र गौण इति कृत्वा चिन्तितम्। न चेदत्र** श्रौतगौणत्वं **संभवति** तदा **उदा-हरणान्तरं भविष्यति। यद्वा रूढिं मन्यते भाष्यकारः**। तेन ज्योतिष्टोमे यौगिकत्वात रूढिर्योगमपहरतीति न्यायात् रूढिरेवायं प्रतीतव्यः। न च सोमयागेषु मुख्य इति सिद्ध-मेकत्र श्रौतत्वमन्यत्र गौणत्वम्। कुतः पुनः भाष्यकारो रूढिं मन्यते इत्यत्राह—**सत्रेष्व-दर्शनात्** प्रयोगस्य। नन्विदमयुक्तं पङ्कजादिष्वपि रूढित्वापत्तेः तेऽपि हि पद्मव्यति-रेकेणान्यत्र पङ्कजातेपि न प्रयुज्यन्ते। उच्यते—युक्तं पङ्कजादिषु यौगिकत्वं पङ्कशब्दस्य जशब्दस्य च पृथक्प्रयोगेण कॢप्तशक्तित्वात। इह पुनरहीनशब्दस्य न समूहे प्रयोगो दृष्टः। तेन कॢप्तशक्त्यनुसारेण प्रयोगानुपपत्तेः शक्तिः कल्प्यते। तत्र समुदायस्यैव द्वाद-शाहादिषु यजतिचोदितेषु अनवस्थितकर्तृकेषु प्रयोगदर्शनात् शक्तिः कल्प्यते। न पुनरहीन-शब्दस्य यौगिकत्वम्। यदि हि सत्रेपि प्रयोगो दृश्येत तदा अनेकशक्तिकल्पनाभयात् अहीन-शब्दस्यैव शक्तिः कल्प्येत। न चैतदस्ति। तस्मात् समुदायशक्त्यैवायमहीनशब्दो वर्तत

व्युत्पत्तिमात्रं तद्धितविधिः शुनश्शेपादिषु समासविधिरिव। तस्मादिदमप्युपपद्यत एवोदाहरणम्।

॥ ९ ॥ द्विबहुत्वयुक्तं चोदनात्तस्य ॥ १७ ॥

ननु चैव पूर्वेणैवाधिकरणेन गतमिदम्। न हि प्रतीयमानान्वयत्यागो युक्तः कार्यानुरोधेनेति। सत्यम्—किन्तु अस्त्यत्राधिकाशङ्का। यथाशक्तिप्रयोगे नित्ये कर्मणि यजमानान्तरप्रवेशमपि मन्यते पूर्वपक्षवादी। पत्न्यभिप्रायं चैकशेषाभिधानम् तस्मादनुत्कर्षः।

इति रूढिरेवायम्। किमर्थं तर्हि तद्धितविधिः? व्युत्पत्तिमात्रं तद्धितविधिः शुनःशेपादिषु समासविधिरिव। यथाऽविभक्तावयवतयैव समुदायशक्त्या शुनश्शेपशब्दे वर्तमानेपि समासविधिः "षष्ठ्या वाऽलुगुपसंख्यानं शुनः शेपपुच्छलाङ्गूलेष्वलुक्" इति। व्युत्पत्तेश्च प्रयोजनं स्वरविशेषविधिः। तस्मादिदमप्युपपद्यत एवोदाहरणम्।

द्विबहुत्वयुक्तं वाऽचोदनात्तस्य। ननु च पूर्वेणैवाधिकरणेन गतमिदम्। न हि प्रतीतान्वयत्यागः कार्यानुरोधेन युक्तः इति। प्रतीतद्वित्वबहुत्वान्वयत्यागः प्रकृत—कार्यानुरोधेन न युक्तः इति। समाधत्ते—सत्यं किन्त्वस्त्यत्राभ्यधिकाशङ्का। प्रकृतेपि द्वित्वबहुत्वसंभवात्। वाक्यप्रकरणयोरविरोध इत्यभ्यधिकाशङ्का। कथं पुनः प्रकृतेपि संभव इत्यत्राह—यथाशक्तिप्रयोगे नित्ये कर्मणि यजमानान्तरप्रवेशमपि मन्यते पूर्वपक्षवादी पत्न्यभिप्रायं वा एकशेषाभिधानम्। अस्यार्थः—नित्ये कर्मण्यधिकृतस्य यथाशक्त्यनुष्ठानम्। तत्र यदा एको यजमानोऽशक्तः कृत्स्नप्रयोगं कर्तुं तदा यजमानान्तरेण सह मिलित्वा करिष्यति। तत्र चैककर्तृत्वं केवलमङ्गभूतं त्यक्ष्यते। तस्यां चावस्थायां ज्योतिष्टोमेप्यनेकयजमानसंभवः। तथा पत्नीमपि गृहीत्वा एकशेषाभिधानम्—'यजमानयोः' 'यजमानेभ्यः' इति कल्प्यते। तस्मादनुत्कर्षः प्रतिपद्विधानस्य।

न प्रकृतेरेकसंयोगात् ॥ १९ ॥

अत्राभिधीयते—यजमानान्तरप्रवेशस्तावन्न संभवति। कुतः? यजमानस्य हि यथा शक्नुयादित्युच्यते। तत्र यन्न संभवति तस्यैव गौणार्थता, त्यागो वा, न पुनर्यजमानान्तरोपादानेन संपत्। सति चैवं न यजमानद्वित्वं बहुत्वं वा भवति प्रकृतौ। यदप्युक्तं पत्न्यभिप्राया द्वयोर्यजमानयोः बहुभ्य इति चाभिधानोपपत्तिरिति। तदप्ययुक्तम्। तस्मान्न पत्न्यभिप्राय इति इतरेतरयोगो घटते।

न प्रकृतेरेकसंयोगात्। अत्रोच्यते—यजमानान्तरप्रवेशस्तावन्न घटते। कुतः? यजमानस्य हि यथा शक्तुयादित्युच्यते। तत्र यन्न संभवति तस्यैव गौणार्थता त्यागो वा न पुनर्यजमानान्तरोपादानेन संप्रयोगः। अस्यार्थः—अधिकारस्तावदेकस्यैव ज्योतिष्टोमे, [1]एककर्तृत्वात् विषयस्य अधिकारभेदे प्रत्यधिकारं कर्तृभेदात् कर्तृभेदभिन्नाः प्रतियजमानं भिन्ना एव प्रयोगाः। तत्र यदि मिलित्वा अनेकयजमाना यजेरन् एकत्वात् प्रयोगस्य एकस्यैवाधिकारसिद्धेः एक एव यजमानः स्यात् नानेके। अतो यथाशक्त्यनुष्ठानेपि एकस्यैवाधिकारपूर्वककर्तृत्वं यजमानस्योच्यते न पुनर्यजमानयोर्मिलितयोः इत्येकयजमानके प्रयोगे यन्न संभवति तस्य गौणता त्यागो वा न पुनर्यजमानान्तरप्रवेशः। यदि परं एकेनानुष्ठानाशक्तेः कर्तव्यस्थायां पुरुषान्तरमनुप्रवेश्यते, न च तस्य यजमानशब्दो वाचकः। यजमानशब्दोद्देशेन च प्रतिपद्विशेषविधानम्। ननु च यजमानोद्देशेन च प्रतिपद्विधाने उद्दिश्यमानविशेषणविवक्षानिराकरणात् यजमानमात्रस्य च प्रकृतेऽप्यधिकारे संभवात् उत्कर्षो नोपपद्यते। अत्र वदामः। द्वयोः बहुभ्यः इति चोद्देश्यपदम्। तच्च यजमानविषयमिति यजमानोद्देशेनेत्युच्यते। तस्मादुपपन्नः उत्कर्षः। यदा चात्र प्रवेश्यमानो यजमानः तदा **न यजमानान्तरोपादानेन प्रयोगसंपत्।** किन्तु कर्तृमात्रोपादानेन। **सति चैवं न यजमानद्वित्वं बहुत्वं वा संभवति** प्रकृतौ ज्योतिष्टोम इत्यर्थः। **यदप्युक्तं पत्न्यभिप्राया द्वयोर्यजमानयोः बहुभ्य इति चाभिधानोपपत्तिरिति। तदप्ययुक्तम्। तस्मान्न पत्न्यभिप्रायः इतरेतरयोगो घटते।** यस्मादेकशेषे केवलायाः स्त्रियस्तावत् ग्रहणं नास्ति

(1) G. एकत्वात्

आधाने तु लक्षणया, असंभवात् श्रौतस्य यथा च पत्न्या सहेतरेतरयोगो नास्ति यागे तथा षष्ठे वक्ष्यामः। सत्रिणामेव हि सः। तस्मादत्रापि पूर्ववदुत्कर्षः।

॥ १० ॥ जाघनी चैकदेशत्वात् ॥ २० ॥

केन पुनः प्रसङ्गेनेदमधिकरणमायातम्? अनेन प्रसङ्गेन। स्थितं तावत् प्रकरणात् वाक्यं बलीयः सन्निधाने

स्त्रीमात्रस्य क्वचिदपि अधिकाराभावात्। एकशेषे अवश्यंभावी द्वितीयोपि पुमानेवावगम्यते। अतः पत्न्यभिप्रायो नेतरेतरयोगः। किं तर्हि? पुंद्वयाभिप्रायः। ननु च पत्न्यभिप्रायोऽपि इतरेतरयोगोऽस्त्येव "क्षौमे वसानौ" इति तद्वदत्रापि भविष्यतीत्यत्राह—**आधाने तु लक्षणया, असंभवात् श्रौतस्य।** अस्यार्थः—आधाने लक्षणया पत्न्यभिप्राय इतरेतरयोगः श्रौतस्य पुंद्वयाभिप्रायेण इतरेतरयोगस्यासंभवात् प्रकृते आधाने पुंद्वयाभावात्। नन्वत्रापि प्रकृते कर्मणि पुमनेकत्वाभावात् लक्षणा आश्रीयतामिति तन्न, वाक्यात् पुमनेकत्वप्रतीतिः प्रकरणान्न शक्यते बाधितुम्। आधाने तु वाक्यत एवाधानश्रवणं तच्च प्रकृतवाचीति पदार्थान्तरस्य प्रतिपक्षत्वात् युक्ता लक्षणा। युक्त्यन्तरं चाह - **यथा पत्न्या सह इतरेतरयोगो न घटते यागे तथा षष्ठे वक्ष्यामः।** सहभावेन प्रविशन्ती पत्नी नेतरेतरयोगार्हा। तेनैव च यजेतेत्येकवचनाविरोध इति षष्ठे वक्ष्यामः। यागग्रहणाद्यागे पत्न्या सहेतरेतरयोगो न संभवति। अभिधानक्रियायां तु संभवतीत्युक्तम्। न च बाह्यक्रियापेक्षे राजपुरोहितादिविषये इतरेतरयोगसंभवे अभिधानाश्रयो न्याय्यः। **सत्रिणामेव हि स इतरेतरयोगः।** न पत्नीयजमानयोः। **तस्मात्** द्वित्वबहुत्वाभावात् **अत्रापि पूर्ववत्** अन्वयानुरोधेन प्रकरणबाधादुत्कर्ष इति।

जाघनी चैकदेशत्वात्। विनियोगचिन्तारूपत्वात् अध्यायसङ्गतत्वेपि अवान्तर–सङ्गत्यभिप्रायेण पृच्छति—**केन प्रसङ्गेनेदमधिकरणमायातम्?** इति। उत्तरं—**अनेन प्रसङ्गेन** इदमायातमिति। **स्थितं तावत् वाक्यं प्रकरणात् बलीयः सन्निधाने**

चासन्निधाने च कार्यस्य। अत्रेदं सन्दिह्यते— किमयं वाक्यार्थ उतायं इति वाक्यार्थ एव संशयः। किं जाघन्युद्देशेन पत्नीसंयाजा विधीयन्ते उत विपरीतमिति। पूर्वपक्षी तावत् जाघन्युद्देशेन पत्नीसंयाजविधानं मन्यते। कुतः? एवं श्रौतोऽर्थो विहितो भवति। अन्यथा हि वाक्यार्थविधानं स्यात्। ननु चास्मिन् पक्षे वाक्यार्थ एव विहितो भवति अन्यदन्यस्मिन्नुच्यते। अनभिज्ञो भवान् वचनव्यक्तीनाम्। न ब्रूमो वाक्यार्थस्य विधिसंबन्धो नास्ति इति किं तु न विधेयो वाक्यार्थः। एतदुक्तं भवति—न सन्निकृष्टत्यागेन विप्रकृष्टार्थविधानं युक्तमिति। अयं चापरो लाभः जाघन्या पशूपादानकल्पना न कृता भवति। तस्मादत्राप्युत्कर्षः।

चासन्निधाने च कार्यस्य। अत्रेदं सन्दिह्यते-किमयं वाक्यार्थः उत अयं इति वाक्यार्थ एव संशयः। किं जाघन्युद्देशेन पत्नीसंयाजा विधीयन्ते उत विपरीतमिति। पूर्वपक्षी तावत् जाघन्युद्देशेन पत्नीसंयाजविधानं मन्यते। कुतः? एवं श्रौतोऽर्थो विहितो भवति। संयाजयन्तीति श्रुत्याविधानं, अन्यथा हि वाक्यार्थविधानं स्यात्। जाघनीविधानात्। ननु चास्मिन्नपि पक्षे वाक्यार्थ एव विहितो भवति। अन्यत् कर्म अस्मिन् द्रव्ये उच्यते—जाघन्यां पत्नीसंयाजा उच्यन्त इत्यर्थः। उच्यते—अनभिज्ञो भवान् वचनव्यक्तीनाम्। न ब्रूमो वाक्यार्थस्य विधिसंबन्धो नास्तीति विधेयोद्देश्यभावेन। किन्तु न विधेयो वाक्यार्थः। किन्तु वाक्यार्थो न विधीयते। इदमेव विवृणोति—एतदुक्तं भवति—न सन्निकृष्टार्थत्यागेन विप्रकृष्टार्थविधानं युक्तमिति समानपदोपात्तं कर्म परित्यज्य न पदान्तरोपात्तविप्रकृष्टद्रव्यविधानं युक्तमिति। अयं चापरोऽस्मिन् पक्षे लाभो भवति जाघन्या पशूपादानकल्पना न कृता भवति। अस्मिन् हि पक्षे यत्र जाघनी पशुयागे प्राप्ता तत्रैव तत्प्रतिपत्तये पत्नीसंयाजविधानमिति तत्प्रतिपत्तित्वादप्रयोजकत्वम्। पत्नीसंयाजेषु तु जाघनीविधाने प्रकरण एव निवेशात् उपादेया पत्नीसंयाजनिर्वृत्त्यर्था जाघनी। तस्मादत्राप्युत्कर्षः।

चोदना वाऽपूर्वत्वात् ॥

अत्राभिधीयते—जाघन्येवात्र पत्नीसंयाजेषु विधीयते। कुतः? यागविधाने हि पत्न्यर्थो विधातव्यो भवति। ननु चात्र पत्नीसंयाजाश्चोदकेन संनिहिता एव। सत्यम्—विधीयमानत्वेन तु प्रकरणान्तरे प्रयोजनान्यत्वमिति कर्मान्तरापत्तिः। ननु चासन्निधानं तत्र कर्मान्तरत्वे हेतुः न विधीयमानता, न चानन्यार्थत्वमत्र, जाघनीयसंबन्धार्थत्वाद्वाक्यस्य। तस्मान्नायं वाक्यभेदपरिहार उपलभ्यते। उच्यते—अनभिज्ञो देवानां प्रियः शास्त्रभेदस्य। विधानसन्निधिर्हि विहितविधाने भेदमुपरुणद्धि,

---

चोदनावा। अत्राभिधीयते। जाघन्येवात्र पत्नीसंयाजेषु विधीयते। कुतः? यागविधाने हि पत्न्यर्थोऽपरो विधातव्यो भवति जाघन्या पत्नीः संयाजयन्तीति। यदि पशुयागे जाघनीप्रतिपत्त्यर्थोऽयं यागो विधीयते तदा पत्न्यर्थोऽपरः कर्तृत्वेन विधेयः। दर्शपूर्णमासप्रकरणे तु जाघनीविधौ प्रकृतानां पत्नीसंयाजानां पत्नीकर्तृत्वादनूद्यते पत्नीरिति। इतरस्मिन् विशिष्टविधानाश्रयणे वाक्यार्थस्य विधानं विधिगौरवं चेति जाघन्येव विधेया इत्यनुत्कर्षः। चोदयति—ननु चात्रापि पत्नीसंयाजाश्चोदकेन सन्निहिता एव। तेन पत्नीकर्तृकाः प्राप्ता एवेत्यत्रापि पक्षेऽनुवाद एव घटिष्यते। परिहरति—सत्यं सन्निहिताः विधीयमानत्वेन तु प्रकरणान्तरे प्रयोजनान्यत्वमिति कर्मान्तरापत्तिः। पुनश्चोदयति —ननु चासन्निधानं तत्र कर्मान्तरत्वे हेतुः न विधीयमानता, सन्निधानं चात्र, तेन कर्मान्तरत्वानुपपत्तिः। यदि च यावत्कर्मस्वरूपविधानात् अन्योऽत्र विधिः न स्यात् तद्वा अभ्यासन्यायेन भवेत् कर्मभेदः। इह तु जाघनीसंबन्धार्थत्वात् न कर्मस्वरूपविधानार्थता। तदाह—न चानन्यार्थत्वमत्र जाघनीसंबन्धार्थत्वाद्वाक्यस्य। तस्मान्नायं पत्नीविधाननिबन्धनो वाक्यभेदरूपपरिहार उपपद्यते राद्धान्तिनः। उच्यते। अनभिज्ञो देवानां प्रियः शास्त्रभेदस्य। विधानसन्निधिर्हि विहितविधाने भेदमवरुणद्धि। अस्यार्थः—यत्र विहितं विधीयते तत्र विधानसन्निधिरेव भेदमवरुणद्धि निवारयति।

न पदार्थमात्रसन्निधिः । उद्देश्यत्वे हि भवति पदार्थमात्रसन्निधिरप्यवगमहेतुः, पदार्थमात्रसव्यपेक्षत्वात् उद्देश्यभावस्य । तस्माद्युक्तो वाक्यभेदः । यत्पुनरिदं भाष्यकारेणोभयथा संबन्धिविधानमुपन्यस्तं तत्किमर्थम् ? उच्यते । नान्तरीयकसाक्षाद्विधानविवेकप्रदर्शनार्थम् । प्रदर्शनमिदानीं किमर्थं ? अन्यतराप्राप्त्यर्थं नेह प्रकरणे उभयस्यावाप्तिरुपपद्यते । तस्मात अन्यतरद्विधेयम् । सा च जाघन्येव, पत्नीसंयाजानां प्राप्तत्वात्तस्मादनुत्कर्षः ।

न पदार्थसन्निधिः । अयमाशयः—प्रकृते विधौ पुनर्विध्यन्तरे श्रुतिप्रमाणाभावस्य प्रत्यभिज्ञायमानत्वात न विधेयान्तरं शक्यते कल्पयितुम् । पदार्थमात्रे तु सन्निहिते प्रमाणाभावस्या[1]-प्रतिज्ञायमानत्वात विधेयान्तरोपस्थापकत्वात् भवत्येव शास्त्रान्तरम् । इह च प्राकृता विधेयाः यद्यपि चोदकेन सन्निहिताः तथापि न विधेयतया किन्तु पदार्थतया । **उद्देश्यत्वे हि भवति पदार्थसन्निधिरप्यवगमहेतुः पदार्थमात्रापेक्षत्वादुद्देश्यभावस्य** पदार्थमात्रमुद्देशोऽपेक्षते न प्रमाणाभावम् । तेन पदार्थस्वरूपमात्रेण सन्निहितस्योद्देश्यत्वं भवति । नवप्रयाजादिवत् तस्मात् कर्मान्तरविधानात् अप्राप्तपत्न्यर्थविधाने युक्तो वाक्यार्थभेदपरिहारः । तत्र च एतावतैव पूर्वपक्षसिद्धान्तयोः सिद्धत्वात् किमर्थं भाष्यकारेण यत्र संबन्धो विधीयत इत्यादिना संबन्धविधानार्थं प्रकारद्वयमुपन्यस्तम् । अन्यतरत्र अन्यतरसंबन्धिविधानं संबन्धस्य च साक्षाद्विधानमिति तदाह—**यत्पुनरिदं भाष्यकारेण उभयसंबन्धविधानं** उभयस्यान्यतरत्र विधानं संबन्धस्य च साक्षाद्विधानमुपन्यस्तं **तत्किमर्थमिदम्** । **उच्यते—नान्तरीयक[2] साक्षाद्विधानविवेकप्रदर्शनार्थम्** । यत्रान्यतरसंबन्धी अप्राप्तो विधीयते तत्र नान्तरीयकं संबन्धविधानम् । यत्र पुनस्संबन्धिनौ प्राप्तौ उद्दिश्य स्वशब्देन संबन्धो विधीयते तत्र स्वयमेव संबन्धविधानमिति विवेकं दर्शयितुमित्यर्थः । विवेकप्रदर्शनमिदानीं किमर्थं ? अन्यतराप्राप्त्यर्थम् । अन्यतरस्याप्राप्तिं दर्शयितुम् । **नेह प्रकरणे उभयप्राप्तिरुपपद्यते तस्मादन्यतरद्विधेयम्** । **सा च जाघन्येव** विधेया **पत्नीसंयाजानां प्राप्तत्वात्** । **तस्मादनुत्कर्षः** ।

---

(1) G. स्य प्रत्य (2) R. & G. नान्तरीयकविधिविवेक

यत्पुनरिदमुक्तं न पशुं प्रयुङ्क्त इति अस्मदीयेपि पक्षे लौकिक्याः प्रयुक्तेर्विद्यमानत्वात्तुल्यम् ।

॥ ११ ॥ [1]सन्तर्दनं प्रकृतौ क्रयणवदनर्थलोपात् स्यात् ॥ २४ ॥

अत्राप्युत्कर्षाशङ्का दीर्घशब्दस्यानन्वयात् । धृत्या इत्यर्थवादानुपपत्तेश्च । अनुत्कर्षवादी तु लतादैर्घ्येणाप्यनुवादं मन्वानः दीर्घस्य वा सोमस्य इति प्रकृतावेवैतद्विधानमिति मन्यते । राद्धान्तवादी पुनः सोमापेक्षैवात्र दीर्घता मन्तव्या न लतापेक्षेति च नातिरेकाद्विनाऽर्थवादोपपत्तिः इति संस्थास्वित्युक्तवान् । ननु चास्मिन्नपि पक्षे प्रकरणादुत्कर्ष एव । संस्था हि विकाराः ।

यत्पुनरिदं न पशुं प्रयुङ्क्त इति पूर्वपक्षे उक्तं तदपि तुल्यं अस्मदीयेपि पक्षे लौकिक्याः केवलं जाघन्याः प्राप्तेः संभवात् [2]पशुप्रयुक्तेरसंभवात् इति ।

सन्तर्दनं प्रकृतौ । अत्राप्युत्कर्षाशङ्का दीर्घशब्दस्यानन्वयात् । 'धृत्यै' इत्यर्थवादानुपपत्तेश्च । यदि हि प्रकृत एव सोमयागे निवेशः स्यात् तदा दीर्घशब्दोऽनन्वितः स्यात् 'धृत्यै' इत्यर्थवादश्च नोपपद्यते । दारणाशङ्कायां हि धारणमाशासितव्यं भवति । न च तावत्येव सोमे दारणाशङ्का । अनुत्कर्षवादी तु लतादैर्घ्येणाप्यनुवादं मन्वानः दीर्घस्य वा सोमस्य इति प्रकृतावेवैतद्विधानमिति मन्यते । दीर्घशब्दोऽयं यजमानपरतया लतापरतया चान्वीयत इति प्रकरणानुग्रहाय प्रकृतावेव निवेशः । अर्थवादस्तु न प्रकरणसंबन्धं बाधितुं क्षमः । राद्धान्तवादी तु सोमापेक्षैवात्र दीर्घता मन्तव्या । न लतापेक्षेति एतच्चोपलक्षणमात्रं ; यजमानो दीर्घ इत्येतदुपलक्ष्यते । एवं दीर्घशब्दः सोमसमानाधिकरणो भवति, प्रवृत्तिविशेषकरश्च । "धृत्यै" इति च नातिरेकाद्विना अर्थवादोपपत्तिरिति । सोमातिरेकेण विना दारणाशङ्काभावात् नार्थवाद उपपद्यते । तस्मादधिकप्रदानासु संस्थासु निवेश इत्युक्तवान् । ननु चास्मिन्नपि पक्षे प्रकरणादुत्कर्ष एव नित्याधिकारादुत्कर्ष एव काम्यासु संस्थासु निवेशात् । संस्था अपि हि विकाराः इति संस्थाधिकरणे वक्ष्यते । परि-

---

(1) P. 871 (2) पशुप्रसक्ते

यागाभिप्रायोऽयमुत्कर्षः कार्यापेक्षया तूत्कर्ष एवेत्यदोषः। यत्पुनरिदमुक्तं सीसेन क्रीणातीतिवद्विकल्प इति। ननु च तत्र समुच्चयोऽनयोः न विकल्पः दशभिरेव क्रीणातीति। विधानविकल्पमङ्गीकृत्यैतन्निदर्शनम्, न प्रयोगविकल्पम्।

॥ १२ ॥ [1]सङ्ख्यायुक्तं क्रतोः प्रकरणात् स्यात् ॥ ३२ ॥

वाक्यार्थसमवायापेक्षिणी प्रकरणादुत्कर्षचिन्ता गता, इदानीमभिधानविप्रतिपत्तिर्वाक्य एव चिन्त्यते—किमयं प्रथमशब्दो ज्योतिष्टोम एव वर्तते उत ज्योतिष्टोमप्रयोग इति।

ह्रति—**यागाभिप्रायोऽयमुत्कर्षः** संस्थास्वप्येकत्वाद्यागस्य। **कार्यापेक्षया** अधिकारनियोगापेक्षया तु **उत्कर्ष एवेत्यदोषः।** **यत्पुनरिदमुक्तं सीसेन क्रीणाति इतिवद्विकल्प इति** भाष्यमनुभाषितम्। दूषणमाह—**ननु च तत्र समुच्चयो न विकल्पः 'दशभिरेव क्रीणाति' इति।** एतच्च द्वादशे उक्तम्। उत्तरं—**विधानविकल्पमङ्गीकृत्यैतद्दर्शितम् न प्रयोगविकल्पम्।** अस्यार्थः—यदि सीसेन क्रीणातीति क्रयविधिः वाससेत्यादयो गुणविधयः यदि वाससेत्येव क्रयविधिः इतरे गुणविधय इति विधाने विकल्पः प्रयोगे समुच्चय एव। न न्वेकेन विहिते कथमन्येन गुणविधानं, उत्पत्तिशिष्टगुणावरोधेन कर्मान्तरापत्तेः। नैतदेवम्। सन्निपत्योपकारकाणां कार्यैक्यावगमे भेदाभावादिति।

संख्यायुक्तं क्रतोः प्रकरणात् स्यात्। अवान्तरसङ्गतिमाह—**वाक्यार्थसमवायापेक्षिणी प्रकरणादुत्कर्षचिन्ता गता।** वाक्यार्थस्य यः समवायः प्रकरणे समवेतता तदपेक्षिणी प्रकरणादुत्कर्षचिन्ता गता, प्रकरणान्तरे वाक्यार्थस्य समवेतत्वात्। तत्र वाक्यार्थ उत्कृष्यत इत्युक्तम्। **इदानीमभिधानविप्रतिपत्तिर्वाक्य एव चिन्त्यते-किमयं प्रथमशब्दो ज्योतिष्टोम एव वर्तते उत ज्योतिष्टोमप्रथमप्रयोग इति।** अस्यार्थः—'न प्रथमयज्ञे प्रवृञ्ज्यात्' इति प्रथमयज्ञे प्रवर्ग्यप्रतिषेधः प्रतीयते। तत्र किं प्रथमशब्देन

---

(1) P. 876

'एष वाव प्रथमो यज्ञो यज्ञानां' इति श्रवणाद्धि स्पष्टैव यज्ञवचनता गम्यते "[1]एवं च प्रकरणमनुग्रहीष्यते" इति प्रतिषेधविध्यभिप्रायं तत् ।

[2]नैमित्तिकं वा कर्तृसंयोगात् लिङ्गस्य तन्निमित्तत्वात् ॥ ३३ ॥

अत्राभिधीयते—सत्यमस्मात् प्रयोगात अवगम्यते किन्तु य एतेनानिष्ट्वाऽथान्येन यजेतेति प्रयोगादपि प्राथम्यमवगम्यते

दर्शपूर्णमासादियज्ञान्तरापेक्षया ज्योतिष्टोम एवोच्यते ततश्च ज्योतिष्टोमस्य सर्वेषु प्रयोगेषु न प्रवर्ग्यितव्यम्, उत ज्योतिष्टोमस्यैव प्रथमप्रयोगः प्रयोगान्तरापेक्षया उच्यते। तेन तस्मिन्नेव न प्रवर्ग्यितव्यम्। इतरेषु प्रयोगेषु प्रवर्ग्येण भवितव्यमिति। पूर्वपक्षमाह —**"एष वाव प्रथमो यज्ञो यज्ञानां" इति श्रवणात् विस्पष्टैव यज्ञार्थवचनता अवगम्यते।** अस्यार्थः—विस्पष्टैव प्रथमशब्दस्य ज्योतिष्टोमवचनताऽवगम्यते यज्ञशब्दसामानाधिकरण्यात्। तस्य च प्रयोऽन्यवचनत्वात्। भवति च ज्योतिष्टोमः प्रथमो यज्ञः 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम" इति श्रवणात्। अतस्सर्वस्मिन्नपि ज्योतिष्टोमे न प्रवर्ग्यितव्यम्। अत्र भाष्यं "एवं च प्रकरणमनुग्रहीष्यते" इति। तत्र कदाचित् भ्रान्तिशीलस्य प्रवर्ग्यविध्यभिप्रायोऽयं प्रकरणानुग्रह उच्यते। स च प्रथमप्रयोगविषयेऽपि प्रतिषेधे घटत एव। तस्मादसाधकोऽयं पूर्वपक्षस्येति भ्रान्तिः स्यात। तामपनेतुमाह—**प्रतिषेधविध्यभिप्रायं तदिति।** यदि ज्योतिष्टोम एव प्रतिषेधः स्यात तदा प्रकरणमनुग्रहीष्यते सर्वज्योतिष्टोमे प्रतिषेधसिद्धेः।

नैमित्तिकं वा। अत्राभिधीयते—सत्यमस्मात् प्रयोगादवगम्यते। 'एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इत्यस्मात् प्रयोगात् सत्यं ज्योतिष्टोम एव प्रथमोऽवगम्यते न तदीयप्रयोगः। किन्तु **"य एतेनानिष्ट्वा अथान्येन यजेत" इति प्रयोगादपि प्राथम्यमवगम्यते।** अस्यार्थः—यथा एष वावेति प्रयोगात ज्योतिष्टोमस्यैव प्राथम्यमवगम्यते

---

(1) Bh. P. 876 (2) ibid 877

नानिष्ट्वाऽथान्येन यजेतेति। कथं ? कर्तृसंबन्धितया श्रूयमाणत्वात्। कर्तुश्च प्रयोगेण संबन्धो न प्रयोज्येन। प्रयोगपरे च वाक्ये एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति श्रुतिः न पुनः प्रयोज्यनिष्ठा। क्वचिदस्य प्रयोगोऽवगम्यते ज्योतिष्टोमशब्दस्यैव। अतः प्रयोग एवायं इति न प्रथमे प्रयोगे प्रवृञ्ज्यादित्यर्थः। यज्ञशब्दश्च प्रयोज्यविषयत्वात् प्रयोगेऽप्युपपद्यत एव।

तथा य एतेनेत्येतदालोचनया प्रयोगात् प्रथमो न पुनः स्वरूपेणेति। कथं य एतेनेत्येतदालोचनया प्रयोगात् प्राथम्यं ? उत्तरं—**कर्तृसंबन्धितया श्रूयमाणत्वात्** य इति शब्दोपात्तक्रतुसंबन्धितया श्रवणात्। तथापि किमित्याह—**कर्तुश्च प्रयोगेण संबन्धो न प्रयोज्येन।** प्रयोगाङ्गं हि कर्ता न प्रयोज्यस्य द्रव्यदेवतामात्रसाध्यत्वात्। सर्वत्र करणाद्येव क्रियानुरञ्जकं अन्तरङ्गत्वात् कर्ता तु करणादि व्यापारयन्नेव [1]क्रियायां समवैतीति मन्तव्यम्। तेन प्रयोगयोगाच्च ज्योतिष्टोमस्य प्राथम्यम्। **प्रयोगे एव हि प्रथमशब्दः** श्रौतः प्रयोज्ये लाक्षणिकः श्रुतिलक्षणाविशये च श्रुतिरादरणीया। तेन प्रथमप्रयोग एव प्रतिषेधः। युक्त्यन्तरं चाह—**प्रयोगपरे वाक्ये एष वाव प्रथमो यज्ञो यज्ञानां इति श्रुतम्।** अस्यार्थः—प्रयोगपरमेतद्वाक्यं, ज्योतिष्टोमस्य प्रथमप्रयोगः कर्तव्य इति विधीयते तत्र च 'एष वाव' इति श्रुतं प्रयोगपरमेव विज्ञायते। तेनायमर्थो भवति—एष वै प्रथमो यज्ञप्रयोगाणां यज्ज्योतिष्टोमप्रयोगः, य एतेन ज्योतिष्टोमेन प्रयोगेणानिष्ट्वा अन्येन प्रयोगेण यजेत कर्तस्यैव आपत्तिः अन्तः ज्यानिं जीयते ज्यानिं याति वा प्रमीयते म्रियते वा इति। तेन प्रयोगस्यैवेदं प्राथम्यं न प्रयोज्यस्य। तदाह—**न पुनः प्रयोज्यनिष्ठा। क्वचिदस्य** प्रथमशब्दस्य **प्रयोगो** विद्यते **ज्योतिष्टोमस्यैव। अतः प्रयोग**वचन **एवायं** प्रथमशब्दः। तेनायमर्थो भवति **न प्रथम**यज्ञ**प्रयोगे प्रवृञ्ज्यादिति।** ननु च यज्ञशब्दः प्रयोज्यवचनः स कथं प्रयोगे घटिष्यते तत्राह—**यज्ञशब्दः प्रयोज्यविषयत्वात्** प्रयोगस्य **प्रयोगेऽप्युपपद्यत एव।** प्रयोज्य एव प्रयोगो भवति। तेन प्रयोज्यशब्देन व्यपदेशो नानुपपन्नः। तेनैष

---

(1) R. क्रियया

प्रथमप्रयोज्यो यज्ञानामित्यर्थः। एवं च प्रकरण एव प्रवर्ग्य-विधिरुपपन्नो भवति।

॥ १२ ॥ [1]पौष्णं पेषणं विकृतौ प्रतीयेताचोदनात्प्रकृतौ ॥ ३४ ॥

पौष्णं पेषणं उत्तरविवक्षयेत्युक्तम्।

॥ १३ ॥ [2]तत्सर्वार्थमविशेषात् ॥ ३५ ॥

इदमिदानीं चिन्त्यते किं यावत्पौष्णं तत्सर्वं प्रपिष्टं कर्तव्यं उत चरुरेवेति। तत्र पूर्वपक्षवादी विशेषाग्रहणात् सर्वार्थमिति मन्यते। ननु च पुरोडाशे प्राप्तत्वात् न शक्यते विधातुं; न, पौष्णतया अप्राप्तेः

प्रथमप्रयोज्यः यज्ञानामित्यर्थः। एवं च प्रकरण एव प्रवर्ग्यविधिरुपपन्नो भवति। अस्यार्थः—कौषीतकिब्राह्मणे ज्योतिष्टोमप्रकरणे "पुरस्तादुपसदां प्रवर्ग्येण प्रचरन्ति" इति प्रवर्ग्यविधिः श्रूयते। तत्र यदि ज्योतिष्टोमप्रयोगमात्रे प्रतिषेधो भवेत् ततो विकल्प-परिहाराय प्रकरणान्तरं नीयते। ततः प्रकरणबाधः। अथ प्रकरणाविरोधाय तत्रैव अवतिष्ठते ततो विकल्पः स्यात्। अस्मन्मते तु नैमित्तिकत्वात् प्रतिषेधस्य न कश्चिद्विशेष इति।

पौष्णं पेषणं विकृतौ। पौष्णं पेषणं उत्तरविवक्षयेत्युक्तम्। अनेनाधिकरण-प्रयोजनमुक्तम्।

तत्सर्वार्थमविशेषात्। इदमिदानीं चिन्त्यते—किं यावत्पौष्णं तत्सर्वं प्रपिष्टं कर्तव्यं उत चरुरेवेति। तत्र पूर्वपक्षवादी विशेषाग्रहणात् सर्वार्थमिति मन्यते चरुपशुपुरोडाशार्थं पेषणं सर्वेषां पौष्णत्वाविशेषात्। ननु च पुरोडाशे पेषणस्य प्राप्तत्वात् न शक्यते विधातुम्। उत्तरं—न, पौष्णतया अप्राप्तेः। अस्यार्थः—सत्यं स्वरूपेण

---

(1) Bh. P. 880 (2) Bh. P. 881

तस्मात् सर्वार्थम्। ननु हृदयाद्याकृतिविनाशः पशौ भवतु, वचनात्। किमिव वचनं न कुर्यात्। अत्रोच्यते—पुरोडाशे तावत् प्राप्तत्वान्न विधिः। ननु पौष्णतयाऽप्राप्तिरित्युक्तम्। कार्यत एव प्राप्तिरिष्यते न संबन्धितया अन्यथा ह्यर्थवादपदानामपि कार्यार्थतैव स्यादित्युक्तम्। ननु चैवं सति प्रकरणाद्वाक्यं दुर्बलमित्युक्तम्। कार्ये सत्यन्वयकल्पना, अतो बलवत्ता उक्ता वाक्यस्य।

पेषणं प्राप्तं पौष्णतया न प्राप्तम्। [1]तच्च नाम न विधेयं यत् सर्वात्मना प्राप्तम्। यत्तु केन चिच्चात्मना अप्राप्तं तद्विधेयं भवत्येव तस्मात् सर्वार्थम्। ननु च पेषणे क्रियमाणे **हृदयाद्याकृतिविनाशः पशौ।** ततश्च आकृतिनाशप्रसङ्गात् पेषणेन न भवितव्यम्। उत्तरं—**भवतु आकृविनाशः पेषणवचनात्, किमिति वचनं न कुर्यात्।** सर्वं कुर्यादित्यर्थः। अत्रोच्यते—**पुरोडाशे तावत्** पेषणस्य **प्राप्तत्वान्न विधिः। ननु पौष्णतयाऽप्राप्तिरित्युक्तम्।** उत्तरं—**कार्यत एव प्राप्तिरिष्यते न संबन्धितया।** अस्यार्थः—कार्यार्थं पदार्थानां प्राप्तिरिष्यते न पुनः संबन्धित्वार्थम्। इह च पुरोडाशे यत् प्रकृतिवत्पेषणं प्राप्तं तेनैव कार्यं कृतमिति न पुनः पेषणस्य कार्यमस्ति। ततश्च कार्याभावे सति पेषणान्तरस्यानुष्ठानाभावात् न पुनर्विधानमवकल्पते, अनुष्ठानपर्यन्तत्वाद्विधेः इति। **अन्यथा अर्थवादपदानामपि कार्यार्थतैव स्यादित्युक्तम्।** यदि यस्यापि कार्यं नास्ति तस्याप्यनुष्ठेयता, तदा अर्थवादपदानामर्थः करणेतिकर्तव्यतामनुप्रविष्टोऽपि कर्तव्यः स्यात्। **ननु चैवं सति प्रकरणाद्वाक्यं दुर्बलमित्युक्तम्।** अस्यार्थः—वाक्यात् पुरोडाशेपि पेषणे प्राप्ते यदि कार्याभावात् पुरोडाशेपि पेषणं न विनियुज्यते तदा प्रकरणाद्वाक्यं दुर्बलमित्युक्तं भवति। प्रतीतान्वयत्यागेनापि यद्यन्वयः कल्प्यते तदा द्वादशोपसत्ता अहीनस्येत्यत्रापि किमित्यन्वयो न कल्प्यत इति भावः। उत्तरं—**कार्ये सति अन्वयकल्पना, अतो बलवत्ता उक्ता वाक्यस्य।** यत्र हि वाक्यावगतेऽन्वये कार्यलाभः तत्र वाक्यं

(1) G. **तन्नाम्ना विधेयम**

तस्मान्न विधानं पुरोडाशे संभवति। पशौ तर्हि संभवति। न हि। तर्हि सापेक्षत्वप्रसङ्गात् शास्त्रस्य। न च निरपेक्षे संभवति सापेक्षाश्रयणं युक्तमित्युक्तं शब्दविद्भिः। तस्मात् चरावेव पेषणं शब्दात् प्रतीमः। यत्पुनरिदमुक्तं [1]यद्यपीत्येवमादिना भाष्यकारेण एवमपि सापेक्षत्वं नैव परिहर्तुं शक्यत इत्यभिप्रायः। अन्वारोहमात्रं चैतत। पूर्वमेव ह्युक्तो हेतुः। ननु च चरावपि चरुतैव हीयेत विशदसिद्धौदने प्रयोगदर्शनात। न, पिष्टकचरावपि पक्तिसामान्यात् इत्यभिहितः चरुशब्दप्रयोग इति चरावेव पेषणमिति सिद्धम्।

बलीयः। 'कार्यशून्येऽन्वये न वाक्यावगतान्वयस्वीकारः। किं तर्हि अन्वयान्तरकल्पनेति। तस्मात् कार्याभावात पुरोडाशे पेषणस्य विधानं न संभवति। पशौ तर्हि संभवति न हि, तत्रापि सापेक्षत्वप्रसङ्गात् शास्त्रस्य आकृतिबाधसापेक्षं हि पशौ विधानम्। न च निरपेक्षे चरुविषये संभवति सापेक्षाश्रयणं युक्तमिति उक्तं शब्दविद्भिः। तस्माच्चरावेव पेषणं कर्तव्यमिति शब्दात् प्रतीमः। अत्र भाष्यकारेण "यद्यपि तदाकृतिः प्रतीयेत तथापि उत्सादनदेशं प्रति मुह्येयुः" इत्युक्तम्। तदनुपपन्नम्। पिष्टे हृदयादौ पुनस्तदाकृतिर्न शक्यते कर्तुं पारिणामिकत्वात्तस्या इत्याशङ्कामपनेतुमाह—यत्पुनरिदमुक्तं यद्यपीत्यादिना भाष्येण तत्रैवमपि सापेक्षत्वं नैव शक्यते परिहर्तुमित्यभिप्रायः। अस्यार्थः—सत्यप्याकृतिसंपादने पूर्वार्धादिकोद्धरणदेशबाधसापेक्षत्वं न निवर्तयितुं शक्यत इत्युक्तम्। अन्वारोहमात्रं चैतत्। परमार्थतस्तु आकृतिः पेषणे कृते नश्यत्येवेति पूर्वमेवोक्तो हेतुरित्यर्थः। ननु चरावपि चरुतैव हीयेत विशदसिद्धौदने चरुशब्दप्रयोगात्। न च पिष्टमय ओदनो भवति। उत्तरं—न चरुता हीयेत पिष्टकचरावपि पक्तिसामान्यादिति। पक्तिवचनत्वाच्चरुशब्दस्येत्येवमभिहितः पेषणेपि सति चरुशब्दप्रयोगः। उपसंहरति—तस्माच्चरावेव पेषणमिति सिद्धम्।

---

(1) Bh. P. 882

॥ १५ ॥ [1]एकस्मिन्नेकसंयोगात् ॥ ३९ ॥

अत्र भाष्यकारेण इन्द्रपीताग्नेयशब्दाभ्यां विशेषो दर्शितः पूषा प्रपिष्टभागो भवतीति । तथा अदन्तको हीति हेतुवचनं सोमापौष्णे नेमपिष्टश्चरुरिति । सोमापौष्णे नेमपिष्ट इत्यनुवादो युक्तः। नेमपिष्टविधाने हि पौष्णोपलक्षणात् चरुरित्यविवक्षितं स्यादित्येवमाद्यधिकाशङ्कानिराकरणार्थमिदमधिकरणम् । अत्रोच्यते— कथमासामाशङ्कानां निराकरणं ? कार्यप्रयुक्तत्वाद्धर्माणामित्युक्तो हेतुः । कथं पुनः कार्येण संबन्धो देवतापदयुक्तानां भवतीति

एकस्मिन्नेकसंयोगात् । ननु चैकदेवताके विहितो धर्मो न द्विदेवताके संभवति चतुर्धाकरणवत् इन्द्रपीतमन्त्रवच्च तत्राह—**अत्र भाष्यकारेण इन्द्रपीताग्नेयशब्दाभ्यां विशेषो दर्शितः पूषा प्रपिष्टभागो भवतीति तथा अदन्तको हीति हेतुवचनं सोमापौष्णे नेमपिष्टश्चरुः इति ।** अस्यार्थः—प्रपिष्टं भजतीति प्रपिष्टभाक् पूषोच्यते स च द्विदेवताकेपि यदि पेषणं स्यात् तदा प्रपिष्टभाक्भवति इति । अन्यथा न प्रपिष्टभागो भवेत् तथा अदन्तको हीति हेतुवचनं पूषनिमित्तकं पेषणं दर्शयति सोमापौष्णो नेमपिष्टश्चरुः इत्यत्र नेमपिष्टता ऽनूद्यते । सा च पूषमात्रनिमित्ते पेषणेऽवकल्पते **सोमापौष्णचरुविधौ नेमपिष्ट इत्यनुवाद एव युक्तः; नेमपिष्टविधाने हि सोमापौष्णस्य लक्षणात् तदुद्देशेन चरुरित्यविवक्षितं स्यात् इत्येवमाद्यधिकाशङ्कानिराकरणार्थमिदमधिकरणम् । अत्रोच्यते—कथमासामाशङ्कानां निराकरणं ?** उत्तरं—**कार्यप्रयुक्तत्वाद्धर्माणामित्युक्तो हेतुः ।** अस्यार्थः—कार्यप्रयुक्ता धर्माः कार्ये असंभवन्तः तत्संबद्धे यागेऽवकल्पन्ते । ततश्च पूषा प्रपिष्टभाग इति वचनात् पूषलक्षिते यागे देवताविधिरवसीयते । देवतात्वेन हि पूषा यागं लक्षयितुं शक्नोति संबन्धस्य लक्षकत्वात् । न च द्विदेवताके पूष्णो देवताभावस्संभवति । तेन तत्र धर्मविधिरन्याय्यः । **कथं पुनः कार्येण संबन्धो देवतापदयुक्तानां भवति ।** उत्तरं

---

(1) P. 883

निष्प्रयोजनत्वाद्देवतायाः कार्यार्थत्वाच्च यागस्येति लक्षणोपपद्यते। देवता चेदुपलक्षणं न द्विदेवताकेषूपलक्षयितुं क्षमः। अदेवता हि सा तत्र। अदन्तकत्वादीनां तु हेतुवन्निगदत्वेनार्थवादत्वमुक्तम्। अर्थवादाश्च गुणवादेन व्याख्येयाः। नेमपिष्टशब्दस्य न्यायापेतत्वात् द्विदेवताकेषु विशिष्टविधानं भविष्यति। तस्मादेकदेवताकेषु पेषणमिति सिद्धम्।

इति बृहत्यां तृतीयाध्यायस्य
तृतीयः पादः

—निष्प्रयोजनत्वाद्देवतायाः। नन्वेवं यागेपि संबन्धो न स्यादित्याह—कार्यार्थत्वाच्च यागस्य कार्यप्रयुक्तं पौष्णं लक्षणयोपपद्यते देवतया यागो लक्ष्यते। देवता चेदुपलक्षणम् न द्विदेवताके पूषा लक्षयितुं क्षमः। अदेवता हि स पूषा तत्र द्विदेवताके कर्मणि। अदन्तकत्वादीनां तु हेतुवन्निगदत्वेनार्थवादत्वमुक्तम्। अर्थवादाश्च गुणवादेन व्याख्याताः नेमपिष्टस्य च न्यायापेतत्वात् न्यायतेऽप्राप्तत्वात् द्विदेवताके पेषणस्य विशिष्टविधानं भविष्यति। तस्मादेकदेवताकेषु चरुषु पेषणमिति सिद्धम्।

इति ऋजुविमलायां तृतीयाध्यायस्य
तृतीयः पादः

तृतीयाध्यायस्य चतुर्थः पादः ॥

॥ १ ॥ [1]निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् ३-४-१ ॥

कथं पुनः विधिना त्वेकवाक्यत्वादिति स्थितेऽर्थवादत्वे पुनर्विधानाशङ्का। एकवाक्यत्वे हि न विधिद्वयमवकल्पत इति न निवीतत्वादिविधिसंभवः। पाक्षिकीं प्राप्तिं मन्वानो विधिं मन्यत इति चेत्। तदप्ययुक्तम्। तस्यापि वचनान्तरेण प्राप्तत्वात् उपपद्यत एवार्थवादः। उच्यते—प्रकरणाङ्गतयाऽप्राप्तिं मन्वानेनेदमधिकरणं चिन्तितम्। विधानेपि प्रकरणाङ्गता न संभवतीति स्थितमर्थवादत्वम्।

ऋजुविमलायां

तृतीयाध्यायस्य चतुर्थः पादः

निवीतम्। कथं पुनः विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनामिति स्थितेऽर्थवादत्वे पुनर्विधानाशङ्का। एकवाक्यत्वे हि न विधिद्वयमवकल्पत इति न निवीतत्वादिविधिसम्भवः। पाक्षिकीं प्राप्तिं मन्वानो विधिं मन्यत इति चेत्। अर्थवादो हि अनुवादतया। न च निवीतादि नित्यप्राप्तम्। अतः पक्षेऽनुवादस्याप्यनुपपत्तेः विधिराश्रयणीय इति। तदप्ययुक्तम्। 'प्रायादि'त्यनेन परिहृतत्वात्। प्रायिकीमपि प्राप्तिमाश्रित्यार्थवादो भवतीत्युक्तं प्रायात् इत्यनेन सूत्रेण। यथा "अनृतवादिनीवाक् इति, प्राचीनावीतमिति विधानं अप्राप्तत्वात्। तत्संयोगादिदमपि विधीयत इति चेत् 'प्राचीनावीतं पितॄणां' इति पक्षेऽपि न प्राप्तम्। अतस्तद्विधेयम्। तच्चेद्विधीयते वाक्यं भिन्नं तावदाश्रितम् ततश्च निवीतमपि विधीयत इति। तदयुक्तम्—तस्यापि वचनान्तरेण प्राप्तत्वात् उपपद्यत एवार्थवादः। एवमाक्षिप्ते समर्थयते—प्रकरणाङ्गतयाऽप्राप्तिं मन्वानेन इदमधिकरणमारब्धम्। प्रकरणस्याङ्गनियोगस्य अङ्गतया पक्षेऽपि प्राप्त्यभावात् प्रायात् इत्यनेन न्यायेनार्थवादत्वानुपपत्तेः निवीतं विधीयत इति मन्वानेनेदमधिकरणमारब्धम्। राद्धान्तमाह—विधानेपि प्रकरणाङ्गता न संभवतीति स्थितमर्थवादत्वम्। यद्यपि विधीयते तथापि

---

(1) P. 889

ननु चातिथ्यादावप्राप्तिर्विद्यत इति युक्तम्। न। तदन्वयानवगमात्। मनुष्यमात्रसंबन्धितायां तु प्रायादिभिरुपपन्नत्वात् अर्थवादतैवेति सिद्धम्।

॥ २ ॥ [1]दिग्विभागश्च तद्वत्सम्बन्धस्यार्थहेतुत्वात् ॥ ३-४-१० ॥

॥ ३ ॥ परुषिदितपूर्णघृतविदग्धं च तद्वत् ॥ ३-४-११ ॥

तद्वदित्ययमतिदेशः किमभ्यधिकं पश्यतः? अन्यथा ह्युपवीते प्राप्तिः, अन्यथा दिक्षु, अन्यथा परुषि दिनादिष्विति विशेषप्रदर्शनार्थोऽयमतिदेशः।

मनुष्याणामिति श्रवणात् स्वतन्त्राधिकारापत्तेः प्रकरणाङ्गता न संभवति। किन्तु पुरुषधर्मता पुरुषधर्मश्चेत् प्रायादित्युपपद्यत एवार्थवादः। ननु चातिथ्यादावप्राप्तिर्विद्यत इति युक्तं विधानं मनुष्याणामिति श्रवणे सत्यपि मनुष्यप्रधाने आतिथ्ये कर्मणि एकान्ततोऽप्राप्तत्वात् किमिति विधानं न संभवतीति। न। तदन्वयानवगमात्। आतिथ्यकर्मान्वयो नावगम्यते। अपि तु मनुष्यमात्रान्वय एव। स च प्रायादिभिः अर्थवादतयोपपद्यत इति सिद्धमनुवादत्वम्। तदाह—मनुष्यमात्रसंबन्धितायां तु प्रायादिभिरुपपद्यत इत्यर्थवादतैवेति सिद्धम्।

दिग्विभागः। परुषिदितम्। तद्वदित्यतिदेशः किमभ्यधिकं पश्यतः? उत्तरं—अन्यथा ह्युपवीते प्राप्तिः अन्यथा च दिक्षु अन्यथा च परुषिदिनादिषु इति विशेषप्रतिपादनार्थोऽयमतिदेशः। पूर्वपक्षसिद्धान्तौ तावेव। किन्त्वर्थवादवर्णनाय प्राप्तिर्वक्तव्या। सा च प्रवचन कथं चिदित्यधिकरणभेदः।

---

(1) P. 898-899

॥ ४ ॥ [1]अकर्मक्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् ॥ ३-४-१२ ॥

उक्तं निवीताधिकरणेन क्रतुधर्मतया निवीतादि प्रतीयते मनुष्यश्रवणादिति। प्रायेण च प्राप्तत्वादनुवाद इति। अत्रापीदानीं तद्वदेवानुवादं मन्वानस्य पूर्वः पक्षः। ननु च तत्र मनुष्यशब्दश्रवणाद्युक्तोऽनुवादः प्रायिकीं च प्राप्तिमाश्रित्य अर्थवादः। उच्यते। अत्रापि पूर्वप्राप्तप्रतिषेधात् गम्यत एव पुमान् यस्यासौ प्रतिषेधः। प्रतिषेधशास्त्रे हि सर्वत्र प्रतिषिध्यमानक्रियाकर्तुरेवाधिकारः

अकर्मक्रतुसंयुक्तम्। उक्तं निवीताधिकरणेन क्रतुधर्मतया निवीतादि प्रतीयते मनुष्यादिश्रवणादिति प्रायेण प्राप्तत्वादनुवाद इति। इदानीं नानृतं वदेत् इत्यत्रापि तद्वदेवानुवादं मन्वानस्य पूर्वः पक्षः। अनेनावसरसङ्गतिं पूर्वपक्षं चाह। अर्थस्तु निवीतं मनुष्याणां इति श्रुतेः न क्रतुधर्मतया निवीतादि प्रतीयते। अपि तु पुरुषधर्मतया पुरुषधर्मश्चेत् प्रायेण पुरुषार्थतया निवीतादिप्राप्तेः अनुवाद इति निवीताधिकरणे उक्तम्। इदानीं नानृतं वदेत् इति प्रतिषेधस्यानुवादं मन्वानस्य पूर्वः पक्षः। चोदयति—ननु च तत्र मनुष्यशब्दश्रवणात् पुरुषमात्रसंबन्धावगतेः क्रतुधर्मतया संबन्धानवगतेश्च युक्तोऽनुवादः प्रायिकीं च प्राप्तिमाश्रित्यार्थवादः। इह तु पुरुषशब्दाश्रवणात् न पुरुषार्थताऽवगम्यते। अपि तु प्रकरणात् क्रत्वर्थतैवावगम्यते। न च क्रतुसंबन्धितया प्राप्तिरस्ति इति नानुवादो घटते। परिहरति—अत्रापि पूर्वप्राप्तप्रतिषेधानुवादात् गम्यत एव पुमान् यस्यासौ प्रतिषेधः। अत्रापि 'नानृतं वदेत् इति। यस्यासौ स्मार्तः प्रतिषेधः स पुमान् अधिकारितयाऽवगम्यत एव। कुतः ? पूर्वप्राप्तस्य प्रतिषेधस्यानुवादात्। तत्र च पुरुषस्याधिकारस्मरणात्। ननु नायं प्रतिषेधानुवादो घटते। तत्र प्रत्यवायपरिहारार्थिनोऽधिकारात्। इह च प्रकरणाङ्गतया निरधिकारत्वादिति तत्राह—सर्वत्र प्रतिषेधशास्त्रे हि प्रतिषिध्यमानक्रियाकर्तुरेवाधिकारः इति। अस्यार्थः

(1) Bh. P. 900

अतः पूर्वप्राप्तस्यैवायमनुवादः। विद्यते च प्राप्तिः अर्थतः। प्राप्तिमात्रतया च प्रतिषेधोपपत्तेः न प्रकरणार्थता। ननु चायमनुवादः कस्य विधेः शेषः? न कस्यचिदपीति ब्रूमः। प्राप्तिरनुवादत्वे हेतुः नार्थवादता।

—न स्मार्ते प्रतिषेधे प्रतिषिध्यमानक्रियानुष्ठाननिबन्धनप्रत्यवायपरिहारार्थिनोऽधिकारः प्रमाणाभावात्। न हि निषिद्धा क्रिया प्रत्यवायं जनयतीति किञ्चन प्रमाणमस्ति। ननु च प्रतिषेधशास्त्रमेव प्रमाणं, कथं तत्प्रमाणं? प्रत्यवायं विना निवृत्त्यनुपपत्तेरिति चेन्न; [1]अधिकारावगमन एव निवृत्तेरुपपन्नत्वात्। नन्वधिकारो न श्रूयते। सत्यमर्थात् भविष्यति द्रव्यार्जननियमवत्। यो हि यत्र प्रवृत्तः सः ततः निवर्तयितव्यः, नान्यः इत्यर्थादेव प्रवृत्तिमानधिकारी लब्ध इति साधूक्तं—**सर्वत्र प्रतिषेधशास्त्रे प्रतिषिध्यमानक्रियाकर्तुरेवाधिकार इति।** इहापि च प्रतिषिध्यमानक्रियाकर्तुः अनृतवदनप्रतिषेधः अन्यस्य प्रतिषेधानुपपत्तेरित्यर्थः। **अतः पूर्वप्राप्तस्यैव** प्रतिषेधस्या**यमनुवादः**। ननु च क्रत्वर्थतयैवानृतवदनप्राप्तिरिति प्रतिषेधोऽपि तदर्थ एव युक्तः। न हि अन्यार्थे प्रवृत्तोऽन्यार्थे नियोक्तुं शक्यत इति तत्राह—**विद्यते च प्राप्तिरर्थतः।** अनृतवदनस्य अर्थतः प्राप्तिर्विद्यत एव। क्रत्वर्थतयापि पुरुषस्य **प्राप्तिमात्रतया च** पुरुषस्य **प्रतिषेधोपपत्तेः न प्रकरणार्थता।** यदि च क्रत्वर्थायामेव प्राप्तौ प्रतिषेध उपपद्यते न पुरुषार्थायां तदा क्रत्वर्थप्राप्तिप्रतिषेधः[2] क्रत्वर्थः स्यात्। न चैतदस्ति प्राप्तिमात्रादपि प्रतिषेधोपपत्तेः। **ननु चायमनुवादः कस्य विधेः शेषः?** अयमाशयः। विधिपरतया प्रामाण्यमुक्तम्। तत्र विध्युद्देशस्य कार्यान्वयितया विधिपरत्वम्। अर्थवादपदानां तु स्तुतिपरतया प्रतीत्यन्वयितया। अनुवादस्तु न साक्षाद्विधिपरः। तेन वक्तव्यमेतत् कस्य विधेः शेष इति अन्यथा विधिपरत्वाभावात्। उत्तरं—**न कस्यचिदिति ब्रूमः।** विध्यन्तरेणैकवाक्यत्वाभावात् न कस्यचिदपि विधेरयमनुवादः शेषः। यदि विध्यन्तरं नानुप्रविशति निवीतवत् तर्हि कथमनुवादः। उत्तरं—**प्राप्तिरनुवादत्वे हेतुः नार्थवादता।** यदि हि अर्थवादता

---

(1) G. अनधि (2) R. प्रतिषेधात्।

एकवाक्यत्वेन हि अर्थवादो भवति न प्राप्तिमपेक्षते यथा जर्तिलयवाग्वा जुहुयादिति । तस्मान्नानुवादः । ननु चेदं श्रुतिवाक्यं तस्याः स्मृतेर्मूलं भविष्यति । न भवितुमर्हति । अत्र हि श्रूयमाणस्य प्रकरणार्थताऽवसीयते न पुरुषार्थता अनुवादपक्षे पुनः पुरुषार्थतयैव प्राप्तेः सिद्धा पुरुषार्थता । ननु च

अनुवादत्वे हेतुः स्यात् तदा विध्यन्तरानुप्रवेशं विनाऽर्थवादानुपपत्तेः अनुवादो विध्यन्तरशेषः स्यात् । किन्तु प्राप्तिरनुवादत्वे हेतुः नार्थवादता । यद्ययं प्राप्तार्थ एव किमिति तर्हि निवीतवदेवार्थवादो न भवति । तत्राह—**एकवाक्यत्वेन हि अर्थवादो भवति न प्राप्तिमपेक्षते, यथा 'जर्तिलयवाग्वा वा जुहुयात्' इति ।** जर्तिलयवागुहोमो हि यद्यपि न प्राप्तः तथापि 'पयसाग्निहोत्रं जुहोति' इत्यनेनैकवाक्यत्वात् अर्थवादत्वेन व्याख्यायते । तेन अनुवादः प्राप्तिमात्रापेक्षः । अर्थवादस्तु एकवाक्यतामात्रापेक्ष इति विवेकः । अनूद्यमानविधिपरतया विधिसंस्पृष्टताऽनुवादानामिति न किञ्चिदपि हीनम् । तस्मादनुवादः । **ननु चेदं श्रुतिवाक्यं तस्याः स्मृतेर्मूलं भविष्यति ।** यदि श्रुतिवाक्यस्य स्मार्तवाक्यस्य च समानार्थत्वेनानुवादोऽयमुच्यते तर्हि तस्याः स्मृतेः मूलमपेक्षमाणायाः इदमेव श्रुतिवाक्यं मूलं भविष्यति इति कथमनुवादता । उत्तरं—**न भवितुमर्हति अत्र हि श्रूयमाणस्यार्थस्य प्रकरणार्थतावसीयते न पुरुषार्थत्वम् । अनुवादपक्षे पुनः पुरुषार्थतयैव प्राप्तेः सिद्धा पुरुषार्थता** भवति । अस्यार्थः—यद्येतद्वाक्यं मूलं भवेत् तदा अनृतवदनप्रवृत्तपुरुषसंबन्धिन्यपि प्रतिषेधे अधिकारी कल्पयितव्यः स्यात् । ततश्च क्लृप्ताधिकारेणाधिकारविधिनैव गृह्येत विधिनैव सन्निधानात् । ततश्च प्रकरणार्थता प्रकृताधिकारनियोगार्थता अस्य प्रतिषेधस्य । स्मृतेश्च पुरुषार्थता भवतीति न तस्याः प्रतिषेधविधिर्मूलतां गन्तुमर्हतीति । अनुवादे तु पुरुषसंबन्धिनि प्रतिषेधेऽवगते[1] तस्य क्लृप्ताधिकारत्वात अधिकारान्तरकल्पनावकाशो नास्ति । तेन प्रकरणेन न गृह्यते । अधिकारकल्पनायां हि प्रस्तुतायां क्लृप्ताधिकारः प्रकरणविधिर्गृह्णाति न स्वबललब्धाधिकारे पुरुषार्थतयैव प्राप्ते प्रतिषेधे स्वतन्त्राधिकारार्थतयैवेत्यर्थः । **ननु च**

---

(1) G. वगम्यते

क्रत्वर्थतयावगम्यमानस्य कथं पुरुषार्थतयाऽनुवादो युक्तः कल्पयितुम्। उच्यते—क्रतुरपि हि पुरुषार्थ एव। अतस्तत्संबन्धितयापि पुरुषस्येच्छातः प्राप्नोत्येवानृतवदनमिति न दोषः तत्संबन्धावगतेः। उपनयोत्तरकालभावित्वाच्च क्रतूनां सिद्धोऽनुवादः।

[1]विधिर्वा संयोगान्तरात् ॥ ३-४-१३ ॥

अत्राभिधीयते। आयुष्मतैवोक्तं न स्मृतिवाक्यस्येदं मूलतां प्रतिपद्यत इति। एवं चेत् त्वयैवेदं संयोगान्तरमभ्युपगतं संयोगा-

---

क्रत्वर्थतयैवावगम्यमानस्य कथं पुरुषार्थतयाऽनुवादो युक्तः कल्पयितुम्। अस्यार्थः—त्वया एतदुक्तं यदि मूलभूतमिदं भवेत् ततः क्रत्वर्थं भवतीति। एवं च वदता क्रत्वर्थानृतवदनप्रवृत्तिर्निषिध्यत इत्युक्तम्। अन्यथा कथं नाम विधायकत्वे क्रत्वर्थता भवेत्। यदा चैवं तदा कथं क्रत्वर्थप्रवृत्तिप्रतिषेधोऽयं पुरुषार्थतयानुवदितुं शक्यत इति। उच्यते—क्रतुरपि हि पुरुषार्थ एव। अतस्तत्संबन्धितयापि पुरुषस्येच्छातः प्राप्नोत्येवानृतवदनमित्यदोषः तत्संबन्धावगतेरिति। अस्यार्थः—क्रत्वर्था या पुरुषप्रवृत्तिः सापि पुरुषसंबन्धिनी भवत्येव। तेन तत्प्रतिषेधोपि पुरुषार्थो युक्त एव। यस्मात् क्रतुरपि पुरुषार्थ एव। अतः क्रतुसंपत्त्यर्थमपि पुरुषस्यैवानृतवदनं रागतः प्राप्नोत्येवेत्यदोषः क्रतुसंबन्धावगतेः। तेनायमर्थो भवति दर्शपूर्णमासनिर्वृत्त्यर्थमनृतं न वदेदिति। सर्वं च पुरुषार्थमनृतवदनं प्रतिषिद्धमिति। अतश्चानुवादोपपत्तिः। उपनयनोत्तरकालभावित्वाच्च क्रतूनां सिद्धोऽनुवादः। यदि क्रतवः उपनयनोत्तरकाला न भवेयुः तदा स्मार्तानामपि पदार्थानां वैदिकत्वात् उपनयनोत्तरकालभावित्वाच्च वैदिकेषु पदार्थेषु अधिकारस्य प्रागुपनयनात् प्रतिषेधाभावात् नायमनुवादः स्यात्। तेन क्रतवः उपनयनोत्तरकालभाविन इति सिद्धोऽनुवादः।

विधिर्वा संयोगान्तरात्। अत्राभिधीयते—आयुष्मतैवोक्तं न स्मृतिवाक्यस्येदं मूलतां प्रतिपद्यत इति। एवं चेत् त्वयैवेदं संयोगान्तरमुक्तम्। संयोगा-

---

(1) P. 911

न्तरत्वे च नानुवादः शक्यते वक्तुम्। ननु च प्रतिषेधे प्रतिषिध्यमानक्रियाकर्तुरेवाधिकार इत्युक्तम्। सत्यमुक्तम्। न तु तत् प्रकरणे शक्यते वक्तुम्। किमिति? पदार्थमात्र एव प्रतिषेधोपपत्तेः लौकिकेषु पुनः पुरुषेच्छात एव प्रवृत्तिर्विषयतां प्रतिपद्यते प्रतिषेधस्येति तत्क्रियाकर्तुरेवाधिकारो युक्तः। इह पुनः क्रत्वर्थतयैव प्रवृत्तिर्गम्यते पदार्थस्येति न तस्य कर्तुरधिकारः शक्यते वक्तुम्। ननु च कर्तैवाख्यातेषु प्रधानतयावगम्यते।

न्तरत्वे च नानुवादः शक्यते वक्तुम्। अस्यार्थः— स्वतस्तावदिदं वाक्यं प्रकरणाङ्गभूतप्रतिषेधसमर्पकम्। अत एव च स्मृतेर्नमूलतां गतम्। एवं चेदन्तरङ्गक्रत्वर्थतां परित्यज्य न वाक्यान्तरालोचनया अनूद्यतया प्रतिषेधोऽवतिष्ठते। **ननु च प्रतिषेधे सर्वत्र प्रतिषिध्यमानक्रियाकर्तुरेवाधिकार इत्युक्तम्।** अस्यार्थः— अनधिकारं हि सोधिकारमनुप्रविशति। साधिकारश्चायं प्रतिषेधः प्रतिषिध्यमानक्रियाकर्तुरेवाधिकारावगमात्। **सत्यमुक्तं न तु तत्प्रकरणे शक्यते वक्तुं,** निषिध्यमानक्रियाकर्ता हि नाधिकारितया श्रूयते। किं तर्हि? अर्थात् कल्प्यते। न च क्लृप्तेऽधिकारे संभवति सन्निहिते अधिकारान्तरकल्पनावकल्पते। **किमिति** प्रकरणेपि निषिध्यमानक्रियाकर्तुरेवाधिकारो न भवति? उत्तरं—**पदार्थमात्र एव प्रतिषेधोपपत्तेः।** अनृतवदने **पदार्थमात्र** एव इच्छाधीनप्रवृत्तिनिरपेक्षेपि **प्रतिषेधोपपत्तेः।** एतदुक्तं भवति— प्रकरणे हि प्रकरणसंबन्धेव प्रवृत्तिः प्रतीयते। ततश्च तन्मुखेनाधिकारानुप्रवेशे क्लृप्ते नार्थादधिकारान्तरकल्पनोपपद्यते। **लौकिकेषु पुनः पुरुषेच्छात एव प्रवृत्तिर्विषयतां प्रतिषेधस्य प्रतिपद्यत इति तत्क्रियाकर्तुरेवाधिकारो युक्तः। इह पुनः क्रत्वर्थतयैव प्रवृत्तिरवगम्यते पदार्थस्येति न तस्य कर्तुरधिकारः शक्यते वक्तुं** इति। **ननु च कर्तैवाख्यातेषु प्रधानतयाऽवगम्यते।** अनेनेदमाह स्ववाक्य एव विषयनियोज्यान्वितनियोगप्रतिपादनात् नाधिकारानुप्रवेशो युक्त इति। तथा हि— नञर्थः विधिविषयः, अनृतवदनकर्ता चाधिकारी, कर्तृवाचिताशङ्का चाख्यातानां पाणिनिप्रभृतीनां यथाश्रुतवचनबोधननिबन्धना। नन्वेवं तर्हि प्रयाजादीनामप्यङ्गता न स्यात्। तेष्वपि कर्तृश्रवणात्

नियोगाभेदात्तु प्रयाजादीनामङ्गत्वमवगम्यते। सर्वेषामेकफलानुबन्धत्वात्। संस्कारकर्मणामपि क्रत्वर्थस्य संस्कार्यतयाऽवगतेः युक्तैवाङ्गता। प्रतिषेधे पुनः प्रतिषेध्यस्य अक्रत्वर्थत्वात् आख्यातेन च कर्त्रभिधानात् कर्तुरेव प्रतीयते। न च तत्संबन्धावगतिर्विरुद्धा। क्रतोरपि पुरुषार्थत्वात् उपनयनोत्तरकालभावित्वाच्च तदर्थप्रतिपत्तेः सिद्धोऽनुवाद इत्युक्तम्।

स्वतन्त्राधिकारप्रसक्तेरित्यत्राह—**नियोगाभेदात्तु प्रयाजादीनामङ्गत्वमवगम्यते। सर्वेषामेकफलानुबन्धत्वात्।** अस्यार्थः—प्रयाजादिषु कर्तैव केवलं श्रूयते न तद्विशेषणम्। प्रयाजादय एव यदि कर्तृविशेषणं न तर्हि विषयः। अथ विषयः न तर्हि कर्ता विशेष्यते। ततश्च कथमविशिष्टोऽधिकारीभवेत्? तस्मात्तेषां पृथगधिकारनियोगाभावात् एकनियोगानुप्रवेशात् अङ्गत्वसिद्धिः। **संस्कारकर्मणामपि क्रत्वर्थस्य संस्कार्यतयाऽवगतेः युक्तैवाङ्गता।** तेष्वपि विषयनियोज्यविशेषान्वयानवगतेः न स्वतन्त्राधिकारापत्तिः। संस्कार्यद्रव्यादिद्वारेण क्रतुशेषत्वाविरोधः। **प्रतिषेधे पुनः प्रतिषेध्यस्य अक्रत्वर्थत्वात् आख्यातेन च कर्तुरभिधानात् कर्तुरेवाधिकारः प्रतीयते।** अस्यार्थः—यद्यपि किल नानृतं वदेदित्यनृतवदनमात्रं शब्दादवगम्यते तथापि यदि वाक्येऽधिकारो न श्रूयते तदा प्रकरणगतमनृतवदनं प्रतीयते। यदा पुनः स्ववाक्य एवाधिकारी विषयश्च लब्धः तदा अनृतवदनमपि स्वतन्त्रमेव प्रतीयते। तेनाख्यातेन कर्तुरभिधानात् प्रतिषेधस्य चाक्रत्वर्थत्वात् कर्तुरेवाधिकारः अधिकारान्तरानुप्रवेशे कारणाभावात्। स्ववाक्ये चाधिकारश्रवणात्।

एवं तावत् विधिरयं पुरुषार्थश्चेति दर्शितम्। संप्रति अभ्युपगम्यापि क्रत्वर्थानृतवदनप्रतीतिं अनुवादोऽयमिमि दर्शयति—**न च तत्संबन्धावगतिः** क्रत्वर्थसंबन्धानृतवदनावगतिः स्वतन्त्राधिकारेपि **विरुद्धा। क्रतोरपि पुरुषार्थत्वात् उपनयनोत्तरकालभावित्वाच्च तदर्थप्रवृत्तेः सिद्धोऽनुवाद इत्युक्तम्।** एतदुक्तं भवति—क्रत्वर्थानृतवदनप्रतिषेधोऽपि स्वतन्त्राधिकारपुरुषार्थसर्वानृतवदनप्रतिषेधस्यैव स्मार्तस्यानुवाद इति।

अत्रोच्यते—स्यादेतदेवं यद्याख्यातानां कर्ताऽभिधेयः स्यात्, न पुनराख्यातानां कर्त्रभिधानशक्तिः शक्यते कल्पयितुम्। क्रियाभिधानादेव सर्वकारकावगतेः। कथं तर्हि भगवतः पाणिनेः सूत्रं लः कर्मणि च भावे चाकर्मकभ्यः चकारात् कर्तरि चेति। सङ्ख्याविधानार्थमेतदिति प्रदर्शितम्। सङ्ख्याविशेषविधानाश्रयं च यक् शबिति च। अन्यकारकसङ्ख्याभिधानमिदानीं किमिति न भवति? तुल्येऽवगम्यमानत्वे। न लोकः पर्यनुयोक्तुं शक्यते। दुर्जयो हि महाजनः; लौकिकप्रयोगमूलं चेदं शास्त्रं भगवतः पाणिनेः

अत्रोच्यते—स्यादेतदेवं यद्याख्यातानां कर्ताऽभिधेयः स्यात् न त्वाख्यातानां कर्त्रभिधानशक्तिः शक्यते कल्पयितुम्। क्रियाभिधानादेव सर्वकारकावगतेः। अस्यार्थः—तत्र हि शब्दस्य शक्तिः कल्प्यते यस्य नान्यतोऽवगतिः। सर्वाणि च कारकाणि क्रिययैवाक्षिप्यन्ते तैर्विना क्रियानुपपत्तेः। कथं तर्हि पाणिनेः सूत्रं लः कर्मणि च भावे चाकर्मकेभ्य इति?। तथा कथमियं वृत्तिः चकारात् कर्तरि चेति। एवं वदतोः सूत्रवृत्तिकारयोः कारकाभिधायिनो लकारा इति भावो लक्ष्यते। परिहरति—सङ्ख्याविधानार्थमेतदिति दर्शितम्। कर्मसङ्ख्या कर्तृसङ्ख्या च वाच्यत्वेन विधीयेते न कर्ता कर्म चेत्यर्थः[1]। कर्मकर्तृभ्यां तु तत्सङ्ख्या लक्ष्यते। कथं तर्हि "कर्मवाचिनि सार्वधातुके यक्" 'कर्तरि शप्' इति वृत्तिकाराः पठन्ति तत्राह—सङ्ख्याविशेषविधानाश्रयं च यक् शब् इति च। अत्रापि कर्मकर्तृसङ्ख्याविशेषाभिधानमाश्रित्य यक् शप् इति चानुशासनम्। तेनात्रापि न कारकाभिधानमाख्यातानामिति। यदि क्रियाक्षिप्तकर्मकर्तृसङ्ख्याऽभिधीयते तदा—अन्यकारकसङ्ख्याभिधानं किमिति न भवति? तुल्ये गम्यमानत्वे। करणादिसङ्ख्यापि किमिति नाख्यातेनोच्यत इत्यर्थः। परिहरति—न लोकः पर्यनुयोक्तुं शक्यते। कस्मादित्याह—दुर्जयो हि महाजनः। अस्यार्थः—किं वयं कुर्मः कर्मकर्तृसङ्ख्यामेव लोको यदि वदेत न करणादिसङ्ख्याम्। ननु मानाम लोको वदतु पाणिनिः किमिति न स्मरति तत्राह—लौकिकप्रयोगमूलं चेदं शास्त्रं भगवतः पाणिनेः

---

(1) G. कर्मकर्तृसङ्ख्या विशेषविधानार्थं वाच्यत्वेन विधीयते कर्तेत्यर्थः

प्रयुक्तस्य हि नियममाचष्टे। नाप्रयुक्तस्याभिधानम्। तस्माद-पर्यनुयोगोऽयम्। अतः क्रत्वर्थपदार्थमात्रप्रवृत्त्याश्रयमेवेदं प्रतिषेध-शास्त्रम्। ननु च प्रतिषेध्यगता प्रवृत्तिः न क्रत्वर्थेत्युक्तम्। अचो-दितत्वात्। नैव तादर्थ्येन चोदितत्वं संबन्धहेतुः उपकारकतयापि संबन्धितोपपद्यत एव। संबन्धिनि च विधिः क्रत्वर्थो भवतीत्युक्तं पयो व्रतं ब्राह्मणस्येत्येवमादिषु। ननु चोपकारकविषयतया प्रतिषेधस्य क्रत्वर्थपुरुषार्थयोर्न कश्चिद्विशेषः। यथास्ति विशेष-स्तथोक्तम्।

कस्मादित्याह—प्रयुक्तस्य हि नियममाचष्टे नाप्रयुक्तस्याभिधानम्। तस्मादपर्यनुयो-गोऽयम्। उपसंहरति—अतः क्रत्वर्थपदार्थमात्रप्रवृत्त्याश्रयमेवेदं प्रतिषेधशास्त्रम्। क्रत्वर्थतया पदार्थमात्रे अनृतवदनेऽधिकारविधिवाक्यार्थसंबन्धेन या प्रवृत्तिः तदाश्रयमेवेदं प्रतिषेध-शास्त्रम्। ननु च प्रतिषेध्यगता प्रवृत्तिः न क्रत्वर्थेत्युक्तम्। अचोदितत्वात्। न हि क्रत्वर्थतयाऽनृतवदनं चोदितं; अचोदितं च नाङ्गमिति नानृतवदने क्रत्वर्था प्रवृत्तिः। उत्तरं—नैव तादर्थ्येन चोदितत्वं संबन्धहेतुः उपकारकतयापि संबन्धिता उपपद्यत एव। यद्यपि तादर्थ्येन चोदना नास्ति तथाप्युपकारकतया संबन्धोऽनृतवदनस्य क्रतुना सहास्त्येव। संबन्धिनि च विधिः क्रत्वर्थो भवतीत्युक्तं पयो व्रतं ब्राह्मणस्येत्येवमादिषु। यद्यपि भोजनं क्रत्वर्थतया न विहितं तथापि तस्य क्रतोरुपकारकत्वेन तदाश्रितं पयो भवत्येव क्रत्वर्थं एवं उपकारकानृतवदनप्रतिषेधोऽपि क्रत्वर्थो भविष्यतीति। ननु चोपकारकविषयतया प्रतिषेधस्य क्रत्वर्थपुरुषार्थयोर्न कश्चिद्विशेषः। अस्यार्थः—यदि तावदङ्गभूतमनृतवदनं भवेत् तदा पुरुषार्थेन प्रतिषेधेन प्रतिषेद्धुमशक्यत्वात् प्रयोजनवानेव क्रत्वर्थः प्रतिषेधो भवेत् विकल्पार्थः। यदा अर्थप्राप्तस्य प्रतिषेधः तदा पुरुषार्थेन प्रतिषेधेन प्रतिषेधसिद्धेः किं क्रत्वर्थेन प्रतिषेधेनेति। उत्तरं—यथास्ति विशेषः तथोक्तम्। क्रत्वर्थे प्रतिषेधे तदति-क्रमे क्रतोर्वैगुण्यात् तन्निवृत्तये श्रौतं प्रायश्चित्तम्। पुरुषार्थे च प्रतिषेधे तदतिक्रमे पुरुषस्य वैगुण्यात् तदपनयाय स्मार्तं प्रायश्चित्तमिति विशेषः।

॥ ५ ॥ [1]अहीनवत्पुरुषधर्मस्तदर्थत्वात् ॥ ३-४-१४ ॥

कः पुनः निवीतं मनुष्याणामित्यनेन विशेषः जञ्जभ्यमानस्य ? अयमस्ति विशेषः नार्थवादात् परिहारः संभवति। अवाक्यशेषत्वात्। नाप्यनुवादो नानृतं वदेदितिवत्। नाप्यत्रार्थप्राप्तस्य विषयत्वसंभवो नानृतं वदेदितिवत्। न हि जञ्जभ्यमानता कदाचिदपि प्राप्नोति अनृतवदनवत्। तस्माज्जञ्जभ्यमानमात्रस्य मन्त्रविधानमिदं न प्रकरणेऽवस्थापयितुं शक्यते।

अहीनवत्पुरुषधर्मस्तदर्थत्वात्। कः पुनः निवीतं मनुष्याणामित्यनेन विशेषः जञ्जभ्यमानस्येति ? अनेन पूर्वपक्षमाक्षिपति। 'जञ्जभ्यमानो ब्रूयान्मयिदक्षक्रतू' इति यद्यपि जञ्जभ्यमानसंबन्धितया मन्त्रवचनं श्रूयते तथापि निवीतं मनुष्याणामितिवत् किमिति न प्रकरण एव निविशते निवीतमपि। निवीतं मनुष्याणामिति मनुष्यसंबन्धितया श्रूयते अथ च प्रकरण एव निविशते तथेदमपि कस्मान्न भवतीत्यर्थः। अयमस्ति विशेषः नार्थवादात् परिहारः संभवति अवाक्यशेषत्वात्। यथा 'निवीतं मनुष्याणां' इति उपव्ययत इत्यस्य वाक्यशेषत्वादर्थवादतया प्रकरण एवान्वीयते न तथा जञ्जभ्यमानो ब्रूयादित्यस्यान्वयः विध्यन्तरेणैकवाक्यत्वाभावात्। ननु च वाक्यशेषत्वाभावात् माभूदर्थवादः अनुवादस्तु भवतु पूर्वाधिकरणपूर्वपक्षे नानृतं वदेदितिवत् तत्राह—नाप्यनुवादो नानृतं वदेदितिवत् जञ्जभ्यमानसंबन्धितया मन्त्रवचनस्य अन्यतोऽप्राप्तेः। नाप्यर्थप्राप्तस्य विषयत्वसंभवः नानृतं वदेत् इतिवत्। यदि क्रतावेवार्थप्राप्ता जञ्जभ्यमानता मन्त्रविधेर्विषयो भवेत् यथा नानृतं वदेदित्यस्यार्थप्राप्तमनृतवदनं तदा क्रतुसंबन्धिजृम्भणमुखेन क्रतुसंबन्धावगतेः क्रत्वर्थो मन्त्रविधिः स्यात्। न चैतदस्ति। कुतः ? न हि जञ्जभ्यमानता कदाचिदपि क्रत्वर्थतया प्राप्नोति अनृतवदनवत्। तस्मात् जञ्जभ्यमानस्य मन्त्रविधानमिदं न प्रकरणेऽवस्थापयितुं शक्यते। स्ववाक्य एवानुपादेयजृम्भणविशिष्टस्याधिकारिणो मन्त्रवचनस्य

---

(1) P. 944

ननु चैवं सति फलकल्पना स्यात्। भवतु वचनात्, को दोषः? अतो वाक्यात् प्रकरणबाधः सिद्धो यथा द्वादशाहीनस्येति। अत्राभिधीयते—न फलकल्पनामर्हत्येतद्वचनम्। कुतः? वाक्यं हि पदार्थसंबन्धमात्रे प्रभवति न कार्ये। कार्यं हि नियोगसमधिगम्यमेव प्रकृतश्चायं दार्शपौर्णमासिको नियोगः। सर्वमेवेदं विनियोगकारणम्। न च कार्यान्तरकल्पना

विषयस्य च लाभे प्रकरणानुप्रवेशो कारणाभावात्। **ननु चैवं सति फलकल्पना स्यात्।** अधिकारान्तरकल्पना स्यादित्यर्थः। **भवतु वचनात्, को दोषः?** वाचनिकेऽधिकारान्तरे दोष इति। **अतो वाक्यात् प्रकरणबाधः सिद्धः यथा द्वादशोपसत्ता अहीनस्य इति।** **अत्रोच्यते न फलकल्पनामर्हत्येतद्वाक्यम्।** इदमत्राकूतम्। जञ्जभ्यमानसम्बन्धितया मन्त्रवचनं प्रतीयते। तत्र किमिदमधिकारान्तरं जञ्जभ्यमानशब्दश्चाधिकारिविशेषसमर्पको भवतु उत प्रकृत एव कर्ता जञ्जभ्यमानशब्देन च निर्दिश्यतां तस्य जृम्भणनिमित्तोत्पन्नव्यलीकप्रशमनद्वारेण मन्त्रवचनं संस्कारकमिति संशये क्लृप्ते प्रकृते कार्ये सति न कल्पनोपपद्यत इति नाधिकारान्तरकल्पना न्याय्येति जञ्जभ्यमानः संस्कार्यतयैवान्वयं यातीति। तदिदमाकूतं विवरीतुकामः पृच्छति—**कुतः।** उत्तरं—**वाक्यं हि पदार्थसंबन्धमात्रे प्रभवति न कार्ये।** वाक्यतो हि पदार्थानां संबन्धावगतिरेव, नास्ति जञ्जभ्यमानसंयोगः संस्कार्यतयापि। कर्तृभावेनैव कर्तृभूत एवानेन मन्त्रवचनेन संस्क्रियते। कुतस्तर्हि कार्यावगम इत्यत्राह—**कार्यं हि नियोगसमधिगम्यमेव।** सर्वं हि नियोगार्थं तेन नियोगार्थानुमतं यत् तत् कार्यम्। अत एव च सक्त्वादिषु विभक्तिव्यत्ययः। भवत्वेवं नियोगतः कार्यम् तथापि किमित्याह—**प्रकृतश्चायं दार्शपूर्णमासिको नियोगः।** तेन प्रकृतेन ग्रहणे सति तद्ग्रहणानुगुणं कार्यं कल्पयितव्यमिति प्रकृतकर्तृसंस्कारक एवायम्। यदि प्रकृतेनापि नियोगेन न गृह्येत तदा न पदार्थमात्रसंबन्धावसाय्येव वाक्यं भवेत् किन्तु कार्यावसाय्येव। **सर्वमेवेदं विनियोगकारणम्।** ननु भवतु प्रकृतो नियोगः तथापि स एव कार्यमिति नास्ति प्रमाणं, येन तद्बलेन तदनुगुणं कार्यं कल्प्येत इत्यत आह—**न च कार्यान्तरकल्पना**

क्लृप्ते सति संभवति इति प्रकरण एव निवेशः। ननु च जञ्जभ्यमानता न क्रत्वर्थतयाऽनृतवदनवत संभवति। माभूत् जञ्जभ्यमानता क्रत्वर्था। कर्तुस्तु क्रत्वर्थता प्रकरणसंबन्धे हेतुर्भविष्यति। तस्मात् क्रतोः कर्तुः धर्मोऽयमिति सिद्धम्। अहीने पुनः कार्यत्वाद्युक्तः उत्कर्षः।

॥ ६ ॥ [1]शंयौ च सर्वपरीदानात ॥ ३-४-१७ ॥

शंयौ पुनः शतेन यातयादिति फलश्रुतेः न प्रकरणकल्पना न्याय्या। स्ववाक्यस्था हि कार्यावगतिः बलीयसी

क्लृप्ते सति संभवति इति प्रकरण एव निवेशः। ननु च जञ्जभ्यमानता न क्रत्वर्थतयाऽनृतवदनवत् संभवतीत्युक्तम्। तेन कथं क्रत्वनुप्रवेशः। उत्तरं—माभूत् जञ्जभ्यमानता क्रत्वर्था। कर्तुस्तु क्रत्वर्थता प्रकरणसंबन्धहेतुर्भविष्यति। तस्मात् क्रतोः कर्तुः धर्मोऽयमिति सिद्धम्। अहीने पुनः कार्यत्वात् युक्तः उत्कर्षः। अहीने तत्संबन्धित्वेन योऽधिकारनियोगस्संबन्धी प्रतीयते स कार्यभूत इति स्ववाक्ये कार्यावगमाद्युक्त उत्कर्षः द्वादशोपसत्तायाः। इह तु जञ्जभ्यमानमात्रसम्बन्धेन न कार्यसंबन्धोऽवगम्यत इति कल्प्ये कार्ये क्लृप्ताश्रयणं न्याय्यमिति विशेषः।

शंयौ च सर्वपरिदानात्। 'न ब्राह्मणायावगुरेत्' इति प्रकरण एव प्रतिषेधो निविशते प्रकरणाधीतत्वात्, अर्थाच्च क्रतुसंबन्धितया अप्राप्तेरनृतवदनवदिति पूर्वः पक्षः। सिद्धान्तमाह—शंयौ पुनः शतेन यातयादिति फलश्रुतेर्न प्रकरणसंबन्धकल्पना न्याय्या स्ववाक्यस्था हि कार्यावगतिर्बलीयसी। यदि स्ववाक्ये फलं नावगम्येत तदा प्रकृताविकारानुप्रवेशेनानुष्ठानसिद्धेः कार्यान्तरं न कल्प्येत, अङ्गमेव स्यात्। इह तु स्ववाक्ये फलमवगम्यते शतयातनादिपरिहारः। स्ववाक्यस्था हि कार्यावगतिः श्रेयसी, अन्तरङ्गत्वात्

(1) P. 949

तस्मात् पुरुषमात्रधर्मोऽयं न ब्राह्मणायावगुरेदितिवत्। ननु जञ्जभ्यमानेपि 'प्राणापानावेवात्मन् धत्त' इति फलश्रवणमस्त्येव। न। धत्त इति वर्तमानोपदेशात् न साध्यतयावगम्यते। इह पुनः यातयात इति भविष्यदर्थतां लिङ्वगमयतीति विशेषः। तस्मान्मूलस्मृतेः प्राप्तस्यानुवाद इति।

तस्मात् पुरुषमात्रधर्मोऽयं 'न ब्राह्मणायावगुरेत्' इति। **ननु च जञ्जभ्यमानेपि 'प्राणापानावेवात्मन्धत्ते' इति फलश्रवणमस्त्येव।** परिहरति—**न, धत्त इति वर्तमानोपदेशात् साध्यतया नावगम्यते** फलम्। अतस्तदधिकारिविशेषणं न भवति वर्तमानत्वादेव। यत्खलु भाविफलं तन्नियोगस्य साध्यत्वयोग्यतया अधिकारिविशेषणीभूतं फलतयाऽन्वेति न पुनरनियोगसाध्यमिदमिति दर्शितम्। **इह पुनः** शंयौ **भविष्यदर्थतां यातयादिति लिङ्वगमयति** यातयतेर्धातोः। तेन यातना भविष्यतीति प्रतीयते। अतस्तत्परिहारोऽपि भविष्यतीति विशेषः। लिङर्थतया लिङ्शब्देन पञ्चमलकारोऽभिधीयते पञ्चमलकारान्तरस्त्वयं यातयादिति शब्दः। एतत्त्वत्र वक्तव्यं—कथमत्र शतयातनायाः अपगोरणस्य च साध्यसाधनभावोऽवगम्यते। कथं च अपगोरणं क्षणिकं कालान्तरे यातनाहेतुर्भवतीति। तदुच्यते शम्युमधिकृत्यैतदुच्यते यो ब्राह्मणायावगुरेत तं शतेन यातयादिति। तत्र चेदमवगम्यते ब्राह्मणापगोरणं निमित्तं शतयातना च नैमित्तिकी इति। न च प्रत्यक्षविरोधः अनन्तरभावित्वेनाप्रतीतेः। न च क्रियाफलतया यातना प्रतीयते येनानन्तरभाविनी भवेत्। तत्र प्रतीतनिमित्तनैमित्तिकभावानुरोधेन किञ्चिदवान्तरकार्यं कल्प्यते यत्कृत्वा अवगोरणेन यातना निष्पाद्यते। "न ब्राह्मणायावगुरेत्" इति निषेधानुगुणतया चायमर्थः प्रतीयत इति। यातना नाविवक्षिता शक्यते आश्रयितुम्। अधिकारिविशेषणता त्वत्र निषिध्यमानक्रियाकर्तृताया एव। यातनापरिहारस्तु निषेधविधिविषयीभूतनञभिहितावगोरणनिवृत्तिविशेषणतया [1]विषयांशानुप्रवेशात् न नियोज्यविशेषणम्। [2]अनियोगफलत्वात्। अवगोरणेन हि यातनायां [3]साध्यायां तन्निवृत्तौ यातनापरिहारो भवत्येव नियोगानपेक्ष इति विषयफलमेवेदं न

---

(1) G. विषयाङ्गानु (2) G. सन्नियोग (3) G. स्वाध्यायान्तरनिवृत्तौ

|| ७ || प्रागपरोधान्मलवद्वाससः[1] || ३-४-१८ ||

मलवद्वाससा सह संवादप्रतिषेधे सन्देहः किं क्रत्वर्थः संवादः उत पुरुषार्थ इति । किं प्राप्तं ? नानृतं वदेदितिवत् क्रतौ संभवात् क्रत्वर्थ इति प्राप्ते । उच्यते—न प्राप्तत्वात् । क्रत्वर्थतया हि "तामपरुध्य यजेत" । इति प्राप्त एवायमसंवादः । तस्मात् पुरुषार्थः वाक्यं च प्रकरणाद्बलीय इत्युक्तमेव ।

नियोगफलमिति मन्तव्यम् । अत एव चोक्तं सर्वत्र प्रतिषेधशास्त्रे निषिध्यमानक्रियाकर्तुरेवाधिकार इति । एवं च विषयफलत एवानुष्ठानलब्धेः नाधिकारानुप्रवेश इति पुरुषधर्म एवावगोरणप्रतिषेधः ।

प्रागपरोधान्मलवद्वाससः । अत्र भाष्यकारेण सन्देहः कृतः—किं मलवद्वाससा सह दर्शपूर्णमासाङ्गस्य संवादस्य प्रतिषेधः उत पुरुषस्य सर्वत्र प्रतिषेधविधिरिति । स चायुक्तः अप्रतिपक्षत्वाद्वचनव्यक्तेः । एवं हि वक्तुमुचितं—किं दर्शपूर्णमासाङ्गस्य संवादस्य प्रतिषेधः उत संवादमात्रस्येति । यदि वा प्रतिषेधः किं क्रत्वर्थः उत पुरुषार्थ इति इमां भाष्येऽनुपपत्तिं परिहरति—**मलवद्वाससा सह संवादप्रतिषेधे** सन्देहः **क्रत्वर्थसंवादः** प्रतिषिध्यते **उत पुरुषार्थ** इति । भाष्ये तु पुरुषार्थसंवादप्रतिषेधपक्षस्य फलमिदं कीर्तितम् पुरुषस्य विधिरिति । **किं प्राप्तं ? क्रतौ** संवादस्य "पत्नि पत्न्येष ते लोकः" इत्येवंविधस्य **संभवात्** क्रत्वर्थः संवादः प्रतिषिध्यते '**नानृतं वदेत् इतिवत्** । यथा क्रत्वर्थानृतवदनं प्रतिषिध्यते तथा क्रत्वर्थसंवादः प्रतिषिध्यते इति **प्राप्ते** । **उच्यते** । **न** क्रत्वर्थस्यायं प्रतिषेधः **प्राप्तत्वात्** क्रतावसंवादस्य । तेन क्रत्वर्थसंवादाभावात् पुरुषार्थसंवादप्रतिषेध एवायं पुरुषार्थः । **क्रत्वर्थतया हि 'तामपरुध्य यजेत' इति प्राप्त एवासंवादः** । न हि अपरुद्धया सह संवादः संभवति अपरोधनं क्रतुव्यापारौदासीन्यकरणम् । **तस्मात् पुरुषार्थः** प्रतिषिध्यते प्रतिषेधोऽपि **पुरुषार्थ एव** । **वाक्यं च प्रकरणात् बलीय इत्युक्तमेव** । अत्र

---

(1) P. 951

ननु पुरुषार्थतयापि प्राप्त एवायमसंवादः "नाकल्यां नारीमभिरमयेन्न रजस्वलां' इति। अस्याः स्मृतेरिदमेव मूलं भविष्यतीति। अनुवादो वा सर्वथा तावत् क्रत्वर्थता नास्ति। ननु च संवादमात्रप्रतिषेधोऽयम्। उच्यते—'नास्या अन्नमद्यात् अभ्यञ्जनं वाव स्त्रिया अन्नं" इत्युपगमनप्रतिषेध एवायमिति।

चाधिकरणे 'न मलवद्वाससा सह संवदेत्' इति संवादमात्रप्रतिषेध एवायं इत्यङ्गीकृत्य विचारः कृतः उपगमनप्रतिषेधोऽयमिति कृत्वाचिन्तोद्घाटनम्। उपगमनप्रतिषेधाङ्गीकरणे हि पूर्वपक्षाशङ्कैव नास्ति। ऋतावुपगमनाभावात्। संवादस्तु ऋतावस्तीति तत्प्रतिषेधाशङ्कोपपद्यते। अपरोधवचनं च साक्षात्कर्तृत्वप्रतिषेधार्थम्। न पुनरसा अन्येनापि न संभाषणीयेति मत्वा पूर्वपक्षितम्। अपरोधे तु सकलयज्ञसंबन्धनिषेधात् न संभाषणीयेति राद्धान्तः। संप्रति कृत्वाचिन्तामुद्घाटितां गृहीत्वा चोदयति—**ननु च पुरुषार्थतयापि प्राप्त एवायमसंवादः 'नाकल्यां नारीमभिरमयेत् न रजस्वलाम्'** इति योऽयमुपगमनप्रतिषेधरूपो लक्षणया असंवादः प्राप्त एवेति कथं पुरुषार्थोऽपि निषेध इति। उत्तरं—**अस्याः स्मृतेरिदमेव मूलं भविष्यति**। तेन प्रागस्त्येव रागत उपगमनप्राप्तिरित्युपपन्नः प्रतिषेधः। **अनुवादो वा** तत्स्मृतिप्राप्तार्थस्य। नन्वनुवादश्चेत् ऋतावेव किमिति न भवति इत्यत्राह—**सर्वथा तावत् क्रत्वर्थता नास्ति**। पुरुषसंबन्धितया प्रतिषेधः प्रतीयमानः कथं क्रत्वर्थो भवति। क्रत्वङ्गत्वेनाविधानादुपगमनस्य। अनुवादश्चेत् किमिति पुरुषसंबन्धमतिक्रामेत् इति नास्त्यनुवादेपि क्रत्वर्थता। कृत्वाचिन्तोद्घाटनायाह—**ननु च संवादमात्रप्रतिषेधोऽयम्**। कथं स्मृतेरस्याः मूलं अनुवादो वा। **उच्यते। 'नास्या अन्नमद्यात्। अभ्यञ्जनं वै स्त्रिया अन्नम्"** इति "उपगमनं वै स्त्रिया अन्नं" इत्युपगमनप्रतिषेध एवायं सयुक्तिकं कृत्वाचिन्तोद्घाटनः उपगमनप्रतिषेधरूपसंवादप्रतिषेधवाक्यार्थो वेदेनैव व्याख्यातः इत्युपगमनप्रतिषेध एवायम्। तस्मान्मूलं वा स्मृतेः प्राप्तस्यानुवादः[वा] इति। अनुवादग्रहणं प्रौढवादः। परमार्थतस्तु स्मृतेरेव मूलमिति।

॥ ८ ॥ अप्रकरणे तु तद्धर्मस्ततो विशेषात् ॥ २८ ॥

'हिरण्यं भार्यं' इत्यनारभ्यवादात् पुरुषार्थोऽयम्। न ह्यत्र क्रतुस्सन्निहितोऽवगम्यते। तस्मात्पुरुषार्थः। ननु च प्रयोजनवतः संस्कारो, न निष्प्रयोजनस्य संस्कार्यता युक्ता द्वितीयानिर्देशाच्च हिरण्यसंस्कार एवायं युक्तः संस्कृतं क्रतोरुपकरिष्यतीति। अत्राभिधीयते—स्यादेतदेवं यदि संस्कृतस्य हिरण्यस्य कर्मार्थता उपपद्यते—न तावत् प्रकृतं कर्मास्ति। न चेह कर्मचोदना, द्रव्य-देवतासंयोगाभावात्। तस्मात् द्रव्यसंस्कारानर्थक्यात् पुरुष-धर्मोऽयम्। ननु चात्र फलं कल्पयितव्यम्? नियोगानां कार्यार्थत्वात् प्रकृतस्य कार्यस्याविद्यमानत्वात् न दोषः कल्पनायाम्।

अप्रकरणे तु तद्धर्मस्ततो विशेषात्। 'हिरण्यं भार्यं' इत्यनारभ्यवादात् पुरुषार्थोऽयं विधिः न ह्यत्र क्रतुस्सन्निहितोऽवगम्यते। तस्मात् पुरुषार्थ इति राद्धान्तमुपक्रम्य पूर्वपक्षमाह—ननु प्रयोजनवतः संस्कारो न निष्प्रयोजनस्य संस्कार्यता युक्ता। द्वितीया-निर्देशाच्च हिरण्यसंस्कार एवायं युक्तः संस्कृतं क्रतोरुपकरिष्यतीति। अस्यार्थः—द्वितीयानिर्देशादिति द्वितीयार्थतया कृत्यस्य कर्मैव द्वितीयाशब्देनोच्यते। तेन सुवर्णं भार्यं इति कर्मार्थकृत्यप्रत्ययस्य निर्देशात् हिरण्यसंस्कार एवायं धारणं नाम। न च निष्प्रयोजनः संस्कारमर्हति। तस्मात् संस्कृतं क्रतोरुपकरिष्यतीत्येवमर्थं धारणेन हिरण्यं संस्क्रियते इति क्रत्वर्थ एवायं संस्कार इति। राद्धान्तमाह—अत्राभिधीयते। स्यादेतदेवं यदि संस्कृतस्य हिरण्यस्य कर्मार्थतोपपद्यते। न त्वत्र कर्मार्थता हिरण्यस्यास्ति। तद्दर्शयति—न तावत् प्रकृतं कर्मास्ति। न चेह कर्मचोदना द्रव्यदेवतासंयोगाभावात्। तस्मात् द्रव्यसंस्कारानर्थक्यात् पुरुषधर्मोऽयमिति। ननु चात्रापि फलं कल्पयितव्यं, अधिकारिणोऽश्रवणात् अधिकारिविशेषणं कल्पयितव्यम्। उत्तरं—नियोगानां कार्यार्थत्वात् प्रकृतस्य कार्यस्य अविद्यमानत्वात् न दोषः अधिकारिकल्पनायाम्। अधिकारि-

(1) P. 952

तस्माद्धिरण्यधारणं कर्तुर्धर्मश्चोद्यत इति स्थितम्। यदि कर्तृसंस्कारत्वेन फलं कल्प्यते किमिति द्रव्यसंस्कारतया क्रतूपकारो न कल्प्यते। अयमस्ति विशेषः एकवाक्यावगतेन ह्यर्थवादेन कर्तृसम्बन्धे फलकल्पना उपपद्यते न पुनरप्रकृतेन क्रतुना अर्थविप्रकर्षात्। अयं चापरो विशेषः सर्वत्र द्रष्टव्यः कर्तृसम्बन्धे ह्यधिकारसिद्धिः अधिकृतस्य च फलकल्पना न्याय्या। न पुनः द्रव्यसम्बन्धे प्रयोजनकल्पनेति सक्तुषु दर्शितम्।

नियोगार्थत्वात परस्परपदार्थसंबन्धस्य प्रकृतस्य वा अधिकारनियोगस्याभावात् बलादधिकारान्तरकल्पना न दोषः विश्वजिद्वत्। तस्मात् हिरण्यधारणं कर्मकर्तुर्धर्मश्चोद्यते इति। पुनः पूर्वपक्षी वदति—यदि कर्तृसंस्कारत्वेन फलं कल्प्यते किमिति द्रव्यसंस्कारतयापि क्रतूपकारो न कल्प्यते तुल्यत्वात् कल्पनायाः को विशेष इति भावः। अयमस्ति विशेषः एकवाक्यावगतेन हि अर्थवादेन कर्तृसंबन्धे फलकल्पनोपपद्यते। अन्तरङ्गत्वात् न पुनरप्रकृतेन क्रतुना सह संबन्धकल्पना। अर्थविप्रकर्षात् बहिरङ्गभूतत्वात् क्रतुसंबन्धस्य। एतच्चाभ्युच्चयमात्रं अव्यापकत्वात्। इदानीं व्यापिकां मूलयुक्तिमाह—अयं चापरो विशेषः सर्वत्र द्रष्टव्यः कर्तृसंबन्धे ह्यधिकारसिद्धिः। अधिकृतस्य च फलकल्पना न्याय्या। न पुनः द्रव्यसंबन्धे प्रयोजनकल्पनेति सक्तुषु दर्शितम्।

अस्यार्थः—कर्तृत्वं हि कार्यभूतमधिकारस्य तेन कर्तृसंबन्धेऽवगते युक्ता कारणभूताधिकारसिद्धिः। न चाविशिष्टोऽधिकारी भवति इति विशेषणभूतफलकल्पनापि [1]कार्या। द्रव्यसंबन्धे तु क्रियया अवगते न द्रव्यस्य प्रयोजनकल्पना न्याय्या प्रमाणाभावात्। न च द्रव्यं प्रति क्रियायास्तादर्थ्यावगम एव प्रमाणं, निष्प्रयोजने तादर्थ्यानुपपत्तेरिति। यतस्तादर्थ्यमेव द्रव्यं प्रत्यनवगतम्। न च द्वितीयया तादर्थ्यमिति तत्र तत्रोक्तम्।

---

(1) G. न्याय्या

॥ ९ ॥ शेषोऽप्रकरणेऽविशेषात् सर्वकर्मणात् ॥ ३१ ॥

येन कर्मणेत्सेत् इति अविशेषात् सर्वकर्मार्थतेति पूर्वपक्षवादी मन्यते। ननु चानाहिताग्नेराहवनीयाभावात् नायं होमः संभवति अनाहवनीय एवायं भविष्यति प्रधानानुरोधात्। न गुणानुरोधेन प्रधानस्याङ्गत्यागो युक्तः। गुण एव हि तत्त्यागः

शेषोऽप्रकरणेऽविशेषात् सर्वकर्मणात्। 'येन कर्मणेत्सेत् तत्र जयान् जुहुयात्' इति स्थितं तावत जयाहोमाः कर्माङ्गमिति ऋद्धिसाधनकर्मसंयोगात् फलान्तराश्रवणाच्च। इदानीं सन्दिह्यते—किं कर्ममात्राङ्गं उत वैदिकस्यैवेति। कर्ममात्रशब्देनात्र स्मार्तवैदिककर्मणां ग्रहणं न कृष्यादीनाम्; तेषां अन्वयव्यतिरेकसमधिगम्याङ्गत्वात् वैदिकाङ्गानुपपत्तेः। भाष्ये तु कृष्यादिग्रहणं आशङ्कामात्रेण न परमार्थतः। अविशेषात् सर्वार्थतेति पूर्वपक्षवादी मन्यते। ननु चानाहिताग्नेराहवनीयाभावात् नायं होमः संभवति। अस्यार्थः —जयाहोमास्तावत् 'आहवनीये जुहोती'ति वचनात् आहवनीये कर्तव्याः। तत्र यदि लौकिकानां स्मार्तानां कर्मणामङ्गं स्यात् तदा तेषामनाहिताग्नेरपि संभवात् जयाहोमः प्राप्नोति। न चानाहिताग्निराहवनीये होतुं शक्नोति। न चेदं वाच्यं आहिताग्निराहवनीये होष्यति, अनाहिताग्निस्तु नेति। नित्यवद्विनियुक्ताहवनीयबाधप्रसङ्गात्। न चेदमप्युचितम् —अनाहिताग्नेरष्टकादिकर्माणि जयाहोमरहितानि भविष्यन्ति आहिताग्नेर्नेति। एकमेव नियोगं प्रति अङ्गत्वानङ्गत्वानुपपत्तेः इति वरं वैदिकानामेव त्रेतावतां कर्मणामङ्गं जयाहोम इति स्थितिः। परिहरति—अनाहवनीय एवायं भविष्यति प्रधानानुरोधात्। न गुणानुरोधेन प्रधानस्याङ्गत्यागो युक्तः गुण एव हि त्याज्यः प्रधानानुरोधेनेत्यङ्गविदो मन्यन्ते। अस्यार्थः —येन कर्मणेत्सेदिति सामान्येन श्रवणात् जयाहोमः सर्वकर्मार्थ इति स्थिते यत्र प्रधाने अष्टकादिकर्मणि अनाहिताग्नित्वादाहवनीयो न भवति तत्र किं प्रधानमस्तीति जयाहोमः क्रियतां, उताहवनीयो नास्तीति न क्रियतां इति संशये प्रधानस्यानुग्रहात् होमाङ्गमाहवनीयं

---

(1) P. 957

प्रधानानुरोधेनेत्यङ्गविदो मन्यन्ते। सत्यमेवैतत्। किन्त्वत्र अयं न्यायो न संभवति। कस्मात्? वैदिके तावदाहवनीयबाधो नोपपद्यते। न च लौकिकस्यैवाङ्गमिति शक्यते वक्तुं त्वयैवोक्तमविशेषादिति। अतो भावाभावयोर्विरोधात् भावत एव विशेषावधारणं युक्तम् न पुनः अभावतः। अनवगमे हेतुः असौ। न पुनः विशेषावगमे हेतुः। तस्माद्वैदिक एव जयाहोम इति सिद्धम्।

॥ १० ॥ दोषात्त्विष्टिर्लौकिके स्यात् शास्त्राद्धि वैदिके न दोषः स्यात्[1] ॥ ३४ ॥

परित्यज्य जयाहोमः कर्तव्यः न पुनः अङ्गस्य जयाहोमस्याङ्गभूताहवनीयानुरोधेन प्रधानस्याष्टकादेरङ्गभूतस्य जयाहोमस्य त्यागो युक्तः। गुण एवाहवनीयस्त्यक्तुमुचितः प्रधानानुरोधेनेति अङ्गविदो मन्यन्ते। राद्धान्तमाह—(सत्यमाह भवान्) सत्यमेवैतत्। किन्त्वत्रायं न्यायो न संभवति। अङ्गगुणविरोधे च तादर्थ्यादिति। कस्मात्? वैदिके तावदाहवनीयबाधो नोपपद्यते न च लौकिकस्यैव स्मार्तस्यैवाङ्गमिति शक्यते वक्तुं त्वयैवोक्तमविशेषादिति। अयमाशयः—यत्र निश्चितमङ्गत्वं तत्राङ्गगुणविरोधन्यायः। इह तु जयाहोमस्याङ्गत्वमेव निश्चितम्। तत्र यस्मिन्नङ्गिन्याश्रीयमाणे विनियोज्यस्वरूपं न बाध्यते तस्यैव शेषित्वं युक्तम्। आहवनीययुक्तं चाङ्गिस्वरूपमिति तदनुरोधेन वैदिकेष्वेव विनियोगः तत्राहवनीयसंभवात्। स्मार्तेष्वनाहिताग्नेराहवनीयाभावात् इत्याहवनीयाङ्गाविरोधेन विनियोग एवोपसंह्रियते। न च येन कर्मणेत्सेदिति विरोधः अविशेषोद्देशात्। अतो भावाभावयोर्विरोधात् आहवनीयभावाभावयोर्विरोधात् आहवनीयस्य भावत एव विशेषावधारणं युक्तम्। न पुनरभावतः अनवगमहेतुरसौ अनवगमं प्रत्येव हेतुरसौ न पुनर्विशेषावगमहेतुः तस्माद्वैदिक एव जयाहोम इति स्थितम्।

---

(1) 958

पौण्डरीके श्रूयते—यावतोऽश्वान् प्रतिगृह्णीयात् इति। किं लौकिकेऽश्वप्रतिग्रहे इयमिष्टिः उत वैदिक इति संशयः। लौकिके दोषदर्शनात् शूद्रादन्यस्माद्वा पापकर्मणः कृते दोषो भवतीति। [1]"न दोषसङ्कीर्तनं प्रायश्चित्तविषयविशेषणम्। किन्तु प्रायश्चित्तस्तुत्यर्थेन" इति। किमिदं प्रायश्चित्तविषयविशेषणं किं वा स्तुत्यर्थेनेति इदमिदम्। अस्यार्थस्यापनुत्तये यदा प्रायश्चित्तं तदा विषयविशेषणम्। यदा तु कार्यान्तरार्थं तदा स्तुत्यर्थेन दोषनिर्घातार्थं चेदम्। तस्मात् लौकिके भवितुमर्हति। "[2]ननु वैदिकेपि अप्रतिग्राह्यात् प्रतिगृह्णतो दोषोऽस्त्येव। उच्यते।

दोषात्त्विष्टिर्लौकिके स्यात्। पौण्डरीके श्रूयते-यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणाश्चतुष्कपालान्निर्वपेत" इति अश्वप्रतिग्रहेष्टिरस्ति। तत्र 'यावतोऽश्वान् प्रतिगृह्णीयात्' इति किं लौकिकेऽश्वप्रतिग्रहे इयमिष्टिः उत वैदिके इति संशयः। तत्र पूर्वपक्षमाह—लौकिके दोषदर्शनात् शूद्रादन्यस्माद्वा पापकर्मणः कृते दोषो भवतीति। दोषवत्यश्वप्रतिग्रहे इयमिष्टिः श्रूयते दोषवत्ता च लौकिकस्याश्वप्रतिग्रहस्यास्ति यतः शूद्रादन्यस्माद्वा पापकर्मणः कृते प्रतिग्रहे दोषो भवति। तस्मात् दोषवान् लौकिकः प्रतिग्रह इति तत्रैवेयमिष्टिः। अत्र भाष्यं 'न दोषसंकीर्तनं प्रायश्चित्तविषयविशेषणं, किन्तु प्रायश्चित्तस्तुत्यर्थेन" इति। तद्व्याख्यातुमुपक्रमते—किमिदं प्रायश्चित्तविषयविशेषणं किं वा स्तुत्यर्थेनेति। इदमिदं—अस्य वरुणग्रहाख्यस्यार्थस्यापनुत्तये यदा प्रायश्चित्तं तदा प्रायश्चित्तविषयविशेषणम्। यत्तु खलु दोषनिर्घातार्थं तत्र यत्रैव दोषः तत्रैव कर्तव्यमित्यर्थात् प्रायश्चित्तविषयभूतप्रतिग्रहस्य वरुणग्रहो विशेषणं यत्रैव च वरुणग्रहः तत्रैव तन्निवृत्तयेऽश्वप्रतिग्रहेष्टिरिति। यदा तु कार्यान्तरार्थं तदा स्तुत्यर्थेन, दोषनिर्घातार्थं चेदं वाक्यपौर्वापर्यालोचनया दोषनिर्घातार्थं प्रायश्चित्तं चेदं प्रतीयते। तस्माल्लौकिके भवितुमर्हति। अत्र भाष्यं— "ननु वैदिकेपि प्रतिग्रहे अप्रतिग्राह्यात् प्रतिगृह्णतः पापमस्ति इति प्रायश्चित्तेन भवितव्यम्। उच्यते।

---

(1) 958 (2) 959

भवेदेतदेवं यदि प्रतिग्रहस्य कर्तुरिष्टिर्भवेत्। सा खलु यथा हेतुकर्तुः तथा उत्तरेऽधिकरणे वक्ष्यामः"। असम्बन्ध-मिदं भाष्यम्। यदि लौकिके प्रतिग्रहीतुरिष्टिः न भवति ततश्च वैदिकेऽपि अश्वं अप्रतिग्राह्यात् प्रतिगृह्णतो दोषोऽस्तीति सत्यपि दोषनिर्घातार्थे प्रायश्चित्ते कस्माल्लौकिक एव प्रतिग्रहीतुः प्रायश्चित्ता-शङ्का। अथ उपक्रमावगतार्थवाददर्शनात् दातुरिष्टिरित्युच्यते लौकिकेऽपि तुल्यम्। अथ लौकिके प्रतिग्रहपक्षेपि दातुरेवेत्यभिप्रायः शूद्रादन्यस्माद्वा पापकर्मणः इति भाष्यं असम्बद्धम्। कथं वोपरितने-ऽधिकरणे पूर्वः पक्षः। वेदो वा प्रायदर्शनादित्युपक्रमेणोपसंहाराव-धृतेः। अत्राभिधीयते—नेदमसंबद्धम्। अयमभिप्रायः पूर्वपक्षवादिनः।

भवेदेतदेवं यदि प्रतिग्रहस्य कर्तुरिष्टिर्भवेत्। सा तु खलु यथा हेतुकर्तुः तथोत्तराधिकरणे वक्ष्यामः" इति। तदाक्षिपन्नाह— (अत्र चोदयति)—असंबद्धमिदं भाष्यम्। यदि लौकिके प्रतिग्रहीतुरिष्टिर्नभवति ततश्च वैदिकेपि (किमिति प्रतिग्रहीतुरिष्टिर्नभर्थति। ततश्च वैदिकेपि) अश्वं अप्रतिग्राह्यात् प्रतिगृह्णतो दोषोऽस्तीति सत्यपि दोषनिर्घातार्थे प्रायश्चित्ते कस्माल्लौकिक एव प्रतिग्रहीतुः प्रायश्चित्ताशङ्का। अथ उपक्रमावगतार्थवाद-दर्शनात् दातुरिष्टिरित्युच्यते लौकिकेऽपि तुल्यं, तस्मिन्नपि पक्षे उपक्रमालोचनया दातुरेव न च तस्य दोषोऽस्ति दानस्यानिषिद्धत्वात्। अतो दोषनिर्घातार्थत्वे नास्ति लौकिके प्रसङ्गः अथ लौकिके प्रतिग्रहपक्षेऽपि दातुरेवेत्यभिप्रायः शूद्रादन्यस्माद्वेति भाष्यमसंबद्धं दातुर्हि दोषो दर्शयितव्यः न प्रतिग्रहीतुः दोषनिर्घातार्थं दातुरिष्टिरिति वदता दातुः दोषः कथनीयः। न च शूद्रादन्यस्माद्वा प्रतिग्रहे दातुर्दोषो भवति अपि तु प्रतिग्रहीतुरेव। न च तस्येयमिष्टिः उपक्रमविरोधात्। कथं चोपरितनेऽधिकरणे प्रतिग्रहीतुरियमिष्टिरिति पूर्वः पक्षः। वेदो वा प्रायदर्शनात्। इत्युपक्रमेणोपसंहारावधृतेः। वेदो वा प्रायदर्श-नादित्युपक्रमानुसारेणोपसंहारो न्याय्यः इत्युक्तम्। तेनेहाप्युपक्रमगतार्थवादालोचनया दातुरि-ष्टिरिति प्रतीयते। अत्राभिधीयते—नेदमसंबद्धं भाष्यं; अयमभिप्रायः पूर्वपक्षिणः।

लौकिकेऽश्वप्रतिग्रहे दोषश्रवणं विषयविशेषणतयैवोपपत्तेः। यस्मादस्मिन् पक्षे प्रतिग्रहीतुरेवेष्टिः। दातुर्यदीयमिष्टिः स्यात ततो दानस्याङ्गं वा कल्पयितव्यं फलान्तरं वा। दानाङ्गता तावन्न संभवति निमित्तत्वेनास्योपक्षयाद्दानस्य। अथ विपरिवृत्त्या पुनरङ्गित्वं दानस्य तदा इदमेवायुक्तम्। गुणवादेनाप्यर्थवादोपपत्तेः। पापप्रमोचनस्य फलतया वा वाक्येनावगतेः। न च दातुः पापं शक्यते कल्पयितुमिति। तस्माल्लौकिके पक्षे प्रतिग्रहीतुरेवेष्टिः

लौकिकेऽश्वप्रतिग्रहे दोषश्रवणं विषयविशेषणतयैव[1] उपपद्यते। लौकिकाश्वप्रतिग्रहविषयायामिष्टौ आश्रीयमाणायां दोषश्रवणं फलसमर्पकतया प्रतिग्रहलक्षणविषयविशेषणतयैवोपपद्यते। तस्मिन् पक्षे दोषनिर्घातार्था सतीयमिष्टिः संभाव्यदोषस्य प्रतिग्रहीतुरेव भवति। प्रतिग्रहीतैवाधिकारीति यावत्। कथं पुनः प्रतिग्रहीतैवाधिकारी यावता उपक्रमवशेन दातैवाधिकारी युक्त इति। उत्तरं—**यस्मादस्मिन् पक्षे** लौकिकप्रतिग्रहाश्रयणपक्षे—**प्रतिग्रहीतुरियमिष्टिः** यदि च तस्मिन्नपि पक्षे **दातुरेवेयमिष्टिः स्यात् ततः दानस्य** स्मार्तस्य लौकिकस्याङ्गं **कल्पयितव्यमेतदिष्टि**रूपं **फलान्तरं** अधिकारान्तरं **वा। दानाङ्गता तावन्न संभवति निमित्तत्वेनास्योपक्षयात्** उपक्षीणत्वात् **दानस्य** शेषित्वानुपपत्तेः। **अथ विपरिवृत्त्या पुनरङ्गित्वं दानस्य** कल्प्यते **तदा इदमेवायुक्तं** यन्निमित्तत्वेनोपक्षीणस्य पुनरङ्गित्वकल्पनं प्रमाणाभावात्। ननु इदमेव प्रमाणं यद्दातृगतदोषकीर्तनं तत्राह—**गुणवादेनाप्यर्थवादोपपत्तेः।** एवमश्वप्रतिग्रहो निदानं दोषस्य। यद्दातुरपि तावत् दोषो भवति किमङ्ग पुनः प्रतिग्रहीतुः इति प्रतिग्रहदोषप्रदर्शनपरतयाप्यर्थवादोपपत्तेः न शक्यते दातुर्दोषं परिकल्प्य तन्निर्हरणद्वारेण दानाङ्गता कल्पयितुमिति। ननु च दानमात्रनिमित्तमधिकारान्तरमेवेदं भवितुमर्हतीत्यत्राह—**पापप्रमोचनस्य फलतया वा वाक्येनावगतेः।** तेन यथा तस्यान्वयो भवति तथा वर्णयितव्यम्। तस्य च प्रतिग्रहीतरि नियोज्ये युक्तोऽन्वयः न दातरि तदाह—**न च दातुः पापं शक्यते कल्पयितुं**

---

(1) R. तथैव

चोदितत्वाल्लोके वेदे च दानस्य । राद्धान्तवादी तु यथाश्रुतस्य पापस्याश्वप्रतिग्रहो न निदानतया प्रमाणान्तरेण प्रसिद्धः । नापि वचनात् । वाक्यभेदप्रसङ्गात् । तस्मात पापमात्रवचनमिदं वैदिकेप्युपपद्यत एव, रक्षणपोषणादिना दुःखदर्शनात् । फलं च न कल्पयितव्यं भवति कर्माङ्गतयोपपत्तेः । प्रकरणविनियोज्यतया कर्तुर्वा भवतु प्रतिग्रहीतुर्वा ।

चोदितत्वात् लोके वेदे च दानस्य । तस्माल्लौकिकपक्षे प्रतिग्रहीतुरेवेयमिष्टिः वैदिकपक्षे तु प्रकरण एव निवेशात् प्रकरणेनाङ्गत्वकल्पनात फलान्तरकल्पनाभावात् दातुरेवेयमिष्टिः स्यात । तत्र च दोषप्रमोचनश्रवणमविवक्षितं स्यात् दातुर्दोषाभावात । अतो लौकिकप्रतिग्रहविषयैवेयमिष्टिः इति । तत्र हि यथोक्तेन न्यायेन प्रतिग्रहीतुरिष्टिर्भवति प्रतिग्रहीतुश्च दोष इति दोषप्रमोचनश्रवणं विवक्षितं स्यात् । ततोऽयमत्र सन्देहार्थः—लौकिके प्रतिग्रहे प्रतिग्रहीतुरियमिष्टिर्भवतु अथ वा वैदिके दातुरिति । तत्र पापप्रमोचनश्रवणात लौकिके प्रतिग्रहीतुरिति पूर्वः पक्षः । **राद्धान्तवादी तु यथा श्रुतस्य तावत्पापस्य अश्वप्रतिग्रहो न निदानतया प्रमाणान्तरेण प्रसिद्धः** न जलोदरस्याश्वप्रतिग्रहः निदानतया प्रमाणान्तरेण सिद्धः । नापि वचनात् । वाक्यभेदप्रसङ्गात् । यदि वचनमिदं ज्ञापयेत अश्वप्रतिग्रहेण जलोदरं भवति तच्चेष्टयाऽपनीयत इति ततोऽर्थभेदाद्वाक्यभेदः स्यात् । एकं चेदं वाक्यम् । अतो न वचनतो जलोदरनिदानता अश्वप्रतिग्रहस्य । **तस्मात् पापमात्रवचनं** जलोदरवचनं **वैदिकेप्युपपद्यत एव रक्षणपोषणादिना दुःखदर्शनात्** प्रतिग्रहीतुः । ननु वैदिकपक्षे दातुरिष्ट्या भवितव्यमिति दातुरेव दोषो दर्शनीयः । किमिदं प्रतिग्रहीतृदोषकीर्तनं उत्तराधिकरणस्य अद्याप्यसिद्धत्वात् । युक्तं प्रतिग्रहीतुर्दोषदर्शनम् अस्मिन्नधिकरणे क्रत्वङ्गतया दातुरेवेष्टावधिकार इति सिध्यति । उत्तराधिकरणे तु किं दाता यज्ञे उत ऋत्विगिति कर्तृविचारो भविष्यति । तेन प्रतिग्रहीतरि कर्तरि आर्त्विजदोषदर्शनमुपपन्नम् । वैदिकप्रतिग्रहविषयेष्टिपक्षे **च फलं न कल्पयितव्यं भवति कर्माङ्गतयोपपत्तेः । प्रकरणविनियोज्यतया कर्तुर्वा भवतु प्रतिग्रहीतुर्वा** यदि दातृकर्तृकेयमिष्टिः । यदि च प्रतिग्रहीतृकर्तृका तथापि पौण्डरीकप्रकरणात् तदङ्गमित्यर्थः ।

॥ ११ ॥ अचोदितं च कर्मभेदात्[1] ॥ ३० ॥

युक्तं तावत् यदा कर्तुः तदा कर्माङ्गं; यदा प्रतिग्रहीतुः तदा कथं? उपक्रमोपसंहारवशात् प्रतिग्राहयेदितिवत् विपरिणामात् कल्प्यताम्। ऋत्विजो याजनीयाः उपवासवत्।

यत्पुनरिदमुक्तं—कथं पुनः वेदो वा प्रायदर्शनादिति स्थितेऽधिकरणे उपरितनेऽधिकरणे पूर्वः पक्षः। दोषप्रदर्शनादेवेति मन्यते। अर्थवादभूतोऽपि दोषः प्रतिग्रहीतुरेवाञ्जस्येनोपपद्यते। उपक्रमोऽपि लौकिकपक्षवत् दातुरपि तावत् अश्वप्रतिग्रहे दोषः किं पुनः प्रतिग्रहीतुरिति व्याख्यायते। राद्धान्तवादी तु अवश्यं

अचोदितं च कर्मभेदात्। अत्र चोदयति—युक्तं तावत् यदा कर्तुः तदा कर्माङ्गं एकाधिकारसंबन्धात्—यदा पुनः प्रतिग्रहीतुः तदा कथं? प्रतिग्रहीतुः अधिकारान्तरत्वेनासंबन्धात् इति भ्रान्तस्येदं चोद्यम्। उत्तरं—उपक्रमोपसंहारवशात् प्रतिग्राहयेदितिवत् विपरिणामात्कल्प्यते। अस्यार्थः—यथा राद्धान्ते उपक्रमवशात् प्रतिग्राहयेदितिविपरिणामः तथा कृताद्विपरिणामात् प्रतिग्रहीतृकर्तृकत्वेपि एकाधिकारिपुरुषसंबन्धात् अङ्गता कल्प्यते। तमेव विपरिणामं दर्शयति—ऋत्विजो याजनीया उपवासवत्। यथा उपवासं कार्यन्ते ऋत्विजः तथा याजनीयाः। वरुणोद्देशेन चतुष्कपालेन याजयितव्या इत्यर्थः। तेन साधूक्तं दातुर्वा भवतु प्रतिग्रहीतुर्वेति। यत्पुनरुक्तं वेदो वा प्रायदर्शनादिति स्थिते, उपरितनेऽधिकरणे कथं पूर्वः पक्षः इति। तत्रोत्तरं—दोषप्रदर्शनादेवेति मन्यते। नन्वयं दोषः परमार्थतो नास्त्येवेत्युक्तं तत्राह—अर्थवादीभूतोऽपि हि दोषः प्रतिग्रहीतुरेवाञ्जस्येनोपपद्यते। रक्षणपोषणादिदुःखदर्शनात्। नन्वेवमुपक्रमगतदातृकीर्तनं कथं घटिष्यत इत्यत्राह—उपक्रमोऽपि लौकिकपक्षवत् दातुरपि तावद्दोषः किं पुनः प्रतिग्रहीतुरिति व्याख्यायते। एतच्चोक्तमस्माभिः। राद्धान्तवादीतु

---

(1) P. 963

तावत् निर्वापयेदिति विपरिणामः कल्प्यः । तस्माद्वरमुपक्रम-दर्शनात् प्रतिग्राहयेदित्येवं मन्यते । अतो नेदं पुनरुक्तम् ।

॥ १२ ॥ पानव्यापच्च तद्वत्[1] ॥ ३२ ॥

तद्वदित्यातिदेशिकोऽपि विशेषः । अयं विशेषः दोषदर्शनम् । ननु च पूर्वस्मिन्नधिकरणे दोषदर्शनादेव लौकिक इत्युक्तम् । सत्यमनुपपत्तिस्तत्रोक्ता दोषस्य । इह तु ग्लानिर्वमनादुपपद्यत एवेन्द्रियाणामित्यधिकाशङ्का । अत एव वमनार्थं तदिति परिहृतम् ।

अवश्यं तावत् 'निर्वापयेत्' इति कल्पनीयम् । तस्माद्वरमुपक्रमवशात् 'प्रतिग्राहयेत्' इति युक्तं मन्यते । विपरिणामस्यावश्यकल्पनीयत्वात् वरमुपक्रमानुरोधेन विपरिणामः कल्प्यतामिति न्याय्यम् । अर्थवादस्यावश्यकर्तव्यतापरत्वेन भाष्ये वर्णना कृतेति न पुनरुक्तं 'वेदोवा' इत्यनेनाधिकरणेन । अधिकरणद्वयं तु एकीकृत्य व्याचक्षाणस्यायमाशयः — अर्थवादार्थप्रतिपत्त्या पूर्वाधिकरणे पूर्वः पक्षः समीचीनार्थवादार्थदर्शनेन निराकरणीयः । अवश्यं कर्तव्यतात्मकपारमार्थिकार्थवादार्थवर्णनं चोत्तराधिकरणायत्तमिति ।

पानव्यापच्च तद्वत् । तद्वदित्यतिदेशिको विशेषः ? न हि विशेषमन्तरेण तद्वदिति भवति तदेव हि स्यात् । अयं विशेषः दोषश्रवणात् "इन्द्रियेण वा एष व्यृध्यते वीर्येण वा यः सोमं वमिति" इति दोषश्रवणात् लौकिके सोमवमने प्रायश्चित्तमिति विशेषः । ननु पूर्वस्मिन्नधिकरणे दोषदर्शनादेव लौकिक इत्युक्तम् । इहापि दोष-दर्शनादेव लौकिक इत्युच्यमाने नास्ति विशेषः । परिहरति — सत्यमनुपपत्तिः तत्रोक्ता दोषस्य जलोदरलक्षणस्य । इह तु ग्लानिः वमनादुपपद्यत एवेन्द्रियाणामिति अधि-काशङ्का । प्रमाणपरिगृहीतैवेन्द्रियाणां व्यृद्धिः । यत एवं प्रमाणपरिगृहीतैवेयं अत एव वमनार्थं तदिति परिहृतं दोषत्वम् । अन्यथा ग्लानिरेव नास्तीति परिहारो दातव्यः

(1) P. 969

ग्लान्यर्थमेव यत् न तस्य ग्लानिर्दोषत्वेन शक्यते कल्पयितुमिति। तस्मात् पूर्ववदेवेदं कर्मफलकल्पनाभयात चोदितसोमपानवमन-निमित्तकमित्यर्थः।

॥ १३ ॥ तत्सर्वत्राविशेषात्[1] ॥ ३४ ॥

किं यावन्तस्सोमवामिनः तावतां वमने एतत्प्रायश्चित्तं उत स्वामिन एवेति। अविशेषात सर्वार्थमिति प्राप्ते। उच्यते—स्वामिन एवेदं प्रायश्चित्तम्। कुतः? न यजमानस्य ऋत्विजां चैका चोदना संभवति। एकत्र यजेतेति चोदना अन्यत्र याजयेदिति

स्यात्। कथं पुनः वमनार्थत्वाभिधानेन दोषपरिहारः तत्राह—ग्लान्यर्थमेव हि यत् न तस्य ग्लानिर्दोषत्वेन शक्यते कल्पयितुमिति। यद्धि वमनार्थं तद्वमनस्य ग्लान्यविनाभावित्वात् ग्लान्यर्थमेव। यच्च ग्लान्यर्थं तस्य ग्लानिर्न दोष इति शक्यते वदितुमिति परिहृतमेव दोषत्वम्। यस्माद्दोषत्वं नास्ति तस्मात् तन्निर्हरणार्थता तावदस्य सोमेन्द्रस्य कर्मणो नास्तीति पूर्ववदेवेदं कर्म फलकल्पनाभयाच्चोदितसोमपानवमननिमित्त-कमित्यर्थः। चोदितं यत्सोमपानं तस्य यत् वमनं तन्निमित्तकमिदं कर्म। तेन क्रतु-संबन्धिसोमपानवमननिमित्तत्वात क्रत्वङ्गभूतमेवेदं कर्मेति स्थितम्।

तत्सर्वत्राविशेषात्। किं यावन्तः सोमवामिनः तावतां वमन एतत्प्रायश्चित्तं उत स्वामिन एवेति भाष्यकारेण साक्षादनुक्तमप्यर्थादवगम्यमानं संशयं कथयति। अविशेषात् सर्वेषां वमन इति प्राप्ते; उच्यते—स्वामिन एतत् प्रायश्चित्तमिति। कुतः? उत्तरं—न यजमानस्य ऋत्विजां चैका चोदना संभवति। एकत्र यजेतेति चोदना अन्यत्र याजयेदिति। अस्यार्थः, यदि यजमानवमने ऋत्विग्वमने चैका चोदना स्यात् तदा अविशेषः स्यात्। न चासावेका चोदना संभवति यस्मादेकत्र यजमानवमनपक्षे

---

(1) P. 971

न चैकस्मिन् वाक्ये उभयमेतत् भवति। कस्मात्? अविपरिणता एषा चोदना। सा च स्वामिवमन एवावगम्यते। तस्मात् फलवत्सन्निधावफलं तदङ्गमिति भवति तदिदमुक्तम्। नान्यदीयो यागोऽन्यस्योपकरोतीति। तस्मान्न ऋत्विग्वमननिमित्तमिति। न ह्यन्यस्य चोदितमन्यस्योपकरोतीत्यर्थः। अतः स्वामिवमननिमित्तमेवेति सिद्धम्।

॥ १४ ॥ [1]सर्वप्रदानं हविषस्तदर्थत्वात ॥ ३-४-३७ ॥

यजेतेति चोदना यस्सोमं वमिति स सोमेन्द्रं चरुं निर्वपेत् इति तदा वाक्यार्थः स्यात्। अन्यत्र तु ऋत्विग्वमनपक्षे याजयेदिति चोदना। इदं हि पूर्वोक्तेन क्रत्वर्थं कर्मेति स्थितम्। तेन नायमर्थः यस्सोमं वमिति ऋत्विकृतमृत्विजं सोमेन्द्रं चरुं निर्वापयेदिति। **न चैकस्मिन्वाक्ये उभयमेतत्संभवति।** तस्मान्नाविशेषात् सर्वेषां वमने सोमेन्द्रं कर्म। नन्वेवमपि ऋत्विग्वमन एवास्तु तत्राह—**कस्मात्? अविपरिणता एषा चोदना।** ऋत्विग्वमनपक्षेपि हि यजमानस्यैवाधिकारादवश्यं विपरिणामः कल्प्यः अविपरिणता चेयं चोदना। **सा च स्वामिवमन एवावगम्यते** यस्माद्यजमानवमननिमित्तकमिदं कर्म **तस्मात् फलवत्—सन्निधावफलं तदङ्गमिति भवति।** अन्यथा हि ऋत्विग्वमने निमित्ते सति अविपरिणतेयं चोदना ऋत्विजामेवाधिकारिणां स्वतन्त्रं कर्म विदध्यात। तस्मादधिकारिभेदादनङ्गमेव स्यादिति फलवत्सन्निधावफलं तदङ्गमिति न सिध्यति। तदिदं ऋत्विग्वमनपक्षे अविपरिणतचोदनाश्रयणेऽनङ्गत्वमुक्तम् **नान्यदीयो यागोऽन्यस्योपकरोतीति। तस्मान्न ऋत्विग्वमननिमित्तम्। नह्यन्यस्य चोदितमन्यस्योपकरोतीत्यर्थः।** उपसंहरति—**अतस्सिद्धमेवेदं स्वामिवमननिमित्तमिति।**

सर्वप्रदानं हविषस्तदर्थत्वात्। अत्र भाष्यं किं कृत्स्नं हविरग्नये दातव्यमिति तदनुपपन्नम्। देवतां प्रति दानाभावात्। तथा शेषयितव्यं किञ्चित् किञ्चिच दातव्यमिति

---

(1) P. 974

इहेदानीं सन्दिह्यते। 'आग्नेयोऽष्टाकपाल' इति किं कृत्स्नस्य हविषस्त्यागः उत द्विर्हविषोऽवद्यतीति तावन्मात्रस्यैव त्याग इति। ननु चात्र सन्देह एव नोपपद्यते आग्नेयोऽष्टाकपाल इति परिसमाप्ता चोदना। द्विर्हविषोऽवद्यतीति संस्कारचोदना हविषः अग्नेस्तृणान्यपचिनोतीतिवत्। ननु च जुहोतीत्यपि श्रूयते हविषोऽपनीतस्य प्रतिपत्तिर्भविष्यति। यथा यागोत्तरकालं स्विष्टकृदादयः। अत्राभिधीयते—नैतदेवम्। जुहोतिः यागाश्च संबन्धिद्रव्यसाध्याः। सकलस्य च परित्यागे होमो यागाश्च स्विष्टकृदादयः नोपपद्यन्ते।

तद्व्याचष्टे—इहेदानीं सन्दिह्यते आग्नेयोऽष्टाकपाल इति किं कृत्स्नस्यैव त्यागः। उत द्विर्हविषोऽवद्यति चतुरवत्तं जुहोति इति वचनात् तावन्मात्रस्यैवेति त्याग एवदानशब्देनोच्यते लक्षणया। ननु चात्र सन्देह एव नोपपद्यते। आग्नेयोऽष्टाकपाल इति परिसमाप्ता यागचोदना। तेन सर्वस्यैव त्याग इति राद्धान्तवचनव्यक्त्यभावात् सन्देह एवानुपपन्नः। ननु च 'द्विर्हविषोऽवद्यति' 'चतुरवत्तं जुहोति' इति श्रवणात् द्व्यवदानमात्रस्य त्यागः प्रतिभाति इत्यत्राह—द्विर्हविषोऽवद्यतीति संस्कारचोदनैषा हविषः 'अग्नेस्तृणान्यपचिनोती'तिवत्। ननु च न केवलमवदानं श्रूयते जुहोतीत्यपि श्रूयते। तेन द्व्यवदानेनैव यागः कर्तव्य इति प्रतीयते। उत्तरं—हविषस्सकाशात् अपनीतस्य प्रतिपत्तिर्भविष्यति। यथा राद्धान्त एव यागोत्तरकालं स्विष्टकृदादयः शेषात् शेषप्रतिपत्तिभूताः स्विष्टकृदादयः। अत्राभिधीयते—नैतदेवं भवितुमर्हति कृत्स्नस्यैव त्याग इति यस्माज्जुहोतिः यागाश्च स्वसंबन्धिद्रव्यसाध्याः द्रव्यत्यागात्मकौ होमयागौ स्वद्रव्येणैव सिध्यतः। सकलस्य च परित्यागे होमोयागाश्च स्विष्टकृदादयो नोपपद्यन्ते। अस्यार्थः कृत्स्नस्य त्यागपक्षे द्व्यवदानमकृत्वैव पुरोडाशस्त्यक्तव्यः अन्यथा कृत्स्नत्वस्यानुपपत्तेः। ततश्च पुरोडाशात् द्व्यवदानमात्रं कृत्वा होतव्यं स्विष्टकृदादयश्च यागाः कर्तव्याः ते नोपपद्यन्ते त्यक्तस्य द्रव्यस्यास्वकीयत्वात्। तस्मान्न कृत्स्नस्य-

अष्टाकपालविषयाश्चोदनाः। अत उपपद्यते संशयः। अस्मिंश्च संशये कस्य पक्षस्याध्यवसानं युक्तं? पूर्वपक्षवादी तावन्मन्यते—अप्रतिपक्षत्वादाग्नेयचोदनायाः तत्सव्यपेक्षत्वाच्चोत्तरासां पूर्वैव बलीयसीति। तदिदमुक्तम्। "सर्वप्रदानं हविषस्तदर्थत्वात्"। कथं तर्हि चतुरवत्तं जुहोतीति स्विष्टकृते समवद्यतीति। गौणो वा यज्यर्थो जुहोत्यर्थश्च ग्रहीतव्यः, तद्धर्मकं वा द्रव्यान्तरमुत्पाद्यम्। द्विर्हविषोऽवद्यति हविर्धर्मकादवद्यतीत्यर्थः।

कृतत्वात्तु कर्मणः सकृत्स्यात् द्रव्यस्य गुणभूतत्वात् ॥ ३-४-४० ॥

अत्राभिधीयते—सत्यमेवं यथा भवानाह। यदि आग्नेयोऽष्टाकपाल इति त्यागपर्यन्तस्तद्धितः स्यात्।

वक्तव्य इत्यस्ति शङ्का। ननु च द्रव्यान्तरात् होमाः स्विष्टकृदादयो भविष्यन्ति तत्राह—अष्टाकपालविषया चोदना। तस्यैव हविष्ट्वात् शेषशब्दस्य प्रकृतद्रव्यविषयत्वाच्च। अत उपपद्यते संशयः। अस्मिंश्च संशये कस्य पक्षस्याध्यवसानं युक्तं? पूर्वपक्षवादी मन्यते। अप्रतिपक्षत्वादाग्नेयचोदनायाः तत्सव्यपेक्षत्वादितरासां पूर्वैव बलीयसीति। तदिदमुक्तम्—सर्वप्रदानं हविषस्तदर्थत्वादिति। कथं तर्हि 'चतुरवत्तं जुहोति' इति होमः 'स्विष्टकृते समवद्यति' इति चतुर्थीप्रयोगात् स्विष्टकृद्देवतेति निश्चीयते। [1]तेन द्रव्यदेवते निश्चीयेते तेन द्रव्यदेवतासंबन्धात् स्विष्टकृद्यागः। तौ च होमयागौ त्यक्ते द्रव्ये न संभवतः। उत्तर—गौणो वा यज्यर्थो जुहोत्यर्थश्च ग्रहीतव्यः प्रक्षेपमात्ररूपः। तद्धर्मकं वा द्रव्यान्तरमुत्पाद्यम्। एतदेव विवृणोति—द्विर्हविषोऽवद्यति हविर्धर्मकादवद्यतीत्यर्थः।

कृतत्वात्तु कर्मणः सकृत्स्यात् द्रव्यस्य गुणभूतत्वात्। अत्राभिधीयते—सत्यमेवं यथा भवानाह—यदि 'आग्नेयोऽष्टाकपाल' इति त्यागपर्यन्तः तद्धितः स्यात्, स्यादे-

---

(1) G. omits तेन....येते

सास्य देवतेति संबन्धिमात्रतयाऽवगतेः एकदेशत्यागादप्युपपद्यत एव संबन्धिता। तदिदमुक्तम्—"अकृत्स्नसंबन्धेपि तद्धितसंबन्ध-स्योपपत्तिः दर्शितस्ततो ग्रहीतव्यमिति संबन्धः"। सति चैवमाग्नेय-चोदनायामुपपन्नायां न चतुरवत्तं जुहोति स्विष्टकृते समवद्यति इति गौणी वृत्तिः शक्यते कल्पयितुम्। हविर्धर्मकस्य वा द्रव्य-स्योत्पादः। तथा चतुरवत्तेनैव कृतः शास्त्रार्थः आग्नेयोऽष्टाक-पाल इति स्विष्टकृदादिदर्शनं चोपपन्नम्। यत्पुनरिदमाशङ्कितं द्व्यवदानस्य संस्कारत्वान्न सर्वपरित्यागे विरोध इति तदिदमाशङ्का-मात्रमेव हविषो यागार्थत्वादित्युक्तम्।

तदेवं, यावता सास्य देवतेति संबन्धिमात्रतयाऽवगतेः तदेकदेशत्यागादपि संबन्धिता उपपद्यत एव। तदिदमुक्तम् अकृत्स्नसंबन्धेऽपि तद्धितसंयोगस्योपपत्तिः ततो ग्रहीष्यत इति। ननु अप्रदीयमानस्य कथमसंबन्धे कृत्स्नस्याग्नेयता? उत्तरं—दर्शितस्ततो ग्रहीतव्य इति संबन्धः द्व्यवदानस्य। एवं च सति आग्नेयचोदनायामुपपन्नायां "चतु-रवत्तं जुहोति" 'स्विष्टकृते समवद्यति' इति गौणीवृत्तिः न शक्यते कल्पयितुम्। हविर्धर्मकस्य वा द्रव्यस्योत्पादः तथा चतुरवत्तहोमेनैव कृतश्शास्त्रार्थः 'आग्नेयोऽष्टा-कपाल' इति स्विष्टकृदादिदर्शनं चोपपन्नं भवति। 'शेषादिडामवद्यति' 'शेषात् स्विष्टकृते समवद्यति' इति शेषदर्शनं चोपपद्यते। अन्यथा अशेषे शेषशब्दः स्यात्। यत्पुनरिदमा-शङ्कितं द्व्यवदानस्य संस्कारत्वात् न सर्वस्य परित्यागे विरोध इति। तदिदमाशङ्का-मात्रमेव। हविषो यागार्थत्वादित्युक्तम्। अस्यार्थः—यत्पुनरिदमाशङ्कितं द्व्यवदानं स्वीकृतावयवद्रव्यसंस्कारः, तदेव होमेन प्रतिपाद्यते तस्मिंश्च प्रतिपादितेपि परिशिष्टेन कृत्स्नेन पुरोडाशेनाग्नेयः करिष्यते। तेन न कश्चिद्विरोध इति। अत्रोच्यते—स्यादे-तदेवं यदि तदर्थो यागः स्यात्। यदि यागेन हविः संबन्धयितव्यं स्यात्। हविस्तु यागार्थं तेन सकृत द्व्यवदाने कृते कृतत्वाद्यागस्य द्रव्ये सत्यपि न पुनर्यागः कर्तव्य इत्युक्तं भाष्ये।

॥ १५ ॥ अप्रयोजकत्वादेकस्मात्क्रियेरन् शेषस्य गुणभूतत्वात् ॥ ४२ ॥

इह शेषकर्माण्युदाहरणं—किं सकृत कृत्वोपरन्तव्यम् उत यावच्छेषमावृत्तिः इति। पूर्वपक्षवादी कृतत्वाच्छास्त्रार्थस्य सकृत्करणं मन्यते। ननु प्रतिप्रधानं गुणा आवर्तन्त इति शेषस्याप्राधान्यादावृत्तिरेवात्रावगम्यते। अयमभिप्रायः पूर्वपक्षवादिनः--प्रधानोपकाराय हि शेषस्य संस्कारः, सकृत् कृतेन च कृतं कार्यमिति नावृत्तिं मन्यते। न हि शेषत्वात् संस्कार्यत्वम्। ननु च ग्रहादावप्येवमेव प्राप्नोति। प्राप्नोत्येव यद्यत्र न समाधीयते। तत्र तर्हि का चिन्ता? एकत्वस्याविवक्षेत्युक्तम्। अत्राभिधीयते—यावच्छेषमावृत्तिः। ननु च कृतत्वाच्छास्त्रार्थस्य सकृत् इत्युक्तम्

अप्रयोजकत्वादेकस्मात् क्रियेरन् शेषस्य गुणभूतत्वात्। इह शेषकार्याण्युदाहरणम्। किं सकृत्कृत्वोपरन्तव्म, उत यावच्छेषमावृत्तिरिति। अस्यार्थः—किमेकस्मादेव शेषात शेषकार्यं कृत्वा उपरन्तव्यं उत सर्वेभ्यः शेषेभ्यः प्रत्येकं शेषकार्याणि कार्याणीति। तत्र पूर्वपक्षवादी कृतत्वात्कार्यस्य सकृत्करणं मन्यते। एकस्मादपि शेषात शेषकार्ये कृते कृतश्शास्त्रार्थ इति सकृत्करणं मन्यते आग्नेयवत्। ननु च प्रतिप्रधानं गुणा आवर्तन्त इति शेषस्य अप्राधान्यादावृत्तिरेव प्रतीयते। परिहर्तुमाह—अयमभिप्रायः पूर्वपक्षवादिनः। प्रधानोपकाराय हि शेषस्य संस्कारः सकृत्कृतेन च कृतं कार्यमिति नावृत्तिं मन्यते। उपकार्यैक्यात् सकृदेव शेषकार्यं कर्तव्यम्। न शेषत्वात् संस्कार्यत्वं, अपि तु प्रधानोपकाराय। ननु च ग्रहादावप्येवमेव प्राप्नोति। तत्राप्येक एव ग्रहः संमार्जयितव्यः स्यात्। उत्तरं—प्राप्नोत्येव (वं) यद्यत्र [1]न समाधीयते। यद्यत्रैव बहूनां सम्मार्गः प्रतिपाद्यते तत्र तर्हि का चिन्ता एकत्वाविवक्षेत्युक्तम। अत्राभिधीयते—यावच्छेषमावृत्तिः। यद्यपि प्रधानोपकाराय शेषकार्याणि तथापि शेषिभेदाद्भेद एव युक्तः। ननु च कृतत्वाच्छास्त्रार्थस्य सकृदित्युक्तम।

---

(1) G. omits न

उच्यते। शेषसंस्कारद्वारं हि प्रधानस्योपकार्यत्वमुक्तम्। न च शेषे विशेषोऽवगम्यते। अयमयं अयं वेति। अतोऽगृह्यमाणविशेषात् प्रतिप्रधानमावृत्तिः लिङ्गानि दर्शितानि च भाष्ये। यत्पुनरप्रयोजकत्वात् शेषाणामिति पूर्वः पक्षः तदेवेदं न शेषत्वात् संस्कार्यत्वमिति यदुक्तं, न पुनर्गुणभावं शेषस्य मन्यते। न हि शेषस्य प्रयोजकत्वमप्रयोजकत्वं चोपपद्यते। तस्मात् स एव पूर्वः पक्षः।

॥ १६ ॥ एकस्माच्चेद्याथोकाम्यमविशेषात् ॥ ४६ ॥

पूर्वाधिकरणपूर्वपक्षे अनुष्ठानचिन्तेयम्। अत्राविशेषाद्यतः कुतश्चिदिति पूर्वः पक्षः।

उच्यते—शेषसंस्कारद्वारं हि प्रधानस्योपकार्यत्वमुक्तम्। न च शेषे विशेषोऽवगम्यते। अयमयं अयं वेति। अतोऽगृह्यमाणविशेषत्वात् प्रतिप्रधानमावृत्तिः। द्वारत्वाविशेषात् सर्वेषामेव कार्याणि भवन्ति। लिङ्गानि च दर्शितानि भाष्ये। यत्पुनरप्रयोजकत्वाच्छेषाणामिति पूर्वः पक्षः तदेवेदं न शेषत्वात् संस्कार्यत्वमिति यदुक्तमस्माभिः तेन नास्ति भाष्यविरोधः। न पुनर्गुणभावं शेषस्य भाष्यकारो मन्यते। न पुनर्गुणभावाभिप्रायेण भाष्यकारः पूर्वपक्षयतीत्यर्थः। कस्मादित्याह—न हि शेषस्य प्रयोजकत्वमप्रयोजकत्वं चोपपद्यते। अस्यार्थः—यदि हि शेषस्य गुणभावः स्यात् तदा नाशदोषापहारैः उपात्तद्रव्यशेषाभावे शेषस्य द्रव्यं प्रति प्रयोजकताभावे च अप्रयोजकतेति। न चैतद्युक्तम्। तस्मात्स एव पूर्वः पक्षः योऽस्माभिः दर्शितः। न पुनः श्रुत्युपनिपातमात्रेण भाष्ये यत्प्रतिभाति।

एकस्माच्चेत्। पूर्वाधिकरणपूर्वपक्षेऽनुष्ठानचिन्तेयम्। यदा हि एकस्मादिति पूर्वपक्षो भवति तदेयं चिन्ता। तत्रापि [अ]गृह्यमाणविशेषत्वाद्यतः कुतश्चिदिति पूर्वः पक्षः

---

(1) P. 957

मुख्य एव निमित्ते संभवति न नैमित्तिकोपघातः शक्यते कर्तुमिति राद्धान्तः। जघन्यानां तु कृतत्वात् नैमित्तिकस्य (निमित्तावगतिः) युक्तैवाक्रिया शेषकार्याणाम्। इति।

॥ १७ ॥ भक्षाश्रवणाद्दानशब्दः परिक्रये ॥ ४८ ॥

इदं ब्रह्मण इति ह्यवदानोपसंहाराद्यागस्य शेषेण परिक्रयं मन्यते पूर्वपक्षवादी। राद्धान्तवादी तु तस्यावदेययोग्यतयैवोत्पत्तेः यागार्थतैवेति नार्थान्तरे विनियोगमर्हतीति। कथं तर्हि स्विष्टकृदादियागः? अत्यक्तत्वाच्छेषस्य वचनाच्चोपपद्यते।

मुख्य एव, निमित्ते संभवति न नैमित्तिकोपघातः शक्यते वक्तुमिति राद्धान्तः। प्रथमोपनिपातिनि शेषे निमित्तस्य शेषलक्षणस्य संभवान्न नैमित्तिकशेषकार्योपघातश्शक्यते वक्तुमिति। तत्र तावत नैमित्तिकं कार्यं, जघन्यानां तु पश्चाद्वर्तिनां शेषाणां तु कृतत्वान्नैमित्तिकस्य प्रथमभाविन्येव निमित्तोपसंहृतिरिति युक्तैव अक्रिया शेषकार्याणामिति।

भक्षाश्रवणात्। ननु कथमत्र शेषेण परिक्रयाशङ्का विनियुक्तविनियोगविरोधात इत्यत्राह—इदं ब्रह्मण इति द्व्यवदानोपसंहारात् यागस्य शेषेण परिक्रयं मन्यते पूर्वपक्षवादी। यागं प्रति 'द्रव्यस्य यत् तादर्थ्यं तत् द्व्यवदानमात्रेणोपसंहृतं इति शेषस्य अन्यत्रा-तादर्थ्यात् विनियुक्तविनियोगविरोधाभावात् 'इदं ब्रह्मणे' इति चतुर्थीश्रवणात शेषेण ब्रह्मादीनां परिक्रयं मन्यते पूर्वपक्षवादी। राद्धान्तवादी तु तस्याप्यवदेयार्थतयोत्पत्तेः यागार्थतैवेति नार्थान्तरे विनियोगमर्हतीति मन्यते। शेषस्यापि द्रव्यस्य द्व्यवदानार्थतयोत्पत्तेः यागार्थत्वम्। तेन नान्यत्र विनियोगमर्हतीति नानेन परिक्रयः। यदि सकल एव यागार्थः कथं तर्हि स्विष्टकृदादियागः यागान्तरे विनियोगो नोपपद्यते। नेह[न हि] देवतायै सङ्कल्पितेन स्वेनेव व्यवहरन्ति शिष्टा इति भावः। उत्तरं—अत्यक्तत्वाच्छेषस्य वचनाच्चोपपद्यते। अस्यार्थः—अत्यक्तत्वेन शेषस्य स्वत्व तावन्नापगतं किन्तु सत्यपि

ननु च दानमपि वचनाद्भविष्यति। सत्यम्—यदि वचनमस्ति। न त्वत्र दानं श्रूयते तादर्थ्यश्रुतिस्तूपकारादप्युपपद्यत एवेत्युपकारो दर्शितः। शेषभावस्तु विपरीत एवेत्यनवद्यम्।

इति बृहत्यां तृतीयस्याध्यायस्य
चतुर्थः पादः

स्वत्वे शिष्टाचारान्न स्वत्वव्यवहारो भवेत्। श्रौतवचनविरोधेन शिष्टाचारे बाधिते न काचिदनुपपत्तिः। **ननु च दानमपि वचनाद्भविष्यति** दानं प्रतीयत इति। परिहरति **—सत्यं यदि वचनमस्ति न त्वत्र दानं श्रूयते।** ननु 'इदं ब्रह्मण' इति तादर्थ्यश्रवणात् दानं प्रतीयते। तत्राह**—तादर्थ्यश्रुतिस्तु** उपकारादप्युपपद्यत **एव इत्युपकारो दर्शितः।** भक्ष्यमाणं हि द्रव्यं नान्तरीयकीं प्रीतिमुत्पादयत्येव। तत्रापि तु **शेषभावो विपरीत एव।** द्रव्यमेव प्रधानं प्रतिपाद्यतया। पुरुष एव गुणभूतः प्रतिपादकतया इत्यनवद्यम्।

इति ऋजुविमलायां तृतीयस्य
चतुर्थः पादः

तृतीयाध्यायस्य पञ्चमः पादः ॥

॥ १ ॥ आज्याच्च सर्वसंयोगात्[1] ॥ ३-५-१ ॥

यावद्धविः किञ्चिचोदितं सर्वस्माच्छेषादवद्यतीति स्थितम्। उपांशुयाजे संशयः—किं ध्रुवास्थादविशेषादङ्गप्रधानसाधारणादनवदेयं स्विष्टकृते उताङ्गप्रधानशेषमपि प्रधानशेषमित्यवदेयं गृहीताद्धा जौहवात् चमसवत्। अविशेषादवदेयमिति प्राप्ते। न साधारणे, शेषत्वाभावात्। शिष्टमपि हि तत्साधारणमेव। प्रधानशेषाच्च स्विष्टकृदवदानम्। न च तत्केवलप्रधानशेष इति शक्यते वक्तुं

ऋजुविमलायां

तृतीयाध्यायस्य पञ्चमः पादः

आज्याच्च सर्वसंयोगात्। यावद्धविः किञ्चिचोदितं प्रधानं तदीयात् शेषात् समवद्यतीति स्थितम्। उपांशुयाजे संशयः किं ध्रुवास्थादविशेषात्[2] अङ्गप्रधानसाधारणत्वादनवदेयं स्विष्टकृते, उताङ्गप्रधानशेषमपि प्रधानशेषमित्यवदेयम्। गृहीताद्धा जौहवात् चमसत्। यथा चमसे तथाऽवदेयं उत शेषाभावादनवदेयमिति। अविशेषादवदेयमिति प्राप्ते अङ्गप्रधाने प्रति साधारणत्वेऽपि शेषत्वाविशेषाद्ध्रौवादवदेयं चमसेन च विशेषाभावात् जौहवादेवावदेयमिति प्राप्ते राद्धान्त उच्यते—न साधारणेऽवदेयं केवलप्रधानशेषत्वाभावात्। शिष्टमपि तत् साधारणमेव। भवतु साधारणं तथापि किमित्याह—प्रधानशेषाच्च स्विष्टकृदवदानम्। य एव हि केवलप्रधानशेषः तस्मादेव स्विष्टकृदवदानं पुरोडाशादिषु। न त्वङ्गप्रधानशेषात्। यत्र हि प्रधानशेषादवदानं तत्र केवलप्रधानार्थता पुरोडाशादौ। यत्र पुनः अङ्गप्रधानशेषात् तत्राङ्गप्रधानार्थता। न चेदं वैषम्यमाश्रयितुं न्याय्यं अवैषम्येणोपपत्तौ। न च तदेव केवलप्रधानशेष इति शक्यते वक्तुं

---

(1) P. 989 (2) G. अपि शेषात्

साधारणत्वादेव। यत्तु गृहीतस्यैव प्रतिपत्तिश्चमसवदिति तदयुक्तं, चतुरवत्तं जुहोतीति श्रवणात् शेषयितव्ये प्रमाणाभावात्। स्विष्टकृदवदानवचनमेव प्रमाणमिति चेन्न। अप्रयुक्ते शेषेऽर्थवत्वात्। यत्तु चमसवदित्युक्तं, तन्न। अनुवषट्कारश्रुतेरनन्यविषयत्वात् (न स्विष्टकृदवदानम्। न च तत्प्रधानशेष इति शक्यते वक्तुम्) चमसस्य ग्रहणमात्रश्रुतेः। दर्शनं प्रत्युक्तम्।

॥ २ ॥ साकं प्रस्थाय्ये स्विष्टकृदिडं च तद्वत्[1] ॥ १३. ॥

केन विशेषेणायमतिदेशः ? प्रकृतिवदिति प्राप्तेः कार्यार्थतया शेषं मन्यते पूर्वपक्षवादी।

साधारणत्वादेव। यत्तु गृहीतस्यैव प्रतिपत्तिश्चमसवदिति, तदयुक्तं कुतः ? उत्तरं—चतुरवत्तं जुहोतीति श्रवणात्। चतुरवत्तस्य कृत्स्नस्यैव होमसंबन्धात् शेषयितव्ये प्रमाणाभावात्। स्विष्टकृदवदानवचनमेव प्रमाणमिति चेत्। न हि शेषमन्तरेण स्विष्टकृदवदानमुपपद्यते। तेन शेषयितव्ये स्विष्टकृदवदानवचनमेव प्रमाणमिति चेत्, न प्रमाणं, अन्यतः प्रयुक्ते स्वयमप्रयुक्ते पुरोडाशादिशेषेऽर्थवत्वात्। यत्तु चमसवदित्युक्तं, तन्न[2] अनुवषट्कारश्रुतेरनन्यविषयत्वात् चमसस्य च ग्रहणमात्रश्रुतेः 'सोमस्याग्ने वीहीत्यनुवषट्करोति' इति येयमनुवषट्कारश्रुतिः सा अनन्यविषया, तेन भवति शेषयितव्ये प्रमाणम्। चमसस्य च ग्रहणमात्रं श्रूयते। न पुनर्होमः। तेनाग्रबिन्दुनिपातेनापि शास्त्रस्याविरोध इति शेषसंभवाद्युक्तं चमसे शेषकार्यम्। दर्शनं प्रत्युक्तम्।

साकं प्रस्थाय्ये। केन विशेषेणायमतिदेशः ? यावता अत्रापि शेषाभाव एव। उत्तरं—प्रकृतिवदिति प्राप्तेः कार्यार्थतया शेषं मन्यते पूर्वपक्षवादी। युक्तमुपांशुयाजे शेषो नास्तीति। शेषकार्याणामेव तत्संबन्धित्वेन प्राप्तेः अनिश्चितत्वात् प्रकृतित्वादुपांशुयाजस्य

(1) P. 994 (2) R. तत्र

वचनात् कार्यं बलवदिति राद्धान्तः ।

॥ ३ ॥ सौत्रामण्यां च ग्रहेषु[1] ॥ १४ ॥

सौत्रामण्यां 'उच्छिनष्टि न सर्वहुतं जुहोति' इति पुनरपि शेषाशङ्कायां स्विष्टकृदिडं मन्यते पूर्वपक्षवादी। तस्यान्यत्र विनियोगादिति राद्धान्तः ।

॥ ४ ॥ [2]द्रव्यैकत्वे कर्मभेदात् प्रतिकर्म क्रियेरन् ॥ १६ ॥

सर्वपृष्ठे तु प्रतिप्रधानं शेषसंस्कारादावृत्तिं मन्यते ।

विकृतिभूतत्वात्साकं प्रस्थाय्यस्य प्रकृतिवदिति शेषकार्याणि प्राप्यन्ते । तेषु प्राप्तेषु तादर्थ्येन द्रव्यं शेष्यते इत्यस्ति शेषः । न । वचनात्कार्यं बलवदिति राद्धान्तः। "सह कुम्भीभिरभिक्रामन् जुहोति" इति वचनात् सह कुम्भीभिरभिक्रमणस्य च दृष्टार्थत्वात् सर्वहोमः प्रतीयते । योऽपि स्विष्टकृदादिप्राप्त्या शेषत्वसंभवः, तत्र वचनस्य कार्यतो बलीयस्त्वात् कार्यप्राप्तस्विष्टकृदादिबाध एव न्याय्य इति शेषाभावान्न स्विष्टकृदादीनि कार्याणि साकं प्रस्थाय्ये इति राद्धान्तः ।

सौत्रामण्यां च । ननु 'उत्तरेऽग्नौ पयोग्रहान् जुहोति दक्षिणेऽग्नौ सुराग्रहान्' इति गृहीतस्यैव द्रव्यस्य होमश्रवणात् शेषाभावान्न प्रकृतितः स्विष्टकृदादिशङ्का तत्राह—सौत्रामण्यां 'उच्छिनष्टि न सर्वहुतं जुहोति' इति पुनरपि शेषाशङ्कायां स्विष्टकृदिडं मन्यते। तस्यान्यत्र विनियोगादिति राद्धान्तः । तस्य शेषस्य अन्यत्र विनियोगात् संबन्धात् ब्राह्मणेन परिक्रीतेन भक्षणेन प्रतिपाद्यत्वात् न स्विष्टकृदिडमिति राद्धान्तः ।

द्रव्यैकत्वे । सर्वपृष्ठे तु प्रतिप्रधानं शेषसंस्कारादावृत्तिं मन्यते पूर्वपक्षवादी। बहुत्वात् प्रधानानां प्रतिप्रधानं च शेषकार्यप्राप्तेः द्रव्यस्य विपुलत्वात् भवितव्यमेव प्रतिप्रधानं

---

(1) P. 994 (2) P. 996

अगृह्यमाणविशेषतया कृतः शास्त्रार्थ इति राद्धान्तः। ननु साधारणे नैव स्विष्टकृदस्तीत्युक्तम्। सत्यं, अकृतत्वात्कार्यान्तराणां गुणप्राधान्याच्चेति विशेषः।

॥ ३५ ॥ ऐन्द्रवायवे तु वचनात् प्रतिकर्म भक्षः स्यात्[1] ॥ १८ ॥

ननु चात्र पूर्वपक्ष एव नास्ति वचनात्। न हि पूर्वपक्षे वचनस्यान्यार्थता शक्यते वक्तुम्। अतोच्यते। अयमभिप्रायः पूर्वपक्षवादिनः सोमसंस्कारार्थत्वाद्भक्षस्य द्विरिति प्रयोगान्तरापेक्षोऽनुवादो भविष्यति।

शेषसंस्कारैः। अगृह्यमाणविशेषतया कृतः शास्त्रार्थ इति राद्धान्तः। य एव हि शेषसंस्कारः कृतः स एव सर्वेषां शेषाणामिति प्रतिभाति अगृह्यमाणविशेषत्वात्। अतः कृते शास्त्रार्थे नावृत्तौ प्रमाणमस्तीति राद्धान्तः। ननु साधारणे नैव स्विष्टकृदस्तीत्युक्तम् आज्ये। कथमत्र साधारणे सकृदपि स्विष्टकृत्। परिहरति—सत्यं—अकृतत्वात् कार्यान्तराणां गुणप्रधानत्वाच्चेति[2] विशेषः। सत्यं आज्ये स्विष्टकृन्नास्ति। तत्र हि एषा युक्तिः। उपांशुयाजे कृतमात्र एव न भवेच्छेषकार्यं कार्यान्तराणामकृतत्वे प्रतिपत्त्यनर्हत्वात्। कृतेषु कार्यान्तरेषु गुणप्राधान्याच्छेषिणां गुणप्रधानभावेनावस्थितानां यागानां साधारणं शेषत्वादिति। 'न पुनस्साधारणं द्रव्यं' इत्येतावती युक्तिः। इह तु शेषोऽप्ययं प्रधानानामेव। अतश्शेषकार्यं कार्यम्।

ऐन्द्रवायवे। ननु चात्र पूर्वपक्ष एव नास्ति वचनात्। द्विरैन्द्रवायवस्य भक्षयतीति वचनात्। न हि पूर्वपक्षे वचनस्यान्यार्थता शक्यते वक्तुम्। अत्रोच्यते —अयमभिप्रायः पूर्वपक्षवादिनः सोमसंस्कारार्थत्वाद्भक्षणस्य द्विरिति प्रयोगान्तरापेक्षोऽनुवादो भविष्यति। अस्यार्थः—भक्षणेन सोमः संस्क्रियते स च सकृत् भक्षणेनैव संस्कृत

---

(1) P. 997 (2) G. प्रधानत्वाय

राद्धान्तवादी तु वचनात्कार्यकल्पनेति वचनादित्युक्तवान् ।

॥ ६ ॥ [1]सोमेऽवचनाद्भक्षो न विद्यते ॥ १९ ॥

सोमे शेषभक्षोऽस्ति नास्तीति संशयः । ननु संशय एवायमयुक्तः सोमस्य शेषाभावात् । युक्तं पुरोडाशादीनां द्विर्हविषोऽवद्यति इति वचनात् तत्र यागोपसंहारात शेषवत्त्वम् तस्य च भक्षः । इह तु तदभावात् भक्षशङ्कैव नास्ति । कथं तर्हि वचनान्येतानि 'द्विरैन्द्रवायवस्य भक्षयति' 'सर्वतः परिहारमाश्विनं' 'अनुवषट्करोति' इति च । अत्रापि च भवानेव प्रष्टव्यः अथ वा भवन्त्वर्थकर्माणि । कथं तर्हि 'ऐन्द्रवायवस्य' 'आश्विनं इति च ।

इति न द्विः भक्षणमुपपद्यते । तस्मात्प्रयोगान्तराभिप्रायेण द्विरित्यनुवादः । राद्धान्तवादी तु वचनात् कार्यकल्पनेति वचनादित्युक्तवान् । सत्यं भक्षणेन सोमः संस्क्रियते तथापि वचनात् द्विर्वचनाद द्विर्भक्षस्य विहितत्वात् द्विर्भक्षणमेव वचनानुरूपमेव कार्यकल्पनमिति न्याय्यम् ।

सोमेऽवचनाद्भक्षो न विद्यते । सोमे शेषभक्षोऽस्ति नास्तीति संशयः । ननु संशय एवायमयुक्तः सोमस्य शेषाभावात् । युक्तं पुरोडाशादीनां द्विर्हविषोऽवद्यतीति वचनात् तत्र यागोपसंहाराच्छेषवत्त्वम् तस्य च भक्षः । इह तु तदभावात् भक्षाशङ्कैव नास्ति । कथं तर्हि वचनान्येतानि—'द्विरैन्द्रवायवस्य' 'सर्वतः परिहारमाश्विनं' 'अनुवषट्करोति' इति च । आक्षेप्ता आह—अत्र हि भवानेव भाष्यसमर्थनायोद्यतः प्रष्टव्यः । अथ वा भवन्त्वर्थकर्माणि (भक्षा)शेषाभावात् प्रतिपत्तिर्नोपपद्यते । अर्थकर्म तु द्रव्यं प्रयोक्तुं समर्थमिति तदेवास्तु । यदि कृत्स्न एव गृहीतस्सोमो हूयते कथं तर्हि 'ऐन्द्रवायवस्य' 'आश्विनं' इति च । द्रव्यान्तरंभक्षणेनापि प्रयुज्यमानं न ऐन्द्रवायवं

---

(1) 998

तद्धर्मलक्षणार्थो भविष्यति। तस्मादनुपपन्नमेवेदं सोमे भक्षो विद्यते उत नेति। अथैतेभ्योऽपि वचनेभ्यः शेषयितव्यं इति कल्प्यते। न, अप्रयोजकत्वाच्छेषाणाम्। संस्कार्यप्रधानं हि संस्कारकर्म भवति। न चाप्रधानं प्रयुङ्क्ते। तस्मात वक्तव्योऽत्र न्यायः। उच्यते—नात्र सर्वहोमे प्रमाणमस्ति। ऐन्द्रवायवादिषु हि तादर्थ्येन ग्रहणम्। गृहीतस्यैकदेशेनापि कृते कृतैवैन्द्रवायवता, किमिति सर्वस्य होमः। ननु च सर्वस्य यागार्थता श्रूयते 'सोमेन यजेत' इति। तत्रापि एकदेशेनैव सोमेनेत्युपपन्नत्वात। तथा

आश्विनं इति च शक्यते वक्तुम्। उत्तरं—धर्मलक्षणार्थो भविष्यति। ऐन्द्रवायवस्य ऐन्द्रवायवधर्मकस्येत्यर्थः। तस्मादनुपपन्नमेवेदं किं सोमे भक्षो विद्यते न वेति। अथैतेभ्यो वचनेभ्यः शेषाश्रयेभ्यः शेषयितव्यमिति कल्प्यते। न। अप्रयोजकत्वाच्छेषाणां न शेषकार्याणि द्रव्यं प्रयुञ्जते। कुतः? संस्कार्यप्रधानं !हि संस्कारकर्म भवति। संस्कार्यं द्रव्यमुच्यते संस्कार्येषु प्रधानेषु अप्रधानभूतास्संस्काराः। न चाप्रधानं प्रधानं प्रयुङ्क्ते। तस्मान्न शेषकार्यैर्द्रव्यं प्रयुज्यते। तस्माद्वक्तव्योऽत्र न्यायः शेषसंभवे। उच्यते—नात्र सर्वहोमे प्रमाणमस्ति। यस्मात् ऐन्द्रवायवादिषु तादर्थ्येन ग्रहणम्। गृहीतस्य च एकदेशेनापि कृते कृतैव ऐन्द्रवायवता। किमिति सर्वस्य होषः अयमभिप्रायः—रसीभूतस्सोमः देवतोद्देशेन परिगृहीतः। तस्य च द्रव्यस्य देवतोद्देशः एवं अर्थवान् भवति यदि तामेव देवतामुद्दिश्य त्यज्यते। तस्य च त्यज्यमानस्य 'अच्छ्या धारया जुहोति' इति नियमात् क्रमेण त्यागः। तत्र तु अग्रबिन्दुनिपातेन कृते देवतोद्देशेन ग्रहणेऽर्थवति न सर्वहोमे प्रमाणमस्तीत्यग्रबिन्दुमात्रेण यागोपसंहारादस्ति शेषः। ननु च सर्वस्य यागशेषता श्रूयते 'सोमेन यजेत' इति तेन कृत्स्नेनैव यागः कर्तव्य इति कृत्स्नस्य होमः। परिहरति—न कृत्स्नेनैव यागः। तत्राप्येकदेशेनैव सोमेनेत्युपपन्नत्वात्। अवयव-

च अस्य ग्रहणं ऋजीषादेश्च त्यागः। यद्येवं किमिति 'द्विर्हविषोऽवद्यति' इत्येतस्मादेवोपसंहारः। यथकथंचित् तत्राप्युपसंहारसिद्धेः। नियमार्थं तदिति चेत्। सर्वप्रदानं तर्हि पूर्वपक्षवादिनो न घटते किञ्च एकदेशेनाप्युपपद्यत इति नैतावता सर्वं न होतव्यम्। सर्वहोमेनाप्युपपद्यत एव। तस्माद्युक्तव्यो विशेषः।

अयमभिधीयते—कृते शास्त्रार्थे पुनः करणं तावन्न विद्यते। एकदेशेन कृतः शास्त्रार्थ इति प्रदर्शितम्। कथं तर्हि सर्वप्रदानाशङ्का?

द्वारेणापि करणसंबन्धोपपत्तेः न कृत्स्नहोमे प्रमाणम्। **तथा चास्य** रसस्य ग्रहणं **ऋजीषादेश्च त्यागः** यद्येकदेशेनापि कृते कृतः शास्त्रार्थः **किमिति तर्हि द्विर्हविषोऽवद्यति इत्येतस्मादेवोपसंहारः** यथा सोमे एकदेशेनापि यागः तथा पुरोडाशेऽपि एकदेशेनापि याग इति विनापि द्विर्हविषोऽवद्यति इति वचनं एकदेशेनापि यागोपसंहारः प्राप्त एव। किमित्येतस्मा[1]दुपसंहारोपन्यासः कृतः। **यथाकथंचित तत्राप्युपसंहारसिद्धेः। तत्रापि** पुरोडाशे **यथाकथंचित्** येन केनचिदवयवेनोपसंहारः प्राप्नोति। राद्धान्तमाशङ्कयति —**नियमार्थं तदिति चेत।** द्व्यवदानवचनं नियमार्थमिति चेत् कृत्स्नप्रदानेऽपि प्राप्तेऽवयवनियमार्थं तदिति। दूषयति—**सर्वप्रदानं तर्हि पूर्वपक्षवादिनो न घटते** द्व्यवदाननियमे श्रुते सर्वप्रदाने शङ्का न युक्ता। **किञ्च एकदेशेनाप्युपपद्यत इति नैतावता सर्वं न होतव्यम्। सर्वहोमेनाप्युपपद्यत एव।** तेन सोमशेषसद्भावो नित्यवन्नोपपद्यत एव। **तस्माद्युक्तव्यो विशेषः** पुरोडाशसोमयोः। पुरोडाशे विनापि द्व्यवदानवचनं कृत्स्नेन होमः प्राप्नोति। सोमे तु विना वचनं एकदेशेनैव होम इति। **अयमभिधीयते** विशेषः। सोमे अग्रबिन्दुनिपातेन **कृते शास्त्रार्थे पुनः करणं तावन्नोपपद्यते एकदेशेन कृतः शास्त्रार्थ इति प्रदर्शितम्।** यदि विनापि वचनेन एकदेशेन शास्त्रार्थः संपद्यते सोमेऽग्रबिन्दुनिपातमात्रेण **कथ तर्हि सर्वप्रदानाशङ्का?** द्व्यवदानस्य वचनेनैव

---

(1) G. एकस्मात

अवखण्ड्यावखण्ड्यदातव्यमिति वचनार्थावगमात्। न यागार्थत्वात् द्रव्यस्येत्युपसंहारः। अतः एकदेशेन नियम एवायम्। अत एव लौकिकाः पायसादि देवतोद्देशेन कृत्वा तत उद्धृत्य किञ्चित् देवतोद्देशेन त्यक्त्वा शेषं यथेष्टं विनियुञ्जते। तस्मादुपपद्यते संशयः-किं भक्षणेनैव शेषप्रतिपत्तिः उत नेति। वचनाभावात् न भक्षणेनेति पूर्वः पक्षः। भक्षणविशेषविधानात् अस्तीति द्वितीयः। अन्यथा हि विशेषविधानं नोपपद्यते। यदि विशेषविधानं नोपपद्यते कामं मोपपादि, न पुनर्वचनादृते भक्षः शक्यते प्रतिपत्तुम् यदा भक्षयति तदा द्विरिति एवमेवोपपत्तेः, एवं तर्हि तान्येव वचनानीति राद्धान्तः यावद्वचनं वचनम्।

श्रुतत्वात्। उत्तरं-श्रुतेऽपि वचने अवखण्ड्यावखण्ड्य दातव्यं इति वचनार्थावगमात्। अवदायावदाय होतव्यं इति मन्यमानेन सर्वप्रदानमाशङ्कितम् न सर्वप्रदानं यागार्थत्वात् द्रव्यस्येत्युपसंहारः। यागार्थं हि द्रव्यं तेन सकृत्कृतो यागः न गुणानुरोधेनावर्तयितव्यः इत्युपसंहारो द्रव्यवदानेन यागस्य। तस्मादेकदेशनियम एवायम् द्विर्हविषोऽवद्यतीति। एकदेशेन कृत्स्नेन वा यागे प्राप्ते एकदेशे नियमोऽयं न पुनरप्राप्तैकदेशहोमविधिः। यत एवावयवेनापि शास्त्रार्थसंपत्तिः। अत एव लौकिकाः पायसादि देवतोद्देशेन कृत्वा तत उद्धृत्य किञ्चिद्देवतायै दत्वा भवति च देवतोद्देशेन ग्रहणेऽर्थवति शेषं यथेष्टं विनियुञ्जते। अन्यथा कृत्स्नमेव देवतायै दद्युः तस्माद्ध्रियमाने शेषे उपपद्यते संशयः किं भक्षणेनैव शेषप्रतिपत्तिः उत नेति। तत्र वचनाभावान्न भक्षणेनेति पूर्वः पक्षः, भक्षविशेषविधानादस्ति भक्ष इति द्वितीयः। अन्यथा हि असति भक्षे भक्षविशेषविधानं द्विरैन्द्रवायवस्येत्यादि नोपपद्यते। कामं मोपपादि न पुनर्वचनादृते शक्यते भक्षः प्रतिपत्तुम्। न चेदं नोपपद्यते यदा भक्षयति तदा द्विरित्येवं विशेषविधानोपपत्तेः। एवं तर्हि यदि नित्यवद्भक्षणं न प्राप्नोति तदा एतान्येन विशिष्टस्य भक्षणस्य विधायकानि भवन्त्विति राद्धान्तः।

॥ ७ ॥ [1]चमसेषु समाख्यानात् संयोगस्य तन्निमित्तत्वात् ॥ २२ ॥

चमसेषु इदानीं वचनाभावान्नास्तीति पूर्वः पक्षः। तच्चमसतैवान्यथा नोपपद्यते। अयमस्य चमस इति वचनं यथैव विशेषविधानमन्यथा नोपपद्यत इति पूर्वत्र। द्रव्यान्तरचमनं तक्षणादि च न कल्पनामर्हति इति प्रदर्शितः।

॥ ८ ॥ उद्गातृचमसमेकस्य श्रुतिसंयोगात्[2] ॥ ८ ॥

चमसेषु समाख्यानात्। चमसेष्विदानीं वचनाभावान्नास्ति भक्ष इति पूर्वपक्षः। तत् चमसतैवान्यथा नोपपद्यते यदि तत्र चमनं न स्यात्। तस्मात् 'अयमस्य चमसः' 'अयमस्य चमसः' इति वचनानि 'प्रैतुहोतुश्चमसः' इत्येवमादीन्येव भक्षविधायकानि भवन्तु यथैव विशेषविधानमन्यथा नोपपद्यत इति पूर्वत्र वचनं तथेहापि चमसत्वानुपपत्तेः चमनविधानमिति। ननु द्रव्यान्तरविधानेनापि चमसता उपपद्यते इत्यत्राह— द्रव्यान्तरचमनं [3]तक्षणादि च न कल्पितं भवति। द्रव्यान्तरमेव तावच्चमनीयं कल्पनीयम्। क्लृप्तसोमद्रव्यसंभवे तस्य चायागशेषत्वात्। तच्छुद्धये तक्षणादि कल्पयितव्यम्। सोमे तु तत्र पानेपि न सोमेनोच्छिष्टा भवति इति वचनात् न तक्षणकल्पना। तस्मात् सोमचमननिमित्तैव चमसता। सा च विनावचनं नोपपद्यत इति वचनान्येतानि "प्रैतु होतुश्चमसः" इत्येवमादीनि।

उद्गातृचमसमेकस्य श्रुतिसंयोगात्। अत्र चत्वारः पक्षाः किमेकस्योद्गातुर्भक्षः, उत सर्वेषामृत्विजां, अथ वा सुब्रह्मण्यवर्जितानां छन्दोगानां त्रयाणां, अथ वा चतुर्णामपि छन्दोगानां उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्यानां इति। तत्र तच्चमसता अन्यथा नोपपद्यत इति चमनवचनान्येतानीति स्थितम्।

---

(1) P. 999 (2) P. 1001 (3) G. भक्षणादि

प्रोद्गातॄणामित्यत्र किं पुनः कारणं न गानं लक्षयति समाख्यैव किमिति लक्षयति ? उच्छब्दस्याविवक्षा प्राप्नोति गानकारिषु लक्ष्यमाणेषु । तथा च दर्शितम्–अन्यदेव गानं अन्यदेवोद्गानमिति । समाख्याने तु नायं दोषः । ननु चोद्गानं नाम गानमेव नास्ति

तत्र प्रथमपूर्वपक्षवादी उद्गातृप्रातिपदिकस्य ऋत्विग्विशेषे रूढत्वात् प्रातिपदिकार्थस्य च प्रधानत्वात् तदनुरोधितया 'पाशान्' इतिवत् बहुत्वमविवक्षितमिति मन्यते । द्वितीयपूर्वपक्षवादी तु वचनार्थस्याविवक्षातः प्रातिपदिकस्य लाक्षणिकत्ववर्णनमेव न्याय्यम् । उभयोरपि विभक्तिप्रातिपदिकयोरेवमर्थवत्ता भविष्यति । पाशे तु प्रातिपदिकस्य लक्षणीयाभावेन लक्षणया वर्णनासंभवात् अगत्या वचनस्याविवक्षेत्युद्गातृलक्षितानां सर्वेषामेव ऋत्विजां भक्ष इत्याह—**अपसुब्रह्मण्यवादी** तु गानक्रियाकारितया यौगिकेनोद्गातृशब्देन त्रयाणां गानकारिणामुद्गातृप्रस्तोतृप्रतिहर्तॄणां भक्ष इत्युक्तवान् । राद्धान्तवादी तु रूढिर्योगमपहरति इति यौगिकत्वे निरस्ते एकोद्गातृसमाख्यातप्रवचनाध्येतृत्वात् उद्गातृशब्देन छत्रिन्यायेन सर्वेषां छन्दोगानां लक्षणा । ततश्च तेषामेव भक्ष इत्याह—**प्रोद्गातॄणामित्यत्र किं पुनः कारणं न गानं लक्षयति समाख्यैव किमिति लक्षयति ।** अस्यार्थः—केन पुनः कारणेन गानक्रियाकर्तॄन् न लक्षयति । यौगिकः उद्गातृशब्दः किमिति न भवतीत्यर्थः ।' **समाख्यैव किमिति लक्षयति** केन हेतुना उद्गातृशब्दो लक्षणया वर्तत इति यावत् । राद्धान्तैकदेशी समर्थयमान आह—**उच्छब्दस्याविवक्षा प्राप्नोति गानकारिषु लक्ष्यमाणेषु ।** यद्युद्गायतीत्युद्गातोच्यते तदा एक एवोद्गानकारी न तु त्रयोऽपि । यदि त्रयोऽपि गानकारिणः उद्गातृशब्देन गृह्यन्ते तदा उच्छब्दस्याविवक्षा प्राप्नोति । **तथा च दर्शितम् । अन्यदेव गानमन्यदेवोद्गानमिति । समाख्याने** तु लक्षयति—**नायं दोषः**[1] । तत्र व्युत्पत्तिमन्तरेण उद्गातृशब्दः ऋत्विग्विशेषवचनो लक्षणया अन्यानपि छन्दोगानुपस्थापयतीति नास्ति उच्छब्दस्याविवक्षादोषः पूर्वपक्षी पुनराह— **ननु चोद्गानं नाम गानमेव नास्ति ।** तेन प्रलम्बत इत्यादिवत् अर्थान्तरानुपस्थापकत्वात् उच्छब्दस्य गानकारिण उद्गातृशब्देनोक्त,

---

(1) **नैष दोषः**

भक्तिर्हि सा। सा चोद्गीथवाच्या। यः पुनरुद्गायेदित्येवमादिषु प्रयोगः उद्गीथं गायेदिति तत्रार्थः। उच्छब्दो हि तत्र भक्तिलक्षणार्थः। गानं तु गानमेव। तस्मादुद्गातेत्यृत्विग्विशेषनामैवैतत्। न पुनः उद्गानस्य कर्ता उद्गाता। अत एव समाख्यैवाल लक्षयितुं प्रभवति न गानक्रियेति राद्धान्तितम्। अत एव अपसुब्रह्मण्यवादिनोऽपि अपन्यायवादिन एव। नात्र

इति नास्त्युच्छब्दाविवक्षादोषः। अर्थवतो हि अविवक्षादोषः नानर्थकस्य। भक्तिर्हि सा साम्नः। सामभागो भक्तिः। या द्वितीयाभक्तिः यामुद्गाता ऋत्विग्गायति सा चोद्गीथशब्दवाच्या रूढ्यैव। न पुनः तत्रोच्छब्दान्वितो गायतिर्वर्तते। ननूद्गीथं गायन्नुद्गायतीत्युच्यते। अतः उच्छब्दसहितो गायतिस्तत्रैव वर्तते इत्यत्राह—यः पुनः उद्गायेदित्येवमादिषु प्रयोगः उद्गीथं गायेदिति तत्रार्थः उच्छब्दो हि तत्र भक्तिलक्षणार्थः। गानं तु गानमेव। तत्रापि गायतिर्गीतिमात्रं ब्रूते। केवलमुच्छब्दः तत्रोद्गीथशब्दस्यावयवभूतस्समुदायलक्षणार्थः एवमुच्छब्दसहितस्य गायतेः समुदायशक्तिर्न कल्पिता भवति इति। यस्माद्गानमेवोद्गानं तस्मादुद्गातेति ऋत्विग्विशेषनामैवैतत्। न पुनरुद्गानस्य कर्तोद्गाता रूढोऽयमुद्गातृशब्दः ऋग्विग्विशेषे। न पुनरसौ यौगिकः; गानकारितया सर्वत्र प्रसक्तेः यदि हि उद्गानं नाम गानविशेषः स्यात् तदा तत्कारितया ऋत्विग्विशेषे शब्दवृत्तिर्लभ्यते न चैतदस्ति। तस्माद्रूढ एवायमिति। परमसिद्धान्ती त्वाह—यत एव रूढोऽयमुद्गातृशब्दः अत एवं समाख्यैव लक्षयितुं प्रभवति न गानक्रियेति राद्धान्तितम्। गानक्रियाया लक्षकत्वे यौगिकत्वप्रसङ्गात्। न च रूढौ सत्यां यौगिकत्वाश्रयणं युक्तम्। ननु रूढ्याश्रयणे बहुत्वं नोपपद्यते। लक्षणयोपपद्यत इति चेन्न। लक्षणैव दोषः। अत्राभिधीयते—रूढ्या यौगिकत्वे परिहृते वचनात् तदनुगुणा लक्षणा। न पुनः वचनमुपलभ्य परावृत्त्य यौगिकत्वाश्रयणमिति। यत एव समाख्या लक्षयति—अत एव च अपसुब्रह्मण्यवादिनोऽपि अपन्यायवादिन एव। एकप्रवचननिवेशेन लक्षणायां सर्वेपि तत्प्रवचनकारिणो लक्ष्यन्ते इति न शक्यते सुब्रह्मण्यं परित्यक्तुम्। ननु 'निषद्योद्गातारस्स्तुवन्ति' इति सुब्रह्मण्यवर्जिता

स्तुत्यादिश्रवणमिव सङ्कोचकप्रमाणमस्ति। ननु प्रोद्गातृणामिति त्रिष्वेव बहुवचनोपपत्तेः किमिति ससुब्रह्मण्यानां भक्ष इति? यदि बहुवचनोपपत्त्यर्थं सत्यमेव। अत्रोद्गातृशब्दः तदर्थकारिषु वर्तत इत्युक्तम्।

॥ ९ ॥ ग्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात्[1] ॥ २७ ॥

उक्तं वचनात् समाख्यानाच्च भक्षणम्। इदानीं वचनार्थविप्रतिपत्तौ सम्प्रतिपत्त्यर्थमेतान्यधिकरणान्यारभ्यन्ते। सर्वे हारियोजनस्यान्ते लिप्सन्त इति चमसिनामेवेति पूर्वपक्ष-

---

लक्ष्यन्ते तथेहापि स्यात् इत्यत्राह—**न चात्र स्तुत्यादिश्रवणमिव सङ्कोचे प्रमाणमस्ति।** तत्र हि स्तुतिसंबन्धात् स्तोत्रकारिणां त्रयाणामेव ग्रहणम्। इह तु नास्तीति विशेषः। **ननु च प्रोद्गातृणामिति त्रिष्वेव बहुवचनोपपत्तेः** कपिञ्जलवत्—**किमिति ससुब्रह्मण्यानां भक्षः** कल्प्यते। उत्तरं—**यदि बहुवचनोपपत्त्यर्थं सत्यमेव** त्रयाणामेव ग्रहणम्। **अत्रोद्गातृशब्दस्तदर्थकारिषु वर्तत इत्युक्तम्।** अतो बहुवचनमत्र प्रातिपदिकस्यार्थान्तरवृत्तौ हेतुः न स्वार्थान्वयमात्रे व्यापृतम्। बहुवचनेन लक्षणावृत्तिराश्रिता लक्षणा चैकप्रवचनसंबन्धादिति सर्वे छन्दोगा ग्राह्याः। तस्मात् सुष्ठूच्यते ससुब्रह्मण्यानां भक्ष इति।

ग्रावस्तुतो भक्षो न विद्यतेऽनाम्नानात्। **उक्तं वचनात् समाख्यानाच्च भक्षणम्। इदानीं वचनार्थविप्रतिपत्तौ संप्रतिपत्त्यर्थमेतान्यधिकरणानि आरभ्यन्ते।** अनेनावान्तरसङ्गतिमाह। ननु 'सर्वे हारियोजनस्य[2] लिप्सन्ते' इति वचनात् सर्वेषां हारियोजने भक्ष इति ग्रावस्तुतोऽपि भक्ष इत्यत्राह—**सर्वेषां हारियोजनस्य लिप्सन्त इति चमसिनामेवेति पूर्वपक्ष-**

---

(1) P. 1004 (2) R. & G. हारियोजनं

वादिना शङ्कितम्। वाक्यशेषात्। असन्दिग्धत्वात् प्रकृतवचनतया सर्वशब्दस्य नोपसंहारो युक्तो वाक्यशेषादिति राद्धान्तः पक्षः।

॥ १० ॥ वषट्कारांच्च भक्षयेत्[1] ॥ ३१ ॥

अत्र वषट्कर्तुः प्रथमभक्ष इति गुणश्रवणात् न भक्षविधानमिति आशङ्क्य विशिष्टविधानादिति राद्धान्तः। ननु चात्र विशिष्टविधानं नास्ति। न हि प्राथम्यं नाम भक्षणस्य कारकं येन यागविशिष्टा क्रिया विधीयेत।

वादिना शङ्कितम्। वाक्यशेषात्। अस्यार्थः—"यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति। अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते" इति वाक्यशेषे चमसिनां सङ्कीर्तनात् सर्वशब्दः चमसिष्वेव वर्तत इनि चमसिनामेव हारियोजने भक्षः। [2]न चमसी ग्रावस्तुदिति तस्य भक्षाभावः। **असन्दिग्धत्वात् प्रकृतवचनतया सर्वशब्दस्य नोपसंहारो युक्तः वाक्यशेषादिति राद्धान्तः।** अस्यार्थः—सर्वं हारियोजनस्येति निस्सन्दिग्धसकलऋत्विक्प्रत्ययः। प्रकृताश्च षोडशर्त्विजः। प्रकृतवचनश्च सर्वशब्दः। स यदि चमसिष्वेव अवस्थाप्यते तदा सर्वशब्दार्थो बाध्येत। तस्माद्वाक्यशेषादुपसंहारो न युक्तः। यदि वाक्यशेषे चमसिशब्दः परोक्षार्थवृत्तिः स्यात तदाप्युपसंहारोऽस्तु। न च चमसिशब्दस्य परोक्षार्थता चमसांश्चमसिनो भक्षयन्ति। हारियोजने तु सर्वे भक्षयन्तीति महाभागतया हारियोजनं स्तुवते इति राद्धान्तः।

वषट्काराच्च भक्षयेत्। **अत्र 'वषट्कर्तुः प्रथमभक्षः' इति गुणश्रवणात् न भक्षविधानं इत्याशङ्क्य विशिष्टविधानादिति राद्धान्तितम्।** अनेन यथाश्रुतं भाष्यकारीयमधिकरणमनुभाषितं आक्षेप्तुम्। आक्षेपमाह—**ननु चात्र विशिष्टविधानं नास्ति। न हि प्राथम्यं नाम भक्षस्य कारकम्, येन विशिष्टक्रिया विधीयेत।** अस्यार्थः—तत्र

(1) P. 1006 (2) R. नाचमसी ग्रावस्तुत्

अत एव पूर्वपक्षवादी न विशिष्टविधानमत्र संभवतीत्याशङ्कितवान्। कथं तर्हि राद्धान्तः? प्रथमभक्ष इति पदद्वयस्य चैकार्थ्याभिधानात् अभिहितविधानाच्चैकार्थ्यं मन्यते। तदयुक्तम्। समासेपि हि तद्भूताधिकरणन्यायात् अपगतिर्नास्ति। सत्यमेवं, तथापि पूर्वोत्तरपदसंबन्धायत्ता समासे च पदार्थान्तरसङ्गतिः

हि विशिष्टविधानं भवति यत्र हि विशेषणविशेष्यभावः संभवति। न च प्राथम्यभक्षणयोर्विशेषणविशेष्यभावः संभवति। अकारकत्वात् प्राथम्यस्य। कारकं हि कारकविभक्त्या क्रियां प्रति विशेषणतया उपादीयते। तेन तत्र युक्तो विशिष्टविधिः। यत्र पुनरकारकत्वात् न कारकविभक्त्या निर्दिश्यते न तत्र क्रियासंबन्ध इति कुतो विशिष्टविधानम्। न च प्राथम्यं कारकं, क्रमो हि सः। स च पदार्थाश्रितः पदार्थगुणो न कारकं, पदार्थनिवृत्तावव्यापारात्। तस्मात् राद्धान्त एवानुपपन्न इति। समाधाता आह—यत एव विशिष्टविधानाशङ्का नास्ति। **अत एव पूर्वपक्षवादी न विशिष्टविधानं संभवतीत्याशङ्कितवान्।** आक्षेप्ताऽऽह—भवतु पूर्वपक्षः, कथं तर्हि राद्धान्तः? समाधाता आह—**प्रथमभक्ष इति पदद्वयस्य एकार्थाभिधानात् अभिहितविधानाच्च एकार्थविधिं मन्यते।** अस्यार्थः—यदि विशेषणविशेष्यभावो न भवेत् तदा न स्यादेकार्थविधिः। यदा पुनः प्रथमभक्ष इति समासः तत्र च पदद्वयेन प्राथम्यविशिष्टः एक एव भक्षरूपोऽर्थोऽभिधीयते। यच्चाभिधीयते तदेव विधीयते इति अभिधानादेव एकार्थविधिः। आक्षेप्ता आह—**तदयुक्तम् समासेपि हि तद्भूताधिकरणन्यायात्** [1]**अपगतिर्नैवास्ति।** पदद्वयेन एकार्थोऽभिधीयत इति वदता त्वया प्रतिपदमर्थानभ्युपगमात् स्फोट एवाभ्युपगतः। स चायुक्तः। समासे हि तद्भूताधिकरणन्यायस्य प्रतिपदाभिधानसाधकस्य नैवापगतिरस्ति। तेन कथमेकार्थाभिधानम्? समाधत्ते—**सत्यमेवं, तथापि पूर्वोत्तरपदसंबन्धायत्ता समासे च पदार्थान्तरसङ्गतिः।** अस्यार्थः—नाहं स्फोटपक्षमङ्गीकृत्य एकार्थाभिधानं समासे ब्रवीमि, किन्तु

(1) G. **अवगति**

इति युक्तमुक्तं समासे च विदधतो नानेकगुणविधानं दुष्कर-मित्यतः सिद्धमत्र विशिष्टविधानम् ।

॥ ११ ॥ होमाभिषवाभ्यां च[1] ॥ ३२ ॥

अभिषुत्य हुत्वा भक्षयति इत्यपि भक्षविधानम् । होमाभिषवयोः प्राप्तत्वात् ।

पदद्वयेन विशेष्यविशेषणभूतौ अर्थौ अभिदधता विशिष्ट एकोऽर्थः प्रतिपाद्यते । तस्य च पदार्थान्तरेण पश्चात्संबन्धः । वाक्ये तु पदार्थान्तरसंबन्धानां परस्परं संबन्धः । नील-मुत्पलमानय इति द्वयोरानयतिना संबन्धः पूर्वं, पश्चात् गुणगुणिसंबन्धः । समासे तु 'नीलोत्पलमानय' इति गुणगुणिभावेन परस्परान्वितयोरेव आनयनसंबन्धः । तेनेहापि प्रथमभक्ष इति प्राथम्यभक्षयोः गुणगुणिभावेन संबद्धयोः करोत्युपात्तेन विधिना संबन्धः, न पुनः परस्परासंबन्धयोः । तदा हि अनेकार्थविधानं भवति । समासे च परस्परसंबन्धः प्रतीयत इति युक्तमुक्तं समासेन च विदधतो नानेकगुणविधानं दुष्करमिति । अतः सिद्धमत्र विशिष्टविधानम् । एवं च वदतो भाष्यनिबन्धनकारस्य अभिहितक्रमो विनियोज्यो विधेयश्च । यः पुनः पाञ्चमिकश्रुत्यादिगम्यः विधिवितानाख्योऽभिधानविनियोग-शून्यः नासौ विधीयत इति दर्शनं लक्ष्यते । सर्वत्रैव हि शब्दशक्तिवशेनायं शास्त्रार्थं वर्णयति । विवरणकारस्तु वस्तुस्वभावनिरूपणेन । तेन तन्मते सर्वत्रैव क्रमस्या-विधेयत्वमिति तत्रैवोक्तम् ।

होमाभिषवाभ्यां च । 'अभिषुत्य हुत्वा भक्षयति' इत्यपि भक्षविधानम् । कस्मात्पुनः भक्षणं विधीयते इति दर्शनं ? अभिषुत्य हुत्वेति किमिति होमभिषवावेव न विधीयेते भक्षणमनूद्यत एवार्थप्राप्तं इति तत्राह—होमाभिषवयोः प्राप्तत्वात् तत्र । ननु च होमाभिषवावेव भक्षणाङ्गतया किमिति न विधीयेते । भक्षणं वा तदङ्गतया किमिति न

---

(1) P. 1008

अङ्गतया च विधानानुपपत्तेर्भक्ष एव विधातव्यः ।

॥ १२ ॥ प्रत्यक्षोपदेशाच्चमसानामव्यक्तश्शेषे[1] ॥ ३३ ॥

होतृचमस इत्येवमाद्याभिः श्रुतिभिः समाख्याभिः सकलचमससंबन्धावगतेः अभिषुत्य हुत्वेत्यन्यत्र चमसेभ्यो भक्ष इति मन्यते। एवं प्राप्ते उच्यते। अभिषवहोमनिमित्तो भक्षश्चमसेषु भवत्येव। ननु च होतृचमस इति सकलचमसावगतिरित्युक्तम्। सत्यमुक्तं न पुनरभिषवनिमित्ततां बाधितुमर्हति। प्रापकाण्येतानि वचनानि न होतृचमस इत्यस्यां संबन्धावगतौ संबन्धान्तरनिवृत्तिः शक्यतेऽवगन्तुम्। प्राप्तिमात्रावगतेः। प्राप्तौ हि सत्यां कस्येदमिति विवक्षायां अन्यनिवृत्तिः प्रतीयते। यथा आग्नेय इत्युक्ते

विधीयते इत्यत्राह—अङ्गतया च विधानानुपपत्तेः इति। विधानान्तराभावात् भक्ष एव विधातव्यः इति।

प्रत्यक्षोपदेशात्। होतृचमसः इत्येवमाद्याभिः समाख्याभिः सकलचमससंबन्धावगतेः अभिषुत्य हुत्वा इत्यन्यत्र चमसेभ्यो भक्षः इति मन्यते पूर्वपक्षवादी। सकलस्य चमसस्य होत्रादिसंबद्धत्वात् चमसव्यतिरेकेण होमाभिषवनिमित्तं भक्षणं भविष्यतीत्यर्थः। एवं प्राप्ते उच्यते—अभिषवनिमित्तकोऽपि भक्षः चमसेषु भवत्येव। ननु होतृचमस इति सकलचमसावगतिरित्युक्तं, सत्यमुक्तं, न पुनरभिषवनिमित्ततां भक्षणस्य बाधितुमर्हति। अबाधिते च भक्षस्य होमाभिषवनिमित्तत्वे प्राप्नोत्येव चमसेष्वपि तन्निमित्तो भक्षः यस्मात् प्रापकाण्येतानि वचनानि न पुनः परिसङ्ख्यापकानि। कुत इत्याह—होतृचमस इत्यस्यां संबन्धावगतौ न संबन्धान्तरनिवृत्तिः शक्यतेऽवगन्तुम्। प्राप्तिमात्रावगतेः। प्राप्तौ हि सत्यां कस्येदमित्यपेक्षायां अन्यनिवृत्तिः प्रतीयते। सामान्यतः प्राप्तौ सत्यां कस्येदमिति विशेषापेक्षायां विशेषनिर्देशात् अन्यनिवृत्तिः प्रतीयते—यथा 'आग्नेय' इत्युक्ते

(1) P. 1009

नैन्द्राग्नस्यावगतिः। इह पुनः प्राप्तिफलत्वाद्वाक्यस्य नान्यनिवृत्तिः शक्यतेऽवगन्तुम्। ननु च प्राप्तावपि सकलावगतेर्विरोधो विद्यत एव। सत्यं यदि समाख्यया प्राप्तिः इह पुनः प्रैतुहोतुश्चमसः इति वचनात्। कल्प्यं चैतत अभिषुत्य हुत्वेत्यनेन।

॥ १३ ॥ एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत्[1] ॥ ३६ ॥

स्थितं चमसिनोऽभिषोतारो होतारश्च भक्षयन्ति इति। अत्रेदानीं कः प्रथमं भक्षयेदिति विचार्यते। अध्वर्युः भक्षयति हस्तगतत्वात यस्य हस्ते स जयतीति न्यायात्।

नैन्द्राग्नस्यावगतिः। इह पुनः प्राप्तिफलत्वाद्वाक्यस्य नान्यनिवृत्तिः शक्यतेऽवगन्तुम् होतृंचमस इत्यनेन भक्षणं विधीयते विशिष्टकर्तृकं न पुनः अन्यनिमित्तकं भक्षणान्तरं निवर्त्यते। ननु च प्राप्तावपि प्रापकत्वेपि वाक्यानां सकलावगतेर्विरोधो विद्यत एव। सकल—संबन्धावगमाद्धि सकलश्चमसिभिः भक्ष्यत इति लक्ष्यते। तेनान्यस्मिन् भक्षणान्तरे सति विरोधोऽस्त्येव। परिहरति—सत्यं विरोधः स्यात्—यदि समाख्यया प्राप्तिः। इह पुनः प्रैतु होतुश्चमस इति वचनात् प्राप्तिः। अस्यार्थः—सत्यं यदि सकलचमससंबन्धः होतुः समाख्यया प्रतीयते। न च समाख्यातः प्राप्तिः। किन्तु वचनात्। ननु वचनमपि समाख्यानुपपत्तेः कल्प्यमानं यथा समाख्यानमेव सकलविषयं कल्प्यते तत्राह—कल्प्यं तत् अभिषुत्यहुत्वा इत्यनेन वचनान्तराविरोधेन वचनं कल्प्यते कल्प्यत्वात्। तेनैकदेशद्वारेण सकलसंबन्धसमाख्योपपत्तिः।

एकपात्रे क्रमादध्वर्युः। स्थितं चमसिनोऽभिषोतारोहोतारश्च भक्षयन्तीति। अत्रेदानीं कः प्रथमं भक्षयेदिति विचार्यते। अनेन अवान्तरसङ्गतिमाह। पूर्वपक्षमाह अध्वर्युः प्रथमं भक्षयति हस्तगतत्वात् यस्य हस्ते स जयतीति न्यायात्। यस्य हि हस्ते

---

(1) P. 1010

ननु वषट्कर्तुः प्रथमभक्ष इति वचनात् कथमध्वर्योर्भक्षः ? भक्षमात्रविधानादपि वषट्कर्तुरेव प्रथमं भक्ष इति मन्वानस्य पुनरिदमधिकरणम्। प्रदर्शितं च प्राथम्याद्वषट्कारस्येति। वचनाच्चेत्युपसंहृतम्।

॥ १४ ॥ वचनादनुज्ञातभक्षणम्[1] ॥ ४० ॥

किं अनुज्ञातेनैव भक्षयितव्यं उत अननुज्ञातेनेति प्राप्तिदर्शनार्थमिदमधिकरणम्। असति वचनेऽनियमः। वचनात्तु नियम

द्रव्यमस्ति स तावत् सन्निहितं भक्षयति पश्चादितरे इति। ननु वषट्कर्तुः प्रथमभक्ष इति वचनात् कथमध्वर्योर्भक्षः। न वचनप्रतिपक्षो न्याय्य इति भावः। उत्तरं—भक्षमात्रविधानादपि वषट्कर्तुरेव प्रथमं भक्ष इति मन्वानस्य पुनरिदमधिकरणम्। अस्यार्थः —यद्यपि वचनं भक्षमात्रं विदधाति तथापि न्यायत एव प्राथम्यं लभ्यते इति मन्वानस्य नेदमधिकरणमारभ्यत इति। प्राथम्यविधानमङ्गीकृत्यायं विचार इति यावत्। प्रदर्शितं च प्राथम्याद्वषट्कारस्येति कृत्वाचिन्तयेदमधिकरणमारब्धमिति। दर्शितं चेदं प्राथम्यं वषट्कारस्य; तन्निमित्तं भक्षणमपि प्रथममेव युक्तमिति। अनेन न्यायाभिधानात्। अन्यथा न्यायाभिधानं अकिञ्चित्करं स्यात्। ननु वचनोपन्यासस्तर्हि नोपपद्यते तत्राह—वचनाच्चेत्युपसंहृतम्। कृत्वाचिन्तोद्घाटनमिदमित्यर्थः।

वचनादनुज्ञातभक्षणम्। किमनुज्ञातेन भक्षयितव्यं उतानुज्ञातेनेति प्राप्तिदर्शनार्थमिदमधिकरणम्। अनुज्ञानप्राप्तिं वाचनिकीं प्रदर्शयितुं उत्तरचिन्तार्थमिदमधिकरणम्। असति वचनेऽनियमः। वचनात्तु नियम एवानुज्ञापनस्य। नियमे

---

(1) 1011

एव। नियमे सति किं लौकिकेन शब्देनानुज्ञापनं उत वैदिकेनेति। मन्त्रानाम्नानात् वैदिकेनेति नियमः। इदमपि मन्त्रप्राप्तिदर्शनार्थमेव।

॥ १५ ॥ तत्रार्थात् प्रतिवचनम्[1] ॥ ४२ ॥

इदानीं प्रतिवचने संशयः किं मन्त्रेण प्रतिवचनं उत लौकिकेन शब्देनेति। कथं पुनरुपहूत इति मन्त्राम्नानात् सन्देहः उपह्वयस्वेत्यस्यैव शेषं मन्वानस्य। न ह्यनुज्ञापनात् पूर्वपठितं प्रतिवचनसमर्थमपि प्रतिवचनायालं भवतीत्यभिप्रायः। राद्धान्तवादी तु पूर्वतैवात्र बाध्यत इति राद्धान्तितवान्।

सति किं लौकिकेन शब्देनानुज्ञापनं उत वैदिकेनेति चिन्ता। मन्त्राम्नानात् वैदिकेन मन्त्रेणानुज्ञापनमिति नियमः। इदमपि मन्त्रप्राप्तिदर्शनार्थमेव। एतच्चाधिकरणद्वयं उत्तरचिन्ताशेषभूतमेव। अत एव पूर्वाधिकरणं लिखित्वा न पुनः सूत्रं लिखितम्।

तत्रार्थात् प्रतिवचनम्। इदानीं प्रतिवचने सन्देहः किं मन्त्रेण प्रतिवचनं उत लौकिकेन शब्देनेति। अनेन सन्देहमनुभाषते आक्षेप्तुम्। पूर्वपक्षाभावेनाक्षेपमाह—कथं पुनः उपहूत इति मन्त्राम्नाने सति सन्देहः। प्रतिवचनसमर्थस्यास्य[2] मन्त्रस्य लिङ्गेन विनियुक्तत्वात् अनेनैवं मन्त्रेण प्रतिवचनं युक्तमित्यर्थः। समाधत्ते—उपह्वयस्वेत्यस्यैव शेषं मन्वानस्य सन्देहः। अनुज्ञापनार्थमन्त्रशेषभूतत्वात् अनुज्ञापनार्थ एवेति। कुतः? न हि अनुज्ञापनात् पूर्वपठितं प्रतिवचनसमर्थमपि प्रतिवचनायालं भवतीत्यभिप्रायः। यस्त्वनुज्ञापनात्पूर्वपठितं तत् पूर्वं प्रयोक्तव्यम्। न चानुज्ञापने अकृते अनुज्ञानं प्रयुज्यत इत्यर्थात् अनुज्ञापनार्थ एवायं मन्त्रः इति। राद्धान्तवादी तु पूर्वतैवात्र बाध्यत इति राद्धान्तितवान्। अस्यार्थः—यथाविनियोगं क्रम इति लिङ्गात् विनियोगे स्थिते पूर्वतैव मन्त्रप्रयोगस्य बाध्यते न पुनर्लिङ्गविनियोग इति।

---

(1) P. 1012　(2) G. समर्थत्वादस्य

॥ १६ ॥ तदेकपात्राणां समवायात्[1] ॥ ४३ ॥

पठिते ज्ञापने प्रतिवचने च किमेकपात्राणामेवानुज्ञापनं उताविशेषेणेति। अविधानादविशेषं मन्यते पूर्वपक्षवादी। दृष्टार्थतया तु राद्धान्तः।

॥ १७ ॥ याज्यापनयनेनोपनीतो भक्षः प्रवरवत्[2] ॥ ४४ ॥

याज्यामात्रापनयनं मन्वानस्य पूर्वपक्षवादिनो होतुरेव भक्ष इत्यभिप्रायः। किमनवानश्रुतिः निषद्य यजतीतिवत् वचनं न पश्यति। न न पश्यति, याज्यामात्रे। एवमेतद्द्वयमप्युपपद्यत

तदेकपात्राणां समवायात्। स्थिते ह्यनुज्ञापने प्रतिवचने च किमेकपात्राणामेवेदमनुज्ञापनं प्रतिवचनं च उताविशेषेणेति चिन्ता। अनेनावान्तरसङ्गतिमाह। अविधानादविशेषं मन्यते पूर्वपक्षवादी। नात्र एकपात्रे भिन्नपात्रे वेति विशेषः श्रूयते। तस्मात् सर्वत्रेति। दृष्टार्थतया तु राद्धान्तः। एकपात्रेऽनुज्ञापनं प्रतिवचनं च दृष्टार्थं नान्यत्रेति तत्रैव भवति। दृष्टकार्ये कार्यान्तरकल्पनाया असंभवात्।

याज्यापनयेनापनीतो भक्षः। याज्यामात्रापनयं मन्वानस्य पूर्वपक्षवादिनो होतुरेव भक्ष इत्यभिप्रायः। 'स्वयं वा निषद्य यजति' इत्यनेन होतुस्सकाशाद्याज्यामात्रमेवापनीतं न पुनर्वषट्कारः। तेन वषट्करणनिमित्तो भक्षो होतुरेव। अत्र चोदयति —किमनवानश्रुतिः निषद्य यजति इति वचनं भवान्न पश्यति। यो हि पश्यति स कथमेवं ब्रूयात्। अनवानता यष्टव्यं इत्यविच्छेदकता होतृव्यापारे होमयागयोरुपदिश्यते। तत्र यजमानेनापि होतृव्यापारं कुर्वाणेनाविच्छेदोऽङ्गीकरणीयः। तत्र यदि यजमानो याज्यामात्रमेव कुर्यात् वषट्कारं तु होतैव कुर्यात् तदाऽवान्याद्यजमानः तदा याज्यामात्रेण वषट्काररहितेन यागानुपपत्तेः कथं याज्यामात्रप्रयोगे यजमानेनेष्टं स्यादिति भावः। न न पश्यति, पश्यत्येव। किन्तु याज्यामात्रे। एवं द्वयमप्येतदुपपद्यत

---

(1) P. 1012 (2) P. 1013

इत्यभिप्रायः। याज्याभिधानेन यजेः कर्तृत्वमुपपद्यत इत्यर्थः। राद्धान्तवादी तु मन्यते। सत्यमुपपद्यते न पुनर्वषट्कारापनये किञ्चन प्रमाणमस्ति इति सवषट्कारमेव याज्याप्रयोगमात्रेप्युपपद्यत इति व्यापारमङ्गीकृत्य कर्तृत्वं युक्तमिति। यत्तु प्रवरो नापनीयत इति तदत्रौपदेशिकत्वात् यथा प्रवरो नापनीयते तथा प्रदर्शितम्।

॥ १८ ॥ फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् ॥ ४७ ॥

किं फलचमसो भक्षविकार उतेज्याविकार इति। अस्मिन् संशये ब्रूमः नैवात्र संशयः तमस्मै भक्षं प्रयच्छेत् इति भक्षसंब-

---

एवेत्यभिप्रायः। याज्याप्रयोग एवेदमनवानं अविच्छेदात्मकं घटते तथा याज्याया अपि यागनिष्पत्त्यर्थत्वात् तदुच्चारणेपि भवत्येव यागं प्रति कर्तृतेति अनवानयागकर्तृत्वरूपद्वयं याज्या-प्रयोगमात्रेप्युपपद्यत इति न वषट्कारापनये किञ्चित्प्रमाणमस्ति। एतदेव विवृणोति—याज्याभि-धानेऽपि यजेः कर्तृत्वमुपपद्यत एवेत्यर्थः। राद्धान्तवादी तु मन्यते—सत्यमुपपन्नम्। न पुनः वषट्कारापनये किञ्चित्प्रमाणमस्ति इति सवषट्कारमेव याज्याप्रयोगमात्रेप्यु-पपद्यते इति व्यापारमङ्गीकृत्य कर्तृत्वं युक्तमिति। अस्यार्थः—यत्रैव होता प्राप्तः तत्रैव यजमानोऽपि नियुज्यते सवषट्कारे च होता प्राप्तः इति, सवषट्कार एव याज्याव्यापारे च होता प्राप्त इति सवषट्कार एव याज्याव्यापारे यजमानविनियोग इति न वषट्कारापनयने किञ्चित्प्रमाणमस्ति। ततश्चापनीते वषट्कारे नास्ति होतुः वषट्कारनिमित्तो भक्षः इति। यत्तु प्रवरो नापनीयत इति तदत्रौपदेशिकत्वात् यथा प्रवरो नापनीयते तथा दर्शितम्। अस्यार्थः—प्रवरस्तावदौपदेशिकः स यत्रैव सगुणः कर्तुं शक्यते तत्रैव कर्तव्यः होतरि चासौ सगुणः कर्तुं शक्यः, न यजमाने भ्रष्टावसरत्वात्। विकृतौ हि बाधात् विगुणमपि क्रियते न पुनः प्रकृताविति दर्शितं भाष्ये।

फलचमसो नैमित्तिको भक्षविकारः। फलचमसः इज्याविकारः उत भक्षविकार इत्यस्मिन् संशये ब्रूमः। नैवात्र संशयः यस्मात् तमस्मै भक्षं प्रयच्छेत् इति भक्षसंब-

---

(1) P. 1016

न्धित्वेन विधानात्। भक्षे सोमं विकरोति न यागे। न च यागविकारः शक्यते वक्तुम्। उत्पत्तिशिष्टत्वात् सोमस्य। विधीयमाने तु कर्मान्तरापत्तिः। ततश्च भक्षविकारोऽपि न स्यात् दूरे इज्याविकारता। अत्राभिधीयते—नेज्याविकारमन्तरेण भक्षं विकर्तुं समर्थः फलचमसः। इज्याशेषस्य हि सोमस्य भक्षः। न चाशेषभूते भक्ष्यमाणे स विकृतोभवति। तस्मादिज्याशेषतैव फलचमसस्यापि मन्तव्या। ननु चोत्पत्तिशिष्टत्वात् सोमस्य यागे विधानं न संभवतीत्युक्तम्। यागानुवादेन विधाने हि अप्रत्यभिज्ञान-

---

न्धित्वेन विधानात् भक्षे सोमं विकरोति न यागे यत्रैव हि श्रूयते तत्रैव विधीयमानः तत्साधनभूतमेव निवर्तयति। कारकं हि भक्षे फलचमसः श्रूयते न यागे तमस्मै भक्षं कुर्यादिति श्रवणात् न तेन यजेतेति। एवं तावत् यागसंबन्धित्वेनाश्रवणादुक्तम्। इदानीं सत्यपि संबन्धश्रवणे अशक्यतामाह—न चेज्याविकारश्शक्यते वक्तुम् उत्पत्तिशिष्टत्वात् सोमस्य। सोमेन यजेतेत्युत्पत्तावेव यागः सोमान्वितः प्रतीतो नान्यान्वितं प्रत्येतुं शक्यते। विधीयमाने च द्रव्यान्तरे 'गुणश्चापूर्वसंयोग' इत्यनेन न्यायेन —कर्मान्तरत्वापत्तिः। ततश्च भक्षविकारोऽपि न स्यात् दूरेणेज्याविकारः। अत्राभिधीयते—नेज्याविकारमन्तरेण भक्षं विकर्तुं समर्थः फलचमसः। कुतः? इज्याशेषस्य हि सोमस्य भक्षः। न चाशेषभूते भक्ष्यमाणे स विकृतो भवति। अस्यार्थः —यदि सोमेनैव यागः तदा न शक्यते यागशेषप्रतिपत्तिभूतभक्षविकारितापि फलचमसस्य वक्तुम्। यदि हि सोमेनेज्यते स एव भक्षयितव्यः। न च फलचमसेन तस्य भक्षणं निवारयितुं शक्यते। नह्यन्यस्मिन् प्रतिपादिते अन्यत्प्रतिपादितं भवति। तस्मात् प्रतिपत्तिभूतभक्षसंबन्धानुपपत्तेः इज्याशेषतैव फलचमसस्यापि मन्तव्या। श्रुतभक्षसंबन्ध—सिद्ध्यर्थं अश्रुतमपि यागसंबन्धित्वं कल्पयितव्यम्। ननु चोत्पत्तिशिष्टत्वात् सोमस्य यागे विधानं न संभवतीत्युक्तम्। परिहरति—यागानुवादेन विधाने हि अप्रत्यभिज्ञान-

मुक्तम्। न पुनः कार्येणापि संबन्धे। कार्यत एवायं संबन्धः। ननु च भाष्यकारेण यागसंबन्धाभावं चोदयित्वा याजयेदिति संबन्ध उक्तः यजिना। यागान्वयप्रदर्शनार्थं तदुक्तम् न पुनरनूद्य विधानायेत्यदोषः। भक्षं कुर्यादिति चोपसंहारः इममेवार्थं प्रकटीकरोति। तस्मादिज्याविकारः फलचमस इति सिद्धम्। गुणविधानानि च प्रदर्शितानि।

॥ २० ॥ अनुप्रसर्पिषु सामान्यात्[1] ॥ ५२ ॥

दशदश एकैकं चमसमनुप्रसर्पन्तीति विधानात् शतं ब्राह्मणाः सोमान् भक्षयन्तीत्यनुवादं मन्वानस्य नाभक्षो राजेति पूर्वः पक्षः।

मुक्तम् न पुनः कार्येणापि संबन्धे। अस्यार्थः—यदि यजिशब्देन यागमनूद्य फलचमसो विधीयते तदा गुणाद्भिन्नं यागान्तरं स्यात्। यदा तु कार्येणायं संबन्धः तदा नास्ति भेदः तद्यागसंबन्धिभक्षसंबन्धेन हि यागानुप्रवेशेऽङ्गीक्रियमाणे न यागान्तरशङ्कापि भवतीति। कार्यतश्चायं संबन्धः भक्षं कुर्यादिति श्रूयते। यथा भक्षो भवति तथा कर्तव्यम्। यदि चासौ यागशेषो भवति तदा भक्षो भवतीति—कार्यत एवायं संबन्धः। ननु च भाष्यकारेण यागसंबन्धाभावं चोदयित्वा याजयेदिति संबन्ध उक्तः। तेन यागानुवादेन फलचमससंबन्ध उक्तो भाष्यकारेण न कार्यतः। समाधत्ते—यागान्वयप्रदर्शनार्थं तदुक्तं न पुनः अनूद्य विधानायेत्यदोषः। उपक्रमे यागश्रवणात् यागसंबन्ध्येव भक्षणमिदम्। तेन तद्योगे नास्ति यागसंबन्ध इति प्रदर्शितम्। न पुनर्यागानुवादेन द्रव्यविधिरिति। भक्षं कुर्यादिनि चोपसंहारः इममेवार्थं भक्षसंबन्धद्वारेण यागसंबन्धिरूपं प्रकटीकरोति। तस्मादिज्याविकारः फलचमस इति सिद्धम्। गुणविधानानि च प्रदर्शितानि दर्भतरुणकादिगुणविधयश्च प्रदर्शिताः।

अनुप्रसर्पिषु सामान्यात्। दश दश एकैकं चमसमनुप्रसर्पन्ती'ति विधानात् शत ब्राह्मणाः सोमान् भक्षयन्तीति अनुवादं मन्वानस्य नाभक्षो राजेति पूर्वः पक्षः।

---

(1) 1021

सत्यमेवं यद्यनुवादः स्यात्। न चानुवृत्ते राजनि अनुवादः शक्यते वक्तुम्। अयथार्थानुवादप्रसङ्गात्। ननु चानुवादे अयथार्थत्वं अदोषः भूयस्त्वेन लक्षणा भविष्यति। सत्यं यद्ये-कान्ततोऽनुवादः इह पुनर्विधेयतयाप्युपपद्यत एवेति नायथार्थत्वं शक्यते। तस्मात् द्वयमप्येतद्विधीयते शतं ब्राह्मणाः दश एकैकं चमसं इति च। ननु च 'समं स्यादश्रुतत्वात' इति न्यायेन शते विभज्यमाने एकैकत्र दशदशप्राप्तेः दश दश एकैकं चमसमनु-प्रसर्पन्ति इत्यनुवादः।

राजसूये राज्ञोऽधिकारात् यजमानचमसे प्राप्ते राज्ञो भक्ष एव न स्यात् यदि शतं ब्राह्मणाः सोमान् भक्षयन्तीति विधिः स्यात् ब्राह्मणविधौ अब्राह्मणस्य राज्ञो निवृत्तिर्भवेत्। यदा दश दश एकैकं चमसमनुप्रसर्पन्तीत्येव विधिः तदा सङ्कलननिबन्धना च शतसङ्ख्याऽनूद्यते शतं ब्राह्मणा इति ब्राह्मणशब्दश्च ब्राह्मणेषु भूयस्त्वेन लक्षणया वर्तते तदा राज्ञोऽपि युक्त इति। अनुवादश्चायं युक्तः अन्यथा चोदकप्राप्तभक्षानुवादेन अनेकगुणविधानाद्वाक्यभेदः स्यात् इति पूर्वः पक्षः। राद्धान्तस्तु सत्यमेवं यद्यनुवादः स्यात्। न चानुवृत्ते[1] राजनि अनुवादश्शक्यते वक्तुम् अयथार्थानुवादप्रसङ्गात्। न चेति चशब्दः तुशब्दस्यार्थे। यद्यनुवादः स्यात् तदा स्यादेव राज्ञोऽपि भक्षः नत्वयमनुवादः। [2]राजन्यानिवृत्तौ ब्राह्मणशब्दस्य अयथार्थानुवादप्रसङ्गात्। विधौ तु नायथार्थता। तस्माद्विधिरेवायं शतं ब्राह्मणा इति। **ननु चानु-वादे अयथार्थानुवादत्वमदोषः भूयस्त्वेन लक्षणा भविष्यति।** अनुवादे यथाप्राप्तमनूद्यत इति ब्राह्मणाब्राह्मणाः यथा प्राप्ताः तथा तेषामनुवादो लक्षणयेति। **उत्तरं-सत्यं यद्येकान्ततोऽनुवादः। इह तु विधेयताप्युपपद्यत एवेति नायथार्थत्वमाश्रयितुं शक्यते। तस्मात् द्वयमप्येतद्विधीयते —शतं ब्राह्मणाः दश दश एकैकं चमसं इति च। ननु च 'समं स्यादश्रुतत्वात्' इति न्यायेन** शते विभज्यमाने एकैकत्र दशदशप्राप्तेः दश दश एकैकं चमसमनुप्रसर्पन्तीत्यनु-वादः। कथं अयं विधिरुक्तः इति चोद्यमात्रं न तु पूर्वपक्षः। यस्मादनुवादत्वेपि

---

(1) अनिवृत्ते (2) राजन्यनिवृत्तौ

न एकैकत्र शतप्राप्तेः प्रत्युद्देशं वाक्यसमाप्तेः। तस्माद्-भक्षो राजा ब्राह्मणविधानादिति। यत्पुनरत्र शतं ब्राह्मणास्सोमान् इत्यनेकार्थविधानं मन्यते, तदयुक्तं, यस्मात् कर्मान्तरविधानेनापि प्राकृतकार्यार्थतां दशमे वक्ष्यामः।

इति बृहत्यां तृतीयस्य
पञ्चमः पादः

यथार्थानुवादतया अयमेवानुवादो युक्तः न पुनः शतं ब्राह्मणा इति अयथार्थप्रसङ्गात। तस्मात् चोद्यमात्रमेवेदम्। परिहरति—न एकैकत्र शतप्राप्तेः प्रत्युद्देशं वाक्यसमाप्तेः। एकैकत्र चमसे शतं स्यात् तन्माभूदिति दशसङ्ख्या विधीयते। अधिकरणार्थमुपसंहरति —तस्मादभक्षो राजा ब्राह्मणविधानादिति। यत्पुनरत्र शतं ब्राह्मणास्सोमान् इत्यनेकार्थ-विधानं मन्यते तदयुक्तं यस्मात् कर्मान्तरविधानेनापि प्राकृतकार्यार्थतां दशमे वक्ष्यामः। अस्यार्थः—भक्षान्तरमेवेदं अनेकगुणविशिष्टं विधीयतां तथा दृष्टार्थतया प्राकृतभक्षणं निवर्तयिष्यतीति। एतच्चाभ्युपगममात्रम् कर्मान्तरविधानेनापीत्यपिशब्देन प्रकटीकृतम्। परमार्थतस्तु दशदश एकैकं इति विधिः तत्पूर्वकं शतं ब्राह्मणा इति ब्राह्मणमात्रविधिः शत-मित्येतदनुवाद इति सर्वं समञ्जसम्।

इति श्रीऋजुविमलायां तृतीयाध्यायस्य
पञ्चमः पादः

बृहत्यां

तृतीयाध्यायस्य षष्ठः पादः ॥

॥ १ ॥ सर्वार्थमप्रकरणात्[1] ॥ १ ॥

किं पुनरत्र कारणं पक्षद्वयोपन्यासस्य । कस्य पक्षद्वयोपन्यासस्य ? । चोदकादनारभ्यविधिः बलीयान् सामान्यतोदृष्टत्वाच्चेति । प्रथमस्य तावत्पक्षस्य इदं प्रयोजनं नैवात्र द्विरुक्तता विद्यते । उपदेशातिदेशाभ्यां प्रकृतिविकृत्योः स्रुक्संभवात् । एवं तर्हि सामान्यतो दर्शनेन प्रकृत्यर्थतेति । अपरस्य पक्षस्योपन्यासः प्राय-

---

अथ तृतीयाध्यायस्य षष्ठः पादः

सर्वार्थमप्रकरणात् । किं पुनरत्रकारणं पक्षद्वयोपन्यासस्य ? कस्य [1]पक्षद्वयोपन्यासस्य ? उत्तरं—**चोदकादनारभ्य विधिर्बलीयान् सामान्यतो दृष्टत्वाच्चेति प्रथमस्य तावत्पक्षस्य** चोदकादनारभ्यविधिर्बलीयानित्यस्य **इदं प्रयोजनम्** यत्पूर्वपक्षसमर्थनम् । कथं ? तत्राह—**नैवात्र द्विरुक्तता विद्यते प्रकृतिविकृत्योः स्रुक्संभवात् ।** अस्यार्थः—यदि विकृत्यर्थत्वे अनारभ्यविधेः द्विरुक्ततालक्षणो दोषः स्यात् तदा स्यादेव केवलप्रकृत्यर्थता । यावता नैव विकृत्यर्थत्वेपि द्विरुक्ततादोषः किन्तु प्रकृतावुपदेशप्राप्तां विकृतावपि चोदकप्राप्तां स्रुचमुद्दिश्य पर्णता विधीयते । तेनासावुभयत्रौपदेशिकीति । अतो विकृतावपि पुनश्चोदकतो न प्राप्नोत्येव । चोदकप्राप्तेरुत्तरकालभावित्वात् । एतदुक्तं भवति । अनारभ्य विधिं वर्जयित्वैव तावत् प्रकृतावारभ्य विहितानेव पदार्थान् गृहीत्वा उपकारः कथ्यते । तदुत्तरकालं च विकृतिष्वतिदेशः । एवं प्रकृतिविकृतिषु स्रुचां प्राप्तानां समानविधानेन अनारभ्य विधिना पर्णमयीत्वादिकं विधीयत इति । द्वितीयपक्षोपन्याससमर्थनमाह—**एवं तर्हि सामान्यतोदर्शनेन प्रकृत्यर्थतेत्यपरस्य पक्षस्योपन्यासः प्राय-**

(1) P. 1025 (2) G. पक्षद्वयस्य

दर्शनवत्। अयं तावदनन्तरः पक्षो निराक्रियते। न सामान्यतो दृष्टं शब्दार्थावगतौ हेतुः। नापि प्रायदर्शनम्। प्रकृताविव विकृतावपि संक्षेपविस्तारोपदेशदर्शनात्। इदानीमपरस्य पक्षस्य निरसनं चोदकापेक्षश्चेत् अनारभ्य विधिः। प्रकृतौ पूर्वमुपदेशोऽपेक्षणीयः उपदेशापेक्षत्वादतिदेशस्य। उपदेशेन चेदुपसंहृतोऽनारभ्यविधिः नातिदेशमपेक्षते।

दर्शनवत्। यदि स्रुक्संभवात् प्रकृतिविकृत्योरविशेषः एवं तर्हि यथा प्रायदर्शनेन निर्णयः तथाऽत्रापि सामान्यतो दृष्टेन संभवति प्रकृत्यर्थतानिश्चयः। प्रकृतौ संक्षेपविस्तारोपदेशः। अयमपि संक्षेपविस्तार एवेति प्रकृत्यर्थता प्रतिभातीत्ययं **तावत् अनन्तरपक्षो** राद्धान्ताभासरूपो **निराक्रियते। [1]न सामान्यतो दृष्टं शब्दार्थावगतौ हेतुः।** अयमाशयः—वैदिकं हि शेषत्वम्। न च तत्र सामान्यतो दृष्टस्यानुमानस्यावसरः। सिद्धार्थविषयत्वात प्रत्यक्षादीनां न कार्यस्वरूपे शक्तिः। प्रायदर्शनं तु शब्दार्थावगतौ हेतुर्भवत्येव शब्दप्रमाणशेषत्वेन लोके दृष्टत्वात्। तेन शब्द एव विशेषविषये प्रायदर्शनेनोपस्थाप्यते। न पुनश्चानुमानवत स्वतन्त्रः प्रमाणम्। तच्च प्रायदर्शनमपीह नास्ति। विकृतावपि तथा विधोपदेशदर्शनात्। तदाह—**नापि प्रायदर्शनं प्रकृताविव विकृतावपि संक्षेपविस्तारोपदेशदर्शनात्। इदानीमपरस्य पक्षस्य निरसनं चोदकापेक्षश्चेदनारभ्य विधिः प्रकृतौ पूर्वमुपदेशोऽपेक्षणीयः उपदेशापेक्षत्वादतिदेशस्य।** अस्यार्थः— विकृतौ स्रुक्संभवार्थं चोदकापेक्षश्चेत अनारभ्यविधिः तर्हि पूर्वं प्रकृतावुपदेशोऽपेक्षणीयः। कुतः? उपदेशापेक्षत्वादतिदेशस्य। उपदेशबलेन हि प्रकृतौ क्लृप्ते उपकारे तन्मुखेन विकृतावतिदेशः पदार्थानां भवति। तेन उपदेशसमाप्त्यर्थं प्रकृतौ तावदनारभ्यविधिः निविशते इत्यङ्गीकरणीयम्। न चानारभ्यविधिनिरपेक्षैव प्रकृतावुपकारकल्पना, सकलाङ्गसंपाद्यत्वादितिकर्तव्यतायाः। **उपदेशेन चेत् प्रकृतावुपसंहृतः** स्वार्थत्वेन गृहीतो**ऽनारभ्यविधिः** तदा विकृतौ प्रवेशार्थं स्रुक्प्राप्तये **नातिदेशमपेक्षते।** विकृतावपि चोदकप्राप्तां स्रुचमपेक्ष्य न पर्णमयीत्वा-

---

(1) G. स

कार्यत एव विकृतौ प्राप्तत्वात् । अतो द्विरुक्तताऽसंभवात् अद्विरुक्तत्वादिति स्थितो हेतुः । यस्तु यागसंबन्धोपन्यासः[1] असाववश्यं भावी चोदक इति प्रदर्शयितुम् । अवश्यंभावित्वे चाद्विरुक्तत्वस्य सिद्धिरुक्ता ।

॥ २ ॥ प्रकरणविशेषात्तु विकृतौ विरोधि स्यात्[2] ॥ १ ॥

ननु चानारभ्याधीतं साप्तदश्यं, यच्च प्रकरणाधीतं पाञ्चदश्यं उभयमपि श्रुत्यैव सामिधेनीसंबन्धितया

दिकं विधत्त इति यावत् । कुतः ? कार्यत एव विकृतौ प्राप्तत्वात् पर्णतादीनाम् । न च प्राप्ते पुनर्विधेरवकाशोऽस्ति । अतो द्विरुक्तेरसंभवात् अद्विरुक्तत्वादिति स्थितः सूत्रोक्तो हेतुः । अत्र भाष्यकारेण यागेनेतिकर्तव्यता संबध्यत इत्युक्तम् कस्तस्योपयोग इत्यत्राह—यस्तु यागसंबन्धोपन्यासः असाववश्यंभावी चोदक इति दर्शयितुम् । अवश्यंभावित्वे चाद्विरुक्तत्वस्य सिद्धिरुक्ता । अस्यार्थः—अद्विरुक्तत्वलक्षणहेतुसमर्थनार्थं अवश्यं भावितां चोदकस्य दर्शयितुं यागसंबन्धः इतिकर्तव्यताया उपन्यस्तः । यदि हि यागनिराकाङ्क्षा वैकृता भवेयुः तदा चोदको न भवेत् चोदकाभावे च पर्णता न प्राप्नोति इति सा विधीयते । यदा तु यागेनेतिकर्तव्यता संबध्यते न पात्रैः तदा यद्यपि च पात्राण्यनारभ्यविधिनैव निराकाङ्क्षीभवन्ति तथापि यागस्याकाङ्क्षाऽस्तीत्यवश्यं चोदक उत्पादयितव्यः । स चेदुत्पादयितव्यः तर्हि पर्णतापि प्राप्ता । न च प्राप्तापि सा बाधितुं शक्यते इति स्थितः द्विरुक्तेरसंभवः सिद्धान्तहेतुः ।

प्रकरणाविशेषात्तु विकृतौ विरोधि स्यात् । पूर्वपक्षमाह—ननु चानारभ्याधीतं साप्तदश्यं यच्च प्रकरणाधीतं पाञ्चदश्यं उभयमपि श्रुत्यैव सामिधेनीसंबन्धितया

---

(1) 1029 (2) P. 1029

चोद्यते। कोऽस्य प्रकरणोपन्यासः। नैवात्र(योऽत्र) प्रकरणं विनियोजकं येन प्रकरणविधिर्बलीयान् भवति। अथायमभिप्रायः प्रकरणसव्यपेक्षा एव श्रुत्यादयो विनियोजकाः इति। सत्यं ग्राहकलक्षणप्रकरणसव्यपेक्षाः न तु विनियोजकमपेक्षन्ते। ग्राहकसव्यपेक्षा चानारभ्यविधेरपि तुल्यैव। अतोऽत्रापि द्विरुक्तेरसंभवात् प्रकृतावेवेति युक्तम्।

अस्त्यत्र विशेषः। प्रकृतत्वे हि पाञ्चदश्यस्य ग्राहकप्रत्यभिज्ञानं संभवति। अव्यवायात्। अनारभ्यविधेः पुनः कार्यतो ग्राहकावमर्शः।

चोद्यते विनियुज्यते। कोऽयं प्रकरणोपन्यासः? एकग्रन्थेनाह—नैवात्र प्रकरणं विनियोजकं येन प्रकरणविधिर्बलीयान्। अस्यार्थः—सप्तदश सामिधेनीरनुब्रूयादिति यदनारभ्याधीतं साप्तदश्यं यच्च 'पञ्चदशसामिधेनीरनुब्रूयात्' इति प्रकरणाधीतं पाञ्चदश्यं उभयमपि श्रुत्यैव सामिधेनीसंबन्धितया चोद्यते, विनियुज्यते न प्रकरणेनेति। यदि प्रकरणेन विनियोगः स्यात् तदा यत्प्रकरणाधीतं तदेव विनियुज्यते नान्यत्। न चात्र प्रकरणं विनियोजकम्। अत उभयोरपि विनियोग इति। आशङ्कयति —अथायमभिप्रायः प्रकरणसव्यपेक्षा एव श्रुत्यादयः विनियोजका इति सप्तमाद्ये स्थास्यति। तेन यस्यैव प्रकरणपाठः तस्यैव श्रुत्यादिविनियोगो नान्यस्येति। दूषयति —सत्यं ग्राहकलक्षणप्रकरणसव्यपेक्षाः न तु विनियोजकमपेक्षन्ते। ग्राहकस्य सव्यपेक्षा च अनारभ्यविधेरपि तुल्यैव। पाञ्चदश्यमपि सामिधेनीसंबन्धमुखेनैव गृह्यते। सामिधेनीसंबन्धश्च अनारभ्याधीतस्यापि तुल्य इति द्वयोः ग्राहकग्रहणाविशेषात्। अतोऽत्रापि द्विरुक्तेरसंभवात् प्रकृतावेव साप्तदश्यमिति युक्तम्। राद्धान्तमाह—अस्त्यत्र विशेषः प्रकृतत्वे हि पाञ्चदश्यस्य ग्राहकप्रत्यभिज्ञानं संभवति अव्यवायात्, अनारभ्यविधेः कार्यतो ग्राहकावमर्शः। अस्यार्थः—यत्किल साधिकारग्राहकावस्थनियोगसन्निधौ श्रूयते तत्तदर्थमिति श्रुत्यैवावगम्यते। यत्तु पुनः दूरे श्रूयते तस्य तदीयपदार्थसंबन्धकर्तव्यता-

एवं च सति न क्लृप्ते कल्पना संभवति इति न प्रकृतौ निवेशः। प्रतिपत्त्यविरोधिनी हि कल्पना न प्रतिपन्नोपमर्दिनी। तस्माद्विकृतावनारभ्य विधानमिति सूक्तम्।

॥ ३ ॥ नैमित्तिकं तु प्रकृतौ तद्विकारः संयोगविशेषात्[1] ॥ १० ॥

कथं पुनरत्र पूर्वपक्षाशङ्का। इत्थमाशङ्का क्रत्वर्थे बाध्यमाने उपदेशः पीडितो भवति। नचोपदेशादृते प्रकृतौ साद्गुण्यावगतिर्भवति।

न्यथानुपपत्त्या तद्ग्राहकसंबन्धः। तेन यदेव शीघ्रं गृहीतं तदेव शीघ्रं विनियुज्यते विनियोगसामग्रीशैघ्र्यात्। यत्पुनर्विलम्बितं तत्प्रतिपक्षाक्रान्तत्वात् शेषिणो न तत्र निविशत इत्यन्यत्र विनियुज्यते। तदाह—एवं च सति न क्लृप्ते पाञ्चदश्ये प्रतिपक्षे संभवति साप्तदश्यकल्पना संभवति इति न प्रकृतौ निवेशः। प्रतिपत्त्यनुरोधिनी हि कल्पना न प्रतिपन्नोपमर्दिनी। तस्माद्विकृतौ साप्तदश्यमिति युक्तम्। इहाधिकरणे एतद्व्युत्पाद्यते किं पदार्थसंबन्धमुखेन प्रकृतमङ्गं गृह्यते उत सन्निधानमात्रेणेति। तत्र पदार्थसंबन्धमुखेन ग्रहणं पूर्वपक्षवादी मन्यते। अन्यथा द्वादशोपसत्ताया अपि ज्योतिष्टोमग्राह्यत्वोपपत्तेः। राद्धान्तवादी तु सन्निधानमात्रेण ग्रहणमाह। द्वादशोपसत्तायास्तु बलीयसा विनियोगसन्निधानेन नियोगसन्निधेर्बाधितत्वात् न ज्योतिष्टोमेन ग्रहणम्। न च सन्निधानमात्रेण ग्रहणेऽतिप्रसङ्गः सन्निधानस्यैव सर्वथा भावादिति।

नैमित्तिकं तु प्रकृतौ। कथं पुनरत्र पूर्वपक्षाशङ्का?। अयमाशयः—यथा प्रकृतौ चमसः श्रूयते तथा विकृतावप्यतिदिश्यते तेनोभयत्र क्रत्वर्थाविरोधात् केन विशेषेण विकृतौ निवेश आशङ्क्यते? उत्तरं—इत्थमाशङ्का। क्रत्वर्थे बाध्यमाने उपदेशः पीडितो भवति। न चोपदेशादृते साद्गुण्यावगतिर्भवति। यथोपदेशं कार्यं प्रकृतौ

---

(1) P. 1032

विकृतौ पुनः कार्यत एव साद्गुण्यावगतिः इत्येककार्य-त्वात् पुरुषार्थेनापि क्रतोः साद्गुण्यं शक्यते वक्तुं कार्य-विशेषात्। तस्मात् पुरुषार्थानां विकृतौ निवेशः। सत्यमेवं यदि प्रकृतावपि कार्यविशेषो न स्यात्। इह तु दृष्टार्थत्वादुपदेशस्य तुल्यः कार्यविशेषः। (कार्य)विशेषावगमाच्च सामान्यतो बलीयस्त्वं विशेषोपदेशस्येति प्रकृतावेव निवेशः।

॥ ४ ॥ इष्ट्यर्थमग्न्याधेयं प्रकरणात्[1] ॥ ११ ॥

कथं पुनरत्रेष्टेः प्रकरणं? इष्टेरपि नैवाधिकारश्रुतिरस्ति।

तेन यदि चमसो बाध्येत प्रकृतौ क्रतोर्वैगुण्यं स्यात् **विकृतौ पुनः कार्यत एव साद्गुण्यावगति-र्भवति इत्येककार्यत्वात् पुरुषार्थेनापि क्रतोः साद्गुण्यं शक्यते वक्तुम् कार्यविशेषात्** कार्यतो हि विकृतौ पदार्थाः प्राप्यन्ते। तत्र पुरुषार्थेनाप्येकार्थकारिणा कार्यं यदि निर्वर्तितं भवति तदा नास्त्येव वैगुण्यावगतिः पदार्थप्रधानभावत्वात्। तस्मात् पुरुषार्थानां परं विकृतौ निवेशः। **सत्यमेवं यदि प्रकृतावपि कार्यविशेषो न स्यात्। इह तु दृष्टार्थत्वा-दुपदेशस्य** चमसादीनां **तुल्यः कार्यविशेषः।** तेन पुरुषार्थेन कृते कार्ये चमसो बाध्यते बाधिते चाननुष्ठीयमाने क्रतोर्वैगुण्यं नास्ति। ननु केन विशेषेण गोदोहनेन चमसो बाध्यते। काम्यत्वादिति चेत् का तर्हि वार्ता फलचमसे तस्माद्वक्तव्यं फलचमसे। तदुच्यते। फलचमसे **विशेषावगमाच्च सामान्यतो बलीयस्त्व विशेषोपदेशस्य** पदादिवदेव, विशेषभूतपशुकामराजन्यादिविषयस्य विशेषोपदेशस्य सामान्यभूतदर्शपूर्णमासज्योतिष्टोमाधिकृत-मात्रविषयात् सामान्यत उपदेशात् आहवनीयोपदेशादिवत् बलीयस्त्वमिति **प्रकृतावेव निवेशो** नैमित्तिकानामिति।

इष्ट्यर्थमग्न्याधेयं प्रकरणात्। अत्र भाष्यकारः इष्ट्यर्थमाधानं प्रकरणादिति पूर्वपक्षयति। तदाक्षिपति—**कथं पुनरत्रेष्टेः प्रकरणं? इष्टेरपि हि नैवाधिकारश्रुतिरस्ति।**

---

(1) 1037

आधानस्यैव हि साधिकारस्य विधेः प्रकरणम्। तस्मान्नेष्टेः प्रकरणं इति शक्यते वक्तुम्। कथं तर्हि पूर्वः पक्षः? भवतो वा कोऽभिप्रायः। न किञ्चित्प्रतिभाति। अत्राभिधीयते—द्वयमप्यत्रोदाहरणम्। किमाधानं उतेष्टय इति। द्वयोः प्राधान्यमयुक्तमिति मन्वानस्य इष्टेश्चाङ्गबाहुल्यात प्राधान्यारोपेण पूर्वः पक्षः। राद्धान्तस्तु द्वयोरप्यधिकाराभावात्। अग्न्यर्थतया च विनियोगोपपत्तेः द्वयोरग्न्यर्थत्वम्। तथा च लिङ्गदर्शनम्।

आधानस्यैव हि साधिकारस्य विधेः प्रकरणम्। तदुक्तं—"आकाङ्क्षाद्वयस्य तत्प्रसूतेः" इति। न च पवमानेष्टेरधिकारश्रुतिरस्ति। तस्मान्नेष्टेः प्रकरणमिति शक्यते वक्तुम्। एवमाक्षिप्ते सति एकदेशी समाधातारं पृच्छति—कथं तर्हि पूर्वपक्षः? इति। समाधाता एकदेशिनमेव परिहासेन पृच्छति—भवतो वा कोऽभिप्रायः इति। एकदेश्याह —न किञ्चित् प्रतिभाति। परमसमाधाता आह—अत्राभिधीयते-द्वयमप्येतदुदाहरणम्। किमाधानं प्रधानं उतेष्टिरिति। अस्यार्थः द्वयमप्येतत्तावत् अग्न्यर्थं न भवति। तथा हि—विनियुक्ता अग्नयः द्वयस्य शेषिणः अविनियुक्ता वा? विनियुक्ताग्न्यर्थत्वे पर्णतादिवत्कत्वङ्गत्वप्रसङ्गः। अविनियुक्तास्तु कार्यशून्याः सक्तुवन्न शेषितामर्हन्ति इति स्थिते अधिकारः कल्पयितव्यः। तत्र किं पवमानेष्टिष्वधिकारः कल्प्यतां ता एव प्रधानं भवन्तु, यदि वा आधाने अधिकारकल्पना तदेव प्रधानमिति द्वयमप्येतदाधानपवमानेष्टिरूपमुदाहरणमिति। तत्र द्वयोः प्राधान्यमयुक्तमिति मन्वानस्य इष्टेश्चाङ्गबाहुल्यात् प्राधान्यारोपेण पूर्वः पक्षः। भूयस्त्वेनोभयश्रुतिरित्यनेन न्यायेन अङ्गबाहुल्यात् प्राधान्यं कल्पयित्वा तदङ्गमाधानमिति युक्तम्। परमार्थतस्तु अग्न्यर्थता द्वयोर्नास्तीति पूर्वः पक्षः। राद्धान्तस्तु द्वयोरप्यधिकाराभावात्। अग्न्यर्थतया च विनियोगोपपत्तेः द्वयोरग्न्यर्थत्वम्। यद्यपि भूतो विनियोगो नास्ति तथापि भाविनापि [1]विनियोगेन अग्नीनां शेषित्वोपपत्तेः अग्न्यर्थमेवेदं द्वयमिति। तथा च लिङ्गदर्शनम् इति।

---

(1) G. नियोगेन

॥ ५ ॥ तत्प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः ॥ १४ ॥

किमिदानीं प्रकृत्यर्थमाधानं उत सर्वार्थमिति। एतदुक्तं भवति—किं क्रत्वर्थानामग्नीनामाधानं उत आहितानां क्रत्वर्थतेति। कश्चात्र विशेषः? अयमस्ति विशेषः—यदि क्रत्वर्थानामाधानं ततः पर्णमयीत्ववत् प्रकृतिगामित्वमाधानविधेः। अथ तु आहितानां क्रत्वर्थता तदा होमादिमात्रशेषतयाऽग्नीनां सर्वार्थमाधानमित्युच्यते। किं पुनरत्र युक्तम्? पर्णतादिवत क्रतुसंबन्धानामेवाग्नीनामाधानमिति। आहिताग्नेरधिकारात् आहितानां क्रत्वर्थतेति।

तत्प्रकृत्यर्थं यथान्ये। स्थिते ह्यग्न्यर्थत्वे किमिदानीं प्रकृत्यर्थमाधानं उत सर्वार्थमिति। अनेन भाष्यकारीयसंशयोऽनुभाषितः। अत्र कारणभूतं संशयमाह—एतदुक्तं भवति—किं क्रत्वर्थानामाधानं उत आहितानामग्नीनां क्रत्वर्थतेति। यदि क्रत्वर्थानामग्नीनां आधानं तदा पर्णतादिवत् क्रतोरङ्गम्। ततश्च तद्वदेव प्रकृत्यर्थताऽस्य स्यात्। अथ तु आहितानामग्नीनां क्रत्वर्थता तदा स्वतन्त्राग्निसंबन्धात न क्रतोरङ्गम्। तेनाहवनीयादिमात्रसंबन्धात् आहवनीयादीनां च सर्वक्रत्वर्थत्वात् तद्वारेण सर्वार्थमाधानमित्युच्यते परमार्थतस्तु न कस्यचिदङ्गमिति। इममर्थं प्रश्नपूर्वकं प्रकटीकरोति—कश्चात्र विशेषः? अयमस्ति विशेषः। यदि क्रत्वर्थानामाधानं तदा पर्णमयीत्ववत् प्रकृतिगामित्वमाधानविधेः। अथ त्वाहितानां क्रत्वर्थता तदा होमादिमात्रशेषतया अग्नीनां सर्वार्थमाधानमित्युच्यते पूर्वपक्षमाह—किं पुनरत्र युक्तम? एवं मन्यते—पर्णतादिवत् क्रतुसंबन्धानामेवाग्नीनां आधानमिति। राद्धान्तमाह—आहिताग्नेरधिकारात् आहितानां क्रत्वर्थतेति युक्तम्। अस्यार्थः—यथाऽग्निकृतेनैवावघातादि क्रियते तथा आधानम्। किन्तु आहिताग्नेः सतः कर्मविधिष्वधिकारः नियतोपायत्वादग्नीनां प्रयोगकाले च कर्तुमशक्यत्वात्। अतः पुरुषेण लोहसुवर्णादिवत् प्रयोगात् बहिरग्नयः उपार्ज्यन्ते। उपार्जिताग्नेश्च कर्मणि समर्थत्वादधिकारः। ततश्च प्रागधिकाराभावात् ग्राहकग्रहणासिद्धेः अग्नीनां विनियोगाभावात न तन्मुखेन पर्णतावत्

यथा वा आहिताग्नेरधिकारस्तथा षष्ठे वक्ष्यामः। वसन्तादिकालविधिश्चैवमुपपन्नो भविष्यति।

॥ ६ ॥ तासामग्निः प्रकृतितः प्रयाजवत्[1] ॥ १६ ॥

कथं पुनः पवमानेष्टिषु पवमानेष्टिसंस्कृता अग्नयः आशङ्क्यन्ते। या अपि हि ताः अग्न्यर्था इष्टयः ता अपि पवमानेष्टय एव। तस्मादनाशङ्कनीयमेवेदमाशङ्कितम्। अत्रोच्यते—इदमेवात्र चिन्त्यते। किमयमतिदेशः प्रकृतौ यावदुपकारकं तावदतिदिशति उत यथाकार्यमतिदेश इति।

कत्वङ्गभावः। यथा वा आहिताग्नेरधिकारः तथा षष्ठे यथाविनियोगमधिकार इति वर्णयन्तो वक्ष्यामः। यदा आधानमनङ्गं तदा वसन्तादिकालविधिश्चोपपन्नतरो भवति। इतरथा अङ्गत्वे सति 'अङ्गानां मुख्यकालत्वात्' इति मुख्यकालत्वे प्राप्ते ज्योतिष्टोमे वसन्तविधेरनुवादः। प्रधानकाल एव प्राप्तेः दर्शपूर्णमासादिषु कालान्तरेष्वनुष्ठीयमानेषु अप्राप्ताधानकालविधिः। वसन्ते अनुष्ठीयमानेषु प्राप्ताधानकालविध्यनुवादः। न चैक एव विधिः कदाचिदनुवादः कदाचिद्विधिरिति युक्तम्। वैषम्यप्रसङ्गात्। अस्मिन्मते तूपपन्नतरो भवति। सर्वत्र स्वकालविधानात् तदङ्गकाधानविधायकत्वादिति।

तासामग्निः। कथं पुनः पवमानेष्टिषु पवमानेष्टिसंस्कृता अग्नयः आशङ्क्यन्ते। या अग्न्यर्था इष्टयः ता अपि पवमानेष्टय एव। तस्मादनाशङ्कनीयमेवेदमाशङ्कितम्। अस्यार्थः—यदेव यस्य कार्यं तदेव तस्य कारणं न भवति पवमानेष्टयश्चाहवनीयादीनां कारणम्। कथं ता एवाहवनीयादीनां साध्या भवेयुः। असंभावनीयत्वादस्यार्थस्य नेयमाशङ्कोपपद्यते—अत्रोच्यते इदमेवात्र चिन्त्यते किमयमतिदेशः प्रकृतौ यावदुपकारकं तावदतिदिशति उत यथाकार्यमतिदेश इति। न पवमानेष्टिषु पवमानेष्टिप्राप्तिरत्र चिन्त्यते। किन्तु

---

(1) P. 1040

तत्र पूर्वपक्षवादिनोऽभिप्रायः। यावदुपकारकं तावदतिदिशतीति। राद्धान्तवादी पुनः यथाकार्यमतिदेशः। उपदेशेतु विपरीतम्। तस्मान्नैतदुपदेशवद् द्रष्टव्यम्। उपदेशाविशेषप्रदर्शनार्थं चैतदुपदेशलक्षणे चिन्तितम्।

इदवात्र चिन्त्यने योऽयमतिदेशः सर्वत्र स किं यावदुपकारकं प्रकृतावङ्गमनङ्गं वा तत्र तावदतिशति। तेनानङ्गभूतानामपि पवमानेष्टीनामतिदेशः स्यात्। अथ यथाकार्यं यावदेव उपकारं जनयति तावदेवातिदिश्यते अङ्गं तु उपकारं जनयति न पुनः अनङ्गमपि। तेनाङ्गमात्रमतिदिश्यत इति यावत। ततश्च पवमानेष्टीनां विकृतिषु अनतिदेशः तासामनङ्गत्वात। **तत्र पूर्वपक्षवादिनोऽभिप्रायः यावदुपकारमतिदेश इति।** उपकारसंबन्धं हि पदार्थजातमतिदिश्यते। अनङ्गभूतस्यापि चोपकारकस्य उपकार(क)संबन्धोऽस्तीति तस्याप्यतिदेशो युक्त इति। **राद्धान्ती पुनराह—यथाकार्यमतिदेश इति।** यावदुपकारजनकमङ्गभूतं तावदतिदिश्यते। येन हि विना उपकारो न शक्यते प्रतिपत्तुं तदेवोपकरप्रतीपत्तौ कार्यप्रतिपत्तौ जातिप्रतिपत्तौ व्यक्तिवत् नान्तरीयकतया प्रतीयमानं विकृतिष्वतिदिश्यते। यच्चोपकारजनकं तेन विना उपकारो न शक्यते निरूपयितुम्। यत्तु उपकारकपदार्थजनकं तदुपकाराननुप्रविष्टम[न]ङ्गभूतम्। तेन विनापि जनकपदार्थवर्गावच्छिन्नः शक्यत एवोपकारः प्रतिपत्तुमिति न तद्वदतिदिश्यते। **उपदेशे तु विपरीतम्।** उपदेशे हि यावदुपकारकमप्युपदेशो भवति यथा पवमानेष्टीनां क्रतूपकारिता। अनङ्गभूता अपि पवमानेष्टयः उपदिश्यन्त एव। तस्मादिदमतिदेशाख्यं पदार्थप्राप्तिप्रमाणं **उपदेशवन्न द्रष्टव्यम्।** ननु मा नाम उपकारकमात्रमतिदिश्यताम्। तथापि[1] तस्याङ्गभूतपदार्थजनकतया आक्षेपोऽस्त्येव। किमनतिदेशार्थव्युत्पादनेन। उच्यते यद्यतिदेशःस्यात् अतिदिष्टमेव पदार्थजातमङ्गमिष्यते ततश्च विकृतिषु पवमानेष्टीनामङ्गभूतत्वात् स्वाङ्गसंस्कृतेष्वेवाग्निषु विकृतयो भवेयुः। विकृत्याहिता ह्यग्नयः विकृत्यपवर्गे अपवृज्येरत्। तस्मात् [2]सप्रयोजनमनतिदेशव्युत्पादनम्। **उपदेशाविशेषप्रदर्शनार्थं चैतत् उपदेशलक्षणे चिन्तितम्।** यो हि मन्यते यथाऽतिदेशो

---

(1) G. तवापि (2) G. सप्रयोजनमाद्यातिदेश

अन्यथा हि अन्वारम्भणीयाधिकरणेनैव गतम् स्यात्। अग्न्यर्थतया च पवमानेष्टीनां उपदेशान्यत्वे यत्नः इति विशेषः।

॥ ७ ॥ तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात्[1] ॥ १८ ॥

कथं पुनरिदमधिकरणं प्रारब्धम्। यथैव भाष्यकारेण। न तथा शक्यते वक्तुम्। तस्माद्यदि तावदिदं ज्योतिष्टोमाख्यप्रकरणं तदा

यावत्कार्यमतिदेशः तथोपदेशेनापि यावत्कार्येणापि भवितव्यम्। ततश्चाधानपवमानेष्ट्युपदेशो नोपपद्यते। अथ यावदुपकारकमुपदेशः अतिदेशोऽपि तथा स्यादितीमामाशङ्कामपनेतुमुपदेशाद्विशेष उक्तः। उपदेशो यावदुपकारकमप्युपदिश्यते अतिदेशे तु यावत्कार्यमेवेति दर्शयितुमुपदेशलक्षणे चिन्तितम्। अन्यथा यद्यतिदेशोपदेशविवेकास्पदमधिकरणं न स्यात् किन्तु पवमानेष्टिप्राप्त्यप्राप्तिविचारार्थं स्यात्। तदा अन्वारम्भणीयाधिकरणेनैव गतार्थं स्यात्। तत्र हि आक्षेपतः प्राप्तिश्चिन्तिता। इह तु सा न चिन्त्यते। किन्तु अतिदेश एवेति विशेषः। अग्न्यर्थतया च पवमानेष्टीनां उपदेशान्यत्वे यत्नः। पवमानेष्टीनामग्न्युत्पादकत्वाच्च पवमानेष्टिषु पवमानेष्टिसंस्कृतोऽग्निः न प्राप्नोतीति पवमानेष्टिविषयेऽनेन अभ्युच्चयेन उपदेशान्यत्वे यावदुपकारप्रापकत्वे यत्नः कृतो भाष्यकारेण। तदर्थमेव पवमानेष्ट्युदाहरणम्।

तुल्यः सर्वेषाम्। कथं पुनरिदमधिकरणं प्रारब्धम्। समाधाता आह—यथैव भाष्यकारेण। आक्षेप्ता आह—न तथा शक्यतेऽवगन्तुम्। पृच्छति—तस्मादिति। आक्षेप्ताऽऽह—तस्मात् यदि तावदिदं ज्योतिष्टोमप्रकरणं तदा पशुयागानां

(1) P. 1042

श्रुत्यादिभिरेव पशुयागसंबन्धात् विशसनादीनाम्। किमिदं प्रकरणविशेषादिति सर्वार्थतोच्यते। अथ प्रकरणे अविशेषः पशूनामित्यविशेषतोच्यते कथं तर्हि सूत्रं—अस्ति तु प्रकरणे विशेष इति। नचावान्तरप्रकरणं नाम किञ्चिदस्ति ज्यौतिष्टोमिकमहाप्रकरणे। प्रकरणान्तरे चाभ्युपगम्यमाने(ऽर्थे) न तावत्प्रकरणमग्नीषोमीयादेरुपपद्यते। किमित्येव हि तदा ज्योतिष्टोमसंबन्धोऽभ्युपगतः स्यात्। एवं च दीक्षणीयादेरितिकर्तव्यताभाव एव हीयेत।

प्रकरणाभावात् श्रुत्यादिभिरेव **पशुयागसंबन्धात्** विशसनादीनाम्। **किमिदं प्रकरणाविशेषादिति सर्वार्थतोच्यते।** प्रकरणाविशेषादिति द्विधा संभवति प्रकरणस्याविशेषादिति वा, प्रकरणे अविशेषादिति वा। तत्र तावत् षष्ठीसमासो नोपपद्यते पशूनां प्रकरणाभावात्। **अथ प्रकरणे** ज्यौतिष्टोमिके नास्त्यत्र विशेषः **सर्वपशूनामित्यविशेषतोच्यते।** दूषयति—**कथं तर्हि सूत्रं 'अस्ति तु प्रकरणे विशेष'** इति। न ज्योतिष्टोमप्रकरणे कश्चिदस्ति विशेषः सर्वपशूनाम्। अथ पशूनामेवावान्तरप्रकरणं अस्ति ज्यौतिष्टोमिकं महाप्रकरणं तदन्तर्गतानां दीक्षणीयादीनामवान्तरप्रकरणमिति घटत एवेदं अस्ति तु प्रकरणे विशेष इति, तत्राह—**न चावान्तरप्रकरणं नाम किञ्चिदस्ति ज्यौतिष्टोमिकमहाप्रकरणे** एकस्यैव विधेः साधिकारस्य करणेतिकर्तव्यताकाङ्क्षा, न पुनः निरधिकाराणामवान्तरविधीनामपि। स्वयमितिकर्तव्यताभूतत्वात् साध्यस्येतिकर्तव्यताकाङ्क्षा, न पुनः साधनस्य। इतिकर्तव्यताकाङ्क्षा च प्रकरणम्। तेनैकस्मिन्नेवाधिकारविधौ नास्ति प्रकरणद्वयसंभवः। **प्रकरणान्तरे चाभ्युपगम्यमाने** इत्थंभावपूरकत्वं इतिकर्तव्यतांशपूरकत्वं **अग्नीषोमीयादेर्न स्यात्।** कस्मादित्याह—**किमित्येव हि तदा ज्योतिष्टोमसंबन्धोऽभ्युपगतः स्यात्। एवं च दीक्षणीयादेः इतिकर्तव्यताभाव एव हीयेत।** करणतैव स्यात्। अस्यार्थः—यो हि वादी अवान्तरप्रकरणमिच्छति तेन दीक्षणीयादिनियोगानां साध्यत्वसिद्धये साधिकारत्वमिच्छता प्रकृत एव ज्योतिष्टोमापूर्वप्रवृत्तः पुरुषोऽधिकारी वक्तव्यः। तथा च सति अधिकारिविशेषणभूतमेव

ज्योतिष्टोमापूर्वं स्वर्गवत्, साध्यभावेन च अपूर्वमधिकारिविशेषणम्। यच्च साध्यं सत् अधिकारिविशेषणं तत्पर्यन्तं विषयीभूतस्य भावार्थस्य [1]करणत्वम्। यदेव हि नियोगे करणं तदेव फलेपि करणं नान्यत्। साध्यं हि विवृद्धं भवति। इह न पुनः साध्यान्तरं फलं न पुनः साध्यान्तरकल्पना। ततश्च दीक्षणीयादिकर्मणः स्वनियोगे (करणे एव) करणभूतस्याधिकारविशेषणीभूतं अपूर्वमपि प्रति करणतैवेति इतिकर्तव्यताभावो हीयते। नचोत्पत्तिशिष्टगुणावरोधदोषः कार्यतः करणत्वोपपत्तेः फलचमसवत्। अधिकारविशेषणीभूतं हि प्रति एतत्करणत्वं न पुनः साध्यत्वेन निर्देश्यकरणसमर्पणम्। अथोच्येत एवं सति इतिकर्तव्यताकाङ्क्षायाः[2] प्रधानविधेरनिवृत्तिरिति; सत्यं, तथापि न प्रमाणमन्तरेणेतिकर्तव्यतात्वं शक्यमध्यवसातुम्। अधिकारविधेरितिकर्तव्यताकाङ्क्षैव प्रमाणमिति चेत्, न, अवगते हि प्रधानविधिसंबन्धे कथंभावाकाङ्क्षा करणोपकारद्वाररूपं परिकल्पयन्ती प्रकरणशब्दाभिधेया प्रमाणं भवति। न चास्मिन् पक्षे प्रागधिकारविधिसंबन्धोऽभ्युपगतः। प्रागवगमे अधिकारविधिसंबन्धस्याभ्युपगम्यमाने अधिकारकल्पनावकाश एव नास्ति। तत्संबन्धेऽवगते प्रकरणेन विनियोगे सति प्रधानविधिप्रयोज्यतयानुष्ठानसिद्धेः। अनुष्ठानलाभार्थं हि नियोगो नियोज्यान्वितोऽभिधीयते इति लोके दृष्टं न पुनः अदृष्टेन रूपेण नियोज्यान्विताभिधानस्य उपकारः। अत एवाध्ययनविधावपि न नियोज्यकल्पना, अध्यापनविधिप्रयुक्त्यैवानुष्ठानसिद्धेः। तेन प्रागनवगताधिकारविधिसंबन्धानां दीक्षणीयादीनां सन्निधानमात्रे परमापूर्वप्रवृत्तोऽधिकारी कल्प्यते। तत्र च स्वरसेन योऽर्थः प्रतीयते स ग्राह्यः। स्वरसेन च करणतामेवावगच्छामः इति नेतिकर्तव्यतात्वसिद्धिः। अपि च यद्यङ्गविधिषु अधिकाराकाङ्क्षा तदा स्ववाक्यश्रुतान्येव किमिति वर्मादीनि रात्रिसत्रवदधिकारिविशेषणतया नावतिष्ठन्ते? किमिति साक्षाच्छ्रुतं स्वर्गकामपदमेवाधिकारिसमर्पकतया नानुषज्यते?। तथा पयोव्रतादिषु किमिति प्राङ्मुखनियमवत् भोजनप्रवृत्तोऽधिकारी न स्यात्। किञ्चानुष्ठानसिद्ध्येऽधिकारकल्पना। तत्र वरं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यनेन वचनेन सप्तमाद्यपूर्वपक्षवत् अधिकारवन्तं यजिमुद्दिश्य 'समिधो यजति' इत्येवमादिः इतिकर्तव्यतया समिदादिविधिरा-

(1) G. करणत्वाच (2) G. क्षयोः

दर्शपूर्णमासयोश्च प्रयाजादेरितिकर्तव्यताप्रसङ्गः प्रकरणविनियोज्यतया ।

श्रीयताम् यद् दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत तत् समिधो यजतीतीत्थं इति । ततश्च उद्दिश्यमानविशेषणस्याविवक्षितत्वात् अधिकारवत् यागमात्रसंबन्ध एव समिदादीनां स्यात इत्युपदेशत एव ऐन्द्राग्नादिष्वितिकर्तव्यतालाभः स्यात् । किञ्च यद्यपि परमापूर्वप्रवृत्त एवाधिकारी यद्यपि च दीक्षणीयादेरितिकर्तव्यतात्वेनान्वयः तथापि सर्वैरितिकर्तव्यतेति न सिद्ध्यति । अपि तु प्रत्येकमेव अपूर्वस्याधिकारिविशेषणत्वेनान्वितत्वात् प्रत्येकमितिकर्तव्यतात्वं स्यात स्वर्गवत । तथा हि—स्वर्गोऽग्निहोत्रदर्शपूर्णमासादिषु प्रत्येकमेवाधिकारिविशेषणत्वेनान्वितः । प्रत्येकं निरपेक्षैरेव संबध्यते । तथाऽत्रापि स्यात । अधिकारिविशेषणतयापि साध्यभूतस्योपायोपेयभावमन्तरेणान्वयो न पर्यवस्यति इत्युपायोपेयत्वं कल्प्यम् । द्विविधस्तूपायः करणेतिकर्तव्यतालक्षणः । तत्र करणत्वेनान्वयेऽसति इतिकर्तव्यतात्वेनान्वय एकैकवाक्याच्च दीक्षणीयादयो निरपेक्षा एवावगम्यन्ते इति निरपेक्षमेवेतिकर्तव्यतात्वं स्यात् । यस्य तु मते स्ववाक्यमात्रवर्तिना परमापूर्वेण सन्निधानमात्रेणैव दीक्षणीयादिसंबन्धः तस्य खलकल्पेऽधिकारविधौ एकस्मिन्नङ्गानां कपोतवत् निपतितत्वात् तदनुरूपमेकमेव करणोपकार-लक्षणद्वारं कल्प्येतेति युक्तमुक्तं सर्वैरेवेतिकर्तव्यतेति । न च सन्निधानमात्रेणैव संबन्धो लोके न दृष्टः । दृष्टकार्यादिष्विव अदृष्टेपि सन्निधानमात्रेणैव संबन्धोपदेशादनुष्ठानदर्शनात् । न च सन्निधानमात्रेण संबन्धेऽतिप्रसङ्गः । सन्निधानस्य सर्वत्राभावात् । यदि सन्निधानमकिञ्चित्करं किमिति परमापूर्वप्रवृत्त एव सन्निहितेष्वङ्गेषु अधिकारी भवति । यदि तु सर्वत्र पदार्थान्वयमुखेनैव अधिकारिसंबन्धः न पुनस्सन्निधानमात्रेण, तर्हि सामिधेनीद्वारेण संबद्धयोः प्रकरणाप्रकरणाधीतयोः पाञ्चदश्यसाप्तदश्ययोः तुल्यता स्यात् इति कुमति-वाचालतया । प्रकृतमनुसरामः । दूषणान्तरं चाह—**दर्शपूर्णमासयोश्च प्रयाजादेरितिकर्तव्यताप्रसङ्गः प्रकरणविनियोज्यतया ।** अस्यार्थः—प्रयाजादयोऽपि दर्शपूर्णमासयोः प्रकरणविनियोज्याः । ततश्च तेषामपि परमापूर्वप्रवृत्त एवाधिकारी । तेन साधिकारत्वात् तत्रापि इतिकर्तव्यता प्रसज्येत । यदि हि श्रुत्यादिविनियोज्या एव प्रयाजादयो भवेयुः

ततश्च 'अव्यक्तासु तु सोमस्ये'ति सोमिकी इतिकर्तव्यता प्राप्नोति दीक्षणीयादेरिव दार्शपूर्णमासिकी। किमिति वा न भवति ?

तदाऽधिकारिकल्पनानवकाश एव पर्णतादिवत्। असंयुक्तानां तु अनुष्ठानमलभमानानां अधिकारिकल्पना परमिति मत्वोक्तं प्रकरणविनियोज्यतयेति। ननु भवतु प्रयाजादेरिति- कर्तव्यता लौकिकीत्यत आह—ततश्च 'अव्यक्तासु तु सोमस्य' इति सौमिकीतिकर्तव्यता प्राप्नोति दीक्षणीयादेरिव दार्शपूर्णमासिकी। अस्यार्थः—सत्यामितिकर्तव्यताकाङ्क्षायां अव्यक्तत्वेन चोदनालिङ्गेन प्रयाजादिषु सौमिकी इतिकर्तव्यताऽतिदेशेन प्राप्नेति। न चेष्यते। अथोच्येत कथं प्रधानस्येतिकर्तव्यताऽङ्गेषु इत्यत्राह— दीक्षणीयादेरिव दार्श- पूर्णमासिकी। न प्रधानगुणभावः साध्यत्वे विशेषमावहति। तथा च प्रधानयोरपि दर्शपूर्णमासयोरङ्गेषु दीक्षणीयादिष्वितिकर्तव्यता दृश्यते इति। अत्र कश्चित्पण्डितंमन्य आह—यदि प्रयाजादिषु सौमिकविध्यन्ताभ्युपगमः तर्हि [1]विना सोमोपकारकल्पनया दर्शपू- मासयोरुपकारकल्पना नास्ति। दर्शपूर्णमासयोरुपकारकल्पनया विना सोमेप्युपकारकल्पना नास्ति इति परस्परोपकारकल्पनया आपतिता इतरेतराश्रयतेति। तदपि स्वप्रमाणानभि- ज्ञस्य मूर्ध्नाऽभिघातेन गिरिविदारणाशंसनम्। तथाहि—स्वाङ्गैरेवोपकारः कल्प्यते न पुनरङ्गाङ्गैरपि। प्रयाजाद्यङ्गानि प्रधानविधेरङ्गानि, न भवन्ति अवान्तरापूर्वप्रतिष्ठितत्वादिति नवमे उक्तम्। ततश्च विनापि प्रयाजादेरातिदेशिकीमितिकर्तव्यतां दर्शपूर्णमासयोरुपकार- कल्पना। तथा सोमेपि विनैव दीक्षणीयाविध्यन्तं आतिदेशिकमिति घटत एव परस्पर- मङ्गेष्वतिदेशः। यावदङ्गमतिदिश्यत इत्युक्तम्। तेन यावदेव सौमिकमङ्गं तावत प्रयाजादिष्वतिदिश्यते न पुनर्दीक्षणीयाद्यङ्गानि। तथा दीक्षणीयादिष्वपि यावदैष्टिकमङ्गं तावत एवातिदेशो न पुनः प्रयाजाद्यङ्गस्यापि। यदि परं समासेऽतिदेशे अङ्गानामाक्षेपतः प्राप्तिः सैव इतरेतराश्रयतया आत्माश्रयतया वा स्वयं बाध्यत इति सूक्ष्मदृशामेष विषयः। पृच्छति किमिति वा न भवति इति। एवं मन्यते अधिकृताधिकारेण प्रयाजादीना- मपि साधिकारत्वात् साध्यभूतानां भवतु सौमिकी इतिकर्तव्यता, प्रमाणत एव भावित्वात्

---

(1) G. विधिना

उक्तमवान्तरप्रकरणाभावादिति। न ह्येकस्मिन् प्रयोगवचने नानाकिमित्याकाङ्क्षा संभवति। एकश्चायं प्रयोगवचनः सेतिकर्तव्यताकस्य प्रयोगस्यैकशब्द्यादिति वक्ष्यति।

कथं तर्हि दीक्षणीयादेरातिदेशिका धर्माः? मा भूवन्, न पुनः किमित्याकाङ्क्षाद्वयमेकस्मिन् प्रकरणे संभवति।

इति। उत्तरमाह—उक्तमवान्तरप्रकरणाभावादिति। यद्यवान्तरप्रकरणं स्यात् तदा भवेदप्यतिदेशः न त्वसावस्ति। कुतो नास्तीत्याह—न हि एकस्मिन् प्रयोगवचने नाना किमित्याकाङ्क्षा संभवति। एकस्मिन् प्रयोगवचने न उभयरूपा किमित्याकाङ्क्षा संभवति। एकेनैवाधिकारविधिना प्रयोगस्यानुष्ठानलक्षणस्योक्तत्वात्। अनुष्ठानलाभाय हि अधिकारिविशेषणाकाङ्क्षा। लब्धे पुनः अन्यतोऽनुष्ठाने किमधिकारिविशेषणाकाङ्क्षया। अथ मन्यसे नानयेनानुष्ठानमाक्षिप्तमिति तत्राह—एकश्चायं प्रयोगवचनः सेतिकर्तव्यताकस्य प्रयोगस्यैकशब्द्यादिति वक्ष्यति। एक एवाधिकारविधिः सर्वं निरधिकारं सन्निहितं स्वार्थत्वेन गृहीत्वा विनियुज्य प्रयोगमाक्षिपतीति दर्शितं ऐकशब्द्यादिति तस्मान्नास्ति नानाविधाधिकारिविशेषणाकाङ्क्षेति। निरधिकारतया प्रयाजादीनां साध्यत्वानवगमात् नेतिकर्तव्यताकाङ्क्षाऽस्तीति नास्ति सौमिकधर्मातिदेशः। कथं तर्हि दीक्षणीयादेरिति-कर्तव्यताकाङ्क्षा विना चाकाङ्क्षां नास्त्यातिदेशिका धर्माः। अभ्युपगतं चेदं त्वया दृष्टान्तमभिदधता दीक्षणीयादेरिव दार्शपौर्णमासिकीतिकर्तव्यतेति। उत्तरं—माभूवन्नातिदेशिका धर्माः। न पुनः किमित्याकाङ्क्षाद्वयमेकस्मिन् प्रकरणे संभवति। अस्यार्थः—माभ्युपगमेन वस्तु व्यवस्थाप्यते। यद्यभ्युपगमो न्यायेऽस्मिन् स्थिते न घटते मा घटिष्ट। एतस्मान्नवारद्य-वचनम्। परमार्थतस्तु भवत्येव दीक्षणीयादिषु धर्मप्राप्तिः। यस्मादङ्गभूतेष्वपि तावत् अपूर्वाणि तेष्वङ्गीकरणीयानि। अन्यथा क्षणिकानामङ्गत्वानुपपत्तेः इत्युक्तमेकादशे भाष्यकारेण। तानि चापूर्वाणि प्राकृतोपकारापेक्षीणीति प्रयाजादिदर्शनेन कल्प्यते। तदुक्तं —विकृतित्वे पुनः लिङ्गमेवेति स्थितिः। एतच्च कृत्स्नविधानाधिकरणे वक्ष्यामः।

एवं स्थिते यदिदमुच्यते प्रकरणात्सवनीयस्येति स्थानाच्चाग्नीषोमीयस्येति सर्वमिदमन्धपदम्। तस्मात् महता प्रयत्नेनात्र भाष्यं व्याख्येयम्। अत्राभिधीयते—प्रकरणं तावदिदं ज्योतिष्टोमस्य। औपवसथ्येऽहनि धर्माश्चोद्यन्ते। न च पशवस्तस्मिन्नहनि सर्वे सन्निहिताः सन्निहितवचनं चोद्देशकं पदम्। अतः कस्यायमुद्देशक इति चिन्त्यते विशसनादिविधिषु। तत्र प्रकरणाविशेषात् सर्वे पशवो ज्योतिष्टोमार्थतया प्रकृता इति सर्वार्थतां मन्यते।

अपरेण पूर्वपक्षिणा अहस्सामान्यसन्निधानात्तु (सन्निकृष्ट इति) सन्निधिविशेषो विद्यत इति अस्ति तु प्रकरणविशेष इत्युक्तम्।

एवं स्थिते अवान्तरप्रकरणाभावे यदिदमुच्यते प्रकरणात्सवनीयस्येति स्थानाच्चाग्नीषोमीयस्येति तत्सर्वमिदं अन्धपदम्। असमीक्ष्य प्रवृत्तत्वात्। तस्मात् महता प्रयत्नेन भाष्यं व्याख्येयम् इत्याक्षेपः। समाधानं तु— अत्राभिधीयते। प्रकरणं तावदिदं ज्योतिष्टोमस्य। औपवसथ्येऽहनि धर्माश्चोद्यन्ते। न च पशवस्तस्मिन्नहनि सर्वे सन्निहिताः। सन्निहितवचनं चोद्देशकं पदम्। अतः कस्यायमुद्देशक इति चिन्त्यते विशसनादिविधिषु। एतदुक्तं भवति—नात्र पशूनां प्रकरणमङ्गीकृत्य चिन्त्यते। किन्तु ज्योतिष्टोमस्यैव प्रकरणम्। विशसनादयश्च श्रुत्यैव पशुसंबन्धितया विनियुज्यन्ते। तत्र पशुशब्दः उद्देशकः उद्देशकश्च शब्दः सन्निहितवचनः। तत्र धर्मविधिषु कः पशुषु सन्निहितः योऽयमुद्देशकैः शब्दैरुपादीयते इति चिन्त्यते। तत्र प्रकरणाविशेषात् सर्वे पशवो ज्योतिष्टोमार्थतया प्रकृता इति सर्वार्थतां पूर्वपक्षवादी मन्यते।

अपरेण तु पूर्वपक्षिणा अहस्सामान्यसन्निधानात् एकस्मिन्नौपवसथ्येऽहनि सवनीयस्य धर्माणां च विधानात् सवनीयस्य सन्निधिविशेषो विद्यत इति अस्ति तु प्रकरणविशेष इत्युक्तम्। ननु चावान्तरप्रकरणाङ्गीकार एवात्र दृश्यते यत एवमाह—सवनीय-

प्रकृतलक्षणं च प्रकरणमत्राभिप्रेतम् । अतः स्थानादग्नीषोमीयस्येति युक्तम् । (सिद्धम्) । अप्रकृतसिद्ध्यर्थं च सौत्येऽहनि विधानं सवनीयस्येत्येवमाद्युपपन्नम् । ननु सान्निधानविशेषेणाग्नीषोमीयार्थत्वे सिद्धे ज्योतिष्टोमप्रकरणे चाम्नानस्यार्थवत्वे तस्मिन्नेव प्रकरणे पशुद्वयस्यातिदेशः । न ह्येकः प्रयोगवचनः उपदेशेन अतिदेशेन च तानेव धर्मान् गृह्णाति । अस्य चोद्यस्य परिहारं अतिदेश एव वक्ष्यामः कृत्स्नविधानादपूर्वः सोम इत्यत्र । अस्मिन्

प्रकरणे पशुधर्मास्समाम्नाता इति तत्राह—**प्रकृतलक्षणं सन्निधानलक्षणं प्रकरणमत्राभिप्रेतम् ।** न पुनरितिकर्तव्यताकाङ्क्षालक्षणम् । तेन नास्ति विरोधः । यत एव सन्निधानलक्षणं तत्र प्रकरणमभिप्रेतं **अत एव स्थानादग्नीषोमीयस्येति** युक्तम् । अन्यथा इतिकर्तव्यतालक्षणात् प्रकरणात् स्थानस्य दुर्बलत्वात् स्थानस्य विनियोजकत्वमेव न स्यात् । सन्निधानपक्षे तु युक्तमुभयोस्तुल्यबलत्वम् । विधानेन हि सवनीयास्तत्र सन्निहिताः । स्थानेन हि अग्नीषोमीयः इति युक्तमुभयशेषत्वम् । **अप्रकृतसिद्ध्यर्थं च सौत्येऽहनि विधानं सवनीयस्येत्येवमादि** यदुक्तं तदुपपन्नार्थं भवति । अन्यथा अहरन्तरे सत्यपि विधाने न ज्योतिष्टोमवत् प्रकरणाभावश्शक्यते वक्तुम् । कथं पुनः **सन्निधानविशेषेणाग्नीषोमीयार्थत्वे सिद्धे ज्योतिष्टोमप्रकरणे चाम्नानस्य अर्थवत्त्वे तस्मिन्नेव प्रकरणे पशुद्वयस्यातिदेशः** कृतः ? **न ह्येकः प्रयोगवचनः उपदेशेन अतिदेशेन च तानेव धर्मान् गृह्णाति ।** प्रयोगवचन एवाङ्गानामितिकर्तव्यतां गृह्णाति इति भ्रान्तस्येदं चोद्यम् । उत्तरमाह—**अस्य चोद्यस्य परिहारमतिदेशे** वक्ष्यामः "**कृत्स्नविधानादपूर्वः सोमः**" इत्यत्र । "प्राप्त्युपादानयोर्भेदानभिज्ञस्यैषा विधिपरिचोदना" इत्यनेन अङ्गविधिर्यः स एव [1]स्वाङ्गानां प्रापको लिङ्गदर्शनोत्थापितप्राकृतोपकाराकाङ्क्षः । प्रयोजकता तु प्रधानविधेरिति तत्रैव वक्ष्यति । **अस्मिन् पुनरधिकरणे उपदेशविशेषो दर्शितः । उपदेशविशेषत्वाच्छेषलक्षणस्य ।** तेनोपदेशस्तावदेवं रूपः । यदि पशुद्वये अतिदेशो घटते घटताम् । अथ न घटते मा घटिष्टेति भावः ।

---

(1) G. **सवनाङ्गानां**

पुनरधिकरणे उपदेशविशेषो निरूपितः। उपदेशविशेषत्वाच्छेषलक्षणस्य। कः पुनः औपवसथ्येऽहनि सवनीयेषु विधीयमानेषु आश्विनकाले वाक्यभेदः? नन्विदं पूर्वपक्षी चोदयति। कथं च सौत्येहनि सवनीयेषु विधीयमानेषु वाक्यभेदं राद्धान्तवादी चोदयति। किञ्च उभयत्र वाक्यभेद एव चोदितः। उच्यते। अनेकगुणविधानमेव वाक्यभेदं पूर्वपक्षवादी मन्यते। राद्धान्तवाद्यपि वपाप्रचारमात्रोत्कर्षं मन्वानः पुनरालम्भविधाने च वाक्यभेदमेव चोदितवान्। आग्नेय्यौदासीन्यमुक्तवान्।

कः पुनरौपवसथ्येऽहनि सवनीयेषु विधीयमानेषु साध्येषु आश्विनकाले वाक्यभेदः पूर्वपक्षवादिना परिचोदितः, पूर्वपक्षवादी हि औपवसथ्येऽहनि सवनीयानां विधानं साधयितुं आश्विनकाले सवनीयविधाने वाक्यभेदमाह कोऽसौ[1] वाक्यभेद इत्यर्थः। कथं वा सौत्येऽहनि सवनीयेषु विधीयमानेषु साध्येषु सत्सु 'आश्विनं ग्रहं गृहीत्वा त्रिवृता' इत्यस्य वाक्यभेदः पूर्वपक्षिणं प्रति राद्धान्तिना परिचोदितः। किञ्चोभयत्र वाक्यभेद एव चोदितः। ततश्च तुल्यत्वात् कथं सिद्धान्तसिद्धिरिति मन्यते। उत्तरमाह—अनेकगुणविधानमेव पूर्वपक्षी वाक्यभेदं मन्यते। परिव्याणकाललक्षणस्तावदेको गुणः अपरश्चोपाकरणकाललक्षणः इति गुणद्वयविधानं पूर्वपक्षवादी मन्यते। राद्धान्तवाद्यपि वपाप्रचारमात्रोत्कर्षं मन्वानः पुनरालम्भविधाने च वाक्यभेदमेव चोदितवान् द्व्यार्थतामुक्तवान्। अस्यार्थः—राद्धान्तवादी तु औपवसथ्येऽहनि समाम्नातस्यालम्भस्य पुनस्सौत्येहनि विधाने, तथा आश्विनकाले विधाने च वाक्यभेदमुक्तवान्। न च वपाप्रचारेण सौत्याहस्संबन्धिना[2] अर्थात सौत्यमेवाहः प्रापितं तस्य पश्वालम्भस्याश्विनकालतामात्रं विधीयत इति शक्यते वक्तुम्। वपाप्रचारस्य गुणभूतत्वात पशुयागगुणभूतो हि वपाप्रचारः स पशुयागगुणभूतमालम्भं न शक्नोत्युत्क्रष्टुम्। तेन वपाप्रचार एव सौत्येऽहनि। पश्वालम्भस्त्वौपवसथ्य एव।

---

(1) G. तेनासौ (2) G. संबन्धिनी

।किं पुनरनयोर्वाक्यभेदयोर्दूषणम्। राद्धान्तवाद्युक्तमेव दूषणम्। अपरिहार्यं हि तत्र वाक्यान्तरत्वम्। पूर्वपक्षवाद्युक्तस्य तु विशिष्टविधानादपि सिद्धिः "संस्कारोऽयं पशुयागप्रयुक्तः न ज्योतिष्टोमप्रयुक्त"[1] इति। किमिदं ज्योतिष्टोमप्रयुक्त इति? ननु च सर्वमेवेदं ज्योतिष्टोमप्रयुक्तम्। तत्प्रकरणाम्नानात्। उच्यते। विनियोगाभिप्रायोऽयं ग्रन्थः। न पुनः प्रयोज्याभिप्रायः।

ननु अर्थादुत्कर्षः पश्वालम्भस्य; न हि पूर्वेद्युरालम्भे पशोर्वपोद्धरणदेशं यजमानो मुष्टिना [2]पिधायासितुं शक्नोति। अवश्यं हि तेन हस्तेनाहारादि कर्तव्यम्। तथा विहारोऽपि कर्तव्य एव। न च विहरमाणः आस्त इत्युच्यते। उपवेशने आस्ते इति भवति। उच्यते। यद्यशक्यं मुष्टिना पिधायासितुं तदा मुष्टिशब्देन तृणमुष्टिः स्यादित्याश्रीयताम्। आस्तेस्तु औदासीन्यमर्थः परिगृह्यताम्। अपि चोदासीनेपि आस्तेः प्रयोगः क्षेत्राणि परिगृह्यास्ते इति। तस्मादालम्भोत्कर्षे आश्विनकाले विधाने च वाक्यभेदः प्राप्नोति। **किं पुनरनयोर्वाक्यभेदयोर्दूषणम्?** उत्तर—**राद्धान्तवाद्युक्तमेव दूषणम्। अपरिहार्यं हि तत्र वाक्यान्तरत्वम्।** प्राप्तक्रियानुवादेनानेकगुणविधानात्। **पूर्वपक्षवाद्युक्तस्य तु** वाक्यभेदस्य **विशिष्टविधानादपि** परिहार**सिद्धिः।** अनेकगुणविशिष्टमेकमेव विधीयत इति। अत्र भाष्यम्—"**संस्कारोऽयं पशुप्रयोगप्रयुक्तो न ज्योतिष्टोमप्रयुक्त" इति।** तदाक्षिपति—**किमिदं ज्योतिष्टोमप्रयुक्त इति?** एकग्रन्थेनाह—**ननु च सर्वमेवेदं ज्योतिष्टोमप्रयुक्तं तत्प्रकरणाम्नानात्।** एक एव हि साधिकारो विधिः प्रकरणाम्नातं सकलं प्रयुङ्क्ते स्वाङ्गं अङ्गाङ्गमपि। समाधत्ते—**उच्यते—विनियोगाभिप्रायोऽयं ग्रन्थः न पुनः प्रयोज्याभिप्रायः।** अस्यार्थः—दीक्षणीयावाङ्नियमवत्[3] अवान्तरापूर्वसंबन्धे पशौ श्रुत्या धर्माणां विनियोगः। तेन पशुयागप्रयुक्तो न ज्योतिष्टोमप्रयुक्त इत्युच्यते। न पुनः ज्योतिष्टोमाधिकारविधिना न प्रयुज्यते। अपि तु तेनैवानुष्ठाप्यत इति।

---

(1) 1051 (2) R. विधाय (3) G. यावन्नियम एव

न प्रकरणविनियोज्यतया प्रयुक्तिः(इत्यर्थः)। किं तर्हि? श्रुत्यैव विनियोगः। 'प्रकरणवन्तश्च' इति। शक्नोति हि स्वस्थानेपि प्रयोगवचनः प्रयोक्तुमिति दर्शयति। अत एव च प्रकरणस्थाने अपि प्रकृताभिप्रायेणैवेत्युक्तम्। दर्शनाच्छिद्रापिधाने प्रत्युक्ते।

॥ ८ ॥ [1]दोहयोः कालभेदादसंयुक्तं शृतं स्यात् ॥ २८ ॥

पूर्ववदत्रापि सन्निधानविशेषमङ्गीकृत्य पूर्वः पक्षः।

एतदेव स्पष्टयति—न प्रकरणविनियोज्यतया प्रयुक्तिः, किं तर्हि श्रुत्यैव विनियोगः यस्य हि प्रकरणेन विनियोगः तस्य सर्वस्य प्रकरणवत् अधिकारविधिगर्भ एव विनियोगः। अयं तु संस्कारश्रुतिविनियोज्यः। पशुसंबन्धश्चास्य श्रुत्या अवभाति। पशुश्चावान्तर(वि) नियोगसंबन्ध इति तद्धर्म एव विनियोगो युक्तः। अत्र भाष्यं—"प्रकरणवन्तश्च पशव" इत्यादि तदनुपपन्नं तेषां प्रकरणाभावादित्यत्राह—प्रकरणवन्तश्चेति। शक्नोति हि तत्स्थानेपि प्रयोगवचनः प्रयोक्तुमिति दर्शयति। अस्यार्थः—यदिदं प्रकरणवन्तश्चे-त्युक्तं इदमाशङ्कितोत्तरम्। किमाशङ्कितम्? यद्यवान्तरनियोगगर्भे धर्मविनियोगः तदा परमापूर्वसंबन्धाभावात् प्रयुक्तिर्न लभ्यत इति तत्रेदमुत्तरं—प्रकरणवती ज्योतिष्टोमस्य प्रकरणे समाम्नानात् तद्वन्तः। तेन तान् पशूनङ्गभूतान् प्रयुञ्जानः तानपि विशसनादिधर्मान् प्रयुङ्क्ते, तैर्विना स्वाङ्गनिर्वृत्त्यभावादिति न विरोधः। यत एव तानपि धर्मान् अधिकार-विधिरेव प्रयोक्तुं शक्नोति अत एव प्रकरणस्थाने अपि प्रकृताभिप्रायेणैवेत्युक्तम्। अधिकारविधेर्हि प्रयोजकत्वे तस्यैवैकस्य प्रकरणं स्थानं च तेन सन्निधानमात्राभिप्रायेणैव प्रकरणस्थाने अपि द्रष्टव्ये। न पुनरितिकर्तव्यताकाङ्क्षालक्षणं प्रकरणं पशूनाम्। न पुनः स्थानं आकाङ्क्षासन्निधानमिति। दर्शनच्छिद्रापिधाने भाष्य एव प्रत्युक्ते।

दोहयोः कालभेदात्। पूर्ववदत्रापि सन्निधानविशेषमङ्गीकृत्य पूर्वः पक्षः। अस्यार्थः—यथा पूर्वाधिकरणे सन्निधानादग्नीषोमीयार्थाः पशुधर्माः तथाऽत्रापि सन्निध्याम्नानात्[3]

---

(1) P. 1052 (2) G. तैर्विधानात् (3) G. सन्निधानात्

राद्धान्तस्तु नैव दधिपयसोः कालभेदेन विधानमस्ति। यदि परं क्रमे कालभेदः, स च प्रकरणे प्रत्यर्थिनि न विनियोजक इत्युक्तम्।

॥ ९ ॥ [1]तद्वत् सवनान्तरे ग्रहाम्नानम् ॥ ३० ॥

अत्रापि पूर्ववदेव सन्निधानविशेषाशङ्का पूर्वपक्षवादिनः। राद्धान्तस्तु न धर्माणां सवनविशेषे विधानमिति सर्वार्थता।

दोहधर्माः सायंदोहार्था एवेति पूर्वपक्षः। राद्धान्तस्तु नैव दधिपयसोः कालभेदेन विधानमस्ति किन्तु एककालेनैव विधानम्। तेन विधानतस्तावन्न दध्नः सन्निधानम्। यदि परं क्रमे स्थाने कालभेदः। सायंकालो हि दध्नः स्थानं स च प्रकरणे प्रत्यर्थिनि न विनियोजक इत्युक्तं क्रमप्रकरणविरोधाधिकरणे। दोहाभिनिर्वर्त्यद्रव्यसंबन्धा हि दोहधर्माः अधिकारविधिना परिगृहीताः। अधिकारविधिसंबन्धश्च द्वयोरपि दधिपयसोः इत्यविशेषात् द्वयोरपि धर्माः प्राप्नुवन्ति। स्थानेन तु दधिमात्रसंबन्धिता। दुर्बलं च स्थानं प्रकरणादित्युभयार्था दोहधर्माः। पशुधर्माः पुनः अवान्तरापूर्वसबद्धपशुसबन्धान्न परमापूर्वपरिगृहीता इति स्थानतः सन्निहितपशुसंबन्धिन एव युक्ताः इति विशेषः।

तद्वत्सवनान्तरे। अत्रापि पूर्ववदेव सन्निधानविशेषाशङ्का पूर्वपक्षवादिनः। यथा पूर्वाधिकरणपूर्वपक्षे क्रमतः सन्निधानविशेषाशङ्कया पूर्वः पक्षः तथेहापि प्रातस्सवनविशेषे सन्निहिता धर्मा इति प्रातस्सवनकालानामेव ग्रहाणां स्युः न सवनान्तरवर्तिनामिति पूर्वः पक्षः। राद्धान्तस्तु—न धर्माणां सवनविशेषे विधानमिति सर्वार्थता। अस्यार्थः—सुत्याकाले धर्माणां विधानं न सवनविशेषे। सुत्याहः प्रचार एव सवनत्रयविभागेनोपदिश्यते। न पुनः प्रातरादिकालविशेषमाश्रित्य धर्मविधय इति नास्ति विधानतः सन्निधानविशेष इति सर्वग्रहार्था एव ग्रहधर्मा इति।

---

(1) P. 1053

॥ १० ॥ [1]रशना च लिङ्गदर्शनात् ॥ ३१ ॥

रशनायास्त्वग्नीषोमीयप्रकरण[2] एव विधानमिति पूर्वः पक्षः। राद्धान्तस्तु सत्यं तत्प्रक्रमे विधानं यूपस्त्वेक इति सर्वार्थता रशनायास्तद्धर्माणां च। तथा च लिङ्गमुक्तम्।

॥ ११ ॥ [3]आराच्छिष्टमसंयुक्तमितरैस्सन्निधानात् ॥ ३२ ॥

अंश्वदाभ्ययोस्तु प्रकरणे अविधानात् उद्देशकस्य च सन्निहितवचनत्वात् न तद्धर्म इति पूर्वः पक्षः। राद्धान्तस्तु न सन्निहितमात्रवचनमुद्देशकं प्रयोजनवत्सन्निहितवचनं हि तत्।

रशना च लिङ्गदर्शनात्। रशनायास्तु अग्नीषोमीयप्रकरण एव विधानमिति पूर्वः पक्षः। अस्यार्थः—यथा ग्रहधर्मा विशेषग्रहसन्निधानेन श्रुताः न तथा रशना पशुविशेषसन्निधानेन श्रुता। अपि तु अग्नीषोमीयसन्निधान एव श्रुता। तेनाग्नीषोमीयार्थेति। अनेन विशेषेण पूर्वः पक्षः। राद्धान्तस्तु सत्यं तत्प्रक्रमे विधानं यूपस्त्वेक इति सर्वार्थता रशनायास्तद्धर्माणां च। अस्यार्थः—यद्यपि अग्नीषोमीयपशुसन्निधानं रशनायाः तथापि सर्वपशूनां यूपस्य तन्त्रत्वात् एकयूपसंबन्धेन सर्वपशुष्वेव रशनायाः शेषत्वं तन्मुखेन तद्धर्माणां च। तथा च लिङ्गमुक्तम्।

आराच्छिष्टमसंयुक्तम्। अंश्वदाभ्ययोस्तु प्रकरणे अविधानात् उद्देशकस्य च सन्निहितवचनत्वात् न तद्धर्म इति पूर्वः पक्षः। य एव प्रकरणपठिताः धर्मविधिषु सन्निहिता ग्रहाः तानेव ग्रहशब्द उद्दिशति। तेन तेषामेव ग्रहधर्माः नांश्वदाभ्ययोरनारभ्याधीतयोः। राद्धान्तस्तु न सन्निहितमात्रवचनमुद्देशकं प्रयोजनवत्सन्निहितवचनं हि तत्। अस्यार्थः—न सन्निहितमात्रं सप्रयोजनं निष्प्रयोजनं च उद्देशकेन शब्देनोच्यते

(1) P. 1054 (2) 1054 (3) प्रक्रम एव

अभिन्नं चात्र प्रयोजनम्। प्रकृतानामप्रकृतानां च ग्रहणात्। तस्मात् प्रयोजनाभेदात् प्रयोजनावच्छिन्नग्रहजातीये ग्रहशब्दो न प्रकृतत्वेन सङ्कोचमर्हति। मैत्रावरुणे तु निर्देशात युक्तम्। इह तु विपरीतो निर्देश इत्यपि दर्शितम्।

॥ १२ ॥ अग्न्यर्थमप्रकरणे तद्वत् ॥ ३५ ॥

कः पुनरनयोरधिकरणयोर्विशेषः? अयमस्ति विशेषः। तत्र हि एकद्रव्यसंबन्धित्वाद्युक्तो विशेषः। इह पुनः एकैकेष्टका-व्यापारसंबन्धितयापि धर्मविधयोऽर्थवन्तो भवन्ति। तदयुक्तम्।

किन्तु प्रयोजनवत यस्य धर्मविधिः संभवति स एव धर्मविधानार्थमुद्दिश्यते। निष्प्रयोजने च न धर्मविधिसंभवः प्रयोजनवति चोद्दिश्यमाने ग्रहे एषोऽर्थः संपद्यते यत्सौमिकं ग्रहजातमुपात्तं तत्सर्वं सम्मार्जयितव्यमिति। अभिन्नं चात्र प्रयोजनं प्रकृतानामप्रकृतानां च ग्रहाणाम्। तस्मात प्रयोजनावच्छिन्नग्रहजातीये ग्रहशब्दो वर्तमानः न प्रकृतत्वेम केषांचिद्ग्रहाणां सङ्कोचमर्हति न विशिष्टेषु ग्रहेषु व्यवस्थातुमर्हतीत्यर्थः। ननु च यथा पयसा मैत्रावरुणं श्रीणातीति श्रयणं मैत्रावरुणस्य न सर्वग्रहाणां तथेहापि किमिति न स्यात इत्याह– मैत्रा-वरुणे तु विर्देशात् तस्यैव श्रयणं तत्रैवावतिष्ठत इति। इह तु विपरीतो निर्देशः ग्रह-शब्दस्य ग्रहजातीयोपस्थापकत्वादिति दर्शितं भाष्ये।

अग्न्यर्थमप्रकरणे। कः पुनरनयोरधिकरणयोर्विशेषः? यथा अनारभ्याधी-तयोर्ग्रहधर्माः तथा अनारभ्याधीतानामिष्टकानां धर्मैर्भवितव्यमित्यर्थः। एकदेशी विशेषमाह —अयमस्ति विशेषः। तत्र पूर्वाधिकरणे एकसोमद्रव्यसंबन्धित्वात् युक्तो विशेषः सर्वेषां ग्रहाणाम्। इह पुनः एकैकेष्टकाव्यापारसंबन्धितयापि धर्मविधयोऽर्थवन्तो भवन्ति। ततश्चेष्टकाव्यापारभेदात् प्रयोजनभेदात् न भवितव्यं धर्मैरिति शङ्कां आक्षेप्ता

तत्रापि हि एकैकग्रहव्यापारभेदो विद्यत एव । एवं तर्हि चितिभेदात् अभ्यधिकाशङ्का । राद्धान्तस्तु यद्यपि चितिभेदः तथापि चितौ धर्माणामप्रतिष्ठितत्वात् ।

॥ १३ ॥ नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ॥ ३६ ॥

इदमिदानीं चिन्त्यते—किं नैमित्तिकानां धर्मविधयः समाना उत कार्यवन्तो भवन्तीति । तत्र तुल्यत्वात् प्रकरणस्य समाना धर्मविधय इति पूर्वः पक्षः । सत्यं तुल्यं प्रकरणम् धर्मवन्तस्तु नित्याः

दूषयति—तत्राप्येकैकग्रहव्यापारभेदो विद्यते एव । तथापि सर्वेषां ग्रहाणां ग्रहधर्मा भवन्ति तथैवेहापि स्यादेव सर्वेषामेवेष्टकानां धर्मसंबन्धः इति । परमसमर्थनवादी त्वाह —एवं तर्हि चितिभेदादभ्यधिकाशङ्का । अस्यार्थः—स्थूलरूपायाश्चितेर्भेदात् तत्संनिधाने च धर्माः समाम्नाताः । ततश्च तच्चितिशेषभूतास्विष्टकासु स्युरित्यधिकाशङ्का । राद्धान्तस्तु यद्यपि चितिभेदः तथापि चितौ धर्माणामप्रतिष्ठितत्वात् । अपूर्वसंबन्धानां धर्मैर्भवितव्यं अभिन्नं च सर्वचितिषु अपूर्वमिति ।

नैमित्तिकमतुल्यत्वात् । एवं तावत् अनैमित्तिकानां समानविधानमुक्तम् । इदमिदानीं चिन्त्यते—किं नैमित्तिकानां गोदोहनफलचमसादीनां धर्मविधयः समानाश्चमसादिभिः चमसादीनामिवोपदेशत एव सर्वत्र धर्मा इति यावत् । त चमसाद्यर्था धर्मविधयः गोदोहनफलं चमसादिषु कार्यतः तत्कार्यकारितया धर्मा भवन्तीति । तत्र तुल्यबलत्वात् प्रकरणस्य समाना धर्मविधय इति पूर्वः पक्षः । [1]एकस्मिन् प्रकरणे सर्वेषां पठितत्वात् अधिकारविधिसंबन्धद्वारयोग्यत्वाच्च सर्वेषामेवोपदेशाद्धर्मैर्भवितव्यम् । न च नित्यतया चमसादीनां विशेषः । तेषामपि गोदोहनादिपक्षे व्युदस्यमानत्वात् इति पूर्वः पक्षः इत्यर्थः । राद्धान्तस्तु—सत्यं प्रकरणं तुल्यं धर्मवन्तस्तु नित्याः चमसादयः नित्य—

---

(1) R, एतत्प्रकरणे

नैमित्तिकाश्च गोदोहनादयः। तद्द्वारं च प्रकरणस्य ग्राहकत्वमिति स्थितम्। नैमित्तिकं च नित्यकार्यापन्नं भवति। अतः कार्यतः सिद्धेः न पुनरुपदेशमर्हति इति। द्विरुक्ततादोषश्चोक्तः।

॥ १४ ॥ प्रतिनिधिश्च तद्वत् ॥ ३७ ॥

अथेदानीं प्रतिनिधौ का वार्ता। तत्र कार्यतः प्राप्तिरिति पूर्वपक्षवादी मन्यते कार्येणाक्षिप्तत्वात्प्रतिनिधेः। अत्राभिधीयते–सत्यं कार्येणाक्षिप्तः प्रतिनिधिः उपदेशसंपदा तुल्यः, नान्यसाध्यतया,

---

विनियुक्तत्वात्। **नैमित्तिकाश्च गोदोहनादयो** निमित्ते सति सन्निधानात्। **तद्द्वारं** धर्मद्वारं च **प्रकरणस्य** धर्मग्राहकत्वमिति **स्थितम्।** अस्यार्थः—एते धर्मा नित्यवदधिकारविधिना गृहीताः तत्र यदेव तदनुगुणं तदेव द्वारं युक्तम्। नित्यं च नित्यग्रहणानुगुणं द्वारं न त्वनित्यम्। तेन नैमित्तिकेषु नास्ति धर्मविनियोगः ग्राहकेण स्वतः तस्यानुपात्तत्वात् **नैमित्तिकं च नित्यकार्यापन्नं भवति अतः कार्यतः सिद्धेः न पुनरुपदेशमर्हति इति। द्विरुक्ततादोषश्चोक्तः।** अपि च कार्यत एव नैमित्तिकेषु धर्मलाभान्नोपदेशो घटते। अन्यतोऽप्राप्ते विधिरिति विज्ञेयः[1]। यदि पुनः तत्रापि विधेयः तत्राह—**द्विरुक्ततादोषश्चोक्तः।**

प्रतिनिधिश्च तद्वत्। अथेदानीं प्रतिनिधौ का वार्ता। अनेनावान्तरसङ्गतिं संशयं चाह। **अत्रापि हि कार्यतः प्राप्तिरिति** मुख्यकार्यापत्तेः मुख्यधर्माः प्रतिनिधाविति **पूर्वपक्षवादी मन्यते।** कुतः? **कार्येणाक्षिप्तत्वात् प्रतिनिधेः।** कार्येण हि यथाशक्तिसंपाद्येन प्रतिनिधिराक्षिप्यते। तेनानित्यत्वात्प्रतिनिधेः फलचमसवदिति भावः। **अत्राभिधीयते—सत्यं कार्येणाक्षिप्तः प्रतिनिधिः उपदेशसंपदा तुल्यः नान्यसाध्यतया।** व्रीह्याद्यपचारे नीवाराः प्रतिनिधीयन्ते। न ते स्वातन्त्र्येणैव व्रीह्युपदेशसंपत्त्यर्थमेव।

---

(1) G. विभागः

तस्मादौपदेशिक एव धर्मसंबन्धः न कार्यसाधनतया द्रव्यान्तरं नीवाराः।

॥ १५ ॥ नियमार्था गुणश्रुतिः ॥ ४० ॥

यत्र पुनः श्रूयते प्रतिनिधिः तत्र श्रुताशङ्कतया पूर्वः पक्षः। श्रुतोपपत्त्यर्थोऽयं नियम इति राद्धान्तः।

॥ १६ ॥ संस्थास्तु समानविधानाः प्रकरणाविशेषात् ॥ ४१ ॥

ननु चेदं फलचमसेन गतमेवाधिकरणम्। न नैमित्तिकस्य धर्मा भवन्त्युपदेशात इति। उच्यते—अस्त्यत्राधिका-

---

तेन व्रीहय [1]एवैने किञ्चिद्विकृताः गृह्यन्त इति औपदेशिक एव धर्मसंबन्धो न कार्यसाधनतया द्रव्यान्तरं नीवाराः। यदि कार्यसाधनतया द्रव्यान्तरं नीवाराः स्युः तदा न स्यादौपदेशिको धर्मसंबन्धः। इह पुनः न कार्यसाधनतया द्रव्यान्तरत्वं, किन्तु स्वरूपेणैवेति।

नियमार्था गुणश्रुतिः। यत्र पुनः श्रूयते प्रतिनिधिः यथा 'यदि सोमं न विन्देत पूतीकानभिषुणुयात्' इति तत्र श्रुताशङ्कतया पूर्वः पक्षः। यदि प्रतिनिधिरेवायं तदा कार्यत एव प्राप्तत्वात् किं विधिना। तस्मात् रसान्तरमेवेदं साधनत्वेन विधीयत इति पूर्वः पक्षः। श्रुतोपपत्त्यर्थोऽयं नियम इति राद्धान्तः। श्रुतो यः सोमः तदुपपत्त्यर्थ एवायं नियमः। एतदुक्तं भवति—प्रतिनिधिर्नियम्यत इति नास्ति विध्यानर्थक्यमिति तेनात्राप्युपदेशत एव धर्मा इति।

संस्थास्तु समानविधानाः। ननु चेदं फलचमसेन गतमेवाधिकरणम्। तत्र हि एतदुक्तम्—न नैमित्तिकस्य धर्मा भवन्त्युपदेशेन इति। नैमित्तिकाश्च संस्थाः अतः तासामपि उपदेशतो न धर्मैर्भवितव्यमिति। उक्तमेव समाधत्ते—उच्यते अस्त्यत्राधिका—

---

(1) R. एते

शङ्का। का पुनरसौ? इयमसौ। उक्थ्यादयो हि ग्रहणविशेषाः। ते च संस्काराः स्वयमितिकर्तव्यताभूताः न चेतिकर्तव्यता इतिकर्तव्यतया संबध्यते। किं तर्हि? यागेन।

शङ्का। का पुनरसौ? इयमसौ। इह सोमेन यजेतेति श्रूयते सोमसंस्काराश्च श्रूयन्ते अभिषवणाभिप्लवनोत्पवनादयः। तदालोचनया रसभावमुपगतः सोमः यागसाधनमिति प्रतीयते। तस्य च इन्द्रवाय्वादिदेवतोद्देशेन ग्रहणमाम्नायते। देवतोद्देशेन ग्रहणमेवं दृष्टार्थं भवति यदि तामेव देवतामुद्दिश्य त्यज्यते। ततश्च या एव ग्रहणे देवताः श्रूयन्ते ता एव यागे देवता भवन्ति। तानि च ग्रहणानि ग्राह्यस्य द्रव्यस्य विपुलत्वात् नियतपरिमाणत्वाच्च उपकल्प्यमानानां रसांशानां समुच्चीयन्ते। तेषां च प्रयुक्तानां ग्रहणानां [1]अनावृत्तौ यागस्योपसंहर्तुमशक्यत्वात् यागस्यावृत्तिरवसीयते। तथाऽपराण्यपि ग्रहणानि उक्थ्यादिसंज्ञकानि कामयोगेन चोद्यन्ते 'प्रजाकाम उक्थ्यं गृह्णीयात्' इति। यत्र स्तोत्रचोदना 'वीर्यकामः षोडशिना स्तुवीत' इति तत्रापि ग्रहणचोदनाऽस्त्येव। स्तोत्रस्य ग्रहणनिमित्तत्वात् 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोति' इति। तान्यपि चोक्थ्यादिग्रहणानि प्रकृतसोमयागसंबन्धरसीभूतसोमद्रव्यविषयाण्येव। तेन तत्रापि स एव यागः प्रजाकामादिभिरुक्थ्यादिसंज्ञकैः ग्रहणैः सोमरसमुपकल्प्यानुष्ठेय इति प्रतीयते। तत्र एकत्वाद्यागस्य यागधर्मैर्दीक्षणीयादिभिर्भवितव्यमेव इति पूर्वपक्षवादी मन्यते। ततश्च तेषु सर्वेषु धर्मेषु भवत्सु ऐन्द्रवायवादिग्रहैरपि भवितव्यम्। तेषां च वल्लसक्रमत्वात् [2]अन्तत एव काम्यैर्ग्रहैर्भवितव्यं इति संस्थाव्यपदेशोऽप्युपपन्नः। यानि पुनरत्र ग्रहणानि उक्थ्यादीति तानि निमित्तसंयोगेन चोद्यमानानि ग्रहणधर्मशून्यानि भवन्तु। गोदोहनवत् न तेषामिह दीक्षणीयादिधर्मसंबन्धाशङ्का यागधर्मत्वात्। न हि यागधर्मैः यागधर्माः संबध्यते समत्वादिति। सर्वमिदं दर्शयितुमुपक्रमते—उक्थ्यादयो हि ग्रहणविशेषाः सोमरसावकल्पनविशेषाः ते च गृह्यमाणस्य संस्काराः स्वयमितिकर्तव्यताभूताः। न चेतिकर्तव्यता इतिकर्तव्यतया संबध्यते। किं तर्हि? यागेन। इदमत्राभिप्रेतम्—यदि ग्रहणानामेव

---

(1) R. अनावृत्ते (2) R, अतन्त्रत एव

सर्वग्रहणसंस्कार्यद्रव्यकश्चायं स एव यागः सोमेन यजेतेति। नान्योत्पत्तिर्विद्यते। स चेद्यागः ग्रहणान्तरेष्वपि इतिकर्तव्यतापि सैव। न च ग्रहणविशेषो यागस्येतिकर्तव्यताप्राप्तौ निमित्तं; किं तर्हि प्रयोगचोदनैव। न च ग्रहणान्तरेषु प्रयोगान्तरचोदना यागस्य। गुणानामेव हि तत्र फलाय चोदना न यागस्य, यथा गोदोहनेन पशुकामस्य प्रणयेदिति न दर्शपूर्णमासयोः

दीक्षणीयादयो धर्माः शङ्क्येरन् तदा नैमित्तिकानां न भवेयुः। न च ग्रहणानां धर्मसंबन्धः। किन्तु यागस्य। **सर्वग्रहणसंस्कार्यद्रव्यकश्चायं यागः सोमेन यजेतेति।** य एव यागः सर्वग्रहणसंस्कार्यद्रव्यकः स एवायमुक्थ्यादिष्वपि सर्वैर्ग्रहैः यः संस्कार्यः सोमरसः स एव द्रव्यं यस्येति विग्रहः। एतदुक्तं भवति—देवताविशेषोद्देशेन च यानि ग्रहणानि क्रियन्ते तैर्यो रसभागः उपकल्प्यते तेनायं सोमयागः क्रियते। उक्थ्यादिष्वपि तावत् यागशेषसोमग्रहणमेव। तेन तत्रापि स एव यागः कर्तव्य इति। नास्य यागस्य उक्थ्यादिषु **अन्या उत्पत्तिर्विद्यते।** अपि तु सोमेन यजेतेत्येवोत्पत्तिः। **स चेद्यागः ग्रहणान्तरेषूक्थ्यादिषु इतिकर्तव्यतापि सैव** यैव ऐन्द्रवायवादिग्रहणैः यागे क्रियमाणे इति यावत्[1]। यदि यावद्ग्रहणविशेषोऽग्निष्टोमान्तः यागस्य धर्मप्राप्तौ निमित्तं स्यात् तदा ग्रहणान्तरेषु उक्थ्यादिषु न स्यादितिकर्तव्यता। न चैतदस्ति। तदाह—**न च ग्रहणविशेषो यागस्येतिकर्तव्यताप्राप्तौ निमित्तं, किं तर्हि प्रयोगचोदनैव** अनुष्ठेयत्वेन चोदनैव धर्मप्राप्तौ निमित्तम्। **न च ग्रहणान्तरेषु प्रयोगान्तरचोदना यागस्य।** उक्थ्यादिष्वपि ग्रहणान्तरेषु न यागस्य प्रयोगान्तरचोदना। किं तर्हि? य एव सोमेन यजेतेति प्रयोगश्चोदितः स एवोक्थ्यादिष्वपि। ऐन्द्रवायवादिष्विव **गुणानामेव हि** ग्रहणविशेषाणां तत्रोक्थ्यादिषु **फलाय चोदना न यागस्य। यथा गोदोहनेन पशुकामस्य प्रणयेदिति न दर्शपूर्णमासयोः**

---

(1) R. इति यावत्—इति नास्ति

प्रयोगश्चोद्यते। तस्माद्भवन्तु ग्रहणानि ग्रहणधर्मोपदेशशून्यानि फलचमसवत् न पुनर्यागोऽपि यागधर्मशून्य इति शक्यते वक्तुम्। सर्वसंस्कारेष्वेकप्रयोगस्य चोदितत्वात्। प्रयोगग्राह्यत्वाच्चेतिकर्तव्यताया इत्युक्तम्। अत एव चाग्निष्टोमग्रहणं समुच्चयश्च प्रदर्शितः। पशूनामदृष्टार्थतया समुच्चय एव न्याय्यः। अत्रोच्यते—सवनीयसमाख्यया सर्वपशूनां तुल्यकार्यावगमात्। अत्राभिधीयते—सत्यमेवं स्याद्यदि संस्थान्तरेषु उक्थ्यादिषु प्रयोगचोदनयैव लभ्यते। यथा गोदोहनेन दर्शपूर्णमासयोः। इह तु अग्निष्टोम-

---

प्रयोगश्चोद्यते। तस्माद्भवन्तु ग्रहणानि ग्रहणधर्मोपदेशशून्यानि फलचमसवत्। न पुनर्यागोऽपि यागधर्मैरसंबद्ध इति शक्यते वक्तुम्। सर्वसंस्कारेषु एकप्रयोगस्य एकस्यानुष्ठानस्य चोदितत्वात् प्रयोगग्राह्यत्वादितिकर्तव्यताया इत्युक्तं प्राक्। यत एव समानविधानाः सर्वसंस्थाः अत एवाग्निष्टोमग्रहणम्। 'यद्यग्निष्टोमं जुहोति' इति। यद्यग्निष्टोमान्तस्यैवौपदेशिका धर्माः तदा अन्तरेणाप्यग्निष्टोमग्रहणं अग्निष्टोमस्यैव स्यात्। तत्राग्निष्टोमग्रहणमनर्थकं स्यात्। समानविधाने तु विशेषसंस्कारसंबन्धार्थं अग्निष्टोमग्रहणं समुच्चयश्च प्रदर्शितः। पशूनां समानविधानेन हि आग्नेयस्य सर्वसंस्थासु औपदेशिकत्वात् वैशेषिकैः उक्थ्यादिसंस्थासंबन्धिभिः पशुभिः समुच्चयो घटते। तेन तस्मिन् सति द्वितीयतृतीयदर्शनमुपपद्यते इतरथा आतिदेशिकस्याग्नेयस्य उक्थ्यादिसंस्थाभाग्भिः औपदेशिकैर्बाधे सति समुच्चयो न स्यादिति। अत्र चोदयति—पशूनामदृष्टार्थतया समुच्चय एव न्याय्यः। तथा च वक्ष्यति प्राजापत्येषु चाम्नानात् इति। अत्रोच्यते—सवनीयसमाख्यया सर्वपशूनां तुल्यकार्यावगमात् युक्त एव बाधः। तस्मादुपपन्नं लिङ्गदर्शनम्। अत्राभिधीयते— सत्यमेवं स्यात् यदि संस्थान्तरेषूक्थ्यादिषु प्रयोगचोदनयैव यागकर्तव्यता लभ्यते यथा गोदोहनेन दर्शपूर्णमासयोः। इह तु अग्निष्टोम-

पर्यन्तैव यागस्य प्रयोगचोदना। अत ऊर्ध्वं ग्रहा उक्थ्यादय एव चोदनामाक्षिपन्ति यथा ग्रहाः आवृत्तिम् निमित्ते। एवं चेन्न यागचोदनया धर्माः शक्यन्ते ग्रहीतुं उक्थ्यादिषु। अतः फलचमसवत् नित्यानित्यसंयोगविरोधो युक्तः। कार्यतश्च धर्मप्राप्तिः तस्मात् समुच्चयग्रहणं वचनात् भविष्यति। अग्निष्टोमशब्दश्चानुवादः। तथा होमादीनामभावदर्शनमुपपन्नं भवति।

इति बृहत्यां तृतीयाध्यायस्य

षष्ठः पादः

संस्कारपर्यन्तैव यागस्य प्रयोगचोदना। इह तु अनैमित्तिकाः क्रत्वर्थाः ये अग्निष्टोमान्ता ग्रहणाख्याः संस्काराः तत्पर्यन्तैव यागस्य सोमेन यजेतेत्यनेनानुष्ठानचोदना। अत ऊर्ध्वं कामसंयोगेन चोद्यन्ते ग्रहा उक्थ्यादयः त एव यागचोदनामाक्षिपन्ति। यथा ऐन्द्रवायवादयो नित्या ग्रहाः आवृत्तिम्। एवं चेत् न यागचोदनया धर्माः शक्यन्ते ग्रहीतुं उक्थ्यादिषु। अतः फलचमसवत् नित्यानित्यसंयोगविरोधो युक्तः। उक्थ्यादिषु यागस्यानुष्ठानचोदना नैमित्तिकी काम्यैर्ग्रहैराक्षिप्यमाणत्वात्। नित्याश्च यागसंबन्धिनो धर्माः ते नित्यानुष्ठानेन गृहीता भवितुमर्हन्ति अनित्यानुष्ठानगृहीतत्वे तु नित्यानित्यसंयोगविरोधः स्यात् इति सिद्धमत्रापि फलचमसवत् नोक्थ्यादिषु ग्रहणाक्षिप्तस्य एकस्यापि यागस्य धर्मा इति। कार्यतश्च धर्मप्राप्तिः। अतः समुच्चयग्रहणं वचनात् भविष्यति। अस्योक्थ्यादिग्रहणाक्षिप्तयागविषयस्याधिकारविधेरुपकारापेक्षायां सन्निहितनित्यसंस्थाधिकारनियोगोपकारग्रहणात् कार्यतो धर्माणां प्राप्तिः। ततश्चौपदेशिकेन बाधे प्राप्ते वचनात् समुच्चयो भविष्यति। अग्निष्टोमशब्दश्चानुवादो भविष्यति। "यद्यग्निष्टोमो जुहोति" इति वचनेन। न अनुवादो दोषः अनुवादकान्यपि हि वचनानि दृश्यन्ते यथा "द्वयोः प्रणयन्ति" इति। तथा होमादीनामभावदर्शनमुपपन्नं भविष्यति। "यद्युक्थ्यः परिधिमनक्ति न जुहोति" इति प्रचरणीहोमशेषस्य प्रतिपत्तिरियम्। तत्र समानविधानपक्षे यद्यग्निष्टोमो जुहोतीति अग्निष्टोमहोमः प्राप्नोति इति। तथा उक्थ्ये परिध्य-

ञ्जनस्य। तत्र 'न जुहोति' इति होमाभावानुवादो न घटते अनुवादस्वरूपं चेदम्। वर्तमानापदेशात्। प्रकृतिविकारभावे चौपदेशिकेन परिध्यञ्जनेन तुल्यकार्येण बाधितत्वात् होमाभावानुवादो युज्यते। उपदेशतः प्राप्तौ यथोपदेशं कार्यमिति उभयोरुपदेशबलेन समुच्चयः कल्प्यः। कार्यतस्तु प्राप्तौ क्लृप्त एव कार्ये विधानमिति युक्तैव प्राकृतप्रतिपत्तिभूतहोमनिवृत्तिः इति।

इति ऋजुविमलापञ्चिकायां
तृतीयस्य षष्ठः पादः

तृतीयाध्यायस्य सप्तमः पादः ॥

॥ १ ॥ प्रकरणाविशेषादसंयुक्तं प्रधानस्य ॥ १ ॥

बर्हिर्धर्माश्च किमङ्गप्रधानार्था उत प्रधानार्था एवेति सन्देहे प्रकरणात् प्रधानार्था इत्युक्त्वा उपकारकत्वेनाङ्गप्रधानार्थतामाह। तदयुक्तम्। श्रुत्यादिभिर्हि तादर्थ्यमवगम्यते नोपकारेण।

उच्यते—श्रुत्यादय एवोपन्यस्ता बर्हिषि हवींष्यासादयतीति। उपकारकग्रहणं तर्हि किमर्थं ? कदाचित् तदभावात् श्रुतेः सङ्कोचः स्यात्। अस्ति चासावेकरूप उपकारो नामेति तदभिधानम्।

अथ ऋजुविमलायां

तृतीयाध्यायस्य सप्तमः पादः

प्रकरणाविशेषादसंयुक्तम्। बर्हिर्धर्माश्च किमङ्गप्रधानार्था उत प्रधानार्था एवेति सन्देहे प्रकरणात् प्रधानार्था इत्युक्त्वा उपकारकत्वेनाङ्गप्रधानार्थतामाह। अनेन यथाश्रुतमधिकरणमनुभाषितमाक्षेप्तुम्। आक्षिपति—तदयुक्तम्। श्रुत्यादिभिर्हि तादर्थ्यमवगम्यते नोपकारेण। यत्प्रधानार्थत्वं प्रतिभाति न तदुपकारेण शक्यतेऽन्यथाकर्तुम्। उपकारलक्षणस्य विनियोगप्रमाणस्याभावादिति। समाधत्ते—उच्यते। श्रुत्यादय एवोपन्यस्ता अङ्गप्रधानार्थत्वसिद्धये। बर्हिषि हवींष्यासादयतीति हविश्शब्देन सर्वहविषामेवाभिधानात् अङ्गप्रधानार्थता बर्हिषः श्रुत्यैवेति। यदि श्रुत्या शेषत्वं उपकारग्रहणं तर्हि किमर्थम् ? उत्तरं—कदाचित् तदभावात् श्रुतेः सङ्कोचः स्यात्। अस्ति चासावेकरूप उपकार इति तदभिधानम्। अस्यार्थः—यदिदमुपकाराभिधानं तदाशङ्कानिवृत्त्यर्थम्। शेषत्वं सर्वत्रोपकारव्यतिरेकेण नास्ति। तेन अङ्गप्रधानहविरर्थः उपकारोऽन्वेषणीयः। तत्र यदेकत्र दृष्ट उपकारः अन्यत्रादृष्टरूपः स्यात तदा दृष्टेनैवोपकारेण यत्र शेषत्वं तत्रैव शेषता स्यात् सेयमाशङ्का माभूदिति सर्वत्र

(1) P. 1073

एवं तर्हि वाक्येनैव शेषावगतिः। किमिति तर्हि बर्हिर्मात्रे(ण) न भवति? ग्राहकत्वे सति शेषत्वमित्युक्तम्। ग्राहकश्च दार्शपौर्णमासिकप्रयोगविधिः सन्निधानात्। लिङ्गदर्शनमुक्तम्।

॥ २ ॥ फलसंयोगात्स्वामियुक्तं प्रधानस्य[2] ॥ २ ॥

इह पुरुषसंस्कारा उदाहरणम्। ते किं कर्तृभूतस्य उताधिकृतस्येति। कर्तृभूतस्य। एवं कर्माङ्गतोपपद्यत इति पूर्वः पक्षः।

दृष्ट एकरूप उपकार इति दर्शयितुमुपकाराभिधानम्। यद्यङ्गप्रधानार्थता एवं तर्हि वाक्येनैव शेषस्य बर्हिर्धर्माणामन्वयः। वाक्येन चेदन्वयः बर्हिर्मात्रे पिण्डपितृयज्ञवर्तिन्यपि किमिति न भवति। प्रकरणेन ह्यन्वये यस्यैव प्रकरणं तस्यैव धर्माः स्युरिति। चोद्यं परिहरति—ग्राहकत्वे सति शेषत्वमुक्तम्। "प्रकरणविशेषाद्विकृतौ विरोधि स्यात्" इत्यत्र ग्राहकेण गृहीतं विनियुज्यत इत्युक्तं सप्तमाद्ये। ग्राहकश्चात्र दार्शपूर्णमासिकप्रयोगविधिः तत्सन्निधानाद्धर्माणामिति नान्यदीयधर्माणां प्राप्तिरिति। लिङ्गदर्शनमुक्तम्।

फलसंयोगात्तु। अत्र भाष्यकारः केशश्मश्रुवपनादीनां किमङ्गप्रधानार्थता उत प्रधानार्थतैवेति विचारयति। तत्र कारणभूतं सन्देहं वक्तुमुदाहरणशुद्धिमाह—इह पुरुषसंस्कारा उदाहरणमिति। यद्यप्यत्र द्वितीयानिर्देशो नास्ति तथापि लोकत एव वपनादीनां पुरुषसंस्कारत्वेन दर्शनात् पुरुषसंस्कारा एवैते। संप्रति कारणसन्देहमाह—ते किं कर्तृभूतस्य उताधिकृतस्येति। द्वे हि पुरुषस्यावस्थे कर्मणि। एका तावदधिकृतावस्था ऐश्वर्यलक्षणा, अपरा कर्त्रवस्था। तद्यदि कर्त्रवस्थस्य पुरुषस्य संस्कारः तदा कर्तुरङ्गप्रधानार्थत्वात् तत्संस्कारोप्यङ्गप्रधानार्थः इत्यग्नीषोमीयपशुविकारे पशुबन्धेपि वपनादयश्चोदकात्स्युः। अथाधिकृतावस्थस्य संस्कारः तदा प्रधान एव पुरुषस्याधिकारात् तदर्था वपनादयः स्युः इति। कर्तृभूतस्य एवं कर्माङ्गतोपपद्यत इति पूर्वः पक्षः। अस्यार्थः कर्ता हि कर्मणोऽङ्गम्। यदि

---

(1) P. 1077

किमित्यंशोपनिपातिनी इतिकर्तव्यतेति सप्तमाद्ये वक्ष्यामः। आकाङ्क्षाद्वयस्य तत्प्रसूतेः। तत्र यदर्थः कर्तृभावः संस्कारोऽपि तदर्थ एव युक्तः। अधिकारनिष्पत्त्यर्थत्वाच्छास्त्रस्य। तस्मादधिकृतस्यसंस्कार इति युक्तम्।

॥ ३ ॥ चिकीर्षया च संयोगात्[1] ॥ ७ ॥

बर्हिर्धर्माधिकरणेन किमत्रान्यत्वं येनेदमधिकरणमारभ्यते।

तस्यैव ते संस्कारा भवेयुः तदा कर्माङ्गता धर्माणामपि स्यात। अधिकृतावस्थस्तु प्रधानभूतः तस्य संस्कारा न कर्मणोऽङ्गम्। अनङ्गावस्थासंबन्धित्वात् अकर्माङ्गभूतस्य च नियोग-संबन्धितैव हीयते। तस्मात् कर्तृभूतस्येति पूर्वः पक्षः। राद्धान्तमाह— किमित्यंशोपनिपातिनी इतिकर्तव्यतेति सप्तमाद्ये वक्ष्यामः। आकाङ्क्षाद्वयस्य तत्प्रसूतेः अस्यार्थः— या काचिदितिकर्तव्यता सा साध्यांशोपनिपातिनी। न साधनांशे। कुतः? केन कथमित्याकाङ्क्षाद्वयस्य [2]तत्कर्तृत्वात्। साध्यमेव सेतिकर्तव्यताकं करणमाकाङ्क्षति। न पुनः करणमितिकर्तव्यतामाक्षिपति इति सप्तमाद्ये दर्शितम्। एवं स्थिते किं कर्तृभावे योग्यतामापादयति उताधिकृतभावे अयं संस्कार इति चिन्त्यते। तत्र यदर्थः कर्तृभावः संस्कारोऽपि तदर्थ एव युक्तः। अधिकृतभावार्थं हि कर्तृत्वम्। ऐश्वर्यलक्षणस्याधिकारस्य संपत्त्यर्थं पुरुषः कर्तृतामवलम्बत इति। प्रधानभूताधिकृतावस्थस्यैव पुरुषस्य संस्कारो युक्तः अधिकारनिष्पत्त्यर्थत्वाच्छास्त्रस्य। तस्मादधिकृतस्य संस्कार इति युक्तम्। फलभूताधिकारनिर्वृत्तौ च साहाय्यं वाञ्छन्तोऽधिकृतसंस्कारा अपि भवन्तीतिकर्तव्यताभूता यागस्येत्युक्तं भाष्ये।

चिकीर्षया च संयोगात्। बर्हिर्धर्माधिकरणेन किमत्रान्यत्वं येनेदमधिकरणमारभ्यते। यथा तत्र बर्हिरादेरङ्गप्रधानार्थता तथाऽत्रापि वेदेरङ्गप्रधानार्थतैव युक्ता।

---

(1) P. 1078 (2) R. तत्कृतत्वात्

प्रधानचिकीर्षां पूर्वपक्षवादी मन्यते। यदर्था चिकीर्षा तदर्थान्यङ्गानीत्यभिप्रायः।

॥ ४ ॥ तथाभिधानेन[1] ॥ ८ ॥

अभिमर्शने तु साक्षात्प्रधानशब्दसंयोगात् पूर्वः पक्षः। सत्यं, प्रधानं चिकीर्ष्यते। तत्तु साङ्गं अधिकारनिर्वृत्ताविति राद्धान्तः। एवमाभिमर्शनमपि अधिकारसाधनस्यैवेति उभयोरङ्गप्रधानार्थता।

किमर्थमिदमधिकरणमारभ्यते। उत्तरं—**प्रधानचिकीर्षां पूर्वपक्षवादी मन्यते।** अस्यार्थः—पूर्वपक्षवादी प्रधानस्यैव चिकीर्षां मन्यते। तथापि किमित्याह—**यदर्था चिकीर्षा तदर्थान्येवाङ्गानीत्यभिप्रायः।** यदेव हि चिकीर्षितं तदर्थान्येवाङ्गानीति युक्तम्। एतेनैव न्यायेन सर्वत्रैवम्—यदपि सामान्यतोपदिष्ट—बर्हिषि हवींष्यासादयतीति तदप्यत्रोदाहरणमित्यवसेयम्। अत एव तदर्थान्यङ्गानीति बहुवचनम्।

तथाऽभिधानेन। अभिमर्शने तु साक्षात् प्रधानशब्दसंयोगात् पूर्वः पक्षः। चतुर्होत्रा पौर्णमासीमिति पौर्णमासीशब्दस्य प्रधानवचनत्वात् प्रधानहविषामेव अभिमर्शनं, प्रधानसंबन्धीन्येव हवींषि अभिमर्शनं प्रति प्रधानशब्देनोपस्थाप्यन्ते न पुनरङ्गहवींष्यपि। एवमुदाहरणद्वये न्यायेन वचनेन च पूर्वपक्षं कृत्वा संप्रति राद्धान्तमाह—**सत्यं प्रधानं चिकीर्ष्यते तत्तु साङ्गमधिकारनिर्वृत्ताविति राद्धान्तः।** को ब्रूते प्रधानं न चिकीर्ष्यत इति। किन्तु तदेव चिकीर्ष्यत इति न शक्यते वक्तुम्। अधिकारनिर्वृत्त्यर्थं तस्य चिकीर्षा। साङ्गं च प्रधानमधिकारं निर्वर्तयति। नाङ्गरहितम्। तेन साङ्गं चिकीर्ष्यत इति। **एवमभिमर्शनमप्यधिकारसाधनस्यैव।** तत्रापि हि द्वितीयादर्शनेन ईप्सिततमत्वावगतेः। ईप्सिततमता च साधनस्यैव, न केवलं करणमात्रस्य। साधनं च सेतिकर्तव्यताकं करणमित्युभयोः वेद्यभिमर्शनयोः **अङ्गप्रधानार्थता।** तुल्यसिद्धान्ततया च द्वौ पूर्वपक्षौ कृत्वा सिद्धान्तितम्।

---

(1) P. 1079

॥ ५ ॥ दीक्षादक्षिणं तु वचनात्प्रधानस्य[1] ॥ ११ ॥

दीक्षादक्षिणमपि साङ्गादधिकारनिर्वृत्तेः साङ्गस्येत्याशङ्क्य वचनात्प्रधानस्येति राद्धान्तः। युक्तं तावत् वचनात् दीक्षा प्रधानस्य। दक्षिणा पुनः यदा प्रधानस्यैव कथमपि तदा कथमपरिक्रीतैरङ्गानि क्रियन्ते। केन वोक्तमपरिक्रीतैरङ्गानि क्रियन्त इति प्राकृतमानतिकारणं भविष्यत्येव। यद्येवं न तर्हि प्रसङ्गः। यथा प्रसङ्गः तथा प्रसङ्गलक्षण एव वक्ष्यामः। दर्शनमुक्तम्।

॥ ६ ॥ तथा यूपस्य वेदिः[2] ॥ १२ ॥

अर्धमन्तर्वेदीति किं वेदिः यूपाङ्गमुत नेति संशये

दीक्षादक्षिणं तु वचनात्प्रधानस्य। दीक्षादक्षिणमपि साङ्गादधिकारनिर्वृत्तेः साङ्गस्येत्याशङ्क्य वचनात्प्रधानस्येति राद्धान्तः। कुतः? अनेन पूर्वपक्षराद्धान्तौ द्वावप्युक्तौ। कर्तृसंस्कारतां च दीक्षाया अभ्युपगम्येयं चिन्ता। तत्र साङ्गस्याधिकार-निर्वर्तकत्वात साङ्गमेवानुष्ठेयम्। तदङ्गभूतः कर्ता। कर्तृसंस्कारोऽपि तदङ्गभूत एवेति पूर्वः पक्षः। वचनं तु साङ्गप्रधानाभिप्रायेण वर्णनीयम्। न वचनस्यान्यार्थत्वे प्रमाण-मस्तीति राद्धान्तितम्। संप्रति चोदयति—युक्तं तावत् दीक्षा प्रधानस्य। यदा पुनर्दक्षिणा प्रधानस्य तदा कथमपरिक्रीतैरङ्गानि क्रियन्ते? तानि चार्त्विज्यादीनि। केन वोक्तं अपरिक्रीतैरङ्गानि क्रियन्त इति। [3]प्राकृतमानतिकारणं भविष्यत्येव। दीक्षणीया-दिष्वैष्टिकेषु चोदकप्राप्ता दक्षिणा भविष्यति। यदि तत्र प्राकृती दक्षिणा न तर्हि प्रसङ्गो दक्षिणायाः। यथा प्रसङ्गः तथा प्रसङ्गलक्षण एव वक्ष्यामः। दर्शनमुक्तम्।

तथा यूपस्य वेदिः। अर्धमन्तर्वेदीति श्रूयते किं वेदिः यूपाङ्गं उत नेति संशये

---

(1) P. 1081 (2) P. 1082 (3) प्राकृतमाह किंकारणं

श्रुतेरङ्गमिति पूर्वः पक्षः। बहिर्वेदिपदैकवाक्यत्वात् न श्रुत्यर्थविधानं संभवतीति देशलक्षणा। उभयविधाने वाक्यभेदप्रसङ्गात्।

सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात्सामिधेनीनाम्[1] ॥ १५ ॥

कः पुनः पूर्वेणास्याधिकरणस्य विशेषः? अयमस्ति विशेषः पदान्तरासंबद्धं ह्यत्र हविर्धानं श्रूयते नान्तर्वेदिवत् बहिर्वेदिपदसंबद्धम्। तस्मादङ्गाङ्गिभाव इति पूर्वपक्षवादी मन्यते श्रुतेः

श्रुतेरङ्गमिति पूर्वः पक्षः। अर्धमन्तर्वेदीति वचनात् वेदिरङ्गं यूपस्येति पूर्वः पक्षः। राद्धान्तस्तु—बहिर्वेदिपदैकवाक्यत्वात् न श्रुत्यर्थविधानं संभवतीति देशलक्षणा। उभयविधाने वाक्यभेदप्रसङ्गात्। अस्यार्थः—"वज्रो वै यूपः, यदन्तर्वेदि मिनुयात् निर्दहेत यद्बहिर्वेदि अनवरुद्धः स्यात् अर्धमन्तर्वेद्यर्धं बहिर्वेदि मिनोति। अवरुद्धः स्यात् न निर्दहति" इति उपक्रमोपसंहारयोः एकवाक्यत्वात् एकमिदं वाक्यमिति निश्चीयते। यद्यन्तर्वेदीति श्रुत्यर्थः परिगृह्यते तदा बहिर्वेदिपदैकवाक्यता नोपपद्यते इत्येकवाक्यतासिद्ध्यर्थं देशलक्षणैव न्याय्येति।

सामिधेनीस्तदन्वाहुरिति। कः पुनः पूर्वेणास्य विशेषः। यथा पूर्वत्र देशलक्षणा, तथाऽत्रापि हविर्धानेन देशो लक्ष्यतामिति। उत्तरं—अयमस्ति विशेषः पदान्तरासंबद्धं ह्यत्र हविर्धानं श्रूयते। नान्तर्वेदिवत् बहिर्वेदिपदसंबद्धम्। तस्मादङ्गाङ्गिभाव एव न्याय्य इति पूर्वपक्षवादी मन्यते। श्रुतेः। तत्र हि श्रुत्यर्थपरित्यागे बहिर्वेदिपदैकवाक्यता कारणम्। इह तु तदभावात् श्रौत एवार्थो ग्राह्यः। तेन हविर्धानाङ्गता सामिधेनीनाम्, सामिधेन्यङ्गता वा हविर्धानस्य युक्ता। न विनियुक्तविनियोगविरोधो नाम कश्चिद्विरोधोऽस्ति। तथा हि—एकैव दधिजातिः क्रतौ पुरुषे च विनियुज्यते। यद्धि न

---

(1) P. 1084

विज्ञानविपरीतं हि विरुद्धमभिधीयते। राद्धान्तवादीतु उभयोरन्यार्थत्वात् देशलक्षणसंबन्ध एव न्याय्य इति मन्यते। तथा च 'हविर्धानं' 'सामिधेन्य' इति च समाख्यापि न पीडिता स्यात्। अन्यथाहि हविर्धानं सामिधेनीनां सामिधेन्यो वा हविर्धानस्येति देवदत्तस्येदं यज्ञदत्तस्येति यथैतदसंबद्धं तथेदमपि स्यात्। तस्मादत्रापि पूर्ववत् देशविशेषलक्षणैवेति युक्तम्। आग्नेय्यधिकरणवच्च सामान्यविशेषसंबन्धे वाक्यभेदः स्यात।

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात् तस्मात्स्वयं प्रयोगे स्यात्[1] ॥ १८ ॥

कथं पुनरत्र परिक्रयादिषु श्रूयमाणेषु संशयः।

यथा दृश्यते तद्विरुद्धमित्युच्यते तदाह—विज्ञानविपरीतं हि विरुद्धमभिधीयते। इदमेवाविरुद्धं यद्यथा ज्ञायते तथा इति। राद्धान्तवादी तु उभयोः अन्यार्थत्वात् देशलक्षणसंबन्ध एव न्याय्य इति मन्यते। अयमाशयः—यद्यपि वस्तुविरोधो नास्ति तथापि यदन्यसंबन्धितया प्रतिपत्तुमेव न शक्यते, यथा न देवदत्तीयं यज्ञदत्तीयमिति प्रतिपत्तिः। इह हविर्धानमिति हविस्संबन्धः प्रतीयते तथा सामिधेनीरिति समिन्धनसंबन्धः प्रतीयते तेन श्रौतार्थान्वयानुपपत्तेः देशलक्षणया संबन्धोऽवसीयते। तथा 'हविर्धानं' 'सामिधेन्यः' इति समाख्या न पीडिता भवति। अन्यथा हि श्रुत्यर्थपरिग्रहे, हविर्धानं सामिधेनीनां सामिधेन्यो वा हविर्धानस्येति देवदत्तस्येदं यज्ञदत्तस्येति यथेदमसंबद्धं तथेदमपि स्यात् तस्मादत्रापि पूर्ववत् देशलक्षणैवेति युक्तम्। आग्नेय्यधिकरणवच्च सामान्यविशेषसंबन्धे वाक्यभेदः स्यात्। अस्यार्थः—यथा आग्नेय्यधिकरणे अप्रकृतानां ग्रहणे तासां सामान्यसंबन्धे विशेषसंबन्धे च वाक्यभेदः, तथेहापि स्यात् अत्रापि सामान्येन तावद्धविर्धानसंबन्धः पुनश्च यस्मिन् सुन्वन्ति हविर्धाने तत्संबन्ध इति वाक्यभेदः स्यात्।

शास्त्रफलं प्रयोक्तरि। कथं पुनरत्र परिक्रयादिषु श्रूयमाणेषु संशयः? अस्यार्थः—यदा वरणं परिक्रयश्च श्रूयते तदा तयोः दृष्टार्थत्वेनानतिकारणत्वात् परिक्रीतै-

---

(1) P. 1086

अयमभिप्रायः कर्तृगामिक्रियाफलमत्र श्रूयते। अतस्तद्विरोधात् गौणं अदृष्टार्थं वा मन्यते। कथं तर्हि समाख्याः आध्वर्यवमित्येवमाद्याः ? ग्रन्थसंयोगादुपपन्ना भविष्यन्ति। तस्मात्स्वयं कर्तृतैव न्याय्येति पूर्वपक्षवादी मन्यते। अनियमवादी तु परिक्रीतैरपि क्रियमाणं तेनैव कृतं भवति। स हि तेषां प्रयोक्ता। प्रयोक्तुश्च कर्तृत्वस्मरणम्। न पुनराहृत्यैव कर्तृत्वम्। उत्सर्गस्तु स्वद्रव्यत्यागलक्षणत्वात् स्वयमेव कर्तव्यः। एवं कर्तृत्वे उपपन्ने न परिक्रयस्य गौणता, अदृष्टार्थता वा कल्पयितुं शक्यते। समा-

---

रन्यैरेव पदार्थाः कर्तव्याः। तथा 'मैत्रावरुणः प्रेष्यति चानुचाह' इति साक्षादन्य एव श्रूयते। तथा आध्वर्यवं इत्याद्याः समाख्याः सन्ति इति कथमत्र संशयः ? पूर्वपक्षाभावादिति। समर्थयते—अयमभिप्रायः—कर्तृगामिक्रियाफलं अत्र श्रूयते। अधिकारविधिसामर्थ्यात् कर्तृत्वमत्राधिकारिणः श्रूयते। तत्र यदि परः पदार्थान् कुर्यात् कर्तृत्वमेव विहन्येत। अतस्तद्विरोधात् अधिकारसामर्थ्याविगतकर्तृत्वविरोधात् परिक्रयं मन्यते गौणं तेन नायं परिक्रयः परिक्रयवद्भविष्यति परिक्रयोऽदृष्टार्थो वा भविष्यति। तदाह —अदृष्टार्थं वा मन्यते पूर्वपक्षवादी। मैत्रावरुणादिशब्दश्च कथञ्चित् यजमानपरतया वर्णनीयः। कथं तर्हि आध्वर्यवमित्याद्याः समाख्याः ? कर्मणामध्वर्युसंबन्धाभावात्। ग्रन्थसंयोगादुपपन्ना भविष्यन्ति। ग्रन्था एवाध्वर्यवः तद्विहितं च कर्म आध्वर्यवं भविष्यति। तस्मात् स्वयं कर्तृतैव न्याय्येति पूर्वपक्षवादी मन्यते। अनियमवादी तु द्रव्योत्सर्गमात्रं स्वयमेव कर्तव्यं स्वत्वत्यागलक्षणत्वात्तस्य, शेषं त्वन्यः स्वयं वा कुर्यादिति। अनियमं यो वदति स मन्यते परिक्रीतैरपि क्रियमाणं तेनैव कृतं भवति। कुतः ? स हि तेषां प्रयोक्ता प्रयोक्तुश्च कर्तृत्वस्मरणं तत्प्रयोजको हेतुश्चेति चकारात् कर्तृत्वस्मरणात्। अधिकारश्च नियोगनिबन्धनां सिद्धिमाक्षिपति। न पुनराहृत्यैव कर्तृत्वम् तेन न कश्चित्तस्य विरोधः। उत्सर्गस्तु स्वद्रव्यत्यागलक्षणत्वात् स्वयमेव कर्तव्यो यजमानेन एवं कर्तृत्वे उपपन्ने न परिक्रयस्य गौणता अदृष्टार्थता वा शक्यते कल्पयितुम्। समा-

ख्याश्च मुख्यार्थाः न ग्रन्थद्वारिकाः कल्पिता भविष्यन्ति। न हि अध्येतारोऽध्वर्युशब्दवाच्याः अध्ययनकाले। कथं पुनरनियमं मन्यते। अयमभिप्रायः यदा स्वयमनुत्साही तदा परिक्रयः यदासौ परिक्रयः तदा अन्यैरेवेति मन्यते। राद्धान्तवादी तु मन्यते नित्यवदाम्नानात् परिक्रयस्य यदा स्वयं न शक्नुयात तदा परिक्रयेणेति न शक्यते कल्पयितुम्। ननु च सामर्थ्याद्भविष्यति लोकवत। न हि श्रुतौ प्रत्यर्थिन्यां सामर्थ्यं प्रभवतीत्युक्तम्। लोके तु दृष्टार्थत्वात यथार्थमिति युक्तम्।

ख्याश्च आध्वर्यवमित्येवमाद्याः कर्मणां मुख्या भविष्यन्ति न ग्रन्थद्वारिकाः। ननु ग्रन्थ एवाध्वर्यवादयः समाख्याः न कर्मणि इत्यत्राह—न ह्यध्येतारः अध्वर्युशब्दाभिधेयाः अध्ययनकाले। यद्यध्येतॄणामध्वर्युशब्देनाभिधानं स्यात् तदा तद्योगात् ग्रन्थे समाख्या स्यात्। न चैतदस्ति। कर्मकाल एव तद्व्यपदेश इति कर्मकराणामेवाध्वर्य्वादिशब्दा वाचकाः तद्योगात कर्मण्येव मुख्या संज्ञेति। कथं पुनरनियमं मन्यते? परिक्रयणादीनां नित्यवच्छ्रवणात। युक्तं चोत्सर्गद्वारेणापि कर्तृत्वोपपत्तेः नित्यमन्यैरेव शेषः कर्तव्य इति। अयमभिप्रायः—यदा स्वयमनुत्साही तदा परिक्रयः यदाऽसौ परिक्रयः तदा अन्यैरेवेति मन्यते। अस्यार्थः—दृष्टार्थपर्यालोचनया अशक्तिपक्ष एव पुरुषान्तरापेक्षायां परिक्रयादय इति। शक्तेन तु स्वयं कर्तव्यमिति। राद्धान्तवादी तु मन्यते नित्यवदाम्नानात् परिक्रयस्य यदा स्वयं न शक्नुयात् तदा परिक्रयेणेति न शक्यते कल्पयितुम। तेन नित्यं परिक्रीतैरेव शेषकार्यं कर्तव्यम्। ननु सामर्थ्यात् भविष्यति। यदा न शक्नुयादित्येतत् सामर्थ्यात भविष्यति लोकवत्। परिहरति—न हि श्रुतौ प्रत्यर्थिन्यां सामर्थ्यं प्रभवति। श्रुतिश्चात्र नित्यमेव परिक्रयं ब्रवीति। यदेत्यश्रवणादित्युक्तम्। लोके तु दृष्टार्थत्वाद्यथार्थमिति युक्तम्। नियोगस्त्वत्रादृष्टरूपः परिक्रीतपुरुषसाध्य एवेति नित्यं परिक्रय उपादातव्यः।

॥ ९ ॥ [1]तत्रार्थात् कर्तृपरिमाणं स्यादनियमोऽविशेषात् ॥ २१ ॥

एवं स्थिते परिक्रीतकर्तृत्वे अन्यत्रोत्सर्गात् अनियमं सङ्ख्यायाः पूर्वपक्षवादी मन्यते। एकस्मिन्नपि समाख्यावरणयोरुपपत्तेः। राद्धान्तवादी तु उत्पत्तौ तावत् समाख्यातो भेदं मन्वानः न पुनरेक एव संज्ञी। चोदनावगम्यत्वात् संज्ञानाम्, चोदनाभेदाच्च यावच्चोदनं संज्ञिभेदनियममुक्तवान्। एवं दर्शपूर्णमासादिष्वपीत्युक्तम्।

तत्रार्थात् कर्तृपरिमाणम्। एवं स्थिते उत्सर्गादन्यत्र परिक्रीतकर्तृत्वे परेषां सङ्ख्याऽनियमं मन्यते पूर्वपक्षवादी। कार्यार्थं हि पुरुषा उपादीयन्ते। तत्र यदा यावद्भिः कार्यं तावन्त उपादेयाः। ननु स्तोकेषूपादीयमानेषु कथं समाख्या घटिष्यते? कथं च वरणभेद उपपद्यते? वृतत्वादिति। तत्राह—एकस्मिन्नपि समाख्यावरणयोश्च उपपत्तेः। एकत्रैव समाख्यानामुपपत्तिः वृक्षतरुन्यायेन। तथा एकस्यैव तत्तत्कर्मार्थतया वरणभेद उपपद्यते। राद्धान्तवादी तु उत्पत्तौ तावत् समाख्यातो भेदं मन्वानः। श्रुतौ तावदाध्वर्यवादिसमाख्या प्रतीयते। तत्र तद्भेदात् संज्ञिनामपि भेद एवावभाति। न पुनरेक एक संज्ञी चोदनावगम्यत्वात् संज्ञानाम्। एता हि संज्ञाः चोदनात एवावगम्यन्ते न लोकतः। यदि लोकतोऽवगम्येत तदा तदनुरूपोऽभेदो भेदो वा भवेत्। चोदनावगम्ये यथाचोदनं संज्ञाभेदात् संज्ञिभेद इति यावच्चोदनं पुरुषाः यावत्यः उत्पत्तिचोदनाः तावन्तः पुरुषा इत्युक्तवान्। एवं दर्शपूर्णमासादिष्वपीत्युक्तम्। अत्राधिकरणे पूर्वपक्षसिद्धान्तरचने ईदृशी—एकत्रापि संज्ञानानात्वदर्शनात् न भेदः संज्ञिनामिति पूर्वः पक्षः। राद्धान्तस्तु पुरुषाणामेताः संज्ञाश्चोदनावगम्याः। तत्र च शब्दभेदात् अधिकार्थत्वमेव न्याय्यम्। न पुनरेकस्यैव शब्दार्थस्य अनेकशब्दत्वादुपपत्तिः[2]। यत्र पुनः प्रमाणान्तरेण दर्शनं तत्र किं क्रियतामिति।

---

(1) P. 1089 (2) शब्दत्वापत्तिः

॥ १० ॥ [1]चमसाध्वर्यवश्च तैर्व्यपदेशात् ॥ २५ ॥

चमसाध्वर्यवश्च किं ऋत्विक्सङ्ख्यासङ्ख्येयाः उत सङ्ख्यान्तरपरिच्छेद्याः। ननु च होतृकाणां चमसाध्वर्यव इति व्यपदेशात् अन्यैर्भवितव्यम्। परस्परव्यपदेशादप्येतदुपपद्यत इति पूर्वः पक्षः। न हि षष्ठ्यन्तानां परस्परसंबन्धो विद्यत इति राद्धान्तवादी व्यतिरिक्तं मन्यते। उत्पत्तौ च संज्ञाभेदात्। तस्मादन्ये ते इति।

॥ ११ ॥ [2]उत्पत्तौ च बहुश्रुतेः ॥

इदमिदानीं सन्दिह्यते—किमनियता उत बहव इति

चमसाध्वर्यवश्च तैर्व्यपदेशात्। चमसाध्वर्यवश्च किं ऋत्विक्सङ्ख्यासङ्ख्येयाः उत सङ्ख्यान्तरपरिच्छेद्याः' इत्याक्षेप्तुं संशयोऽनुभाषितः। आक्षेपमाह—ननु च होतृकाणां चमसाध्वर्यव इति व्यपदेशात् अन्यैरेव चमसाध्वर्युभिर्भवितव्यम्। ततश्च पूर्वपक्षाभावात् संशय एव नास्तीत्यर्थः। परस्परव्यपदेशादप्येतदुपपद्यत इति पूर्वः पक्षः। अन्योन्यमृत्विजां ऋत्विगन्तरापेक्षया स व्यपदेश इति न ऋत्विक्सङ्ख्यातिरिक्ताश्चमसाध्वर्यवः। न षष्ठ्यन्तानां परस्परसंबन्धो विद्यत इति राद्धान्तवादी व्यतिरिक्तं मन्यते। अस्यार्थः—सर्वे एव ऋत्विजः षष्ठ्यन्तेन निर्दिश्यन्ते 'होत्रकाणां' 'मध्यतः कारिणां' इत्येवमादिषु वाक्येषु। न च षष्ठ्यन्ते परस्परं संबन्धावगतिः यथा देवदत्तस्य भ्राता यज्ञदत्तस्य भ्रातेति ताभ्यामन्यः प्रतीयते न पुनः परस्परं तयोः संबन्ध इति ऋत्विग्व्यतिरिक्ताश्चमसाध्वर्यवः। उत्पत्तौ च संज्ञाभेदात यद्युत्पत्तौ संज्ञाभेदो न स्यात् तदा लौकिकीयं समाख्येति यथालोकं वर्तेत। ततश्च भेदो न स्यात्। उत्पत्तौ संज्ञाभेदात युक्तोऽर्थभेदः। तस्मादन्ये चमसाध्वर्यवः इति।

उत्पत्तौ बहुश्रुतेः। इदमिदानीं सन्दिह्यते—किमनियता उत बहव इति।

---

(1) P. 1089 (2) P. 1092

प्रातिपदिकार्थसिद्धेरनियता इति। अनियमेऽपि बहुवचनोपपत्तेः। न, नित्यवद्बहुवचनस्य श्रूयमाणत्वात्। उत्पत्तौ च बहुवचनस्य विवक्षितत्वात्। असिद्धार्थलक्षणं हि प्रातिपदिकं न वचनमपेक्षते। नोत्पाद्यवचनम्। तस्माद्बहवः।

॥ १२ ॥ [1]दशत्वं लिङ्गदर्शनात् ॥ २७ ॥

स्थिते बहुत्वे किमनियमः उत नियतैव काचित् बहुवचनाभिधेया सङ्ख्या उत त्रित्वसङ्ख्यैवेति। कपिञ्जलाधिकरणेन त्रिसङ्ख्यैवेति प्राप्ते दर्शनाद्दशपेये, स्वामिदशत्वाच्च दशैवेति नियमः।

प्रातिपदिकार्थसिद्धेरनियताः। एकस्मिन्नपि प्रातिपदिकार्थसिद्धेरनियताः। ननु कथं बहुवचनं चमसाध्वर्यून् वृणीत इति तत्राह—अनियमेऽपि पक्षे बहुवचनोपपत्तेः। राद्धान्तमाह—न, नित्यवद्बहुवचनस्य श्रूयमाणत्वात् पाक्षिकत्वानुपपत्तेः। ननु च चमसाध्वर्यूणामुद्देश्यत्वात् ग्रहवदविवक्षिता सङ्ख्येत्यत्राह—उत्पत्तौ च बहुवचनस्य विवक्षितत्वात्। अस्यार्थः—यद्यपि चमसाध्वर्यवः इह वाक्ये उद्देश्याः तथापि तेषां सङ्ख्याऽनवगता इत्यस्ति सङ्ख्यापेक्षा कियन्त उत्पाद्यन्त इति। तेनापेक्षितत्वात् विवक्षिता संख्येति। ग्रहे तु विज्ञातत्वात् सङ्ख्यायाः अपेक्षैव नास्तीति युक्ता तत्राविवक्षा। तदाह—असिद्धार्थलक्षणं प्रातिपदिकं न वचनमपेक्षते नोत्पाद्यवचनम्। तस्माद्बहवः। इदमेवात्र व्युत्पाद्यते उत्पाद्यगता सङ्ख्या उद्देश्यत्वेपि विवक्षितेति।

दशत्वं लिङ्गदर्शनात्। स्थिते बहुत्वे किमनियमः, उत नियतैव काचित् बहुवचनाभिधेया सङ्ख्या, उत त्रित्वसङ्ख्यैवेति संशयः। अनेन अवान्तरसङ्गतिमाह—कपिञ्जलवत् त्रित्वसङ्ख्यैवेति अनियम इति वा प्राप्ते दशपेये विकृतिभूते सिद्धवत् दश चमसाध्वर्युदर्शनात् दशैवेति नियमः। स्वामिदशत्वाच्च। अत्र च अनियमपक्ष

(1) P. 1092

अन्यत्रापि श्रूयमाणा नियता सङ्ख्या अनियतोपदेशं नियन्तुमर्हति अविरोधात्। तथा चोक्तं कारणादतिक्रम इति।

॥ १३ ॥ [1]शमिता च शब्दभेदात् ॥ २८ ॥

एवं स्थिते शमितापि शब्दभेदात् चमसाध्वर्युवद्भिद्यते। संज्ञाभेदश्चोपपन्नो भवति। एवं प्राप्तेऽभिधीयते-नात्र भेदः उत्पत्तिनिबन्धनो हि भेद उक्तः। न चास्योत्पत्तिरस्ति। कथं तर्हि संज्ञान्यत्वं?

उपक्रममात्रम्। कपिञ्जलान्यायेन त्रय एवेति पूर्वः पक्षः। कथं पुनः दशपेये दशदर्शनादिह दश भवेयुरित्यत्राह—**अन्यत्रापि नियता सङ्ख्या उपदेशं नियन्तुमर्हति अविरोधात्।** यद्यत्र त्रयो भवेयुः तदा सिद्धवद्दर्शनं नोपपद्यते दशपक्षे तु बहुवचनस्य न कश्चिद्विरोधः दशानामपि बहुत्वात्। **तथा चोक्तं कारणादतिक्रम इति।** ननु तेनैव तर्हि गतार्थमिदम्। न। अन्यवर्तित्वात् दशसङ्ख्यायाः पूर्वपक्षिणोऽधिकाशङ्का।

शमिता च शब्दभेदात्। यथा संज्ञाभेदात् चमसाध्वर्यवः ऋत्विग्भ्यो भिद्यन्ते एवं **शमितापि शब्दभेदाद्भिद्यते।** अनेनावान्तरसङ्गतिरुक्ता। युक्तिमाह—**संज्ञाभेदश्चोपपन्नो भवति।** अन्यथा एकस्यैवार्थस्यानेकशब्दत्वमन्याय्यमाश्रितं स्यात् इति। राद्धान्तमाह—**नात्र भेदः उत्पत्तिनिबन्धनो हि भेद उक्तः। न चास्योत्पत्तिरस्ति।** अस्यार्थः—न शब्दभेदमात्राद्भेद उक्तः। अपि तु उत्पत्तिचोदनाभेदात्। उत्पत्तिचोदनायां हि अलौकिकी संज्ञा भवति। अन्यथा तु अलौकिकार्थान्तराभावात् प्रकृतानामन्यतरस्मिन्नयं शब्दो वर्तत इति निश्चीयते। यद्यस्योत्पत्तिर्नास्ति **कथं तर्हि संज्ञान्यत्वं**

(1) P. 1092

नैवेयं संज्ञा अस्य, विरोधात्। किं तर्हि? यौगिकाभिधानमेव। एवं चाध्वर्यवमिति समाख्योपपन्ना भविष्यति।

॥ १४ ॥ [1]उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥

केन पुनर्विशेषेणायमधिकरणातिदेशः? अयं विशेषः उपगा इति गानकारिणां संबन्धात् चमसाध्वर्यव इव होत्रकाणामिति पूर्वपक्षवादी मन्यते। उत्पत्तेरश्रवणादित्यतिदिष्टो राद्धान्तः। लिङ्गमुक्तम्।

नार्थान्तरं विना संज्ञान्यत्वमुपपद्यत इति औत्सर्गिको न्यायः। उत्तरं—**नैवेयं संज्ञा, किं तर्हि? यौगिकाभिधानमेव** शमयतीति शमिता। तेन यः शमयति पशुं स प्रकृतानामन्यतमो भविष्यति। **एवं चाध्वर्यवमिति समाख्या उपपन्ना भविष्यति।** शामित्रमप्याध्वर्यवमिति समाख्यायते। यदि चाध्वर्युरेव शमिता एवमुपपद्यते समाख्येति।

उपगाश्च लिङ्गदर्शनात्। केन विशेषेणायमधिकरणातिदेशः? यावता उपगाशब्दोऽपि यौगिकः। न[2] चास्योत्पत्तिरस्ति। **अयं विशेषः उपगा इति गानकारिणां संबन्धात् चमसाध्वर्यव इव होत्रकाणामिति पूर्वपक्षवादी मन्यते।** अस्यार्थः—गातॄणामुपगाः संबन्धिनो भवन्ति। न च ऋत्विगन्तरसंबन्धिता ऋत्विजः। तेन यथा चमसाध्वर्यवो होत्रकाणां संबन्धिनोऽन्ये च ऋत्विग्भ्यः तथा उपगा इति पूर्वपक्षवादी मन्यते। **उत्पत्तेरश्रवणादित्यतिदिष्टो राद्धान्तः।** उत्पत्तेरश्रवणादर्थान्तराभावात् तेष्वेवायमुपगाशब्दो यौगिकः। यश्च गातृसंबन्धः स गानोपचयकारित्वनिबन्धनो न स्वामिकर्मकरत्वनिबन्धनः। **लिङ्गमुक्तम्।**

---

(1) P. 1094 (2) G. न चान्यो

[1]विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ॥ ३१ ॥

सोमविक्रयी पुनः कः? तेषामेवान्यतम इति मन्यते। ननु चाचोदितो विक्रयः। चोदितस्य च ऋत्विजः कर्तृत्वेनोपादीयन्ते। क्रयोपादानशेषत्वं विक्रये मन्वानस्य पूर्वः पक्षः। राद्धान्तवादी तु लोभादेवाक्षेपसिद्धेः द्रव्यार्जनवन्न शेषं मन्यते। तस्मादनार्त्विजमेतत्। अतोऽन्य इति राद्धान्तितम्।

॥ १६ ॥ कर्मकार्यात् सर्वेषामृत्विक्त्वमविशेषात् ॥ ३२ ॥

ननु चात्र राद्धान्तो न घटते। कथं न घटते?

विक्रयी त्वन्यः। सोमविक्रयी पुनः किमृत्विगेव उतान्य इति **तेषा**मृत्विजा**मेवान्यतम इति** पूर्वपक्षवादी **मन्यते**। चोद्यमाह—**ननु चाचोदितो विक्रयः चोदितस्य च ऋत्विजः कर्तृत्वेनोपादीयन्ते**। अस्यार्थः—यच्चोदितं तत्क्रतोरङ्गम्। यच्चाङ्गं तद्यजमानेन कर्तव्यम्। तदेव कर्तुं पुरुषा उपादीयन्त इति कथं विक्रयः आर्त्विजः। परिहरति—**क्रयोपादानशेषं** विक्रयं **मन्वानस्य पूर्वः पक्षः**। क्रयस्तावच्चोदितः न चासौ विक्रयं विना सिध्यति। न कश्चित्सोमविक्रये स्वतः प्रवृत्तः सोमविक्रयस्य प्रतिषिद्धत्वात्। क्रत्वर्थत्वे तु विक्रयस्य नास्ति प्रतिषेधः इति क्रयोपादानशेषतया विक्रयोऽप्यङ्गम्। अतः ऋत्विजैव कर्तव्यं इतराङ्गवदिति पूर्वः पक्षः। **राद्धान्तवादी तु लोभादेव** विक्रेतु**राक्षेपसिद्धेः द्रव्यार्जनवन्न शेषं मन्यते**। यद्यप्यस्ति प्रतिषेधः तथापि केचिल्लोभात् अतिक्रान्तनिषेधाः स्वत एव सोमविक्रयेऽपि प्रवृत्ताः। तानाश्रित्य प्रयोगविधिः न सोमविक्रयमाक्षिपति यथा द्रव्यार्जनम्। अपि च शूद्रादीनां सर्वविक्रयाभ्यनुज्ञानात् निषेधातिक्रमोऽपि नास्ति इत्य**नार्त्विजमेव। अतोऽन्यः** सोमविक्रयीति सिद्धम्।

कर्मकार्यात् सर्वेषाम्। ननु चात्र राद्धान्तो न घटते। कथं न घटते? आक्षेपा

---

(1) P. 1094

उत्पत्तावपि हि परिसङ्ख्यैव प्राप्नोति। चमसाध्वर्यूणामप्युत्पत्तिश्रवणात्। अथ परिसङ्ख्यैवेष्टा, ऋतुयजननिमित्तनिरसनमनर्थकं स्यात्। अत्रोच्यते—उत्पत्तौ नैव परिसङ्ख्या प्राप्नोति। एकैकत्र उद्गात्रादिशब्दतुल्यत्वात् ऋत्विक्शब्दस्य नात्रापह्नवनीयं किञ्चिदस्ति। ऋतुयजननिमित्ते पुनरपह्नवः प्राप्नोति। न चासौ शक्यते। एवं चोपरितनमधिकरणमुपपन्नं भवति।

आह—उत्पत्तावपि **परिसङ्ख्यैव प्राप्नोति** यद्युत्पत्तिरेव ऋत्विक्शब्दस्य प्रवृत्तौ निमित्तं तथापि **परिसङ्ख्यैव प्राप्नोति** सप्तदशर्त्विज इति। कुतः? **चमसाध्वर्यूणामप्युत्पत्तिश्रवणात्।** उत्पत्तिनिमित्तत्वे तेषामपि ऋत्विक्शब्दप्रवृत्तौ सप्तदशेति सङ्ख्यानुपपत्तौ परिसङ्ख्यैवाश्रयणीया। **अथ परिसङ्ख्यैवेष्टा**ऽभिधानस्य **ऋतुयजननिमित्तनिरसनमनर्थकं स्यात्।** ऋतुयजननिमित्तत्वेपि ऋत्विगभिधानस्य परिसङ्ख्यैवेयं भविष्यति सप्तदशऋत्विज इति राद्धान्तं संबन्धयति—**अत्रोच्यते। उत्पत्तौ** निमित्तभूतायामङ्गीक्रियमाणायां **नैवं परिसङ्ख्या प्राप्नोति एकैकत्रोद्गात्रादिशब्दतुल्यत्वात् ऋत्विक्शब्दस्य नात्रापह्नवनीयं किञ्चिदस्ति।** अस्यार्थः—तत्र परिसङ्ख्या भवति यत्रापह्नवनीयं किञ्चिदस्ति, उत्पत्तौ शब्दनिमित्तायां अङ्गीक्रियमाणायां यथोद्गात्रादिशब्दः एकैकत्रालौकिकार्थः तथाऽयमपि ऋत्विक्शब्दः षोडशसु चोदनैकसमधिगम्यवाचकभावः। तेन यत्रैव वेदेन प्रयुक्तः तेषामेव वाचक इति निश्चीयते नान्येषामिति नास्ति परिसङ्ख्येयम्। **ऋतुयजननिमित्ते पुनः** ऋत्विक्शब्देऽर्थापह्नवः। सर्वेषामृतौ यजनात्। भवतु को दोष इत्यत्राह—**न चासौ शक्यते** वचनशतेनापि। [1]वचनप्रवृत्तेः सति निमित्ते दुर्वारत्वात्। यत एवोत्पत्तिनिमित्ता अत एव लौकिकीयं संज्ञा। **अत एवोपरितनमधिकरणमुपपन्नं भवति।** वैदिकप्रयोगेण ऋत्विक्शब्दार्थनिश्चये यत्रैव प्रयुज्यते तत्रैव वाचक इति निश्चीयते। तेन षोडशानामेव ऋत्विक्त्वं सिध्यति। अन्यथा ऋतुयजननिमित्तत्वे सर्वेषामृत्विक्शब्दाभिधेयता स्यात्। एवं च वदता पूर्वाधिकरणस्य विशेषपर्यन्तताऽव्यवस्थापनमात्रमिदमित्युक्तं भवति।

---

(1) G. शब्दवृत्तेः

॥ १७ ॥ [1]नियमस्तु दक्षिणाभिः श्रुतिसंयोगात् ॥ ३६ ॥

के त इति। ऋत्विग्भ्यो दक्षिणां ददातीति प्रक्रम्य यान् संकीर्तयति ते त इति राद्धान्तः। तथा ये यजमानास्त ऋत्विज इति दर्शितम्।

॥ १८ ॥ [2]स्वामिसप्तदशाः कर्मसामान्यात् ॥ ३७ ॥

सप्तदश ऋत्विज इति श्रूयते। तत्र किं सह यजमानेन सप्तदश उत यजमानव्यतिरिक्ता अन्ये सप्तदशेति कर्मकरसङ्ख्यैषा। न च स्वामी कर्मकरः। एकधर्मयुक्तानां चावान्तरसङ्ख्योपपद्यते इत्यन्य एवेति युक्तम्।

नियमस्तु दक्षिणाभिः। के त इति संशयः। 'ऋत्विग्भ्यो दक्षिणां ददाति' इति प्रक्रम्य दक्षिणाविशेषविधिपरे वाक्ये संप्रदानत्वेन कीर्तयति यान् ते त इति राद्धान्तः। तथा ये यजमानास्त ऋत्विज इति च दर्शितम्। यजमानानामेवार्त्विज्ये विधानात् ऋत्विक्कर्मकरतया यजमानेष्वेव चोदकप्राप्तदीक्षाकर्तृविशेषविधिपरे वाक्ये यान् शब्दान् प्रयुङ्क्ते तच्छब्दवाच्या ऋत्विज इति सिद्धमध्वर्य्वादीनामेवर्त्विक्त्वम्।

स्वामिसप्तदशाः। 'सप्तदश ऋत्विजः' इति श्रूयते। तत्र किं यजमानेन सह सप्तदश उत यजमानव्यतिरिक्ता अन्ये सप्तदशेति संशयः एवं च ब्रुवता गृहपतिशब्दो यजमानपरो भाष्ये इति व्याख्यातम्। किं प्राप्तम्? यजमानादन्ये सप्तदश यस्मात् कर्मकरसङ्ख्यैषा। न स्वामी कर्मकरः 'कर्मणि भृतौ' इति भृतिपूर्वं कर्म कुर्वाणे कर्मकर-शब्दो व्युत्पादितः न स्वामी भृत्यकर्म कुरुते[3]। ननु मा नाम भृत्यकर्म करोतु। कुरुते तावदसौ तेन किमिति तमेव गृहीत्वा सप्तदशेति व्यपदेशो न भवति इत्यत्राह—एकधर्म-युक्तानां चावान्तरसङ्ख्योपपद्यते। इत्यन्य एवेति युक्तम्। यदि ह्येकधर्मयोगो नाश्रीयते

(1) P. 1094 (2) P. 1099 (3) R. भृत्याः कर्म कुर्वते।

अत्रोच्यते—स्वामिसप्तदशाः सप्तदशः स्वामी येषां ते तथोक्ताः। ननु च कर्मकरसामान्यप्रयुक्तैवैषाऽवान्तरसङ्ख्या। केन वोक्तं नेति। कथं तर्हि स्वामिसप्तदशाः सप्तदश। न स्वामितया यजमानः सप्तदशः। किं तर्हि ? कर्तृतयैव। यजमानापेक्षैषा सङ्ख्या नाधिकारितया। ननु च सदस्यं वृणीत इति वरणोत्पत्तिमङ्गीकृत्य एषां सङ्ख्या, न च यजमान उत्पद्यते। उच्यते-षोडशानामेव वरणेनोत्पत्तिः। ननु च सदस्यं वृणीत इति सदस्यः सप्तदशो भविष्यति यदि ब्रह्मण्येवायं सदस्यशब्दो वर्तते।

तदा सर्वेषां पदार्थानां एकसङ्ख्यैव स्यात अवान्तरसङ्ख्यया व्यवहारो न स्यात्। अस्ति चासौ। तत्र हि एकधर्मयोग एव निमित्तम् नर्त्विजां यजमानस्य च एकधर्मयोग इति न तदभिप्रायेण सङ्ख्योपपद्यत इत्यन्य एव सप्तदशो यजमानादिति। अत्रोच्यते। स्वामि-सप्तदशाः सप्तदशः स्वामी येषां ते तथोक्ताः। ननु च कर्मकरसामान्यप्रयुक्तैषा अवान्तर-संङ्ख्या। परिहरति—केन वोक्तं न कर्मकरसामान्यप्रयुक्तेति। कथं तर्हि स्वामि-सप्तदशाः सप्तदश। उत्तरम्—न स्वामितया यजमानः सप्तदशः। किं तर्हि ? कर्तृ-तयैव। एतदेव स्पष्टयति—यजमानापेक्षैषा सङ्ख्या नाधिकारितया। ननु च 'सदस्यं वृणीत' इति वरणोत्पत्तिमङ्गीकृत्य एषा सङ्ख्या। न च यजमान उत्पद्यते। अस्यार्थः —यजमानोत्पाद्यतालक्षणैकधर्मयोगादेषा सङ्ख्या भवति। अस्ति च यजमानेनोत्पाद्योऽन्योऽपि सप्तदशः, सदस्यो नाम। तथा हि तस्य वरणं समामनन्ति "सदस्यं वृणीते" इति। अत्रापि च ऋत्विक्शब्दो लाक्षणिक एव। सत्यपि सदस्ये पुरुषान्तरे तत्र ऋत्विक्शब्दा-प्रयोगात्। अत एव भाष्यकारीयं सन्देहं परित्यज्य निबन्धनकारेणान्यथा सन्देहो दर्शितः। भाष्ये च सदस्यग्रहणमुपलक्षणम्। एतदुक्तं भवति—यजमानादन्यं यं कञ्चिदभि-प्रेत्य इयं सङ्ख्या उत यजमानमभिप्रेत्येति। चोद्यं परिहरति—उच्यते। षोडशानामेव वरणेनोत्पत्तिः। ननु च सदस्यं वृणीते' इति सदस्यः सप्तदशो भविष्यति यदि ब्रह्मण्ये-वायं सदस्यशब्दो वर्तते। अस्यार्थः—दक्षिणया पुरुषाणामुपादानमिति वक्ष्यामः। वरणं

तस्मात् स्वामिसप्तदशाः परिगृह्यन्ते। अथ कस्मादेकश्चमसाध्वर्युः न परिगृह्यते? न ते यजमानेन वरितव्या इत्युक्तम्। तस्मात् कर्मकरणसामान्यात् यजमान एवेत्युक्तम्।

॥ १९ ॥ [1]ते सर्वार्थाः प्रयुक्तत्वादग्नयश्च स्वकालत्वात् ॥ ३९ ॥

इदमिदानीं सन्दिह्यते—किं सर्वार्था ऋत्विजः यावत्पुरुषकार्यं यजमानस्य तावत्तैः क्रियते उत यावद्वचनमिति। "अग्नयश्च स्वकालत्वा"दिति। किमिदं? ननु चाधानस्य सर्वार्थतां वदता अग्नीनां सर्वार्थत्वमुक्तम्। किमिदं पुनः सर्वार्थतोच्यते? सैवेयं

तदनुग्राहकम्। तेन यद्यपि सदस्यस्य वरणं श्रूयते तथापि दक्षिणाश्रवणात न सदस्यो नामान्यः कश्चित् संभवति। दक्षिणा च ब्रह्मणः श्रूयते। वरणं च तस्य ब्रह्मशब्देन नोक्तम्। होत्रादीनां तु वरणं होत्रादिशब्देनैव। तेन ब्रह्मण एवेदं वरणम्। शक्नोति च तत्र योगिकया वृत्त्या सदस्यशब्दो वर्तितुम्। स हि सदसि भवः। तस्मात् स्वामिसप्तदशाः परिगृह्यन्ते। अथ कस्मादेकश्चमसाध्वर्युर्न परिगृह्यते नोत्पाद्यपुरुषाभिप्राया सप्तदशसङ्ख्येति। परिहरति—न ते यजमानेन वरितव्या इत्युक्तम् तेनोत्पत्तिः तेषामेकरूपा न भवतीत्यर्थः। तस्मात् कर्मकरैः ऋत्विग्भिः सामान्यात् समत्वात् यजमानस्य नित्यकर्मकरत्वात् यजमान एव सप्तदशो न चमसाध्वर्युः अशक्तिविषयत्वादिति।

ते सर्वार्थाः प्रयुक्तत्वात्। इदमिदानीं सन्दिह्यते—किं सर्वार्था ऋत्विजः यावत्पुरुषकार्यं यजमानस्य तावत्तैः क्रियते, उत यावद्वचनमिति। क्रतुप्रकरण एव यावत्पुरुषकार्यं तावत्तैः सर्वैः कर्तव्यं अनियमेन, उत यदेव यस्य वचनेन समाख्यया वा प्राप्तं तदेवेति। अग्नयश्च स्वकालत्वादिति किमिदं? एकग्रन्थेनाह—ननु चाधानस्य सर्वार्थतां वदता अग्नीनां सर्वार्थत्वमुक्तम्। किमिदं पुनस्सर्वार्थतोच्यते। अस्यार्थः

---

(1) P. 1102

सर्वार्थताऽत्र साध्यते स्वकालत्वादिति। ननु च स्वकालत्वात् यावदग्निकार्यं तत्सर्वमग्निभिरित्युच्यते यथा यावत्पुरुषकार्यं तत्सर्वमृत्विग्भिरिति। ततः किम्? तदेव नोपपद्यते समधिगतमेतत् अग्नयश्च स्वकालत्वादिति। न हि स्वकालत्वाद्यावदग्निकार्यं तदर्थता सिद्ध्यति। किं तर्हि? स्वकालत्वेन सर्वकर्मार्थता सिद्ध्यति न हि प्रतिकर्मोत्पत्तिर्भवतीत्यर्थः।

यदि साध्यतया सर्वार्थताऽग्नीनामुच्यते, तदयुक्तम्; साधितत्वात्। अथ निराकार्यतयोच्यते, तन्न, स्थितस्य न्यायस्योद्धाराभावात्। वदति च स्वकालत्वादग्नयः सर्वार्था इति। 'समधिगतमेतदि'ति स्थितमेवार्थं दर्शयति। तस्मादयुक्तमित्याक्षेपः। समाधत्ते—**सैवेयं सर्वार्थता अत्र पुनस्साध्यते स्वकालत्वादिति।** अस्यार्थः—एतदुक्तं भवति भिन्नेन सूत्रेणाधिकरणान्तरमेतत् सर्वार्थतामाक्षिप्य समर्थयितुमिति। तत्रायमाक्षेपः पूर्वमुक्तः आहिताग्नेरधिकारश्रवणात् आहितानां क्रत्वर्थता। तेन(न) विनियुक्तानामग्नीनां उत्पत्तिः इत्याधानं सर्वार्थमुक्तम्। तत्रेदमुच्यते—नन्वेतदेवायुक्तं आहिताग्नेरधिकार इति यथाऽधिकृतः पुरोडाशादिकमुत्पादयति तथैवाग्नीन् इत्येतदेव युक्तमिति। तत्रेदं समाधानम् स्वकालत्वादाधानस्यान्ततः कर्तुमशक्तेः आहिताग्नेरधिकार इति। अत्र चोदयति—**ननु च स्वकालत्वात् यावदग्निकार्यं तत्सर्वं अग्निभिरित्युच्यते यथा यावत्पुरुषकार्यं तत्सर्वमृत्विग्भिरिति।** अस्यार्थः—एकसूत्रोपात्तत्वादग्नीनां ऋत्विजां च ईदृशी सर्वार्थतोच्यते। ऋत्विजां च यावत्पुरुषकार्यकारितया सर्वार्थत्वमुच्यते। तेनाग्नीनामपि स्वकालत्वात् सकलाग्निकार्यकारितैवोच्यत इति। एकदेशी पृच्छति—**ततः किं?** आक्षेप्ता आह—**तदेतन्नोपपद्यते** [1]**समधिगतमेतत् अग्नयश्च स्वकालत्वादिति।** कुतः? **न हि स्वकालत्वाद्यावदग्निकार्यं तदर्थता सिध्यति** तत्र स्वकालत्वस्याहेतुत्वात्। **किं तर्हि? स्वकालत्वेन सर्वकर्मार्थता सिध्यतीत्युक्तो** न्यायः। **न हि प्रतिकर्म उत्पत्तिर्भवतीत्यर्थः।** स्वकालेनाधानेनाग्नयो लोहसुवर्णवत् आर्ज्यन्ते, न पुनः प्रतिकर्मेति दर्शितम्। समाधत्ते—यदि स्वकालत्वेन

---

(1) G. समर्थित

एवं तर्हि भवतैवोक्तम्। यस्माद्यस्यैव हेतुः स एव प्रतिज्ञातार्थः। तस्मात सूत्रद्वयमेवैतत्। आधस्त्यसूत्रस्य परिहारोऽयमुच्यते। इदं तु स्थितमेव। न ह्यत्र वचनानि नित्यानुवादतया कल्प्यन्ते। तस्माद्यावद्वचनमेवैतत ऋत्विजां कार्यम्।

॥ २१ ॥ [1]तस्योपदेशसमाख्यानेन निर्देशः ॥ ४१ ॥

इदमिदानीं चिन्त्यते। यद्येन समाख्यायते तत् तेनैव कर्तव्यं उत किञ्चिदन्येनापि इति। एष तावदुत्सर्गः यद्येन समाख्यायते तत्तेन कर्तव्यमिति। उच्यते—वचनात्

सर्वकर्मार्थता सिध्यति—एवं तर्हि त्वयैवोक्तं अस्मदभिप्रेतम्। कुतः—यस्मात् यस्यैव हेतुः स एव प्रतिज्ञातार्थः। तेन सर्वकर्मार्थता प्रतिज्ञायते तदनुरूपत्वात हेतोः। तस्मात् सूत्रद्वयमेतत्। यतः सूत्रद्वयम् अत एव आधस्त्यसूत्रस्य परिहारोऽमुच्यते इदं तु इदानीं सर्वार्थत्वं स्थितमेव। इदानीं परिहारमाह—न ह्यत्र वचनानि नित्यानुवादतया कल्प्यन्ते। यदि हि वचनानि नित्यानुवादतया कल्प्येरन् तदा सर्वपुरुषकार्यार्थता ऋत्विनां स्यात्। न त्वेतदस्ति पक्षे पुरुषान्तराणामपि तत्र प्राप्तत्वात। तस्मात् यावद्वचनमेव कार्यमृत्विजामिति।

तस्योपदेशसमाख्यानेन निर्देशः। इदमिदानीं चिन्त्यते—यद्येन समाख्यायते तत् तेनैव पुरुषेण कर्तव्यम् उत किञ्चिदन्येनापि इति भाष्योक्तः सन्देहो दर्शितः। एष तावदुत्सर्गः यद्येन समाख्यायते तत्तेन कर्तव्यमिति। उच्यते—तत्र वचनात्

---

(1) P. 1106

समाख्यानाच्च अपवादः। कथं तर्हि समाख्या? ब्राह्मणग्रामवदित्यदोषः। दर्शनमुक्तम्।

॥ २२ ॥ [1]प्रैषानुवचनं मैत्रावरुणस्योपदेशात् ॥ ४३ ॥

मैत्रावरुणः प्रेष्यति चानुचाहेति किं प्रैषमात्रं अनुवचनमात्रं मैत्रावरुणेन कर्तव्यं, उत संयुक्तमेवेति। संयुक्तस्य विद्यमानत्वान्नासंयुक्तं परिगृह्यते। चशब्दश्चैवं समर्थितो भवति। दर्शनमुक्तम्।

विशेषसमाख्यानाच्चापवादः। कथं तर्हि सामान्यसमाख्या? उत्तरं—ब्राह्मणग्रामवदित्यदोषः। अन्यथाप्युपपन्नत्वात् सामान्यसमाख्या दुर्बला। अन्यथाऽनुपपद्यमानतया च विशेषसमाख्या बलीयसी। वचनात्तु शीघ्रविनियोगावगमात् वचनं बलीय इति निर्णयः। दर्शनमुक्तम्।

प्रैषानुवचनं मैत्रावरुणस्य। 'मैत्रावरुणः प्रेष्यति चानुचाहे'ति किं प्रैषमात्रं अनुवचनसंयुक्तमसंयुक्तं च सर्वं तथा अनुवचनमात्रं तु यत्प्रैषेण संयुक्तमसंयुक्तं च तत्सर्वं मैत्रावरुणेन कर्तव्यं उत संयुक्तमेवेति सन्दिह्य राद्धान्तमाह—संयुक्तस्य विद्यमानत्वात् नासंयुक्तं परिगृह्यत इति। पूर्वपक्षोऽत्र स्पष्टत्वान्नोक्तः प्रत्युद्देशं वाक्यसमाप्तेः प्रैषमात्रे मैत्रावरुणस्य विनियोगः तथाऽनुवचनमात्र इति। राद्धान्तग्रन्थस्य त्वयमर्थः सहचरितासहचरितयोः सहचरिते प्रत्यय इति सर्वजनविदितमेतत्। अस्ति च प्रैषवचनसहितमनुवचनम्, अनुवचनसहितश्च प्रैषः इति तेन प्रेष्यतीत्ययं शब्दोऽनुवचनसहित एव प्रैषे वर्तते। तथा चानुचाहेति शब्दः प्रैषसहचरितमेवानुवचनमाह। अस्ति च तत् तथाविधं द्वयमपीति। चशब्दश्चैवं समर्थितो भवति समुच्चितावस्थाद्योतकः समुच्चितयोरेव मैत्रावरुणविनियोगदर्शनात्। दर्शनमुक्तम्।

---

(1) P. 1106

॥ २३ ॥ [1]चमसांश्चमसाध्वर्यवस्समाख्यानात् ॥ ४९ ॥

किं चमसैश्चमसाध्वर्यवो जुह्वति उताध्वर्युरेवेति। समाख्यैवान्यथा नोपपद्यत इति पूर्वः पक्षः। राद्धान्तस्तु—अध्वर्युशब्दस्योत्पत्तिनिमित्तत्वात्। अध्वर्युरिव चमसेषु भवन्तीति चमसाध्वर्यवः तस्मादध्वर्युर्जुहोतीति। कथं तर्हि अध्वर्युरिव भवति? अन्यत्र व्यापृते तस्मिन् तत्कार्यकरत्वात्। दर्शनमुक्तम्।

॥ २४ ॥ [2]वेदोपदेशात् पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥ ५० ॥

श्येनवाजपेयावुदाहरणम्। किं श्येनः उद्गात्रा कर्तव्यः समाख्यानात अध्वर्युणा च वाजपेयः उत षोडशभिरपीति।

चमसांश्चमसाध्वर्यवः। किं चमसैश्चमसाध्वर्यवो जुह्वति उताध्वर्युरेवेति संशये समाख्या अन्यथा नोपपद्यत इति पूर्वः पक्षः। यदि चमसाध्वर्यवः चमसेन जुह्वति कथं ते चमसाध्वर्यव इति समाख्यां लभेरन्। चमसे अध्वर्यवो भवन्तीति चमसाध्वर्यवः। अध्वर्योश्चान्यत्र होमकारिताऽवगता। तत्समानता तेषां पुरुषाणामिति पूर्वः पक्षः। राद्धान्तस्तु अध्वर्युशब्दस्योत्पत्तिनिमित्तत्वात् अनेकार्थाभिधानं न न्याय्यमिति अध्वर्युरिव चमसेषु भवन्तीति चमसाध्वर्यवः तस्मादध्वर्युर्जुहोतीति। अस्यार्थः—अध्वर्युशब्दस्तावत् अनेकार्थो न भवति। किन्तु विशिष्टस्य ऋत्विजो वाचकः पुरुषान्तरे गौणः। तत्र यदि चमसे अध्वर्योः होमो न स्यात् कथं तर्हि चमसे अध्वर्युवद्भावः? तस्मादवश्याङ्गीकरणीयः चमसे अध्वर्योर्होमः। तेन स एव जुहोति। कथं तर्हि अध्वर्युवद्भावः? विना कर्मणा तत्सादृश्यमनुपपन्नमिति। उत्तरं—अन्यत्र व्यापृते तस्मिन् मुख्ये अध्वर्योर्गौणस्य तत्कार्यकरणदर्शनात्। दर्शनमुक्तम्।

वेदोपदेशात्। श्येनवाजपेयावुदाहरणम्। किं श्येन उद्गात्रा समाख्यातः उद्गात्रा साङ्गः कर्तव्यः समाख्यानात्, अध्वर्युणा च वाजपेयः उत षोडशभिरपीति संशये

---

(1) P. 1108 (2) P. 1109

विशेषसमाख्यानात् उद्गात्राऽध्वर्युणा चेति प्राप्ते उपकारदर्शनात् षोडशभिरपीति वदामः। क्लृप्तो बलीयानित्युक्तो हेतुः।

इति बृहत्यां तृतीयाध्यायस्य
सप्तमः पादः

विशेषसमाख्यानात् उद्गात्रा अध्वर्युणा चेति प्राप्ते उपकारदर्शनात् षोडशभिरपीति वदामः। अस्यार्थः—प्रकृतौ पदार्था येन कृताः विकृतावपि तेनैव कर्तव्या ? तेषां पदार्थानां तत्र प्राप्तेः। ननु च वैकृती विशेषसमाख्या कर्त्रन्तरं कल्पयतीत्यत्राह—क्लृप्तकल्प्ययोः क्लृप्तो बलीयान् इत्युक्तो हेतुः। तत एतदुक्तं भवति—प्रकृतौ क्लृप्तः पुरुषान्तरसंबन्धः विकृतौ कल्प्यः। न च क्लृप्ते प्रतिपक्षे कल्पना आत्मानं लभते इति तत्र तत्रोक्तम्।

इति ऋजुविमलापञ्चिकायां तृतीयस्य
सप्तमः पादः

तृतीयाध्यायस्य अष्टमः पादः ॥

॥ १ ॥ [1]स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात् ॥ १ ॥

समाख्यया आध्वर्यवमिति प्राप्ते अधिकारश्रुतिविरोधात् याजमानमिति राद्धान्तः। वचनादन्येषामृत्विजामपि परिक्रयः स्यात्।

॥ २ ॥ संस्कारस्तु पुरुषसामर्थ्ये यथावेदं कर्मवद्व्यवतिष्ठेरन् ॥

वपनादीनां समाख्यया नाधिकारो विरुध्यत इति पूर्वः पक्षः।

अथ ऋजुविमलायां

तृतीयाध्यायस्य अष्टमः पादः

स्वामिकर्म परिक्रयः। समाख्यया आध्वर्यवमिति प्राप्ते अधिकारश्रुतिविरोधात् याजमानमिति राद्धान्तः। अस्यार्थः—आध्वर्यवमिति समाख्याते काण्डे परिक्रयस्य पठितत्वात् अध्वर्युकर्तृकमेव प्राप्तम्। न चेदमाशङ्कनीयम् किमिति परकीयकर्मकरणाय परः पुरुषान्तराणि परिक्रीणीते इति, यतः समधिकधन[2]लोभादयमर्थो लोके दृश्यत इति। एवं प्राप्ते ब्रूमः—अधिकारश्रुतेर्यजमानस्य सर्वत्र कर्तृतामापादयन्त्याः प्रधानभूताया विरोधात् समाख्याबाधेन याजमान एव परिक्रयः। अध्वर्युपरिक्रीतपुरुषान्तरकृताः पदार्थाः न यजमानेन कृताः नापि कारिताः। ननु लौकिकीमध्वर्युप्रयुक्तिमाश्रित्य यजमानकारिता भविष्यति। नेत्युच्यते। यावदेव श्रूयते तावदेवाश्रित्य शास्त्रार्थवर्णना युक्ता। न च परिक्रयान्तरमध्वर्योः श्रूयते। यावती चाध्वर्योः दक्षिणाऽऽम्नायते न तावत्या यजमानस्य पुरुषान्तरपरिक्रयार्थं अध्वर्युं प्रति प्रयोजकता संभवति। तस्मादाध्वर्यवत्वे परिक्रयस्य अधिकारश्रुतिविरोधः। **वचनादृत्विजामपि परिक्रयः स्यात्।** तत्र च परिक्रयान्तरकल्पनाऽनुपपन्नेति।

संस्कारास्तु पुरुषसामर्थ्ये। वपनादीनां समाख्यया नाधिकारो विरुध्यत इति पूर्वः पक्षः। अनेन पूर्वाधिकरणाद्विशेषमाह। यथा पूर्वत्रार्त्विजत्वे अधिकारश्रुतिविरोधः

---

(1) P. 1112 (2) R. ला

राद्धान्तवादी तु पुरुषसंस्कारं मन्वानो न संस्कर्तुं पुरुषाः परिक्रीयन्ते । किं तर्हि कारयितुम्, अतः सामर्थ्यात् समाख्याबाधं मन्यते। यत्र पुनः श्रुत्यैव संस्कारश्चोद्यते न तत्र सामर्थ्यान्निवृत्तिः यथोपवासं वक्ष्यति। अथोभयानुग्रहाय समानविधानं कस्मान्न भवतीति चेत्? ऋत्विक्षु क्रियमाणो यजमानेन कृतः कारितो वा न भवति।

तथाऽत्र नास्ति क्रीतैः ऋत्विग्भिः क्रियमाणा वपनादयो यजमानेनैव कृताः यतः । तेन वपनादयः समाख्ययाऽऽध्वर्यवाः । एवं च स्थितेऽस्मिन्नधिकरणे यजमानसंस्कारत्वे फलसंयोगादित्यत्र (३-७-२) अधिकृतावस्थासंस्कारत्वमुक्तम् । **राद्धान्तवादी तु पुरुषसंस्कारं मन्वानो न संस्कर्तुं पुरुषाः परिक्रीयन्ते किं तर्हि कारयितुम्। अतः सामर्थ्यात् समाख्याबाधं मन्यते।** अस्यार्थः—यद्ययं पुरुषसंस्कारो न भवेत् तदा भवेदेव निर्वापादिवत् आध्वर्यवः । (इति पुरुषसंस्कारः) पुरुषसंस्काराश्चैते लोकवत् । तत्र चाध्वर्युसंस्कारत्वे अधिकारश्रुतेर्विरोधः यजमानस्य तेषु कर्तृत्वानुपपत्तेः । परिक्रयद्वारेण हि तेषु यजमानस्य कर्तृता । न च संस्कारार्थः परिक्रयः । कार्यान्तरशेषभूतस्य हि द्रव्यस्योपादानं न पुनः शेषिभूतस्य । परिक्रयश्च पुरुषोपादानम् । तेनासौ कर्म कर्तुं न संस्कर्तुमिति परिक्रयस्य तादर्थ्याभावात् न परिक्रयद्वारेण यजमानस्य ऋत्विक्संस्कारत्वेन वपनादिषु कर्तृत्वोपपत्तिरिति अधिकारश्रुतिविरोधात् समाख्याबाधः ।

यत्र पुनः श्रुत्यैव ऋत्विक्संस्कारश्चोद्यते न तत्राधिकारश्रुतिसामर्थ्यात् ऋत्विजो निवृत्तिः यथा उपवासं वक्ष्यति कथं पुनः तेषु यजमानस्य कर्तृत्वं ? उच्यते संस्कारसंस्कृतऋत्विक्कर्तृकपदार्थत्वेन परिक्रयः संस्कारार्थः तत्र कथ्यते । इह सन्दिग्धं ऋत्विक्संस्कारत्वमिति विशेषः । **अथोभयानुग्रहाय** समाख्याधिकारश्रुतिसामर्थ्यानुग्रहाय **समानविधानं**[1] ऋत्विग्यजमानसाधारणः **कस्मान्न भवतीति चेत् ?** उत्तरं —**ऋत्विक्षु क्रियमाणो यजमानेन कृतः कारितो वा** यस्मान्न भवति तस्मान्न साधारणः

(1) G. omits विधानं

किमिति न कृतः कारितो वा? [1]साधारण्यादेव। ननु चेडा-भक्षणवत् स्वयं च करोति कारयति च। न। तत्र कर्तृत्वेना-विशेषात्। इह तु प्राधान्याविशेषादनुपपत्तिः। तस्माद्याजमान इति सिद्धम्। वचनाद्वा यजमानपञ्चमा इति।

॥ २ ॥ [2]तपश्च फलसिद्धित्वाल्लोकवत् ॥ ९ ॥

किमत्रातिदिश्यते? राद्धान्तः। का पुनरत्र पूर्वपक्षा-शङ्का? इयमस्ति क्लेशरूपत्वात तपसः। परिक्रयश्च क्लेशापनुत्तये दृष्टार्थो भवति।

किमिति न कृतो न कारितो वा?। उत्तरं—साधारण्यादेव ऋत्विग्यजमान-साधारण्यादेव। ननु चेडाख्यभक्षणवत् स्वयं च करोति कारयति च। यथेडाभक्षणं स्वयं यजमानः करोति ऋत्विजश्च कारयति तथा वपनादीन्यपि। परिहरति—न, तत्र कर्तृत्वेनाविशेषात्। इह तु प्राधान्याविशेषादनुपपत्तिः। अस्यार्थः—भक्षणं द्रव्य-संस्कारत्वात् तत्र यजमानस्य ऋत्विजां च कर्तृत्वेन संबन्धः। तेन परिक्रयस्य तदर्थत्वात् कारितत्वमुपपन्नम्। इह तु प्राधान्ये अविशेष आशङ्क्यत इति कारितत्वानुपपत्तिः। तस्माद्याजमान इति सिद्धम्। इडाभक्षणे परिहारान्तरमाह—वचनाद्वा यजमानपञ्चमा इडां भक्षयन्तीति वचनाद्वा साधारणस्संस्कारो भविष्यति। इति।

तपश्च फलसिद्धित्वाल्लोकवत्। किमत्रातिदिश्यते? उत्तरं—राद्धान्तः अतिदिश्यते। का पुनरत्र पूर्वपक्षाशङ्का? इयमस्ति क्लेशरूपत्वात् तपसः। क्लेश-रूपं तप इति लोकसिद्धम्। तथापि किं? परिक्रयश्च क्लेशापनुत्तये दृष्टार्थो भविष्यति क्लेशापनुत्त्यर्थत्वे हि परिक्रयो दृष्टार्थोभवति। तेन परिक्रयस्य तपोऽर्थत्वात् भवति

---

(1) P. 1115 (2) सामान्याभिधानादेव-मू.

न संस्कारसामान्यादिति राद्धान्तः। दर्शनमुक्तम्। उपवासश्च वचनादित्येतदप्युक्तम्।

॥ ४ ॥ [1]गुणत्वाच्च वेदेन न व्यवस्था स्यात् ॥ १२ ॥

हिरण्यमाल्यादिषु तु गुणत्वादेव पदार्थस्य न समाख्यया कर्तृत्वं नियम्यत इति सर्वर्त्विजां प्रतिप्रधानावृत्त्या गुणो भवितुमर्हति। यत्र पुनः कर्तृतयैव संबन्धः यथोक्थ्यादिषु तत्रोक्तः समाख्यया नियमः।

परिक्रयद्वारेण यजमानस्य कर्तृत्वमिति नाधिकारश्रुतेर्विरोध इति। राद्धान्तमाह—न संस्कारसामान्यादिति राद्धान्तः। यद्यपि क्लेशरूपं तपः तथापि पुरुषसंस्कार एवायम्। न च संस्कर्तुं परिक्रयः इति संस्कारैः वपनादिभिः समानत्वात् तदपि याजमानमेव। उपवासश्च वचनादित्यप्युक्तम्। 'ऋत्विज उपवसन्ति' इति साक्षाच्छ्रवणादिति।

गुणत्वाच्च वेदेन। हिरण्यमाल्यादिषु तु गुणत्वादेव पदार्थस्य न समाख्यया कर्तृत्वं नियम्यत इति सर्वर्त्विजां प्रतिप्रधानावृत्त्या गुणो भवितुमर्हति। वाजपेये ह्येतत्तदुक्तम्। ये साक्षादुपदिष्टाः पदार्थाः ते अध्वर्युणैव कर्तव्या इति साक्षादुपदिष्टाश्च हिरण्यस्रगादयः तेन ते अध्वर्युणैव कर्तव्या इति पूर्वपक्षमाशङ्क्य राद्धान्तोऽयमुच्यते गुणभूतेनेयं पुरुषेण कर्मणां समाख्या आध्वर्यवमिति न प्रधानभूतेन, तेन प्रधानभावे नियमं न करोति। गुणत्वेन पुरुषं प्रति हिरण्यस्रगादीनामुपदेश इति प्रतिप्रधानं गुणा आवर्तन्त इति न्यायात् सर्वर्त्विजामेव हिरण्यस्रगादयः प्रधानभावपूर्वकं च कर्तृत्वमिति न समाख्या नियन्तुमर्हति प्रधानभावबाधप्रसङ्गादिति। यत्र पुनः कर्तृतयैव पुरुषसंबन्धः यथा [2]उक्थ्यादिषु तत्रोक्तः समाख्यानियमः।

(1) P. 1116 (2) G. उपगवादिषु

॥ ५ ॥ [1]तथाकामोऽर्थसंयोगात् ॥ १३ ॥

कामसंयोग इदानीं श्रूयमाणः किमार्त्विजो भवतु गुणफलसंबन्धेषु उत याजमान इति। किं युक्तम्? आर्त्विजः। कुतः? ऋत्विक्पदार्थाश्रितत्वात् गुणफलसंबन्धस्य कामसंयोगोऽपि ऋत्विजामेव। अतो गुणकामेषु ऋत्विजामधिकार इति। अत्रोच्यते। यजमान एवाधिक्रियते साङ्गे कर्मण्यधिकृतत्वात्। ननु चासावार्त्विजपदार्थः। नेति ब्रूमः। तत्कर्तृको हि सः न पुनः तस्य सः। यस्य च कर्म तदाश्रितमपि तस्यैवेति यजमान एवाधिक्रियते। एवं चात्मनेपदाभिधानमुपपन्नं भवति।

तथा कामोऽर्थसंयोगात्। कामसंयोग इदानीं श्रूयमाणः किमार्त्विजो भवतु गुणफलसंबद्धेषु उत याजमान इति सन्देहः। किं युक्तम्? आर्त्विजः। कुतः? ऋत्विक्पदार्थाश्रितत्वात् गुणफलसंबन्धस्य कामसंयोगोऽप्यृत्विजामेव। अस्यार्थः—सदोमानं तावदार्त्विजमेव। तस्य तत्र कर्तृत्वात्। तत्र 'यदि कामयेत वर्षुकः पर्जन्य इति नीचैः सदो मिनुयात्' इत्युक्ते य एव माता तस्यैव काम इति प्रतीयते। अतो गुणकामेष्वृत्विजामेवाधिकार इति। अत्रोच्यते—यजमान एवाधिक्रियते साङ्गे कर्मण्यधिकृतत्वात्। यावत्किञ्चित्प्राधान्यमत्र तत्तावदुत्सर्गतः प्रधानत्वेन साङ्गे कर्मणि अधिकृतस्य यजमानस्यैव। तेन गुणफलमपि यजमानस्य। ननु चासावार्त्विजपदार्थः। आश्रयभूतो मानादिः न तस्य यजमानेन संबन्धः। कथं तदाश्रितो यजमानस्येत्यर्थः। परिहरति—नेतिब्रूमः। तत्कर्तृको हि सः न पुनः तस्य सः। तस्य ऋत्विजः स नोपकारकः किं तु यजमानस्यैव। तेन तत्र गुणभावेन संबद्धस्य ऋत्विजः न प्राधान्यम्। किंतु प्रधानभावेन संबद्धस्य यजमानस्यैव प्राधान्यमिति। तदाह—यस्य कर्म तदाश्रितमपि तस्यैवेति यजमान एवाधिक्रियते। एवं चात्मनेपदमुपपन्नं भवति। ज्योतिष्टोमेन

---

(1) P. 1117

यत्र च पुनः वचनादार्त्विजोऽधिकारः तत्रान्यदीयपदार्थाश्रितेऽपि गुणे व्यापृतस्य फलं भवति इति कल्प्यते ।

॥ ६ ॥ [1]मन्त्राश्चाकर्मकरणास्तद्वत् ॥ १५ ॥

इदानीमाशीर्मन्त्रा उदाहरणम् । किं याजमाना उतार्त्विजा इति । आर्त्विजास्समाख्ययेति प्राप्ते ब्रूमः— लिङ्गाद्याजमाना इति । लिङ्गं हि समाख्यातो बलीय इत्युक्तम् । प्रोषितसमिदाधानदर्शनं च लिङ्गम् । ननु च मम यजमानस्येत्येवमादि लिङ्गमुपपद्यते ।

यजेत' इति । इतरथा यजमानर्त्विक्फलकरणत्वे यजमानाभिप्रायेणात्मनेपदमुपपन्नं भवति ऋत्विगभिप्रायेण तदनुपपन्नम्', [2]यद्यपि ह्येतत् गुणफलं तदपि प्रधानादेव । अत एवापूर्वनिर्वृत्तेरिति सूक्तम् । यत्र तु वचनादार्त्विजोऽधिकारः तत्रान्यदीयपदार्थाश्रितेऽपि गुणे व्यापृतस्य फलं भवतीति कल्प्यते । न हि वचनस्यातिभारोऽस्तीति ।

मन्त्राश्चाकर्मकरणास्तद्वत् । इदानीमाशीर्मन्त्रा उदाहरणम् । किं याजमानाः यजमानेन कर्तव्याः । ततश्च "आयुर्दा अग्नेस्यायुर्मेदेहि" इति यजमानेन फलमाशास्यते उतार्त्विजाः ऋत्विक्प्रयोज्याः ऋत्विजामेव फलमाशीरिति । आर्त्विजाः समाख्ययेति प्राप्त उच्यते । लिङ्गाद्याजमाना इति । फलाशासकत्वादेषाम् । यजमानफलं चाशासितव्यम् । लिङ्गं हि समाख्यातो बलीय इत्युक्तम् । प्रोषित[3]समिदाधानदर्शनं च लिङ्गम् । न प्रोषितः ऋत्विग्भवति । यजमानस्तु प्रोषितो भवति इति दर्शितं भाष्ये । ननु च मम यजमानस्येत्येवमादि लिङ्गमुपपन्नम् । अस्यार्थः-यजमानशब्द एवाध्याहरिष्यते ऋत्विक् प्रयोक्ताऽस्तु । तेनायमर्थो भवति—मदीयस्य यजमानस्य आयुर्देहीति । तेन

(1) P. 1।18 (2) G. यद्यपि (3) G. प्रोषितसंविधान

अयमेव दोषः यदुताध्याहारो नाम। तस्माद्वक्तुरेव ममेत्युपपन्नं भवति।

॥ ७ ॥ द्व्याम्नातेषूभौ द्व्याम्नानस्यार्थवत्त्वात् ॥ १७ ॥

केचिन्मन्त्राः याजमाने चाध्वर्यवे चाम्नाताः। तत्र संशयः किं द्वाभ्यां वक्तव्याः उताध्वर्युणैवेति। कथं पुनः द्व्याम्नानात् द्वाभ्यां च समाख्याताः एकेन वक्तव्या इति। एककार्यत्वान्मन्त्राणामिति पूर्वपक्षवादी एकप्रयोज्यतां मन्यते। राद्धान्तवादी तु एकस्यानुष्ठानस्मरणादन्यस्य च प्रत्यवेक्षणात् आम्नानद्वयस्यापि अर्थवत्त्वात् द्वाभ्यामपि प्रयोक्तव्याः। समाख्याद्वयं चानुगृहीतं भविष्यति।

लिङ्गसमाख्ययोर्द्वयोरप्युपपत्तिः। परिहरति—अयमेव दोषः यदुताध्याहारो नाम। तस्माद्वक्तुरेव ममेत्युपपन्नं भवति यजमानप्रयोज्यपक्षे।

द्व्याम्नातेषूभौ। केचिन्मन्त्राः याजमानकाण्डे आध्वर्यवे च समाम्नायन्ते। तत्र संशयः—किं द्वाभ्यां कर्तव्याः उताध्वर्युणैवेति। कथं पुनः द्व्याम्नानात् द्वयोः काण्डयोराम्नानात् द्वाभ्यां च अध्वर्युयजमानाभ्यां समाख्याता एकेन वक्तव्या इति प्रतिभाति पूर्वपक्षिणः। समाधत्ते—एककार्यत्वान्मन्त्राणामेकार्थप्रकाशनकार्यकारित्वात् एकप्रयोज्यतां एकाध्वर्युप्रयोज्यतां पूर्वपक्षवादी मन्यते। अध्वर्योरेव कर्मकरत्वात् तेनैव स्मरणार्थं प्रयोक्तव्या मन्त्रा इति। राद्धान्तवादी तु एकस्याध्वर्योरनुष्ठानस्मरणात् अन्यस्य च यजमानस्य प्रत्यवेक्षणात् आम्नानद्वयस्याप्यर्थवत्त्वात् द्वाभ्यामपि प्रयोक्तव्या इति मन्यते समाख्याद्वयं चानुगृहीतं भविष्यति।

॥ ८ ॥ [1]ज्ञाते च वचनं न ह्यविद्वान् विहितोऽस्ति ॥ १८ ॥

कुल्हीयंजमानं वाचयतीति श्रूयते। किं विद्वानेव वाचयितव्यः उताविद्वानपीति संशयः। कथं पुनः विदुषोऽधिकारसिद्धेः अविदुषोऽधिकाराशङ्का? वाचयतीत्येतस्मादेव हि न विदुषो वाचयतीति दृष्टार्थता संभवतीति। एवं तर्हि अविदुष एव वाचनं भवतु। भवतु को दोषः? विदुषोऽधिकारहानिः प्राप्नोति। नाधिकारं निवारयामः अविदुषोऽप्यस्तीति। इदंफलमिदमधिकरणम्। अत्रोच्यते—नाधिकारमाक्षेप्तुमिदं वचः। ब्रुवन्तमेव हि वाचयतीति ब्रवीति। नाब्रुवतः प्रवृत्तिमाह। विदुषश्च

ज्ञाते च वचनं न ह्यविद्वान् विहितोऽस्ति। "क्लृप्तीर्यजमानं वाचयति" इति श्रूयते। कि विद्वानेव वाचयितव्यः उताविद्वानपि" इति संशयः भाष्योक्तोऽनुभाषितः आक्षेप्तुम्। आक्षिपति—कथं पुनः विदुषोऽधिकारे अविदुष्याशङ्का। यदि हि अविदुषोऽधिकारः स्यात् तदा तस्य वाचनं स्यात्। न च तस्याधिकारोऽस्ति। समाधत्ते—वाचयतीत्येतस्मादेव। न हि विदुषि वाचयतीति दृष्टार्थता संभवति इति विदुष्यधिकारिणि स्वयमेव ब्रुवति वाचयतीत्यदृष्टार्थं भवति। अविदुषि दृष्टार्थम्। तस्मादविदुषोऽधिकारः। ननु यद्यविदुषि दृष्टार्थता एवं तर्हि अविदुष एव वाचनं स्यात्। समाधाता आह—भवतु को दोषः। आक्षेप्ता आह—विदुषोऽधिकारहानिः प्राप्नोति। तत्पक्षे वाचनाङ्गाभावात् सकलाङ्गोपसंहारी प्रयोगविधिः यस्मिन्नेव तथाभूतः संभवति तस्यैवाधिकारः। समाधाता आह—नाधिकारं निवारयामः अविदुषोऽप्यधिकारोऽस्ति इदंफलमिदमधिकरणं पूर्वपक्षदशायाम्। अस्यार्थः—द्वयोरप्यधिकारः अविद्वत्पक्षे च दृष्टार्थतया वाचनमङ्गम्। राद्धान्तमाह—नाधिकारमविदुषोऽप्याक्षेप्तुं अर्थादुपस्थापयितुं समर्थमिदं वचनम्। कुतः? ब्रुवन्तमेव हि वाचयतीति शब्दो ब्रवीति इति नाब्रुवतः प्रवृत्तिमाह। य एव प्रकृत्यर्थे प्रवृत्तः तत्प्रयोजकत्व एव णिजुत्पद्यते नान्यत्र। विदुषश्च

(1) P. 1121

प्रकृत्यर्थे प्रवृत्तिः नाविदुषः श्रुतः । अतो यथाधिकारं वाचनमिति सिद्धम् ।

॥ ९ ॥ [1]याजमाने समाख्यानात् कर्माणि याजमानानि स्युः ॥ १९ ॥

इह द्वन्द्वान्युदाहरणम् । किं यजमानेन कर्तव्यानि उताध्वर्युणेति संशयः । एकत्र पदार्थाम्नानात् । अन्यत्र समभ्याशीकरणात् । तत्र विशेषसमाख्यया याजमानानि । पदार्थपूर्वकत्वात् समभ्याशस्य । अत्रोच्यते । पदार्थास्तावदाध्वर्यवा एव

प्रकृत्यर्थे प्रवृत्तिः नाविदुषः । दृष्टार्थत्वं उक्तस्योच्चारणेनापि भवति । तेन विद्वद्विषयत्वादस्यापि वाचनस्य नाविदुषोऽधिकारः । अतो यथाधिकारं वाचनमिति सिद्धम् । यस्यैव विदुषोऽधिकारः तस्यैव वाचनमिति यावत् ।

याजमाने समाख्यानात् । इह द्वन्द्वान्युदाहरणम् । किं यजमानेन कर्तव्यानि, उताध्वर्युणेति संशयः । कथं संशयः ? एकत्राध्वर्यवे पदार्थानामाम्नानात् अन्यत्र याजमाने समभ्याशीकरणात् । पदार्थानुष्ठानेन च समभ्याशीकरणसंपत्तिः । तेन यत्र पदार्थाः तेन समभ्याशीकरणमपि क्रियताम् , उत यत्र समभ्याशीकरणं तेन पदार्था अपि क्रियन्तां इति । तत्र विशेषसमाख्यया याजमानानि । सामान्येनाध्वर्यवे प्राप्ते विशेषेण याजमानसमाख्यया अध्वर्युसमाख्याबाधेन याजमानानि द्वन्द्वानि । ननु भवतु समभ्याशीकरणं याजमानम् । पदार्थस्तु कथमित्यत्राह—पदार्थपूर्वकत्वात् समभ्याशस्य । अनुष्ठेयपदार्थसमभ्याशः पदार्थानुष्ठानेनैव संपद्यत इति पदार्था अपि याजमाना एव । अत्रोच्यते —पदार्थास्तावदाध्वर्यवा एव समाम्नाताः अनुपजातविरोधित्वादध्वर्युणैव कर्तव्याः ।

---

(1) 1122

अक्रियमाणे पदार्थे न यजमानेन समभ्याशः शक्यते कर्तुमिति आध्वर्यव एव। विशेषसमाख्याप्रवृत्तिस्तु दर्शिता।

॥ १० ॥ [1]विप्रतिषेधे करणः समवायविशेषात् इतरमन्यस्तेषां यतो विशेषः स्यात् ॥ २१ ॥

ऋत्विगन्तरकार्योपदेशे किमात्मीयं कर्म करोतु उत अतिदिष्टमिति संशये अतिदिष्टं प्रत्यक्षविधानादिति सिद्धम्।

॥ ११ ॥ [2]प्रैषेषु पराधिकारात् ॥ २२ ॥

प्रैषप्रैषार्थौ किमेकेन कर्तव्यौ उत द्वाभ्यामिति।

पूर्वभाविनो हि पदार्थाः। तेषां तावदध्वर्युकर्तृतैव। **अक्रियमाणे पदार्थे न यजमानेन समभ्याशः शक्यते कर्तुमिति सोऽप्याध्वर्यव एव। विशेषसमाख्याप्रवृत्तिस्तु दर्शिता।** यजमानेन इदं चेदं च कुर्वित्यभिधानात् केषुचिच्चानुमन्त्रणप्रयोगादिति।

विप्रतिषेधे करणः। ऋत्विगन्तरकार्योपदेशे किमात्मीयं कर्म करोतु विरोधे उतातिदिष्टमिति संशये अतिदिष्टं प्रत्यक्षविधानादिति सिद्धम्। स्पष्टत्वात् पूर्वपक्षो न लिखितः। प्रत्यक्षविहितेनैककार्यकारिणा आतिदेशिकस्य बाधः। न चात्रैकं कार्यमस्तीति नास्ति बाधः। यदि परं विरोधादनुष्ठानाशक्तिः तत्रैकमनुष्ठास्यतीति। राद्धान्तस्तु एककार्यत्वाभावेपि तावदस्ति विरोधः। तत्र प्रत्यक्षविहितस्यानन्यगतित्वात् बलीयस्त्वं, इतरस्य प्रकृतावर्थवत्त्वेति।

प्रैषेषु पराधिकारात्। प्रैषप्रैषार्थौ किमेकेन कर्तव्यौ उत द्वाभ्यामिति संशये

---

(1) 1123 (2) 1127

प्राप्तकालभ्रान्त्या एकेनेति पूर्वः पक्षः। युष्मदर्थपरित्यागकारणाभावादिति राद्धान्तः।

॥ १२ ॥ [1]अध्वर्युश्च दर्शनात् ॥ २३ ॥

इदानीं किमध्वर्युः प्रैषार्थं करोतु उतान्य इति संशयः। अर्थवाददर्शनादन्य इति प्राप्तम्। मन्त्रलिङ्गदर्शनात् समाख्यानार्थसंभवाच्चाध्वर्युः। अर्थवादस्तु गुणवादेन परिहृतः।

कथं पूर्वः पक्षः अशक्यत्वात् इत्यत्राह—प्राप्तकालभ्रान्त्या एकेनेति पूर्वः पक्षः। अग्नीदग्नीन विहर इति प्राप्तकाले लोट् भविष्यति। तेनानुष्ठाता एवं ब्रूते—अग्नीत् अग्निविहरणस्य प्राप्तः कालः। तेन नास्त्यशक्यतेति समाख्यानात् द्वयमप्याध्वर्यवमेवेति पूर्वः पक्षः। युष्मदर्थापरिग्रहे कारणाभावात् प्रैष एवायं लोडिति राद्धान्तः। मध्यमपुरुषाविवक्षाप्रसङ्गात् न प्राप्तकाले लोट्। किन्तु प्रैष एवेति अशक्यत्वात् द्वाभ्यां कर्तव्यौ प्रैषप्रैषार्थौ इति।

अध्वर्युस्तु दर्शनात्। इदानीं स्थिते कर्तृद्वये[2] किमध्वर्युः प्रैषार्थं प्रैषरूपमर्थं करोतु उतान्य इति संशये "यदन्वञ्चं स्फयं धारयेत् वज्रो वै स्फ्यः वज्रेणैवाध्वर्युः क्षिण्वीत" इत्यर्थवादात् अन्यः प्रैषं करोतीति। अन्यत्र स्फ्यदर्शनात्। यस्य च हस्ते स्फ्यः स प्रेषकः तेन अग्नीत् प्रेषकः प्रेष्यश्चाध्वर्युः। समाख्याप्यर्थवादपदानुगुण्येन बाध्यते। एवं प्राप्ते मन्त्रलिङ्गादध्वर्युः प्रैषं करोतीति। 'अग्नीदग्नीन् विहर' इति मन्त्रे अग्नीधः प्रैषार्थावगतेः अर्थवादाच्च मन्त्रस्य बलीयस्त्वादनुष्ठानबोधकत्वात् समाख्यानार्थसंभवाच्च अध्वर्युरेव प्रैषकः। अर्थवादस्तु गुणवादेन गौण्या वृत्त्या परिहृतो भाष्ये 'अध्वर्युशब्देनाग्नीदेव गौण्या वृत्त्योच्यत इति।

---

(1) 1129 (2) G. कर्तृभेदे

॥ १३ ॥ [1]ऋत्विक्फलं करणेष्वर्थवत्त्वात् ॥ २५ ॥

कः पुनराशीर्मन्त्रैरस्य विशेषः ? समाख्यातः स्थितेऽध्वर्युकर्तृत्वे अग्न्यन्वाधानस्य श्रुत्या मन्त्रविधानम्। न च गुणानुरोधेन प्रधान (कर्तृत्व)बाधः शक्यते वक्तुम्। तस्मादाध्वर्यवो मन्त्र इति स्थिते कस्याशीरिति चिन्त्यते। लिङ्गादध्वर्योः। वक्ता हि उत्तमपुरुषेण संबध्यते। ननु कर्मसंबद्धफलसङ्कीर्तनात् कर्मार्थता मन्त्राणाम्। न। कर्मप्रयुक्तयशः प्रकाशयतः उपपन्नैव कर्मार्थतेति पूर्वपक्षवादी मन्यते। राद्धान्तवादी तु यश्चार्थादर्थो न स चोदनार्थ इति मन्वानः कर्मसंबद्धमेव फलं प्रकाशयन् मन्त्रः

ऋत्विक् फलं करणेष्वर्थवत्त्वात्। कः पुनरस्याशीर्मन्त्रैर्विशेषः ? आशीर्मन्त्रा याजमाना एवेति निर्णीतम्। तथेमे मन्त्रा याजमाना एव किमिति न संभवन्तीति विषयशुद्धिरेव नास्ति। आध्वर्यवत्वे हि चिन्तेयमुपपद्यते किं यजमानफलप्रकाशः उतर्त्विक्फलप्रकाश इति न याजमानत्वे। उत्तरं—**समाख्यातः स्थिते अध्वर्युकर्तृत्वे अग्न्यन्वाधानस्य श्रुत्या मन्त्रविधानम। न च गुणानुरोधेन प्रधानबाधः शक्यते कर्तुम्। तस्मादाध्वर्यवो मन्त्रः।** अग्न्यन्वाधानं तावत् आध्वर्यवमेव। तदङ्गभूतो मन्त्रोऽपि तथैव। न पुनर्मन्त्रलिङ्गालोचनया मन्त्रे यजमाने प्रयोक्तरि सिद्धेऽग्न्यन्वाधानमपि याजमानमेव। प्रधानेऽग्न्यन्वाधाने कर्तृबाधप्रसङ्गात्। तेन मन्त्रगतकर्तृबाधादाध्वर्यवो मन्त्र इति **स्थिते कस्याशीरिति चिन्त्यते। लिङ्गादध्वर्योः। वक्ता हि उत्तमपुरुषेण संबध्यते** सर्वत्र हि वक्त्रभिप्रायेण उत्तमपुरुषो भवति करोमीति। यथा अस्मच्छब्दोत्तमपुरुषौ च समानविषयौ। तेनास्मच्छब्दोऽयं 'ममाग्नेवर्चः' इति। तत्र कर्तृभूताध्वर्युविषय एवेति। आक्षिपति—**ननु कर्मसंबद्धफलसङ्कीर्तनात् कर्मार्थता मन्त्राणाम्।** न च यशः कर्मफलं चोदनावगतमिति कथं तत्प्रकाशकतया कर्मार्थता। उत्तरं—**कर्मप्रयुक्तयशः प्रकाशयतः उपपन्नैव कर्मार्थता इति पूर्वपक्षवादी मन्यते। राद्धान्तवादीतु यश्चार्थादर्थो न स चोदनार्थ इति मन्वानः कर्मसंबद्धमेव फलं प्रकाशयन् मन्त्रः**

(1) P. 1130

कर्मार्थो भवति। यजमानसंबद्धमेव फलम्। यजमानस्य ममेति मन्त्रार्थः।

॥ १४ ॥ [1]कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात् ॥ २८ ॥

यत्र पुनः दृष्टार्थमेव तत् किमृत्विजामेव उत अत्रापि कर्मफलमेवेति। उक्तेन न्यायेन कर्मफलमेवेति वदामः। अत्रोच्यते। यश्चार्थादर्थो न स चोदनार्थ इति अनुपकारमङ्गीकृत्यैतदुक्तम्। यत पुनः कर्मण उपकरोति तदुपादानशेषतया भवत्येव कर्मार्थमिति नाकर्मार्थता मन्त्राणाम्।

कर्मार्थो भवति इति मन्यते। अस्यार्थः--न यशः कर्मफलतया चोदनातोऽवगम्यते; किन्तु अर्थात्। यश्चार्थादर्थः न स चोदनार्थ इति चोदितं च फलं मन्त्रेण प्रकाशयितव्यम्। नानुषङ्गिकमपि। अतो यजमानसंबद्धमेव फलं वर्चः शब्देन प्रकाश्यते। मम यजमानस्येति मन्त्रार्थः। अस्मच्छब्देन भक्त्या यजमान एवोच्यत इति।

कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात्। यत्र पुनः दृष्टार्थमेव फलं असन्तापलक्षणं तत् किं ऋत्विजामेव उतात्रापि कर्मफलमेवेति। किं ऋत्विक्संबन्ध्यसन्ताप आशास्यते 'मा मा सन्ताप्त' इति उत यजमानफलमेव कर्मनन्यं सङ्कीर्त्यत इति सन्देहे उक्तेन न्यायेन कर्मफलमेवेति वदाम इति पूर्वः पक्षः। अत्रोच्यते—यश्चार्थादर्थो न स चोदनार्थ. इति अनुपकारकं फलमङ्गीकृत्य कर्मानुपकारकफलाभिप्रायेणैतदुक्तम्। यत्पुनः कर्मण उपकरोति - यथाऽसन्तापः। असन्तप्तः अध्वर्युः कर्म कर्तुं शक्नोति। तेन यत्कर्मोपकारकं तदुपादानशेषतया भवत्येव कर्मार्थमिति तत्प्रकाशकानामपि मन्त्राणां न कर्मार्थताऽपहीयते इत्यार्त्विज एवासन्तापः कीर्त्यते इति।

---

(1) P. 1132

॥ १५ ॥ व्यपदेशाच्च ॥ २९ ॥

यत्र च व्यपदिश्यत एव तत्र भवत्येव फलदर्शनम्—तन्नौ सहेति ।

॥ १६ ॥ द्रव्यसंस्कारः प्रकरणविशेषात् ॥ ३० ॥

वेदिर्वेदिधर्माश्चेत्युक्तमुत्तरविवक्षयेति ।

॥ १७ ॥ निर्देशात्तु विकृतापूर्वस्यानधिकारः ॥ ३१ ॥

स्थितमङ्गप्रधानार्थं प्रकृतौ बर्हिरिति । विकृताविदानीं चिन्त्यते—किमत्रापि अङ्गप्रधानार्थे बर्हिषि धर्मा भवन्ति चोदकेन उत प्राकृतकार्यप्रयुक्त एवेति । तत्र प्रकृतिवद्विकृतावपीति पूर्वपक्षवादी मन्यते ।

व्यपदेशाच्च । यत्र च व्यपदिश्यत एवर्त्विजः फलं तद्दर्शितं "तन्नौ सह" इति । एतच्चापवादमात्रम् । तन्नौ सहेति द्विवचनस्याविवक्षाकारणाभावात् ऋत्विजोऽपि भवत्येव फलम् ।

द्रव्यसंस्कारः प्रकरणाविशेषात् । वेदिर्वेदिधर्माश्चेत्युक्तमुत्तरविवक्षयेति । वेदिर्वेदिधर्माश्चाङ्गप्रधानार्था इत्युक्तमेव । तदेव तु उत्तरचिन्तार्थं स्मर्यते ।

निर्देशात्तु । स्थितमङ्गप्रधानार्थं बर्हिरिति प्रकृतौ । विकृताविदानीं चिन्त्यते —किमत्रापि अङ्गप्रधानार्थे बर्हिषि धर्मा भवन्ति यावन्त्यङ्गानि प्राकृतानि अप्राकृतानि च किं तदर्थं बर्हिर्धर्मा भवन्ति । उत प्राकृतकार्यप्रयुक्त एवेति प्रकृतौ यत्कार्यापन्ने बर्हिर्धर्मा दृष्टाः विकृतावपि तत्कार्यापन्ने एवेति । तत्राङ्गप्रधानसंबन्धितासामान्येन प्रकृतिवद्विकृतावपीति पूर्वपक्षवादी मन्यते । अस्यार्थः—प्रकृतौ अङ्गप्रधानार्था धर्माः

राद्धान्तवादी तु कार्यमुखेनाङ्गप्रधानार्थसंबन्धितया सामान्येन प्रकृतिवद्विकृताविति धर्माणां विकृतौ निरूपणम्। न यथा प्रकृतिसंबन्धितया। संबन्धसामान्येन हि सर्वत्रोपदेशः स्यात्। ततश्चोहदर्शनं नोपपद्यते। तस्मात्सिद्धं न यूपबर्हिषि धर्माः कर्तव्याः। अञ्जनाज्ये न आज्यधर्माः।

॥ १८ ॥ [1]विरोधे च श्रुतिविशेषादव्यक्तः शेषे ॥ ३२ ॥

अनेकत्र शेषभावो न न्याय्यः इति परिभोजनीयादन्यत् कर्तव्यम्।

विकृतावपि तदर्था एव। अन्यथा प्रकृतिवद्विकृतिर्न स्यात्। प्रकृतौ च सर्वाङ्गप्रधानार्था धर्माः विकृतावपि सर्वाङ्गप्रधानार्था इति। **राद्धान्तवादी तु मन्यते कार्यमुखेन धर्माणां विकृतौ निरूपणम्। न यथाप्रकृतिसंबन्धितया।** अस्यार्थः—विकृतावुपकारलक्षण-कार्याकाङ्क्षायां प्राकृत उपकारः प्राप्यते। स च पदार्थैर्विना प्रत्येतुमशक्यः इति पदार्थै-रवच्छिन्नः प्रतीयते। तत्कार्यमुखेन विकृतौ पदार्थानां निरूपणम्। न पुनर्यथाप्रकृतौ सबन्धः तथा विकृतावपि संबन्धयितव्या इति। **सम्बन्धसामान्येन हि सर्वत्रोपदेशः स्यात्।** कार्यमुखेन हि पदार्थप्राप्तिरतिदेशः स्वतन्त्रपदार्थप्राप्तिरुपदेश इति विशेषः। यदि विकृतावपि कार्यनिरपेक्ष एव पदार्थसंबन्धः तदा उपदेश एव स्यात्। **ततश्चोहदर्शनं नोपपद्यते।** उपदेशे हि यथोपदेशमेवाविकारेणानुष्ठानं स्यात्। **तस्मात् सिद्धं** कार्यान्तरापन्ने अप्राकृते **यूपाङ्गबर्हिषि बर्हिर्धर्मा न कर्तव्याः** अप्राकृतत्वात्। **अञ्जना-ज्ये च नाज्यधर्माः** इति।

विरोधे च श्रुतिविशेषात्। अनेकत्र शेषभावो न न्याय्य इति परिभोजनीयादन्यत् कर्तव्यम्। अत्र स्पष्टत्वात् पूर्वपक्षो न लिखितः। तथा हि—अप्रच्छिन्नाग्रौ दर्भौ

(1) P. 1134

॥ १९ ॥ [1]अयनयस्त्वेकदेशस्य ॥ ३३ ॥

पूर्वाधिकरणन्यायेनानेकत्र शेषभावो न न्याय्य इति मन्वानस्य पूर्वः पक्षः। द्रव्यवदानोपसंहारात् प्रतिपत्तेश्च राद्धान्तः।

॥ २० ॥ [2]विकृतौ सर्वार्थः शेषः ॥ ३४ ॥

इदानीं विकृताबुपांशुत्वादयो धर्माश्चिन्त्यन्ते। किं तत्रापि प्रकृतिवत् अङ्गप्रधानार्थता धर्माणां उत नेति संशयः। प्रकृतिवदङ्गप्रधानार्थता धर्माणामिति पूर्वः पक्षः।

प्रादेशमात्रौ पवित्रे करोति इति स्वरूपमात्रेण विनियोगात् विनियुक्तविरोधो नास्तीति प्रकृतयोरेव स्तरणान्तर्गतयोः दर्भयोरुपादानमिति। राद्धान्तग्रन्थार्थस्तु–अन्यत्र शेषभूतस्य व्यापृतस्यैव सतोऽन्यत्र कारकत्वाभावात् परिभोजनीयाद्बर्हिषो दर्भावुपादाय पवित्रे कर्तव्यौ।

अपनयस्त्वेकदेशस्य। पूर्वाधिकरणन्यायेनानेकत्र यागे ऐन्द्रवायवपात्रनिधाने च **शेषभावो न न्याय्य इति पूर्वः पक्षः। द्रव्यवदानोपसंहारात् प्रतिपत्तेश्च राद्धान्तः।** अस्यार्थः—न तावदनेकत्र कारकभावविरोधः द्रव्यवदानमात्रेण यागोपसंहारात् परिशिष्टस्यान्यत्राव्यापृतत्वात् व्यापारान्तरोपपत्तेः न च विनियुक्तविनियोगविरोधः प्रतिपत्तित्वादिति।

विकृतौ सर्वार्थः शेषः। इदानीं विकृतावुपांशुत्वादयो **धर्माश्चिन्त्यन्ते—किमत्रापि प्रकृतिवत् अङ्गप्रधानार्थता धर्माणां उत नेति संशयः।** अस्यार्थः–यज्ञाथर्वणादिषु विकृतिषु केवल प्रधानोपदेशवतीषु चिन्त्यते–किमुपांशुत्वादयो धर्माः औपदेशिकाः तत्राप्यङ्गप्रधानार्था इति उत केवलप्रधानार्था इति। **प्रकृतिवदङ्गप्रधानार्थता धर्माणामिति पूर्वः पक्षः।** उपांशुत्वं कर्तृद्वारेणाङ्गम्। उपांशुभावेन हि अखिन्नः कर्ता कर्म कर्तुं शक्नोति। अङ्ग-

---

(1) P. 1135　(2) P. 1135

नौपदेशिकातिदेशिकैःउपदेशः संबध्यत इति। उपदेशापेक्ष-त्वादतिदेशस्य सापेक्षत्वं राद्धान्तः। किं पुनः कारणं न संबध्यत इति? उपदेशापेक्षत्वादतिदेशस्य सापेक्षनिरपेक्षयोः निरपेक्षं बलीय इति न्यायविदः।

॥ २१ ॥ [1]सन्निधानविशेषादसंभवे तदङ्गानाम् ॥ ३६ ॥

श्येने त्वौपदेशिकसंबन्धाभावात् आतिदेशिकैरेव संबन्ध इति विशेषः।

प्रधानार्थश्च कर्ता। तेन यथा साक्षादुपदिष्टायां प्रकृतौ अङ्गप्रधानार्थता एवंविधस्य [2]कर्मणः तथा विकृतावपीति नौपदेशिकातिदेशिकैः उपदेशः संबध्यत इति राद्धान्तः। अतुल्यत्वादौपदशिकेन प्रधानेन आतिदेशिकैश्चाङ्गैः उपांशुत्वोपदेशो न संबध्यत इत्यर्थः। किं पुनः कारणं न संबध्यत इति। उत्तरं—उपदेशापेक्षत्वादतिदेशस्य प्रधानोपदेशम-पेक्ष्य अङ्गार्थमतिदेशः उत्पद्यते। तेन पूर्वोपनिपातिप्रधान एवोपांशुत्वस्य संबन्धः न पाश्चात्येषु आतिदेशिकेष्वङ्गेषु। सापेक्षनिरपेक्षयोः निरपेक्षं बलीय इति न्यायविदो मन्यन्ते।

सन्निधानविशेषात्। श्येने तु औपदेशिकसंबन्धाभावात् आतिदेशिकैरेव संबन्ध इति विशेषः। अत्र पूर्वाधिकरणविशेषेण पूर्वः पक्षः। तेन प्रधाने श्येन एव 'दृतिनवनीतमाज्यं भवति' इति नवनीतं विधीयते। आज्यग्रहणं तु अनुवादमात्रं, नवनीत-स्याज्यत्वात्। राद्धान्तस्तु—आज्यशब्दस्य कार्यान्वयित्वे संभवति नानुवादमात्रेणान्वयो न्याय्यः इत्याज्योद्देशेन नवनीतविधिर्भवति। न च प्रधाने श्येने आज्यमस्ति इत्यातिदेशिकाङ्गविषय एवायमुपदेशः।

---

(1) P. 1136 (2) G. धर्मस्य

॥ २२ ॥ [1]तत्काले वा लिङ्गदर्शनात् ॥ ३९ ॥

इदानीं लिङ्गदर्शनभ्रान्त्या सुत्याकालानामेवात्र विधानमिति पूर्वः पक्षः। अविशेषात् सर्वेषामिति राद्धान्तः।

॥ २३ ॥ मांसं तु सवनीयानाम् ॥ ४२ ॥

तरसाः सवनीयाः पुरोडाशा भवन्तीति। अत्र सवनीयपुरोडाशयोः विवक्षायां वाक्यभेदप्रसङ्गात् कस्यायथार्थत्वमिति। दृष्टव्यभिचारात् पुरोडाशस्य अयथार्थत्वमिति राद्धान्तितम्।

इति बृहत्यां तृतीयाध्यायस्य

अष्टमः पादः

तत्काले वा। लिङ्गदर्शनभ्रान्त्या सुत्याकालानामेवात्र विधानमिति पूर्वः पक्षः। अस्यार्थः—साद्यस्के 'सह पशूनालभेत' इति सहत्वं श्रुतम्। तत् सुत्याकाल एवेति ततोऽवगच्छामः। यत्सामान्यविहितं तत् सुत्याकाल एव भवतीति। अनया भ्रान्त्या सुत्याकालानामेवाङ्गानां दृतिनवनीतविधिरिति पूर्वः पक्षः। प्रधानासत्तिस्तु मूलयुक्तिः पूर्वपक्षे। **अविशेषात् सर्वेषामिति राद्धान्तः।** प्रत्यासन्नानामप्रत्यासन्नानां च प्रधानसंबन्धाविशेषात् नवनीतविधिरिति राद्धान्तः न्यायाल्लिङ्गोपपत्तिरुक्ता। सुत्याकाल एव यः पशूनां सहालम्भः सोऽग्नीषोमीयानुबन्ध्ययोर्वैषम्यादिति भाष्ये उक्तम्।

मांसन्तु सवनीयानाम्। 'तरसाः सवनीयाः पुरोडाशा भवन्ति' इति श्रूयते। तत्र सवनीयपुरोडाशयोर्विवक्षायां वाक्यभेदप्रसङ्गात् कस्यायथार्थत्वं युक्तमिति चर्चायां **दृष्टव्यभिचारात् पुरोडाशस्यायथार्थत्वमिति राद्धान्तितम्।** अस्यार्थः—तरसाः सवनीयाः पुरोडाशा इत्यत्र सवनीयोद्देशेन वा तरसा विधीयन्ते, पुरोडाशोद्देशेन वा। तत्रोद्दिश्यमानानां सवनीयानां न पुरोडाशो विशेषणत्वेन विवक्षितुं न्याय्यः वाक्यभेदप्रसङ्गात्। नापि

---

(1) P. 1121

पुरोडाशस्योद्दिश्यमानस्य सवनीयो विशेषणम् , वाक्यभेदप्रसङ्गादेव । अतः एकस्य नित्यानुवादत्वेन वर्णनम् । न च सर्वे सवनीयाः पुरोडाशा एवेति पुरोडाशापुरोडाशेषु दण्डिन्यायेन लक्षणया पुरोडाशशब्दो वर्णनीयः । तथा पुरोडाशस्य सर्वस्य सवनीयत्वाभावात् सवनीयासवनीयेषु सवनीयशब्दः । तत्र कस्य लक्षणया वर्णनं क्रियतामिति चिन्तायां सवनीयशब्दस्य प्रथमोपनिपातिनो यथार्थत्वं युक्तम् । पुरोडाशब्दस्य जघन्यत्वात् दृष्टव्यभिचाराच्च । दृष्टो हि प्रकृतौ पुरोडाशापुरोडाशेषु पुरोडाशशब्दः तद्वदिहापि, प्रकृतिवदतिदिष्टत्वादिति पुरोडाशशब्द एव लक्षणया वर्णनीय इति न्याय्यम् । अत्र भाष्ये "तरसाः पुरोडाशाः सवनीया भवन्ति" इत्युदाहृतम् । तत्र पुरोडाशशब्दस्यैव प्राग्भावित्वात् यथार्थत्वं न्याय्यमिति राद्धान्तो न शक्यते वक्तुमिति मत्वा **निबन्धनकारेण** 'तरसाः सवनीयाः पुरोडाशा भवन्ति इति' इति विपर्यस्योदाहृतमिति ।

इति महामहोपाध्यायशालिकनाथमिश्रकृतायां
ऋजुविमलायां पञ्चिकायां तृतीयाध्यायस्य
अष्टमः पादः

चतुर्थाध्यायस्य प्रथमः पादः ॥

॥ १ ॥ [1]अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥ १ ॥

क्रत्वर्थपुरुषार्थयोर्जिज्ञासा किमिति पृथक् प्रतिज्ञायते ? ऐदमर्थ्यलक्षणमेव हि शेषत्वम् ; शेषः परार्थत्वादित्युक्तम् । क्रत्वर्थतापि तदन्तःपातिनी प्रतिज्ञातैवाथातः शेषलक्षणमित्यनेन । तस्मात् पुनः प्रतिज्ञायाः प्रयोजनं न विद्मः ।

अथ ऋजुविमलायां

चतुर्थाध्यायस्य प्रथमः पादः

अथातः । अत्राधिकरणे उपादानलक्षणो विधिव्यापारः प्रमाणान्तरभूतः क्वचिदैदमर्थ्ये क्वचिदनुष्ठाने क्वचिदधिकारे क्वचिदुत्पत्तौ विद्यत इति प्रतिपाद्यते । तद्यथा प्रोक्षणादीनामन्विताभिधानतः प्रतिपन्ननियोगैदमर्थ्यानां श्रुत्यादिसिद्धनैयोगिकव्रीह्यादिद्वारैदमर्थ्यानां पश्वादौ पादानिकं तदुभयप्रतीतिनिर्वाहकं द्वारैदमर्थ्यसाध्यं करणैदमर्थ्यम् । तथा निमित्तपर्यन्ते- ऽधिकारे साङ्गेषु प्रधानेषु प्रयोग उपादानत एव । तथा विश्वजिदादिषु अधिकारकल्पना औपादानिकी । सौर्यं चरुं निर्वपेत् ब्रह्मवर्चसकाम इत्यादिषु केवलाधिकारचोदनासु उत्पत्तिनियोगाक्षेप उपादानादेव । न खलु उत्पत्तिनियोगं विना तत्राङ्गोपस्कृतात्प्रधानात् अधिकारनियोगसिद्धरुपपद्यते । कर्मस्वरूपाणां क्षणिकत्वेन उपकार्योपकारकत्वाभावादिति दर्शितमेकादशे भाष्यकारेण । स चायमुपादानलक्षणो विधिव्यापारः श्रुत्यादिप्रमाणषट्कातिरेकी तार्तीयविनियोगापेक्ष इति तत्र तत्र वक्ष्याम इति लक्षणयोरपि हेतुहेतुमद्भावः । क्रत्वर्थेति टीकाया अयमर्थः—क्रत्वर्थपुरुषार्थचिन्ता किमिति पृथक् प्रतिज्ञायते अथातश्शेषलक्षणमित्यनेनैव प्रतिज्ञातत्वात् । न च वाच्यं शेषत्वं तत्र प्रतिज्ञातं न पुनरैदमर्थ्यमिति । यस्मात् ऐदमर्थ्यलक्षणमेव शेषत्वं शेषः परार्थत्वादित्युक्तम् । पृथगध्यायार्थाभावात् अध्याया-

---

(1) P. Bhasya 1193

अथ मतं न श्रुत्यादिभिः पुरुषार्थताऽवगम्यते तस्य लिप्सार्थलक्षणेति वक्ष्यति। ऋत्वर्थग्रहणं तर्हि प्रत्युक्तम्। न चेयमपि पुरुषार्थतालक्षणा शक्यते वक्तुम्। न च शब्दादृते यागः स्वर्गार्थ इति ज्ञानमुत्पद्यते। न च तत्साध्यः स्वर्गः पुरुषार्थ इति स्वतोऽयमप्यसमाधिः। यदपि श्रुत्यादीनां सङ्कीर्तनं तदपि कस्मै प्रयोजनायेति न विद्मः। श्रुत्यादिभिश्शेषलक्षणं नान्येन प्रमाणेन। अतः शेषलक्षणमित्येतावतैव तथा। ततः श्रुत्यादिसङ्कीर्तनं मन्दप्रयोजनमिव प्रतिभाति। यदपि ऋत्वर्थपुरुषार्थयोः प्रयोजकाप्रयोजकादीनन्तर्भावयन् प्रतिज्ञातान् कथयति तदप्यसमञ्जस इव। कुतः? अन्तर्भावो हि स्वरूपतो लक्षणतः कार्यतो भवति।

न्तरमयुक्तमित्यपि दूषणं हृदि वर्तते। अथ मतमित्यादि—तत्रायमभिप्रायः वैनियोगिकं शेषत्वं विचारितम्। इदानीं पुनः औपादानिकं पृथक् प्रतिज्ञायते। तथाहि—पुरुषार्थता यागस्य स्वर्गसाधनभावः स्वर्गस्य चाधिकारिपुरुषोपभोग्यता [1]न श्रुत्यादिभिरवगम्यते। तथा चोक्तं—तस्य लिप्सार्थलक्षणेति। तत्राह—ऋत्वर्थग्रहणं तर्हि प्रत्युक्तम्। यस्मात् ऋत्वर्थता सैव श्रुत्यादिगम्येति न चेयमपि पुरुषार्थतालक्षणेति शक्यते वक्तुम्। यस्मान्न शब्दादृते यागः स्वर्गार्थ इति ज्ञानमुपपद्यते। न च तत्साध्यः स्वर्गः पुरुषार्थः अधिकार्यर्थः इति ज्ञानमुत्पद्यते शब्दतद्भावभावित्वात् शब्दात् पुरुषार्थज्ञानं श्रुत्यादिकृतमेवेति भावः। यदपि चेति श्रुत्यादिसङ्कीर्तनं यत्तदप्यनर्थकमित्यर्थः। यदपि च ऋत्वर्थपुरुषार्थयोः इति। भाष्यकारो हि प्रयोजकाप्रयोजकादीन्यत्रान्तर्भावयति। तस्येदं प्रयोजनम्—कथं नामोत्तरो विचारः प्रतिज्ञातार्थविषयः स्यादिति। स पुनरयमन्तर्भावो नोपपद्यते। अन्तर्भावो हि भवन् स्वरूपतो वा स्यात् शेषत्वैदमर्थ्ययोरिव कार्यतो वा? सर्वेषामेकं कार्यं यथा विशेषलिङ्गादीनां वैकृतचोदनापरिपूरणं कार्यमिति तत्कारणत्वेन प्रतिज्ञायते। सर्वेषामुत्तरषट्कार्थानामन्तर्भावो भवति। स लक्षणतो वा, सर्वेषामेक-

---

(1) G. omits न

त्रयमप्यत्र नास्ति। स्वरूपं तावत् पृथगभिधानादेव भिन्नम्। लक्षणमपि स्वरूपभेदादेव भिन्नम्। लक्षणभेदादृते न स्वरूपभेदः कार्यमपि यद्दर्शितं भाष्यकारेण तदयुक्तम्। प्रदेशान्तरविरुद्ध-श्चार्थवादस्तावत् स्तुत्यर्थः प्राधान्यमपि उपकार्योपकारनिबन्धनम्। प्रयोजकमपि प्रयोज्यं प्रति प्राधान्यमात्मनः प्रतिपादयति। न पुनरात्मनः परार्थताम्। तदिदं रात्रिप्रयाणमिवादेशकं भाष्यं व्यामोहमुपजनयति।

मेव लक्षणं यदि स्यात् यथा चोदनाभेदादीनां तल्लक्षणतया प्रतिज्ञाते सर्वे वेदार्था अन्तर्भवेयुः। त्रयमपि चात्र नास्ति यस्मात् स्वरूपं तावत् पृथगभिधानादेव भिन्नम्। यद्येषामेकमेव स्वरूपं स्यात् तदा तत्र तत्राधिकरणे भेदेनैषामभिधानं प्रतिपादनं न स्यात्। लक्षणमपि येन न्यायेनैषां स्वरूपं लक्ष्यते तदपि स्वरूपभेदादेव भिन्नम्। न ह्येकेन लक्षणेन स्वरूपभेदो भवति प्रमाणायत्तत्वात् प्रमेयसिद्धेः, तद्भेदादेव भेदो यतः प्रमेयस्येति। कार्यमपि यत्प्रयोजकफलविधिप्रधानानि पुरुषार्थेऽन्तर्भावयता पुरुषोपकारः। तथा अप्रयोजकार्थवादप्रधानानि क्रत्वर्थेऽन्तर्भावयता क्रतूपकारो भाष्यकारेण दर्शितः। तदयुक्तम्। न्यायविरोधात् प्रदेशान्तरविरुद्धं च अर्थवादाधिकरणोक्तविरोधादिति। अर्थवादः स्तुत्यर्थः उक्तो हि यस्मात्। प्राधान्यमपि च उपकार्योपकारनिबन्धनम्। यदुपकार्यमुपकारकस्य तत् तत्प्रधानम्। न पुनः पुरुषार्थतया प्राधान्यम्। किन्तूपकार्यतया। प्रयोजकमपि प्रयोज्यं प्रति प्राधान्यमात्मनः प्रतिपादयति। न पुनरात्मनः परार्थताम्। प्राधान्येन हि प्रयोजकत्वं, न पुनः पुरुषोपकारकत्वेन[1]। तस्मात् कार्यतोऽपि नान्तर्भावः। तदिदं रात्रिप्रयाणकमिवादेशकं भाष्यम् रात्रौ भवं रात्रिप्रयाणकं, अविद्यमानमार्गकथकपुरुषकं व्यामोहमुपजनयति रात्रिभवत्वेन स्वप्रत्ययविरहात् आदेशिकपुरुषाभावाच्च। परप्रत्ययाभावात् देशीति मार्गादेशिक उच्यते। 'हेतवे पुरुषार्थानां ज्यायसां देशिने पथः।

---

(1) G. कत्वं

अत्रोच्यते—द्वयमप्येतदयुक्तं भेदोपन्यासोऽन्तर्भावश्च यथा तत्र। यत्पुनः तादर्थ्यं शेषत्वे हेतुरिति सत्सु श्रुत्यादिषु तदित्युक्तम्। ननु चैवं सति क्रत्वर्थता प्रत्युक्तेत्यप्युक्तम्। भवेदेतदेवं यदि वैनियोगिकमुच्यते। इह तु उपादाननिबन्धनमेव प्रतिजानाति। किमुपादानं नाम? नियोगाक्षेप उपादानम्। तत्कृतं च प्रोक्षणादेः क्रत्वर्थत्वम्। विनियोगात् पुनः व्रीह्यर्थतैव।

इति। यथा च 'अविश्राम्यं अनालम्ब्यं अपाथेयमदेशिकम्। इति। **अत्रोच्यते—द्वयमप्येतदयुक्तं** भेदेन प्रयोजकादीनामुपन्यासः **अन्तर्भाव**कथनं च तेन तत्र तावन्न किञ्चिद्वाच्यम्। **यत्पुनस्तादर्थ्यं शेषत्वे हेतुः** तेन शेषत्वप्रतिज्ञानात् तादर्थ्यप्रतिज्ञानात् क्रत्वर्थपुरुषार्थप्रतिज्ञापि कृतैवेति। तत्रापि **सत्सु श्रुत्यादिषु तदित्युक्तं** भाष्यकारेण श्रुत्यादिसङ्कीर्तनेन। तेन केवलनियोगव्यापारनिबन्धनप्रतिज्ञेयमित्युक्तं भवति। **ननु चैवं सति क्रत्वर्थता प्रत्युक्तेत्यप्युक्तम्।** तस्याः श्रुत्यादिनिबन्धनत्वात्। **भवेदेतदेवं यदि वैनियोगिकमुच्यते** क्रत्वर्थः **इह तु उपादाननिबन्धनं** सर्वं क्रत्वर्थपुरुषार्थप्रयोजकाप्रयोजकफलविध्यर्थवादाङ्गप्रधानात्मकं प्रतिज्ञायते औपादानिकमपि क्रत्वर्थमस्तीति भावः। पुरुषार्थता तु यद्यपि शाब्दी तथापि वैनियोगिकी न भवति इति लिप्साधिकरणे वक्ष्यति। **किं पुनरत्रोपादानं नाम** इति पूर्वपक्षं करोति। तत्रायं भावः—न श्रुत्याद्यतिरेक्युपादानलक्षणं विधिव्यापारात्मकं प्रमाणं लोके व्युत्पन्नमिति। राद्धान्तं करोति—**नियोगाक्षेप उपादानम्।** सत्यं न लोके व्युत्पन्नं तथापि शब्देन प्रतिपादितोऽर्थो येनार्थान्तरेण विना न निर्वहति तदाक्षिपतीति सामान्यतस्तावल्लोके प्रसिद्धिरस्ति द्वारकर्मीभावादौ। वेदे च नियोगश्शब्देन प्रतिपादितोऽर्थान्तरं स्वनिर्वाहाय आक्षिपतीति नानुपपत्तिः। किं पुनरुपादानस्य प्रमेयमिति तत्राह—**तत्कृतं च प्रोक्षणादेः क्रत्वर्थत्वम्** करणार्थत्वमिति प्रागेवोक्तम्। **विनियोगात् पुनः व्रीह्यर्थतैव।** नैयोगिकव्रीह्याद्येदमर्थ्ये विनियोगस्य सामर्थ्यात् न करणैदमर्थ्ये। ननु यदि विध्याक्षिप्तमिदं चिन्त्यते अतिदेशोऽपि चिन्त्यः

भेदार्थप्रतिज्ञानं तर्हि किमिति ? किमितिवाऽन्तर्भावः। अवगति हेतुभेदाद्भेदः उपकारसामान्यादन्तर्भावः। प्रयोजकः कश्चित् पुरुषार्थ इति कश्चिद्ग्रहणं किञ्चित्प्रयोजकस्याप्यपुरुषार्थताज्ञापनार्थं यथा—कस्य ? आचार्यकरणविधेः स्वाध्यायस्य।

[1]यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सार्थलक्षणाविभक्तत्वात् ॥ २ ॥

"तस्य लिप्सार्थेनैव भवति न शास्त्रेण" इति विरुद्धमुक्तम्।

स्यात। न। एकोपदेशपरिसमाप्यमिह चिन्त्यते। अतिदेशश्च उपदेशान्तरार्थपर्यालोचनया परिसमाप्यते। तस्मादिह न चिन्त्यते। **भेदार्थप्रतिज्ञानं तर्हि किमिति।** भेदेन अर्थस्य प्रतिपाद्यस्य प्रयोजकाप्रयोजकाङ्गप्रधानादेश्च प्रतिज्ञा किमिति। **किमिति वा** केन प्रकारेणान्तर्भावः। **अवगतिहेतुभेदात् भेदेन** उपन्यासः। अवगतिहेतूनां न्यायानां भेदात भेदेन प्रतिपाद्यत्वात् क्रत्वर्थतादीनां भेदेन उपन्यासः। **उपकारसामान्यादन्तर्भावः** अप्रयोजकाङ्गार्थवादाः क्रतूपकारा इति क्रत्वर्थेऽन्तर्भूताः। एतदुक्तं भवति— क्रत्वर्थग्रहणेन क्रतूपकारकस्यापि ग्रहणम्। अर्थवादस्यापि प्रमाणकोटिपर्यवसायिनः प्रमाणस्यानुष्ठानोपकारकत्वात क्रतूपकारकताप्रयोजकप्रधानफलविषयश्च पुरुषोपकारसामान्यात् पुरुषार्थान्तर्भाविन इति सिद्धम्। **"प्रयोजकः कश्चित् पुरुषार्थ" इति कश्चिद्ग्रहणं प्रयोजकस्याप्यपुरुषार्थताज्ञापनार्थम्** यथेति कथनोपक्रम. एव वक्तुं **कस्येति** प्रश्नः। **आचार्यकरणविधेः स्वाध्यायाध्ययनप्रयोनकस्येत्युत्तरमुक्तम्।** अस्यार्थः—आचार्यकरणविधेः स्वाध्यायाध्ययनप्रयोजकस्यापि स्वतन्त्रकर्तृरूपपुरुषशब्दवाच्यमाणवकार्थत्वाभावात अपुरुषार्थत्वम्[2]। यदीयं हि कर्म यो विधिः प्रयुङ्क्ते स तत्पुरुषार्थ एव। यथा दर्शपूर्णमासादयः। आचार्यकरणविधिस्तु माणवकीयमध्ययनं प्रयुङ्क्ते। नतु माणवकार्थ इति सिद्धम्।

यस्मिन् प्रीतिः पुरुषस्य। "तस्य लिप्सार्थेनैव भवति न शास्त्रेण" इति **विरुद्धमुकम।** अनेन हि किल भाष्येण यागस्य स्वर्गसाधनतात्मिका पुरुषार्थता स्वर्गस्य च

---

(1) P. 1193 (2) R. र्थत्वात्

न शास्त्रादृते स्वर्गः साध्यतया प्रतीयते। कर्तृगामितया च। संबन्धशास्त्रमङ्गीकृत्यैतदुक्तम्। अर्थश्च नियोगसिद्धिः तच्चोपादानमित्युक्तम्। ननु च क्रत्वर्थताप्युपादानेनैवोक्ता। विनियोगे सतीत्युक्तम्। अर्थादेव हि पुरुषार्थ इति विशेषः। किमिदमविभागादिति? पुरुषस्य क्रतुसंबन्धाविभागादित्यर्थः।

अधिकारिभोग्यतात्मिका शास्त्रेण न गम्यत इत्युक्तम्। तच्च विरुद्धम्। यस्मात् द्वयमप्येतत् न शास्त्रादृतेऽवगम्यते। संबन्धशास्त्रमङ्गीकृत्यैतदुक्तमिति। विनियोगशास्त्रमभिप्रेत्य इदमुक्तं नाधिकारशास्त्रम्। अधिकारशास्त्रादेवोपादानवशेन द्वयमपीदं गम्यते यतः। अत एवोक्तं अर्थेनैव भवतीति। अर्थश्च नियोगसिद्धिः तस्या एव वाक्यार्थत्वात् तच्चोपादानमित्युक्तम्। अत्र चाधिकरणे क्रत्वर्थपुरुषार्थयोः प्रतिपादयितव्ययोः लक्षणमुच्यते। तथाहि—न पुरुषार्थत्वं तावत् प्रीत्युत्पादकत्वम्। नित्येषु नियमनियोगेषु चाव्याप्तेः। न च साधिकारित्वम्, अध्ययनादिष्वसंभवात्। नापि औपादानिकैदमर्थ्यभाक्त्वम्, औपादानिकक्रत्वङ्गेषु सङ्ख्यादिषु अतिप्रसङ्गात्। [1]तस्मिंश्चाविविच्यमाने पुरुषार्थत्वे क्रत्वर्थतापि तद्भेदेन दुर्लभेति विवेकाय लक्षणारम्भः। तत्र पुरुषार्थलक्षणमौपादानिकमेव। यस्यैदमर्थ्यं स पुरुषार्थ इति यथा यागः स्वर्गश्चेति। ननु च क्रत्वर्थताप्युपादानेनैवोक्ता सङ्ख्यादीनामित्यनेनातिप्रसङ्गदोषमाशङ्कते। विनियोगे सतीत्युक्तमिति परिहारः। अस्यार्थः—विनियोगे सति सङ्ख्यादीनामौपादानिकी शेषता। तथा हि—वस्तुस्वभावतः तात्स्थ्येन लिङ्गविनियोगे सति सङ्ख्यादीनामौपादानिकशेषत्वं वक्ष्यामः। तेन विनियोगेन विना औपादानिकं यस्य शेषत्वं स पुरुषार्थः इति नास्त्यतिप्रसङ्गः। अर्थादेव हि पुरुषार्थ इति विशेषः। किमिदमविभागादिति। भाष्यकारो हि प्रीत्याऽविभागमाह। तदयुक्तम् निमित्तपर्यन्तेषु अधिकारेष्वसंभवात्। अनया शङ्कया ब्रूते किमिदमिति। तत्रोत्तरं —पुरुषस्य क्रतुसम्बन्धाविभागादिति। अनेन चेदमुक्तं यस्मात् क्रतुषु पुरुषोऽनुष्ठाताऽस्ति

(1) G. तस्मिंश्चापिविविच्य

एतच्च षष्ठे निपुणतरमुपपादयिष्यामः। परिशेषाद्विनियोगे सतीति क्रत्वर्थतोक्ता भवति।

एवं वा। ननु गुणफलचोदना एता इत्युक्तम्। कोऽयं पुनर्विचारः? उच्यते— प्रदर्शितमस्माभिः विनियोगतस्तदुक्तमिति। इह पुनरुपादानतो दृष्टप्रयोजनसंभवात् नादृष्टं प्रयोजनं संभवति इति पूर्वः पक्षः।

न, यथाविनियोगं कार्यावगतेः। विनियुक्तस्यैव हि कार्यकल्पना नाविनियुक्तस्येति राद्धान्तः।

तस्मात् साध्यभूतो विधिः शक्नोत्याक्षेप्तुं यागस्यैदमर्थ्यमिति। एतच्च षष्ठे निपुणतरमुपपादयिष्यामः। नन्वेवं पुरुषार्थत्वमात्रमुक्तं भवति तत्राह—परिशेषाद्विनियोगे सति इति क्रत्वर्थतोक्ता भवति। तस्मादुभयमप्यत्र लक्षितम्।

एवं वा। ननु गुणफलचोदना एता इत्युक्तम्। कोऽयं पुनर्विचारः? द्वितीये तृतीये च गुणस्य गोदोहनादेः फलाय चोदना एता इत्युक्तम्। ततश्च फलं प्रति शेषता केवलोपादानगम्येति पुरुषार्थत्वे स्थिते पुनर्विचारोऽनर्थकः। उच्यते। प्रदर्शितमस्माभिः विनियोगतस्तदुक्तमिति। विनियोगपर्यालोचनया क्रत्वर्थत्वं न संभवतीति हेतोः तत्पुरुषार्थत्वमुक्तम्। इह पुनः उपादानतो दृष्टप्रयोजनसिद्धिसंभवे नादृष्टार्थत्वं संभवतीति पूर्वः पक्षः। गोदोहनादेः प्रणयनादिनिर्वृत्तिः दृष्टं प्रयोजनम् पश्वादिसिद्धिरदृष्टम्। तत्र किं नियोगः दृष्टेन द्वारेणोपादत्ते उत अदृष्टेन द्वारेणोपादत्त इति चिन्तायां दृष्टस्य शीघ्रभावित्वात् तेनैव द्वारेणोपादत्ते। ततश्चोपादानार्थत्वाद्विनियोगस्य विनियोगोऽपि तथैव। पशुकामपदं च अधिकृतमात्रोपलक्षणम्। वाक्येन च गोदोहनेन प्रणयेत् इति प्रणयने गोदोहनस्य विनियोगात् क्रत्वर्थत्वमिति। न, यथाविनियोगं कार्यावगमात्। विनियुक्तस्यैव हि कार्यकल्पना नाविनियुक्तस्येति राद्धान्तः। अस्यार्थः—यथाविनियोगं विनियो-

अतो विनियोगतः उपादानतश्च पुरुषार्थतैव गुणफलचोदनास्विति स्थितम्। बादरिग्रहणं पुनरुपकारप्रदर्शनार्थम्। न पुनः परार्थत्वादिति शेषहेतुनिवृत्त्यर्थम्। कथं? विनियोगे हि स उक्तः। ननु बादरिणापि विनियोग एवासावुपन्यस्तः। अत एवासौ निराकृतः। इह पुनः कार्यत एवोपादानमित्युपन्यस्तम्।

गानुसारेण; कार्यावगतेः द्वारकार्यावगमात् राद्धान्त इति संबन्धः। कस्मादेवमित्याह —विनियुक्तस्यैव हि कार्यकल्पना नाविनियुक्तस्येति क्रत्वर्थस्यापि क्रतुविनियोगसिद्धिः। कार्यभूता कल्पनीया। तत्कल्पनायां च विनियोगश्शरणम्। विनियोगबलेन च द्वारकार्यपरिग्रहः। न चात्र क्रत्वर्थतयापि विनियोगोऽस्ति। तस्मात् दृष्टमप्येतत्कार्यं न[1] विनियोगापेक्षमिति। अतो विनियोगतोऽपि विनियोगपर्यालोचनया नियोगतश्च उपादानपर्यालोचनया पुरुषार्थतैव गुणफलचोदनास्विति स्थितम्। बादरिग्रहणं पुनः उपकारप्रदर्शनार्थं न पुनः परार्थत्वादिति शेषहेतुनिवृत्त्यर्थम्। ननु च भाष्यकारः उपकारतः शेषतामाह, न पुनरुपादानतः यतो बादरिमतमुपन्यस्यति स। तच्चानुपपन्नम्। निराकृतत्वादस्येति। तत्राह—बादरिग्रहणं उपकारो दृष्टो द्रव्यादीनामस्तीति प्रदर्शयितुम्। ततश्चोपादानतः करणशेषतेति। न पुनः परार्थत्वादिति शेषत्वे यो हेतुः तन्निवृत्त्यर्थम्। कस्मात्? विनियोगे हि यस्मात् सः परार्थत्वादिति हेतुरुक्तः। ननु बादरिणापि विनियोग एवासावुपन्यस्तः उपकारो हेतुः। न पुनस्तन्मुखेनोपादानं इत्येवमर्थं, तेन बादरिमतोपन्यासात् उपकारत एव शेषतोक्तेति प्रतिभाति। अत एवासौ निराकृत इति परिहारः। यत एवोपकारतश्शेषता बादरिणोक्ता अत एव बादरिर्निराकृतः। तेन पुनराशङ्का नोपपद्यते। किमिति तर्ह्युपन्यासः? अत्राह—इह पुनः कार्यत एव उपकारत एवोपादानमिति न पुनरुपन्यस्तो बादरिः उपकारोऽत्र दृष्टोऽस्ति। तथा च

(1) G. omits न

अयथाविनियोगतया निरस्यत इत्यविरोधः। एवं वा। इह द्रव्यार्जननियमा उदाहरणम्। तत्र पूर्वः पक्षः। नियमनियोगानामधिकारशून्यत्वात् कामश्रुतिनियोगेनैकवाक्यत्वात् अधिकारसिद्धेः। एवं च क्षामवत्यादीनामपि स्पष्टैव कर्मार्थतोपपन्ना भवति इति। तस्मादनधिकारिणे विधेरानर्थक्यं माभूदिति क्रत्वर्थता। ननु क्रत्वर्थत्वे स्वत्वमेव न भवतीति याग एव न संवर्तेतेति प्रलपितमिदं केनापि।

...ग्लेन बादरिः शेषतां यावदाहेति दर्शयितुम्। कथं तर्हि सिद्धान्तः—**अयथाविनियोगतया** तूक्तेन न्यायेन **निरस्यत इति विरोधः।**

एवं वा। इह द्रव्यार्जननियमा उदाहरणमिति। पूर्वपक्षहेतुतयेदमुपन्यस्तम्। नात्र विषयफलालोचनया धनकामोऽधिकारी युक्तः। तथा सति विध्यानर्थक्यात् नियमोऽपि संभवति। काम्यत्वेन रागतः प्रवृत्तौ सत्यां अन्यत्रापि प्रवृत्तेः शास्त्रीयानुष्ठानपर्यनुयोगाभावात्[1]। क्रत्वर्थत्वे पुनः तत्साध्यत्वेन क्रतुनियोगस्य ज्ञापनात् तत्रैव प्रवृत्तेः फलतो नियमः सिध्यतीति। तत्र **पूर्वः पक्षः। नियमनियोगानां** स्वातन्त्र्ये सत्य**धिकारशून्यत्वात्** साक्षादश्रुतत्वात् विषयफलालोचना लक्ष्यते। तस्य च विध्यानर्थक्येनानुचितत्वात्; **कामश्रुतिनियोगेन च** तदङ्गद्रव्योत्पादकत्वे[2] सति **अधिकारसिद्धेर्विश्वजिन्न्यायविरोधात्।** एवं च प्रतिग्रहादीनामेव क्रत्वर्थत्वेन द्रव्यस्यापि तदार्जितस्य क्रत्वर्थत्वात् तद्व्यापत्तिमान्[3] क्रत्वनधिकृत एवेति एकाधिकारावगमात्। **क्षामवत्यादीनामपि स्पष्टैव कर्मार्थतोपपन्ना भवतीति।** अन्यथा क्रतुसंबन्धद्रव्यव्यापत्तिमतोऽधिकारे सति स्वातन्त्र्यमेव स्यात्। उपसंहरति—**तस्मादनधिकारिणो विधेरानर्थक्यम्।** अर्थशून्यता। सत्यपि नियोगबोधके लिङादिशब्दे अधिकारिणं विना अन्विताभिधानासिद्धेः। अर्थशून्यतैवेति क्रत्वर्थतैव। **ननु च क्रत्वर्थत्वे** यथेष्टविनियोगलक्षणं **स्वत्वमेव न भवतीति** स्वद्रव्यत्यागात्मको **याग एव न संवर्तेतेति** प्रधानविरोधात्तन्नाङ्गत्वं युक्तं—**प्रलपितमिदं केनापि।** कस्मादयं

---

(1) G. पर्यनुयोगानुभवात् (2) R. त्पादकतयैकत्वे सति (3) G. तद्व्यावृत्तिमान्

आर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धम्। कथं तर्हि क्रत्वर्थता? वनीवननवत् तदर्थं स्वत्वमित्यभिप्रायः।

अत्रोच्यते—नेमे अधिकारशून्या नियमविषयश्शक्यन्ते वक्तुम्। जीवनाय प्रवृत्ता अधिकृता भविष्यन्ति।

प्रलाप इत्यत्राह—आर्जनं स्वत्वं नापादयतीति विप्रतिषिद्धम। अत्रायं भावः—न यथेष्ट-विनियोगनिबन्धनं स्वत्वं बलात्कारहृतेष्वतिप्रसङ्गात्। बालादिधनेष्वप्रसङ्गाच्च। किं तर्हि स्वत्वलक्षणं? उच्यते— उक्तं हि भगवता भाष्यकारेण "यो यद्यथाभिप्रायं विनियोक्तु-मर्हति तत्तस्य स्व"मिति। तेन यथेष्टविनियोगार्हतया स्वत्वं, तदर्हता च तत्र तस्य यत्र प्रतिग्रहादयो लोके प्रसिद्धा उपायाः प्रवृत्ताः। ततश्च प्रतिग्रहादिनिबन्धनं स्वत्वं तेष्वपि सत्सु नास्तीति विप्रतिषिद्धम्। आर्जनं च नानारूपं कचिज्जन्म, यथा पैतृकेषु। कचि-त्परिणयः यथा दंपत्योर्धनमित्येवमादिषूहनीयम्। स्मृतिकाराश्च लोकप्रसिद्धोपायमेव कुर्वते व्यामोहनिवृत्तये व्याकरणादिवत्। कथं तर्हि क्रत्वर्थता? यदि यजमानस्य स्वं तदा न क्रतोरिति भ्रान्तिः वनीवननवत् तदर्थं स्वत्वमित्यभिप्रायः। वनिः भृतिः वननं याचनं यथा वनीवनने स्वत्वमपि क्रत्वर्थं न प्रीत्यर्थं तथेत्यर्थः। अन्यदेदमर्थं अन्यत्स्वत्वमि-त्यभिप्रायः। अत्रोच्यते—नेमे अधिकारशून्या नियमविषयश्शक्यन्ते वक्तुम। कुतः? जीवनाय, प्रवृत्ताः जीव्यते येन द्रव्येण तस्मै प्रवृत्ता अधिकारिणो भविष्यन्ति। अनेन धनकामना नाधिकारिविशेषणम्। किन्तु धनार्जनप्रवृत्तिः यदा यदा धनार्जनाय प्रवृत्ता भवन्ति तदा तदा प्रतिग्रहादिविधिना नियुक्तत्वादुपायान्तरेण प्रवर्तमानस्य विहितातिक्रमो भवतीति सिद्धः फलतो नियमः। न च धनाय प्रवृत्तस्याधिकारः काम्याधिकारः, येन रागनिबन्धना तत्र प्रवृत्तिरिति तदतिक्रमे विहितातिक्रमो न स्यात्। जीवनशब्देन च धनमभिद-धतोऽयमभिप्रायः संभवति तत्र जिजीविषोः प्रवृत्त्यव्यभिचारः व्यभिचरति तु क्रतुसंबन्ध-जीवनमिति न तन्मुखेन क्रतुप्रवेश इति। ननु जीवनप्रवृत्तोऽधिकारी न श्रूयते तत्राह

न च शब्दादेवाधिकारः अधिकारादेव ह्यधिकारः। स तु कचि-च्छब्दावगम्यः क्वचित् प्रमाणान्तरावगम्यः। अतः स्वत्वस्या-विशेषात् सर्वपुरुषार्थनिर्वृत्तौ न विशेषश्शक्यतेऽवधारयितुम्।

[1]अपि च यदि शास्त्रात् कर्मार्थं द्रव्यं तन्नान्यत्र विनियुज्येत, तथाऽऽर्जितं, तत्र सर्वतन्त्रपरिलोपः स्यात्[2]। कोऽर्थः ? किमिदं तन्त्रम् ? जीवनमिति चेत् अनियमात्तर्हि जीविष्यति। नियमस्य क्रत्वर्थत्वात्। अथ क्रत्वन्तराणि तन्त्रशब्दाभिधेयान्यभिप्रेतानि तथापि प्रतिक्रतु नियमान्न लोपः।

अत्रोच्यते—क्रत्वन्तराण्येव तन्त्रशब्दाभिधेयान्यभिप्रेतानि।

--न च शब्दादेवाधिकारः अधिकारादेवाधिकारः। अस्यार्थः— अभिदधतोऽयमभिप्रायः संभवति अस्य शब्दोऽस्तीति। नैवमधिकारः। किन्तु अधिकाररूपोऽर्थो यस्यावगम्यते तस्याधिकारः। एतदुक्तं भवति। न शब्दोऽधिकारिस्वरूपोपाधितां यातीति। [3]स त्वधिकाररूपोऽर्थः क्वचित् शब्दावगम्यः क्वचित् प्रमाणान्तरावगम्यः इति न कश्चि-द्विशेषः। गम्यते चात्र प्रतिग्रहादिस्वभावालोचनया जीवनाय प्रवृत्तस्याधिकारः। न हि कश्चित् प्रेक्षावान् धनाय प्रवृत्तोऽपि न प्रतिग्रहादीन् करोतीति। अतः स्वत्वस्याविशेषात् ऐदमर्थ्येनाविशेषितत्वात् सर्वपुरुषार्थनिर्वृत्तौ जीवनक्रतुसिद्धिरूपायां न विशेषश्शक्यतेऽव-धारयितुमिति सर्वैरेव कर्तव्य इति। 'अपि च' इत्यादिभाष्यमनुभाष्य "कोऽस्यार्थ" इत्याक्षिपति—किमिदं तन्त्रं ? जीवनमिति चेत् अनियमात्तर्हि जीविष्यति। नियमस्य क्रत्वङ्गत्वात् न पुरुषार्थे नियमो यतः। यथा कृतावेव अवघातनियमात् पुरुषार्थं दलनाद्यपि भवति। अथ क्रत्वन्तराणि तन्त्रशब्दाभिधेयान्यभिप्रेतानि तेषां परिलोपः स्यात् तथापि प्रतिक्रतु - क्रतुं प्रति नियमात् अनियमेन धनमार्जयित्वाऽनुष्ठास्यतीति न परिलोपः स्यात्। अत्रोच्यते—क्रत्वन्तराण्येव तन्त्रशब्दाभिधेयान्यभिप्रेतानि।

(1) P. 1196 (2) P. 1197 (3) G. धात्वधि

नचार्जनस्य विशेषोपादानत्वे प्रमाणमस्ति। न च सर्वतन्त्रं सर्वेण द्रव्येण शक्यते कर्तुं इति तन्त्रपरिलोपः सर्वकर्मणाम्, अयं चापरो दोषः नान्यस्य तन्त्रे प्रतते अन्यत्तन्त्रं प्रतायते इति दर्शनं नोपपद्यते। अथ नैवेदं कस्यचिदेकस्याङ्गमिति। एवं तर्हि नैवेदं प्रयोगवचनेन गृह्यते, अनुपात्तप्रयोगवचनस्याङ्गतैव नास्ति। असत्यङ्गत्वे यस्य किल अङ्गता नास्ति तस्याप्रयोगेणानुपकारकत्वमिति सोऽयमङ्गताऽभाव एवानुपकारकत्वेन दर्शितः[1]।

न चार्जनस्य विशेषोपादानत्वे प्रमाणमस्ति। अस्यार्थः—यदा द्रव्यमुखेनार्जनं क्रत्वर्थं तदा द्रव्यसाध्यत्वात् क्रतूनां सर्वेषामार्जनमिदमिति स्यात्। न पुनर्विशेषोपादानत्वे प्रमाणमस्ति। 'अस्मा इदमार्जनमुपात्तं अस्मै न' इति विशेषाभावात्। भवत्वेवं तथापि किमित्याह—न च सर्वतन्त्रं सर्वेण द्रव्येण शक्यते कर्तुम्। त्यक्तस्य पुनस्त्यागासंभवात्। तत्र यदि केनचिद्द्रव्येण कश्चिदेव क्रतुः क्रियेत तदा क्रत्वन्तरं प्रति तादर्थ्यं बाधितं भवेदिति तन्त्रपरिलोपः सर्वकर्मणां द्रव्यार्जनेनाङ्गेन उपक्रान्तत्वात्। अयमपरो दोषः। नान्यस्य तन्त्रे प्रततेऽन्यत्तन्त्रं प्रतायते' इति दर्शनं नोपपद्यते इति। प्रत्यक्षेण क्रत्वन्तरतन्त्रमध्ये क्रत्वन्तरदर्शनात् 'अथ मतं' इत्यादिना। [1]एवं च सतीत्यादिभाष्यं व्याख्यातुमुपक्रमते—अथ नैवेदं कस्यचिदेकस्यापि क्रतोरङ्ग किन्तु सर्वेषां मिलितानामङ्गं यथा प्रायणीयोदयनीययोरैकादशिनाः तत्र विभज्य संबन्धात् तन्त्रपरिलोपो न भविष्यतीति भावः। एव तर्हि नैवेदं प्रयोगवचनेन गृह्यते सर्वक्रतुगामिनः प्रयोगवचनस्याभावात् द्वादशाहप्रयोगवत्। अनुपात्तप्रयोगवचनस्याङ्गतैव नास्ति इति। यस्याध्ययनेन प्रयोगवचनो नोपात्तः न स्वीकृतः यस्य प्रयोगवचनो नाम्नातः तस्याङ्गतैव नास्ति। ततश्चायं भाष्यार्थो भवति। एकस्यापि प्रयोगकालात् बहिरेतत्सर्वाङ्गमभिप्रेतं सत् अनङ्गमेव स्यात्। ननु च भाष्ये अनुपकारकमित्याह नानङ्गमिति तत्राह—असत्यङ्गत्वे यस्य किलाङ्गता नास्ति तस्याप्रयोगेणानुपकारकत्वमिति सोऽयमङ्गताभाव एवानुपकारकत्वेन[2] दर्शितः।

(1) P. 1196-10 (2) G. कत्वे

न चाधानवद्भवितुमर्हति। न च द्रव्यार्थमेवेदमार्जनं आधानवदग्न्यर्थमेव भवितुमर्हति, जीवनाय प्रवृत्तस्याधिकारावगमात्। अतः पुरुषार्थमेवेदमार्जनम्। तस्मात् क्रत्वर्थत्वे तन्त्रपरिलोपः स्थितो दोषः। क्षामवत्यादीनामाहिताग्नेरधिकारावगमात् भवतु क्रत्वर्थता फलं कल्पयितुम्। पुरुषार्थ एव वा नैमित्तिकोऽस्तु। तस्मात् पुरुषार्था द्रव्यार्जननियमा इति स्थितम्। अतो नियमातिक्रमः पुरुषस्यानर्थः न क्रतोः।

॥ ३ ॥ तदुत्सर्गे कर्मणि पुरुषार्थाय शास्त्रस्यानतिशङ्क्यत्वात् न च द्रव्यं चिकीर्ष्यते तेनार्थेनाभिसम्बन्धात् क्रियायां पुरुषश्रुतिः ॥ ३ ॥

न चाधानवद्भवितुमर्हति; न च द्रव्यार्थमेवेदमार्जनं आधानवदग्न्यर्थमेव[1] भवितुमर्हति। अस्यार्थः—यथा आधानमग्न्यर्थं न पुरुषार्थं तथाऽऽर्जननियमोऽपि धनार्थ एव भवितुमर्हति। द्रव्यमुखेन चाधिकारान्तरमनुप्रवेक्ष्यति। न च तन्त्रपरिलोपो भविष्यति। अग्निवद्विरोधाभावात्। एतदपि नास्ति जीवनाय प्रवृत्तस्याधिकारावगमात्। यस्य हि नाधिकारोऽस्ति स पराधिकारमनुप्रविशति। द्रव्यार्थत्वेन तु स्वत एवाधिकारोऽवगम्यते। आधाने तु नार्थादप्यधिकारो नास्ति, अधिकारान्तरानपेक्षाणामग्नीनामपुरुषार्थत्वात्। जीवनार्थता तु स्वत एव द्रव्यस्यास्ति, तत्राधिकारोऽस्ति। अतः पुरुषार्थमेवेदं भवति नाधानवत्। तस्मात् क्रत्वर्थत्वे[2] द्रव्यार्जनस्य तन्त्रपरिलोपः स्थितो दोषः। क्षामवत्यादीनामाहिताग्नेरधिकारश्रवणात्। तस्य च क्रतुसंबन्धार्हत्वात्। भवतु क्रतुसंबन्धित्वं क्रत्वर्थतापि फलं कल्पयितुम्। एतच्च द्वयमभ्युपगम्यवादेनोक्तम्। पुरुषार्थ एवायं नैमित्तिकोऽस्तु। न काचित्क्षतिः। तस्मात् पुरुषार्था द्रव्यार्जननियमा इति स्थितम्। विचारप्रयोजनं चाह —अतः नियमातिक्रम इति। अतिक्रमः पुरुषस्य न क्रतोः। अतो नियमातिक्रमेणार्जितेनापि क्रतुसिद्धिः। न चात्र वाच्यम्। तर्हि चौर्यार्जितेनापि क्रतुसिद्धिरिति। यतो न चौर्यं स्वत्वापादकं लोके प्रसिद्धम्।

---

(1) G. अग्न्यर्थमेव (2) G. क्रत्वर्थद्रव्या

यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्सा अर्थलक्षणेत्युक्तम्। इह तु प्रीतेरश्रवणात् अर्थतश्च श्रवणादनवगमात् अधिकारिशून्यता विधेः। न चानधिकारं पुरुषार्थं भवति इति तस्य क्रत्वर्थस्यैवेक्षणस्यायं प्रतिषेधः नियमो वा। अत्राभिधीयते—प्रीत्युत्सर्गेप्येतदुक्तम्। अधिकाराश्रवणेपि अधिकारो युक्तः कल्पयितुम् न पुनः क्रतुसंबन्धकल्पना। कः पुनरत्र विशेषः? अयमस्ति विशेषः। यथैवाधिकारे श्रूयमाणे गम्यमानतत्कर्तृतैव न्याय्या।

[illegible] ॥ ५ ॥

तदुत्सर्गे कर्मणि। यस्मिन् प्रतिः पुरुषस्य तस्य लिप्सा अर्थलक्षणेत्युक्तम्। इह तु प्रतेरधिकारिविशेषणस्य साक्षादश्रवणात्; 'नोद्यन्तमादित्यमीक्षेत' इत्येतावन्मात्रश्रवणात् अर्थतश्चानवगमादधिकारिविशेषणस्य यथा 'न कलञ्जं भक्षयेत्' इति भक्षणप्रवृत्तेः अतोऽधिकारिशून्यताविधेः न चानधिकारं पुरुषार्थं भवति इति क्रत्वर्थस्येक्षणस्यायं प्रतिषेधः। नन्वयं यदि ईक्षणप्रतिषेधः तदा ईक्षणप्रवृत्तोऽधिकारी गम्यत एव। न च क्रतावेव परमीक्षणप्रवृत्तिः यदृच्छयापि संभवात्। अत्रोच्यते—सत्यं क्रतुबाह्यमपीक्षणमस्ति तथापि प्रयुक्तिलाघवात् क्रतुगतेक्षणप्रतिषेध एवायं विज्ञायते। नन्वेवं द्रव्यार्जननियमोऽपि किमिति न क्रत्वर्थः। भवतु तदप्यत्रोदाहरणम्। यत्र प्रतिषेध्यं क्रतौ नास्ति तत्प्रतिषेधः क्रत्वर्थतया नाशङ्क्यते यथा कलञ्जभक्षणस्य। नियमो वा। अस्तु व्रतप्रक्रमात् नियमोवाऽयं तथापि क्रत्वर्थः। ननु नियमपक्षे केन संबन्धेन क्रतावन्तर्गतिः प्रतिषेधो हि प्रतिषेध्यमुखेन क्रतावन्तर्भवेत्। उच्यते—अनीक्षणनियमसंकल्पोऽपि यदि स्वतन्त्र एव स्यात तदा प्रयुक्तिकल्पनागौरवमिति क्रतावेवानुप्रवेशः। ननु चैवं सति विश्वजिदादयोप्यत्रोदाहरणं भवन्तु। भवतु न कश्चिद्दोषः। अत्राभिधीयते—प्रीत्युत्सर्गेप्येतदुक्तं भवति अधिकाराश्रवणेऽप्यधिकारो युक्तः कल्पयितुम्। न पुनः क्रतुसंबन्धकल्पना। कः पुनरनयोर्विशेषः? अयमस्ति विशेषः—यथैव अधिकारे श्रूयमाणे गम्यमानतत्कर्तृतैव न्याय्या। यस्याधिकारः श्रूयते तस्याधिकारान्यथानुपपत्त्या तत्कर्तृता कल्प्यते। कार्यतया हि नियोगं यः प्रतिपद्यते सोऽधिकारी। विषयसाध्यश्च नियोगः। स यदि विषयं न

एवं गम्यमानकर्त्रवगमात् अधिकारकल्पनैव न्याय्या। कथं तर्हि कर्त्रधिकरणम्? तत्र हि विनियोगोऽधिकारकल्पनायाः प्रतिपक्षः। इह तु अप्रतिपक्षाऽधिकारकल्पनेति। किं भूतः पुनरत्राधिक्रियते? "एतावता हैनसा वियुक्तो भवति" इति श्रवणात् जीवत एव वाऽधिकारः।

संपादयेत तस्य नियोगः कार्य एव न स्यात् इति विषयसंपादकतया कर्तृत्वावगमात्। तच्च कर्तृत्वं साक्षाद्वा पुरुषान्तरप्रयुक्त्या वा यद्यप्युभयथा उपपद्यते तथापि साक्षात् संभवे परम्परानुपपत्तेः तत्कर्तृतैव न्याय्या। न पुनः पुरुषान्तरकर्तृताकल्पना, विना वचनादार्त्विजेष्वेव। एवं क्रियाक्षेपेण **गम्यमानकर्त्रवगमात् अधिकारकल्पनैव न्याय्या।** अधिकारं विना कर्तृत्वानुपपत्तेः। न चान्यत्राधिकारेणान्यत्रापि तदङ्गतयाऽधिकारानुप्रवेशेन कर्तृत्वसिद्धिः। अत्रैवाधिकारे साक्षात्संभवति परम्परानुपपत्तेरिति। एवं च न्यायतः स्थितेऽधिकारिणि प्रयुक्तिकल्पनापि न दोषः। **कथं तर्हि कर्त्रधिकरणमिति** 'नानृतं वदेत्' इत्यत्रापि तर्हि गम्यमानकर्तृत्वसिद्ध्यर्थं साक्षादधिकारकल्पनात् किमर्थं कर्तुर्वाच्यत्वनिराकरणं? निराकृतेपि वाच्यत्वे, गम्यमानेपि कर्तरि तस्य कर्तुः स्वतन्त्राधिकारापत्तेः। उत्तरं—**तत्र हि विनियोगोऽधिकार**[1]**कल्पनायाः प्रतिपक्षः। इह तु अप्रतिपक्षा अधिकारकल्पना इति।** अनृतवदनप्रतिषेधे हि साधिकारनियोगसन्निधानात् तेन गृहीतत्वात् प्रकरणेन च विनियुक्तत्वात् नाधिकारकल्पनावकाशोऽस्ति। इह तु अनारभ्याम्नानात् नाधिकारग्रहणमस्ति इति नाधिकारान्तरसंबन्धोऽवकल्पते। तेनाधिकारकल्पनायां [2]प्रसृतायां स्वतन्त्राधिकारकल्पनैव नेत्यनवद्यम्। एवं तावत् समाहितमिदमधिकरणम्। इदानीं सुहृद्भावेनाधिकारिविशेषणं निरूपयति—**किंभूतः पुनरत्राधिक्रियते "एतावता हैनसा वियुक्तो भवति" इति श्रवणात् जीवत एव वाऽधिकारः।** अस्मिन्नुदाहरणे एतावता हैनसा पापेन वियुक्तो भवतीत्यर्थवादः। तत्र यदि जीवनवानधिकारी भवति तदा नित्यत्वात् अत्राकरणे विहितातिक्रमदोष एवैनोयोगो भवतीति सालम्बनोऽर्थवादः। विश्वजिदादिवत्तु स्वर्गोऽधिकारि-

---

(1) G. विकल्प (2) G. प्रकृतायां

अतो नित्योऽयं जीवनानुपालनीयो नियमः स्वधर्मतया। ननु च प्रसज्यप्रतिषेधो न्याय्यः। सत्यम्, तस्य व्रतमित्यन्वयावगते-र्लक्षणैव न्याय्या। आधानवदप्यत्र नैव द्रव्यार्थता संभवति। अविनियुक्तद्रव्यसंयोगात्। दृष्टस्य च संस्कारस्याविद्यमानत्वात्। किं दृष्टार्थता शक्यते वक्तुम्? बाढं शक्यते दर्पणप्रमार्जनवत् लोक एवोपयोगदर्शनात्। तस्मात पुरुषार्थो नियम इति युक्तम्। दृष्टार्थासंभवेन च कर्करीकर्णादयोऽपि पुरुषार्था इत्युक्तम्।

विशेषणे कल्प्यमाने काम्यस्याकरणेऽपि न दोषः। तत्रार्थवादस्यातिपरोक्षा वृत्तिः स्यात् अतो नित्योऽयं जीवनानुपालनीयो नियमः स्वधर्मतया।

ननु च प्रसज्यप्रतिषेधो न्याय्यः अस्यार्थः—ननु प्रसज्यप्रतिषेधोऽयम्। तत्र निषिध्यमानक्रियाकर्तैवाधिकारी। किमिति जीवनवानुच्यते। सत्यं स्ववाक्यमात्रालोचनया एवं, किन्तु तस्य व्रतमित्यन्वयावगतेः लक्षणैव न्याय्या। अनीक्षणसङ्कल्पो व्रतरूपो लक्ष्यते ऽनेन [1]नायं प्रसज्यप्रतिषेधः। नन्वेवं आधानवत् किमिति सङ्कल्पोऽपि द्रव्यार्थो न स्यात्। तत्राह—आधानवदप्यत्र द्रव्यार्थता नैव संभवति साक्षाच्छ्रुत्यभावात्। अविनियुक्त-द्रव्यसंयोगात् दृष्टस्य च संस्कारस्याभावात् नैव द्रव्यार्थता। यदि पुनः दृष्टः संस्कारः स्यात्। किं दृष्टार्थता शक्यते वक्तुम्। अस्यार्थः—सर्वं शब्दावगम्यं चोदनास्विति स्थितम्। यद्यपि संस्कारो दृष्टः तथापि तदर्थता न युक्तेति। बाढं शक्यते दर्पणप्रमार्जनवत् लोक एवोपयोगदर्शनात्। अत्राभिप्रायः—कल्पनीये प्रयोजने प्रत्यक्षमपि प्रयोजनं निराकाङ्क्षीकरणयोग्यं न त्यक्तुं शक्यत इति। तस्मात् पुरुषार्थो नियमस्संकल्प-रूपोऽयमिति युक्तम्। दृष्टार्थासंभवेन च कर्करीकर्णादयोऽपि[2] पुरुषार्था इत्युक्तम्। गोकर्णलक्षणान्यपि [3]कर्करीकर्ण्याः कर्तव्याः इत्येवमादीनि क्रतुसंबन्धिनि द्रव्ये दृष्टसंस्कारा-भावेन पुरुषार्थान्येव गोमानेव चाधिकारीति स्थितम्।

---

(1) G. नाप्रसज्य (2) G. कर्तरिकरणादयोऽपि (3) G. कर्तरीकर्ण्यः

॥ ४ ॥ द्रव्याणि त्वविशेषेणानर्थक्यात् प्रदीयेरन् ॥ ७ ॥

उक्तं 'स्फ्यश्च कपालानि च' 'स्फ्येनोद्धन्ति' इत्येतयोः किं विनियोजकमिति। तत्र पूर्वपक्षवादी "स्फ्येनोद्धन्ति" इत्येवमादिभिर्वाक्यैः साक्षात् यज्ञसंबन्धानवगमात् यज्ञायुधानीति विध्यन्तरं मन्यते। ननु वाजपेयस्य यूप इतिवत प्रणाड्यापि संबन्ध उपपद्यते। युक्तं यूपाभावात्क्रतोस्तत्र।

द्रव्याणि तु। ननु तृतीये उद्धननादिष्वेव स्फ्यादीनां विनियोग उक्तः। तत्कथमिहान्यत्राप्याशङ्क्यते तत्राह—उक्तमित्यादि। एतदुक्तं भवति—स्फ्यश्चेत्यादिभिः सहोद्धननादिवाक्यानां विनियोगविचारः कृतः। तत्रोद्धननादिवाक्यानि विनियोजकानीति स्थितम्। इदमिदानीं चिन्त्यते—एतानि वै दश यज्ञायुधानीति किमिदं शास्त्रान्तरं स्फ्येनोद्धन्तीत्येवमादिभ्यः उत तेषामेवानुवादः इति चिन्तान्तरं दर्शयति। ननु द्वितीयाध्यायचिन्तेयं शास्त्रभेदाभेदविषया। किमिति चतुर्थे चिन्त्यते। उच्यते। पृथक्प्रयुक्त्यर्थं द्वितीयार्थावमर्शः क्रियते। यदि शास्त्रान्तरमिदं स्यात् तदा अस्य साक्षाद्यज्ञसाधनत्वेन पृथगिदं प्रयोक्तव्यं स्यात् अभेदपक्षे तु शास्त्राभेदात् भेदेन प्रयुक्तिर्नास्ति। कीदृशो द्वितीयार्थावमर्शः इत्यत्राह—किं भेदलक्षणयुक्तमिदं वाक्यं गुणान्तरविधानपक्षे साध्यभेदात्, गुणवत्कर्मान्तरविधानेतु अनुबन्धभेदात्, उतानुवादकतया साध्यानुबन्धभेदाभावात् अभेदलक्षणयुक्तमिति। **पूर्वपक्षवादी स्फ्येनोद्धन्तीत्येवमादिभिर्वाक्यैः साक्षाद्यज्ञसंबन्धानवगमात् यज्ञायुधानीति विध्यन्तरं मन्यते।** अयमभिप्रायः—यज्ञायुधानीति षष्ठीसमासोऽयम्। षष्ठी च यद्यपि संबन्धमात्रे भवति तथापि साक्षात्संबन्धे संभवति न परम्परा आश्रयितुं न्याय्येति साक्षाद्यज्ञसंबन्ध एवावगम्यते। न चासौ प्राप्तः येनासावनुवादः स्यात्। 'अतो वचनानि त्वपूर्वत्वात्' इत्ययमपि विधिः। [1]स च आग्नेयादिष्वेव द्रव्यं विधत्ते। गुणान्तरावरुद्धत्वाद्वा तेषां गुणान्तरयुक्तं कर्मान्तरमिति। **ननु वाजपेयस्य यूप इतिवत् प्रणाड्यापि संबन्ध उपपद्यते। युक्तं यूपाभावात्क्रतोस्तत्र।** न च

(1) G. न च

इह पुनः किं नोपपद्यत इत्यभिप्रायः। एवं प्राप्तेऽभिधीयते— यज्ञायुधानीति तावत् लक्षणा। लक्षणा चेत् साक्षाद्व्यवधाने च न कश्चिद्विशेष प्रमाणान्तरानुसारिणी हि लक्षणा। न च विद्यमाने प्रमाणे प्रमाणान्तरकल्पना शक्या। स्फ्येनोद्धन्तीत्युभय सिद्धत्वात्। एवं च विकल्पदोषः परिहृतो भवति। लिङ्गं चाप्युपपन्नं भवति।

विधास्यत इति वाच्यम्। सप्तदशारत्निताविधानपरत्वाद्वाक्यस्य। अनुवादे यथा प्राप्तिः प्रणाड्याप्याश्रीयते। इह पुनः विधानेपि संभवति किं नोपपद्यत इत्यभिप्रायः। अत्राभिधीयते–यज्ञायुधानीति तावल्लक्षणा। लक्षणा चेत्साक्षात् व्यवधाने च न कश्चिद्विशेषः। अस्यार्थः—यज्ञायुधशब्देन तावत् न साक्षात तत्साधनमुच्यते, किन्तु तत्संबन्धी लक्ष्यते। संबन्धिलक्षणा चेत् न साक्षाद्व्यवधाने च कश्चिद्विशेषः। संबन्धित्वाविशेषात्। तेन यज्ञायुधशब्देन न साक्षात्संबन्धो बोध्यते इति अप्राप्तार्थता न शक्यते वक्तुम्। नन्वेवं प्राप्तार्थतापि नैकान्ततः शक्या वक्तुम्। सत्यम्— किन्तु विधिशून्यमिदं वाक्यं कल्प्यविधिकम्। कल्पना चानुपपत्तौ सत्यां, नचानुपपत्तिः उद्धननद्वारक[1]व्यवहितसंबन्धाश्रयणेनोपपत्तेः। तस्मादनुवादोऽयं न विधिः। अत्रैव युक्त्यन्तरमाह—प्रमाणान्तरानुसारिणी च लक्षणा। न च विद्यमाने प्रमाणे प्रमाणान्तरकल्पना शक्या। स्फ्येनोद्धन्तीत्युभयसिद्धत्वात्। लोके च लक्षणा प्रसिद्धा गङ्गायां घोष इत्यादौ। तत्र यद्गङ्गाकूलं लक्षयति, तत्[1] प्रमाणान्तरेण कूले घोषदर्शनात। तदेवमिहापि प्रमाणान्तरप्रसिद्धत्वात् उद्धननादिद्वारिकैव संबन्धिता आश्रयितुं युक्ता। तस्मादनुवादोऽयम्। एवं च विकल्पः परिहृतो भवति। यद्याग्नेयादिषु द्रव्यविधिः तदा पुरोडाशादिभिः सह यो विकल्पः स परिहृतो भवति। लिङ्गं चोपपन्नं भवति। यदि कर्मान्तरविधानं तदा देवताभावेन अव्यक्तत्वात् सौमिकविध्यन्तप्राप्त्या आहुतिसङ्ख्यादर्शनं नोपपद्यते। तथा सोमस्थानापत्त्या अभिषुतानां स्फ्यादीनां परिधानीये कर्मणि न स्याद्दर्शनम्।

(1) G. द्वारकस्य

॥ ५ ॥ तत्र चैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ॥ ११ ॥

एकत्वं विनियोगाभावान्न यज्ञाङ्गमिति पूर्वपक्षवादिनोऽभिप्रायः। कथं पुनरेकत्वं न विनियुज्यते ? विभक्तयो हि प्रातिपदिकार्थस्य स्वार्थसंबन्धमभिदधाति। तस्मादेकत्वं करणत्वं च प्रातिपदिकार्थस्यैव। नैकत्वस्य करणभावः। करणसंबन्धे सति प्रातिपदिकार्थसंबन्धो न स्यात्। यथा 'अरुणया' इति न द्रव्येण अतः प्रतीयमानमप्येतन्न क्रियया संबध्यते यथा पूर्वो धावतीत्यपरप्रत्ययः। लिङ्गदर्शनानि चैवमुपपन्नानि भवन्ति। एवं प्राप्ते उच्यते—न विनियोगादेव क्रियाङ्गता, किं तर्हि ?

तत्र चैकत्वमयज्ञाङ्गम्। ननु चैकत्वादि विभक्त्यापि कार्यान्वयित्वेनाभिहितम्। ततश्च कार्याङ्गत्वात् तदनुपादाने कार्यमेव न संवर्तेत इत्यत्राह—एकत्वं विनियोगाभावान्न यज्ञाङ्गमिति पूर्वपक्षवादिनोऽभिप्रायः। अस्यार्थः—यद्यप्येकत्वं ग्राहकगृहीतं तथापि विनियोगाभावात् द्वारसंबन्धाभावात् तदभावे च सामान्यसंबन्धानिर्वाहात् न यज्ञाङ्गमिति। कथं पुनः एकत्वं न विनियुज्यते ? विभक्तयो हि प्रातिपदिकार्थस्य स्वार्थसंबन्धमभिदधति। स्वार्थस्य करणत्वादेः प्रातिपदिकार्थसंबन्धित्वात्। न पुनः स्वार्थभूतैकत्वादिसंबन्धितां विभक्तयोऽभिदधति। तस्मादेकत्वं करणत्वं च प्रातिपदिकार्थस्यैव। नैकत्वस्य करणभावः करणत्वे चासति क्रियासंबन्धाभावादयज्ञाङ्गमिति। करणसंबन्धे हि करणतया क्रियासंबन्धे प्रातिपदिकार्थसंबन्धो न स्यात्। यथा अरुणयेति क्रियासंबन्धे द्रव्यगुणसंबन्धो न भवति। तस्मात् प्रतीयमानमप्येतत् न क्रियया संबध्यते यथा पूर्वो धावतीत्यपरप्रत्ययः। प्रतीयमानमपीत्यपिशब्देन एवमाह—क्रियासंबन्धाभावेन [1]कार्यान्वयितया अनभिधेयमेव। यद्यप्यभिधीयते तथाप्यनङ्गमिति। लिङ्गदर्शनानि चैवमुपपन्नानि भवन्तीति। एवं प्राप्ते उच्यते—न विनियोगादेव क्रियाङ्गता किं तर्हि

(1) G. इति यत् (2) R. भावेनाकार्य

उपादानादपि हि शेषताभवति। यथैव हि करणीभूतस्यैवोपादानं एवमेकत्वयुक्तस्यापि। न ह्यकारकस्योपादानमसङ्ख्यायुक्तस्यापि संभवति। तथा च लौकिकाः गामानयेत्येवमादिषु तथैव प्रतिपद्यन्ते। तदिदमुक्तं "न श्रुतिर्ब्रूते (प्रमिते) वाक्यार्थो नास्ति" इति[1]। न विनियोगो ब्रूते उपादानं नास्तीत्यर्थः। ननु 'न श्रुतिर्ब्रूते वाक्यार्थो नास्ति' इति अन्य एवार्थः प्रतीयते। कोऽर्थः? अयमर्थः प्रतीयते। न श्रुत्या वाक्यार्थस्य विरोधोऽस्तीति। श्रुत्यर्थापरित्यागेन वाक्यात् क्रत्वर्थतावगम्यते। विरोधे च दौर्बल्यमुक्तम्।

उपादानादपि शेषता भवति। यथैव करणीभूतस्यैवोपादानं एवमेकत्वयुक्तस्यापि। यथैव हि अकारकभूतस्यानुपादानं एवमसङ्ख्याकस्यापि। न ह्यकारकस्योपादानं असङ्ख्यायुक्तस्यापि संभवतीत्यभिप्रायः। पशुस्तावत विनियुक्त उपादातव्यश्च। स च सङ्ख्यया विना न शक्यते उपादातुम्; श्रुतं च तत्स्थमेकत्वम्। तदपि च कार्यान्वयित्वेन श्रुतम्। तदनुप्रवेशायावश्यमाश्रयमपेक्षते। अतः [2]तद्वदेवावच्छेदकतया स्वीक्रियते। स्वीकृतं च विनियुक्तस्थं तात्स्थ्येनाङ्गतां याति। सङ्ख्या हि स्वसामर्थ्येनैव स्वसङ्ख्येयशेषभूता। सा हि प्राक् प्रातिपदिकार्थमात्रे स्थिता सम्प्रति उपादानदशायां विनियुक्तस्था जाता। शेषभावस्तु तस्याः वस्तुस्वभावलक्षणाल्लिङ्गात इत्यनवद्यम्। तथा च लौकिकाः गामानयेत्यादिषु तथैव प्रतिपद्यन्ते। ननु भाष्यकारः वाक्यबलेन क्रियाशेषतामाह नोपादानत इति तत्राह—तदिदमुक्तं यदस्माभिरुक्तं तदेतत भाष्यकारेणाप्युक्तं "न श्रुतिर्ब्रूते वाक्यार्थो नास्तीति' अनेन ग्रन्थेन। कथमुक्तमित्यत्राह—न विनियोगो ब्रूते उपादानं नास्तीत्यर्थः। ननु चान्य एवार्थः प्रतीयते न श्रुत्या वाक्यस्य विरोधोऽस्तीति। यतः [3]श्रुत्यर्थापरित्यागेन वाक्यात् क्रत्वर्थतावगम्यते। विरोधे च दौर्बल्यमुक्तम्।

---

(1) P. 1205 (2) G. तदेवाव (3) G. श्रुत्यपरित्यागेन

उक्तमस्माभिः विनियोगो न संभवतीति करणस्यैवैकत्वस्येति। कथं तर्हि वाक्यशब्दः? समभिव्याहारपर्यायोऽयं न विनियोजकपर्यायः। तस्मात्सिद्धमुपादानतः शेषत्वं सङ्ख्याया लिङ्गस्य च। एवं दर्शनान्युपपन्नानि पूर्वपक्षदर्शनं चानुवादः।

एवं वा। लिङ्गाधिकरणम् पुनः एवं वेति वदतः कोऽभिप्रायः अपरिच्छेदकत्वं लिङ्गस्य पूर्वपक्षवादी मन्यते। परिच्छेदिका हि सङ्ख्या द्रव्यस्य परिमाणमाचष्टे

अत्रोत्तरं—उक्तमस्माभिर्विनियोगो न संभवतीति। वाक्येनापि विनियोगो नास्ति क्रियासंबन्धावगमाभावादिति। तस्माद्यथाश्रुतं न व्याख्येयमिदं भाष्यम् इति। कथं तर्हि वाक्यशब्दः? समभिव्याहारपर्यायोऽयं न विनियोजकपर्यायः। एकस्मिन् वाक्ये क्रिया चैकत्वं च समभिव्याहृतम्। तद्बलेन चोपादानशेषतेति। तस्मादेव क्रियाङ्गतोच्यत इत्यर्थः। तस्मात् सिद्धमुपादानशेषत्वं सङ्ख्यायां लिङ्गस्य च। ननु 'वसन्ता प्रातराग्नेयीं कृष्णग्रीवीमालभेत' इत्यत्र लिङ्गं प्रकृतिभागाभिहितं विभक्त्या विनियुज्यते प्रातिपदिकाभिधेयमिवेति कथमुपादानशेषता? उच्यते—प्रातिपदिकेन योऽर्थः प्रधानभूतः प्रतिपाद्यते तत्रैव स्त्रीप्रत्ययाभिधेयमपि लिङ्गं विभक्त्यर्थश्च कारकत्वं सङ्ख्या चावगम्यते। न पुनः स्त्रीत्वयुक्ते प्रधानाश्रयमात्रापेक्षत्वाद्गुणानाम्। प्रातिपदिकभागेन प्रथमोच्चरितेन लिङ्गशून्यस्य प्रातिपदिकार्थमात्रस्य अवगतत्वात् तन्मात्रेण विभक्त्यर्थः संबध्यत इति तुल्यं सङ्ख्यया। एवं दर्शनान्युपपन्नानि। पूर्वपक्षदर्शनं चानुवादः।

एवं वा। लिङ्गाधिकरणम पुनरेवं वेति वदतः कोऽभिप्रायः? अस्यार्थः—पूर्वाधिकरणे हि लिङ्गमप्युपादानशेषमित्युक्तम्। किमपरमिह पुनश्चिन्त्यत इति। अपरिच्छेदकत्वं लिङ्गस्य पूर्वपक्षवादी मन्यते। परिच्छेदिका हि सङ्ख्या द्रव्यस्य परिमाणमाचष्टे। अस्यार्थः—सङ्ख्यान्तरेषूपादीयमानेषु कारकपरिमाणान्यत्वेनानुष्ठाने(नै)ऽनेकत्वा-

श्रवणाविशेषाल्लिङ्गमप्युपादीयत इति राद्धान्तः। ननु चापरिमाणापादकत्वाल्लिङ्गं नोपादातव्यमित्युक्तम्। नात्र परिमाणमुपादाने उपयुज्यते। विशेषनिष्ठत्वादुपादानस्य। यथाऽनुष्ठानविशेषाकाङ्क्षा तथा कारकविशेषाकाङ्क्षापि। अतस्सङ्ख्यावदुपादानमिति सिद्धम्। शेषं पूर्ववत्।

॥ ७ ॥ [1]आश्रयिष्वविशेषेण भावोऽर्थः प्रतीयेत ॥ १८ ॥

इहाश्रयिणः पदार्था उदाहरणम्। ननु भाष्यमयुक्तं किं यजिमात्रं संस्कारो देवताया उत यजिनाऽदृष्टं देवतायां क्रियत इति यस्मात्संस्कारमात्रमदृष्ट[म]कुर्वदनर्थकम्।

वगमात् युक्ता सङ्ख्याविशेषापेक्षायां [2]तस्या उपादानशेषता। लिङ्गे तु द्रव्यान्तरोपादानाभावेनानुष्ठानविशेषानापादकत्वात् विशेषापेक्षा नोपपद्येत। अतो नोपादानशेषतेति। श्रवणाविशेषाल्लिङ्गमप्युपादीयत इति राद्धान्तः। यथा सङ्ख्या श्रुता तथा लिङ्गमपि। ननु चापरिमाणापादकत्वात् लिङ्गं नोपादातव्यमित्युक्तमिति पूर्वोक्तस्मारणम्। परिहर्तुं नात्र परिमाणमुपादाने उपयुज्यते विशेषनिष्ठत्वादुपादानस्य यथाऽनुष्ठानविशेषाकाङ्क्षा तथा कारकविशेषाकाङ्क्षापि। तेन कारकविशेषापादकं लिङ्गमप्युपादेयम्। अतस्सङ्ख्यावदुपादानमिति सिद्धम्। शेषं पूर्ववत्।

आश्रयिष्वविशेषेण। इहाश्रयिणः पदार्था उदाहरणम्। सन्देहं कर्तुं उदाहरणमुपन्यस्तम्। ननु भाष्यमयुक्तं "किं यजिमात्रं संस्कारः देवतायाः, उत यजिनाऽदृष्टं देवतायां क्रियत" इति यस्मात् संस्कारमात्रमदृष्टमकुर्वत् अनर्थकम्। अवघातादिष्वपि नियमादृष्टं यावन्नाभ्युपगम्यते तावदानर्थक्यमेव नियमस्य। तस्मात् संस्कारपक्षेऽ(स्य)प्य-

---

(1) P. 1207 (2) तस्योपा

द्विविधमाख्यातमुक्तं परप्राप्तनियोगानुवादकम्। अवहन्तीत्याग्नेयादिचोदनावगतनियोगानुवादकं स्वनियोगसंबन्धितयाऽधिकारसाधनं च। इहेदानीं सन्दिह्यते—किं परप्राप्तनियोगानुवादात्मकं उत स्वनियोगसंबन्धितयाधिकारसाधनमिति। कुतः संशयः? अंशेन दृष्टस्य संभवः अंशेनादृष्टस्येति पूर्वपक्षवादी दृष्टे संभवत्यदृष्टकल्पना न न्याय्येति परप्राप्तानुवादं मन्यते। ननु यज्यर्थोऽत्र न निष्पद्यते। अनुष्ठानाद्दृष्टोपपत्त्यर्थो (ऽदृष्टो)भविष्यतीत्यभिप्रायः। अत्राभिधीयते—दृष्टोपपत्त्यर्थतैव न घटते। कस्मात्? नियोगसिद्धेरविवक्षितत्वात्।

दृष्टमस्तीत्यत्राह—द्विविधमाख्यातमुक्तम्। परप्राप्तनियोगानुवादकं अवहन्तीत्याग्नेयादिचोदनावगतनियोगानुवादकं स्वनियोगसंबन्धितया चाधिकारसाधनं समिधो यजतीत्यादिभिन्नोत्पत्तिनियोगाभ्युपगमात्। इहेदानीं सन्दिह्यते—किं परप्राप्तनियोगानुवादात्मकमिदमाख्यातं उत स्वनियोगसंबन्धितयाऽधि[1]कारसाधनमिति। एतदुक्तं भवति—संस्कारमात्रपक्षे नियोगान्तरं नास्तीति देवतायामदृष्टं क्रियत इति। अत्रादृष्टमपूर्वमभिमतम्। तेनायं भाष्यार्थः—देवतायां संस्क्रियमाणायां यजिना परमपूर्वं क्रियत इति। तेनापूर्वान्तरसदसद्भावसंशयोऽयमिति यावत्। कुतः संशयः अंशेन होमपर्यन्ततया द्रव्यप्रक्षेपांशेन द्रव्यविरेचनस्य, तथाऽङ्गभूतमन्त्रांशेन देवतास्मरणस्य च दृष्टस्य संभवात् अंशेन यागांशेनादृष्टस्य च संभवात् तेनांशेन दृष्टान्तरस्यासंभवात् पूर्वपक्षवादी मन्यते दृष्टे द्रव्यदेवतागतोपकारे सति अदृष्टकल्पना अपूर्वान्तरकल्पना न न्याय्या। [2]तद्द्वारेणाधिकाराङ्गभावोपपत्तेः। ननु यज्यर्थोऽत्र न निष्पद्यते तेन अंशेन दृष्टोपकाराभावात् अधिकाराननुप्रवेशात् तत्प्रयुक्त्यभावात् यज्यर्थो न निष्पद्येत अनुष्ठानाद् दृष्टोपपत्त्यर्थो भविष्यतीत्यभिप्रायः। यथाऽवघातादिषु मन्त्रादिकम्। अत्राभिधीयते—दृष्टोपपत्त्यर्थतैव न घटते कस्मात्? नियोगसिद्धेरविवक्षितत्वात्। उत्पत्तिनियोगसिद्धेर-

(1) G. विकार (2) G. व्याख्यातद्वारेण

नियोगाद्धि नियोगार्थे प्रवृत्तिः। अथ तदर्थमुत्पत्तिनियोगो विवक्ष्यते सिद्धमपूर्वार्थत्वम्। पश्चादधिकारनियोगार्थत्वे यागस्य —निरूढेऽङ्गसंबन्धे सति तद्द्वारेण द्रव्यदेवतागतदृष्टसंस्कारनिष्पत्त्यर्थमित्यनुमन्यत एव। न च तृतीयप्रकारोऽयं नियोगनिष्पत्तेस्तुल्यत्वात समिदादिवत्। प्रयोजनं तु दृष्टमदृष्टं वा भवतु। प्रयोजनवशाच्च अनुष्ठानमननुष्ठानं वा भवतु। सर्वथा सिध्यति स्वनियोगार्थता।

विवक्षितत्वात्। तथापि किमित्याह—नियोगाद्धि[1]नियोगार्थे प्रवृत्तिः। अत्राभिप्रायः नियोगेऽविवक्षिते न शुद्धं यजिमात्रं क्षणिकं अधिकारनियोगार्थं भवति असति च तदर्थत्वे न तत्र प्रवृत्तिः यस्मात् नियोगाद्या प्रवृत्तिः सा नियोगार्थे न पुनरनियोगार्थे। ननु यागाङ्गस्य द्रव्यदेवताद्वारेणाङ्गताऽस्तीत्युक्तम्। उच्यते—न तावत् साक्षात् द्रव्यदेवतार्थता यागस्य। किन्तु अङ्गभूतमन्त्रात्। सा चाङ्गमुखेन तत्र चेतरेतराश्रयता; निरूढे नियोगार्थत्वेऽङ्गसंबन्धः अङ्गसंबन्धे च द्रव्यदेवतार्थतया नियोगार्थता। यस्मान्न स्वरूपमात्रे अनियोगके धर्मसंबन्धो घटत इति। अथ तदर्थं [2]अधिकारार्थं उत्पत्तिनियोगो विवक्ष्यते सिद्धमपूर्वार्थत्वम्। [3]पश्चादधिकारनियोगार्थत्वे यागस्य निरूढेऽङ्गसंबन्धे सति तद्द्वारेण द्रव्यदेवतागतदृष्टसंस्कारनिष्पत्त्यर्थमित्यनुमन्यत एव। तस्मात् तृतीयप्रकारोऽयं नियोगानुवादकः स्वनियोगसंबन्धिभ्यामिति परमतेनोपसंहृतम्।

स्वमतमाह—न च तृतीयप्रकारोऽयं नियोगनिष्पत्तेस्तुल्यत्वादेव स्वनियोग-संबन्धस्य विद्यमानत्वात्। समिदादिवत्। नन्वेवं सति द्रव्याभावेपि स्विष्टकृतो न लोपः तत्राह—प्रयोजनं तु दृष्टमदृष्टं वा भवतु प्रयोजनवशाच्च अनुष्ठानमननुष्ठानं वा भवतु अस्यार्थः—यद्यपि नियोगसिद्धिः तथापि दृष्टत्वात् द्रव्यादिसंस्कार एव प्रयोजकः। नियोगार्थत्वमप्रयोजक एव। तेन द्रव्याभावे स्विष्टकृतो लोपः तस्मात् सिद्धा स्वनियोगार्थता।

---

(1) विनि (2) G. उत्पत्ति नियोगार्थं (3) पश्चाद्यद्यधिकार

॥ ८ ॥ [1]अर्थे समवैषम्यमतो द्रव्यकर्मणाम् ॥ २१ ॥

'अतिक्रान्तस्तृतीयविषयः' इति। कोऽयं तृतीयविषयः? पारार्थ्यप्रतिपत्तिः। साऽतिक्रान्ता। इदानीं पुनः स्थिते पारार्थ्ये केवलमुपादानमेव चिन्त्यते केन प्रयोजनेनोपादानं केन नेति। ननु च प्रागप्यस्मात् प्रयोजनकृतैवोपादानचिन्ता। केन विशेषेणेदमुच्यते इदमिदानीमिति। सत्यं—किन्तु पारार्थ्यमपि तन्निमित्तकमेव, न (वि)नियोगनिमित्तकम्। अत इदमुक्तं तृतीयविषय इति। तृतीयस्यायं विषयः न पुनः तार्तीयैः प्रमाणैः शक्यतेऽवगन्तुम्। अतो विधिनिमित्तकमेवास्य पारार्थ्यमिति चतुर्थे चिन्तितम्। एतच्च व्याख्यातम्—न श्रुत्यादिभिः सर्वस्य

अर्थे समवैषम्यमतो द्रव्यकर्मणाम्। अतिक्रान्तस्तृतीयविषयः इति। कोऽयं तृतीयविषयः? यदि तृतीयविषयोऽयं किमिति चतुर्थे चिन्त्यते इत्यनेनाभिप्रायेणायं प्रश्नः। अत्रोत्तरं—पारार्थ्यप्रतिपत्तिः। साऽतिक्रान्ता। अयमभिप्रायः-यद्यप्येषा पारार्थ्यप्रतिपत्तिः साऽतिक्रान्ता। अयमभिप्रायः—यद्यप्येषा पारार्थ्यप्रतिपत्तिः तथापि श्रुत्यादिभिर्न भवति नियोगव्यापारनिबन्धनैवेति इह चिन्त्यते। इदानीं पुनः स्थिते पारार्थ्ये केवलमुपादानमेव चिन्त्यते। प्रयुक्तिः उपादानम्। तच्चिन्त्यते। केन प्रयोजनेनामिक्षादीनामुपादानं केन नेति। ननु च प्रागप्यस्मात् प्रजोजनकृतैव उपादानचिन्ता। सङ्ख्यादीनामपि यदुपादानं तदपि उपादानकृतमेव केन विशेषेणेदमुच्यते इदमिदानीमिति। सत्यम। किन्तु पारार्थ्यमपि तन्निमित्तकमेव न नियोगनिमित्तकम्। अत इदमुक्तं तृतीयविषय इति। तृतीयस्यायं विषयः न पुनस्तार्तीयैः प्रमाणैः शक्यतेऽवगन्तुम्। अतो विधिनिमित्तकमेवास्य पारार्थ्यमिति चतुर्थे चिन्तितम्। एतच्च व्याख्यातं "न श्रुत्यादिभिः सर्वस्य

(1) P. 1208

पारार्थ्यं शक्यते प्रतिपादयितुमिति। एतदेवात्र कथ्यते। तथा च यागफलयोरधिकारात् पारार्थ्यं वक्ष्यति। अत एव बादरेरेषा भ्रान्तिः द्रव्यगुणसंस्कारेष्वेव शेषत्वमिति। श्रुत्यादीनां तत्र द्रव्यादौ संभवात् उपादानाधिकारयोः सामर्थ्यमपश्यतोऽवधारणात्। अत एवेदं लक्षणान्तरमुच्यते शेषावगमतुल्यत्वेपि।

॥ ९ ॥ एकनिष्पत्तेः सर्वं समं स्यात् ॥ १२ ॥

अतः प्रभृतीदानीं केवलोपादानव्यापार एव चिन्त्यते। शेषता तु विनियोगत एव। नोपादानतः। पूर्वपक्षवादी तु केवलोपकारदर्शनादेवोपादानमाह, न शेषताऽपेक्षणीयेति मन्यते। यथैवोपादानशेषेषु पश्वेकत्वादिषु।

पारार्थ्यं शक्यते प्रतिपादयितुं" इति। एतदेवात्र कथ्यते। तथा च यागफलयोः अधिकारात् पारार्थ्यं वक्ष्यति षष्ठाद्ये। नियोगनियोज्यलक्षणसंबन्धावगमबलेन यागस्य स्वर्गं प्रति फलस्य पुरुषं प्रति शेषत्वं वक्ष्यति। अत एव श्रुत्यादिभिर्या[1]गफलयोः पारार्थ्यं [2]नावगम्यते अत एव बादरेरेषा भ्रान्तिः द्रव्यगुणसंकारेष्वेव शेषत्वमिति। श्रुत्यादीनां तत्र द्रव्यादौ संभवात् उपादानाधिकारयोः सामर्थ्यमपश्यतोऽवधारणात्। एतच्च ब्रुवता बादर्यधिकरणं चतुर्थाध्याये सङ्गतमपि [3]व्यवधाननिराकरणाय तृतीय एव कृतमित्युक्तम्। यत एव श्रुत्यादिनिबन्धनमिदं न भवति शेषत्वं अत एवेदं लक्षणान्तरमित्युच्यते शेषावगमतुल्यत्वेपि।

एकनिष्पत्तेः। अतः प्रभृतीदानीं केवलोपादानव्यापार एव केवला प्रयुक्तिरेव चिन्त्यते। शेषता तु विनियोगत एव नोपादानतः। पूर्वपक्षवादी तु केवलोपकारदर्शनादेवोपादानमाह, न शेषताऽपेक्षणीयेति मन्यते। यथैवोपादानशेषेषु पश्वेकत्वादिषु।

---

(1) G. श्रुत्यादिभिः सर्वस्य पारार्थ्यं शक्यते (2) G. चावगम्यते (3) G. अवधारण

तस्मादुभयं प्रयोजकमिति। अत्राभिधीयते—नात्र प्रयोजकत्वं वाजिनस्य। कुतः? शेषभूतस्य हि प्रयोजनाकाङ्क्षा। सा च यस्य शेषभूता तेनैव प्रयोजनेन निवृत्तेर्न प्रयोजनान्तरं प्रयोजकत्वेनापेक्षेत। कथं तर्हि अशेषभूतस्योपादानशेषत्वं, एकत्वादेः अशेषभूतस्य प्रयोजनाकाङ्क्षैव नास्तीति। अशेषत्वे उपादानस्यैवानुपपत्तेः। अत्रोच्यते—शेषस्यावगमात् अन्यथानवगमात् अवगमपूर्वकत्वाच्चोपादानस्य। किं च शेषभूतस्य प्रयोज्यत्वान्यथानुपपत्तेः। न ह्यनवच्छिन्नमुपादातुं शक्यत इत्युक्तम्।

अस्यार्थः—दध्यानयनमामिक्षाया वाजिनस्य चोपकारकम्। यदि परमामिक्षां प्रति शेषः उपकारनिबन्धना च प्रयुक्तिः न शेषत्वनिबन्धना, एकत्वादीनां प्रागशेषभूतानामप्युपादानेनैव [1]शेषता यतः, तस्मादुभयं प्रयोजकमिति। अत्राभिधीयते—नात्र प्रयोजकत्वं वाजिनस्य। कुतः? शेषभूतस्य हि प्रयोजनाकाङ्क्षा। सा च यस्य शेषभूता तेनैव प्रयोजनेन निवृत्तेति न प्रयोजनान्तरं प्रयोजकत्वेन कल्पयितुं शक्यते। अस्यार्थः—शेषभूतं दध्यानयनं केन प्रयोजनेन प्रयुज्यतामिति प्रयोजकविशेषाकाङ्क्षा। तत्र यस्यैव पयसः शेषभूतं तदेव प्रयोजकं युक्तम्। शब्दतः तत्संबन्धित्वेनावगमात्। आमिक्षा च पयः तस्यामेव तद्रसप्रत्यभिज्ञानात्। एतच्च विवरणपञ्जिकायां वक्ष्यामः। तेन सैव प्रयोजिका न वाजिनमिति सिद्धम्। कथं पुनः अशेषभूतस्योपादानशेषत्वमेकत्वादेः। अशेषभूतस्य प्रयोजनाकाङ्क्षैव नास्तीति। कथमशेषभूतस्यैकत्वादेः उपादानशेषत्वं अशेषत्वे उपादानस्यैवानुपपत्तेः। अत्रोच्यते—शेषस्यावगमात् शेषभूतं हि यत् पश्वादि तदेकत्वशून्यं नावगतमिति न तद्रहितमुपादीयत इति। अन्यथाऽनवगमात् अवगमपूर्वकत्वाच्चोपादानस्य। किञ्च शेषभूतस्य प्रयोज्यत्वान्यथानुपपत्तेः शेषभूतस्य हि पशोः प्रयोज्यत्वमन्यथा नोपपद्यते। कस्मात्? न हि अनवच्छिन्नमुपादातुं शक्यत इत्युक्तम्। न हि सङ्ख्यानवच्छिन्नमुपादातुं शक्यत इति शेषोपादानार्थमशेषस्याप्युपादानं

---

(1) G. शेषकार्यतः

यत्पुनर्न शेषभूतं न च शेषस्थमवगम्यते न शेषोपादानेनापेक्ष्यते न तत् प्रयोज्यं भवितुमर्हति। यथा न दध्यानयनं न वाजिनशेषभूतं तथा प्रदर्शितं भाष्ये। तथा च लिङ्गं प्रदर्शितम्।

॥ १० ॥ पदकर्माप्रयोजकं नयनस्य परार्थत्वात् ॥ २५ ॥

कः पुनराधस्त्येनाधिकरणेनास्य विशेषः? अयमस्ति विशेषः तत्र हि दध्यानयनं आमिक्षानिर्वृत्तिसमकालमेव वाजिनमनुनिष्पादयति। अतो युक्तं वाजिननिष्पत्तेः न कारणान्तरापेक्षा। [इह पुनः सप्तमं पदं इत्युक्ते भवत्याकाङ्क्षा कस्येति। प्रकृतत्वादेकहायन्या इति गम्यते।

यत्पुनः न शेषभूतं न च शेषस्थमवगम्यते तेन विनापि शेषत्वावगमात् न शेषोपादानेनाप्यपेक्ष्यते तेन विनापि शेषोपादानसिद्धेः न तत् प्रयोज्यं भवितुमर्हति यथा दध्यानयनं न वाजिनस्य शेषभूतं तथा प्रदर्शितं भाष्ये। तथा च लिङ्गं प्रदर्शितम्।

पदकर्माप्रयोजकम्। कः पुनराधस्त्येनाधिकरणेनास्य विशेषः। यथैव हि आमिक्षाशेषभूतं दध्यानयनं तयैव प्रयुज्यते न वाजिनेन, तथा क्रयशेषभूता एकहायनी तदानयनमपि तन्मुखेन क्रयशेषमेवेति क्रयेणैव प्रयोक्तव्यं न पदपांसुभिः। अयमस्ति विशेषः—तत्र हि दध्यानयनमामिक्षानिर्वृत्तिसमकालमेव वाजिनं निष्पादयति। अतो युक्तं वाजिननिष्पत्तेः न कारणान्तरापेक्षा। अस्यार्थः—यद्यपि दध्यानयनमामिक्षाशेषभूतं तथापि यदि वाजिनमपि तथा भेदेन निष्पद्यते तदा कारणापेक्षायां प्रकृतं दध्यानयनं तत्रापि कारणत्वेन विनियुज्येत। तच्चामिक्षैकनिष्पत्तिकमिति न युक्तस्तत्र कारणान्तरापेक्षया प्रकृतस्य दध्नो विनियोगः। इह पुनः सप्तमं पदमित्युक्ते भवत्याकाङ्क्षा कस्येति प्रकृतत्वादेकहायन्या इति गम्यते। भिन्ननिष्पत्तिकत्वादत्र कारणान्तरापेक्षायां एकहायनीमात्रं पदा-

तस्मादुभयार्थामेकहायनीं मन्यते। एवं प्राप्तेऽभिधीयते—सत्यं यदि कस्येत्याकाङ्क्षोपपद्यते अनिर्ज्ञातसंबन्धान्तरे संबन्धिन्युपदिश्यमाने भवत्याकाङ्क्षापूर्विका प्रज्ञा। यत्र पुनस्संबन्ध्यन्तरपूर्वक एवोपदेशः तत्र यथानिर्ज्ञातसंबन्धिपुरस्सर एवोपदेशः इति दर्शितमश्वप्रतिग्रहे। अतः क्रयार्थैवैकहायनी सप्तमपदसंबन्धिनीति न प्रयुज्यते। अत्र भाष्यम्–'प्रसङ्गमुपजीवता' इति। ननु चेदं प्रयोजनलक्षणम्। कः प्रसङ्गस्यावसरः? विद्यमाने हि प्रयोजकत्वे प्रसङ्ग उक्तः। इह तु प्रयोक्तृतैव नास्तीति। उच्यते—शास्त्रप्रसङ्गमङ्गीकृत्यैतदुक्तम्। न प्रयोगप्रसङ्गमित्यदोषः।

पेक्षितं संबध्यते इत्युभयार्थां क्रयपदपांस्वर्थां एकहायनीं मन्यते। एवं प्राप्तेऽभिधीयते। सत्यं यदि कस्येत्यपेक्षोपपद्यते। तदा तस्यामाकाङ्क्षायां स्वरूपमात्रेणैवैकहायनी संबध्येत न क्रयशेषभावेनेति भवेदुभयार्था एकहायनी। कस्येति पुनरिहाकाङ्क्षैव नास्ति यस्मात् अनिर्ज्ञातसंबन्ध्यन्तरे संबन्धिन्युपदिश्यमाने भवत्याकाङ्क्षापूर्विका प्रज्ञा। यत्र संबन्ध्यन्तरं पूर्वं प्रतीतं नास्ति तत्र आकाङ्क्षापुरस्सरा सम्बन्धिनि बुद्धिः आविर्भवति। यत्र पुनः संबन्ध्यन्तरपूर्वक एवोपदेशः तत्र यथावगमं संबन्धावगमात् यथा निर्ज्ञातसंबन्धिपुरस्सरमेवोपदेशः इति समर्थितमश्वप्रतिग्रहे। अतः क्रयार्थैव एकहायनी सप्तमपदसंबन्धिनीति न प्रयुज्यते क्रयार्थाया एव तस्याः प्रकृतत्वात् तथाभूतायाः संबन्धित्वेनावगतत्वात्। अत्र भाष्यं 'प्रसङ्गमुपजीवता' इति प्रसङ्गशब्दश्रवणात् आम्यतश्चोद्यम्। ननु चेदं प्रयोजकाप्रयोजकलक्षणम्; कः प्रसङ्गस्यावसरः। विद्यमाने हि प्रयोजकत्वे प्रसङ्ग उक्तः "एवमेव प्रसङ्गः स्यात् विद्यमाने स्वके विधौ" इति। इह प्रयोक्तृतैव नास्तीति। उच्यते—शास्त्रप्रसङ्गमङ्गीकृत्यैतदुक्तम् न प्रयोगप्रसङ्गमित्यदोषः। अस्यार्थः—अरुणयैकहायन्या पिङ्गाक्ष्या सोमं क्रीणातीति शास्त्रेण एकहायन्युपात्ता। सैव शास्त्रान्तरेपि संबध्यते सप्तमं पदं गृह्णातीति न पुनरनुष्ठानप्रसङ्गोऽयं भाष्यकारेणोक्त इत्यदोषः।

॥ ११ ॥ [1]अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तत्वात् तदर्थो हि विधीयते ॥ २६ ॥

'पुरोडाशकपालेन तुषानुपवपति' इति नात्र शास्त्रप्रसङ्गः संभवतीति प्रयोक्तृत्वं पूर्वपक्षवादी मन्यते तुषोपवापस्यापि न च नान्तरीयकः शक्य उपवापो वक्तुम् बाजिनवत्। तस्मादुभयं प्रयोजकमिति। अत्राभिधीयते —सत्यं विनियोगे नास्ति शास्त्रप्रसङ्गः। नापि नान्तरीयक-

---

अर्थाभिधानकर्म च भविष्यता। 'पुरोडाशकपालेन तुषानुपवपतीति नात्र शास्त्रप्रसङ्गः संभवतीति प्रयोक्तृत्वं पूर्वपक्षवादी मन्यते तुषोपवापस्यापि। न च नान्तरीयकः शक्य उपवापो वक्तुम बाजिनवत्। तस्मादुभयं प्रयोजकमिति। अस्यार्थः—'पुरोडाशकपालेन तुषानुपवपति' इत्यत्र पुरोडाशकपालस्य साक्षादेवोपादानं न पुनः प्रकृतत्वेन ग्रहणं यथैकहायन्याः। तेन स्ववाक्ये श्रुतं 'पुरोडाशकपालमुपवापेपि वाक्येन विनियुज्यते। ननु पुरोडाशकपालमिति पुरोडाशसंबन्धिकपालं श्रपणशेषमुच्यते। न चान्यशेषस्यान्यशेषत्वं संभवति। अन्यत्र व्यापृतस्येवान्यत्र व्यापारः। तत्कथमुपवापेपि वाक्येन विनियोगः। उच्यते—एकवाक्यता हि गुणप्रधानभावेन विना न निर्वहति। तत्र च तुषोपवापस्याग्न्यभिज्वलनार्थस्य न कपालं प्रति तावत् गुणतया संबन्धः। किन्तु कपालस्यैव तं प्रति। न च विनियुक्तविनियोगविरोधः अधिष्ठानलक्षणया विनियोगोपपत्तेः। विनियुक्तविनियोगविरोधो हि [2]प्रतिपत्तिविरोधः। स च यदि विनियुक्तेनैव रूपेण विनियोगोऽभ्युपगम्यते तदा स्यात्। यदा पुनः विनियोगोपलक्षितं द्रव्यमेव विनियुज्यते तदा नास्ति विरोधः। न च नान्तरीयकस्तुषोपवापः येन कारणान्तरापेक्षाभावात् विनियोगो न स्यात्। तस्मात् विनियोगाविशेषात् उभयं प्रयोजकमिति पूर्वः पक्षः। अत्राभिधीयते। सत्यं विनियोगे नास्ति शास्त्रप्रसङ्गः। नापि नान्तरीयक-

(1) P. 1212 (2) G. प्रतीति विरोधः

भावः। किन्तूपात्तस्यायं विनियोग इति नोपादानकल्पना क्रमते। तदिदमुक्तम्—"भविष्यता संबन्धोऽयं न भूतवर्तमानाभ्यां" इति। यदि पुनः भूतवर्तमानाभ्यां संबन्धः किमुपादानं स्यात? उच्यते—न भूतस्य, तस्य भविष्यदर्थतया अनुपात्तस्यैव पालनं भविष्यति। पालनभूतमेवोपादानं यतः। वर्तमानस्यापि यः संबन्धी तस्यान्यत्र विनियोगो न संभवतीत्यर्थादन्यदुपादेयम्। भविष्यदर्थत्वे पुनः अन्यार्थमेवोपात्तस्य विनियोगः संभवतीति सिद्धमप्रयोजकत्वम्। तुषोपवापस्तु कर्तव्यो न कर्तव्य इति नास्याधिकरणस्यायं विषयः।

भावः। किन्तु उपात्तस्यायं विनियोगो नोपादानकल्पना क्रमते। अस्यार्थः—पुरोडाशकपालमिति पुरोडाशसंबन्धित्वेन कपालं लक्ष्यमाणं तदेव लक्ष्यते यस्यैव पुरोडाशसंबन्धाधिष्ठानता, यथा गङ्गया कूलं लक्ष्यमाणमपि स्वसंबन्धितयैव लक्ष्यते। तच्च कपालं श्रपणार्थमुपात्तं इत्युपात्तविषयोऽयं विनियोगः। अत आह—नोपादानकल्पना क्रमत इति। तदिदमुक्तं भविष्यतासंयोगोऽयं न भूतवर्तमानाभ्यामिति। भविष्यता संयोगे हि उपात्तविषयतैव। नोपादानावकाशोऽस्ति यदि पुनः भूतवर्तमानाभ्यां संबन्धः किमुपादानं स्यात् इति प्रश्नमात्रम्। "उच्यत" इत्युत्तरम्। न भूतस्य संबन्धी यः तस्य भविष्यदर्थतया अनुपात्तस्यैव पालनं भविष्यति पालनभूतमेवोपादानं यतः। वर्तमानस्यापि यः संबन्धी तस्याप्यन्यत्र व्यापृततयाप्यन्यत्र विनियोगो न संभवतीत्यर्थादन्यदुपादेयम्। भविष्यदर्थत्वे पुनः अन्यार्थमेवोपात्तस्य स्वीकृतस्य धारितव्यस्य विनियोगः संभवतीति सिद्धमप्रयोजकत्वम्। नन्वेवं सति यत्र पुरोडाशश्रपणं नास्ति विकृतौ तत्र कथमुपवापः पुरोडाशकपालं विना कार्य इति तत्राह—तुषोपवापस्तु कर्तव्यो न कर्तव्य इति नास्याधिकरणस्यायं विषयः। सर्वथाऽधिकरणसिद्धान्तसिद्धेः अग्निहोत्रहवणीन्यायेन कर्तव्य एवेति गम्यते।

॥ १२ ॥ पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् ॥ २७ ॥

अस्मिन्नधिकरणे हृदयाद्यवदानवचनं लोहितशकृत्संप्रव्याध-वचनं च तुल्यम्। प्रकृतपशुविषयतया 'अग्नीषोमीयं पशुमालभेत' इति द्वयोरपि प्रयोजकतां मन्यते पूर्वपक्षवादी।

अत्राभिधीयते—'हृदयस्याग्रेऽवद्यपि' इति यागोपसंहृतिरियम्। अङ्गैस्तृतीयसवन इति श्रवणात्।

पशावनालंभात्। अस्मिन्नधिकरणे हृदयाद्यवदानवचनं संप्रव्याधवचनं च तुल्यं प्रकृतपशुविषयतया 'अग्नीषोमीयं पशुमालभेत' इति द्वयोः प्रकृतग्रहणमिति पूर्वपक्षवादी द्वयोरपि प्रयोजकतां मन्यते। अस्यार्थः—अग्नीषोमीयं पशुमालभेतेति यद्यपि पशोरेवाग्नीषोमीयता आपातमात्रेण प्रतिभाति तथापि विशसनश्रवणात् पशोर्नेष्टत्वात् पशु-संबन्धिनां द्रव्याणामग्नीषोमीयता। शुक्लोहिते च पशुसंबन्धिनी एव। तेन तयोरपि देवतासंबन्धः। यागार्थद्रव्यप्रकृतिद्रव्यतया च पशोरग्नीषोमीयता। न चैवं वाच्यं हृदयाद्यर्थ एव पशुरिति। यस्मादुभयत्रापि प्रकृततया पशोर्ग्रहणम्। हृदयादिवाक्ये च न साक्षाच्छ्रवणमस्ति। देवतासंबन्धाच्च यागशेषभूतयोरेव लोहितशकृतोः निरसनसंप्रव्याधौ शेषप्रतिपत्तिभूतौ भविष्यतः। कथं तर्हि तयोः प्रयोजकताशङ्का। उच्यते—न निरसन-संप्रव्याधयोः प्रयोजकत्वमुच्यते। किन्तु लोहितशकृतोरेव। ते च यागार्थतया यागार्थ-प्रकृतिद्रव्यस्य पशोः प्रयोजके युक्ते एवेत्यदोषः।

अत्राभिधीयते—हृदयस्याग्रेऽवद्यतीति यागोपसंहृतिरियम्। अत्राभिप्रायः—सत्यं न पशोः साक्षाद्यागार्थता। किन्तु स्वसंबन्धिद्रव्योपकारकतया पशुसंबन्धिनामेव द्रव्याणां साक्षाद्यागार्थता। सा तु हृदयादिष्वेव उपसंहृता। अङ्गैस्तृतीयसवन इति श्रवणात्। एतदुक्तं भवति। अङ्गैरिति श्रवणात् अङ्गानां तावच्छेषताऽस्तीति निश्चीयते। तत्रापि हृदयादीनां प्राकृतकार्यावदानसंस्कारदर्शनात् यागकार्योपयोगितया

शाकृत्संप्रव्याधस्तु तावन्मात्रपर्यवसायित्वात् प्रकृताश्रयत्वाच्च। प्रतिपत्तिश्च न प्रयोजिका। न प्रतिपाद्यं प्रतिपत्त्यर्थमुपादीयत इति न्यायात्। अतो न प्रयोजकं पशोः शाकृतादीति।

॥ १३ ॥ एकदेशद्रव्यं चोत्पत्तौ विद्यमानसंयोगात् ॥ २८ ॥

ननु चात्र पूर्वपक्ष एव नोपपद्यते। उपात्तद्रव्यविषयत्वात् इक्षुखण्डवच्छेषावगतेः। सत्यमेवं, किन्त्वत्र पुरोडाशस्यान्यार्थत्वात् नान्यत्र कार्यान्तरे विनियोग उपपद्यत इति।

च तदुपपत्तेः। तेषामेव यागार्थता नापरेषां, पशुसंबन्धिनां लोहितशकृतादीनामनङ्गत्वाद्–हृदयादित्वाच्च। शकृत्संप्रव्याधस्तु तावन्मात्रपर्यवसायित्वात् निरसनसंप्रव्याधयोः स्त्यानरूपत्वेन कार्यान्तराननुप्रवेशात्। यागार्थप्रकृतपशुसंबन्धिसंपातायातप्रतिपत्त्यर्हद्रव्याश्रयत्वात् प्रतिपत्तिः। ननु सैव द्रव्यं प्रयोक्ष्यत इत्याशङ्क्य [1]प्रसिद्धं प्रतिपत्तेः द्रव्यप्रयोजकत्वासंभवं दर्शितवान्। प्रतिपत्तिश्च न प्रयोजिका 'न प्रतिपाद्यं प्रतिपत्त्यर्थमुपादीयते' इति न्यायात्। अतो न प्रयोजकं पशोः शकृतादीत्यधिकरणार्थोपसंहारः।

एकदेशद्रव्यं चोत्पत्तौ। ननु चात्र पूर्वपक्ष एव नोपपद्यते उपात्तद्रव्यविषयत्वात् 'उत्तरार्धात् स्विष्टकृते समवद्यति' इति (पुरोडाश) श्रुतेः उपात्तपुरोडाशविषय एवोत्तरार्धः प्रतीयते। स च कृतकार्यद्रव्यविशेष इति द्रव्यप्रतिपत्तिरियम्। न च प्रतिपत्तिः प्रयोजिका। कथं पुनः उपात्तद्रव्यविषया इत्याशङ्क्याह—इक्षुखण्डवच्छेषावगतेः। यथा 'इक्षुखण्डमस्मै प्रयच्छ' इति सन्निहितस्यैवेक्षोः खण्डः प्रतीयते, नासन्निहितस्य तथेहापीति सन्निहितपुरोडाशहुतशेषावगतेः उपात्तद्रव्यविषयता। सत्यमेवम्। किन्तु अत्र पुरोडाशस्यान्यार्थत्वात्। आग्नेययागार्थत्वात् नान्यत्र कार्यान्तरे स्विष्टकृद्यागे विनियोग उपपद्यते। यागार्थेन कार्यान्तरकरणे शिष्टाचारविरोधात्। प्रकृतत्वेन

---

(1) G. प्रतिषिद्धम्

अतो द्रव्यान्तरमुपादेयमिति पूर्वपक्षवादी मन्यते। राद्धान्तवादी तु न द्रव्यवदानमात्रोपसंहारः द्रव्यवदानमात्रेणैवाग्नेययागनिर्वृत्तिमुपसंहारमन्यत्र विनियोगोपपत्त्यर्थमुक्तवान्। यद्यन्यस्मै दीयते दीयमानं हि तदा संप्रदानार्थमिति तन्नोपपद्यते। तस्मान्न यागकार्यादन्यत्र विनियोगस्संभवति। यागकार्यतया पुनः नान्यार्थता शक्यते वक्तुम्। अतो नाग्नेयादिचोदनाया विरोधः। तस्मादप्रतिपक्षेक्षुखण्डन्यायेनानुपादानं सिद्धम् शेषदर्शनात् तथा समवदानश्रुतिरित्युक्तं भाष्ये।

॥ १४ ॥ [1]अभिघारणे विप्रकर्षादनुयाजवत्पात्रभेदः स्यात् ॥

ग्रहणेऽपि पुरोडाशकपालन्यायेन अधिष्ठानमात्रतयापि विनियोगानुपपत्तेः। अतो द्रव्यान्तरमुपादेयमिति पूर्वपक्षवादी मन्यते। राद्धान्तवादी तु न द्रव्यवदानमात्रोपसंहारः द्रव्यवदानमात्रेणैवाग्नेययागनिर्वृत्तिमुपसंहारमन्यत्र विनियोगोपपत्त्यर्थमुपन्यस्तवान् इति। अत्र कोऽभिप्रायः। अयमभिप्रायः—सत्यं द्रव्यवदानमात्रेणैव यागो निर्वर्तितः न पुनः पुरोडाशस्य तादर्थ्यं निर्वर्तितम्। यस्मात् द्रव्यवदानार्थमपि यागार्थमेव। तस्मादिदमुत्तरं दत्तवान्। सत्यम्। शिष्टाचारविरोधः स्यात् यद्यन्यस्मै दीयते दीयमानं हि तदा संप्रदानार्थमिति तन्नोपपद्यते। तस्मान्न यागकार्यादन्यत्र विनियोगस्संभवति। यागकार्यतया पुनः नान्यार्थता शक्यते वक्तुम्। आग्नेयादियागः कार्यो यस्य तस्य भावस्तत्ता तया नान्यार्थता शक्यते वक्तुम् यागार्था च प्रतिपत्तिः। तदीयद्रव्यप्रतिपादनद्वारेण देवदत्तशिरसोऽवतारितायाः स्रज इव शुचिदेशनिधानं देवदत्तार्थम्। अतो नाग्नेयादिचोदनाया विरोधः [1]अतोऽप्रतिपक्षेक्षुखण्डन्यायेनानुपादानं सिद्धम्। शेषदर्शनात् शेषात्स्विष्टकृते समवद्यतीति। तथा समवदानश्रुतिरित्युक्तं भाष्ये।

अभिधारणे। किं पुनः पुरोडाशकपालेनात्र विशिष्यते। अस्यार्थः—भवत्व-

---

(1) G. तस्मात्

किं पुनः पुरोडाशकपालेनात्र विशिष्यते ? द्रव्योपादानं तावत् तद्वन्नास्तीति स्थितमेव। धारणस्य तूपादानं हविषः प्राधान्यान्नान्यार्थतया विरुध्यत इति पूर्वः पक्षः। कथं पुनः हविषः प्राधान्यं द्वितीयाश्रवणादभिघारणस्य तदर्थत्वात् प्रयाजशेषस्य च पुरोडाशकपालवत् तदर्थत्वात्। सिद्धान्तस्तु न प्राधान्यं हविषां दृष्टार्थतयाऽऽज्यस्यैवेति युक्तम्।

भिघारणं प्रधानभूतानां हविषामर्थकर्म। तथापि प्रयाजार्थमुपात्तस्य शेषस्य श्रवणात् द्रव्यान्तरं नोपादेयम्। यथा पुरोडाशकपालेनेति श्रुतेः न कपालान्तरमुपादीयते अर्थकर्मत्वेऽपि। तस्मात् प्रयोजने विशेषाभावात नारब्धव्यमिदमधिकरणमिति। परिहरति—**द्रव्योपादानं तावत् तद्वन्नास्तीति स्थितमेव धारणस्य तूपादानं हविषः प्राधान्यान्नान्यार्थतया**[1] **विरुध्यत इति पूर्वः पक्षः।** अस्यार्थः—तत्र भविष्यदर्थत्वात कपालानामुपादानं धारणं च न प्रयुञ्जीतैवोपवापः; प्रयाजशेषस्य तु भूतप्रयोजनसंबन्धित्वात् यद्यपि कपालद्रव्यं नोपादेयं तथापि प्रयाजैः परिनिष्पन्नैः धारणस्याप्रयुक्तत्वात् अन्यार्थद्रव्यस्यापि अर्थकर्मपक्षे हविषां प्राधान्यात धारणप्रयुक्तिः न विरुध्यते। प्राधान्ये हि हविषो यदेव हविः नाभिघार्यते तस्यैव संस्कारपरिलोपः स्यादिति युक्तमेव धारणम्। तत्सिध्यर्थं च पात्रान्तरमुपादेयमिति।

कथं पुनर्हविषः प्राधान्यं द्वितीयाश्रवणादभिघारणस्य तदर्थत्वात् प्रयाजशेषस्य च पुरोडाशकपालवत् तदर्थत्वात्। न च विनियुक्तविनियोगविरोधः। [2]प्रयाजोपलक्षितद्रव्यस्याधिष्ठानरूपस्य पुरोडाशकपालवत् विनियोगोपपत्तेः **सिद्धान्तस्तु न प्राधान्यं हविषां दृष्टार्थतया आज्यस्यैवेति युक्तम्।** अस्यार्थः—यद्यपि हवींष्यभिघारयतीति श्रूयते तथापि हविषां प्राधान्यं न युक्तम् तदर्थत्वेऽभिघारणस्यादृष्टार्थत्वप्रसङ्गात। प्रयाजशेषस्यैव तु प्राधान्यं दृष्टार्थत्वात् पात्रे[3]विरिक्ते दृष्टं प्रयोजनं आज्यभागार्थेनासंस्पर्शः।

---

(1) G. नान्यार्थयाः (2) G. प्रयोजकोपल (3) G. पात्रेपि रिक्ते

तस्मात् प्रतिपत्तिरेवेयं प्रयाजशेषस्येति। कथं तर्हि हवींष्य-भिघारयतीति बहुवचनं एकेन हविषाऽभिघारणनिर्वृत्तेः। अगृ-ह्यमाणविशेषत्वात् बहुवचनमविरुद्धम्। अतो द्रव्योपादानवत् धारणोपादानमपि न युक्तं सन्निहित एव हविषि प्रतिपत्तिसिद्धेः इति।

ननु द्वितीयातृतीययोरन्यार्थता ग्रहीतुं न शक्या यथार्थतयापि वचनाविरोधात्। सत्यं, यद्यविरोधो वचनस्य स्यात्। इह तु

तस्मात् प्रतिपत्तिरेवेयं प्रयाजशेषस्येति। कथं तर्हि हवींष्यभिघारयतीति बहुवचनम्। एकेन हविषाऽभिघारणनिर्वृत्तेः। अस्यार्थः—यदि दृष्टार्थतया आज्यस्यैवेममभिघारणेन प्रतिपत्तिः तर्हि तस्या एकेनापि हविषा सिद्धत्वात् बहुवचनं कथमुपपद्यते। एकत्राभिघार्यमाणं सर्वमेवाभिघृतं स्यात्। न हि तदा द्रव्यस्य धारणं प्रयोक्तव्यम्। अभिघृतं च न हविरन्तरेऽभिघारयितुं शक्यते इति। अत्रोत्तरं—अगृह्यमाणविशेषत्वात् बहुवचनमविरुद्धम्। सत्यमेकेनापि हविषा प्रतिपत्तिः सिद्ध्यति। तत्तु न ज्ञायते 'किं तत्' इति। सन्ति चात्र बहूनि हवींषि। तस्मादभिघारणे बहुवचनमविरुद्धम्। पर्यायेण यत्र तत्र प्रतिपत्तिः करिष्यते अतो द्रव्यो-पादानवत् धारणोपादानमपि न युक्तम् सन्निहित एव हविषि प्रतिपत्तिसिद्धेरिति सिद्धान्तोपसंहारः।

ननु च द्वितीयातृतीययोरन्यार्थता ग्रहीतुं न शक्या, यथार्थतयापि वचना-विरोधात्। अस्यार्थः—न दृष्टार्थत्वमात्रबलेन विभक्तिद्वयस्यायथार्थत्वं कल्पयितुं शक्यं[1] यस्माद्विनियोगानुसारि प्रयोजनम्। तत्र यदि दृष्टं न संभवति मा सम्भवतु अदृष्टमेव प्रयोजनं विनियोगबलादाश्रयितुं न्याय्यम्। सत्यं यद्यविरोधो वचनस्य स्यात्। इह तु

(1) R. तस्मात्

प्रयाजशेषशब्देन विरुध्यते प्रतिपत्तौ पुनः नायं विरोध इति प्रातिपदिकार्थानुरोधिनी गुणभूतार्थवादिनी विभक्तिरिति युक्तम् । अत्राप्यन्यार्थतैव न्याय्या द्वयोः कर्मणोरेकस्मिन् वाक्ये संबन्धानुगुणः सप्तम्यर्थो द्रष्टव्यः । दर्शनमुक्तम् ।

॥ १५ ॥ [1]समानयनं तु मुख्यं स्याल्लिङ्गदर्शनात् ॥ ४० ॥

'अतिहार्येडो बर्हिः प्रति समानयते' इत्यत्र सन्देहः—किमुपरितनप्रयाजद्वयार्थमेवेदं समानयनं

प्रयाजशेषशब्देन विरुध्यते । अस्यार्थः—नह्यन्यार्थत्वेनान्यशेषतोपपद्यते विनियुक्तविनियोगविरोधात् । अथ माभूद्विनियुक्तविनियोगविरोध इत्यधिष्ठानमात्रं लक्ष्यते तथापि उपलक्षणमात्रं प्रयाजाः[2] स्युः पुरोडाशकपालवत् । यथा पुरोडाशकपाले उपलक्षणमात्रं पुरोडाशः तथा अत्रापि प्रयाजाः स्युः । न चैतद्युक्तम् , अनुपलक्षणार्थत्वे संभवति उपलक्षणमात्रत्वानुपपत्तेः पुरोडाशकपाले तु गत्यन्तराभावाद्युक्तम् । इह तु संभवति गतिः मुख्यप्रातिपदिकान्वयाहानात् तदाह—प्रतिपत्तौ पुनः नायं विरोध इति प्रातिपदिकार्थानुरोधिनी गुणभूतार्थवादिनी विभक्तिरिति युक्तमन्यार्थत्वम् , द्वितीयार्थे व्यत्ययेन तृतीयेति यावत् । स्थिते चात्र प्रातिपदिकानुरोधेन विभक्त्यर्थवर्णने पाशाधिकरणे उभयार्थानुग्रहाय उत्कर्ष आशङ्कितः प्रातिपदिकार्थलिङ्गबलीयस्त्वेन निराकृत इति । तृतीयार्थानवगमात् हवींषीत्यपि नाञ्जसोऽर्थः संभवतीति । अत्राप्यन्यार्थतैव न्याय्या द्वयोः कर्मणोरेकस्मिन् वाक्ये संबन्धात् । संबन्धानुगुणः सप्तम्यर्थो द्रष्टव्यः । दर्शनमुक्तम् ।

समानयनं तु मुख्यं स्यात् । अत्र भाष्यकारः 'किं समानयनमाज्यस्य धर्माणां चप्रयोजकं' इति विचारयति । तत्र कारणसन्देहं टीकाकारो दर्शयति—'अतिहार्येडो बर्हिः प्रति समानयते' इत्यत्र सन्देहः । किमुपरितनप्रयाजद्वयार्थमेवेदं समानयनं

---

(1) P. 1216 (2) प्रयाजस्य

तत्तश्चौपभृतस्याज्यस्य प्रयाजानूयाजार्थस्य तद्धर्माणां च प्रयोजकम्। उत मिश्रीकरणार्थमेवेदं जौहवसंस्कारार्थम्। ततश्च परप्रयुक्तद्रव्यसाध्यत्वात अप्रयोजकमाज्यस्य धर्माणां चेति। तत्र पूर्वपक्षवादी समानयनमात्रश्रवणात् मिश्रीकरणमात्रं मन्यते। अष्टावुपभृति गृह्णातीति च सर्वप्रयाजार्थतां मन्यते। कुतः ? विशेषाश्रवणात्। तस्माददृष्टार्थमेवेदं समानयनमिति।

एवं प्राप्तेऽभिधीयते— प्रयाजद्वयसाधनार्थमेवेदं समानयनम्। कुतः ? एवं दृष्टार्थता समानयनस्य भवतिउपभृति च प्रयाजार्थस्य ग्रहणस्य।

ततश्चौपभृतस्य आज्यस्य प्रयाजानूयाजार्थस्य तद्धर्माणां च प्रयोजकं उतमिश्रीकरणार्थमेवेदं जौहवसंस्कारार्थम्। ततश्च परप्रयुक्तद्रव्यसाध्यत्वादप्रयोजकमाज्यस्य धर्माणां चेति। तत्र पूर्वपक्षवादी समानयनमात्रश्रवणान्मिश्रीकरणमात्रं मन्यते, अष्टावुपभृति गृह्णातीति च सर्वप्रयाजार्थतां मन्यते। कुतः ? विशेषाश्रवणात् तस्माददृष्टार्थमेवेदं समानयनमिति। अस्यार्थः— उपरितनप्रयाजद्वयं यष्टुमित्येवं तावन्न श्रूयते तत्र न शक्यते तदर्थतैवेति वक्तुम्। यदि चौपभृतस्य ग्रहणस्योपरितनप्रयाजद्वयार्थता अवगता स्यात् तदा तस्मिन् यक्ष्यमाणे इदमपि समानयनं तदर्थमिति गृह्यतापि। न चैवं श्रूयते। किन्तु सर्वप्रयाजार्थता। सा च यद्यदृष्टार्थं समानयनं तदा संभवति मिश्रीकरणेन हि जौहवद्रव्यं संस्क्रियते। तच्च सर्वेषां कृतानां करिष्यमाणयोश्च इति तत्संस्कारार्थत्वाद्युक्ता सर्वार्थता। इतरथा तु द्वयार्थता स्यात् न च सा युक्ता। तस्माददृष्टार्थं समानयनम्। एवं प्राप्ते अभिधीयते। प्रयाजद्वयसाधनार्थमेवेदं समानयनम्। कुतः ? एवं दृष्टार्थता समानयनस्य भवति उपभृति च प्रयाजार्थस्य ग्रहणस्य। अस्यार्थः— यद्यपि समानयनमात्रं श्रुतं, तथापि प्रयोजनाकाङ्क्षायां चिकीर्षितप्रयाजद्वयनिर्वृत्तिरेव प्रयोजनं युक्तम् दृष्टार्थत्वात, न पुनः अदृष्टसंस्कारः प्रमाणाभावात। दृष्टेनैव निराकाङ्क्षत्वात्। तथोपभृति

ननु चाविशेषेण तदौपभृतं सर्वार्थं श्रूयते। श्रुतानुसारेण चादृष्टार्थता न्याय्या। नाविशेषश्रुतिः सामर्थ्येन विशेषेऽवस्थाप्यमाना शब्दार्थतां जहाति। तस्मात् शब्दस्याप्रतिरोधित्वात् दृष्टे संभवति अदृष्टकल्पना न न्याय्येति राद्धान्तदर्शनमुक्तम्।

॥ १६ ॥ तत्रोत्पत्तिरविभक्ता स्यात् ॥ ४२ ॥

कः पुनरत्र पूर्वपक्षवादिनोऽभिप्रायः? उभयमुभयार्थमिति वदतः इति। अयमभिप्रायः अविशेषेण श्रवणात्—चतुर्जुह्वां गृह्णातीति, विशेषतश्च कार्यसिद्धेः प्रयाजग्रहणमनूयाजवन्नित्यानुवादं मन्यते जौहवे।

च यद्ग्रहणं तदेव दृष्टार्थं भविष्यति अन्यथा [1]अदृष्टसंस्कारद्वारेण प्रयाजार्थत्वे [2]अदृष्टार्थं स्यात् ननु चाविशेषेण तदौपभृतं सर्वार्थं श्रूयते श्रुतानुसारेण चादृष्टार्थतापि न्याय्या। अत्रोत्तरं—नाविशेषश्रुतिः सामर्थ्येन विशेषेऽवस्थाप्यमाना शब्दार्थतां जहाति। यदि विशेषेऽवस्थाप्यमाना उपरितनप्रयाजद्वये सामान्या प्रयाज(द्वय)श्रुतिः शब्दार्थतां जह्यात् तदा अदृष्टमपि कल्प्येत। न चैवं, उपरितनमपि प्रयाजद्वयं प्रयाजशब्दवाच्यमेव। तस्मात् शब्दस्य अप्रतिरोधित्वात् दृष्टे संभवत्यदृष्टकल्पना न न्याय्येति राद्धान्तः। दर्शनमुक्तम्।

तत्रोत्पत्तिरविभक्ता स्यात्। ननु च जौहवस्य केवलप्रयाजार्थत्वश्रवणे उभयार्थता न युक्तेत्याह—कः पुनरत्र पूर्वपक्षवादिनोऽभिप्रायःउभयमुभयार्थमिति वदत इति। अयमभिप्रायः—अविशेषेण श्रवणात् चतुर्जुह्वां गृह्णाति इति। विशेषतश्च कार्यसिद्धेः प्रयाजग्रहणमनूयाजवन्नित्यानुवादं मन्यते जौहवे। यथोपभृति अनूयाजग्रहणं नित्यानु-

(1) G. दृष्ट (2) G. दृष्टार्थं

अत्रोच्यते—यद्युपादानत एव प्राप्तिः स्यात स्यादेतदेवं उपादानमात्रादुभयार्थताप्रतीतेः। एवं तर्हि अनूयाजमात्रार्थमेवौपभृतं भवतु। केवलानूयाजार्थश्रवणात्। उच्यते—प्राप्तार्थत्वादस्य विनियोजकस्य केवलानूयाजसंबन्धिनोऽनुवादं मन्यते। कुतः प्राप्तिः? प्रयाजानूयाजभ्यस्तद्गृह्णातीत्युभयार्थत्वात।

ननु समानयनाधिकरणे स्थिते कथमिदानीमाशङ्क्यते। तत्र हि उपरितनप्रयाजार्थमौपभृतं समानीयत इति वदता उभयार्थत्वमुक्तम्। कथं केवलानूयाजार्थता आशङ्क्यते। उच्यते—स्थिते एतस्मिन् तद्भवति अन्यथाऽदृष्टार्थमेव समानयनं संस्कारमात्रं स्यात्।

वादः तथा जौहवे प्रयाजग्रहणमपि स्यात। अथ केवलप्रयाजश्रवणात् प्रयाजार्थता [1]तर्हि औपभृतस्य केवलानूयाजश्रवणात् अनूयाजार्थतैव स्यादिति प्रतिबन्धेन पूर्वः पक्षः। अत्रोच्यते—यद्युपादानत एव प्राप्तिः स्यात्, स्यादेतदेवं उपादानमात्रादुभयार्थता प्रतीतेः। यावता विनियोगानुसार्युपादानमित्युक्तम् विनियोगश्च प्रयाजविनियोगमात्रार्थ एव जौहवः। इदानीं पूर्वोक्तप्रतिबन्धाशयमाविष्करोति—एवं तर्हि अनूयाजार्थमेवौपभृतं भवतु केवलानूयाजार्थश्रवणात्। उच्यते—प्राप्तार्थत्वादस्य विनियोजकस्य केवलानूयाजसंबन्धिनोऽनुवादः मन्यते। कुतः प्राप्तिः? उत्तरं—प्रयाजानूयाजेभ्यस्तद्गृह्णातीत्युभयार्थत्वात्। ननु समानयनाधिकरणे स्थिते कथमिदानीमाशङ्क्यते। तत्र हि उपरितनप्रयाजार्थमौपभृतं समानीयत इति वदता उभयार्थत्वमुक्तम्। कथं केवलानूयाजार्थता शङ्क्यते। उच्यते—स्थित एतस्मिंस्तद्भवति। अन्यथाऽदृष्टार्थमेव समानयनं संस्कारमात्रं स्यात्। अस्यार्थः—अस्मिन्नधिकरणे उभयार्थत्वे स्थिते तत्र सिद्धान्तलाभः अन्यथा केवलानूयाजार्थत्वे औपभृतस्य समानीयमानस्य प्रयाजार्थत्वानवगमात जौहवमेव सर्वप्रयाजार्थं स्यात्। ततश्चार्थादहृष्टार्थं समानयनं संस्कारमात्रं स्यात। यत एवैत(क)-

---

(1) G. नहि

॥ १७ ॥ [1]तदष्टसङ्ख्यं स्यात् ॥ ४६ ॥

अष्टावुपभृति गृह्णाति इति श्रूयते। अत्र संशयः किं द्वे एते चतुर्गृहीते उताष्टगृहीतमेकमेवेदमिति। ननु समानयनाधिकरण इदमुक्तम् द्वौ प्रयाजौ यष्टुमेकमिदं चतुर्गृहीतं समानीयत इति। कया युक्त्या? एवं च दृष्टार्थता भविष्यतीत्यनया युक्त्येत्यर्थः। तदेवेदमाक्षिप्यते। अष्टसङ्ख्याश्रवणात्। दृष्टार्थता च समानयनस्योपपद्यत एव आघारे प्राचीने प्रयाजत्रये च व्यापृतस्य जौहवस्याज्यस्य स्वकार्यं प्रत्यशक्तस्यानुग्रहाय समानीयत इति। अतोऽत्र

सिन्नधिकरणे स्थिते तदधिकरणसिद्धान्तलाभः, अत एवैवं च समानयनं दृष्टार्थं भवतीतीहोपन्यासः।

तदष्टसङ्ख्यं श्रवणात्। अत्र भाष्ये किमौपभृतमष्टसङ्ख्येन ग्रहणेन संस्क्रियते उत चतुस्संख्या गुणभूता द्वयोर्ग्रहणयोरिति संशयोऽस्ति। तत्र फलसंशयं टीकाकारः करोति —अष्टावुपभृति गृह्णातीति श्रूयते। अत्र संशयः किं द्वे एते चतुर्गृहीते उताष्टगृहीतमेकमेवेदमिति। ननु समानयनाधिकरणे इदमुक्तं द्वौ प्रयाजौ यष्टुमेकमिदं चतुर्गृहीतं समानीयत इति। कया युक्त्या? एवं च दृष्टार्थता भविष्यतीत्यनया युक्त्येत्यर्थः तदेवेदमाक्षिप्यते अष्टसंख्याश्रवणात्। अस्यार्थः—यदि द्वे चतुर्गृहीते प्रयाजानुयाजार्थे उपभृति स्यातां तदा यदेवात्र प्रयाजार्थं तस्यैव तत्समानयनं च यदि भवति तदा दृष्टार्थता भवति इति समानयनाधिकरणसिद्धान्तो भवति। यदा पुनः अष्टगृहीतमेकमिदं तदा यत्समानीयते तन्मात्रस्य प्रयाजार्थताऽनवगता। यावतश्चाष्टगृहीतस्यावगता न तावत्समानीयत इति नोपरितनप्रयाजार्थमिदं समानयनं स्यात्। नन्वेवमदृष्टार्थं समानयनं स्यादित्यत्राह —दृष्टार्थता च समानयनस्योपपद्यत एव। आघारे प्राचीने प्रयाजत्रये च व्यापृतस्य जौहवस्याज्यस्य स्वकार्यं प्रत्यशक्तस्यानुग्रहाय समानीयत इति। अतोऽत्र

(1) Bh. P. 1222

पूर्वपक्षवादी श्रुतत्वादष्टसङ्ख्याकमेव ग्रहणमिति मन्यते। राद्धान्तस्तु भिन्नविषयत्वात् चतुस्सङ्ख्याष्टसङ्ख्ययोः नान्यतरस्याप्राप्तिः शक्यते वर्णयितुम् अविरोधात्। कथं पुनरष्टसंख्या चतुस्सङ्ख्यां निष्पादयति होमे ? यस्माद्द्वे एते चतुर्गृहीते संयोगिनी, प्रयाजानूयाजेभ्य इत्युभयार्थत्वेन विनियोगात्। उभयोश्च द्वाभ्यां चतुर्गृहीताभ्यां प्रयोजनमष्टग्रहणेन संपाद्यते अष्टावुपभृति गृह्णातीति। द्वे एते चतुर्गृहीते इति दर्शनं च पूर्ववत् समर्थितं भवति। चतुर्गृहीतान्याज्यानि भवन्तीति हेतुवन्निगदश्च समर्थितो भवति।

इति बृहत्यां चतुर्थाध्यायस्य
प्रथमः पादः

पूर्वपक्षवादी श्रुतत्वादष्टसङ्ख्याकमेव ग्रहणमिति मन्यते। राद्धान्तस्तु भिन्नविषयत्वात् चतुस्सङ्ख्याष्टसङ्ख्ययोः नान्यतरस्याप्राप्तिः शक्यते वर्णयितुम्। अस्यार्थः—चतुरवत्तं जुहोतीति होमे चतुस्सङ्ख्या श्रूयते। 'अष्टावुपभृति गृह्णाति' इति च अष्टसङ्ख्या ग्रहणे। तेन भिन्नविषयत्वात् विरोधाभावात् उभयमपि विनियुज्यते। न च होमार्थत्वाद्ग्रहणस्य तुल्यार्थतां प्राप्य विरोधो वक्तुं शक्यते, यस्मात् ग्रहणेऽष्टसङ्ख्या श्रुता होमे चतुस्सङ्ख्यानिष्पादकतया शक्यते वक्तुमिति अविरोधात् नान्यतरस्याप्राप्तिः। कथं पुनः अष्टसङ्ख्या चतुस्सङ्ख्यां निष्पादयति। उत्तरं—होमे यस्मात् द्वे एते चतुर्गृहीते संयोगिनी प्रयाजानूयाजेभ्य इत्युभयार्थत्वेन विनियोगात्। उभयोश्च द्वाभ्यां चतुर्गृहीताभ्यां प्रयोजनमष्टग्रहणेन संपाद्यते। अष्टावुपभृति गृह्णातीति। द्वे एते चतुर्गृहीते इति दर्शनं च पूर्ववत् समर्थितं भवति। यद्दर्शनं चतुर्गृहीतबहुत्वस्य यत् तत्समर्थितं भवति प्रयोजनं च पूर्वोक्तं समानयनस्य[1] समर्थितं भवति ततश्चाञ्जसमेव दृष्टार्थत्वं भवेत्।

(1) G. समानयनं च

अन्यथा कथञ्चित् अल्पद्रव्यानुग्राहकत्वेन स्यात् अनूयाजाभावे चानूयाजार्थैकचतुर्गृहीताभावे चतुर्गृहीतद्रव्यार्थाया अष्टसङ्ख्याया अनुपयोगाच्च। चतुर्गृहीतान्याज्यानि भवन्तीति हेतुवन्निगदश्च समर्थितो भवति।

इति श्रीशालिकनाथमिश्रकृतायां ऋजुविमलायां
पञ्चिकायां चतुर्थाध्यायस्य
प्रथमः पादः

चतुर्थाध्यायस्य द्वितीयः पादः ॥

॥ १ ॥ स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ॥ १ ॥

एकमत्राधिकरणं वाक्यान्तराभिप्रायेण वर्णितम्। द्वितीयन्त्वेकवाक्यमङ्गीकृत्य। युक्तयश्चैकवाक्यविचारे वाक्यान्तरापेक्षिण्यां च मीमांसायां तुल्या इति प्रदर्शितम्। युक्तिश्च श्रुत्या विधानम्।

ऋजुविमलायां

चतुर्थाध्यायस्य द्वितीयः पादः

स्वरुस्त्वनेकनिष्पत्तिः। नन्वत्र एक एव विषयः संशयो विचारः निर्णयः प्रयोजनं चाधिकरणद्वयेऽपि दृश्यत इति कथमधिकरणभेदः तत्राह—**एकमत्राधिकरणं वाक्यान्तराभिप्रायेण वर्णितम्। द्वितीयस्त्वेकवाक्यमङ्गीकृत्य। युक्तयस्त्वेकवाक्यविचारे वाक्यान्तरापेक्षिण्यां च मीमांसायां तुल्या इति प्रदर्शितम्।** अस्यार्थः—प्रथमेऽधिकरणे 'यूपस्य स्वरुं करोति' इति 'स्वरुणा पशुमनक्ति' इति च वाक्यद्वयमुदाहृत्य चिन्तितम्। किं किं—पूर्वकमिति। किं यूपस्य स्वरुं करोतीत्येतत्पूर्वकमिदं स्वरुणा पशुमनक्तीति, अथ वा विपरीतमिति। तत्र पूर्वपक्षवादी यूपस्य स्वरुं करोतीत्येतत्पूर्वकं स्वरुणा पशुमनक्तीत्याह—**युक्तिश्च श्रुत्या विधानम्** यदि स्वरुकर्तव्यता विधीयते श्रुत्या विधानं भवति इतरथा वाक्येन विधानं स्यात्। यदा हि स्वरुणा पशुमनक्तीति विनियोगः पूर्वभावी स्यात् तदा अञ्जनकार्यकारितयैव स्वरुशब्दो वर्तते तदा च यूपस्य स्वरुं करोतीत्यस्य वचनस्यायमर्थः संपद्यते—योऽसावञ्जनकार्यकारितया प्राप्तः स्वरुः स यूपस्य ग्रहीतव्य इति। एवं च यूपसंबन्धविधिपरत्वाद्वाक्यस्य वाक्येन विधानं स्यात्। श्रुतिश्च वाक्याद्बलीयसी ततश्च स्वरुकर्तव्यतैव विधीयते। यूपस्येति यूपकाष्ठस्य खदिरादेरित्यर्थः। तथा च जोषणादिकमपि स्वरूत्पादकतया संबध्यते। नन्वेतदयुक्तम् यस्मात् 'यूपं जोषयति' 'यूपं छिनत्ति'

'यूपं तक्षति' इति यूपसंबन्ध एव जोषणादेरवगम्यते न स्वरुसंबन्धः। उच्यते—यूपं जोषयतीत्यादेरयमर्थः खदिरादि जोषयति यूपं कर्तुं इति, न पुनः प्राक्सिद्धं यूपं जोषयतीति। तत्र च नापरं यूपं कर्तुमिति विशेषणं विवक्षितुं न्याय्यम् वाक्यभेदप्रसङ्गात्। किन्तु कार्यार्थत्वात्संस्कारस्य[1] कार्यद्वयस्य यूपस्वर्वात्मकस्यैकैकस्य प्रकृतित्वात् तदर्थमेव जोषणादिकं खदिरादेरवगम्यते। अतश्च यूपशब्दः प्रकृतकार्यप्रदर्शनार्थ एव स्यात्। तेनायमर्थः संपद्यते—जोषणादिभिः खदिरादयो यूपीभवन्ति स्वरुभवन्ति चेति। अत्र च पक्षे विशिष्टोत्पत्तिनिबन्धनः स्वरुशब्दः। तेन स्वरुः पृथगुत्पत्तिं प्रयोजयतीति मन्यते। जात्यन्तराशङ्कावचनमप्येवमेवोपपद्यते। ततश्च यूपशब्दः प्रकृतकार्यप्रदर्शनार्थ एव स्यात् नान्यथेति। सिद्धान्ती तु स्वरुणा पशुमनक्तीत्येतत्पूर्वकमिदं यूपस्य स्वरुं करोतीति मन्यते, यस्मात् यूपस्य स्वरुं करोति इति यूपसंबन्धः स्वरुः श्रूयते।' न च यूपेन सह प्रकृतिविकारभावो घटते यूपनाशप्रसङ्गात्। न च यूपकारकाणि खदिरादीनि यूपशब्देन लक्षयित्वा [2]स्वरुप्रकृतिता यूपस्येति भविष्यतीति शक्यते वक्तुम्। लक्षणाप्रसङ्गात्। तस्माद्यूपशब्दस्य श्रौतान्वयपर्यालोचनया स्वरुणा पशुमनक्तीति विनियोगपूर्वकमिदं यूपस्य स्वरुं करोतीति। तत्र च पक्षे अञ्जनकारितयैव स्वरुत्वसिद्धेः स्वरुस्तावन्न कर्तव्यः किन्तु किमीयेन अञ्जनं कर्तव्यमित्यपेक्षायां यूपस्येति विधीयते[3] स कथं यूपस्य भवति यूपमनुनिष्पद्यत इति। ततश्च स्वरुकर्तव्यतायामचोदितायां खदिरादिसंबन्धं च[4] जोषणदिकं यूपस्यैव शेष इति यूप एव प्रयोजकः स्वरुस्त्वप्रयोजकः। शकलश्रुतेश्च स्वरुरेकदेशभूतः विद्यमाने चावयविनि नावयविनं प्रयुङ्क्ते। अस्मिंश्च पक्षे करोतिः उपादाने वर्तते उपादाने च करोतेः मुख्यार्थतैव यथा काष्ठान् कुर्विति। तदेवमिदमिह विचार्यते—किं श्रुत्यर्थविधानबलेन लक्षणाऽस्तु उत लक्षणापरिहाराय वाक्यार्थविधानमिति। तत्र पूर्वपक्षवादी श्रुतिविधानमेव बलीयः प्रत्यक्षत्वात् वाक्यस्य व्यवहितान्वये परोक्षं कल्पनीयमित्याह। राद्धान्ती तु स्यादेतदेवं यदि व्यवहितान्वयः स्यात्। किन्तु भावार्थ एव विधिः प्राप्ताप्राप्तविवेकेन गुणविधिरित्युच्यते। तेन वाक्यार्थविधानेपि व्यवहितान्वयो नास्तीति लक्षणा न न्याय्येति मन्यते। जात्यन्तराशङ्का तु प्रागेतस्मात् अनुनिष्पन्नग्रहण-

(1) R. संस्कार्यस्य (2) G. स्वरूप्रकृति (3) G. adds स कथं पूर्वस्येति विधीयते तया (4) G. न जोषणादिकार्योत्पत्तिः

॥ २ ॥ शाखायां तत्प्रधानत्वात् ॥ ७ ॥

किमर्थमिदमधिकरणमस्मिन् प्रयोजकाप्रयोजकलक्षणे ? नात्र विधितः पूर्वपक्षो राद्धान्तो वाऽवगम्यते। अत्रोच्यते—विधित एवेयं चिन्ता। किं वृक्षप्राग्देशात शाखोपादानमुत विहारप्राग्देशादानयनोपादानमिति।

विधिस्तुतये। प्रतियूपं स्वरुदर्शनं च लिङ्गमुक्तम्। द्वितीये त्वधिकरणे स्वरुणा पशुमनक्तीत्येतदेव वाक्यमुदाहृत्य चिन्तितम्। योऽयं स्वरुः अञ्जने विनियुज्यते स किं उत्पाद्यः उतोपादेय इति। तत्र तथैव श्रुतिविधानबलात् उत्पाद्य इति पूर्वः पक्षः। तथैव यूपसंबन्धस्योत्पादकतयाऽनुपपत्तेः यूपकाष्ठलक्षणायां च लक्षणैव दोषः। तस्माद्यूपानुनिष्पन्न एवोपादेय इति राद्धान्तः। अभ्युच्चययुक्तयश्च पूर्वोत्तरपक्षयोस्ता एव। आदाने च करोतेरपि प्रवृत्तिरिति तथैव राद्धान्त इति युक्तम्। युक्तयस्तुल्या उभयोरप्यधिकरणयोः। विषयभेदात् संशयप्रकारभेदाच्चाधिकरणभेदः। एतदुक्तं भवति—यदि वाक्यद्वयाङ्गीकारेण पौर्वापर्यविमर्शः क्रियते तथापि स्वरुरप्रयोजकः। अथ एकवाक्याश्रयणेनोपादानविमर्शः तथापि स्वरोरप्रयोजकतैवेति।

शाखायां तत्प्रधानत्वात्। किमर्थमिदमधिकरणमस्मिन् प्रयोजकाप्रयोजकलक्षणे ? नात्र विधितः पूर्वपक्षो राद्धान्तो वाऽवगम्यते। अस्यार्थः—यदि प्राचीशब्दो दिगभिधानं यदि वा शाखाभिधानं सर्वथा नात्रौपादानिकं चिन्त्यते। किन्त्वभिधानं तेनासङ्गतमिति। **उच्यते—विधित एवेयं चिन्ता।** औपादानिकानुष्ठानविशेषचिन्तेयमित्यर्थः। कीदृशी सेत्याह—**किं वृक्षप्राग्देशात् शाखोपादानं** सिद्धान्ते हि शाखावादे वृक्षस्य प्राग्देशमपेक्ष्य शाखोपादानं कार्यं प्राच्याश्शाखाया आहरणीयत्वात् वृक्षप्राग्देशादितीयं ल्यब्लोपे पञ्चमी। **उत विहारप्राग्देशादानयनोपादानमिति।** पूर्वपक्षे हि न शाखा प्राचीत्युच्यते किन्तु विहारदेशस्य प्राची दिक्। तां च देशद्वारेण शाखा आहर्तव्या। तेन शाखानयनमेव

विनियोगवदभिधानमनुवर्तते उपादानमिति पूर्वः पक्षः। राद्धान्तस्तु—अपरिहार्यलक्षणमिदमभिधानमिति शाखैवोपादेया प्राचीनानयनमेव देशविशिष्टम्। अयं चापरो विशेषः। अवश्योपलक्षयितव्या शाखा पक्षद्वयेपीत्ययमेव पक्षो न्याय्यः।

॥ २ ॥ शाखायां तत्प्रधानत्वात् ॥ ७ ॥

अत्र परिवासनोपादानं शाखोपादानं वा चिन्त्यते, अधि-

देशविशिष्टमुपादेयम्। विनियोगवदभिधानमनुवर्तते उपादानमिति पूर्वः पक्षः। यथा-विनियुक्तमेवोपादीयते नान्यत्। तथा अभिहितमेवोपादेयं तस्यैव विनियुक्तत्वात्। अभिधानं च मुख्यया वृत्त्या प्राच्या दिश एव न शाखायाः राद्धान्तस्तु अपरिहार्यलक्षणमिदम-भिधानमिति शाखैवोपादेया [1]प्राचीनानयनमेव देशविशिष्टं अस्यार्थः—प्राचीमाह-रतीति न तावत् दिगेवानेतव्या अशक्यत्वात्। दिशं तु प्रति किञ्चिदानेयम्। प्राचीमित्यकथितं कर्मेत्येतदपि न संभवति। न हि किञ्चित् साक्षाद्दिशं प्रत्यानीयते। किन्तु तद्देशं, तस्माद्दिगानयनोपदेशस्य देशानयनानुष्ठानपरत्वात् लक्षणा आवश्यिकी। दिगानयनं तु फलभूतत्वादनुपदेश्यम्। तस्मात्तात्पर्यवृत्त्या पूर्वपक्षेऽपि लक्षणैवेयमिति साक्षात्कर्मभूतां शाखामेव प्राचीशब्दो लक्ष्यतीति। अयं चापरो विशेषः अवश्योपलक्षयितव्या शाखा पक्षद्वयेऽपीत्ययमेव पक्षो न्याय्यः न हि प्रधानकर्मणा विना करणं प्रत्येतुमेव शक्यत इत्यवश्यं प्रधानकर्म निर्देष्टव्यम्। शक्नोति प्राचीशब्दः प्रकृतां प्राचीं शाखां लक्षणयोपस्थाप-यितुम्। अतः तत्पर एवायं प्राचीशब्दः। देशस्तु देवयजनस्थस्य[2] यजमानस्याधि-कृतत्वात् लब्ध इत्यलक्षणीय एवेत्यनवद्यम्।

शाखायां तत्प्रधानत्वात्। अत्र भाष्यं परिवासनोपादानमेव केवलं चिन्तयति। तदुपलक्षणमात्रमिति दर्शयति—अत्र परिवासनोपादानं शाखोपादानं वा चिन्त्यते अधि-

---

(1) G. प्राचीनतया नानयनं (2) G. देवयजनस्याधिकृतत्वात्

शेषात्। किं पुनरत्र युक्तम् ? उभयं परिवासनस्य प्रयोजकं मूलमग्रं च द्वयोरपि शाखाभिधानत्वात्। ननु च क्रियाद्वयमत्र श्रूयते परिवासयति करोति इति च। ततः किम्? इदं ततः भवति। शाखापरिवासनस्य कर्म करोतेरुपवेषः। तस्मान्नोपवेषः कर्मकारकस्य प्रयोक्ता। उच्यते —शाखाशब्दः समूलमग्रमाचष्ट इत्युक्तमस्माभिः। तत्र मूलमुपवेषं करोति। अग्रमपि कार्यान्तरे विनियुक्तमिति द्वयोः प्रयोजकत्वम्।

शेषात्। यदि हि परिवासनं उभाभ्यां मूलाग्राभ्यां प्रयुज्यते तदा शाखाहरणमपि उभाभ्यां प्रयुक्तमेव। अथ शाखोपादानं उभयप्रयुक्तं तदा परिवासनमपि उभयप्रयुक्तमेव। **किं पुनरत्र युक्तम्? उभयं परिवासनस्य प्रयोजकं मूलमग्रं च द्वयोरपि शाखाभिधानत्वात्।** अत्रायमभिप्रायः—प्राचीमाहरतीति याऽसौ शाखा वृक्षादाहृता सा तावत् मूलभागयुक्तैव शाखाशब्देनोच्यते। तस्याश्च छेदनं श्रूयते मूलतः शाखां परिवास्योपवेषं करोति इति। छेदनेन च न सा संस्क्रियते किन्तु द्विधाकृत्य आनाय्यते[1]। तेन शाखार्थं तावन्न छेदनं, किन्तु पृथग्भूतमूलाग्रभागार्थम्। न च तयोरपि प्रयोजनं नास्ति मूलेन कपालोपधानं करिष्यते अग्रेण वत्सापाकरणादि। तस्मादुभयार्थत्वादुभयं प्रयोजकं [यथा]परिवासनस्य तथा शाखाहरणस्यापीति। टीकार्थस्तु परिवासनस्य शाखाया वा मूलमग्रं च द्वयमपि प्रयोजकम्। प्रयोजकं चास्ति द्वयोरपीति। अवयवत्वेनावयविन्यां शाखायां स्थितयोः सहितयोः शाखाशब्दाभिधानात् इति। पूर्वपक्षं विवरीतुं चोद्यपूर्वकमाह—**ननु च क्रियाद्वयमत्र श्रूयते परिवासयति करोतीति च। ततः किं? इदं ततः। शाखा परिवासनस्य कर्म, करोतेरुपवेषः। तस्मान्नोपवेषः परिवासनस्य प्रयोक्ता।** अस्यार्थः—परिवासने शाखायाः कर्मत्वात् तत्संस्कारमेव छेदनं, न पुनरुपवेषार्थमिति कथमुपवेषः प्रयोक्तेति। **उच्यते—शाखाशब्दः समूलमग्रमाचष्टे इत्युक्तमस्माभिः। तत्र मूलमुपवेषं करोति अग्रमपि कार्यान्तरे विनियुक्तमिति द्वयोः प्रयोक्तृत्वम्।** अस्यार्थः—स मूलाग्राभिधा-

---

(1) R. नाय्यते

अत्रोच्यते—स्यादेतदेवं यदि मूलमुपवेषं करोतीति संबन्धः। कथं तर्हि संबन्धः? उपवेषं करोतीति मूलत इति। किमतो यद्येवं? एतदतो भवति। अन्यतो निष्पन्नान्मूलादुपवेष इति। तस्मात् यद्यपि समूलमग्रं शाखाशब्देनोच्यते तथापि न परिवासनमुपवेषार्थं इति सिद्धम्।

किं च शाखाशब्दाभिधानं च कार्यान्तरेषु अग्र एव प्रयुक्तं शाखया वत्सानपाकरोति इति। अतो विनियोगात मूलपरिवासनार्थोऽयमग्रे शाखाशब्दः प्रयुक्त इति।

यित्वाच्छाखाशब्दस्य तेनोद्दिश्य परिवासनविधानात् परिवासनेन चावयविनो विनाशात् न तदर्थता च्छेदनस्य। किंतु तन्निष्पाद्यार्थता निष्पाद्ययोश्चास्त्येवोपयोगः। तेनोभयं प्रयोजकमिति पूर्वोक्तमेव स्पष्टीकृतम्। अत्रोच्यते—स्यादेतदेवं यदि मूलमुपवेषं करोतीति संबन्धः। कथं तर्हि संबन्धः? उपवेषं करोतीति मूलत इति। अनेनै-तदाह—मूलतः शाखां परिवासयतीति। शाखापरिवासनार्थमेव मूलमुपात्तं, अव्यवहि-तत्वात न पुनः मूलतः उपवेषं करोतीति संबन्धः व्यवहितान्वयप्रसङ्गात्। पुनश्चोपवेषं करोतीत्यत्र किं तदित्यपेक्षायां मूलं संबध्यते। अन्यार्थमुपात्तमेव एकहायनीवत्। किमतो यद्येवं? एतदतो भवति। अन्यतो निष्पन्नान्मूलादुपवेष इति। अत्रायमा-शयः—[1]यदाऽनुनिष्पन्नमूलसाध्य उपवेषस्तदा मूलस्तावत् न प्रयुङ्क्ते अन्यत एव लब्धत्वात् स्वरुवत्। मूले चाप्रयुक्ते तदर्थं छेदनं शाखाहरणं च न प्रयुङ्क्त इति। उपसंहरति —तस्माद्यद्यपि शाखाशब्देन समूलमग्रमुच्यते तथापि न परिवासनमुपवेषार्थं इति सिद्धम्। किन्तु अग्रार्थमेव अग्रकर्मानुनिष्पन्नद्रव्यसाध्यत्वात्। किञ्च शाखाशब्दाभिधानं च कार्यान्तरेषु अग्र एव प्रयुक्तं शाखया वत्सानपाकरोतीति। अतो विनियोगान्मूलपरिवासनार्थोऽयमग्रे शाखाशब्दः प्रयुक्त इति। अपि च यदि शाखा-

---

(1) R. शाखोपादानानुनिष्पन्न

तस्मान्नोपवेषः प्रयोजकः । प्रयोजनमुक्तम् ।

॥ ३ ॥ [1]हरणे तु जुहोतिर्योगसामान्यात् ॥ १० ॥

ननु चेदं हरणं प्रस्तरप्रतिपत्त्यर्थमेव ; यद्यपि हरतिः यजत्यर्थो मान्त्रवर्णिको देवताविधिः तथापि प्रतिपत्तिकर्मैवैतत् यथोत्तमः प्रयाजः । प्रतिपत्तौ च न द्रव्यस्य गुणभावः । ननु च यथोत्तमप्रयाजे आज्यं प्रतिपत्तावपि गुणभूतं तथात्र शाखापि भविष्यतीति चेत् ।

शब्दः समूलमग्रमभिदध्यात् तदा शाखाशब्दचोदितानि कार्याणि न स्युः । तथाऽग्रे च शाखया वत्सानपाकरोतीति मुख्यार्थः शाखाशब्दो न स्यात् । तथा छेदनेन शाखाविनाशश्च स्यात् । न चैतदस्ति । तस्माच्छाखाशब्दोऽयमग्रार्थ एव । तस्यैव चायं मूलच्छेदनेन संस्कारः तदेव चाग्रं वृक्षादानीयते संपातात्तु मूलम् । छेदनेन च मूलभागाद्विभज्यत इति तदर्थमेव शाखाहरणं परिवासनं च । **तस्मादुपवेषोऽप्रयोजकः प्रयोजनमुक्तं** पौर्णमास्यामुपवेषस्याभाव इति ।

हरणे तु जुहोतिः । ननु चेदं हरणं प्रस्तरप्रतिपत्त्यर्थमेवेति पूर्वपक्षमाक्षिपति । तत्रायमर्थः–हरणं प्रतिपत्तिः, कथं तत्र शाखा गुणभूता भविष्यतीति । अत्रेदमाकूतम्–प्रस्तरप्रतिपत्त्यर्थमेवेदं हरणं प्रस्तरेण तुल्ययोगिनी च शाखा तेन सापि गुणभूता न युक्ता । नन्वेतद्धरणं याग एवेत्युक्तम् । कथमेतत् प्रतिपत्तिः इत्येतदभ्युपगच्छति— **यद्यपीति** । अभ्युपगम्यापि यागतां प्रतिपत्तित्वमाह— **यद्यपि हरतिर्यजतिः मान्त्रवर्णिको देवताविधिः तथापि प्रतिपत्तिकर्मैवैतत् यथोत्तमः प्रयाजः** स्वाहाकारं यजतीति । उत्तमशब्दः [1]त्रिप्रभृतीनामन्त्यमाह—**प्रतिपत्तौ च न द्रव्यस्य गुणभावः । ननु च यथा उत्तमे प्रयाजे आज्यं (प्रति)प्रतिपत्तावपि गुणभूतं तथाऽत्र शाखापि भविष्यतीति चेत्** इति । अत्रायं भावः–सहयोगनिबन्धना त.वदियं तृतीया न भवति । न हि शाखा प्रज्ञातप्रहरणसंबन्धा

---

(1) P. 1232 (2) G. तत्प्रभृतीनां

नैवम्। द्रव्यस्यात्र प्रतिपत्तिः। तत्र पुनर्देवतास्मरणार्थो याग इति युक्तो द्रव्यस्य गुणभावः।

ननु चोत्तमप्रयाजो नैव प्रतिपत्तिः द्रव्यं हि यत्र प्रतिपाद्यते तत्प्रतिपत्तिकर्म। केनेदमुक्तं कारकार्थो यो यागः प्रतिपत्तिकर्मेत्युच्यते क्वचिद्देशविरेचनात् संस्कारः, क्वचित् स्मरणमिति। प्रयोजनविशेषा ह्येते। अतो न शाखा गुणभूतेति शक्यते पूर्वपक्षयितुम्। उच्यते—प्रतिपत्तावेव तृतीयाश्रवणात् गुणभावं पूर्वपक्षवादी मन्यते, नावश्यं प्रतिपत्तौ सर्वमेव प्रधानं भवति। यद्यथा श्रूयते तत्तथैव भवितुमर्हति यथा जुह्वा जुहोतीति गुणभूतैव जुहूः।

राज्ञा सहाऽऽयाति राज्ञा सङ्गतः, इत्यत्र तु राज्ञा सिद्धेन[1] संबन्धः। तस्मात्कारकविभक्ति-रित्येवाश्रयणीयमिति। परिहरति—नैवं द्रव्यस्याप्यत्र प्रतिपत्तिः न च द्रव्यप्रतिपत्तौ द्रव्यस्य गुणभावः शक्यते प्रतिपत्तुमिति पूर्वोक्तमेवाकूतम्। तत्र पुनः देवतास्मरणार्थो याग इति युक्तो द्रव्यस्य गुणभावः तत्रेत्युत्तमे प्रयाजे इत्यर्थः। अत्र यत्पूर्वपक्षवादिना उक्तं--ननु यथा उत्तमप्रयाजे आज्यं गुणभूतं प्रतिपत्तावपीति तत्र प्रतिपत्तिशब्दश्रवणात् द्रव्य-प्रतिपत्तिरूपतापि विवक्षितैवेति मत्वा कश्चिच्चोदयति—ननु च उत्तमः प्रयाजो नैव प्रतिपत्तिः। द्रव्यं हि यत्र प्रतिपाद्यते [2]तत्प्रतिपत्तिकर्म तेन न प्रतिपत्तिरूपतेति। अत्रोत्तरं —केनेदमुक्तं प्रतिपत्तित्वं? नात्र प्रतिपत्तित्वं विवक्षितम्। किन्तु कारकार्थता विवक्षिता न पुनः प्रतिपत्तिरूपतेति। कारकार्थो यागः प्रतिपत्तिकर्मेत्युच्यते। अत्र कारकार्थत्वे क्वचिद्देश-विरेचनात् संस्कारः प्रस्तरप्रहरणे। क्वचित् स्मरणं उत्तमे प्रयाजे इति। प्रयोजन-विशेषा ह्येते। तस्मान्न दोषः। प्रकृतमाक्षेपमुपसंहरति—अतो न शाखा गुणभूतेति शक्यते पूर्वपक्षयितुमिति। उच्यते—प्रतिपत्तावेव तृतीयाश्रवणात् गुणभावं पूर्व-पक्षवादी मन्यते। नावश्यं प्रतिपत्तौ सर्वमेव प्रधानं भवति। यद्यथा श्रूयते तत्तथैव भवितुमर्हति यथा जुह्वा जुहोतीति गुणभूतैव जुहूः। अत्रायमभिप्रायः—हरणं तावत्

---

(1) R. adds आत्मगमन (2) G. तत्प्रतिपत्तिरूपमेवेति & adds तेन etc.

अत्राभिधीयते। भवेदेतदेवं यद्यत्र सहशब्दो न श्रूयते। सहशब्दश्रवणे तु तुल्ययोगित्वं प्रस्तरेण सह शाखाया अवगम्यते। तस्माच्छाखापि प्रतिपाद्यत एव। अन्यथा हि तुल्ययोगो न स्यात। अतश्शाखायामपि द्वितीयार्थ एव प्रस्तरवद्द्रष्टव्यः। कथं तर्हि तृतीया? न चेयं कारकलक्षणा किं तर्हि सहयोगलक्षणार्था। प्रसिद्धेन च सहयोगो लक्ष्यत इति विभक्तिव्यत्यय उक्तः। प्रसिद्धत्वात् प्रस्तरस्य प्रहरणे। शेषमुक्तम्।

प्रस्तरप्रतिपत्त्यर्थमेवावगतं, तत्र शाखया सहेति[1] श्रवणे पूर्वप्रसिद्धत्वेन सहार्थेऽनुपपन्नया तृतीयया कारकलक्षणया शाखाया गुणभाव एवोच्यते। सहशब्दश्च निपातत्वात् कथञ्चिदन्वयं नेयः। शाखा च जुहूवद्वा, अन्यथा वा कथञ्चिद्गुणभूतैवेत्यवगन्तव्यम्। **अत्राभिधीयते—भवेदेतदेवं यद्यत्र सहशब्दो न श्रूयते। सहशब्दश्रवणे तु तुल्ययोगित्वं प्रस्तरेण सह शाखाया अवगम्यत एव। तस्माच्छाखापि प्रतिपाद्यत एव। अन्यथा हि तुल्ययोगो न स्यात। अतश्शाखायामपि द्वितीयार्थ एव प्रस्तरवद्द्रष्टव्यः।** अस्यार्थः—सहशब्दस्तावत तुल्ययोगितां समभिव्याह्रियमाणयोरर्थयोराह। शाखाप्रस्तरौ चेह समभिव्याह्रियेते इति तयोः प्रहरणे तुल्ययोगिता। ननु च तृतीया नोपपद्यते। यदि नोपपद्यते मोपपादि। विभक्तीनां व्यत्ययस्यापि दर्शनात। एवंविध एव विषयो व्यत्ययस्य। सहशब्दस्य तु नार्थान्तरे दर्शनमिति तस्य बलीयस्त्वमिति। यदि शाखायामपि प्रस्तरेपि [इव]द्वितीयार्थ एव हरणकर्मत्वात् तर्हि द्वितीया प्राप्नोति तदाह—**कथं तर्हि तृतीयेति। न चेयं कारकलक्षणा किन्तर्हि? सहयोगलक्षणार्था।** अस्याथः—न क्रियापेक्षेयं विभक्तिः किं तर्हि? सहयोगापेक्षा। कथं तर्हि विभक्तिव्यत्ययो भाष्यकारेणोक्तः? तत्राह **—प्रसिद्धेन च सहयोगो लक्ष्यत इति विभक्तिव्यत्यय उक्तः। प्रसिद्धत्वात्प्रस्तरस्य प्रहरणे** तथेदमपि द्रष्टव्यम्। अप्रसिद्धत्वाच्छाखाया इति। तेनेयं वचनव्यक्तिः प्रस्तरेण सह शाखां प्रहरतीति। **शेषमुक्तम्।** सक्तुवैषम्यं प्रयोजनं चेति।

---

(1) G. श्रूयमाणया

॥ ५ ॥ [1]उत्पत्त्यसंयोगात्प्रणीतानामाज्यवद्विभागः स्यात् ॥ १४ ॥

अपः प्रणयतीति कार्यद्वयासंबन्धमपां प्रणयनमुत्पन्नम्। पश्चात्कार्यद्वयं श्रुतमित्यविशेषेण द्वयोः प्रयोक्तृतां मन्यते। ननु च 'अपो निनयति' इति द्वितीया श्रूयते। अनीप्सितत्वात् कारकमात्रे भविष्यतीत्यभिप्रायः। अत्रोच्यते— नानीप्सितत्वे हेतुरस्ति। कृतप्रयोजनमपि हि तत् प्रतिपाद्यतया इष्यत एव।

उत्पत्त्यसंयोगात्। **अपः प्रणयतीति कार्यद्वयासंबन्धमपां प्रणयनमुत्पन्नम्। पश्चाच्च कार्यद्वयं श्रुतमिति अविशेषेण द्वयोः प्रयोक्तृत्वं मन्यते।** अस्यार्थः—अपां प्रणयनोत्पत्तौ संयवनं निनयनं च कार्यं न श्रुतं पश्चात्तु द्वयं श्रूयत इति द्वयोरपि प्रयोजकतां मन्यते पूर्वपक्षवादी। **ननु च 'अपो निनयति' इति द्वितीया श्रूयते।** अस्यार्थः—द्वितीयाश्रवणादपां प्राधान्यम्। निनयनं च तत्प्रतिपत्त्यर्थमेव। संयवने तृतीयाश्रवणात् गुणभाव एवेति तदेव प्रयोजकमित्यभिप्रायः। अत्रोत्तरं—**अनीप्सितत्वात् कारकमात्रे भविष्यतीत्यभिप्रायः** इति। तथा युक्तं चानीप्सितमित्यनीप्सितकर्मणि द्वितीयेत्यर्थः। कथं पुनरनीप्सितत्वमुच्यते सर्वा एवात्र प्रतिपत्तयः उदाहरणम्। तत्रेदं चिन्त्यते किमुपयुक्तस्यापि द्रव्यस्य चिकीर्षितत्वं संभवति नेति। तत्र पूर्वपक्षवादी मन्यते द्रव्यं हि क्रियाया उपकरोति इति चिकीर्षितं भवति। यत्पुनः कृतप्रयोजनं तस्य किमर्था चिकीर्षा। तस्मादर्थकर्मैवेदं निनयनम्। तत्र चापां करणभूतानामपि क्रियाजन्यफलभागिता अस्तीति अनीप्सितकर्मतया तथायुक्तमिति द्वितीयेति। **अत्रोच्यते—नानीप्सितत्वे हेतुरस्ति कृतप्रयोजनमपि हि तत् प्रतिपाद्यतया इष्यत एव।** अत्राभिप्रायः—यद्यपि प्रतिपत्तिषु कृतप्रयोजनं द्रव्यं तथापि चिकीर्षा घटत एव—किमिदं संप्रति क्रियतां ? उपेक्ष्यतां, यदि वा तद्देशान्तरे त्यज्यताम् ? इति। एतत्तु लोकेऽपि प्रतीतमेव। तथा लोकवद्वेदेपि व्यवहारः तत्र यद्यस्य श्रूयते तत् [2]तत्सापेक्षं स्वीक्रियते। श्रूयते चात्रापां तावदन्तर्वेदिदेशनिनयनम्।

---

(1) P. 1235 (2) G. तस्यापेक्षितं

न चेप्सिते संभवति अनीप्सिताश्रयणमुपपद्यते तत्पुरस्सरावगतेः। तस्मात् संयवने कृतार्थानामपां प्रतिपत्तिरेव निनयनम्। इति सिद्धमप्रयोक्तृत्वम्।

॥ ६ ॥ [1]प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात् ॥ १६ ॥

मैत्रावरुणाय दण्डं प्रयच्छतीति प्रतिपत्तिरपामिवेति पूर्वः पक्षः। ननु च कर्मणा यमभिप्रैति स सम्प्रदानमिति सिद्धो गुणभावः

न च तदनुपयोगितया[2] न निर्वहति, कृतकृत्यसंस्कारस्यापि लोके दृष्टत्वात्। यथा देवदत्तशिरसोऽवतारितायाः स्रजः शुचिदेशनिधानम्। तत्र च देवदत्तसंस्कारमेव लौकिका मन्यन्ते। तथेहापि शेषिणः संस्कारो भविष्यतीति कल्प्यते। ननु चानीप्सितेऽपि क्रियाजन्यफलसंबन्धाव्यभिचारात् तावन्मात्रमेव द्वितीयार्थो न्याय्यः नेप्सितत्वं, व्यभिचारात्। ततश्च मुख्यार्थत्वे कुत एतदवगम्यते अनीप्सिते कर्मणि नेयं द्वितीयेति तत्राह—**न चेप्सिते संभवति अनीप्सिताश्रयणमुपपद्यते, तत्पुरस्सरावगतेः।** यद्यप्युभयत्र द्वितीया मुख्यार्था तथापि सर्वत्र क्रियायाः प्रयोजनाकाङ्क्षित्वात् तादर्थ्यं तावत् क्वचिद्वक्तव्यम्। तत्र यदेव तज्जन्यं दृश्यते तदेव प्रथमोपनिपातीति प्रयोजनमवभाति। यच्च प्रयोजनं तदेव तया क्रिययेप्सितमिति ईप्सितत्वमेव पूर्वावगम्यमानमपेक्षिततां यातीति तत्त्यागेन नापरं परिकल्प्यते तस्मात् तत्पुरस्सरं प्रथमं यस्याः [3]तादृश्या अवगतेः हेतोरित्यर्थः। **तस्मात् संयवने कृतार्थानामपां प्रतिपत्तिरेव निनयनमिति सिद्धमप्रयोक्तृत्वम्।**

प्रासनवन्मैत्रावरुणस्य। 'मैत्रावरुणाय दण्डं प्रयच्छति' इति **प्रतिपत्तिरपामिवेति पूर्वः पक्षः।** यजमानधारणे कृतार्थत्वात् दण्डस्य मैत्रावरुणधारणं प्रतिपत्तिरेव दण्डस्य द्वितीयानिर्देशात्। **ननु च कर्मणा यमभिप्रैति स संप्रदानमिति सिद्धो गुणभावः।**

---

(1) P. 1236 (2) R. न वा instead of तया (3) G. तस्याः तादर्थ्यावगतेः

ससंप्रदानके कर्मणि । सम्प्रदानगप्रीत्युत्पादकतयैव कर्मणो गुणभावः न पुनः कर्मान्तरसाध्यतया कर्मभावानुपपत्तेः । कथं तर्हि 'दण्डी प्रैषानन्वाह' इत्यादिदर्शनम् संप्रदाने यदृच्छया प्राप्तस्यायमनुवादः इत्यभिप्रायः ।

अत्राभिधीयते—मैत्रावरुणाय दण्डं इति व्यपदेशात् दण्डी प्रैषानन्वाह इत्येवमादि च दर्शनात् । अर्थकर्मैवेदं न प्रतिपत्तिः ।

ससंप्रदानके कर्मणि । अस्यार्थः—कर्मणेति करणभावस्मरणात् यत्र संप्रदानमस्ति तत्र कर्मणो गुणभावः । तेन न प्राधान्यं दण्डस्येति नेयं प्रतिपत्तिः । अत्रोत्तरं—**संप्रदानगप्रीत्युत्पादकतयैव कर्मणो गुणभावः । न पुनः कर्मान्तरसाध्यतया, कर्मभावानुपपत्तेः ।** अस्यार्थः—न दानं प्रतीदं करणं किन्तु संप्रदानप्रीत्युत्पत्तौ । यदि हि दानेऽपि करणता स्यात् तदा कर्मभावो न भवेत् । तस्मात् दानं प्रति कर्मत्वात् तत्प्रति प्राधान्यात् दानं प्रतिपत्तिरेव युक्तेति कर्मान्तरं दीक्षितधारणात् दानं तत्साध्यं यस्य तत् तथोक्तं तस्य भावस्तत्ता [1]तया पुनर्न गुणभावः । स्थिते पूर्वपक्षे चोदयति—**कथं तर्हि 'दण्डी प्रैषानन्वाह' इत्येवमादिदर्शनम् ?** अत्रायमभिप्रायः—यदीदं मैत्रावरुणाय दण्डदानं स्यात् तदा तादर्थ्यमेव दानस्य स्यात् । तच्च तादर्थ्यमेवं भवति यदि दीयमानो दण्डः कार्यं कुर्वाणस्य साहाय्ये वर्तते तेन [2]यावत्प्रधानं धारणमुपपद्येत । दण्डार्थे तु दाने मैत्रावरुणगमनमात्रेणैव कृतः शास्त्रार्थः इति दण्डो न धार्येत तदा तत्प्रैषेषु दण्डदर्शनं नोपपद्यत इति । उत्तरं—**यदृच्छया प्राप्तस्यायमनुवादः ।** यदृच्छया प्रयोजनान्तरनिरपेक्षं क्रियामात्रं लोके बहुलमुपलभ्यते [3]तथा धृतस्य दण्डस्येदं दर्शनं भविष्यति । न्यायतः प्रतिपत्तौ स्थितायामित्यर्थः । अत्राभिधीयते—**मैत्रावरुणाय दण्डं इति व्यपदेशात् दण्डी प्रैषानन्वाहेति च दर्शनात् अर्थकर्मैवेदं न प्रतिपत्तिः ।** अत्राभिप्रायः—द्वितीयातस्तावत् शब्दार्थतया तादर्थ्यमेव न प्रतीयते । किन्तु क्रियाजन्यफलभागिता । सापि मैत्रावरुणाय दण्डदाने न विरुद्धा ।

---

(1) R. तत्प्रत्ययः तेन न गुणभावः (2) G. यावत्प्रासनं (3) G. तद्वदेतस्येदं दण्डस्य

ननु च यदृच्छया प्राप्तस्यायमनुवाद इत्युक्तम्। अयमेव दोषः पाक्षिकत्वप्रसङ्गात्। कथं तर्हि द्वितीया ? तथा युक्तं चानीप्सित-मित्युक्तम्। तदयुक्तमिव प्रतिभाति। अनुपादेयं हि तत्रोदा-हरणम् अहिं लङ्घयति इति। तथा च सक्तुषु विभक्तिव्यत्यय उक्तः उपादेयत्वादनीप्सितत्वं न भवतीति। उच्यते—सुष्ठूक्तं सक्तुषु होमार्थं तत्रोपादानम्। इह तु न प्रयच्छत्यर्थमुपादानं उपात्तमेव हि प्रयच्छतीति। अतस्तथायुक्तमेवेदं कर्मेति शक्यते वक्तुम् नेप्सिततमम्। नापि विभक्त्यन्तरयोग्यम् तस्मादर्थ-कर्मेति सूक्तम्।

प्रथमावगतत्वेन तादर्थ्यस्वीकार इत्युक्तम्। स चाप्रतिपक्षे शब्दे। अत्र तु मैत्रावरुणाय दण्ड इति व्यपदेशो विरुध्यते। यस्मादत्र व्यपदेशे मैत्रावरुणप्राधान्यं प्रतीयते। इत्थं च तत्प्राधान्यं भवति यदि तदर्थं दानं, तथा च पूर्वोक्तनीत्या दण्डी प्रैषानिति च दर्शनात् अर्थकर्मताऽवसीयते। तस्मादनीप्सितद्वितीयेयमिति युक्तम्। ननु च यदृच्छया प्राप्त-स्यायमनुवाद इत्युक्तम्। अयमेव दोषः पाक्षिकत्वप्रसङ्गात् नित्यवच्छ्रवणविरोधः स्यात्। कथं तर्हि द्वितीया ? तथा युक्तं चानीप्सितमित्युक्तम्। तदयुक्तमिव प्रति-भाति। [1]अनुपादेयं हि तत्रोदाहृतम् अहिं लङ्घयति कण्टकान् मृद्नाति इति। उपादेयश्च दण्डो दातुं यजमानेनैव धार्यमाणत्वात्। प्रतिपत्तावेवानुपादेयत्वात्[2] द्वितीयोपपत्तिरिति भावः। तथा च सक्तुषु विभक्तिव्यत्यय उक्तः उपादेयत्वात् अनीप्सितत्वं न भवति। उपादेयं हि क्रियासिध्यर्थमीप्सितमेवेति। उच्यते—[3]सुष्ठूक्तं सक्तुषु, होमार्थं हि तत्रोपादानम् इह तु न प्रयच्छत्यर्थमुपादानम्। उपात्तमेव हि प्रयच्छति। अतस्तथायुक्तमेवेदं कर्म नेप्सितं नापि विभक्त्यन्तरयोग्यम्। यजमानधारणार्थमेव हि दण्ड उपात्तः प्रतीयत इत्यनुपादेयता। एतच्च परिहारविभवमात्रेणोक्तम्। परमार्थतस्तु यत्र सूत्रे अनीप्सित-शब्देन क्रियानिर्वर्त्यमभिप्रेतं न पुनस्तत्क्रियार्थत्वेन ह्यनुपात्तमनीप्सितं, न चात्र क्रियाया

(1) G. अनुवादोयं (2) यावदुपादेयत्वात् (3) R. युक्तं

किं पुनरत्र धारणमेव प्रयुज्यते उतोत्पत्तिरपीति चिन्तान्तरमेतत। अस्ति तावत् प्रयोक्तृत्वमिति राद्धान्तः। अधिकरणान्तरमुक्तम्।

॥ ८ ॥ [1]सौमिके च कृतार्थत्वात् ॥ २० ॥

कः पुनरत्र प्रयाजशेषेण विशेषः? ननु च प्रयाजशेषेणेति

दण्ड ईप्सितः प्रयच्छतेरर्थकर्मत्वात्। अत एव गां ददातीति [2]गोर्दानार्थत्वेनोपादानेऽपि द्वितीयोपपत्तिः। अत्रापि यद्यपि च दण्डस्योपादानं न प्रयुज्यते धारणं त्ववश्यं प्रयोक्तव्यं इत्युपादेयत्वमपरिहार्यम् सक्तुषु तु तथा युक्तता नास्तीति व्यत्यय उक्तः। यस्मात् न तस्मिन् भस्मीभावो होमात् किन्तु उपाधिभूतासेचनादिति द्वितीये दर्शितम्। **किं पुनर्धारणमेव प्रयुज्यते उतोत्पत्तिरपीति चिन्तान्तरमेतत्।** अस्ति तावत प्रयोक्तृत्वमिति राद्धान्तः।

उत्पत्तौ येन संयुक्तम्। अधिकरणान्तरमुक्तमिति। अस्यार्थः—इदमधिकरणं भाष्य एवोक्तम्। तत्र च सिद्धान्ते कृतार्थत्वाभिधानात पूर्वपक्षे अकृतार्थताऽभिमतेति गम्यते। पूर्वपक्षवादी एवं मन्यते सकलप्रयोगान्त एव कृतार्थता विषाणायाः। प्रयोगमध्ये पुनः कण्डूयनस्य संभवात अकृतार्थतया न प्रतिपत्त्यर्हा। तेन चात्वालप्रासनं न प्रतिपत्तिः किन्त्वर्थकर्मैवेदम्। उच्यते—नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीति श्रुतम्। तेन प्रागेव कण्डूयनं कृष्णविषाणया कार्यमिति राद्धान्तः। ननु [3]अविशेषश्रुतं कथं विशेषेऽवतिष्ठते। प्रतिपत्तिविधानादिति चेत न, इतरेतराश्रयापत्तेः। मैवम्। द्वितीयाश्रवणेन प्रतिपत्तेरन्यतस्सिद्धेः।

सौमिके च कृतार्थत्वात्। पूर्वपक्षमाक्षिपति—**कः पुनरत्र प्रयाजशेषेण विशेषः?** यथा प्रयाजशेषेणेत्यसत्यामपि द्वितीयायां प्रयाजशेषस्य प्रतिपत्तिः। एवमत्रापि यत्किञ्चित्सोमलिप्तं तेनावभृथं यन्तीति प्रतिपत्तिरेव युक्ता। समाधानमाह—**ननु च प्रयाजशेषेणेति**

---

(1) P. 1238 (2) G. गोदानमात्रबोधनेऽपि (3) G. अनन्वयशेषः श्रुतः

प्रयाजार्थताऽवगम्यते। सोमलिप्तेनेति कर्मार्थता(वगतिः) किमिति न विशेषः। उच्यते—सोमलिप्तेनेत्यपि सोमयागार्थतयैव सोमसंबन्धः। एवं तर्हि अवभृथश्रुतेः कर्मान्तरयोगं सोमलिप्तस्य मन्वानः शेषभावं मन्यते।

अत्रोच्यते—कर्मान्तरयोगेपि नान्यशेषोऽन्यशेषतया प्रतिपत्तुं शक्यते अन्यत्र व्यापृत इवान्यत्र। तस्मात्कर्मशब्दो लक्षणयैव प्रतिपत्तव्यः।

प्रयाजार्थताऽवगम्यते। सोमलिप्तेनेति कर्मार्थता। किमिति न विशेषः। प्रयाजशेषो नाम प्रयाजे व्यापृतस्याज्यस्य शेषः। न चातदर्थं तत्र व्यापृतमिति तादर्थ्यं तत्रावगम्यते। सोमलिप्तानां तु सोमलेपनमात्रं न तादर्थ्यमाक्षिपतीति पुनराक्षेपमुपोद्बलयति। उच्यते—सोमलिप्तेनेत्यपि सोमयागार्थतयैव सोमसंबन्धः। यस्य हि सोमयागार्थता स नियमेन तत्र व्याप्रियमाणः सोमलिप्तो भवति नान्यत् तेन प्रयाजशेषतुल्यतेति। एवं तर्हि अवभृथश्रुतेः कर्मान्तरयोगं सोमलिप्तस्य मन्वानः शेषतां मन्यते। अस्यार्थः—अवभृथशब्दस्तावत् प्रकृतत्वादवभृथस्य नान्यत्र वर्तते। तस्य च प्रधानकर्मत्वात् अभिघारणवत् सोमलिप्तार्थता न संभवति। न च गुणप्रधानभावमन्तरेण संबन्धः। तस्मात् पुरोडाशकपालवत् अधिष्ठानलक्षणया सोमलिप्तस्यैवावभृथशेषभावेन विनियोगः। एवं च तृतीया यथार्थैवेति। एवं चैष(एवं) वाक्यार्थो भवति—अवभृथं कर्तुं यदपोऽभ्यवयन्ति तत् सोमलिप्तेनेति। अत्रोच्यते—कर्मान्तरयोगेऽपि नान्यशेषोऽन्यशेषतया प्रतिपत्तुं शक्यते अन्यत्र व्यापृत इवान्यत्र। तस्मात्कर्मशब्दो लक्षणयैव प्रतिपत्तव्यः। अस्यार्थः—श्रौतसोमलिप्तार्थग्रहणे तावत् अन्यशेषः सोमयागशेषः अन्यशेषतया अवभृथशेषतया प्रतिपत्तुं न शक्यते(यथा) अन्यत्र व्याप्रियमाणमिवान्यत्र तेन च लक्षणया संबन्धः। तत्रापि चिन्ता —किं सोमलिप्तशब्दः अधिष्ठानलक्षणया वर्ण्यतां, उतावभृथशब्दो देशलक्षणयेति। श्रुत्यर्थ-

यन्तीति च प्रकृत्यर्थोऽन्तर्णीतणिजर्थो विहितो भवति। अन्यथाऽनुवादमात्रं धात्वर्थः स्यात्। तदिदमुक्तम्—"श्रुतिश्च वाक्याद्बलीयसी" इति।

॥ ९ ॥ कर्तृदेशकालानामचोदनं प्रयोगे नित्यसमवायात् ॥ २३ ॥

ननु चानुवादकत्वपक्षे अप्रतिपादकत्वात् वाक्यानर्थक्यमेव प्राप्नोति। न ब्रूमो विनियोगे आनर्थक्यमिति। विनियोगे इत्थमेव अन्वितो वाक्यार्थः प्रतीयते। प्रयोक्तृत्वं तु न संभवति। कथं न संभवति? नित्यप्राप्तत्वात् कारकग्रामस्य। द्रव्यस्य ह्यत्र नियमः

विधानानुग्रहाय अवभृथशब्द एव देशलक्षणापरः इति न्याय्यम्। यन्तीति च प्रकृत्यर्थोऽन्तर्णीतणिजर्थो विहितो भवति। अन्यथाऽनुवादमात्रं धात्वर्थस्य स्यात्। वाक्येन च सोमलिप्तविधानं भवति। तदिदमुक्तं भाष्ये—श्रुतिश्च वाक्याद्बलीयसीति। तेनायमर्थः—सोमलिप्तमवभृथदेशं नयन्तीति।

कर्तृदेशकालानामचोदनम्। ननु चानुवादपक्षेऽप्रतिपादकत्वात् वाक्यस्यानर्थक्यमेव प्राप्नोति। अत्रेत्थं केचित् पूर्वपक्षयन्ति—शक्तस्य कार्यकरणात् अशक्तस्य चाकरणात् शक्तिरेव कारणं न द्रव्यं व्यभिचारात्। सा च शक्तिः कार्यगम्या समादिष्वप्यविशिष्टैव। सैव च क्रियायां कारकत्वेन चोदयितव्या। सा च नित्यप्राप्तैवेत्यनुवादाः कारकविनियोगा इति। तदभिप्रायेण पूर्वपक्षाक्षेपपरोऽयं ग्रन्थः। यदा हि शक्तिः कारकं तदा समादीनां क्रियान्वयो नास्ति। अनन्वितस्य च न प्रतिपादकत्वं इत्यप्रतिपादकता। अप्रतिपादकत्वाच्चानर्थक्यमेव स्यात् अनुवादपक्षे। अत्रोत्तरं—न ब्रूमो विनियोगे आनर्थक्यमिति। विनियोगे इत्थमेवान्वितो वाक्यार्थः प्रतीयते। प्रयोक्तृत्वं तु न संभवति। कथं न संभवति? नित्यप्राप्तत्वात् कारकग्रामस्य द्रव्यस्य हि अत्र नियमः

क्रियते न कारकाणाम्। न चाकारकस्य प्रयोक्तृत्वं संभवति। तस्माद्विनियोग एवायं(नियम) विषयविशेषोऽवगम्यते न प्रयोक्तृव्यापार इति पूर्वः पक्षः।

अत्रोच्यते—यदि द्रव्यादन्यत् कारकतयाऽवगम्यते ततो यथा भवानाह। इह तु द्रव्यमेव कारकतयाऽवगम्यते। तस्याभिधानाद्विभक्त्युत्पत्तेः।

प्रतीयते। न कारकाणाम् न चाकारकस्य[1] प्रयोक्तृत्वं संभवति। तस्मात् विनियोग एवायं विषयविशेषोऽवगम्यते न प्रयोक्तृव्यापार इति पूर्वः पक्षः। अत्रायमभिप्रायः—द्रव्यमेव तावत् शक्तिमत्कारकं तद्भावे कार्यदर्शनात् तदभावे चादर्शनात्। एतावच्च कारकलक्षणम्। यदि(परं) द्रव्यमात्रमेव कारकं किमिति तर्हि मन्त्रौषधादिप्रतिबन्धेऽपि न करोतीति व्यभिचारे परिहारो वक्तव्यः। तत्रापेक्षणीयं किञ्चिद्रूपमस्तीति यस्मान्मन्त्रौषधाद्यपहरणीयमतीन्द्रियं किमपि रूपमस्तीति शक्तिः परिकल्प्यते। न च सा कारकम्। कारकानुग्राहिका हि सा। न पुनः स्वयमेव कारकम्। ततश्च शक्तिमद्द्रव्यमेव कारकमिति द्रव्यस्यैव कारकत्वात् समादीनां क्रियारूपत्वसंभवात् अन्विताभिधानोपपत्तिरिति विनियोगेनास्यानर्थक्यम्। किन्तु प्रयोक्तृव्यापारे उपादानपर्यालोचनया अनुवादकत्वमुच्यते। यस्माद्विनियुक्तस्यापि यदुपादानं तत्कारकतयैव। कारकता च सर्वेषामविशिष्टा। यदि परं द्रव्यमात्रतया तद्भेदः। न च द्रव्यमुपादीयते। तद्रूपस्य क्रियासंबन्धाभावादिति कारकत्वेन नियमाभावादन[2]र्थकमनुवाद एवेति। तस्माद्विनियोगावस्थायामेवायं नियोगविषयस्य यागादेः विशेषोऽवगम्यते नोपादानदशायामिति पूर्वः पक्षः। अत्रोच्यते—यदि द्रव्यादन्यत् कारकतयाऽवगम्यते ततो [यथा भवानाह। इह तु द्रव्यमेव कारकतयाऽवगम्यते तस्याभिधानाद्विभक्त्युत्पत्तेः। अस्यार्थः—समादय एव तावत् क्रियायाः कारकतयाऽवगम्यन्ते। ते च भिन्ना एव कारकभूताः तानेव विधिरप्युपादत्त इति भिन्नविषयः

---

(1) G. कारकस्य प्रयोज्यत्वं (2) G. दानर्थक्यम

ननु च कारकं हि क्रियाप्रयुक्त्यैव प्रयुज्यते। न च कारकशून्यं कर्मास्ति। सत्यं न कारकशून्यं कर्म न पुनः सामान्यं किञ्चिदस्ति कारकं नाम। यदेव हि विभक्त्या द्रव्यं गुणो वा समर्प्यते तदेव कारकम्। तस्माद्विनियोगात् प्रयोक्तृत्वेपि नियमः संभवति। उक्तं च विनियोगानुसारी नियोगः सति संभवे इति।

॥ १० ॥ [1]तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात् ॥ २५ ॥

युक्तं तावत् द्रव्यस्योपादानं विभक्तिभिस्तस्य कारकतया-

प्रयोक्तृव्यापारः समादिविशेषव्यतिरेकेणान्यस्याविनियोगात्। एतदेव विवरीतुं चोदयति —ननु च कारकं हि क्रियाप्रयुक्त्यैव प्रयुज्यते। न च कारकशून्यं कर्मास्ति इति। अस्यार्थः —कारकप्रयुक्तिस्तावत् पृथक् नास्ति। किन्तु कारकशून्या क्रिया नास्तीति क्रियाप्रयुक्त्यैव कारकं प्रयुज्यते। तस्य च कारकरूपस्याविशेषादनियतविषयमेवोपादानम्। सत्यम् न कारकशून्यं कर्म। न पुनः सामान्यं किञ्चिदस्ति कारकं नाम। यदेव हि विभक्त्या द्रव्यं गुणो वा समर्प्यते तदेव कारकम्। तस्मात् विनियोगवशात् प्रयोक्तृत्वेऽपि भिन्नं कारकमिति प्रयुक्तेर्नियमसंभवः। ननु भवतु विनियोगे नियमः उपादाने तु कथमित्याह—उक्तं तु विनियोगानुवर्ती नियोगः सति संभव इति। यदेव हि विनियोगतो नियोगसाधनतयाऽवगतं तदेव नियोगसिद्ध्यर्थमुपादेयम्। अन्योपादाने साधनाभावान्नियोगासिद्धिप्रसङ्गात्। एवं च नियमार्थो [2]विधिरुच्यते न पुनरन्यथेति।

तथा द्रव्येषु। ननु विभक्तिभिः गुणजात्योरपि कारकत्वेन विनियोगात् कर्त्रादिवदेव विधियुक्तो नानुवादः तत्राह—युक्तं तावत् द्रव्यस्योपादानं विभक्तिभिः तस्य कारकतया-

---

(1) P.1240 (2) G. न विधिरुच्यते

ऽवगतेः गुणस्तु तद्विशेषणमात्रमेव श्वेतादिषु। यत्र पुनररुणयेति विभक्त्यैव कारकत्वेनावगतिः तत्र पूर्वाधिकरणेनैवावगतम्। अतो द्रव्योपादानार्थत्वात् गुणजात्योरविवक्षेति पूर्वपक्षवादी मन्यते। अत्रोच्यते—सत्यं द्रव्योपादानार्थमिदम्। तदेव तु द्रव्यं तद्रहितं न शक्यते तद्विशिष्टमुपादातुमिति गुणजात्योरपि द्रव्यवदुपादान-सिद्धिः।

॥ ११ ॥ [1]संस्कारे च तत्प्रधानत्वात् ॥ २६ ॥

संस्कारे पुनः को विशेषः? अयं विशेषः। अधिकारशून्यो हि संस्कारविधिर्भवति संस्कार्यार्थत्वात् संस्कारस्य, नात्राधिकारार्थं

ऽवगतेः। गुणस्तु तद्विशेषणमात्रमेव श्वेतादिषु। यत्र पुनः अरुणयेति विभक्त्यैव कारकत्वेनावगतिः तत्र पूर्वाधिकरणेनैवावगतम्। अतो द्रव्योपादानार्थत्वात् गुण-जात्योरविवक्षैवेति पूर्वपक्षवादी मन्यते। अस्यार्थः—कारकविभक्त्यनुपात्ते तद्विशेषणमात्र-तयैव 'शुक्लानां व्रीहीणां चरुं' इति श्रुते गुणजाती इहोदाहरणम्। तत्र साक्षात्तयोः क्रियाङ्गत्वेनाश्रवणात् विभक्त्यर्थवच्च द्रव्यविनियोगे (अ)भिन्नप्रातिपदिकबोध्यत्वेनापि विनियोज्य-त्वाभावात् अनुवादोऽयम् नियोगसंस्पर्शाभावेन च नियमानुपपत्तिः। अतो द्रव्योपादा-नार्थमेवेदं न गुणजात्युपादानार्थमिति। अत्रोच्यते—सत्यं द्रव्योपादानार्थमिदम्। एतदेव हि द्रव्यं तद्रहितं न शक्यते तद्विशिष्टमुपादातुमिति गुणजात्योरपि द्रव्यव-दुपादानसिद्धिः। अस्यार्थः—भिन्नपदवाच्यतया तावत् द्रव्यं ताभ्यां विशेष्यते। तच्च विशिष्टं [2]तत्क्रियाङ्गमिति तथाविधद्रव्यसाध्यो नियोगः तदन्यगुणोपादाने तथाविधद्रव्याभावादङ्ग-विकलतया न नियोगस्सिध्यतीति तयोरप्युपादानं नियमेन कार्यमिति नियमार्थो विधिः।

संस्कारे च तत्प्रधानत्वात्। संस्कारे पुनः को विशेषः? अयं विशेषः अत्र। अधिकारशून्यो हि संस्कारविधिर्भवति संस्कार्यार्थत्वात्संस्कारस्य। नात्राधिकृतार्थं

---

(1) P. 1241 (2) G. तद्यागाङ्ग

कर्मावगम्यते। तस्मादविवक्षैवेति पूर्वाभ्यां विशेषः। अत्रोच्यते—सत्यमधिकारो नावगम्यते। अधिकृतद्रव्यार्थतया तु प्रतीयते। ततः किम्? इदं ततो भवति? संस्कारविशिष्टद्रव्यं अधिकारविधिविशेषणतयाऽवगम्यते। ततश्च गुणवत् तदपि अधिकारविधिनैवोपादीयत इति तद्वदित्युच्यते। तत्प्रदर्शितमेवं सत्यङ्गविधिरनुवाद इति।

॥ १२ ॥ [1]यजति चोदनाद्रव्यदेवताक्रियं समुदाये कृतार्थत्वात् ॥ २७ ॥

कर्मावगम्यते। तस्मादविवक्षैवेति पूर्वाभ्यां विशेषः। अस्यार्थः—यः खलु अधिकारनियोगविषयः सोऽधिकारनियोगसंस्पर्शादधिकारविधिना उपादीयते। तत्र न तावत् संस्कारक्रिया साक्षाद्विधेर्विषयः, संस्कार्यार्थत्वात् संस्कारस्य। यस्य हि नियोगसिद्धिरेव कार्यं स विषय इति विषयज्ञाः। तस्मादधिकारविषयत्वाभावान्नात्र अधिकृतपुरुषार्थता संस्काराणाम्। तस्मान्नियोगासंस्पर्शादत्रापि नियमानुपपत्तेरनुवाद इति। अत्रोच्यते—सत्यमधिकारो नावगम्यते। अधिकृतद्रव्यार्थता तु प्रतीयते। ततः किम्? इदं ततो भवति। संस्कारविशिष्टं द्रव्यं अधिकारविषयविशेषणतयाऽवगम्यते। ततश्च गुणवत् तदप्यधिकारविधिनोपादीयत इति तद्वदित्युच्यते। अस्यार्थः— एवंविधद्रव्यसाध्ययागसाधनत्वान्नियोगस्य नान्यदपि द्रव्यमुपादेयम्। तेन विना तथाविधद्रव्याभावेन यागाभावान्न नियोगसिद्धिरिति दर्शितम्। यदिदमधिकारविषयानुप्रवेशात् पृथग्विषयत्वाभावेनाभिन्ननियोगत्वादनुवादकत्वं व्रीहीनवहन्तीत्यादिविधीनां तत् प्रदर्शितं एवं सत्यङ्गविधिरनुवाद इति।

यजतिचोदना द्रव्यदेवताक्रियम्। ननु असङ्गतमिदं पदार्थस्वरूपमात्रकथनमस्मिन् शास्त्रे, किमुताध्याये इत्याशङ्क्य सङ्गतिमाह—के पुनस्तेऽधिकारविषयाः[2] यदनुप्रवेशेन कारकं तद्विशेषणं, तत्संस्कारा अधिकारविध्यनुप्रवेशिनः। के पुनस्तेऽधिकारविधि-

(1) P. 1241 (2) G. विषयनियोगाः

के पुनस्तेऽधिकारविषयाः? यागदानहोमाः। "स्वर्गकामो यजेत," "आयुष्कामो हिरण्यं दद्यात्" सौभाग्यकामो जुहुयात्" इत्येवमादयः। एतच्चोपलक्षणमात्रम्। अन्येपि ये कामश्रुतिसंयुक्ताः। कः पुनस्त्यागात्मकत्वे सति यागदानहोमानां परस्परं विशेष इत्याशङ्कानिवृत्त्यर्थं स्वरूपवर्णनमित्युक्तम्।

विषयाः? इति पूर्वोक्तेन प्रसङ्गसङ्गतिरिति यावत्। उत्तरं—यागदानहोमाः स्वर्गकामो यजेत, आयुष्कामः सुवर्णं दद्यात् सौभाग्यकामो जुहुयात् इत्येवमादयः। एतच्चोपलक्षणमात्रम्। अन्येऽपि ये कामश्रुतिसंयुक्ताः उपवासव्रतादयः तपश्च। कः पुनः स्वत्वत्यागात्मकत्वे सति यागदानहोमानां परस्परं विशेषः इत्याशङ्कानिवृत्त्यर्थं स्वरूपवर्णनमित्युक्तम्। अस्यार्थः—यागोऽपि द्रव्यत्यागात्मकः होमदाने अपि। को विशेषः एतेषामित्याशङ्का भवति। तां निवर्तयितुं सूत्रकारेण स्वरूपं वर्ण्यते। तेन सूत्रत्रयेण तदुक्तमिति। देवतोद्देशेन द्रव्यत्यागो यागः। स एवासेचनाधिको होमः। परस्वत्वापादनात्मकस्त्याग एव दानमिति। एतदुक्तं भवति। शब्दार्थतायां [1]विशेषोऽस्ति। उपाधिविशेषवशेन शब्दप्रवृत्तेः। त्यागात्मकत्वे तु न कश्चिद्विशेष इति। कथं पुनरेवंविधेऽर्थे यागशब्दस्य व्युत्पत्तिः? वाच्यभूतं प्रतीत्य संबन्धिनमर्थं(च) अवधार्य तत्र शब्दस्य शक्त्यध्यवसानम्। न चायमर्थः प्रमाणान्तरसमधिगमनीयः। देवताभावस्य प्रमाणान्तरेणावगन्तुमशक्यत्वात् तथेदमपि वाच्यम्।

का पुनरियं देवता नाम? तथोद्देशोऽपि किमात्मकः तथात्यागोऽपि किंरूप इति। अत्रोच्यते—आग्नेयादिचोदनावसितदेवताभावान् अग्न्यादीनुद्दिश्य यदा पुरोडाशादिकं कश्चित्त्यजति तदा बालान् वृद्धास्तत्रैवमाहुः—अग्न्यादीनयं यजत इति। यदा स एव स्वद्रव्यत्यागमात्रं करोति तदा यजति शब्दं न प्रयुञ्जते। तेनान्वयव्यतिरेकाभ्यां देवतोद्देशेन द्रव्यत्यागो याग इति यज्यर्थे व्युत्पत्तिः बालानामनयैव दिशा।

---

(1) G. तायामविशेषो नास्ति

तेऽपि वृद्धाः बालदशायां व्युत्पद्यन्त इत्यनादितया वृद्धव्यवहारस्य न किञ्चिद्दुष्यति। ननु कथं देवतार्थे व्युत्पत्तिः ? उच्यते। आग्नेयादिहविषि सूक्ते च चोदिते यदि कश्चिदग्निमुद्दिश्य त्यजति अग्निगुणवचनं स्तोत्रं शस्त्रं वा प्रयुङ्क्ते तत्रैवं लौकिकाः प्राहुः—अग्निरत्र देवतेति। तत्र बालाः परिभावयन्ति यमुद्दिश्य हविस्त्यज्यते यः स्तूयते, प्रशस्यते वा सा देवतेति। अत्रापि वृद्धव्यवहारपरम्परानादित्वाश्रयणेन न कश्चिद्दोषः। तथैव व्युत्पन्नाः सास्य देवता इत्यधिकारविहितप्रत्ययान्तशब्दश्रवणेन वेदेऽपि देवताभावं प्रतिपद्यन्ते या च तत्र देवतात्वेन चोद्यते तत्रैव तां देवतामाहुः नान्यामुद्दिश्यान्यस्मिन् हविषि त्यज्यमानेऽपि इति लौकिकव्यवहारानुसारेण चोदितत्वमपि देवताया एवेत्यध्यवस्यन्ति। न चैवं वाच्यं वेदादेव देवतार्थं प्रतिपद्य व्यवहरमाणेषु व्युत्पत्तिरिति वृद्धव्यवहारपूर्वको देवतार्थप्रत्ययो न स्यादिति। यतः पूर्वेषामपि व्युत्पत्तौ वृद्धव्यवहार एव हेतुः। तत्पुरस्सरा तु वेदार्थ[1]-प्रतीतिः। तत्पूर्वकश्च व्यवहार इति तत्पूर्विका अपरस्य अपरस्यापि व्युत्पत्तिरिति। उद्देशश्च संप्रदानकारकस्यैव स्वशब्देनाभिधानम् यथा 'अग्नय' इति। त्यागोऽपि स्वामिनः औदासीन्यसङ्कल्पः लौकिकत्वाच्च स्वत्वस्य। यत्रैवं स्वामिनः सङ्कल्पो भवति 'ममैतन्न' इति तत्रैव तस्य स्वमिदमस्य स्वामित्वं न भवतीति लौकिकव्यवहारात् सङ्कल्पमात्रादेव स्वत्वनिवृत्तिरित्यनवद्यम्। तदेवं यागे व्युत्पत्तिसंभवात् होमशब्देऽपि व्युत्पत्तेरुपपत्तिः। यतो यजतिचोदनाचोदित एव यत्र विशेषदेशाधारद्रव्यप्रक्षेपोषाधिको होमः शब्दप्रयोगादवगन्तुं शक्यते एव प्रक्षेपोपहितो होम इति।

ननु किमर्थमुक्तं परस्वत्वापादनात्मकं इति दानविशेषणम्। उच्यते—न त्यागमात्रं दानं अपि तु संप्रदानकारकीभूतपुरुषस्वीकारोऽपि। स चैवंविधो न केवलत्यक्तृपुरुषमात्रेण संपाद्यः। अपि तु स्वीकर्त्रापि। न हि स्वीकारिणं विना स्वीकरणं भवति। तेन त्यागः परस्वीकरणरूपनिर्वृत्तये स्वीकर्तारमपेक्षते। अन्यथा हि त्यागमात्रमेव स्यात्। न चैवं प्राक्स्वामिना त्यक्ते यदि समकालमग्रतः[2] त्यक्तुरेव कश्चित्स्वीकरोति[3] तदा तदीयमेव तत्स्यात्। मैवमाशङ्कितव्यम्। अवोचामैवेदं लौकिकं

(1) G. देवतार्थ (2) R. कालमग्रतः (3) R. स्वीकारोऽस्ति

॥ १४ ॥ विधेः कर्मापवर्गित्वादर्थान्तरे विधिप्रदेशः स्यात् ॥ २९ ॥

कः पुनरस्योपादानलक्षणेन संबन्धः ? एष संबन्धः। किमुपात्तस्यातिथ्यार्थं धारणमात्रं द्वाभ्यां प्रयुज्यते, उत निरिष्टकस्य पुनरुपादानम्, उत पृथगेवोपादानं, धर्ममात्रातिदेशकमिदं वचनं, उत साधारणमेतदेवोपादानमिति। अन्यशेषस्यान्यत्र-

---

स्वत्वमिति। तत्र यत्स्वत्वापत्तिपरतया स्वामी त्यजति तस्य स्वीकरणे तदीयमेव स्यात् नान्यस्येति लौकिकव्यवहारः। ननु यत्स्वत्वापत्तिपरतया स्वामी त्यजति स यदि न स्वीकरोति तदाऽपि त्यक्तुर्दानात् फलं स्यात् त्यागमात्रस्य तद्व्यापारत्वात् तस्य च तेन कृतत्वात् इति। केयं मन्दता भवतः ? उक्तमस्माभिर्न त्यागमात्रं दानमिति। किन्तु स्वीकरणरूपमपि। यथाचोदितानुष्ठाने च फलं चोदितार्थस्य। चोदितार्थश्च यमुद्दिश्य त्यागः तत्स्वीकरणमपीति प्रतिपत्तव्यम्। चोदितं यथा भवि तथा यतितव्यम्। तत्र कश्चित् प्रतिजिघृक्षुः त्यागमात्रेणैव स्वीकरोति। कश्चित् प्रार्थनादिभिः इति संप्रदानस्वीकरणरूपापत्तये समाश्रयणीयः। स्वीकर्ता च तदानीं ऋत्विक्स्थानीय इति कृतमतिबहुना।

विधेः कर्मापवर्गित्वात्। अत्र भाष्यं विनियोगमेव चिन्तयतीत्यसङ्गतिमाशङ्कते—**कः पुनरुपादानलक्षणेऽस्य संबन्धः ? एष संबन्धः 'किमुपात्तस्यातिथ्यार्थं धारणमात्रं द्वाभ्यां** उपसदग्नीषोमाभ्यां **प्रयुज्यते, उत निरिष्टकस्य पुनरुपादानम्, उत पृथगेवोपादानं धर्ममात्रातिदेशकमिदं वचनम्, उत साधारणमेव उपादानमिति।** इदमेव चिन्तयितुकामः भाष्यकारः कारणसन्देहं कृतवानित्यभिप्रायः। अत्र पूर्वपक्षोत्थानबीजं यावन्ति पदानि श्रूयन्ते तावतामेव तावदन्वयो वाच्यः नाश्रुतपदापेक्षयापि। तत्र यदातिथ्यायामित्यत्र यच्छब्दः श्रूयते। स च पूर्ववृत्तसंबन्ध्यन्तरसव्यपेक्षः। आतिथ्या चात्र समभिव्याह्रियते। तेनातिथ्यापेक्ष एवासौ वर्णनीयः। तेनैष संबन्धो भवति यदातिथ्यासंबन्धिबर्हिरिति। तत्र यद्यातिथ्योपात्ततयैव तत्संबन्धित्वं तदा प्रथमः पक्षः। अथ व्यापृततया तदा द्वितीयः। अत्र राद्धान्तमाह—**अन्यशेषस्य** तावन्मुख्यस्य **अन्यत्र**

विनियोगो नास्ति[यथा] अन्यत्र व्यापृतस्यैवान्यत्र व्यापारः इत्युक्तम्। विनियोगानुसारी चो(नो)पादानमित्येतदप्युक्तम्। तस्मान्नातिथ्योपात्तस्य उपसदग्नीषोमाभ्यां धारणं प्रयुज्यत इति घटते। निरिष्टकोपदेशश्च शिष्टाचारविरोधान्न भवति। लक्षणाश्रयणं च नोपपद्यते। एवं धर्मातिदेशोऽपि लक्षणाभयादेव त्यज्यते। तस्मात्साधारणावगतिरेव श्रुत्योपपन्ना भवतीति साधारणमुपादानमिति सिद्धम्।

इति बृहत्यां चतुर्थाध्यायस्य
द्वितीयः पादः

विनियोगो नास्ति। प्रतिपत्तिविरोधात् यथाऽन्यत्र व्यापृतस्यान्यत्र व्यापारः वस्तुविरोधात् इत्युक्तं सोमलिप्ताधिकरणे। विनियोगानुसारी चोपादानमितीदमप्युक्तम्। आमिक्षाधिकरणे। तस्माद्विविनियुक्तत्वात् आतिथ्यायामिति आतिथ्योपात्तस्य अग्नीषोमोपसद्भ्यां धारणमात्रं प्रयुज्यत इति न घटते। निरिष्टकोपदेशश्च शिष्टाचारविरोधान्न भवति न हि निरिष्टकेन शिष्टा यागमाचरन्ति। लक्षणाश्रयणाच्च प्रयोगान्ते आतिथ्यासंबन्धस्याभावात् सम्बन्धे तेनासंबन्धिरूपता लक्षणायेति लक्षणैवेयमिति नोपपद्यते। एवं धर्मातिदेशोऽपि लक्षणाभयादेव बर्हिर्धर्मा लक्षणीया इति त्यज्यते। तस्मात् साधारणावगतिरेव श्रुत्योपपन्ना भवति। तस्मात् साधारणमेवोपादानमिति सिद्धम्। लवनसंबन्धापेक्षश्च यच्छब्दो द्रष्टव्यः। लवनपूर्वकत्वाद्बर्हिषः। यदिदं बर्हिर्लूयते तदातिथ्यायाः, तदुपसदां तदग्नीषोमीयस्येत्यविरोधाद्वर्णनीयम्।

इति श्रीशालिकनाथमिश्रविरचितायां
ऋजुविमलायां पञ्चिकायां
चतुर्थाध्यायस्य
द्वितीयः पादः

चतुर्थाध्यायस्य तृतीयः पादः ॥

॥ १ ॥ [1]द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात् ॥ १ ॥

उक्तमध्यायादौ सर्वत्र नियोगव्यापार एव चिन्त्यत इति । इहेदानीं किं फलसंबन्धितया पुरुषस्य विधिव्यापारस्संभवति नेति चिन्त्यते । पुरुषफलसंबन्धासंभवे कथं प्रामाण्यं संभवति इति प्रमाणलक्षणे चिन्तितम् । योऽपि तत्र पूर्वपक्षः असावपि क्रियाकारकसंबन्धोऽवगम्यमानः कथं क्रियान्तरविषयं नियोगं प्रतिपादयती

ऋजुविमलायां

चतुर्थाध्यायस्य तृतीयः पादः

द्रव्यसंस्कारकर्मसु । ननु च भाष्यकारः फलविध्यर्थवादचिन्तां करोति सा चासङ्गता पुनरुक्ता च, अर्थवादाधिकरणेन स्तुत्यर्थताया उक्तत्वादिति शङ्कायां निराकरणमाह —**उक्तमध्यायादौ सर्वत्र नियोगव्यापारश्चिन्त्यत इति । इहेदानीं फलसंबन्धितया पुरुषस्य विधिव्यापारस्संभवति नेति चिन्त्यते ।** विधिव्यापारनिबन्धनं फलविधित्व(पक्ष) माशङ्क्यानुवादकत्वमुच्यत इति नासङ्गतिः । पुनरुक्ततापि नास्ति । स्थिते **पुरुषफलसंबन्धासंभवेऽस्मिन्नधिकरणे कथं प्रामाण्यसंभव इति प्रमाणलक्षणे**ऽर्थवादाधिकरणे **चिन्तितम् ।** तेनैतत्पूर्वकोऽसौ विचार इति यावत् । तथा **योऽपि तत्र** प्रमाणलक्षणे औदुम्बराधिकरणे **पूर्वपक्षः असावपि क्रियाकारकसंबन्धोऽवगम्यमानः** फलसिद्धिक्रियाया औदुम्बरयूपकारकत्वस्य च साध्यसाधनलक्षणस्संबन्धोऽवगम्यमानः **कथं क्रियान्तरविषयं नियोगं प्रतिपादयति ।** उदुम्बरेण यूपः कर्तव्य इति यूपकारकविषयं नियोगं **कथं प्रतिपादयति** स्वयं विहितत्वाभावात् विधेयत्वाभ्युपगमे च [2]विधेयान्तरानुप्रवेशात् । न हि विधेयद्वयस्यैक-

---

(1) P..1244 (2) G. विधाना

त्यस्यार्थस्य निराकरणाय। इह तु स्वविषयो नियोगो न संभवतीति चिन्ता। कथं? यस्येत्येवमादीनामधिकारिविशेषणतयाऽसंभवात्। कथमसंभवः? तत्संबन्धस्य नियोगस्यानुपपत्तेः किमिति? सिद्धवदुपदेशात्। यथा देवदत्तः ओदनं पचति इति पुरुषोपलक्षणता प्रतीयते। न पुरुषेणोदनः पक्तव्य इति। नायं शब्दार्थः यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति इति। प्रत्ययान्तरा-

---

वाक्यत्वं संभवति। एकवाक्यता चावगम्यते। न चावगम्यमाना त्यक्तुं युक्ता। तस्मात् प्रमाणान्तरमपेक्षणीयम्। नचैतदस्ति इत्यप्रामाण्यं स्यादिति। **अस्यार्थस्य निराकरणा**-योक्तम्। तेन फलाङ्गीकरणेनान्यच्चिन्तितमिति न पुनरुक्तता। पूर्वपक्षश्च [1]सिद्धान्तोपोद्धाततया चिन्त्यत इति मत्वा निराकार्यनिराकरणाय पूर्वपक्ष इत्युक्तम्। **इह तु स्वविषयो नियोगो न संवतीति चिन्ता। कथं? यस्येत्येवमादीनामधिकारिविशेषणतयाऽसंभवात्**[2]। अस्यार्थः—इहापापश्लोकश्रवणादीनां पर्णमयजुह्वादीनां च साध्यसाधनसंबन्ध एवनास्तीति प्रतिपाद्यते यस्मात् 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' इति अपापश्लोकश्रवणमधिकारिविशेषणतया न श्रूयते। तेनात्र फलापह्नव एवाधिकरणार्थः। तेनौदुम्बराधिकरणेनापि न पुनरुक्तता। **कथमसंभवः?** अयमाशयोऽत्र पूर्वपक्षवादिनः पृच्छतः—एवं विधाद्वाक्याल्लोके साध्यसाधनभावोऽवगम्यते। तद्वद्वेदेप्यवगतिः [3]अवगम्यते चेत् [4]स्ववाक्यकार्य एव फलवत्त्वात् स्वातन्त्र्यमेव स्यात्। न च साध्यसाधनभावोऽधिकारिविशेषणत्वमन्तरेण संभवतीत्यौपादानिकोऽधिकारिविशेषणभावः प्रतीयते। उत्तरं-**तत्संबन्धस्य नियोगस्यानुपपत्तेः** इति। तेनैवाशयेन पृच्छति—**किमिति**। उत्तरं—**सिद्धवदुपदेशादिति। यथा देवदत्तः ओदनं पचतीति पुरुषोपलक्षणं प्रतीयते** ओदनपाकः। **न पुनः पुरुषेणोदनः पक्तव्य इति** साध्यभूतः ओदनपाको न प्रतीयत इत्यर्थः। तथेहाप्यपापश्लोकश्रवणमपि वर्तमानापदेशात्। उपसंहारव्याजेन पूर्वपक्षं निराकरोति-तस्मान्नायं **शब्दार्थो यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीति। प्रत्ययान्तरा**-

---

(1) G. सिद्धान्तोत्पन्नः केन (2) G. विशेषणतयोः सं (3) G. अवगते च
(4) R. स्ववाक्य एव

वगम्यत्वादस्यार्थस्य। न च तत्प्रत्ययान्तरमस्ति प्रथमलक्षणोक्त एवायमर्थ इति स्थितं एवंभूतानामर्थवादत्वमिति।

॥ २ ॥ [1]नैमित्तिके विकारत्वात् क्रतुप्रधानमन्यत् स्यात् ॥ ४ ॥

कथं पुनरत्र द्व्यर्थं वाक्यमुपन्यस्यते। यत्रापि तावदर्थद्वये विशेषो नावगम्यते तत्राप्येकार्थेनैव वाक्येन भवितव्यम्। प्रकरणादिभिस्तु विशेषोऽवगन्तव्यः। किं पुनरत्र विशेष एवावगम्यते।

गम्यत्वादस्यार्थस्य। अनेन लोकवैषम्यमाह। लोकेऽपि यदेवंविधात् वाक्यात् साध्यसाधनभावाध्यवसानं तत् तथाविधस्य वाक्यस्य प्रमाणान्तरेण तत्परत्वस्य निश्चितत्वात्। न च वेदवाक्ये तात्पर्यमन्यतोऽवगन्तुं शक्यते तदाह—न च तत्प्रत्ययान्तरं तात्पर्यावधारणकारणमस्ति इति प्रथम एवाध्याये अर्थवादाधिकरणे योऽर्थ उक्तः स्तुतिरूपः स एव न्याय्य इति स्थितं एवं भूतानामापातमात्रेण लौकिकवाक्यसामान्यतो दर्शनेन फलमिव समर्पयतां आलोच्यमाने निमित्तशून्यानामर्थवादत्वमिति।

नैमित्तिके विकारत्वात्। अत्र भाष्ये 'गोदोहनेन पशुकामस्य प्रणयेदित्येवमादीनां वाक्यानां क्रत्वर्थपुरुषार्थात्मकार्थद्वयप्रतिपादकतया पूर्वपक्षितम्। तदाक्षिपति—कथं पुनरत्र द्व्यर्थं वाक्यमुपन्यस्यत इति। अस्यार्थः—नेदमेकं वाक्यमनेकार्थं युक्तं यस्मात् पदानां संभूयकारिता वृद्धव्यवहारावगता। त्रिपदं चेदं वाक्यम्। तत्र न पशुकामपदपरित्यागेन अर्थश्शक्यते प्रत्येतुम्। तत्स्वीकारे च पुरुषार्थत्वमेव न क्रत्वर्थत्वमिति। अथोच्येत अगृह्यमाणविशेषतयाऽर्थद्वयमिति। तन्न। पशुकामपदप्रयोगेण विशेषग्रहणात्। यत्रापि च [2]पदान्तराविरोधात् विशेषो न गृह्यते तत्राप्येकार्थतैव वाक्यस्य। विशेषग्रहणं तु प्रकरणादिभिः। तदिदमाह—यत्रापीत्यादि। अथोच्येत किमिति वाक्यस्यैव द्व्यर्थता

---

(1) P. 1248 (2) G. पदान्तरानुरोधात्

द्व्यर्थता चाभिधानस्य प्रमाणलक्षण एव निराकृता। तस्माद-संभवात्पूर्वपक्षमेवेदमधिकरणं प्रतिभाति।

अत्रोच्यते—एवमेवैतदेकार्थत्वमेव अन्विताभिधाने। प्रयोजन-द्वयं तु अत्र संभवतीति क्रत्वर्थतामपि पूर्वपक्षवादी मन्यते। संबन्धा-नुसारि चोपादानमित्युक्तम्। ननु च विनियोगानुसारीत्युक्तं न संब-न्धानुसारी। नैवं, विनियोगो हि संबन्धहेतुतयोक्तः, न पुनर्विनियोग-

---

न संभवति तत्राह—द्व्यर्थता[1]चाभिधानस्य प्रमाणलक्षण एव निराकृता। वाजपेयाधि-करणे विध्यनुवादज्ञाताज्ञातत्वाश्रयणात। एकदा चैकत्र तदसंभवात्। इहापि प्रणयन-संबन्धो विधेयः क्रत्वर्थपक्षे; पुरुषार्थपक्षे(त्वे)त्वनुवाद इति। तस्मादसंभवत्पूर्वपक्षमेवेदम-धिकरणं प्रतिभाति। अत्रोच्यते—एवमेवैतत् एकार्थत्वमेव अन्विताभिधाने। विनि-योगावस्थायां [2]पुरुषार्थत्वमेव, न क्रत्वर्थत्वमित्यर्थः। प्रयोजनद्वयं त्वत्र संभवतीति क्रत्वर्थतामपि पूर्वपक्षवादी मन्यते। अस्यार्थः—एकस्यापि विनियोगस्य प्रयोजनद्वयं क्रत्वर्थपुरुषार्थात्मकं संभवतीति क्रत्वर्थताप्युक्ता। कस्मात् पुनः प्रयोजनद्वयसंभव इत्यत्राह —संबन्धानुसारि चोपादानमित्युक्तम्। चकारो हेतौ। यस्मात्संबन्धानुसार्युपादान-मित्युक्तम्। अस्ति चात्र प्रणयनेनापि संबन्धः तेन क्रत्वर्थत्वे अपः प्रणयतीत्यादिना प्रणयनादौ विहिते 'चमसेनापः प्रणयति' इत्यादिना विहिते तत्साधने क्रत्वर्थसाधनो-पादानावस्थायां गोदोहनमेवोपादेयमित्यवगम्यते। अन्यस्य संबन्धानवगमात्। अन्यपरेऽपि वाक्ये संबन्धावगतिरस्तीत्येतावता तदनुसार्युपादानवशात् एकत्वादेरिव क्रत्वङ्गतया विनियुक्त-प्रणयनस्थतावगतेः[3] इति। ननु विनियोगानुसार्युपादानमित्युक्तम् आमिक्षाधिकरणे न संबन्धानुसारि। नैवम्, विनियोगो हि यस्मात् संबन्धहेतुतयोक्तः न पुनर्विनियोग-

---

(1) G. द्व्यर्थतालक्षणस्य (2) G. पुरुषार्थमेवकाम्यमित्यर्थः (3) स्थतापत्तेः

तैवाश्रीयते। तस्मात् द्वयमुपादापकं, संबन्धद्वयावगमात् न क्रियासंबन्धत्यागेन द्रव्यादेः पुरुषार्थताऽवसीयते। अत्राभिधीयते। नैतद्युक्तं यदुक्तं संबन्धमात्रानुसार्युपादानमिति शब्दोपपादितसंबन्धानुसार्युपादानं न संबन्धानुसारी शब्दाच्च पुरुषार्थतयैवान्वयोऽवगम्यते। ननु क्रिययाप्यन्वयोऽवगम्यते। सत्यम् गम्यते पुरुषार्थौपयिकतया।

तैवाश्रीयते[1] यस्मात् संबन्धानुसार्युपादानमित्युक्तम्। तस्मात् कार्यद्वयं क्रतुपुरुषार्थौ गोदोहनादेः उपादापकं उपादानहेतुः संबन्धद्वयस्य क्रतुपुरुषार्थाभ्यां सहावगमात्। यस्मात् क्रियासंबन्धत्यागेन द्रव्यादेः पुरुषार्थता न[2] प्रणयनकारणीभूतादेव गोदोहनात् फलसिद्धेः। अत्राभिधीयते—नैतद्युक्तं यदुक्तं संबन्धमात्रानुसार्युपादानमिति। किन्तु शब्दोपपादितसंबन्धानुसार्युपादानम्। न संबन्धमात्रानुसारी। शब्दाच्च पुरुषार्थतयैवान्वयोऽवगम्यते। अस्यार्थः—तदेव विधिरुपादापयति येन विना स्वयं न सिध्यति। तेन च विना न सिध्यति यत् तस्य साधनमवगतम्। साधनावगमश्च शब्दत एव नान्यतः। शब्दोऽपि च नियोगसंबन्धानपेक्षं संबन्धमात्रं नाभिधत्ते। तेन शब्दोपपादितसंबन्धानुसार्युपादानम्। यत्पुनरविनियुक्तमाधानाद्युपादीयते तद्विनियुक्ताग्न्युपादानार्थमेव। अत्रापि यदि विनियुक्तप्रणयनसिध्यर्थतयैवोपादानमाश्रीयते न तदा नियमस्सिध्यति अन्येनापि तत्सिद्धेः संभवात्। अग्नीनां तु अलौकिकत्वादाधानमेवैक उपायः। ननु क्रिययाप्यन्वयोऽवगम्यत[3] एव। सत्यं गम्यते पुरुषार्थौपयिकतया, न स्वार्थौपयिकतया। अत्राय भावः—गोदोहनप्रणयनसंबन्धो लोकत एवावगतः पशुकामं प्रति विधीयते। न पुनस्स एव शब्देन ज्ञाप्यते येन विनियोगपर्यन्तोऽसौ संबन्धो भवेत्। तेन शब्दावगतस्यापि लौकिकत्वात् तस्य च रूपस्य द्रव्यान्तरेष्वपि संभवात् न तदेव नियमेनो-

---

(1) P. 1023 (2) G. विनियोगत एवाभिधीयते (3) G. adds तत्राह
(4) G. अनुगम्यते

तस्मात तदेवोपादापकं यदर्थमेवान्वयावगमः। यत्पुनरिदं भाष्य-कारेणोक्तं विशेषानवगमात् द्विष्ठं वाक्यमलम्बुसानां [1]यातेति तत् प्रकरणाद्यसंभवे अनिर्णयायैव न पुनः शब्दात् द्वय अवगन्तुं शक्यते। इह तु विशेषावगमान्नानिर्णय इत्यर्थः। ननु न किञ्चिद्विहितमस्तीति परिचोद्य सामान्यविधानोपन्यासः सामसाध्यस्तुत्यपेक्षया नाभिवर्तपरतयेत्यदोषः।

पादेयम्। **तस्मात्तदेव नियमेनोपपादकं[2] यदर्थमन्वयावगमः।** पुरुषार्थ एवोपपादक[3] इत्यर्थः। ननु भाष्यकारेणोक्तं शब्देनैव संबन्धद्वयं [4]प्रतिपाद्यत इति अत्राह—**यत्पुनरुक्तं भाष्यकारेण विशेषानवगमात् द्विष्ठं वाक्यं अलम्बुसानां यातेति तत् प्रकरणाद्यसम्भवे अनिर्णयायैव। न पुनः शब्दात् द्वयमवगन्तुं शक्यते। इह तु विशेषावगमान्नानिर्णय इत्यर्थः।** सत्यं पूर्वपक्षदशायामिदमुक्तं भाष्यकारेण तत्र सिद्धान्तदशायां भवेत् तत्र विशेषानवगमादुभयार्थतावगतिः' इत्यनेन भाष्येण प्रकरणादिभिर्विशेषानवगमात् तत्र, लोके भवेदनिर्णयः[5] अत उभयार्थावगतिरिति वर्णितम्। एतदुक्तं भवति—प्रकरणाद्यसंभवे भवतु लोकेऽनिर्णय इति न पुनः शब्दात् द्वयमवगन्तुं शक्यमित्येवंपरं तत्। इह तु कामिपदश्रवणात् निर्णय इत्यर्थस्तस्य भाष्यस्य। नन्विदमधिकरणं क्रत्वर्थं किञ्चिन्नास्तीति कृत्वाचिन्तया प्रारब्धं; तत्र सामान्यविहितोपन्यासो नोपपद्यते तत्राह—'**ननु न किञ्चिद्विहित-मस्तीति' परिचोद्य सामान्यतो विधानोपन्यासः सामसाध्यस्तुत्यपेक्षया नाभिवर्तपर-तयेत्यदोषः।** अस्यार्थः—नेदं सामान्यविधानमुपन्यस्तं किन्तु स्तुतिस्वभावेन सामसाध्यत्वेन किञ्चिदभिवर्तादिकं साम भविष्यतीत्येवंपरं तत् न पुनरभिवर्तस्वरूपमेव विवक्षितम्।

एकस्य तूभयत्वे। ननु चात्र वाक्यद्वयमस्ति 'दध्ना जुहोति' इत्येकं क्रत्वर्थतया दधिविधायकं ; अपरं च 'दध्नेन्द्रियकामस्य' इति पुरुषार्थोपादकं कथमिह पूर्ववत् केवल-

---

(1) P. 1248 (2) G. पादापक (3) पादापकः (4) G. द्वयमुपपद्यत
(5) भवेदिति निर्णयः

॥ ३ ॥ [1]एकस्य तूभयत्वे संयोगपृथक्त्वम् ॥ ५ ॥

कः पुनः पूर्वपक्षिण आशङ्काहेतुः ? अयमाशङ्काहेतुः यथा 'अग्निहोत्रं जुहोति' 'अग्निहोत्रं जुहुयात स्वर्गकाम' इति च न पृथक् प्रयोक्तृत्वमस्ति स्वर्गकामपदान्वयेपि होमान्वयावगतेः। एवमत्रापि 'दध्ना जुहोति' 'दध्नेन्द्रियकामस्य जुहुयात' इति कामसंयोगेपि दधिहोमावगतेः पुरुषार्थस्यैव प्रयोक्तृत्वं मन्यते[पूर्ववादी] एवं प्राप्तेऽभिधीयते। नैतद्युक्तम् क्रतोरप्यत्र प्रयोक्तृत्वमवसीयते क्रतुरपि हि साधिकारः। न गुणफलसंबन्धः आश्रये ऐदमर्थ्यमपेक्षत

पुरुषार्थत्वशङ्का ; तदाह—कः पुनः पूर्वपक्षिण आशङ्काहेतुः इति। अयमस्याशङ्काहेतुः यथा 'अग्निहोत्रं जुहोति' 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इति च न पृथक् प्रयोक्तृत्वमस्ति स्वर्गकामपदान्वयेऽपि होमान्वयावगतेः एवमत्रापि इन्द्रियकामसंयोगेऽपि दधिहोमावगतेः पुरुषार्थस्य प्रयोक्तृत्वं मन्यते पूर्ववादी। अस्यार्थः—अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यस्य विधेः यद्यप्यधिकारिपदश्रवणेन उत्पत्तिनियोगाद्भेदः तथापि होमार्थान्वितत्वात् अस्योत्पत्तिवाक्यसन्निहितहोमान्वयावगमात् तस्य च होमस्याभेदात् अधिकारविधिना च तत्प्रयुक्तौ उत्पत्तिनियोगस्यापि सिद्धेः न पृथक् प्रयोक्तृत्वम्। तेनाधिकारापेक्षितोत्पत्तिनियोगतया तदनुप्रवेशित्वं तथेहापीन्द्रियकामान्वयेऽपि दधिसाध्यहोमसंबन्धात् तत्प्रयोज्यत्वात् तदनुप्रवेशितैव न्याय्या। न पुनः प्रयोक्त्रन्तरे क्रतुसंबन्धिनि अनुप्रवेश इति। एवं प्राप्तेऽभिधीयते—नैतद्युक्तम् क्रतोरप्यत्र प्रयोक्तृत्वमवसीयते क्रतुरपि हि साधिकारः। अस्यार्थः—'दध्ना जुहोति' इति प्रकृतहोमानुप्रवेशात् तस्य च साधिकारत्वात् तत्प्रयुक्त्यैव प्रयुक्तिसिद्धेः न प्रयुक्त्यन्तराकाङ्क्षाऽस्तीति न पुरुषार्थानुप्रवेशित्वम्। किञ्च गुणफलसंबन्धः आश्रये होमे यत् दध्यादेरैदमर्थ्यं तन्नापेक्षितम्। अनपेक्षितं च तत् न संबध्यते इति नेन्द्रियकामाधिकारानुप्रवेशित्वम्। क्रतुनियोगस्तु क्रत्वैदमर्थ्यमपेक्षत

---

(1) P. 1250

इत्युक्तम्। तस्मात 'दध्ना जुहोति' इति होमार्थ एवायं विनियोगः 'दध्नेन्द्रियकामस्य' इत्येव पुरुषार्थः। यदुक्तं 'अग्निहोत्रं जुहोति' 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्येकः प्रयोक्तेति युक्तं अधिकारान्तराश्रवणात् उपादातुरेवाधिकारकल्पना। इह तु अधिकारद्वयं नित्यं नैमित्तिकं चास्तीति युक्तो विशेषः।

॥ ४ ॥ [1]द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्मः स्यात् ॥ ८ ॥

इह तु प्राणधारणार्थत्वाद्व्रतस्य पुरुषार्थतां मन्यते पूर्वपक्षवादी नियमस्यैव प्राङ्मुखोऽन्नानि भुञ्जीत इति वत् प्रतिग्रह-नियमवच्च।

इति युक्ता तदधिकारानुप्रवेशिता। तस्मात् 'दध्ना जुहोति' इति क्रत्वर्थ एवायं विनियोगः। दध्नेन्द्रियकामस्येत्येव पुरुषार्थः। यदुक्तं 'अग्निहोत्रं जुहोति' 'अग्निहोत्रं जुहुयात् स्वर्गकामः' इत्येकः प्रयोक्तेति—युक्तमधिकारान्तराश्रवणात्। इह तु अधिकारद्वयं नित्यं नैमित्तिकं चास्तीति युक्तो विशेषः।

द्रव्याणां तु क्रियार्थानाम्। कथमत्र प्रकरणाधीतस्यापि व्रतस्य पुरुषार्थतां पूर्वपक्षवादी मन्यते इत्याशङ्क्याह—इह तु प्राणधारणार्थत्वाद्व्रतस्य पुरुषार्थतां मन्यते पूर्वपक्षवादी। नियमस्यैव प्राङ्मुखोऽन्नानि भुञ्जीतेतिवत् प्रतिग्रहादिनियमवच्च। अस्यार्थः—प्राणधारणार्थत्वाद्व्रतस्य पुरुषार्थतां मन्यते पूर्वपक्षवादी नियमेन(यस्य) तदर्थिनस्तत्प्रवृत्तिसंभवात्। तत्र प्रवृत्तस्यैवाधिकारावगमात्। नाधिकारान्तरानुप्रवेशो-न्याय्यः। यथा भोजनप्रवृत्तस्याधिकारिणो लब्धेः प्राङ्मुखतानियमो नाधिकारान्तरमनु-प्रविशति—प्रतिग्रहादिनियमवच्च यथा प्रतिग्रहादिनियमः अर्जनाय प्रवृत्तस्याधिकारिणो लब्धेः नाधिकारान्तरमनुप्रविशति व्रतनियमोऽपि तद्वत पुरुषार्थ एवेति। ननु चैवं सति प्रकरणं बाध्येत। नैष दोषः। सामर्थ्याद्धि प्रकरणं दुर्बलमेव। व्रतसामर्थ्यालोचनया

---

(1) P. 1251

अत्रोच्यते—नायं नियमनियोगोऽधिकारकल्पनां सहते। सन्निहितश्च क्रत्वधिकारः। साक्षात् श्रुताधिकारसन्निधौ यदश्रूयमाणाधिकारं तत तदर्थमेवाभिधानेन प्रतिभाति। तादर्थ्येनैव च नियमस्य नियोज्यसंबन्धलाभात् नाधिकारान्तरापेक्षाऽस्ति। यदुक्तं प्रतिग्रहादिनियमवत् भवितुमर्हतीति। युक्तं तत्राधिकाराश्रवणात् इह पुनः तद्विपरीतं इति दर्शितम्। अतः क्रतुप्रयोज्य एव द्रव्यनियम इति स्थितम्। क्रत्वधिकारप्रयोज्यमित्युक्तं भवति।

॥ ५ ॥ [1]चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत न ह्यशब्दं प्रतीयेत ॥ १० ॥

तत्प्रवृत्तस्य क्षीरादिनियमः प्रतिभाति। प्रकरणपर्यालोचनया च क्रत्वङ्गता तस्य। तत्र प्रकरणात् सामर्थ्यं लिङ्गरूपं बलीय इति तृतीये दर्शितम्। अत्रोच्यते—नायं नियमनियोगोऽधिकारकल्पनां सहते। सन्निहितश्च क्रत्वधिकारः। साक्षाच्छ्रुताधिकारसन्निधौ यदश्रूयमाणधिकारं तत्तदर्थमेवाभिधानेन प्रतिभाति। तादर्थ्येनैव च नियमस्य नियोज्यसंबन्धलाभान्नाधिकारान्तरापेक्षाऽस्ति येनार्थादधिकारः कल्प्यते। तस्मान्नियमनियोगोऽयं क्रत्वधिकारानुप्रवेशितयैव न्याय्यः। यदुक्तं प्रतिग्रहादिनियमवद्भवितुमर्हतीति। युक्तं तत्राधिकाराश्रवणात्। न तत्र सन्निहितोऽधिकारः श्रूयत इत्यर्थः। उपादातुः आर्जयितुः आर्जनाय प्रवृत्तस्याधिकारकल्पनेति। इह पुनस्तद्विपरीतं साक्षात्सन्निहिताधिकारश्रवणादिति दर्शितमादौ। अतः क्रतुप्रयोज्य एव द्रव्यनियम इति स्थितम्। नन्वेतदयुक्तमुक्तं यजिप्रयुक्ततापक्षप्रसङ्गादित्याह—क्रत्वधिकारप्रयोज्यमित्युक्तं भवतीति।

चोदनायां फलाश्रुतेः। ननु विश्वजिदुदाहरणमत्रायुक्तम्। षष्ठे सत्रागोरणवतो-

(1) P. 1252

इहाधिकारशून्या विधय उदाहरणम्। किं तेषामधिकारकल्पना उत तावत्येव पर्यवसानमिति संशयः। ननु च 'सफलं' 'अफलं' इत्यत्र सन्देहो भाष्ये श्रूयते। उच्यते—अधिकारादृते फलं नास्तीति स्वर्गकामाधिकरणे 'तस्मात्सिद्धोऽधिकार' इति वदता प्रदर्शितम्। अन्यथा हि सिद्धं स्वर्गस्य प्राधान्यमित्युपसंहारः स्यात्। तस्मात साधिकारनिरधिकारचिन्तैवेयम्।

किं तावत्प्राप्तम्? यावद्वचनं वचनमिति कर्तव्यतापर्यवसाय्येव नियोगो नाधिकारपर्यन्तो भवितुमर्हति। ननु च नियोग एवाधिकारादृते न निर्वर्त्यते।

ऽधिकारस्य स्थापितत्वात् तत्राह—इहाधिकारशून्या विधय उदाहरणम्। अयमाशयः—यदधिकारशून्यं तदिहोदाहरणम्। तत्र सन्तमप्यधिकारं असन्तमिव कृत्वा न्यायश्चिन्त्यत इति। किं तेषामधिकारकल्पना उत तावत्येव पर्यवसानमिति संशयः। ननु सफलं अफलमित्यत्र सन्देहो भाष्ये श्रूयते। उच्यते—अधिकारादृते फलं नास्तीति स्वर्गकामाधिकरणे[1] तस्मात्सिद्धोऽधिकार इति वदता प्रदर्शितम्। अन्यथा हि सिद्धं स्वर्गस्य प्राधान्यमित्युपसंहारः स्यात्। तस्मात् साधिकारनिरधिकारचिन्तैवेयम्। अस्यार्थः—फलसन्देहो भाष्यकारीयोऽधिकारनिबन्धनफलम्। न पुनः फलतयैव, नियोगस्य वाक्यार्थत्वात् तस्य च फलानपेक्षत्वात्। नियोज्यं नियोगोऽपेक्षते न फलम्। कामिनस्तु नियोगश्रवणात् फलमाक्षिप्यत इति षष्ठे दर्शितम्। एतच्च भाष्यकारेणापि दर्शितम् स्वर्गस्य प्राधान्यं साधयित्वा तस्मात् सिद्धोऽधिकार इत्युपसंहारात्। यदा ह्यधिकारापेक्षमेव फलं स्यात् तदा कारणभूतं तदेव पूर्वमपि साधयितव्यम् तत्फलभूतं स्वर्गस्य प्राधान्यं साक्षादुक्तमिति युज्येतोपसंहारः। तन्निरपेक्षत्वे तु सिद्धं स्वर्गस्य प्राधान्यमित्युपसंह्रियेत। किं तावत्प्राप्तम्? यावद्वचनं वचनमिति कर्तव्यतापर्यवसाय्येव नियोगो नाधिकारपर्यन्तो भवितुमर्हति। पूर्वपक्षमाक्षिपति—ननु च नियोग एवाधिकारादृते न निर्वर्त्यते।

---

(1) G. adds स्वर्गकामाधिकारे वक्ष्यामः

केन वा उक्तमधिकाराहते न नियोगो निष्पद्यत इति अधिकृतस्य नियोगः न पुनः नियोगत एवाधिकारः। ननु चाधिकाराहतेऽननुष्ठेयत्वात नियोगावगतिर्बाध्येत। नावगतेः कश्चिद्बाधः। अनधिकृतास्तु न कुर्वते किमायातमवगतेः। तदुक्तं भाष्यकारेण 'क्षेम्योऽयं पन्थाः गच्छतु भवान् अनेन' इति। तस्मान्नात्र कस्यचिदधिकारं पश्यामः। अध्याह्रियमाणेप्यधिकारे कस्याधिकारोऽध्याह्रियेत यस्मान्न नियोगा-

---

यावद्धि कश्चित् ममेदं कार्यमिति न प्रतिपद्यते तावत् नानुतिष्ठेत्। अनुष्ठानाभावे च नियोगो न निष्पद्यते। समादधाति—केन वोक्तमधिकाराहते नियोगो न निष्पद्यत इति। यदि न निष्पद्यते कामं मा निष्पादि। अधिकृतस्य नियोगः योऽधिक्रियते भवतु तस्य नियोगः न पुनर्नियोगोऽस्तीत्येतावता अधिकारो वचनमन्तरेण भवति। ननु चाधिकाराहतेऽननुष्ठेयत्वात् नियोगावगतिर्बाध्येत। तत्रायमभिप्रायः। कार्यरूपो विध्यर्थः सोऽधिकारिणं विनाऽनुष्ठीयमानः [1]कार्यरूपो न भवतीत्यवगतार्थशून्यतयाऽवगतेः बाधः स्यात। अतोऽवगतिसिध्यर्थमधिकारिणं कल्पयिष्याम इति। उत्तरं—नावगतेः कश्चिद्बाधः अनधिकृतास्तु न कुर्वते किमायातमवगतेः। अस्यार्थः—अवगतावेव लोके शब्दा व्युत्पन्नाः तैरर्थावगतिर्भूतैव। तेन व्युत्पत्तिबाधस्तावन्नास्ति। किन्तु अवगतिः काचित् स्यवतार्था भवति काचिन्नेति। किमत्र क्रियताम्। नह्यवगतिरर्थवतीति राजाज्ञा। विचार्यमाणा चेदर्थशून्या भवति भवतु। [2]अप्रामाण्यं स्यादिति चेत् अस्तु। तदुक्तं भाष्यकारेण —क्षेम्योऽयं पन्थाः गच्छतु भवानिति। यथेदं मिथ्या तथेदमपि भवतीत्यर्थः। तस्मान्नात्र कस्यचिदधिकारं पश्यामः। ननु लोकव्युत्पत्त्यपेक्षया वेदे शब्दादर्थावगतिः लोके चाध्याहारेणाप्यवगतिरस्ति 'द्वारं' 'पुरं' इत्यादिषु। तस्मादत्राप्यधिकारमध्याहरिष्यामः इति अत्राह—अध्याह्रियमाणे चाधिकारे कस्याधिकारोऽध्याह्रियते यस्मान्न नियोगा-

---

(1) कार्यत्वशून्योभवति (2) अप्रमाणं

द्विशेषाक्षेपः संभवति। न चापरिपूर्णं वाक्यमित्यत्र प्रमाणमस्ति। 'पटोभवति' इत्येतावदेव वाक्यम्। 'रक्तः पटोभवति' इत्यपि भवति। तस्मात् पदान्तरश्रवणनिबन्धन एव वाक्येषु अर्थान्तरावगमः। न पुनः अश्रूयमाण एवार्थान्तरकल्पनाप्रमाणमस्ति। कथं तर्हि 'वसन्ताय कपिञ्जलानालभते' ग्रीष्माय कलविङ्कान् इति अगृह्यमाणविशेषत्वादिति तत्रोक्तम्। लोके तर्हि कथं 'द्वारं' 'द्वार' मित्येवमादिषु।

द्विशेषाक्षेपः। किञ्च अपरिपूर्णे वाक्ये लोकेऽध्याहारो दृष्टः अपरिपूर्णं च तदुच्यते यदन्वितमर्थं न शक्नोति वदितुम्। अध्याहारे च अन्विताभिधानव्युत्पत्त्यनुपपत्तिरेव[1] कारणम्। अनध्याहृतेऽन्विताभिधानानुपपत्तेः। अत्र चापरिपूर्णमिति न नः प्रमाणमस्ति। यतः द्वयोर्द्वयोरन्विताभिधानम्। इह तु विषयाभिधानेन तदुपपत्तेरपरिपूर्णता नास्त्येव यथा 'पटो भवति' इत्येतावन्मात्रोच्चारणे वाक्यं परिपूर्णम्। यदा तु तत्रैव रक्तपद-मुच्चार्यते तदा रक्तः पटो भवतीत्यपि भवति न पुनः द्विपदं न वाक्यम्। तस्मात् पदान्तरश्रवणनिबन्धन एव वाक्येषु पदद्वयमात्रेणोपपन्नेषु अर्थान्तरावगमः तेन यत्राधिकारिपदं श्रूयते भवतु तत्राधिकार्यवगमः। न पुनस्तदभावे अपरिपूर्णतेति तदाह —न पुनः अश्रूयमाण एवार्थान्तरकल्पनाप्रमाणमस्ति। यदि पदद्वयेनान्विताभिधा-नोपपत्तेः परिपूर्णताऽस्ति कथं तर्हि 'वसन्ताय कपिञ्जलानालभते' ग्रीष्माय कलविङ्कान् इत्यत्रालभत्यनुषङ्गः ग्रीष्माय कलविङ्कानित्यत्र पदद्वयेनान्विताभिधानोपपत्तेः। विभक्त्यर्थस्य चावगम्यमानतया कर्मत्वाश्रयणेनाप्युपपत्तेः। अत्रोत्तरं—अगृह्यमाणविशेषत्वादिति तत्रोक्तम्। सर्वत्र पदद्वयस्य विद्यमानत्वात् वसन्ताय कपिञ्जलान् ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरीन् इति। तेन सर्वेषां पदान्तराश्रवणोत्थाप्याकाङ्क्षावत्त्वात् संबन्धयोग्यत्वाच्चार्थस्य [अ]सजातीयपदव्यवधानाभावाच्च सर्वैस्संबन्धः। लोके तर्हि कथं द्वारं इति पदद्वयश्रवणे

---

(1) G. व्युत्पत्ति

युक्तं कारकाणां क्रियापेक्षत्वात् न पुनर्नियोगोऽधिकारमपेक्षत इत्युक्तम्। तस्माद्यावद्वचनं वचनं इति। अत्राभिधीयते—कारकमिव क्रियापेक्षं नियोगमप्यधिकारापेक्षं वदामः। कुतः? लोके तथा दर्शनात् देवदत्तगामभ्याज शुक्लां इति। न हि अनपेक्षितविशेषं लोके वक्तारो भवन्ति इति देवदत्तं यज्ञदत्तं वाऽधिकृत्य लिङादयः प्रयोज्याः। ननु च देवदत्तादयः कर्तृविशेषणम्। यथा न कर्तृविशेषणं तथा षष्ठे वक्ष्यामः।

सत्यध्याहारः। उत्तरं—**युक्तं कारकाणां क्रियापेक्षत्वात्** कारकपदानां क्रियापदेऽश्रूयमाणेऽपरिपूर्णत्वात् भवत्यध्याहारः। **न पुनर्नियोगोऽधिकारमपेक्षत इत्युक्तम्।** तेन विनापि विषयेण सहान्विताभिधानोपपत्तेरिति। **तस्माद्यावद्वचनं वचनं** न पुनरध्याहारापेक्षमिति। **अत्राभिधीयते—कारकमिव क्रियापेक्षं नियोगमप्यधिकारापेक्षं वदामः।** अस्यार्थः—यथा कारकस्य क्रियया सहान्विताभिधानं तथा नियोगस्यापि न केवलं विषयेण सहान्विताभिधानम्। अपि तु नियोज्यपदेनापि। उभयानुबन्धव्यतिरेकेण अन्वित एवाभिधातुं न शक्यते। यथा क्रिया एकेनापि कारकेणान्विताऽभिधीयते द्वाभ्यां बहुभिरपि तथेह नास्ति। सर्वथा अनुबन्धद्वयान्वितोऽभिधेयः नान्यथेति अधिकार्यनुबन्धाश्रवणे अपरिपूर्णत्वादध्याहारो युक्तः। उभयान्वित एवाभिधेय इति कुतः? **लोके तथा दर्शनात्।** अभ्याज गां शुक्लां' इत्येतावन्मात्रमनपेक्ष्य नियोज्यविशेषं वक्तारो न भवन्ति यस्मात् देवदत्तं यज्ञदत्तं वाऽधिकृत्य लिङादयः प्रयुज्यन्ते। **ननु देवदत्तादयः कर्तृविशेषणं** तेन विनापि नियोज्येन लोके प्रयोगोऽस्तीति[1] चोद्यार्थः। **यथा कर्तृविशेषणं न भवति तथा षष्ठे वक्ष्यामः।** यस्य हि विषयानुप्रवेशः शब्दविरोधान्न संभवति सोऽधिकारिविशेषणं यथा स्वर्गकाम इति यावज्जीवमिति च। अत्रापि संबोधनविभक्तियोगश्च कर्तृत्वे नोपपद्यत इति देवदत्तादयो नियोज्यविशेषणमेव। नन्वार्थम(न)धिकारिविशेषणत्व—

---

(1) R. नास्तीति

अधिकाराद्धि कर्तृत्वं स्थास्यति न कर्तृत्वादधिकार-तस्मात् श्रुत्येकदेशः स उच्यते—यत्पुनरत्र भाष्यकारेणोक्तं "एवं लौकिकोऽध्याहारः प्राप्नोति" इति परिहृतं च "वैदिकमेवाध्याहरिष्याम" इति, व्यवधानं चाशङ्क्य 'अपि पश्यसि' इति दृष्टान्ताभिधानं सर्वमिदं असमञ्जसमिव प्रतिभाति यन्नियोगादवगम्यते कथं तदवैदिकं ? व्यवधाने च कथमनुषङ्गः ? यदप्युक्तं 'अपि पश्यसि धावन्तं' इति। असंबन्धिपदव्यवायात् नैवायं व्यवायः योग्यपदसंबद्धं व्यवहितमित्युच्यते। अत्रोच्यते— वैदिकमेवाध्याहरिष्यामः इति। एतदुक्तं भवति। न कारकतयाऽध्याह्रियते।

माश्रित्य संबोधनविभक्तिः। भवतु च कर्तृविशेषणत्वमेव शाब्दं तत्राह—अधिकाराद्धि कर्तृत्वं स्थास्यति[1] न कर्तृत्वादधिकारः। नार्थमधिकारित्वं संभवति आर्थं तु कर्तृत्वं संभवति। तस्मात् श्रुत्येकदेशः स उच्यते। यत्पुनरत्र भाष्कारेणोक्तं एवं लौकिकोऽध्याहारः प्राप्नोतीति। परिहृतं च वैदिकमेवाध्याहरिष्याम इति तथा व्यवधानं चाशङ्क्य 'अपि पश्यसि' इति दृष्टान्ताभिधानं तत्सर्वमसमञ्जसमिव प्रतिभाति यन्नियोगादवगम्यते अध्याहृतेनाप्यधिकारिविशेषणेन तावत् यत्फलमवगम्यते कथं तदवैदिकम्। साक्षाच्छ्रुत इवाधिकारपदे। तत्र हि नियोगत एव फलम्। व्यवधाने च कथमनुषङ्गः। यदप्युक्तं 'अपि पश्यसि धावन्तं' इत्यसंबन्धिपदव्यवायान्नैवायं व्यवायः न हि दूरे जातमित्यादीनि पदानि दर्शिना संबध्यन्ते। तेन च न दर्शि व्यवदधति संबन्धयोग्येन हि सजातीयेन पदेन संबद्धं व्यवहितमुच्यते। अत्रोच्यते—फलमध्याह्रियत इत्युक्ते कस्यचिदियमाशङ्का स्यात् फलतयैवाध्याहार उक्त इति तदभिप्रायेण चोद्यमेवं लौकिकोऽध्याहार इति। परिहारस्तु नियोज्यविशेषणाध्याहारेण नियोगात् फलमिति। तदेतदाह— अत्रोच्यते—वैदिकमेवाध्याहरिष्याम इति। एतदुक्तं भवति। न कारकतयाऽध्याह्रियते न क्रियायाः

---

(1) G. स्थाप्यते

कथं तर्हि ? अधिकारिमुखेनैवेति । कारकतया हि फलसंबन्धो लौकिको भवति प्रमाणान्तरापेक्षत्वात् दृष्टान्तोऽपि यथा न पदव्यवधानमात्राद्व्यवहितं भवति किन्तु योग्यपदसंबद्धं वाक्यान्तरव्यवहितं व्यवहितं भवति । तस्मान्नाधिकाराध्याहारे व्यवधानम् । अपि पश्यसीति च सूक्तम् । अतोऽश्रूयमाणाधिकाराण्यपि साधिकाराणीति सिद्धम् ।

॥ ६ ॥ [1]तत्सर्वार्थमविशेषात् स स्वर्गः सर्वान् प्रत्यविशिष्टत्वात् ॥ १३, १५ ॥

स्थितं नियोगो नाधिकारशून्य इति । केनाधि–

कर्मकारकतया किं तर्हि अधिकारिमुखेनैव अधिकारिविशेषणलाभायैवेति । कारकतया हि फलसंबन्धो लौकिको भवति प्रमाणान्तरापेक्षत्वात् । क्रियाकारकभावो हि सर्वत्र प्रमाणान्तरवेद्य एव । दृष्टान्तोऽपि यथा न पदव्यवधानमात्रात् व्यवहितं भवति किन्तु योग्यपदसंबद्धं वाक्यान्तरव्यवहितं भवति तथाऽत्रापि योग्यपदसंबन्धाभावात् व्यवधानाभावः । तस्मान्नाधिकाराध्याहारे व्यवधानम् । अपि पश्यसि इति च सूक्तम् । अतोऽश्रूयमाणाधिकाराण्यपि साधिकाराणीति सिद्धम् ।

तत्सर्वार्थमनादेशात् स स्वर्गः स्यात् । अत्र सूत्रद्वयमेकीकृत्य पठतः टीकाकारस्यायं भावः—स्वर्गकामाधिकार[2]निर्णयपर्यन्तमेकमिदमधिकरणं नान्यथाऽयमेव सिद्धान्तोऽवतिष्ठते कल्पितेऽपि नियोज्ये पुनरगृह्यमाणविशेषणतया सर्वार्थिनामधिकारः स्यात् । न च परमार्थतस्सर्वेषामधिकारः शक्यतेऽवगन्तुम् एकेनैव कृतार्थत्वात् । पुनस्तत्राप्यगृह्यमाणविशेषत्वात् विशेषकल्पनानुपपत्तेः पूर्वाधिकरणभङ्गोऽपि स्यात् [3]यावन्न विशेषकल्पना स्यात् तावदस्यैवासिद्धेरिति । स्थितं नियोगो नाधिकारशून्य इति । अनेनावान्तरसङ्गतिमाह । स्थितमिति चानेनात्र पूर्वपक्षे पूर्वाधिकरणसिद्धान्तः स्थितोऽपि न निर्वहतीत्याह । केनाधि–

(1) P. 1255 (2) G. रि (3) G. ननु विकल्पः स्यात् न, अन्वयस्यैवासिद्धेः

कारेणेति न ज्ञायते। अतोऽगृह्यमाणविशेषत्वात् सर्वार्थिभिः संबध्यत इति पूर्वः पक्षः। अत्रोच्यते—बहुभिः संबन्धे नियतमेकेन संबन्धः भवति। एकेन चेदुपपन्नो नियोगः नाधिकारान्तरसंबन्धे प्रमाणमस्ति। ननु चागृह्यमाणविशेषत्वान्नासौ निरूपयितुं शक्यत इत्युक्तम्। सत्यं यदि न गृह्यते विशेषः। इह तु सर्वान् प्रत्यविशिष्टत्वात् स्वर्गकामस्यैवाधिकारोऽत्रावगम्यते। सामान्यकल्पनायां हि विशेषावगमहेत्वभावात्। तदिदमुक्तं—"स स्वर्गः स्यात् सर्वान्

कारेणेति न ज्ञायते। अतोऽगृह्यमाणविशेषतया सर्वार्थिभिः संबन्ध इति पूर्वः पक्षः। अस्यार्थः—यद्यप्यन्तरङ्गतया अवश्यंभावितया च जीवनमेवाधिकारिविशेषणं युक्तं तथापि प्रयुक्तिगौरवप्रसङ्गात् पुरुषाणां च कामप्रवणप्रवृत्तित्वात् अर्थितैवाधिकारिविशेषणम्। तत्र च विशेषो न गृह्यत इति सर्वार्थिनामधिकार इति। अत्रोच्यते—बहुभिस्संबन्धे नियतमेकेन संबन्धः। एकेन चेदुपपन्नो नियोगः नाधिकारान्तरसबन्धे प्रमाणमस्ति। [1]तदेक एवात्राधिकारीति युक्तम्। ननु चागृह्यमाणविशेषत्वात् नासौ निरूपयितुं शक्यत इत्युक्तम्। सत्यमुक्तं यदि न गृह्यते विशेषः। इह तु सर्वान् प्रत्यविशिष्टत्वात् स्वर्गकामस्यैवाधिकारोऽवगम्यते सामान्यकल्पनायां हि विशेषावगमे हेत्वभावात्। अस्यार्थः—कामिनो ह्यधिकारे कल्प्यमाने दुःखनिवृत्तिकामिता तावन्नाधिकारिविशेषणं आश्रयणीयम्। सुखकामनायां पुरुषाणामत्यन्तोन्मुखत्वात्। [2]सुखीति तावत स्वयं सुखमनुभूयते[3]। दुःखं च तद्विरोधादेव नानुभूयते। दुःखनिवृत्तिमात्रे च सुषुप्तिदशायां सुखानुभवो नावश्यं भवति। तत्र सुखे काम्यमानतयाऽधिकारिविशेषणे स्थिते तद्विशेषग्रहणकारणाभावात् अनवच्छिन्नं सुखमात्रमेवावशिष्यते। अतस्सामान्यकल्पनायां सत्यां विशेषावगमे हेत्वभावात् सुखसामान्यमात्रं स्वर्ग एवाधिकारिविशेषणमिति। ननु सूत्रकारस्सर्वान् प्रत्यविशिष्टत्वादिति युक्तिमाह—तदिदमुक्तं—स स्वर्गः स्यात् सर्वान्

(1) G. तस्मादेक (2) G. सुखे हि (3) G. adds दुःखनिवृत्तिमात्रं सुषुप्त्यादिदशायां सुखानुभावो नावश्यं भवति।

मत्यविशिष्टत्वात" इति ।

॥ ८ ॥ क्रतौ फलार्थवादमङ्गवत कार्ष्णाजिनिः ॥ १७ ॥

स्थितमश्रूयमाणाधिकारेषु सर्वान् प्रत्यविशिष्टत्वात् स्वर्गोऽधिकारविधिहेतुरिति । यत्र पुनः विशेषाभिधायिनोऽर्थवादाः श्रूयन्ते यत्र संशयः— किं अत्रापि स्वर्ग एवाधिकारहेतुः । अथ वाऽर्थवादाभिहितं वस्त्विति । पूर्वपक्षवादी नियोगाद्यदवगम्यते तदेव युक्तमिति मन्यते । अर्थवादस्त्वर्थवाद एव ।

प्रत्यविशिष्टत्वात् इति । अनेन यदेवास्माभिरुक्तं सर्वान् सुखविशेषात् प्रति सुखसामान्यस्याविशिष्टत्वं तदेव सूत्रकारेणाप्युक्तमित्यर्थः ।

क्रतौ फलार्थवादम् । स्थितमश्रूयमाणाधिकारेषु सर्वान् प्रत्यविशिष्टत्वात् स्वर्गोऽधिकारहेतुरिति । अनेनावासङ्गतिं पूर्वपक्षबीजं चाह । अत्र भाष्यकारः फलविध्यर्थवादचिन्तां करोति । सा चायुक्ता । पर्णमय्यधिकरणे हि सर्वेषामेवंजातीयकानामर्थवादत्वमुक्तम् फलप्रतिपादकत्वाभावादिति । अनया शङ्कया टीकाकारो भाष्यकारीयसंशयाभिप्रायं दर्शयन्नाह—यत्र पुनर्विशेषफलाभिधायिनोऽर्थवादाः श्रूयन्ते तत्र संशयः किं तत्रापि स्वर्ग एवाधिकारहेतुः अथवाऽर्थवादाभिहितं वस्तु इति । अस्यार्थः —स्थितमेवार्थवादत्वं तथाप्येवं चिन्त्यते अधिकारशून्यविधौ कल्प्यमाने चाधिकारिणि किमर्थवादाभिहितफलकामोऽत्र अधिकारी कल्प्यतां उत स्वर्गकाम एवात्रापि भवतु यत्रापि विशेषाभिधायकोऽर्थवादोऽस्तीति । तेन नास्ति विरोधः । पूर्वपक्षवादी नियोगाद्यदवगम्यते तदेव युक्तमिति मन्यते । अर्थवादस्त्वर्थवाद एव अस्यार्थः—स्थितं अर्थवादास्तावन्न फलप्रतिपादका इति, यदि परं नियोगसामर्थ्यमात्रेण कल्पना सा विश्वजिदादिष्विवाविशिष्ट

अत्रोच्यते—अर्थवादाभिहितमेव फलं युक्तम्। कुतः? एवमर्थस्तुत्यैव स्तुत्यर्थ उपपन्नो भवति। ननु च नियोगात् स्वर्गार्थतैवावगम्यत इत्युक्तम्। सन्दिग्धे च वाक्यशेषान्निर्णयः उक्तः। अत्रोच्यते—सत्यं संशयो नास्ति। निश्चयोऽपि नैव विद्यते। अतश्च वाक्यशेषाद्योऽर्थोऽवगम्यते स एव वाक्यार्थः। न चाप्रतिपन्ने वाक्यार्थे केवलान्नियोगात् किञ्चित्प्रतिपद्यते। तस्मात्सूक्तमर्थवादाभिहितमेवाधिकारहेतुरिति।

इति स्वर्गकामिन एवात्राधिकारो युक्तः। अत्राभिधीयते—अर्थवादाभिहितमेव फलं युक्तम्, कुतः? एवमर्थस्तुत्यैव स्तुत्यर्थ उपपन्नो भवति। अस्यार्थः—कल्पनापि क्रियमाणा सैव युक्ता या सर्वपदानुगुणा। इह च स्वर्गे कल्प्यमाने अर्थवादस्थप्रतिष्ठादिपदं स्तुत्यर्थं स्वर्गपरमिति कल्पनीयम् तत्रापि परोक्षार्थवृत्तिरादरणीया। प्रतिष्ठायां तु अधिकारिविशेषणतया कल्प्यमानायां तत्फलत्वात् कर्मणः प्रयोजनस्तुत्यैव स्तुत्यर्थ उपपन्नो भवति। तेन अर्थवादाभिधेयप्रतिष्ठादिकाम एवाधिकारी कल्पयितव्यः। ननु च नियोगात् स्वर्गार्थतैवावगम्यत इत्युक्तम्। सन्दिग्धे च वाक्यशेषान्निर्णय उक्तः। न चेहास्ति संशयः तेन स्वर्गकाम एवाधिकारी युक्तः। उच्यते—सत्यं संशयो नास्ति। किन्तु ज्ञानानुत्पत्तिमात्रमेव यावत्। तदाह—निश्चयोऽपि नैव विद्यते। अतः [1]स्ववाक्यशेषाद्योऽर्थोऽवगम्यते स एव वाक्यार्थः। वाक्यशेषेण सह वाक्यस्यार्थप्रतिपादकत्वात् तदनुगुण एव वाक्यार्थो न्याय्यः। यदि यावत्पदान्तरनिरपेक्षाल्लिङादिशब्दमात्रादेव नियोगोऽवगम्यते तदा तद्बलेन स्वर्गकामो निश्चीयते। न त्वेतदस्ति। तदाह—न चाप्रतिपन्ने वाक्यार्थे केवलान्नियोगात् किञ्चित्प्रतिपद्यते[2] तस्मात्सूक्तमर्थवादाभिहितमेव अधिकारहेतुरिति। नन्वत्राध्याहार्यमेवाधिकारि[3]पदमुक्तम्। भाष्ये च अर्थवाद एव कल्पितविधायकविभक्तिः फलविधिर्भवतु। यदि वा धात्वर्थेन सह प्रयोगवचन एव

---

(1) R. स्वर्गवाक्य (2) प्रतिपाद्यतेति (3) G. अधिकारपद

यत्पुनर्भाष्यकारेणोक्तं–विभक्तिमात्रं कल्प्यते स सह्धात्वर्थेन प्रयोगवचनो विधास्यतीति । पक्षे कार्ये कारणविशेषकल्पना[नाय] न खेदनीयं मन इत्यभिप्रायः ।

॥ ९ ॥ [1]काम्ये कर्मणि नित्यः स्वर्गो यथा यज्ञाङ्गे क्रत्वर्थः ॥ २० ॥

इदमिदानीं चिन्त्यते—यदि पुनर्नियोगात् स्वर्गाधिकारः । पदान्तरयोगाच्चोपाधयः कल्प्यन्ते शाकमप्याहरेतिवत् को दोष

विधास्यतीति तदाह—यत्पुनर्भाष्यकारेणेत्यादि । अस्यार्थः—नात्र भाष्यस्य तात्पर्यम् । किन्तु अर्थवादाभिहितं [2]तावदत्र फलम् । सम्बन्धः, तद्यथातथा वाऽस्तु नात्राभिनिवेष्टव्यमिति अनास्थाभिधानं[3] चामुमेवार्थं प्रकटयति ।

काम्ये कर्मणि । ननु चेदमधिकरणं पूर्वाधिकरणेन दूरोत्सारितम् । यत्रार्थवादस्थेपि फले स्वर्गो न कल्प्यते तत्र सुतरां विध्युद्देशगते [4]साक्षादधिकारिविशेषणीभूते इतीमामाशङ्कामपनयन्नाह—इदमिदानीं चिन्त्यते यदि पुनर्नियोगात् स्वर्गाधिकारः पदान्तरयोगाच्चोपाधयः कल्प्यन्ते शाकमप्याहरेतिवत् को दोषः स्यात् । एतदुक्तं भवति—तत्र हि केवलस्वर्गकामाधिकारिता निषिद्धा यत्र साक्षात्स्वर्गकामस्य [प्रतिष्ठाकामस्य] श्रवणमस्ति इह तु नियोगात् स्वर्गाधिकारः पदान्तरस्य [5]विध्युद्देशगतस्यार्थवादगतस्य च श्रवणादन्वाचीयमानतया ब्रह्मवर्चसप्रतिष्ठादिकं कल्प्यतामिति आशङ्केति न दूरोत्सारणात् को दोषः इति वदन् मन्दतां पूर्वपक्षस्याह । साक्षादप्रतीतेः स्वर्गकामस्य स्वर्गकामपदेन

---

(1) P. 1258 (2) R. तावदत्र यथा फलं तथास्तु (3) G. वा मु (4) गतसाक्षा (5) G. स्वर्गोऽस्तु पदार्थस्य

स्यात्। न खलु कश्चिद्दोषः। किन्तु अनिश्चितात् सामान्याधिकारात् विशेष उपाधिरिति तु दुश्शकं वक्तुम्। काष्ठसंयुक्तमिव शाकाहरणम्।

॥ १० ॥ [1]सार्वकाम्यमङ्गकामैः प्रकरणात् ॥ २१ ॥

सर्वेभ्यः कामेभ्यो दर्शपूर्णमासाविति किमयमनुवादः। अथवाऽयमपि विधिरिति। प्राप्तार्थत्वादनुवाद इति मन्यते। कथं प्राप्तिः? किञ्चिदङ्गद्वारेण किञ्चित्स्वत इति पूर्वः पक्षः।

तस्मादुपाधिकारा अन्वाचीयेरन्। को दोषः?। राद्धान्तमाह—न खलु कश्चित् ब्रह्महत्यादिदोषः किन्तु अनिश्चितात् सामान्याधिकारात् विशेष उपाधिरिति [2]दुश्शकं वक्तुम् काष्ठसंयुक्तमिव[3] शाकाहरणम्। अस्यार्थः—सत्यं ब्रह्मवर्चसादयः उपाधिकारा अन्वाचीयेरन् यदि सामान्येन स्वर्गकाममात्रस्याधिकारकल्पना निश्चिता स्यात्। ननु नियोगात् किमिति न निश्चीयते। मैवं। विशेषश्रवणे सति नियोगाक्षेपस्यैवानुदयात्। ननु विशेषश्रवणमुपाधिकारोऽन्वाचयः। मैवम्। [4]इतरेतराश्रयप्रसङ्गात् (न)सामान्यकल्पनायां निश्चितायां विशेषश्रवणमुपाधिकारोऽन्वाचयः उपाधिकारान्वाचये च निश्चिते सामान्यकल्पनेति। लोके तु काष्ठाहरणस्य साक्षाच्छ्रुतत्वात् शाकाहरणमुपाधिकार इति युक्तम्। काष्ठसंयुक्तमिवेति वैधर्म्यदृष्टान्तः।

सार्वकाम्यमङ्गकामैः प्रकरणात्। 'सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ' इति किमयमनुवादः अथ वा अयमप्यधिकारनियोग इति संशये प्राप्तार्थतयाऽनुवाद इति मन्यते। कथं प्राप्तिः? किञ्चित् अङ्गद्वारेण, किञ्चित् स्वत इति पूर्वः पक्षः।

---

(1) P. 1259 (2) G. शक्यते वक्तुं (3) संयुक्तादिव (4) G. विशेषणैः परिपूर्णैर्वाक्ये पुनरध्याहारानुपपत्तेः नोपाधित्वं शक्यते कल्पयितुं अथान्वाचीयमानतया न तावन्मात्रेण निराकांक्षतेति। तदसत्—अन्वाचीयमानतया साक्षादप्रतीतेः स्वर्गकामबलेनान्वाचीयमानत्वे इतरेतर।

ननु प्रधानसंबन्धितयैवैतच्छ्रूयते कथमङ्गापेक्षोऽनुवादः। अङ्गद्वारमपि हि प्रधानेन व्यपदिश्यते यूपवत्।

अत्राभिधीयते—प्रमाणान्तरावगम्यमिदं यदुतान्यसंबन्धी अन्येन व्यपदिश्यत इति। सिद्धे चानुवादे प्रमाणान्तरगम्यता, प्रमाणान्तरगम्यतायां चानुवाद इतीतरेतराश्रयत्वम्। तस्मान्निरपेक्षाच्छब्दान्नियोग एवेति मन्यामहे। यूपे पुनरर्थान्तरविधेयत्वात् प्रमाणान्तरप्रमेयता युक्ता।

॥ ११ ॥ [1]तत्र सर्वेऽविशेषात् ॥ १७ ॥

अयमभिप्रायः—साक्षात्तावदिह विधिर्न श्रूयते। स कल्पयितव्यः। कल्पनायां च अप्राप्तार्थता हेतुः। न चाप्राप्तार्थतेत्यनुवाद एवेति। **ननु प्रधानसंबन्धितयैवैतच्छ्रूयते। कथमङ्गापेक्षोऽनुवादः।** अस्यार्थः—प्रधानस्य हि सर्वफलतोच्यते। सा कथमङ्गानां प्राप्नोति। परिहरति—**अङ्गद्वारमपि हि [2]प्रधानेन व्यपदिश्यत** एव। अङ्गसंबन्धं प्रधानस्योच्यते। **यूपवत्** यथा 'वाजपेयस्य यूप' इति। **अत्राभिधीयते—प्रमाणान्तरगम्यमिदं यदुतान्यसंबन्धि अन्येन व्यपदिश्यत इति।** शब्दाद्धि [3]साक्षात्संबन्धसंभवे परम्पराश्रयणमयुक्तम्। यदा ह्येतदवगतं भवति यथा संबन्धसंबन्धिप्रतिपादकमेतदिति तदा परम्पराश्रयणम्। ननु अनुवादकत्वादेव प्रमाणान्तरगम्यता भविष्यति इत्यत्राह—**सिद्धे चानुवादत्वे** प्रमाणान्तरगम्यता **प्रमाणान्तरगम्यतायां चानुवाद इतीतरेतराश्रयता तस्मान्निरपेक्षाच्छब्दात् नियोग एवेति मन्यामहे। यूपे पुनरर्थान्तरस्य** सप्तदशारत्निताया **विधेयत्वान्न** यूपविधानमित्यनुवादसिद्धेः **प्रमाणान्तरप्रमेयता** यूपवाजपेयसंबन्धस्याश्रयणीयेति।

---

(1) P. 1251 (2) G. प्राधान्ये (3) R. शब्दादपि

इदमिदानीं चिन्त्यते—सकृत्सर्वकामावाप्तिः उत यावत्कामं प्रयोग इति। सर्वकामनिमित्ततया श्रवणात् न प्रयोगे विशेषावधारणा शक्या। एकत्वादिति पूर्वः पक्षः। ननु च सर्वकामो नाम नैव कश्चिदस्त्यधिकारी अनधिकाराच्च फलोत्पत्तेरसंभवः। उच्यते—यदि कामना अङ्गं स्यात अनुत्पन्ना सती नाङ्गभाव उपपद्यत इति भवति कामनानामनुत्पादः सकृत्प्रयोगे सर्वफलानुत्पत्तौ हेतुः।

तत्र सर्वेऽविशेषात्। यदा पूर्वाधिकरणे स्थितं विधिरिति तदा चिन्तेयमुपपद्यते इत्यनान्तरसङ्गतिं वदन् संशयमाह—**इदमिदानीं चिन्त्यते—किं सकृत्** प्रयोगे सर्वेषां पुत्रपश्वादीनां प्राप्तिः **उत यावत्कामं प्रयोग इति।** यावन्तः काम्यमानाः तावन्तः प्रयोगा इति। सर्वेषां काम्यमानानां फलानां निमित्ततया दर्शपूर्णमासयोः श्रुतत्वात् **प्रयोगे विशेषावधारणं न शक्यते वक्तुम्।** अस्मात्प्रयोगादनेन भवितव्यं अस्मात्प्रयोगादनेन इति अभिन्नत्वाद्दर्शपूर्णमासयोः। तौ च सर्वेषां च निमित्तभूतौ कृतौ चेत् किमिति तदीयं सर्वमेव नैमित्तिकं नभवति। अथ न भवति कदाचिदपि तर्हि तन्निमित्तं न स्यात्। निमित्ताभावे च नैमित्तिकमपि कदाचिन्न स्यात्। पुनः पुनः करणे विहितौ तावेव इति तेन सकृत्करणे सर्वफलावाप्तिं पूर्वपक्षवादी मन्मते। **ननु च सर्वकामो नैव कश्चिदस्त्यधिकारी अनधिकाराच्च फलोत्पत्तेरसंभव** इति पूर्वपक्षमाक्षिपति। अस्यार्थः—काम्यमानफलभूतसर्वविषयकामनायुक्तः कश्चित्पुरुषः नास्ति कामनानां युगपदनुत्पादनात्[1]। तादृशश्चेदधिकारी नास्ति फलमपि युगपन्न संभवति अनधिकृतानां ज्योतिष्टोमादिष्विव शूद्रादीनां फलाभाव इति। समादधाति—**उच्यते—यदि कामनाऽङ्गं स्यात् अनुत्पन्ना सती नाङ्गतयोपपद्यत इति भवति कामनानामनुत्पादः सकृत्प्रयोगे सर्वफलानुत्पत्तौ हेतुः।** अस्यार्थः—कामनानां तावत् [2]नियोगोत्पत्तौ विनियोगाभावात् नाङ्गता। किन्तु अधिकारोत्पत्तौ तावेव

(1) G. अनुवादात् (2) G. विनियोगोत्पत्तौ

इह तु सर्वकामैर्युक्तस्य कामिनोऽधिकार इति न प्रयोगकाले कामनोत्पाद उपयुज्यते। तस्मान्ननिमित्ते सति नैमित्तिकस्य व्याघातो भवितु मर्हति। अत्रोच्यते—यावत्कामं प्रयोग इति। एवमधिकारसिद्धिरुपपन्ना भवति। न हि अकामिनः फलाधिकारोऽस्तीति षष्ठे वक्ष्यामः। ननु च प्रयोगकाले कामनोत्पादोऽनङ्गत्वान्नोपयुज्यत इत्युक्तम्।

कारणम्। तत्र कामनानां यद्यपि यौगपद्यं नास्ति तथाप्यवैगुण्यात सर्वफलावाप्तिः। शूद्रादीनां तु वैगुण्यादेव सर्वफलानुत्पादः। इह पुनः सर्वैः कामैर्युक्तस्य कामिनोऽधिकारः इति न प्रयोगकाले कामनोत्पाद उपयुज्यते। तस्मान्न निमित्ते सति नैमित्तिकस्य व्याघातो भवितुमर्हति। अत्रोच्यते—यावत्कामं प्रयोगः इति। एवमधिकारसिद्धिरुपपन्ना[1]भवति। न ह्यकामिनः फलाधिकारोऽस्तीति षष्ठे वक्ष्यामः। अत्रायमभिप्रायः—कामिनो ह्यधिकारश्रवणात् फलानुत्पादे च तस्याधिकारानुपपत्तेः फलसाधकत्वं नियोगसिद्धिपुरस्सरं यागादेः कल्प्यते। तत्र यदा यैव कामनोत्पन्ना तदा सैवाधिकारिविशेषणम्। यदा च यत्काम्यते तदा तत्सिध्यैव कामिनोऽधिकारसिद्धिरुपपन्ना भवतीति न फलान्तरोत्पादे प्रमाणमस्ति। ननूत्पादकाविशेष एव प्रमाणं स्यात स्यादेतदेवं यदि [2]नियोगोऽर्थलक्षणं न स्यात्; क्षणभङ्गिनि यागे नियोगादेव कालान्तरे फलमित्यसकृदुक्तम्। प्रतिकामं चाधिकारनियोगा भिद्यन्ते साध्यभेदेन शास्त्रभेदात् शास्त्रभेदेन च शास्त्रार्थभेदात। तेन यदा यैव कामना तदा तत्संबन्ध एव नियोगो निष्पद्यते नान्य इति सर्वफलानुत्पादः। ननु नियोगा अपि साधनाभेदात् किमिति न निष्पद्यन्ते। नैवम्। नियोगसिद्धावधिकारिणोऽपि साधनत्वात्। तस्य च प्रतिकामं भिन्नत्वात् साधनाभेदानुपपत्तिरिति। इममेवाभिप्रायं चोद्यपूर्वकं प्रकटयति—ननु च प्रयोगकाले कामनोत्पादोऽनङ्गत्वान्नोपयुज्यत इत्युक्तम्। तेनानुत्पन्नायामपि कामनायां अवैगुण्यात फलोत्पादेन भवितव्य-

(1) G. रुपपन्ना (2) R. नियोगात्फलं

केन वोक्तं प्रयोगकाले उत्पादो हेतुरिति। अधिकारावगतावेव सर्वकामिता युगपन्न संभवतीत्युक्तमस्माभिः। असंभवे च युगपत् सर्वनियोगानुपपत्तिः। तस्मात् प्रतिकाममधिकारः। यद्वा यथोद्दिष्टकामाभिप्रायमिति भाष्यकारेणोक्तम् अनिर्दिष्टानामवगमाभाव इत्यभिप्रायः। अतो निर्दिष्टापेक्षी सर्वशब्दः सर्वं कृतमितिवत्। अतः सिद्धं प्रतिकामं प्रयोग इति। अत एव च विरुद्धानामपि फलानामधिकारः सिद्धो भवति। सकृत्प्रयोगे हि मरणायुषोरनुत्पत्तिः स्यात। तस्माद्योगसिद्धिर्वेति सूक्तम्।

मित्यर्थः। केन वोक्तं प्रयोगकाले उत्पादो हेतुरिति ? अधिकारावगतावेव सर्वकामिता युगपन्न संभवतीत्युक्तमस्माभिः। युगपत् कामनानामसंभवे च युगपत् सर्वनियोगानुपपत्तिः। सर्वान्नियोगान् युगपत् कार्यतया पुरुषो नावबुध्यत इत्यर्थः। उपसंहरति—तस्मात् प्रतिकाममधिकारः। अधिकारपर्यन्ता च फलसिद्धिरिति प्रतिकामं फलार्थिनां प्रयोगभेदः। अत्र भाष्यकारेण "यद्यपि युगपत्कामा भवन्ति तथापि तेषां साहित्यमविवक्षितं उद्देश्यत्वात्" इत्युक्तम्। तत्रेयमाशङ्का भवति यद्यप्युद्देश्यता तथाप्युपात्तोद्देश्यत्वात किमिति विशेषणविवक्षा न संभवति इति। तत्र टीकाकारो भाष्यार्थं तावदाह—[1]यथोद्दिष्टकामाभिप्रायं विधानं इति भाष्यकारेणोक्तम्। ये प्रतिक्रत्वन्तरं कामा उद्दिष्टाः एकैकेन त एवेह निरपेक्षा उद्देश्या इति। ननु कस्मात् यथोद्दिष्टा एव सर्वशब्दे नोच्यन्ते इत्यत्राह—अनिर्दिष्टानामवगमाभाव इत्यभिप्रायः। यतोऽनिर्दिष्टानामनवगतिः तेन निर्दिष्टापेक्षी सर्वशब्दः "सर्वं कृतं" इतिवत्। यतो निरपेक्षाः कामा अधिकारहेतवः अतः प्रतिकामं अधिकारभेदात यावदधिकारं प्रयोयोगभेद इति। यत एव पर्यायेण फलोत्पादः अत एव विरुद्धानामपि सर्वस्वारफलमरण, प्राजापत्यफलायुः प्रभृतीनामपि विरुद्धानां चाधिकारस्सिद्धो भवति। सकृत्प्रयोगे हि मरणायुषोरनुपपत्तिः। तस्माद्योगसिद्धिर्वेति सूक्तम।

---

(1) यथोद्दिष्टानामवगमाभाव इत्यभिप्रायः

एवं वा ॥

अस्मिन्नधिकरणे नियोगस्य फलं प्रति किं शरीरग्रहणपूर्वकः प्रयोजकभावः उत यावच्छ्रुतं प्रयोक्तृत्वमिति। तत्र पूर्वपक्षवादी शरीरग्रहणस्य कारणान्तरादर्शनात पश्वादीनां च कारणान्तरेणोपपत्तेः शरीरग्रहणपूर्वकः फलाक्षेप इति मन्यते। पश्वादीनां कारणं प्रतिग्रहादि प्रत्यक्षं भविष्यतीति। राद्धान्तवादी तु यावच्छ्रुतं प्रयोक्तृत्वं मन्यते। कस्मात्? केवलश्रवणावगम्यत्वात् प्रयोक्तृभावस्य।

एवं वा। ननु च लक्षणसङ्गतिरेवात्र नास्ति। किमितीह लोके कामा उतामुष्मिन्नित्याशङ्कामपनयन्नाह—**अस्मिन्नधिकरणे नियोगस्य फलं प्रति किं शरीरग्रहणपूर्वकः प्रयोजकभावः उत यावच्छ्रुतं प्रयोक्तृत्वमिति**[1]। अध्याहृत्योपस्कारः। अस्यार्थः—य एके इह लोके भोगार्हफलाश्चित्रादिविधयः किं ते शरीरं भोगायतनं विना फलं भोजयितुमशक्नुवन्तः शरीरमाक्षिप्यैव फलमाक्षिपन्ति, यदि वा शरीराक्षेपं विना पुत्राद्याक्षेप एवेति चिन्त्यते। यदि शरीराक्षेपांनेयमः तदा अमुष्मिन्नेव लोके कामाः; अथ न तदाऽनियमः इह वाऽमुष्मिन् वेति। **तत्र पूर्वपक्षवादी शरीरग्रहणस्य कारणान्तरादर्शनात् पश्वादीनां च कारणान्तरेणोपपत्तेः शरीरग्रहणपूर्वकः फलाक्षेप इति मन्यते।** अस्यार्थः—शरीरं तावद्भौतिकं भूतसंयोगजन्यं भूतानां च सर्व एव संयोगो न शरीरारम्भकः किन्तु कश्चिदेव, तत्र भवितव्यं केन चित्कारणविशेषेणानुग्राहकेण। तत्रान्यस्य तावत्कारणत्वं न दृष्टम्। कर्मविधीनां तु फलप्रसवान्यथानुपपत्तेर्युक्तं तत्र कारणत्वम्। तेन शरीरारंभपूर्वकं फलं वैदिकानि कर्माणि ददतीति फलमामुष्मिकम्। ननु ऐहिकानां पश्वादीनां किं निमित्तमित्यत्राह—**पश्वादीनां कारणं प्रतिग्रहादि प्रत्यक्षं भविष्यतीति। राद्धान्तवादी तु यावच्छ्रुतं प्रयोक्तृत्वं मन्यते।** इत्यध्याहारेणोपस्कारः। **कस्मात्? केवलश्रवणावगम्यत्वात् प्रयोक्तृभावस्य।** शब्दैकसमधिगम्य एव नियोगस्य प्रयोजकभावः। स चा-

---

(1) G· adds चिन्त्यते उत्तरं संस्कारोऽस्यार्थः।

सर्वाविशेषात्। न हि गम्यते विशेषः इहैव अमुत्रैव वेति कामश्रुतिसामान्यात्।

अत्र भाष्यकारोऽनन्तरादर्शनमुपन्यस्य प्रत्यक्षानुमानाभ्यां नोपलभामहे शब्दादवगम्यत इत्युक्तवान्। तदयुक्तं, शब्दादपि हि नानन्तर्यमुपलभ्यत इत्युक्तम्। अयमभिप्रायः भाष्यकारस्य—सामान्यावगमात् इहामुष्मिन्निति च विशेषानवगमात् शब्दतो न प्रमाणान्तराभावः आनन्तर्यं विहन्तीति। लिङ्गमुक्तम्।

॥ १२ ॥ [1]समवाये चोदनासंयोगस्यार्थवत्त्वात् ॥ १९ ॥

वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इति लक्षणे क्त्वाप्रत्य-

विशेषेण गम्यते। न हि गम्यते विशेषः इहैव फलममुत्रैव वेति। कस्मात्? कामश्रुतिसामान्यात्। कामस्य चोभयत्रापि संभवात्। यत्तु शरीरारम्भस्य कारणान्तरं न दृश्यते इति। सत्यं इदममि न दृश्यते। फलदानं तु कारणान्तरोपात्तेपि शरीरे घटत एवेति नैकान्ततः कारणतामुपगच्छति। तस्मात् सहकारिविशेषापेक्षया इह वाऽन्यत्र वा [1]जन्मनि फलं प्रयच्छतीति[2] नानुपपन्नम्। अत्र भाष्यकारोऽनन्तरादर्शनमुपन्यस्य 'प्रत्यक्षानुमानाभ्यां नोपलभामहे शब्दादवगम्यते' इत्युक्तवान्। तदयुक्तम्, शब्दादपि हि नानन्तर्यमुपलभ्यत इत्युक्तम्। अत्रोच्यते। अयमभिप्रायो भाष्यकारस्य—सामान्यावगमात् 'इह' 'अमुष्मिन्' इति च विशेषानवगमात् शब्दतो न प्रमाणान्तराभाव आनन्तर्यं विहन्तीति। अस्यार्थः—यद्यप्यानन्तर्यं न दृश्यते तथापि एकान्ततः आनन्तर्यं न स्यादिति न शक्यते वक्तुं प्रमाणान्तरादर्शनेपि शब्दादनियमावगतेः कदाचिदनन्तरमपि कदाचिदनन्तरमपि फलं स्यादिति। लिङ्गं पूर्वपक्षवाद्युक्तमुक्तम्। इत्थं व्याख्यातमित्यर्थः।

समवाये चोदना। ननु कथमत्र पूर्वपक्षः यावता क्त्वाप्रत्ययात् अङ्गप्रयोजनसंबन्ध एवायमिति तत्राह—वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत इति लक्षणे क्त्वाप्रत्य-

---

(1) P. 1262 (2) R. कर्मणि (3) G. भवष्यतीति

योत्पत्तौ कालश्रवणात् कालार्थः संयोग इति पूर्वः पक्षः। समानकर्तृकयोर्धात्वर्थयोः अन्वयावगतेः धातुसंबन्ध एवायम्। स च अङ्गाङ्गिभावादृते न संभवतीति अङ्गाङ्गितैवेति राद्धान्तः।

॥ १३ ॥ [1]उभयार्थमिति चेत् ॥ ३२ ॥

पौर्णमासीं संस्थाप्येति परिसमाप्तिवचनत्वात् संस्थाशब्दस्य नाङ्गाङ्गिभावः पौर्णमास्यां संभवतीति प्रकरणात् दर्शपूर्णमासाङ्गतैव वैमृधस्येति पूर्वः पक्षः।

योत्पत्तौ कालश्रवणात् कालार्थस्संयोग इति पूर्वः पक्षः। अस्यार्थः—अङ्गाङ्गिभावस्तावत् क्त्वाप्रत्ययोत्पत्तौ हेतुभूतो लक्षणे न श्रूयते। पूर्वकालता तु तावत् श्रूयत एव तद्दर्शना-नन्तरकालभावितात्यवगम्यते। अतस्त[2]द्विधानार्थं नूतन एवायं विनियोगोऽस्त्विति पूर्वः पक्षः। **समानकर्तृकयोर्धात्वर्थयोरन्वयावगतेर्धातुसंबन्ध एवायम्। स चाङ्गाङ्गिभावा-दृते न संभवतीति अङ्गाङ्गितैवेति राद्धान्तः।** अस्यार्थः—सत्यं लक्षणे श्रूयते पूर्व-कालता तथापि सा न धात्वर्थगता 'संमील्य हसति' इत्यादौ व्यभिचारात्। किन्तु प्रतीति-गता। उपाधिमात्रम्। समानकर्तृता तु धात्वर्थगतैव। समानकर्तृतया च द्वयोर्धात्वर्थयो-रन्वयप्रतीतेः धातुसंबन्ध एवायं क्त्वाप्रत्यय इति धातुसंबन्धाधिकारे विहितत्वात्। स च धात्वर्थसंबन्धो द्वयोर्धात्वर्थयोः अन्यथानुपपत्तेः अङ्गाङ्गिभावादृते न संभवतीति अङ्गाङ्गितैवेति।

उभयार्थमिति चेत्। 'पौर्णमासीं संस्थाप्य' इति परिसमाप्तिवचनत्वात् संस्थाशब्दस्य नाङ्गाङ्गिभावः पौर्णमास्याः संभवति इति प्रकरणात् दर्शपूर्णमासाङ्गतैव वैमृधस्येति पूर्वः पक्षः। अस्यार्थः—संस्थाशब्दः परिसमाप्तिवचनः परिसमाप्तिश्च निश्शे-षानुष्ठानम्; तत्र यदि संस्थिता पौर्णमासी न तर्हि तदङ्गमस्ति। अथ तदङ्गमपरं वैमृधाख्य-मिति न तर्हि संस्थाशब्द उपपद्यते। तस्मान्नातो वाक्याद्यावत् अङ्गाङ्गिभावोऽवगम्यते।

---

(1) P. 1262 (2) G. तद्विधिपर एवायं

अत्राभिधीयते—यदि समाप्तिवचनत्वात् संस्थाशब्दस्य नाङ्गित्वं पौर्णमास्याः प्रकरणादपि नैवाङ्गित्वं संभवति। अथ संस्थाप्येति पूर्वविहिताङ्गकलापपरिसमाप्त्यभिप्रायोऽयं संस्थाशब्दः एवं तर्हि वाक्यात् पौर्णमास्यङ्गतैव वैमृधस्य। न च नियोगैक्ये कश्चिद्विशेषः अस्याप्यधिकारसंबन्धात्। अतस्सिद्धं पौर्णमास्यङ्गं वैमृध इति।

॥ १४ ॥ अनुत्पत्तौ तु कालः स्यात् प्रयोजनेन सम्बन्धात् ॥ ३६ ॥

तेनासंयुक्तत्वात् प्रकरणादेवोभयाङ्गता युक्तेति पूर्वः पक्षः। अत्रोच्यते—यदि समाप्तिवचनत्वात् संस्थाशब्दस्य नाङ्गित्वं पौर्णमास्याः प्रकरणादपि नाङ्गित्वं संभवति। अस्यार्थः—यदि निश्शेषपौर्णमासीसमाप्तिवचनादसंबन्धो वैमृधस्य तर्हि प्रकरणादप्यङ्गता न स्यात् तस्मिन्नङ्गेऽवशिष्टे निश्शेषसमाप्त्यनुपपत्तेः। अथ संस्थाप्येति पूर्वविहिताङ्गकलापपरिसमाप्त्यभिप्रायोऽयं संस्थाशब्दः। अथ प्राकरणिकाङ्गसंबन्धसिद्ध्यर्थं संस्थाशब्दः आपेक्षिकोऽवकल्पते एवं तर्हि वाक्यात् पौर्णमास्यङ्गतैव वैमृधस्य। न चैवं वाच्यं, माभूत् प्रकरणात् वाक्याच्च पौर्णमास्यङ्गं वैमृधः समाप्तिवचनस्यापेक्षिकत्वे प्रमाणाभावात् परं अमावास्याङ्गमेव प्रकरणादस्त्विति। तथा हि सति यः पौर्णमासीसंबन्धोऽवगम्यते स एकान्तेन त्यक्त एव स्यात् समाप्तेरापेक्षिकत्वेनाप्यङ्गतोपपत्तौ[1]। न च नियोगैक्ये कश्चिद्विशेषः। अस्याप्यधिकारसंबन्धात् दर्शपूर्णमासनियोगैक्यं च यद्वैमृधस्यावगम्यते तस्य केवलपौर्णमास्यर्थत्वेपि न विरोधः पौर्णमासीद्वारेणापि तदनुप्रवेशात्। अतस्सिद्धं पौर्णमास्यङ्गं वैमृध इति।

अनुत्पत्तौ तु कालः। 'आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इति कथमत्राङ्गप्रधानसंबन्धः ऊर्ध्वशब्दस्य कालवचनत्वात् कालार्थ एवायं संबन्ध इति। उच्यते। येषामेवैकप्रयोगता प्राप्ता तेषामेव युगपदनुष्ठानासंभवात् पौर्वापर्यापेक्षायां कालार्थ उपदेश इति युक्त-

---

(1) त्वेनाप्त्ययोग

निर्ज्ञातपराङ्गभावयोः संबन्धे नियोगः कालविधानपर्यवसाय्येव कर्मणः प्रत्यभिज्ञानात् तस्मात् कालार्थो नियोगः ।

॥ १५ ॥ उत्पत्तिकालविशये कालः स्याद्वाक्यस्य तत्प्रधानत्वात् ॥ ३७ ॥

दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्यत्राकर्मविधानात् कालार्थो नियोग इत्युक्तम् । तत्पुनरिदमयुक्तम् । वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यनेनाविशेषात् तेनात्रापि कालार्थेन नियोगेन भवितव्यम् । उभयत्र वा कर्मार्थत्वं नियोगस्य । वक्तव्यो वा

मत्राप्यङ्गाङ्गित्वम् । प्रहृत्य परिधीन् इत्यत्र क्त्वाप्रत्ययादङ्गप्रधानशङ्का । ननु प्रकृतत्वादेषां निर्ज्ञातपराङ्गभावानां कथमियमाशङ्केति । उच्यते—अङ्गत्वावगमादेव तद्धर्मकाणि कर्मान्तराणि भविष्यन्ति अन्यथाऽङ्गत्वानुपपत्तेरिति । अत्रोत्तरं— निर्ज्ञातपराङ्गभावयोरेव संबन्धे नियोगः कालविधानपर्यवसाय्येवेति कर्मणः प्रत्यभिज्ञानात् । अस्यार्थः—प्रकृतत्वात्कर्मणः प्रत्यभिज्ञा तावदस्ति । न च प्रत्यभिज्ञायमानं तदङ्गतया शक्यतेऽवगन्तुम् । अनवगतं च न विधीयते । तेनाङ्गप्रधानसंबन्धोऽत्र न विधेयः । पारिशेष्यात् कालविधिपरमेवेदं वचनम् । तस्मात् कालार्थो नियोगः ।

उत्पत्तिकालविशये । 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इत्यत्राकर्मविधानात् कालार्थो नियोग इत्युक्तम् । अनेन भाष्यार्थमनुभाष्य आक्षेपमाह—तत्पुनरिदमयुक्तम् । कस्मात् ? 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यनेनाविशेषात् बृहस्पतिसवशब्दादपि मुख्यबृहस्पतिसवावगतिरेव । तेनात्रापि कालार्थेन नियोगेन भवितव्यम् । अथासन्निधानादिह बृहस्पतिसवप्रत्यभिज्ञा नास्तीति कर्मान्तरविधानं तत्राह —उभयत्र वा कर्मार्थत्वं कर्मविधानार्थत्वं नियोगस्य । अत्रापि कर्मणोः प्रकृतत्वात् ।

विशेषः। अत्र कैश्चिदनारभ्य विधानं विशेष उक्तः। कः पुनरनारभ्यविधानेन विशेष उपलभ्यते ? अयं विशेषः—कर्मद्वयविधानं तावन्न संभवति अनेनेष्ट्वा अनेन यजेतेत्येवमादिषु। अनारभ्यविधाने च नैकमपि कर्म प्रकृतमस्ति। तस्मान्नामतः प्रसिद्ध-कर्मोपादानं कालनियोगार्थम्। उक्तं च नामधेयमपि गुणफलोपबन्धेनार्थवत इति। वाजपेये पुनः प्रकृतत्वाद्वाजपेयस्य कर्मान्तरविधानं श्रुत्योपपद्यते। नाम च तद्धर्मातिदेशार्थं भविष्यति प्रकरणान्तरे प्रयोजनान्यत्वमिति न्यायात्। अनारभ्यविधाने पुनः प्रकरणान्तराभावात् द्वयोरपि (अकर्मार्थत्वं युक्तम्)

वक्तव्यो वा विशेषः। अत्र कैश्चित् अनारभ्य विधानं विशेष उक्तः "दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत" इति नेदं कस्यचित्प्रकरणे वाक्यम्। कः पुनरत्रानारभ्यवादेन विशेषोऽवगम्यते। अयं विशेषः। कर्मद्वयविधानं तावन्न संभवति अनेनेष्ट्वा अनेन यजेतेत्येवमादिषु। अयमभिप्रायः—दर्शपूर्णमासाभ्यामित्यादिषु नाम्ना तावत्कर्म दूरस्थमपि प्रत्यभिज्ञायते। तथा सोमेन यजेतेत्यपि द्रव्येण कर्म प्रत्यभिज्ञाप्यत एव। तेनैकमपि कर्म विधातुं न शक्यते। अनारभ्यविधाने च नैकमपि कर्म प्रकृतमस्ति। वाजपेयप्रकरणे तु बृहस्पतिसवेनेति प्रकृतवाजपेयाधिकारसन्निधानात् यजिस्तावत् अङ्गविधिपर एवावगम्यते। नाम च तत्परतया न प्रत्यभिज्ञामापादयितुं शक्नोति। यत्र हि विधेयतया धात्वर्थः प्रतिभाति तत्र विधेयस्य भिन्नत्वात् तस्मिन् प्रयुक्तं नामधेयं न प्रत्यभिज्ञामापादयति। विधितो धात्वर्थस्य प्रकरणान्तरं प्रतिभाति। अधिकारान्तरं प्रति कर्मणो विधीयमानत्वात्। तथा यत्रापि गुणद्वयश्रवणं तत्रापि कर्मविधिः कारकनियमार्थमुक्तम्। तस्मान्नामतः प्रसिद्धकर्मोपादानं कालनियोगार्थम्—उक्तं च नामधेयमपि गुणफलोपबन्धेनार्थवदिति। वाजपेये पुनः प्रकृतत्वात् कर्मान्तरविधानं श्रुत्योपपद्यते। नाम च तद्धर्मातिदेशकं भविष्यति। प्रकरणान्तरे प्रयोजनान्यत्वमिति न्यायात्। अनारभ्यवादे पुनः प्रकरणान्तराभावात् उभयोरपि कर्मान्तरत्वमयुक्तम् यत्रापि दूरस्थं कर्म फले विधीयते तत्रापि फलस्या-

कर्मान्तरत्वमयुक्तम्। येषां पुनः दर्शपूर्णमासप्रकरण एवैतत्पठ्यते तत्र का कथा भवतु। तत्राङ्गाङ्गिभावः का नो बाधा? अथ वा परिहृतमेवैतत् शाखान्तराधिकरणे सर्वशाखाप्रत्ययमेकं कर्मेति वदता। कथं परिहृतं? तदेवेदं शास्त्रमिति युक्तम्। भवत्वेवं तथापि न विद्मः किं अनारभ्यवादस्य योऽर्थः तेन शास्त्रं प्रत्यभिज्ञायतां उत प्रकरणेऽपि योऽर्थः इति। अविरोधादनारभ्यवादेन प्रत्यभिज्ञानं भेदविदो मन्यन्ते। तस्मात्सूक्तमिह कालार्थः संयोग इति। दर्शनमुक्तम्।

विधेयत्वात् कर्मैव विधेयम्। अनारभ्यवादे यदधिकारं प्रति कर्मविधिर्नास्ति तत्कालनियमार्थमुक्तमपि **कर्मान्तरत्वमयुक्तम्।** तदेतत्सर्वं कृतव्याख्यानम्।

एवं तावत् अनारभ्यवादमात्रं यत्र शाखायां तत्र कालार्थो नियोग[1] उक्तः। **येषां पुनः दर्शपूर्णमासप्रकरण एव पठ्यते तत्र का कथा।** अत्रायमभिप्रायः—तत्र न द्रव्यसंयोगात् प्रत्यभिज्ञातुं शक्यते प्रकृतार्थत्वेन कर्मणो विधेयत्वात्। तेन तत्र अङ्गप्रयोजनसंबन्ध एव युक्तः तत्राह—**भवतु तत्राङ्गाङ्गिभावः, का नो बाधाः?** अनारभ्यवादमात्रपरेणैवाधिकरणेन सिद्धान्तोपपत्तेः। **अथ वा परिहृतमेतदङ्गाङ्गित्वं शाखान्तराधिकरणे सर्वशाखाप्रत्ययमेकं कर्मेति वदता।** कथं परिहृतं? यावता यस्य योऽर्थः प्रतिभाति तस्य तेनैवार्थेन भवितव्यमिति भावः, तदेवेदं शास्त्रमिति वाक्यस्य प्रत्यभिज्ञायमानत्वात् एकं शास्त्रं युक्तं न शास्त्रान्तरमिति। अत्र पृच्छति—**भवत्वेवं तथापि न विद्मोऽनारभ्यवादस्य योऽर्थः** कालार्थो नियोग इति **तेन शास्त्रं प्रत्यभिज्ञायतां,** स एव शास्त्रान्तरे प्रकरणान्तराधीतेपि भवतु, **उत प्रकरणेपि योऽर्थो**ऽङ्गाङ्गिभावः तेन शास्त्रं प्रत्यभिज्ञायतां स एवानारभ्यवादेऽपि शाखान्तरीये भवतु। उत्तरं—**अविरोधादनारभ्यवादेन प्रत्यभिज्ञानं भेदविदो मन्यन्ते।** अनारभ्याधीतस्य योऽर्थः स एवारभ्याधीतस्यापि अविरोधात्। अनारभ्यवादार्थे सर्वत्राश्रीयमाणे नाम्ना द्रव्येण च यत्प्रत्यभिज्ञानं न तस्य विरोधः प्रकरणाधीतार्थे तु प्रत्यभिज्ञानं विरुध्यत इति। **तस्मात्सूक्तं कालार्थस्संयोग इति। दर्शनमुक्तम्।**

---

(1) R. संयोगः

॥ १६ ॥ फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् ॥ ३८ ॥

अत्र संशयः किं यस्य नियोगः तस्य फलं उत अन्यस्य नियोगोऽन्यस्य फलमिति। अधिकारी च नियुज्यते। यदर्थं कर्म सोऽधिकारी स एव नियुज्यते। यदर्थं कर्म सोऽधिकारी स एव नियुज्यते। अनधिकारे च पितुः नास्य नियोज्यता स्यात्। तस्माद्भवति संशयः। किं युक्तम्? नियोज्यस्य पितुः फलमिति। कुतः? अधिकारसिध्यर्थो नियोगः न संबन्धमात्रावगम्यः तस्मात् पितुरिदं फलं पुत्रफलान्वयस्य स्तुत्याऽन्वयो भवतु। लक्षणयाऽधिकृतविशेषणम्। तथा च क्रतुसंबन्धिनिमित्ते

फलसंयोगस्त्वचोदिते। अत्र संशयः किं यस्य नियोगः पितुः तस्य शास्त्रात् फलं उतान्यस्य नियोगः अन्यस्य फलमिति। कथं संशयः? अर्थवादे फलपदेन ब्रह्मवर्चसादिना अन्यस्य पुत्रस्यान्वयात् जातस्य फलसंबन्धावगमात्। अधिकारिपदेन च 'पुत्रे जाते' इत्यनेनान्यस्य पितुरन्वयात्। नन्वेवमपि पिता नियोज्यो भवतु; भवतु च पुत्रस्य फलमिति को विरोधः तत्राह—अधिकारी च नियुज्यते। यदर्थं कर्म सोऽधिकारी। यश्चाधिकारी स एव नियुज्यते। परार्थे हि कर्मणि न परस्य नियोगो घटते। तत्र यदीदं पुत्रनिः श्रेयसाय कर्म स्यात् तदा नात्र पितुरधिकारः स्यात्। अतदर्थत्वात्कर्मणः। अनधिकारे च पितुः [1]नास्य नियोज्यता स्यात्। तस्मात् पितरि नियोज्ये भवत्येव संशयः। किं युक्तं? नियोज्यस्य पितुः फलमिति कुतः? अधिकारसिध्यर्थो हि यस्मात् फलयोगो न संबन्धमात्रावगम्यः पुरुषस्य यदैश्वर्यं अधिकारिशब्दवाच्यं तत्पुरुषस्य कर्मणि यथा स्यात् इत्येवमर्थं फलयोगोऽङ्गीक्रियते न पुनः फलसंबन्धोऽवगम्यत इत्येतावन्मात्रेण। तस्मात् पितुरिदं फलम्। पुत्रफलान्वयस्य स्तुत्या वाऽन्वयो भवतु। पुत्रस्यापि तावदिदं फलमिति लक्षणया वाऽधिकृतविशेषणम्। पुत्रपदेन पितुरेव लक्षणया पितुरेव फलं विशेषणमस्तु। सर्वथा पितृनिः श्रेयसायेदं कर्मेति। तथा च क्रतुसंबन्धिनि निमित्ते

---

(1) G. नान्यस्य

नियोज्यस्यैव फलं न क्रतुना संबध्यते। अत्रोच्यते —यस्य फलान्वयः तस्यैव फलं निमित्ततयाप्यधिकार-सिद्धेः। इतरस्य पुत्रजन्मना निमित्तेनापि पुरुषार्थताऽस्तीत्यधिकारसिद्धिः। कथं तर्हि फलपदं? न कर्म विशेषणं, नाप्यधिकारोपनिपाति। उच्यते—भविष्यत्यधिकारोपनिपाति। कथमेवंविधस्य पुत्रजन्मनोऽधिकारिविशेषणत्वेन श्रवणात्। तस्माद्यस्य नियोगस्तस्यैव फलमिति अविरुद्धमेतत् प्रीत्याप्यधिकारसिद्धेः। यदुक्तं क्रतुसंबन्धे नियोज्यस्यैव फलमिति, युक्तमधिकारानु-

---

यस्मान्नियोज्यस्यैव फलं दृश्यते तेन क्रतुना संबध्यते। एतदुक्तं भवति--असंबन्धिन्यपि निमित्ते यन्नियोज्यस्यैव फलं श्रूयते यदि यत्संबन्धिनिमित्तं यथा पुत्रसंबन्धिजन्म तस्यैव फलं स्यात् तदा क्रतुसंबन्धमेव फलमुक्तं स्यात् न च तथोक्तमिति। अत्रोच्यते—यस्य फलान्वयः पुत्रस्य तस्यैव फलं निमित्ततयाप्यधिकारसिद्धेः इतरस्य पुत्रजन्मना निमित्तेनापि निमित्ताधिकारनियोगनिर्वृत्त्यापि पुरुषार्थता कर्मणोऽस्तीत्यधिकारस्सिद्ध्य-त्यैश्वर्यलक्षणः। तस्मात् पुत्रगता फलश्रुतिर्यथार्थैवास्तु। यदि निमित्ततयाप्यधिकारस्सिध्यति कथं तर्हि फलपदं? एकग्रन्थेनाह—न कर्मविशेषणं फलं न कारकांशोपनिपाति। नाप्यधिकारांशोपनिपाति। निमित्तबलेनाधिकारलाभात। उच्यते। भविष्यत्यधि-कारोपनिपाति। कथमेवंविधस्य पुत्रगतफलकामस्य पुत्रजन्मवतोऽधिकारित्वेन श्रवणात्। अयमाशयः—निमित्तस्यापि तावत् साक्षादधिकारिविशेषणता न श्रूयते। किन्तु अनुष्ठानं प्रत्येव निमित्तता। अधिकारैकनिबन्धनत्वाच्चानुष्ठानस्याधिकारहेतुता कल्प्येत्यधिकारिविशेषणता कल्प्या। तथाऽर्थवादगतस्यापि फलस्य कल्प्यमानतया तुल्यत्वात् सम्मिलितमधिकारिविशेषणं उपसंहारव्याजेन प्रकारान्तरेणैश्वर्यमाह तस्माद्यस्य नियोगः तस्य फलमिति। यदेतदधिकारसामर्थ्येन कल्प्यते अविरुद्धमेतत् पुत्रप्रीत्याप्यधिकारसिद्धेः। पुत्रगामिफलोत्पादनिमित्तप्रीत्युपभोगेन पितुरैश्वर्यसिद्धेः। यदुक्तं क्रतुसंबन्धे निमित्ते नैमित्तिकान्नियोज्यस्यैव फलमिति पूर्वोक्तमनुभाषितम्। परिहरति—युक्तमधिकारानु-

प्रवेशान्निमित्तस्येति षष्ठे वक्ष्यामः।

एवं वा ॥

'पुत्रे जाते' इति श्रूयते। तत्र संशयः—किं जननानन्तरमेव नैमित्तिकं भवतु उताङ्गोपसंहारमपेक्षते प्रकृतिवदभिप्राप्तमिति। यद्येवं किमिति कुमारस्य प्राणधारणमुत्कर्षहेतुत्वेनोपन्यस्यते। एकमेवेदमधिकरणमस्तु। साङ्गस्य नैमित्तिकत्वात् न निमित्तानन्तरं प्रयोगः संभवति इति स्वकाल एव कर्तव्यः। न चानन्तर्येऽसति निमित्तत्वव्याघातः भूतप्रत्यययोगान्निमित्तस्य। न च प्रतीक्षणे भूतत्वमपैति। तस्मात् पृथगधिकरणं निष्प्रयोजनमिव प्रतिभाति।

प्रवेशान्निमित्तस्येति षष्ठे वक्ष्यामः निमित्तं हि बलादधिकारिविशेषणम्। तेन निमित्तसंयोगेन यदुच्यते तत्पुरुषस्यैव भवतीति फलं पुरुषस्यैवेति युक्तम्।

एवं वा। 'पुत्रेजाते' इति श्रूयते। तत्र संशयः किं जननानन्तरमेव नैमित्तिकं भवतु, उताङ्गोपसंहारमपेक्षते प्रकृतिवदभिप्राप्तमिति। तत्राक्षेपमाह—यद्येवं संशयः क्रियते—किमिति तर्हि कुमारस्य प्राणधारणसामर्थ्यमुत्कर्षहेतुत्वेनोपन्यस्यते। एकमेवेदमधिकरणमस्तु। साङ्गस्य शौचकालाङ्गयुक्तस्य वैश्वानरयागस्य नैमित्तिकत्वात् न निमित्तानन्तरं पुत्रजन्मानन्तरं प्रयोगः संभवति। नित्यवत्कालानुपसंहारापेक्षे च शौचानुपसंहारादिति स्वकाल एव पौर्णमास्यादिके। उपलक्षणं चैतत् शुचिना कर्तव्योऽयं प्रयोगः। एतच्च नैमित्तिकस्य प्राधान्यान्निमित्तबाधमङ्गीकृत्योक्तम्। न चानन्तर्येऽसति परमार्थतो निमित्तव्याघातोऽस्ति भूतप्रत्यययोगात् जात इति निमित्तस्य न च प्रतीक्षणे कालशौचयोर्भूतत्वमपैति। तस्मात् प्रथमाधिकरणं[पृथगधिकरणं]निष्प्रयोजनमिव प्रतिभाति।

अत्राभिधीयते— निमित्तानन्तरं नैमित्तिकमित्यौत्सर्गिको न्यायः न कारणादृते कालोत्कर्षोऽवगम्यते। ननु च कारणमुक्तं साङ्गस्य नैमित्तिकत्वम्। एतदेव न विजानीमः किं निमित्तकाले नियोगावगमात् विनियोगावगम्यमङ्गं त्यज्यतां उत नियोगकालस्योत्कर्ष इति। नियोगार्थत्वाद्धि नियोगस्याङ्गत्यागं विनियोगविदो मन्यन्ते। यथा रजस्वलादिस्पर्शनेन पूर्वाह्णादिकालः विहित उपेक्ष्यते। अत एतद्बाधनार्थं पूर्वमधिकरणम्। यदि हि नियोगकाल एवानुष्ठानं क्रियते यदर्थो नियोगस्तदेव हीयते।

न च तावन्मात्रेण कालशौचापेक्षापि सिध्यति। पुत्रे जाते कृते च जातकर्मणि प्रयोगस्याशङ्क्यमानत्वात्। तत्र स्थित्वापि यदेव कारणं वक्तव्यं साङ्गनैमित्तिकानुग्रहात्मकं परं तदेव प्रथममुपन्यस्यतामिति भावः। अत्राभिधीयते—निमित्तानन्तरं नैमित्तिकमित्यौत्सर्गिको न्यायः न च कारणादृते कालोत्कर्षोऽवगम्यते। अस्यार्थः—निमित्तं तदुच्यते यस्मिन् सति भवति नैमित्तिकं तच्चेन्निमित्तमागतं नैमित्तिकमपि तेन तदनन्तरमेव युक्तं विलम्बकारणाभावात्। ननु च कारणमुक्तं साङ्गस्य नैमित्तिकत्वम्। परिहर्तुमुपक्रमते—एतदेव न विद्मः किं निमित्तकाले नियोगावगमात् विनियोगावगम्यमङ्गं त्यज्यतां उत नियोगकालस्योत्कर्ष इति। नियोगस्य प्रधानत्वात् नियोगार्थत्वाच्च विनियोगस्याङ्गत्यागं विनियोगविदो मन्यन्ते। यथा रजस्वलादिस्पर्शनेन पूर्वाह्णादिकालः स्नानाङ्गत्वेन विहित उपेक्ष्यते। जीवनादिकं तु न निमित्तसप्तमीनिर्दिष्टम्। इह तु स्वभावालोचनया जननानन्तर्यं नियोगस्य प्रतिभाति। निमित्तस्य हीदमेव निमित्तत्वं यत्तस्मिन् सति नियोगः। निमित्तं चेद्भूतं नियतमनुष्ठानं प्राप्नोति नियोगार्थत्वादनुष्ठानस्य। अत एवैषा प्रयुक्तिर्न शक्यते [1]नैमित्तिकानुग्रहेण बाधितुम्। अत एतद्बाधनार्थं पूर्वमधिकरणम्। कथं बाध्येत? एतदाह—यदि हि नियोगकाल एवानुष्ठानं क्रियते यदर्थो नियोगः कुमारगतफलार्थः तदेव हीयते। अयमभिप्रायः— काम्येषु कर्मसु फलं

---

(1) नैमित्तिकग्रहेण

तस्मान्नियोगकालावगतिरेवोत्क्रष्टव्या। उत्कृष्टा चेत स्वकाल एव स्यान्नाङ्गत्यागे प्रमाणमस्तीति द्वितीयमधिकरणं लिखितम्।

॥ १७ ॥ प्रधानेनाभिसंयोगादङ्गानां मुख्यकालत्वम् ॥ ४० ॥

'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यत्र संशयः—किमेको नियोगः उत नियोगद्वयमिति। ननु नियोगद्वित्वेऽङ्गाङ्गिभावो नोपपद्यते। अस्ति चाङ्गाङ्गित्वं, तस्मान्न प्रयोगभेदः। बाढमुपपद्यते। विनियोगादङ्गाङ्गिता

प्रयोजकमनुष्ठानस्य न नियोगः तेन फलाभावे प्रयोजकाभावादननुष्ठानमिति। कथं पुनः फलाभावः? कुमारस्य प्राणवियोगप्रसङ्गात्। जातकर्मणि कृते स्तनप्रणिधानम्। जातकर्म च पित्रा कर्तव्यम्। स चेदिष्टौ व्याप्रियते कथं जातकर्म क्रियेत। अकृते च जातकर्मणि स्तनदानं नास्ति। अपीतस्तनः कथमिव धारयेत्प्राणान्। **तस्माज्जातकर्मानन्तरं** फलाभावादिष्टेर्**नियोगकालावगतिरेवोत्क्रष्टव्या**। कथं तर्हि उत्तराधिकरणे राद्धान्तः? तत्राह—**उत्कृष्टा चेत् स्वकाले नाङ्गत्यागे प्रमाणमस्ति इति द्वितीयमधिकरणं लिखितम्**। अस्यार्थः—निमित्तस्वभावलभ्यानन्तरनियोगबलेन तावदनन्तरानुष्ठानं नास्तीति सिद्धे साङ्ग-मेवानुष्ठेयं काले शुचिना चेति।

प्रधानेनाभिसंयोगात्। **वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र संशयः—किमेको नियोग उत नियोगद्वयमिति**। अनेन भाष्यकारीयं संशयं व्याचष्टे। एतदुक्तं भवति—किमेक एवायं नियोग उत भिन्न इति। एकत्वे एकप्रयोगता भिन्नत्वे भेद इति। तत्र पूर्वपक्षमाह—**ननु च नियोगद्वित्वे** भिन्ननियोगाभिसंबन्धात् **अङ्गाङ्गित्वं न स्यात्**। एक-प्रयोगानुप्रवेशनिबन्धनो ह्यङ्गाङ्गिभावः। **अस्ति चाङ्गाङ्गित्वं तस्मान्न प्रयोगभेदः**। राद्धान्तमाह—**बाढमुपपद्यते**। **विनियोगाद्धि अङ्गाङ्गिता**। अस्ति चात्र विनियोगः

प्रयोगान्यत्वेन विनियोगान्यत्वम्। ननु च नियोगान्यत्वे शास्त्रभेदः प्राप्नोति। भवतु प्रयोगापेक्षया न कश्चिद्दोषः। विनियोगापेक्षया त्वेकमेवेदं शास्त्रम्। कथं पुनरेकत्वे शास्त्रस्य प्रयोगभेदः ? केन वार्यते विधानभेदवत् अनुबन्धनिमित्तकम्। यद्यथैवानुबध्यते तत् तथैव तन्त्रं भिनत्ति। इह तु प्रयोगानुबन्धभेदात प्रयोगभेदः प्राप्नोति। भवतु प्रयोगभेदापेक्षया न दोषः। तस्मान्न शास्त्रान्तरापत्तिः केवलं प्रयोगभेदः। यथा च प्रयोगभेदस्तथा दर्शितम्।

इति बृहत्यां चतुर्थाध्यायस्य
तृतीयः पादः

प्रयोगान्यत्वेन नियोगान्यत्वं, तेन द्वयमपि भवतु अङ्गाङ्गित्वं प्रयोगभेदश्च। ननु च प्रयोगान्यत्वे नियोगान्यत्वाच्छास्त्रभेदः प्राप्नोति। अभिन्ने शास्त्रे शास्त्रार्थभूतनियोगभेदानुपपत्तिः। भवतु प्रयोगापेक्षया न कश्चिद्दोषः। विनियोगापेक्षया तु एकमेवेदं शास्त्रम् कथं पुनरेकत्वे शास्त्रस्य प्रयोगभेदः। एकशास्त्रत्वमेकशास्त्रार्थत्वे तथा च प्रयोगभेदो न स्यात्। उत्तरं—केन वार्यते विधानभेदवत् अनुबन्धनिमित्तकम्। विधानभेदवत् प्रयोगविधिभेदात् कालरूपानुबन्धभेद निमित्तकः। यद्यथाऽनुबध्यते तत्तथा तन्त्रं प्रयोगं भिनत्ति। यत् कालादि यथाऽनुबध्यते अनुबन्धीभवति तत्तथा तन्त्रं प्रयोगं भिनत्ति। इह च प्रयोगानुबन्धभेदे प्रयोगभेदः। तस्मान्न शास्त्रान्तरापत्तिः केवलं प्रयोगभेदः। यथा च प्रयोगभेदः तथा दर्शितम्। इष्ट्वेति वाजपेयाभिनिर्वर्तितः पृथग्भूतो बृहस्पतिसवः प्रतिभाति। तेन भिन्नानुष्ठानानुबन्धत्वादनुष्ठानभेदः। अङ्गं च प्रकृतकामाधिकारगृहीतत्वादिति युक्तम्। तथा 'अग्निं चित्वा' इत्यग्निसंस्कारभूतचयनाभिनिर्वृत्तितः पृथग्भूता सौत्रामणी प्रयोगावगमादैष्टिककाल एव प्रयोग इति दर्शितं भाष्ये।

इति श्रीशालिकनाथमिश्रविरचितायां ऋजुविमलायां
पञ्जिकायां चतुर्थाध्यायस्य
तृतीयः पादः

बृहत्यां

चतुर्थाध्यायस्य चतुर्थः पादः ॥

॥ १ ॥ [1]प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् ॥ १ ॥

ननु च नामधेयविचारे यजिसामानाधिकरण्यान्नाम भवतीत्युक्तम्। कथं पुनरयज्यर्थस्याप्येतदभिधानं शङ्क्यते? अतः पूर्वपक्ष एवायं नोपपद्यते। उच्यते—इह तु नियोगैक्याद्युगपदभिधानं धात्वर्थस्य। नियोगैक्यं च प्रकरणायत्तमिति सर्वप्रकृताभिधायी धातुरिति पूर्वपक्षवादी मन्यते।

ऋजुविमलायां

चतुर्थाध्यायस्य चतुर्थः पादः

प्रकरणशब्दसामान्यात्। अत्र भाष्यकारो राजसूयशब्दस्य सकलप्रकृतोत्पत्तिवचनतया अनिज्यानामपि प्राधान्यमाह। तदाक्षिपति—**ननु च नामधेयविचारे यजिसामानाधिकरण्यान्नाम भवतीत्युक्तम्। कथं पुनरयज्यर्थस्याप्येतदभिधानं शङ्क्यते। अतः पूर्वपक्ष एवायं नोपपद्यते।** अस्यार्थः—'राजसूयेन स्वाराज्यकामो यजेत' इति यागस्तावद्विधीयते। तत्र राजसूयशब्दोऽपि यद्यर्थान्तरवचनः स्यात् तदा वाक्यभेदो भवेत्। तेन यागानामेवेदं वचनमिति निश्चीयते। एवं च यागानामेतन्नामेति यागानामेव प्राधान्यम्। कथमयागानामपि प्राधान्याशङ्का। उच्यते। सत्यमेवम्—**इह तु नियोगैक्यात् युगपदभिधानं धात्वर्थस्य; नियोगैक्यं च प्रकरणायत्तमिति सर्वप्रकृताभिधायी धातुरिति पूर्वपक्षवादी मन्यते।** अस्यार्थः—यजिना सर्वेऽपि यागा यद्वक्तव्यास्तन्त्रेण तत्राप्यधिकारनियोगैक्यमेव कारणम्। अधिकारनियोगो हि प्रकृतत्वात् सर्वमेव स्वीकरोति। स्वीकृताश्च यजिना अधिकारनियोगस्य विषयतया समर्पणीया इति सर्वेषामेव तन्त्राभिधानं(नियोगैक्यं) प्रकृतत्वनिबन्धनम्। तच्च प्रकृतत्वं यजीनामयजीनां चाविशिष्टमिति प्रकृतानुबन्धसमर्पणे निज्ञात-

---

(1) P. 1269

एवं प्राप्तेऽभिधीयते—सत्यं प्रकरणान्नियोगैक्यं न पुनः श्रुतानुबन्धपरित्यागे कारणमस्ति। कथं ? इतिकर्तव्यतापि हि नियोगैक्यं नैव विरुणद्धि। तथाभूतोपदेशादिति वक्ष्यामः। अतो यागव्यतिरिक्तमङ्गमिति सिद्धम्।

[1]**मध्यस्थं यस्य तन्मध्ये ॥ २ ॥**

ननु चात्रापि क्रमात् प्रकरणं बलीय इत्येतदेवोदाहृतम्।

तात्पर्यो यजिः अयजिष्वपि दण्डिन्यायेन वर्तते। न च वाच्यं—इतिकर्तव्यतया चायजिनां नियोगैक्यम् इति। यस्मात साक्षात्संबन्धे सम्भवति परम्पराश्रयणमयुक्तमेव। साक्षाच्च सर्वेषां नियोगार्थत्वेऽवगते तत्समर्पणतया निर्ज्ञाततात्पर्यो यजिः लक्षणया अयजिष्वपि वर्तमानो नानुपपन्नः। एवं च यजिशब्दसामानाधिकरण्यात् राजसूयशब्दोऽपि सर्वेषां वाचक इति कार्यभूतं भाष्यकारेणोक्तम्। नामधेयविचारश्च धात्वभिहितोऽर्थो नाम्नाऽभिधीयते इत्येतावति पर्यवसितः। तस्मादुपपद्यते पूर्वपक्षाशङ्का। **एवं प्राप्तेऽभिधीयते—सत्यं प्रकरणान्नियोगैक्यं न पुनः श्रुतानुबन्धपरित्यागे कारणमस्ति।** अस्यार्थः—'राजसूयेन स्वाराज्यकामो यजेत' इति यागविषयस्तावन्नियोगः प्रथमं प्रतीयते। पश्चात्तु तथाभूतेन नियोगेन सन्निहितास्सर्वे पदार्था गृह्यन्ते। ततश्च कथं कस्यान्वयः इत्यपेक्षायां यागानां करणतया संबन्धः यागानां विषयत्वात् विषयीभूतस्य च करणत्वात्। तेन यागानामेव करणत्वम्। अयागानां चेतिकर्तव्यतात्वमिति। **कथं ?** इतिकर्तव्यतात्वं अयागानां नियोगैक्याविरोधाभिप्रायेण पृच्छति। अत्रोत्तरमाह—**इतिकर्तव्यतापि हि नैव नियोगैक्यं निरुणद्धि। तथा भूतोपदेशादिति वक्ष्यामः। अतो यागव्यतिरिक्तमङ्गमिति सिद्धम्।** एतदुक्तं भवति—उत्पत्तिशिष्टयागावरुद्धे नियोगे करणतया निवेशासंभवादितिकर्तव्यतयैवान्वयः, अन्यत्रापि साध्ये दर्शनादिति।

मध्यस्थं यस्य तन्मध्ये। ननु चात्रापि क्रमात् प्रकरणं बलीय इत्येतदेवोदाहृतम्। अस्यार्थः—क्रमात्प्रकरणं बलीय इत्यत्राप्यधिकरणे तृतीये एतदेवोदाहृतम्।

---

(1) P. 1271

स्थितं च सर्वार्थत्वं तृतीये। उच्यते—सत्यं विनियोगात् स्थितम्। इदानीं तु पृथक् प्रयोज्यत्वादभिषेचनीयनियोगस्य तस्य च सन्निधानात् तेनैवैक्यं युक्तमिति मन्यते पूर्वपक्षवादी। न विनियोगविरोधः; प्रत्येकसंबन्धहेतुत्वात् प्रकरणस्य। अतः सान्निधिविशेषस्यातिक्रमो नोपपद्यते। अत्रोच्यते—स्थितमैकशब्द्यमधिकारविधेः। ततः किं? इदं ततो भवति। यस्यैव प्रयोगानुबन्धभेदः तस्यैव पृथक् प्रयोगोऽवसीयते स्वेनेतिकर्तव्यताकलापेन। यस्य पुनरङ्गस्याधिकारविधिरेव प्रयोगं ज्ञापयति न तस्यावान्तरप्रयोगः शक्यते ज्ञापयितुम्। तस्मात् क्रमात् तद्देशस्यैव अनुष्ठानमधिकारविधिसमधिगम्यमेव।

यदीहोदाहृतं भवत्वेवं तथापि किमित्याह—स्थितं च सर्वार्थत्वं, अतः पुनरुक्तमिति। परिहरति—सत्यं विनियोगात् स्थितं इदानीं पृथक्प्रयोज्यत्वात् अभिषेचनीयनियोगस्य तस्य च सन्निधानात् तेनैवैक्यं युक्तमिति पूर्वपक्षवादी मन्यते। अस्यार्थः—पृथक् प्रयोक्तृत्वेनाभिषेचनीयस्य तावत् प्रयुक्तिभेदोऽङ्गीकार्यः तदीयप्रयुक्तिमध्यपतिताश्च विदेवनादयः अतस्सन्निधानात् स एवास्य प्रयोजको युक्तः। ततश्च प्रयुक्तिपर्यन्तत्वाद्विनियोगस्य विनियोगोऽपि तत्रैवेति पूर्वपक्षवादी मन्यते। न च प्रकरणविनियोगविरोधः। अभिषेचनीयाङ्गत्वेपि प्रत्येकसंबन्धहेतुत्वात् प्रकरणस्य; प्रतिप्रकरणं इतिकर्तव्यतया संबन्धापादकत्वादस्यापि कारणत्वात्। अतस्सन्निधिविशेषातिक्रमो नोपपद्यते। अत्रोच्यते—स्थितमैकशब्द्यमधिकारविधेः। एकाधिकारनियोगस्य साध्यत्वेनन्वयात्तत्साधनत्वेनाङ्गप्रधानोपदेशात्। एकं शास्त्रमङ्गप्रधानात्मकम्। ततः किम्? इदं ततो भवति यस्यैव प्रयोगानुबन्धभेदः तस्यैव पृथक् प्रयोगोऽवसीयते स्वेनेतिकर्तव्यताकलापेन। यस्य पुनरङ्गस्याधिकारविधिरेव प्रयोगं ज्ञापयति न तस्यावान्तरप्रयोगानुप्रवेशः शक्यतेऽवगन्तुम्। तस्मात् क्रमात्तद्देशस्यैवानुष्ठानमधिकारविधिसमधिगम्यमेव। अस्यार्थः—यथाविनियोगं तावत् प्रयुक्तिः विनियोगे च सर्वार्थत्वमेव। अतोऽधिकारविधिरेवास्य प्रयोजकः न पुनरवान्तर–

प्रकरणाविरोधस्त्वयैवोक्तः ।

॥ ३ ॥ [1]प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयम् ॥ ५ ॥

पुरस्तादुपसदां सौम्येन प्रचरन्तीति । कः खल्वाग्निमारुता- दूर्ध्वमनूयाजैश्चरन्तीत्यनेनास्य विशेषः । न खलु कश्चिद्विशेषः । किमित्यधिकरणान्तरं सौम्यादीनां अन्यदधिकरणान्तरम् । का नो बाधा ? । न खलु कश्चिद्भवतो बाधा । अधिकरणानर्थक्यं तु भवति । अयं तर्हि विशेषः । प्रकरणात् सर्वस्य प्राधान्यं इति- कर्तव्यतात्वं वा राजसूये । असंयुक्तं च प्रकरणादित्युक्तम् ।

नियोगः, तदर्थत्वेन विनियोगाभावात् तत्सन्निधानात्तु तत्रैवानुष्ठेयमधिकारविधिनैव प्रयुज्यत इति विनियोगात् प्रयुक्तेश्च सर्वार्थत्वमेव । **प्रकरणाविरोधस्त्वयैवोक्तः ।** अस्मिन्नेव पक्षे प्रकरणाविरोधो यथा भवति तथा त्वयैवोक्तः प्रत्येकसंबन्धहेतुः प्रकरणमिति वदता । तच्च प्रकरणं प्रत्येकसंबन्धे एव न विरुध्यते । नियतैकसंबन्धे तु प्रकरणं सर्वसंबन्धापादकं विरुध्यत एव । तस्मात् प्रकरणाविरोधात् सर्वार्थमिति ।

प्रकरणाविभागे । आक्षिपति–**कः खलु आग्निमारुतादूर्ध्वमनूयाजैश्चरन्तीत्यनेनास्य विशेषः ।** पुरस्तादुपसदामित्यनेन पुरस्तादिति कालस्य श्रवणात् कालार्थ एव संयोगो युक्त इति यावत् । **न खलु कश्चिदि**त्यादि सुबोधम् । **अयं तर्हि विशेषः । प्रकरणात् सर्वस्य प्राधान्यं इतिकर्तव्यतात्वं वा राजसूये । असंयुक्तं च प्रकरणादित्युक्तम् ।** यत्सर्वस्य प्राधान्यं इतिकर्तव्यतात्वं वा सर्वान् प्रति राजसूये उक्तं तत् प्रकरणात् । अधिकारविध्यङ्गतया [2]च प्रकृतग्रहणात्मकं प्रकरणमिहाभिप्रेतम् । राजसूये चानभिव्यक्तरूपत्वात् विषयीभूतस्य यागस्य रूपवद्यागापेक्षा भवति । तथेतिकर्तव्यतापेक्षापि । तत्र यजतयो विषयानुप्रवेशिनः प्रधानाः अयजतयश्चेतिकर्तव्यता । असंयुक्तं च प्रकरणाद्विनियुज्यत इत्युक्तं तृतीये । संयुक्ताश्च

---

(1) P. 1272 (2) R. विध्याकाङ्क्षायां

तस्माद्वाक्यादुपसदङ्गमेवेति पूर्वपक्षवादिनोऽभिप्रायः। अपि च सन्निधानविशेषेणोपसदङ्गतैव युक्ता, अधिकारनियोगात्।

अत्राभिधीयते—न तावदुपसदां प्रकरणमस्ति अधिकारनिबन्धनत्वात् प्रकरणस्य। ननु च वाक्यादुपसदङ्गत्वमित्युक्तम् नोभयपदसंबन्धाभावात वाक्यं संभवति। तस्मात पुरस्तादुपसदामित्येव संबन्धः। अथ कस्मादुपसदां सौम्येनेत्येष संबन्धः न भवति। पुरस्तादित्यनन्वयः प्राप्नोति

सौम्यादयः उपसद्भिर्वाक्येन। एवं हि पूर्वपक्षी मन्यते—उपसदां सौम्येनेति संबन्धः न चान्यथा सौम्यादयः उपसद्भिस्संबन्धिनः इत्यङ्गाङ्गिता। [1]शेषषष्ठ्येवेयं युक्ता नोपपदषष्ठी। प्राधान्ये चोपसदां षष्ठी। तेन सापेक्षत्वात् उपसदां सौम्येनेति संबन्धः पुरस्तादिति तु संबन्धापेक्षः। पश्चात् प्रकृतत्वात् उपसदपेक्षमेव भविष्यतीति। तस्मात् वाक्यादुपसदङ्गतेति पूर्वपक्षिणोऽभिप्रायः। **अपि च सन्निधानविशेषेणोपसदङ्गतैव युक्ता, अधिकारनियोगात्।** अस्यार्थः—उपसदां पुरस्तादित्यपि संबन्धे उपसत्सन्निधानविशेषात् सौम्यादीनामधिकारनियोगादपि बुद्धावनुसन्धानात तदङ्गतैव युक्तेति पूर्वः पक्षः। **अत्राभिधीयते—न तावदुपसदां प्रकरणमस्ति।** न च बुद्धिसन्निधिमात्रं प्रकरणम्। कुतः। **अधिकारनिबन्धनत्वात् प्रकरणस्य।** अस्यार्थः—साधिकारो हि नियोगोऽन्विताभिधाननिर्वाहकः कार्यरूपः प्रतीयते न निरधिकारः तेन सर्वं तदर्थमेवेति पश्चात् तदधिकारानुप्रवेशात् [2]तदधिकारानुप्रवेशाय नाधिकारान्तरमपेक्षते तेनैवान्विताभिधानसिद्धेः निरधिकाराणां कार्यावगमेऽपि[3] [4]विनियोजकशक्तिर्नास्तीति न प्रकरणं तेषामस्ति। **ननु च वाक्यादुपसदङ्गत्वमित्युक्तम्, नोभयपदसंबन्धाभावात् वाक्यं संभवति।** अस्यार्थः —न संभवति वाक्यार्थः उपसच्छब्दस्य सौम्यपुरस्तात्पदाभ्यां सह सकृदुच्चारणे सह संबन्धाभावात्। तस्मादेकपदसंबन्धे स्थिते **पुरस्तादुपसदामित्येव संबन्धः। अथ कस्मादुपसदां सौम्येनेत्येष संबन्धः न भवति? पुरस्तादित्यनन्वयः प्राप्नोति।** अस्यार्थः—पुरस्ता-

---

(1) G. शेषशेषितयैव (2) R. तदधिकारान्वयलाभाय (3) G. कार्यविगमेपि (4) R. विनियोज्यं किञ्चिन्नास्तीति

पुरस्तादिति संबन्धे कालविधानात् सौम्येन चरन्तीत्यविरुद्धम्।
तस्मादिदमपि आग्निमारुतादित्यनेनाविशिष्टम्।

॥ ४ ॥ [1]फलवद्वोक्तहेतुत्वादितरस्य प्रधानं स्यात् ॥ ७ ॥

साङ्ग्रहण्यां तु फलवत्सान्निधौ अफलं तदङ्गमिति सिद्धेप्यनुषङ्गनिवृत्त्यर्थमिदमधिकरणम्। दर्शितं च।

च्छब्दोऽयं नित्यसापेक्षवचनत्वात् उपसद्भिरसंबध्यमानो नार्थमवबोधयति। तेन पुरस्तादित्यनेन सह तावदनन्वये अबोधकमेव वाक्यमापद्येत। न च वाच्यं पश्चात् प्रकृतत्वादुपसदा संबध्यत इति, यस्मादवश्यापेक्षणीयसंबन्ध एव तावन्न्याय्यः। इतरथा ह्यप्रतिपादकमेव स्यात्। पुरस्तादित्यनेन तु संबन्धे शेषिणा विनापि कस्यचिदपि पदस्यानुपपत्त्यसंभवात् पुरस्तादिति कालविधानात् सौम्येन चरन्तीत्यविरुद्धम्। तस्मादिदमपि[1] 'आग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति' इत्यनेनाविशिष्टम्।

फलवद्वोक्तहेतुत्वात्। ननु च कथं समप्रधानभाव आशङ्क्यते यावता साङ्ग्रहण्या एवाधिकारयोगात् प्राधान्यम्। अनधिकाराणां चामनहोमानामङ्गतैवेति तत्राह—साङ्ग्रहण्यां तु फलवत्सन्निधौ अफलं तदङ्गमिति सिद्धेप्यनुषङ्गनिवृत्त्यर्थमिदमधिकरणम्। दर्शितं च। सत्यं निरधिकारं साधिकारस्याङ्गं; आमनहोमास्तु साधिकारा एव, अधिकारपदस्य तेष्वप्यनुषङ्गसंभवात्। न च परिधिमन्त्रा व्यवधायकाः असमानजातीयत्वात्। समानजातीयकं हि व्यवधायकं भवति यथा—'संते वायुर्वातेन गच्छतां' इत्यत्र गच्छतामिति शब्दोऽध्याहृतेन 'संयजत्रैरङ्गानि' इत्यत्र गच्छन्तामिति क्रियापदान्तरेण 'सं यज्ञपतिराशिषा' इत्यत्र व्यवधीयते। न चाधिकारपरस्य मन्त्रपदानि समानजातीयानीतीमाशङ्कामपनेतुमिदमधिकरणम्। सिद्धान्तयुक्तिश्च परिधिमन्त्रैर्व्यवहितत्वात् नानुषङ्ग इति। व्यवदधति च परिधिमन्त्राः अधिकारसंबन्धायोग्यत्वात्। अधिकारबुद्धिविच्छेदकत्वमेव व्यवधायकत्वम्। तद्यथा समानजातीयस्य

---

(1) P. 1272 (2) G. इहापि

॥ ५ ॥ [1]दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ॥ ८ ॥

अनित्यदोषनिर्हरणार्थसङ्कीर्तनात् नैमित्तिकं मन्यते पूर्वपक्षवादी। खदिरवदुभयार्थतामाचार्यदेशीयः। नित्यत्वे सति ज्येष्ठशब्दोपपत्तिरिति मन्यते। राद्धान्तस्तु निमित्तसंयोगाभावात् न दोषनिर्हरणार्थतया नैमित्तिकत्वमस्य शक्यते कल्पयितुम्। किमिति न शक्यते नैमित्तिकदोषनिर्हरणान्यथानुपपत्त्या तस्यापि नैमित्तिकत्वं भवितुमर्हति। सत्यं यद्यन्यथा नोपपद्यते। अर्थवादतया तूपपद्यत एवेति न कल्पनामर्हति।

तथा विजातीयस्यापि तत्संबन्धायोग्यस्य। असंबन्धि हि व्यवदधाति तत्रापि तद्बुद्ध्यनुत्पादनात् इति।

दधिग्रहो नैमित्तिकः। ननु निमित्तासंयोगेन चोद्यमानमिदं कथं नैमित्तिकमित्याशङ्क्याह—**अनित्यदोषनिर्हरणार्थसङ्कीर्तनात् नैमित्तिकं मन्यते पूर्वपक्षवादी।** अस्यार्थः—यद्यपि निमित्तं न श्रूयते तथापि दधिग्रहस्य द्वारापेक्षायां देवतान्तरायवैगुण्यसमाधानमेवार्थवादसङ्कीर्तितमपि कार्यं युक्तम्। ततश्च फलतो नैमित्तिकत्वं **खादिरवदुभयार्थतामाचार्यदेशीयः।** सिद्धान्तैकदेशी तु दोषनिर्हरणार्थमेतददृष्टेन द्वारेण क्रतूपकारार्थं दधिग्रहणं खादिरयूपवन्मन्यते का युक्तिरित्याह—**नित्यत्वे सति ज्येष्ठशब्दोपपत्तिरिति मन्यते।** प्रशस्तत्वाज्ज्येष्ठता भवति। प्रशस्तता [2]चोभयरूपयोगितयाऽभ्यधिकार्थत्वादितरेभ्यः। **राद्धान्तस्तु निमित्तसंयोगाभावान्न दोषनिर्हरणार्थतया नैमित्तिकत्वं शक्यते कल्पयितुम्। किमिति न शक्यते?** एकग्रन्थेनाह—**नैमित्तिकदोषनिर्हरणान्यथानुपपत्त्या तस्यापि नैमित्तिकत्वं भवितुमर्हति।** न हि नित्यस्यानित्यदोषनिर्घातार्थता न संभवति इति। तस्मादसावप्यनित्य इति। **सत्यं यद्यन्यथा नोपपद्यते। अर्थवादतया तूपपद्यत एवेति न कल्पनामर्हति।**

---

(1) 1273 (2) R. उभयोपयो

सारूप्याद्युक्तम् ।

॥ ६ ॥ वैश्वानरश्च नित्यः स्यान्नित्यैः समानसङ्ख्यत्वात् ॥ १२ ॥

अनित्यदोषनिर्हरणार्थवादतयाप्युपपद्यत इति यद्युच्येत वैश्वानरेऽपि नित्यता भवतीति पूर्वपक्षवादिनोऽभिमानः । राद्धान्तस्तु न ब्रूमो दोषनिर्हरणान्नैमित्तिकत्वम् निमित्तसंयोग एवात्र श्रूयते । न च निमित्तश्रुतिरर्थवादतया शक्यते व्याख्यातुम् । श्रुत्यर्थे संभवति नार्थान्तरकल्पनोपपद्यते । दर्शनमुक्तम् ।

अस्यार्थः—स्वरूपेण तावत् न निमित्तश्रवणाभावान्नैमित्तिकमत्र प्रतिभाति । न चानित्यकार्यबलेनाप्यनित्यता कल्पनामर्हति । नित्यानित्यसंयोगविरोधेनानित्यकार्यकल्पनानुपपत्तेः । न हि नित्यं कर्तव्यमनित्यं दोषं निर्हर्तुमिति युज्यते तथापि तावत् तदेव कार्यमिति कल्प्येत यदि दोषनिर्हरणश्रवणमन्यथा नोपपद्येत । तच्च स्तुत्यर्थत्वेनार्थवादत्वेनाप्युपपद्यते इति न प्रयोजनकल्पनामर्हति । सारूप्याद्युक्तं भाष्ये ।

वैश्वानरश्च नित्यः स्यात् । अनित्यदोषनिर्हरणार्थतयाप्युपपद्यत इति यद्युच्येत वैश्वानरेऽपि नित्यता भवतीति पूर्वपक्षवादिनोऽभिमानः । उखायामसम्भरणनिमित्तदोषनिर्हरणमर्थवादतयाप्युपपत्स्यते पूर्ववदिति पूर्वपक्षवादिनोऽभिमानमात्रमिति अभिमानशब्देन मन्दतामाह पूर्वपक्षस्य । राद्धान्तस्तु न ब्रूमो दोषनिर्हरणान्नैमित्तिकत्वं निमित्तसंयोग एवात्र श्रूयते । "यो वै संवत्सरमुख्यमभृत्वाऽग्निं चिनुते संवैश्वानरं निर्वपेत्" इति अभृतोख्य पुरुषाधिकारश्रवणात् नैमित्तिकत्वमेवात्र साक्षाच्छ्रुतम् । अतो नित्यानित्यसंयोगविरोधाभावात् न दोषनिर्हरणार्थवादत्वेन वर्णयितुं न्याय्यम् । न च निमित्तश्रुतिरर्थवादतया शक्यते व्याख्यातुम । श्रुत्यर्थे संभवति नार्थान्तरकल्पनोपपद्यते यतः । दधिग्रहे तु पुरुषसंयोगो नास्तीति । नित्यत्ववद्दर्शनमुक्तम् ।

॥ ७ ॥ [1]षट्चितिः पूर्ववत्त्वात् ॥ १४ ॥

षष्ठीं चितिमिति पूरणप्रत्ययावगमात् निमित्तश्रुतिः अर्थवादतया वर्णयितुं न्याय्येति पूर्वपक्षवादिनोऽभिप्रायः। कुतः ? विधेयानुरोधात् अधिकारकल्पना न्याय्येति मन्यते।

राद्धान्तस्तु सत्यमेवं यदि विरोधः स्यात् न त्वत्र विरोधः, उपदेशविवक्षयापि प्रत्ययार्थोपपत्तेः नावश्यम(र्थो)नुष्ठानापेक्षयैव भगवतः पाणिनेः पूरणसूत्रं शक्यते वर्णयितुम्। तस्माद्-

---

षट्चितिः पूर्ववत्त्वात्। "संवत्सर एवैनं प्रतिष्ठायै नुदते योऽग्निं चित्वा न प्रतितिष्ठति। अथ षष्ठीं चितिं चिनुते" इत्यकृतप्रतिष्ठपुरुषसंयोगान्नैमित्तिकत्वेवेति कथं नित्यता शङ्क्यते इत्यत्राह—षष्ठीं चितिमिति पूरणार्थप्रत्ययावगमान्निमित्तश्रुतिरर्थवादतयैव वर्णयितुं न्याय्येति पूर्वपक्षवादिनोऽभिप्रायः। षष्ठीशब्दः पूरणार्थप्रत्ययान्तः। तेन षट् सङ्ख्या यया पूर्यते चित्या सा चितिः षष्ठी। न च पञ्चसु नित्यासु इयं नैमित्तिकी चितिः षट्सङ्ख्यां पूरयति। एकावच्छेदानुप्रवेशात् द्वित्वादिसङ्ख्योत्पत्तिः। तस्मादियमपि नित्या। नित्यानां च निमित्तश्रुतिराञ्जस्येनानुपपन्ना कथञ्चित् अर्थवादत्वेन वर्णयितव्येति। ननु च निमित्तश्रुतिबलात् षष्ठीशब्द एव किमित्यन्यथा व्याख्यातव्यः इत्यनेनाभिप्रायेण पृच्छति —कुत इति ? विधेयानुरोधादधिकारकल्पना न्याय्येति मन्यते। यथाविनियोगं नियोग इति तिर्यगधिकरणे सिद्धत्वात्। राद्धान्तस्तु सत्यमेवं यदि विरोधः स्यात् न त्वत्र विरोधः कस्मात् ? उपदेशविवक्षयापि पूरणरूपप्रत्ययार्थोपपत्तेः [2]एकापदेशक्रियानुप्रवेशात् षट्सङ्ख्यासंभवात् नावश्यमनुष्ठानापेक्षयैव भगवतः पाणिनेः पूरणसूत्रं शक्यते वर्णयितुम्। यदि ह्यनुष्ठानापेक्षया सङ्ख्यानिवेशाभिप्रायेण सूत्रं भगवता पाणिनिना प्रणीतमिति निश्चयः स्यात् तदा उपदेशापेक्षया षष्ठीशब्दो न घटेत न त्वेनदस्ति। तस्माद्विधेयस्या-

---

(1) P. 1276 (2) R.एकदेश

विरोधः। अविरोधे च न निमित्तश्रुतिः त्यक्तुं पार्यते। तस्मान्नैमित्तिकत्वं सिद्धम्। दर्शनोपन्यासपरिहारावुक्तौ।

॥ ८ ॥ [1]पितृयज्ञः स्वकालत्वादनङ्गं स्यात् ॥ १९ ॥

फलकल्पनातो वरं लक्षणेति पूर्वपक्षवादिनोऽभिप्रायः। दर्शाधिकारानुप्रवेशे सति नाधिकारान्तरं शक्यते कल्पयितुमित्युक्तं भवति। तस्मादङ्गतैवामावास्यायाः पितृयज्ञस्य। अत्रोच्यते–नैकनियोगता संभवति अमावास्यायामिव कालसंयोगा-

---

विरोधः। विधेयाविरोधे च न निमित्तश्रुतिस्त्यक्तुं पार्यते। तस्मान्नैमित्तिकत्वसिद्धिः। दर्शनोपन्यासपरिहारावुक्तौ।

[2]पितृयज्ञः स्वकालत्वात्। ननु "अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्ति" इति कालोपदेशोऽयम्। कथमङ्गित्वममावास्याकर्मणः शक्यते वक्तुम्। न च लक्षणया अमावास्याशब्देन कर्मावगमादङ्गत्वाशङ्का, श्रौतकालत्यागे कारणाभावात् इत्याशङ्क्याह —फलकल्पनातो वरं लक्षणेति पूर्वपक्षवादिनोऽभिप्रायः। अस्यार्थः —किमधिकाराध्याहारः क्रियतां उत लोकप्रसिद्धलक्षणाख्यद्वितीयवृत्त्यन्तरेणामावास्याशब्दं वर्णयित्वा दर्शाधिकारानुप्रवेश एवाश्रीयतामिति। तत्राश्रुतकल्पनाया वृत्त्यन्तरकल्पना लघ्वीति पूर्वपक्षवादिनोऽभिप्रायः। दर्शाधिकारानुप्रवेशे सति नाधिकारान्तरं स्वतन्त्रं कल्पयितुं शक्यत इत्युक्तं भवति। तस्मादेकाधिकारनियोगानुप्रवेशितैवामावास्याकर्मणा सह पिण्डपितृयज्ञस्येति। अत्रोच्यते—नैकनियोगता संभवति। अमावास्यायामिव कालसंयोगा-

---

(1) P. 1275 (2) P. 1277

विशेषात् पिण्डपितृयज्ञस्य । नामावास्यायां श्रौतः पिण्डपितृयज्ञे च लक्षणेति विशेषोऽवगम्यते । उभयत्र कालसंयोगस्य संभवात् । तस्मात्पूर्वापरश्रुतिस्तत्काललक्षणेत्यविरोधः । प्रयोजनमुक्तम् ।

॥ ९ ॥ पश्वङ्गं रशना स्यात् तदागमे विधानात् ॥ २१ ॥

विशेषात् पिण्डपितृयज्ञस्य । नामावास्यायां श्रौतः पिण्डपितृयज्ञे च लक्षणेति विशेषोऽवगम्यते । उभयत्र कालयोगस्य संभवात् । अस्यार्थः—यदि दर्शोपदेशपूर्वकः पिण्डपितृयज्ञोपदेशः स्यात् तदा दर्शस्यामावास्याकाल[1] संबन्धावगमात् कालशब्दः पूर्वावगतसंबन्धानुसारेण लक्षणया वर्ण्येत । यदा पुनः परस्परनिरपेक्षमिदमुपदेशद्वयं तदा उभयत्रापि पूर्वावगतसंबन्धाभावान्न लक्षणा वर्णयितुं न्याय्या । न च कालोपदेशः पिण्डपितृयज्ञे न संभवति । इतरेतराश्रयतापत्तेः । अमावास्याकर्माङ्गत्वे प्रधानकालत्वादङ्गानां अमावास्याकालः प्राप्नोतीति नोपदेशः स्यात् । कालानुपदेशके चामावास्याशब्दे शेषिसमर्पके सति अमावास्याङ्गतेति । **तस्मात् पूर्वापरश्रुतिस्तत्काललक्षणेत्यविरोधः ।** अनेन चोपसंहारव्याजेन परिचोदनान्तरं निराकरोति । एवं हि चोद्यते—अर्थवादेन हि(न)पौर्वापर्यं पिण्डपितृयज्ञस्य दर्शस्य च श्रूयते । तच्चैकप्रयोगानुप्रवेशनिबन्धनम् । एकप्रयोगप्रवेशित्वं चाङ्गाङ्गिभावे सति । तस्मादङ्गतैवावभातीति परिचोदना सा एवं परिह्रियते—यदाऽङ्गत्वस्थापकं प्रमाणं नास्ति तदा या पूर्वापरश्रुतिः सा स्वतन्त्रयोरेव कर्मणोः काललक्षणामावास्यायां[2] दर्शस्य पिण्डपितृयज्ञः[3] प्रतिपदि इष्टिरिति । तस्मादर्थवादेनाप्यविरोधः । **प्रयोजनमुक्तम् ।** पौर्णमास्युपक्रमत्वाद्दर्शपूर्णमासयोः पौर्णमास्यां कृताधानस्य अमावास्यायामागतायामपि दर्शो न कार्यः । तत्र सिद्धान्ते पिण्डपितृयज्ञो भवति इतरथा प्रधानाभावे न क्रियेत । कुण्डपायिनामयने चानङ्गत्वान्नातिदिश्यते पिण्डपितृयज्ञः ।

पश्वङ्गं रशना । ननु 'त्रिवृता यूपं परिवीय' इति परिव्याणं तावत् द्वितीयाश्रुत्या यूपाङ्गम् । त्रिवृतेति च वाक्येन रशनापि परिव्याणाङ्गम् । ततश्च परिव्याणमुखेन

---

(1) G. कालखण्डाव (2) R. omits दर्शस्य (3) G. यज्ञस्येति

अत्रापि क्त्वाप्रत्ययस्य क्रियान्तरापेक्षित्वात् एकनियोगतां पूर्वपक्षवादी मन्यते। तत्र च पश्वर्थतैव प्राप्नोति यूपस्यापि तदर्थत्वात्। राद्धान्तवादी तु समानकर्तृकतामात्रं क्त्वाप्रत्ययादवगम्यते न नियोगैक्यमिति यूपस्य पुनः द्वितीयातः प्राधान्यमेव युक्तमिति राद्धान्तितवान्।

ननु चैकनियोगादृते समानकर्तृकतैव न संभवति। सत्यं न संभवति किन्तु अधिकारैक्यात् सिद्धं समानकर्तृकत्वम्।

रशनापि यूपस्याङ्गमरुणादय इव सोमस्येति कथं पश्वङ्गताशङ्का ? इत्यत्राह—**अत्रापि क्त्वाप्रत्ययस्य क्रियान्तरापेक्षित्वात् एकनियोगतां पूर्वपक्षवादी मन्यते।** अस्यार्थः—'पशुमुपाकरोति' इति तावदुपाकरणस्य पश्वङ्गत्वं प्रतीयते। तथा परिव्याणमपि क्त्वाप्रत्ययेनोपाकरणसमानकर्तृकम्। समानकर्तृकता चैकप्रयोगनिबन्धना। एकप्रयोगता चाङ्गाङ्गिभावेनेत्युपाकरणाङ्गमेव परिव्याणम्। ननु यद्यपि क्त्वाप्रत्ययादङ्गाङ्गिता भवति। तथापि विपरीतं कस्मान्न भवतीत्यत्राह—**तत्र च पश्वर्थतैव प्राप्नोति यूपस्यापि तदर्थत्वात्।** अस्यार्थः—नोपाकरणं परिव्याणार्थं तथा हि सति यूपार्थतैव सर्वस्य स्यात्। सा चायुक्ता यूपस्यापि पश्वङ्गत्वात्। तस्मात् पश्वङ्गमेव रशनेति। **सिद्धान्तवादी तु समानकर्तृकतामात्रं क्त्वाप्रत्ययादवसीयते न नियोगैक्यमिति यूपस्य द्वितीयातः प्राधान्यं युक्तमिति सिद्धान्तितवान्।** अस्यार्थः—यथा द्वितीयातः प्राधान्यावगमः न तथा क्त्वाप्रत्ययात्, किन्तु विमर्शान्तरापेक्ष इति [1]द्वितीयावशेन यूपार्थपरिव्याणानुप्रवेशिनी रशनापि यूपार्था। **ननु चैकनियोगादृते समानकर्तृकतैव न संभवति।** द्वितीयात्वनीप्सितार्थापि संभवति। **सत्यं न संभवति किन्तु अधिकारैक्यात् सिद्धं समान कर्तृकत्वम्** ननु तर्हि किं क्त्वाप्रत्ययेन, एवमुच्यतां—'त्रिवृता यूपं परिव्ययति' इति। उच्यते— कालार्था क्त्वाश्रुतिः।

(1) G. द्वितीयार्थापन्ना

ननु च काललक्षणा नैवात्र संभवति। उच्चारणकालविभागो हि क्त्वाप्रत्ययोत्पत्तौ हेतुरित्युक्तम्। सत्यमुक्तं, स एवोच्चारणकालोऽनुष्ठानेपि लक्षणयोच्यते। सर्वत्र च कालविधावियमेव प्रतिपत्तिर्लोके वेदे च। समानकर्तृकतापि नैव तत्राद्रियते कालनिष्ठत्वान्नियोगस्य। अत एव च दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति समानकर्तृकताचोद्यं परिहृतं भवति। प्रयोजनमुक्तम्।

॥ १० ॥ [1]स्वरुश्चाप्येकदेशत्वात् ॥ १५ ॥

यूपस्य स्वरुमिति स्वरुमान् यूप इति गोमानितिवत् तादर्थ्यं मन्यते पूर्वपक्षवादी। दृष्टो हि तादर्थ्ये सति

अत्राह—ननु काललक्षणा अत्र नैव संभवति। उच्चारणकालविभागो हि क्त्वाप्रत्ययोत्पत्तौ हेतुरित्युक्तम्। अस्यार्थः—नानुष्ठानकालपूर्वता क्त्वाप्रत्ययोत्पत्तौ हेतुः। किन्तु उच्चारणपूर्वकालता। अतः कथमनुष्ठाने पूर्वकालतोपदेशः स्यादिति। सत्यमुक्तम् स एवोच्चारणकालोऽनुष्ठानेऽपि लक्षणयोच्यते। अस्यार्थः—क्त्वाप्रत्ययस्यानन्यपरत्वात् उच्चारणगतोऽपि कालो लक्षणयाऽनुष्ठाने विधीयते। सर्वत्र कालविधावियमेव प्रतिपत्तिः लोके वेदे च। तत्रायं विशेषः समानकर्तृकतापि नैव तत्राद्रियते कालनिष्ठत्वान्नियोगस्य। यत एव कालविधिपरे वाक्ये समानकर्तृकताऽवगम्यमानापि न विवक्षिता एकत्ववत्। अत एव च 'दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत' इति समानकर्तृकताचोद्यं परिहृतं भवति। प्रयोजनमुक्तम्।

स्वरुश्चाप्येकदेशत्वात्। 'यूपस्य स्वरुं करोति' इति श्रूयते। कथं यूपार्थता स्वरोराशङ्क्यते। न हि षष्ठी तादर्थ्यमाह, तत्राह—'यूपस्य स्वरुं' इति स्वरुमान् यूप इति मत्वर्थः प्रतीयते गोमानितिवत् तादर्थ्यं मन्यते पूर्वपक्षवादी। दृष्टो हि तादर्थ्ये सति

---

(1) P. 1271

मत्वर्थः। एवमत्रापीत्यभिप्रायः। राद्धान्तवादी तु यवमतीत्ये-वमादिषु अनैकान्त्यात पशुमनक्तीति द्वितीयानिर्देशात् दृष्टार्थ-त्वाच्च पश्वर्थतैवेति। षष्ठी तूत्पत्तिसंयोगेप्युपपन्ना चेत्यदोषः। प्रयोजनमुक्तम्।

॥ ११ ॥ दर्शपूर्णमासयोरिज्योः प्राधान्यविशेषात ॥ २९ ॥

मत्वर्थः। एवमत्रापीत्यभिप्रायः। अस्यार्थः—'यूपस्य स्वरुं करोति' इति स्वरोस्तावत् कल्पयितव्यं तादर्थ्यम्। 'यूपस्य स्वरुं' इत्यत्र स्वरुमान् यूप इति मत्वर्थः प्रतीयते। मत्वर्थश्च प्रायेण तादर्थ्ये सति दृष्ट इति तत्रैव तादर्थ्यकल्पना युक्ता। तेनोत्पत्तिवाक्ये प्रयोजनावगमात् यूपार्थ एव स्वरुः। स्वरुणा यूपमनक्तीति च तस्यैवाञ्जनेन प्रतिपत्तिः। **राद्धान्तवादी तु यवमतीत्येवमादिषु अनैकान्त्यात् पशुमनक्तीति च द्वितीयानिर्देशात् दृष्टार्थत्वाच्च पश्वर्थतैवेति** मन्यत इति व्यवहितेन संबन्धः। अस्यार्थः—न तावन्म-तुबर्थस्य नियमः यवमतीत्येवमादिषु व्यभिचारात। पशुमिति च द्वितीयया अञ्जनस्यापि कार्यान्तरश्रवणात्। अञ्जना(ता)र्थत्वे च स्वरोः क्रियानिर्वृत्त्या दृष्टार्थत्वाच्चाञ्जनार्थ एव स्वरुः **षष्ठी तु उत्प[1]त्तिसंयोगेप्युपपन्नैवेत्यदोषः।** अस्यार्थः—प्रतीयमानोऽपि तावन्मत्वर्थः शेष-ताव्यभिचारी प्रायिकादपि कथा नानुपपन्ना। अञ्जने वाक्येन विनियोगात्। नचाञ्जनमेक प्रतिपत्तिः पशुं इत्यञ्जनस्यापि द्वितीयया कार्यान्तरश्रवणात। अञ्जनार्थत्वे च स्वरोः क्रिया-निर्वृत्तिश्च दृष्टोऽर्थः। न च षष्ठी मत्वर्थमप्येकान्ततोऽवगमयति उत्पत्तिसंयोगेनापि यूपार्थानु-निष्पन्नतया च घटमानत्वात। **प्रयोजनमुक्तम्।**

दर्शपूर्णमासयोरिज्याः प्राधान्यविशेषात्। पौर्णमास्यधिकरणे 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वानमावास्यां यजते' इति समुदायानुवादाविति स्थितम्। तथाऽनुवादपक्षेपि कालसंबन्धितया श्रवणादुत्पत्तिकालयोगिनामेवानुवादः न सर्वेषां रूपवता-

---

(1) G. उत्पन्न

स्थितं राजसूयाधिकरणे अनिज्या व्युदस्यन्ते। यजिशब्दसंयोगेनाधिकारश्रवणात्। यत्रैव च धातुर्वर्तते तत्रैवोपपदं नामतया वर्तत इति नामधेयविचारे स्थितम्। अतः पूर्वपक्षवादी यागमात्रवचनोऽयं यजिः यत्र यजिः तत्रैवोपपदं वर्तत इति मन्वानो द्विवचनान्तसरूपमेवेदमभिधानं मन्यते। यत्पुनः 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इति विकृतिषु दर्शनं तत् कथ-

---

मिति स्थितम्। इदानीमधिकारवाक्यगतं यजिशब्दं प्रति चिन्ता। किं सर्वे यागा अधिकारं प्रति विधीयन्ते उतानूदिता एवेति। ननु च यथाकालमेवाधिकारसंबन्धो न्याय्यः। उपपदानुरोधात् [1]तेषामेवाधिकारसंबन्धो न्याय्यः कालसंबन्धस्य विद्यमानत्वात् समुदायानुवादवाक्यवत्। तस्मात् कथमत्र पूर्वपक्षे सर्वयागानां समप्रधानताशङ्का इत्यत्राह—स्थितं राजसूयाधिकरणे ऽनिज्या व्युदस्यन्ते यजिशब्दसंयोगेनाधिकारश्रवणात् यत्रैव च धातुर्वर्तते तत्रैवोपपदं नामतया वर्तत इति नामधेयविचारे स्थितम्। अतः पूर्वपक्षवादी यागमात्रवचनोऽयं यजिः। यत्र यजिः तत्रवोपपदं वर्तत इति मन्वानो द्विवचनान्तसरूपमेवेदमभिधानं मन्यते। अस्यार्थः—यजिरयं यागमात्रवचनः न कालयोगियागसमुदायवचनः कालसंबद्धाश्च यागा बहवः तेषु द्विवचनान्तमुपपदं नाञ्जस्येन वर्तितुमर्हति। अनाञ्जसे च द्विवचने कालयोगिष्वेव दर्शपूर्णमासपदं नाख्यातार्थ्देन वर्तते। किन्तु सन्निहिताख्याताभिहितयागमात्र एव[2]। न च समुदितकालावयवद्वययोगः कस्यचिदपि कर्मणोऽस्तीति [3]तेनोपदेशेन विशेषे यजिमवस्थापयितुमलम्। अतो राजसूयवत् अनिज्यैव परमङ्गम्। तस्मात् सर्वयागानां प्रकृतानामधिकारसंबन्धः। तत्सामानाधिकरण्याच्च दर्शपूर्णमासशब्दोऽपि सर्वेषामपि नामधेयम् दर्शपूर्णमासाभ्यामिति न द्विवचनं किन्तु तत्प्रतिरूपकम्। द्विवचनं वा विभक्तिव्यत्ययेन बहुवचनार्थे। एकयज्यभिधानतया वा तदनूदितसमुदायाभिप्रायमेकवचनार्थे द्रष्टव्यमिति। यत्पुनः 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इति विकृतिषु दर्शनं तत्कथ—

(1) G. केषाञ्चिदेव (2) समुदित एव (3) R. तत्रोपपदं न

मस्मिन् पक्षे भविष्यति ? प्रमाणान्तरं मृग्यं यत्रेति वा, व्यामोहो वा, कर्मान्तरं वा नामतश्च धर्मग्रहणं भविष्यति । यत्पुनः य एवं विद्वानमावास्यां यजत इति तत् प्रकृतसमुदायद्वयं किमिति न परिगृह्यते द्विवचनयोगात् । उक्तं च धात्वर्थानुसार्युपपदमिति । दर्शशब्दाच्चान्यत्वावगतेः । तस्माद्राजसूयवदनिज्यैवात्राङ्गमिति स्थितम् । अत्रोच्यते—सत्यमिदं धात्वर्थानुसार्युपपदमिति

मस्मिन् पक्षे भविष्यति ? यदि सर्वे यागाः प्रधानभूताः तदा प्रयाजानां प्रधानत्वात् प्रधानस्य च '[1]कर्मणस्त्वप्रवृत्तत्वात्' इति विकृतिष्वतिदेशनिराकरणात् । असति च प्रयाजे तद्गुणविधानासंभवात् । उत्तरं तु प्रयाजप्राप्तिसिद्ध्यर्थं अतिदेशादन्यत् प्रमाणान्तरं मृग्यम् । 'यत्र' इति वचनमिदमुत्कर्षणीयम्—यत्र प्रयाजाः तत्र नेतव्यम् । प्राप्त्य-भावेन प्राप्तिदर्शनं व्यामोहो वा कल्पनीयः । कर्मान्तराणि वा । नामतश्च धर्म-ग्रहणं भविष्यति । न चेत् प्राकृताः प्रयाजाः[2] किमिति विकृतावेव कर्मान्तराणि न विधीयन्ते । प्रयाजशब्दश्च धर्मातिदेशको भविष्यति । सर्वथा अतिदेशाभावे या काचिद्गतिर्भविष्यति । न्यायस्तावदयमुक्तः सर्वेयागाः प्रधानभूता इति । यत्पुनः 'य एवं विद्वानमावास्यां यजते' 'य एवं विद्वान् पौर्णमासीं यजते' इति तत्प्रकृतसमुदायद्वयं किमिति न परिगृह्यते द्विवचनयोगात् । तत्र कालयोग्युपपद-गतं द्विवचनं नायथार्थं भवतीत्युक्तमेव । उत्तरं— उक्तं च धात्वर्थानुसार्युपपदमिति । अस्यार्थः—धातुरयं तावत् यागमाह । न यागसमुदायम्[3] । न च यागद्वयं कालद्वययोगि प्रकृतम् । किन्तु बहवस्ते यागाः प्रकृताः । तेषु चागृह्यमाणविशेषत्वात् सर्वेषु यजिर्वर्तते ते च बहव इति द्विवचनं न घटते द्विवचनानुपपत्तौ सत्यां न भेदेन नाम वर्तते । न चोभयपदानु-रोधी कश्चिद्यागोऽस्ति इति नोपपदानुसारी यजिः । किं तर्हि यज्यनुसार्युपपदमिति । दर्शशब्दाच्चान्यत्वावगतेः दर्शशब्दवाच्योऽयं अमावास्याशब्दवाच्यतया न दृश्यते लोके । तेनामावास्याकालानुवादो नावगम्यते । तेनान्यत्वमधिकारविषयस्यावगम्यते । तेन राजसूय-वदनिज्यैवात्राङ्गमिति स्थितम् । अत्रोच्यते—सत्यमिदं धात्वर्थानुसार्युपपदमिति

---

(1) पू. मी. 8-1-20 (2) G. यागाः (3) G. कालसमुदायं

तथापि समुदायद्वयस्य प्रकृतत्वात् द्विवचनस्य चार्थान्तरानुपपत्तेः। संभवति च स्वार्थे सरूपकल्पनाया असंभवात्। धात्वर्थानुसारितायां चाविरोध उपपदस्य। कथं? नैवेदमुपपदं अधात्वर्थे प्रवृत्तं, धात्वर्थप्रवृत्तौ सत्यां न नामार्थपरित्याग उपपद्यते। कश्चास्यार्थः प्रकृतसमुदायद्वयवचनता। एवं च तदनुसारित्वे उपपन्ने नार्थान्तरकल्पनायां प्रमाणमस्ति। ननु च प्रकृतयागपरित्यागे नास्ति प्रमाणं धातोः; केन वा उक्तं अपरित्यागे प्रमाणमस्तीति किन्तूपपदार्थविरोधाभिधाने नास्ति प्रमाणमित्युक्तमस्माभिः।

तथापि समुदायद्वयस्य प्रकृतत्वात् द्विवचनस्य चार्थान्तरानुपपत्तेः। संभवति च स्वार्थे सरूपकल्पनाया असंभवात्। अस्यार्थः—धात्वर्थानुसार्युपपदमिति सत्यं तथापि समुदायद्वये अयं यजिर्वर्तत इति किमिति न भवति समुदायद्वयस्य प्रकृतत्वात्। ततश्च समुदायद्वयस्यैवाधिकारसंबन्धः। कुतः? द्विवचनस्यार्थान्तरानुपपत्तेः। संभवति च द्विवचने द्विवचनसरूपमिति कल्पनानुपपत्तेः। ननु समुदायवचनोऽयं यजिः न भवतीत्युक्तम्। सत्यमुक्तम्। समुदायावस्थापन्नयागवचनो भविष्यति। तथा च सति द्विवचनमाञ्जस्येन भविष्यति। तदाह—**धात्वर्थानुसारितायां चाविरोध उपपदस्य।** स्यात्। कथमविरोधः? यस्मात् **नैवेदमुपपदं अधात्वर्थे प्रवृत्तम्।** किन्तु धात्वर्थ एव। किञ्च **धात्वर्थप्रवृत्तौ सत्यां नाम्नो नार्थपरित्याग उपपद्यते।** कालसंबद्धमिदमुपपदम्। तत्र कालयोगिनामेव अनुवादवाक्ये नामतया ज्ञातं—अधिकारवाक्येपि तेषामेव ग्रहणे तस्यार्थस्य त्यागो न भवति तस्यार्थः—प्रकृतसमुदायद्वयवचनादेव उपपन्ने नार्थान्तरकल्पने प्रमाणमस्ति तदाऽतिपरोक्षवृत्त्याश्रयणमुपपदस्य कृतं न भविष्यति। **कश्चास्यार्थः? प्रकृतसमुदायद्वयवचनता। एवं तदनुसारित्वे उपपन्ने नार्थान्तरकल्पनायां प्रमाणमस्ति। ननु च प्रकृतयागपरित्यागे नास्ति प्रमाणं धातोः। केन वोक्तमपरित्यागे प्रमाणमस्तीति। किन्तूपपदार्थविरोधाभिधाने नास्ति प्रमाणमित्युक्तमस्माभिः।** एतदुक्तं भवति—न प्रकृतं परित्यज्यते यजेतेति यजिः प्रकृत एव वर्तते। किन्तूपपदानुगुण्यात् कालयोगिषु

यच्च दर्शशब्दश्रवणात् न प्रकृतप्रत्यभिज्ञानमस्तीति परिहृतं तद्वाक्यशेषेष्वेकार्थत्वदर्शनादिति । शक्यत्वाच्च दर्शशब्देनापि तदर्थाभिधानस्य । तस्मात्सूक्तं फलवत्सन्निधावफलं तदङ्गमिति । यत्पुनरिदमुक्तं कस्मान्नानुषङ्गो भवतीति चोद्यं परिहृतं तदनुषङ्गतो वर[मितिकर्तव्यता]काङ्क्षापरिपूरणमिति । अन्यथा त्वनवस्थैवाकाङ्क्षाया इति । यद्यवं किमिति व्यवायान्नानुषज्येत इति साङ्ग्रहण्यां दर्शितं तत्राप्ययमेव न्यायो युक्तः वक्तव्यो वा विशेषः ।

अयमभिधीयते—युक्तं तत्र प्रकृतिवदितिकर्तव्यतायां स्थितायां निराकाङ्क्षत्वात व्यवायादेवानुषङ्गनिषेधः । इह पुनरपर्यवसितत्वादितिकर्तव्यतार्थितायां स्थितायां

आपन्नसमुदायभावेषु वर्तत इति । यच्च दर्शशब्दश्रवणान्न प्रकृतप्रत्यभिज्ञाऽस्तीति परिहृतं तत् वाक्यशेषेष्वेकार्थत्वदर्शनादिति । शक्यत्वाच्च दर्शशब्देनापि तदर्थाभिधानस्य चन्द्रादर्शनेन विपरीतलक्षणया दर्शशब्देन तदर्थाभिधानस्य अमावास्याभिधानस्य । तस्मात् सूक्तं फलवत्सन्निधावफलं तदङ्गमिति । यत्पुनरिदमुक्तं कस्मान्नानुषङ्गो भवष्यतीति चोद्यं परिहृतं तत् अनुषङ्गतो वरमितिकर्तव्यताकाङ्क्षापरिपूरणमिति । अन्यथा ह्यनवस्थैवाकाङ्क्षाया इति । यद्यवं यदीतिकर्तव्यताकाङ्क्षापूरकत्वे संभवति नानुषङ्गः । किमिति व्यवायान्नानुषज्येत इति साङ्ग्रहण्यां दर्शितम् तत्राप्ययमेव न्यायो युक्तः । वक्तव्यो वा विशेषः ।

अयमभिधीयते । युक्तं तत्र साङ्ग्रहण्यां विकृतित्वेन प्रकृतिवदितिकर्तव्यतायां स्थितायां निराकाङ्क्षत्वात् । अतिदेशेनाकाङ्क्षापरिपूरणसंभवात् । अतस्तत्र व्यवायादेवानुषङ्गनिषेधः । इह पुनः अपर्यवसितत्वात् इतिकर्तव्यतार्थितायां स्थितायां

पूरणेनैवैकनियोगत्वं युक्तम्। न पुनरधिकारान्तरकल्पनेति सूक्तम्। दर्शनानि चोक्तानि। अङ्गवत्स्तुतयः।

॥ १२ ॥ ज्योतिष्टोमे तुल्यान्यविशिष्टं हि कारणम् ॥ ३९ ॥

इह तु द्विवचनाद्यभावात् न यागमात्रप्रतिपत्तिः शक्यते वारयितुम्। [ज्योतिष्टोमशब्दस्य च नामधेयत्वात प्रवृत्तौ निमित्तं अभिधेयं नान्वयीत्युक्तं नामधेयविचारे]।

प्रकृतित्वात् तत्पूरणेनैवैकनियोगत्वं **न पुनरधिकारान्तरकल्पनेति सूक्तम्।** **अङ्गवत्स्तुतयः** चक्षुषी वा इत्यादयः। **दर्शनानि च** विकृतिषु प्रयाजादीन्युक्तानि।

ज्योतिष्टोमे तुल्यानि। ननु ज्योतींषि स्तोमा अस्येति बहुव्रीहिणा सोमयाग एव प्रधानोऽवगम्यते। अथोच्येत सत्यं स्तोमवत्ता सोमयागानां किन्तु ज्योतिष्टोमता नास्तीति बहुव्रीह्यर्थ एवात्र नोपपद्यते इति अनन्वितस्वार्थत्वात् यजिमात्रस्यापि कारकसंबन्ध[1] इति। तन्न वाक्यशेषे त्रिवृदादिस्तोत्राणां ज्योतिष्टुकीर्तनात्। अर्थवादकीर्तितेनापि व्यपदेशो दृश्यते[2] एव 'आग्नेयो वै ब्राह्मणः' इतिवत्। तस्मात कथमत्र पूर्वपक्ष इत्यत्राह—**इह तु द्विवचनाद्यभावात् न यागमात्रप्रतिपत्तिः शक्यते वारयितुम।** अस्यार्थः—यथा दर्शपूर्णमासाभ्यामिति द्विवचनानुरोधान्न सर्वयागेषु वृत्तिः तथेह नास्ति किञ्चित। तस्मान्न यागमात्रे वृत्तिः शक्यते वारयितुम्। ननु ज्योतिष्टोमप्रातिपदिकादेव वारयितुं शक्यते तत्राह—**ज्योतिष्टोमशब्दस्य च नामधेयत्वात् प्रवृत्तौ निमित्तमभिधेयं नान्वयीत्युक्तं नामधेयविचारे।** अस्यार्थः—न ज्योतिष्टोमशब्दो यजेः विशेषकः किं तर्हि, नाममात्रम्। न हि विधीयमानस्य विशेषणं विवक्षितुं न्याय्यम्। न च अरुणैकहायनीन्यायः संभवति। ज्योतिष्टोमशब्दस्यार्थान्तराभावात् भावार्थमात्रस्य च नियोगेन साक्षात्संबन्धात। तस्माद-विशिष्टं यजिमात्रमत्र प्रधानं अयजिरेवात्राप्यङ्गं, राजसूयवत् नामापि तद्वत्। अत्रोच्यते

---

(1) G. स्य कारकसम्बन्धः (2) G. गृह्यते

ननु च नामतैवात्र हीयते विशेषणमेवैतत्तदा भवति किं न इछिन्नम्। तथापि राद्धान्तः सिद्ध एव। किन्तु विशेषण-पदमपि एतन्नामैव अर्थान्तरानुपपत्तेः यज्यर्थस्य विशेषण-मात्रावगमहेतुत्वात। (तदेतद्द्वित्वमपि)। अतोऽन्वितमपि विशेषणनिष्ठमिति नामैव, अर्थान्तरानुपादानात। स्तुतिदर्शनं चोक्तम्।

इति बृहत्यां चतुर्थाध्यायस्य
चतुर्थः पादः

—यदि नामत्वादनन्वयित्वमुक्तमस्माभिः स्यादेतदेवं, यदि यद्यन्नाम तत्तत् कार्यान्वयि भवतीत्युक्तमस्माभिः तदा भवेदेतदेवं, तत्र पुनरनन्वयादेवानन्वयित्वमुक्तम्। न हि कथञ्चित् उद्भिदादयः कार्येऽन्वयवन्तः। तेन कार्येऽनन्वयिनः उक्ताः, न सत्यन्वये नामत्वादनन्वयित्वम्। इह त्वनन्वयोऽवगम्यमानो यजिविशेषोपस्थापकतया न नामतया वारयितुं शक्यते। ननु च नामतैवात्र हीयते विशेषणपदमेवैतत् तदा भवति। तच्च नयुक्तमिति भावः। किं नश्छिन्नम् तथापि राद्धान्तस्सिद्ध एव। एतच्चाभ्युपगम्यवादमात्रम्। किन्तु विशेषणपदमप्येतन्नामैव, अर्थान्तरानुपपत्तेः। यज्यर्थस्य विशेषमात्रावगमहेतुत्वात्। अतोऽन्वितमपि विशेषणमात्रनिष्ठमिति नामैव अर्थान्तरानुपादानात्। अस्यार्थः—नेदं नीलादिवद्विशेषणं, किन्तु एतन्नामानुगुण्येन यजिरेव विशिष्टे यागे वर्तते। यदि हि यागमात्रे वर्तेत तदा नाम्नो [ऽर्थान्वयश्च यागे स्यात्। तस्य च सोमयागवचनत्वात्। तेनैतदनुरोद्धं विशिष्टे यागे यजिरेव वर्तते] ऽतिपरोक्षा वृत्तिराश्रयणीया तेनैतद्विरोधाद्विशिष्टे यागे वर्तते यजिरेव। ज्योतिष्टोमपदमपि तत्रैव नामतया वर्तते अर्थान्तरानुपस्थापकत्वात्। नन्वेवं वैश्वदेवेन यजेतेत्यत्रापि किमिति वैश्वदेवपदानुरोधात्त यजिः वैश्वदेव्यामिक्षासाध्येयाग एव न वर्तते। ततश्च वैश्वदेवपदमपि तस्यैव नामास्तु न सर्वेषाम्।

अत्रोच्यते—[1]द्विविधं हि नाम, किञ्चित् प्रवृत्तं, किञ्चिच्च प्रवर्त्यं, यत्र वाक्यान्तरालोचनया यागे प्रवृत्तिरवधारिता, तत्प्रवृत्तं नाम। यथा दर्शपूर्णमासौ इति। कालवचनयोरप्यनयोः अनुत्पादात् आग्नेयादिवचनता। तथा ज्योतिष्टोमशब्दोऽपि प्रवृत्तनाम। अर्थवादालोचनया यागे प्रवृत्त्यवगतेः। प्रवृत्तेन च नाम्ना वाक्यान्तरेण यजिर्विशेषेऽवस्थाप्यते तन्निरपेक्षनामत्वावगतेः। राजसूयशब्दस्तु यद्यपि राजा सोमः सूयतेऽस्मिन्निति व्युत्पत्त्या सोमाभिषवसंबन्धात् सोमयागे प्रवृत्तनाम तथापि न यजिं विशेषेऽवस्थापयितुमलम्, स्वाराज्यफलत्वात्कर्मणः। राजा सूयते अस्मादिति व्युत्पत्त्यन्तरसंभवात्। यस्य नान्यतो यागे प्रवृत्तिरवगता, किन्तु स्ववाक्यगतयजिसामानाधिकरण्येनैव कल्प्या तत् प्रवर्त्यं नाम। यथा वैश्वदेवशब्दः। स हि सूक्तहविषोरिति नियमात् सूक्तहविषोरेव वर्तते न यागे। तेन वैश्वदेवेन यजेतेति यजिसामानाधिकरण्यात् अस्य नामता कल्प्या। ततश्च पूर्वप्रकृतयागवर्तिनं यजिं न विशेषेऽवस्थापयितुमलमिति सिद्धम्। अनुवादवाक्यगतश्च यजिरेव यथोत्पत्तिकालयोगिष्वेव तत्र वर्तते तेषामेवामावास्यापौर्णमासीशब्दौ नामनी तथा पौर्णमास्यधिकरणे उक्तमिति। इति नामचतुष्टयविवेकः।

इति शालिकनाथमिश्रविरचितायां ऋजुविमलायां
पञ्जिकायां चतुर्थस्य
चतुर्थः पादः

---

(1) From G. अत्रोच्यते—वैश्वदेवशब्दोऽपि यजिसामानाधिकरण्यात् प्रयुज्यते। यजिश्च प्राकृतेषु सर्वेषु यागेषु। न चासौवैश्वदेवशब्देन विशेषेऽवस्थापयितुं शक्यते। अपि तु सर्वेषु वृत्तिसंभवात्. विश्वदेवशब्देन यागे वैश्वदेवशब्दो वर्तते विश्वेषां देवानामिति। न च संबन्धः विश्वैर्देवैः विहितैर्वा स्यात् विधीयमानैर्वा। तत्र विधीयमानता तावत् न संभवति आमिक्षाया विहितत्वात्। अन्यत्र चाशक्यत्वात्। अविधीयमानतया तु सर्वेषामपि व्यपदेशो घटते दण्डवत् यथैकपुरुषवर्तिनापि दण्डेन सर्वे एव दण्डिनोऽभिधीयन्ते। तेन व्यपदेशमात्रसिध्यर्थं व्यपदेशात्र विधिराश्रयणीयः। व्यपदेशश्चेदुपपन्नो यजिं सङ्कोचयितुमर्हति।

नन्वेवमत्रापि ज्योतिष्टोमशब्दोऽपि सोमयागसाहचर्यात् यागान्तरे वर्तेत। उच्यते—अधिकारवाक्ये साङ्गो यागो विधीयते। नानूद्यते। तेन ज्योतिष्टोमशब्दवाच्ययागविषयो नियोगः प्रतीयते। न च स्वार्थतया सर्वान् यागान् गृह्णाति। गृहीतानां च कथं स्यादन्वय इति चिन्तायां न सर्वे यागाः करणतयाऽन्वयं यान्ति नाम्नोऽतिपरोक्षप्रवृत्त्यापत्तेः। तेन सोमयाग एव सर्वे करणतयाऽन्वयं यान्ति। तदा च न नाम्नोऽतिपरोक्षवृत्तिप्रसङ्गः। तेन सोमयागस्यैव प्राधान्यं वैश्वदेवेनेतीत्यनुवादः। स च प्रकृतापेक्षी। प्रकृतापेक्षित्वे च सर्वेषामनुवादः। नन्वेवं य एवं विद्वान् पौर्णमासीं यजते इत्यनुवादः स्यात् नाकालसंबन्धनिबन्धनेनानुवादः तथा तत्रैवोक्तम्। अतः कालयोगिनामेवानुवादः राजसूयशब्दे तु सर्वयागानां करणाभावेन नाम्नो न काचित्क्षतिः। यस्माद्राजासूयते यस्मिन् कर्मणीति फलनिबन्धनमेव नामेति।

इति ऋजुविमलायां चतुर्थस्य
चतुर्थः पादः

अथ बृहत्यां

पञ्चमाध्यायस्य प्रथमः पादः ॥

॥ १ ॥ [1]श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात् ॥ १ ॥

ननु क्रत्वर्थपुरुषार्थचिन्तापि तत्र वृत्ता किमिदं प्रयोजकाप्रयोजकलक्षणं वृत्तमिति। उच्यते—क्रमचिन्तायामस्यैवोपयोगात् वक्ष्यमाणौपयिकतया वृत्तं सङ्कीर्त्यते न वृत्ततया। एकप्रयोगप्रयुक्तानां हि क्रमो भवति नाप्रयुक्तानामिति प्रयोजकाप्रयोजकसङ्कीर्तनम्।

अथ ऋजुविमलायां

पञ्चमाध्यायस्य प्रथमः पादः

श्रुतिलक्षणमानुपूर्व्यं। अत्र भाष्यकारेण प्रयोजकाप्रयोजकलक्षणं वृत्तमित्युक्तम्। तदाक्षिपति—**ननु क्रत्वर्थपुरुषार्थचिन्तापि तत्र वृत्ता। किमिदं प्रयोजकाप्रयोजकलक्षणं वृत्तमिति।** अस्यार्थः—यदि तावत् संक्षेपेणाध्यायार्थः कीर्त्यते तदेवं कीर्तनीयम्। औपदानिकं वस्तुवृत्तमिति। अथ विस्तरेण ततः क्रत्वर्थपुरुषार्थाङ्गप्रधानफलविध्यर्थवादा अपि कीर्तनीयाः। किमिति प्रयोजकाप्रयोजकमेव कीर्त्यते। तेषामपि चतुर्थे चिन्तितत्वादिति। **उच्यते—क्रमचिन्तायामस्यैवोपयोगात्।** प्रयोजकाप्रयोजकलक्षणमेव क्रमचिन्तायामुपयोगि यस्मात् तस्मात्तदेव कीर्त्यते नापरम् अनुपयोगित्वात्। **वक्ष्यमाणौपयिकं हि वृत्तं कीर्त्यते।** यस्य हि वक्ष्यमाणमर्थं प्रत्युपायभावः तदेवात्र कीर्त्यते। **न वृत्ततया** वृत्तमित्येतावता न वृत्तं सङ्कीर्तनीयम्। कथमुपायत्वं क्रमचिन्तायां प्रयोजकाप्रयोजकलक्षणस्येत्याह—**एकप्रयोगप्रयुक्तानां हि क्रमो भवति नाप्रयुक्तानामिति प्रयोजकाप्रयोजकसङ्कीर्तनम्।** एकेन प्रयोगेण प्रयोगविधिना प्रयोज्यानां स्वसिध्यर्थमाक्षिप्तानुष्ठानानां पदार्थानां अनुष्ठानवितानरूपः क्रमो भवति। नाप्रयुक्तानाम्। तेन प्रयोजकत्वे ज्ञाते

---

(1) P. 1284

यदि(प्रयोजकाप्रयोजक)प्रयुक्तानां क्रमश्चिन्त्यते। अविधेयस्तर्हि क्रमः विहितं हि प्रयुज्यते नाप्रयुक्तस्य विधानम्। केन वोक्तं क्रमोविधीयत इति। विहितवितानमेवात्र चिन्त्यते किं यथाप्रतिपन्नविहितवितानमनुष्ठेयं उताऽनियमेनेति। कथं पुनरयथाप्रतिपन्नानुष्ठानमाशङ्क्यते।

क्रमज्ञानमुत्पद्यते अनुष्ठानवैतत्येन च प्रयोगपर्यन्तप्रयोजकत्वं निर्वहतीति परस्परापेक्षितयाऽस्ति संबन्ध इति युक्तं प्रयोजकाप्रयोजकसङ्कीर्तनम्। **यदि प्रयुक्तानां क्रमश्चिन्त्यते अविधेयस्तर्हि क्रमः।** यदि प्रयुक्तानां सतामुत्तरकालं क्रमश्चिन्त्यते अविधेयस्तर्हि क्रमः। ततश्च प्रतीतिमात्रेण क्रमस्वीकारे प्रतीतानां तदाशङ्का न युक्तेति भावः। कथं पुनः प्रयुक्त्युत्तरकालभावित्वेनाविधेयत्वमित्यत्राह——**विहितं हि प्रयुज्यते नाप्रयुक्तस्य विधानमिति।** अस्यार्थः—तत् विधेयमित्युच्यते यद्विधिना स्वसिद्ध्यर्थमुपादीयते। तथा चोक्तं श्येनग्रन्थे—"यत्तु सिद्ध्यर्थमुपादीयते तद्विधेयमिति तन्त्रे व्यवहारः" इति। तेन विधेयत्वं प्रयुक्तत्वेन व्याप्तम् तद्दर्शयति—यद्विहितं तत्प्रयुज्यते। यत्पुनर्न प्रयुज्यते तद्विधेयमपि न भवति इति व्यापकभूतप्रयुक्तिनिवृत्तौ व्याप्यभूतस्य विधेयत्वस्य निवृत्तिरिति। परिहरति—**केन वोक्तं क्रमो विधीयत इति।** ननु यद्यविधेयः किमिति तर्हि चिन्त्यते विधेयत्वे हि क्रमस्य सिद्धान्ते किं क्रमो विधीयते न वेति चिन्ता युक्तेत्याशङ्क्य चिन्ताविषयं स्वरूपं चाह——**न विहितवितानमेवात्र चिन्त्यते। किं यथा प्रतिपन्नविहितवितानमनुष्ठेयं उतानियमेनेति।** विहिता ये पदार्थास्तेषां प्रयोगावस्थायां योऽयं वितानः स एवात्र चिन्त्यते। योऽयं श्रुत्यादिभिः प्रतिपन्नो विहितवितानः किं तमनतिक्रम्यानुष्ठेयं अनुष्ठानं कर्तव्यं उतानियमेनेति। प्रतिपन्नश्चासौ विहितवितानश्चेति कर्मधारयं कृत्वा पश्चाद्यथाशब्देन सहाव्ययीभावः। एवं च वदता अस्मिन्नधिकरणे सर्व एव श्रुत्याद्यवगम्यः क्रमः किमादरणीयः उत नेति चिन्त्यत इति प्रदर्शितम्। प्रदर्शनमात्रतया तु श्रुतिक्रम उदाहृतः। **कथं पुनरि**त्यत्रायमाशयः—प्रतीतमात्रेण क्रमादरे प्रतीतानादराशङ्काऽनुपपन्ना। [1]विधेयतया स्वीकारे तु

---

(1) G. विधेययोः

विनियोगशून्यत्वाद्विहितवितानावगमस्य। नान्तरीयकौ हि विधेयावगतौ वितानप्रत्ययः। अतो यश्चार्थादर्थो न स चोदनार्थ इति मन्वानः पूर्वपक्षवादी अनियमं मन्यते। ननु च 'अध्वर्युर्गृहपतिं दीक्षयित्वा' इत्यत्र क्रमविधानमेवोपन्यस्तं भाष्यकारेण विधेयान्तराभावादिति वदता। यद्येवमयुक्तमिदम्। अस्त्येवात्र विधेयान्तरं अनेनामी दीक्षितव्या इति कर्तृविशेषविधानम्।

प्रतीतस्याप्यविधेयता युक्तेति। परिहरति—**विनियोगशून्यत्वात् विहितवितानावगमस्य।** यथाप्रतिपत्ति अनुष्ठानमाशङ्क्यते इति पूर्वेण संबन्धः। अस्यार्थः—वितानाभिधायकः शब्दः कश्चिन्नास्ति। यश्च नाभिधीयते नासौ विनियुज्यते तार्तीयैः प्रमाणैः। नापि चैकत्वादिवत् विनियोगेनाप्युपादानशेषी क्रियते। तेन तार्तीयचातुर्थिकविनियोगरहितत्वात् वितानप्रत्ययस्यादरणीयता नास्ति। अविधेयत्वेऽपि क्रमस्येयमेव युक्तिः अभिधानशून्यतया[1] विनियोगाभावेनानङ्गत्वात्। विधिना च स्वसिद्ध्यर्थत्वेनाप्रयुक्तेरिति। **नान्तरीयको हि विधेयावगतौ वितानप्रत्ययः** बहुषु पदार्थेषु एकेन कर्त्रा प्रयुज्यमानेषु नान्तरीयकोऽयं वितान(वत प्रयोगः प्रयोग) प्रत्ययो नाभिधानिक इत्यर्थः। उपसंहरति—**यश्चार्थादर्थो न स चोदनार्थ इति मन्वानः पूर्वपक्षवादी अनियमं मन्यते।** तेन प्रतीतमात्रेणापि क्रमस्वीकारे अनादराशङ्का उपपद्यत एवेति समर्थितम्। **ननु च 'अध्वर्युर्गृहपतिं दीक्षयित्वा' इत्यत्र क्रमविधानमेवोपन्यस्तं भाष्यकारेण।** दीक्षाणां प्राप्तत्वात् इत्यनेन ग्रन्थेन विधेयान्तराभावात् क्रमविधानार्थैव श्रुतिरिति **वदता।** तेनाविधेयत्वाभिधानं भाष्यविरुद्धमिति वदति। इदानीं परिहरति—**यद्येवं** यदि विधेयान्तराभावेन क्रमविधानम**युक्तं** तर्हि यस्माद**स्त्येवात्र विधेयान्तरं अनेनामी दीक्षितव्या इति कर्तृविशेषविधानम्।** अध्वर्य्वादिदीक्षासु प्रतिप्रस्थात्रादिकर्तृविशेषविधानमप्यत्र प्रतीयते। ननु 'अध्वर्युर्गृहपतिं' इत्यत्र तर्हि

---

(1) G. तयापि

अध्वर्युविधावपि नियमः एव। किं हेयमेवेदं भाष्यम्? नेति वदामः। यदि क्त्वेति पौर्वापर्यमभिधाने गम्यते कर्तृविधौ, तदनुष्ठानौपयिकतयैव कर्तृविधावुपयुज्यते न संबन्धिविधाविति तन्निष्ठा श्रुतिरित्युक्तम्।

विधेयान्तरं नास्ति अध्वर्योश्चोदकत एव प्राप्तत्वात्, अत्राह—**अध्वर्युविधावपि नियमः** ये यजमानास्त ऋत्विज इत्यनेन वाक्येन यजमाना एवार्त्विजेषु विनियुक्ताः। तेनाध्वर्युस्तावन्निर्वर्तितः। किन्तु केनचिद्यजमानेन केचिद्यजमाना दीक्षयितव्याः। तत्र ऋत्विक्कर्मकरतया ते यजमाना एव तेन तेनर्त्विग्विशेषवाचिना अध्वर्य्वादिशब्देनोच्यन्ते। तत्र येनैव किञ्चिदाध्वर्यवं कृतवता अध्वर्युव्यपदेशो लब्धः तेनैवापरमप्याध्वर्यवं कर्तव्यमिति नास्ति नियामकं प्रमाणं अत आह—**अध्वर्युविधावपि नियम इति।** तेन प्रतिप्रस्थात्रादि-विधिरपि नियमार्थ एवेति मन्तव्यम्। **किं हेयमेवेदं भाष्यं?** यदि दीक्षाणां प्राप्तत्वेन क्रमविधानार्थैव श्रुतिरित्याह—**तद्भाष्यं किं हेयमेव। नेति वदामः। यदिदं क्त्वेति पौर्वापर्यमभिधाने गम्यते कर्तृविधौ तदनुष्ठानौपयिकतयैव कर्तृविधावुपयुज्यते न संबन्धिविधाविति तन्निष्ठा श्रुतिरित्युक्तम्।** अस्यार्थः—न क्त्वाप्रत्ययस्तावत् अनुष्ठानगतं पौर्वापर्यमाह। किन्तु समानकर्तृकतामेव। प्रयोगगतां तु पूर्वकालतां उपाधित्वेन स्वीकरोति। तेन क्त्वान्तं पूर्वं प्रयोक्तव्यं; यच्च पूर्वं प्रयुज्यते तदर्थः पूर्वमवगम्यते। यच्च पूर्वमवगम्यते तत्पूर्वमनुष्ठीयते अपरं च पश्चात्। तेन प्रयोगविततिविशेषोऽवगम्यते। तेन क्त्वाश्रुतिबलेन वितानावगतेः श्रौतोऽयं क्रमः। अथ कस्मात् पाठक्रमेणायं क्रमनियमो न भवतीति चेन्न। दीक्षाणां चोदकतः प्राप्तत्वात् वाक्यस्य च कर्तृविशेषविधानार्थत्वात्। यदि दीक्षैव यावद्विधीयते तदोत्पत्तिवाक्येक्रमेणानुष्ठानमपि भवेत्। येनैव क्रमेणोत्पत्ति-वाक्यान्युच्चार्यन्ते तेनैव तदर्थावगतिः अवगतिक्रमेण चानुष्ठाने क्रमोऽपि भवति, अवगति-निबन्धनत्वादनुष्ठानक्रमस्य। चोदकप्राप्ता तु दीक्षा न वाक्येनावगम्यते इति न तत्र पाठक्रमेण क्रमावगतिः किं तर्हि क्त्वाश्रुतित एवेति। अक्षरयोजना तु—यदिदं क्त्वेति श्रुतेरुपाधिभूतं पौर्वापर्यमभिधाने शब्दप्रयोगेऽवगम्यते कर्तृविधौ तत् कर्तृविधावनुष्ठानौपयिक-

अप्रयुक्तस्याविधेयत्वमेव हेतुरुक्तः। एवं तर्हि हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस इत्येतदप्युदाहरणं अत्र स्यात्।

तयैवोपयुज्यते विततिविशेषावगमं विनानुष्ठानाभावात्। अनुष्ठानौपयिकक्रमावगमहेतुत्वादनुष्ठानौपयिकं पौर्वापर्यम्। कर्तृविधानपक्षे तु दीक्षाणामविधेयत्वान्न पाठतः क्रमः अपि तु श्रुतेः। संबन्धिविधौ तु क्रमसंबन्धिदीक्षाविधौ तु पाठत एवानुष्ठानेऽपि क्रमावगतेः नानुष्ठानौपयिकतयोपयुज्यते। किन्तु शब्दसाधुतामात्रेणेति हेतोस्तन्निष्ठा क्रमनिष्ठाश्रुतिरित्युक्तं भाष्यकारेण। तेन भाष्याक्षराण्येवं योज्यानि। दीक्षाणां प्राप्तत्वादिह वाक्ये तासामविधेयत्वात् पाठतः क्रमानवगतेः क्त्वाश्रुतिरेव क्रमविधानार्था क्रमावगत्यर्थेति यावत्। विधानवाचोयुक्तिस्तु गौणी विधेयवत्क्रमेऽपि तात्पर्यश्रुतेः इति दर्शयितुम्। तेन श्रुतिलक्षणमानुपूर्व्यमिति सूत्रं अध्वर्युर्ब्रह्माणं इत्यत्र श्रौत एव क्रमो न पाठक्रम इति दर्शयितुं सूत्रकारेण प्रणीतमिति दर्शितं भाष्यकारेण। तेनायं विचारः—किं 'अध्वर्युरित्यादिवाक्ये श्रुतिक्रमोऽयं उत पाठक्रम इति। तत्र पूर्वपक्षवादी अवदानवाक्यवत् पाठक्रमोऽयमित्याह। राद्धान्तवादी तु चोदकत एव दीक्षाणां प्राप्तत्वात् उत्पत्तौ नास्ति दीक्षाणां पाठक्रम इति नायं पाठक्रमः। किन्तु श्रुतिक्रम एवायमिति। चिन्ताप्रयोजनं तु यत्र चोदकतः प्राप्तेषु अन्यपरे वाक्ये श्रुतिर्नास्ति तत्र पाठत एव क्रमो नादरणीयः इति। एवं च वर्णकद्वयमत्र। प्रथमवर्णके सर्वक्रमादरानादरविचारः। द्वितीये तु किमयं श्रौतक्रमः उत पाठक्रम इति विचारः। अयं च तृतीयः पुनरुक्तिपरिहारः। द्वितीयेतु पुनरुक्त्याशङ्कापरिहारे क्रमादरानादरविचारेण एकमेव वर्णकमिति मन्तव्यम्। प्रथमस्तु परिहारः परमतेनोक्तः। अत एवापरितोषेण परिहारान्तरमुक्तम्। तृतीयपरिहारस्तु विषयव्याप्त्यर्थ इति। कस्मात् पुनः क्रमस्य विधेयत्वमेव परमार्थतो नाङ्गीक्रियते येन विधेय इव तन्निष्ठतामात्रेण गौणो विधेयत्वव्यपदेशो वर्ण्यत इत्यत्राह—**अप्रयुक्तस्याविधेयत्वमेव हेतुरुक्तः।** अस्यार्थः—यदि ह्यप्रयुक्तस्यापि विधेयत्वं स्यात् तदा क्रमोऽपि परमार्थत एव विधेयः स्यात् न त्विदमस्तीति। यदि श्रुत्यवगतपौर्वापर्यबलायातः क्रमः श्रौतो भवति **एवं तर्हि हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्येतदप्युदाहरणमत्र स्यात्।** अत्राप्यग्राथशब्दाभ्यां पौर्वापर्यबलेन क्रमावगतेः।

नेति ब्रूमः। पाठावगतस्यायमथशब्दोऽनुवादः। कर्तृविशेषविधौ पुनर्नान्यतः क्रमोऽवगन्तुं शक्यते क्त्वाप्रत्ययात् इति सूक्तम्। किं पुनः कारणं नान्तरीयकोऽयं नियमः आद्रियते। न ह्यचोदनालक्षणस्य चोदनालक्षणनिर्वृत्तावङ्गतोपपद्यते। सत्यं नोपपद्यते; अत एव च नानुष्ठीयते किन्त्वर्थप्राप्तमेव क्रमान्तरं निरुणद्धि तस्यानवगमादित्युच्यते। अतोऽनपेक्षत्वमिवाऽविधीयमानमप्युपकारायैव भवतीति न दोषः।

नेति ब्रूमः। नैतदुदाहरणमिति ब्रूमः पाठादवगतस्यायमथशब्दोऽनुवादः। इदं वाक्यमवदानविधायकं तेनोत्पत्तिवाक्येन क्रमावधारणं पाठत एव। कर्तृविशेषविधौ पुनर्नान्यतः क्रमोऽवगन्तुं शक्यतेऽन्यदतः क्त्वाप्रत्ययात्। कर्तृविधिरयं न दीक्षाविधिः। तेन दीक्षाणां नायमुत्पत्तिश्चोदनालक्षण इति नान्यतः पाठादयं क्रमोऽवगन्तुं शक्यते। अतः क्त्वाप्रत्ययाद्विनाऽन्यः शब्दोऽपि [विता]नार्थे वर्तत इति सूक्तं प्रयोजकाप्रयोजकलक्षणसङ्कीर्तनम्। संप्रति पूर्वपक्षमाह—किं पुनः कारणं नान्तरीयकोऽयं नियम आद्रियते। न ह्यचोदनालक्षणस्य चोदनालक्षणनियोगनिर्वृत्तावङ्गतोपपद्यते। यत्खलु अचोदनालक्षणं न तस्य चोदनालक्षणनियोगनिर्वृत्तावङ्गतोपपद्यते। तदुक्तं—'न चाविहितमङ्गं भवति'' इति। यच्चानङ्गं न तन्नियमेनादरणीयम्। सिद्धान्तमाह—सत्यं नोपपद्यते। सत्यमङ्गता नोपपद्यते यत एवाङ्गं क्रमो न भवति अत एव च नानुष्ठीयते। नाप्युपादीयते पदार्थास्त्वनुष्ठीयन्ते न क्रमः, किन्तु अनुष्ठीयमानेषु बहुषु पदार्थेषु एककर्तृकेष्वर्थात् क्रमो विततिरूप आपतति। यद्यनङ्गं क्रमः किमिति तर्हि तन्नियमादरणं तत्राह—किन्तु अर्थप्राप्तं क्रमान्तरं निरुणद्धि। तस्यानवगमादित्युच्यते श्रुत्यादिभिः। क्रमे ह्यवगते क्रमान्तरावगतिरेव नोदेति। यथावगति चानुष्ठानं बुद्धिपूर्वकारिणामिति क्रमनियमानादरः। अतोऽनपेक्षत्वमिवाविधीयमानमप्युपकारायैव भवतीति न दोषः। अस्यार्थः—यथाऽनपेक्षत्वं न विधीयते [1]तथानुष्ठानोपकारि भवति तथा यद्यपि क्रमो न विधीयते तथाप्यनुष्ठानोपयोगि भवति क्रमरहित-

---

(1) G. अथवाऽनुष्ठानोपकारा भवन्ति

पुनरुक्त्याद्याशङ्का तूक्ता ।

॥ २ ॥ [1]अर्थाच्च ॥ २ ॥

एवं तावत् अनन्यपराक्षरतया नियमितः क्रमः । इदानीं कार्यानुरोधेन क्रमोऽपि नियम्यते । तत्परत्वादनुष्ठानस्य । तत्र प्रदर्शितान्युदाहरणानि । किं पाठक्रमस्य बाधोऽयं नेति चिन्त्यते । नेति ब्रूमः । इदमपि क्रमनियमहेतुकारणं न कस्यचिद्विरोधितया प्रदर्श्यते

स्यानुष्ठानासंभवादिति न दोषः । पुनरुक्त्याद्याशङ्का तूक्ता । प्रथमं पुनरुक्तताशङ्का । पुनश्चाप्तस्मरणे प्रयोजने दर्शिते वृत्तिकारेण तत्कार्यमित्याशङ्का दर्शिता भाष्ये उक्ता ।

अर्थाच्च । एवं तावदनन्यपरा(र्था)क्षरतया नियमितः क्रमः इदानीं कार्यानुरोधेन क्रमोऽपि नियम्यते तत्परत्वात् पदार्थानुष्ठानस्य । पूर्वं तावत् क्त्वाक्षराणामनन्यपरतया क्रमनियममात्रपरत्वात् क्रमनियमो[2]वर्णितः । अधुना यद्यपि क्रमपराण्यक्षराणि न सन्ति तथापि कार्यानुरोधेन क्रमो नियम्यते । येन कालयोगेन कार्यं संपद्यते तेन तावत् पौर्वापर्यमाश्रयणीयम् । तद्वशेन या विततिः सैवादरणीया कार्यपरत्वात्पदार्थानुष्ठानस्य, कार्यं निर्वर्त्स्यतीति पदार्था अनुष्ठीयन्ते । तेन तदनुरोधेनैव [3]कालविशेषपरिग्रहः तन्नान्तरीयकश्च क्रमोऽप्याश्रयणीयः । अत्र पूर्वपक्षाशङ्केत्यन्तमुक्त्वा अनन्यपराक्षतरया श्रुत्या क्रमावगमः, अर्थे तु न किञ्चित् अवगतौ प्रमाणमस्ति प्रयोजनमात्रत्वात् प्रयोजनस्य । राद्धान्तस्तु प्रयोजनमपि भवति अनुष्ठानकालभेदावगमद्वारेण क्रमावगतौ कारणमिति— तत्र च प्रदर्शितान्युदाहरणानि । किं पाठक्रमस्यायं बाधः । 'अग्निहोत्रं जुहोति' 'यवागूं पचति' इति पाठादन्यादृशः क्रमः । अर्थाच्चान्यादृशः । तत्र पाठक्रमं बाधित्वाऽर्थक्रमः स्वीक्रियत इति ब्रुवन् भाष्यकारो बाधमिव दर्शयति । तच्चायुक्तम् । क्रमकोपाधिकरणेन पुनरुक्तत्वादित्याशयः । नेति ब्रूमः इदमपि क्रमनियमहेतुकारणं न कस्यचिद्विरोधितया प्रदर्श्यते ।

(1) P. 1290 (2) G. नियमोऽवतीर्णः (3) कार्य

बलाबलचिन्तायां तु विरोधे बलीयस्त्वं च। इह पुनः स्वरूपप्रतिपत्त्यर्थमेवेदमुपन्यस्तम्।

॥ ३ ॥ [1]अनियमोऽन्यत्र ॥ ३ ॥

यत्र क्रमनियमप्रमाणं नास्ति उक्तं वक्ष्माणं वा तत्रानियम एव। यथा शाखान्तरीयाङ्गविधानं शाखान्तरे उपसंह्रियमाणम्।

॥ ४ ॥ [2]क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ॥ ४ ॥

यत्र पुनस्तात्पर्यमक्षराणां नास्ति यथा अध्वर्युरित्यादौ न च कार्यतो विरोधः। तत्र का कथा? तत्रापि

इदमप्यर्थाख्यं क्रमनियमस्य यो हेतुः कालविशेषः तस्य कारणं प्रदर्श्यते। न कस्यचिद्विरोधितया। बलाबलचिन्तायां तु विरोधे बलीयस्त्वं च प्रदर्श्यते क्रमकोपाधिकरणे। इह पुनः अर्थाख्यप्रमाणस्वरूपप्रतिपत्त्यर्थमेवेदं वचनमुपन्यस्तम्।

अनियमोऽन्यत्र। यत्र क्रमनियमप्रमाणमुक्तं श्रुत्यर्थात्मकं वक्ष्यमाणं च पाठादिकं नास्ति तत्रानियम एव। अनुष्ठानस्वभावेन क्रममात्रावगतेः। किमुदाहरणं तत्राह—यथा शाखान्तरीयाङ्गविधानं शाखान्तर उपसंह्रियमाणं, तत्र हि पाठतोऽपि क्रमनियमो नास्तीति प्रत्युदाहरणमात्रमिदम्।

क्रमेण वा नियम्येत। यत्र पुनस्तात्पर्यमक्षराणां नास्ति, यथा 'अध्वर्युः' इत्यादौ; न च कार्यतो विरोधः यथा यवागूपाके यथापाठमनुष्ठीयमाने। तत्र का कथा क्रमनियमस्य। यथा 'समिधो यजति, तनूनपातं यजति' इति। उत्तरं—तत्रापि

---

(1) P. 1290 (2) P. 1291

पाठनियमः। ननु च पाठक्रमावगतिर्निर्मूला। न तस्याः किञ्चिदवगतिनिमित्तमस्ति पदानां वाक्यार्थावगतिहेतुत्वात्। निर्मूला चावगतिर्न प्रमाणम्। पूर्वौ धावतीत्यत्र परान्वय इव। तस्माद्यथेष्टमत्र क्रमपरिग्रहणं मन्यामहे। उच्यते— मैवं वोचः। वाक्यक्रम इव वाक्यार्थे क्रमोऽपि शब्दनिबन्धन एवेति। यथा न शब्दादृते शब्दक्रमोऽवगम्यते नार्थादृतेऽर्थक्रमः। यस्मिंश्च सत्येव यदवगम्यतेऽव्यभिचारात् तत् तस्य निमित्तमिति वदामः। तस्मान्नेदं निमित्तम्। अत एव च नियतक्रममध्ययनं

पाठान्नियमः यत्क्रमः पाठः प्रयोगोऽपि तत्क्रमक एव भवति। **ननु च पाठक्रमावगतिर्निर्मूला। न तस्याः किञ्चिन्निमित्तमस्ति।** [1]**पदानां** [2]**वाक्यार्थावगतिहेतुत्वात्** यदि प्रत्यस्तमितपदविभागाद्वाक्यादेव वाक्यार्थः प्रतीयते तदा वाचकपदाभावेऽपि वाक्यादेवेयमर्थावगतिः इत्यवधार्येत। न चैतदस्ति। **निर्मूला चावगतिर्न प्रमाणम्। पूर्वौ धावतीत्यत्र (परान्वयैक्ये)परान्वयावगतिरिव** पूर्वसंबन्धमूला चापरावगतिः स्यात, नान्वितावगतिः। **तस्माद्यथेष्टमत्र क्रमपरिग्रहं न्याय्यं मन्यते। मैवं वोचः। वाक्यक्रम इव वाक्यार्थक्रमोऽपि शब्दनिबन्धन एव।** यादृशो वाक्यक्रमः तादृशो वाक्यार्थक्रमः सोऽपि शब्दनिबन्धन एव। **यथा न शब्दादृते शब्दक्रमोऽवगम्यते** न श्रुत्या विना श्रुतिक्रमोऽवगम्यत इत्यर्थः। **अर्थादृते नार्थक्रमः। यस्मिंश्च सत्येव यदवगम्यते अव्यभिचारात् तस्य तन्निमित्तमिति वदामः।** ननु च पदानां वाक्यार्थप्रतिपत्तिनिमित्तत्वात् पदाभावे क्रमावगतिरियमुदीयमानापि प्रतिभा, न प्रमाणं भवितुमर्हति। उच्यते— यथाऽत्र शब्दस्य निमित्तता तथोच्यते। यत्तावत् प्रथमं पठ्यते तत्तावत् प्रथममवगम्यते तथा प्रयोगकाले प्रथमं स्मर्यते यथास्मरणमनुष्ठानमिति तस्यानुष्ठानमपि प्रथममवगम्यते। तदनन्तरावगतस्य (स्मृतस्य) तदनन्तरमेवानुष्ठानम्। एवं च प्रयोगविततिरवगम्यत इति। यत एव पाठक्रमेणानुष्ठानक्रमोऽवगम्यते। **अत एव च नियतक्रममध्ययनं**

---

(1) R. पदार्थानां (2) G. वाक्यावगति

दृष्टार्थमेव भवति। अन्यत्र कार्यविशेषात्। अत एव च लौकिकाः पाठक्रमेण धूपादिषु व्युत्क्रमाभिधाने प्रतिषेधं कुर्वते। अदृष्टार्थेष्वपि दर्शितम्। तस्मादत्रापि न क्रमान्तरकल्पना युक्तेति युक्तम्। अत एव च 'अध्वर्युर्गृहपतिं दीक्षयित्वा' इत्येवमादिषु तात्पर्यमात्रात् क्रमसिद्धिः। निमित्तत्वमात्रं हि अत्र परिगृह्यते। तस्मात् सनिमित्ता प्रतिपत्तिः प्रमाणमित्युक्तं प्रमाणपरीक्षायाम्। अतो यावती सनिमित्ता प्रतिपत्तिः सा सर्वैव क्रमावधारणे अन्यत्र वा वेदार्थानुष्ठानोपकारिणी प्रमाणमिति मन्तव्यम्। दर्शनमुक्तम्।

दृष्टार्थमेव भवति। अन्यत्र कार्यविशेषात् यत्र कार्यविशेषोऽवगम्यते यथा यावगूपाके तत्र हि नियतक्रममध्ययनं दृष्टार्थं न भवति। यथैव पाठादपि क्रमावगतिर्भवति **अत एव च लौकिकाः** पाठक्रमेण **धूपादिषु** क्रमेऽवगते **व्युत्क्रमाभिधाने प्रतिषेधं कुर्वते। अदृष्टार्थेष्वपि तद्दर्शितम्।** दृष्टार्थेषु हि प्रयोजनवशेनापि क्रमोऽवगम्यते। अदृष्टार्थेष्वपि तु योऽयं लौकिकानां क्रमादरः सः पाठक्रमेणानुष्ठानक्रमोऽवगम्यत इत्येतन्निबन्धनः। एतद्दर्शितं भाष्ये। उपसंहरति-**तस्मादत्रापि न क्रमान्तरकल्पना युक्तेति युक्तम्।** यत एव अवगति निमित्तमात्रसंभवेनावगतिमात्रेण क्रमस्वीकारः **अत एव 'अध्वयुर्गृहपतिं दीक्षयित्वा' इत्येवमादिषु तात्पर्यमात्रात् क्रमसिद्धिः।** क्त्वाक्षरतात्पर्यमात्रेण क्रमसिद्धिः। मात्रग्रहणेन क्त्वाप्रत्ययेनाविधानमनभिधानं चास्य क्रमस्य दर्शितम्। अनभिधेये च तात्पर्यमविरुद्धं लक्षणायामिव। कस्मात्पुनर्विधेयत्वाभावेपि तात्पर्यमात्रेण क्रमसिद्धिः तत्राह—**निमित्तमात्रं हि अत्र परिगृह्यते** न पुनर्विधयपराभिधानमेव प्रतिपत्तौ हेतुः। अवगतिमात्रेण स्वीकारो यस्य तस्यावगतिहेतुमात्रं परिगृह्यते न पुनर्विधेय एव योऽवगतिहेतुः अवगतिमात्रेण क्रमस्वीकार इत्युक्तमुपसंहरति—**तस्मात् सनिमित्ता प्रतिपत्तिः**[1] **प्रमाणमित्युक्तं प्रमाणपरीक्षायाम्। अतो यावती सनिमित्ता प्रतीतिः सा सर्वैव क्रमावधारणे अन्यत्र वा वेदार्थानुष्ठानोपकारिणी प्रमाणमिति मन्तव्यम्। दर्शनमुक्तम्।**

---

(1) G. प्रतीतिः

॥ ५ ॥ [1]प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् ॥ ८ ॥

किमपरं कारणं क्रमनियमे ? प्रवृत्तिरिति ब्रूमः। प्रवृत्त्यापि हि क्रमबुद्धिरुपजायते। कथं पुनर्वैदिकत्वम् ? तदर्थाश्रयात्। तस्मात् प्रवृत्तिरपि नियमहेतुः। यत्पुनरिदं भाष्यकारेणोक्तं "एवं प्रधानप्रत्यासत्तिर्भवति" इति तथा सौर्यादिभिश्च साम्यमाशङ्क्य पुनर्वैषम्यमुपन्यस्तं कस्तस्योपयोगः ? नातीव क्रमावधारणे उपयुज्यते। अस्त्यत्रोपयोगः प्रवृत्तिर्नाम क्रमनिरपेक्षं क्वचिदनुष्ठानं निरपेक्षं चेदनुष्ठानं प्रवृत्तं न

प्रवृत्त्या तुल्यकालानाम्। किमपरं क्रमनियमे कारणमिति प्रश्नेनैवोपक्रमः। उत्तरं—प्रवृत्तिरिति ब्रूमः प्रवृत्त्यापि हि क्रमबुद्धिरुपजायते। प्रवृत्तिरनुष्ठानं तेनाप्यपरस्मिन् पदार्थेऽनुष्ठेयरूपक्रमबुद्धिरुपजायते। यत्क्रमकं पूर्वपदार्थानुष्ठानं तत्क्रमकमेवोत्तरपदार्थानुष्ठानमपि प्रतीयत इति। कथं पुनर्वैदिकत्वं प्रवृत्तिक्रमस्य। नायं वेदादवगम्यत इति भावः। उत्तरं—तदर्थाश्रयात्। तदर्थं वेदार्थमाश्रयति यतो वेदादनुष्ठानम् प्रथमपदार्थसंबन्ध्यवगम्यते। ततश्च द्वितीयादिपदार्थक्रम इति पारम्पर्येणास्ति वैदिकत्वम्। तस्मात्प्रवृत्तिरपि नियमहेतुभूता। यत्पुनरिदं भाष्यकारेणोक्तं 'एवं प्रधानप्रत्यासत्तिर्भवति' इति तथा सौर्यादिभिश्च साम्यमाशङ्क्य पुनः वैषम्याभिधानं कस्तस्योपयोगः ? एकग्रन्थेनाह—नातीव क्रमावधारण उपयुज्यत इति। यदा हि पूर्वप्रवृत्तिक्रमेणोत्तरपदार्थक्रमोऽवगम्यते तदा प्रधानप्रत्यासत्त्युपन्यासो न युक्तः। तथा यदपरमुक्तं "यथा सौर्यादिषु कृत्स्नं गुणकाण्डं प्रधानप्रत्यासत्तये प्रतिप्रधानमपवृज्यते तथा प्राजापत्येष्वपि स्यात्" इति साम्यमुपन्यस्य पुनर्वैषम्यमुक्तं "एकप्रयोगचोदनाचोदितत्वात् प्राजापत्यानामङ्गप्रधानयौगपद्ये प्राप्ते [2]पुरुषाशक्त्या युक्तः क्रमानुप्रवेशः। सौर्यादीनां तु एकप्रयोगचोदनानुप्रवेशाभावात् सहचोदना नास्तीति एकैकस्य कृत्स्नं गुणकाण्डं अपवृज्येत[3] इति वैषम्यमुक्तं तदपि नोपयोगि। अस्त्यत्रोपयोगः, प्रवृत्तिर्नाम क्रमनिरपेक्षं क्वचिदनुष्ठानं, निरपेक्षं चेदमनुष्ठानं प्रवृत्तं न

---

(1) P. 1293 (2) G. पुरुषे अशक्त्या (3) G. उपयुज्यते

पुनरपेक्षायां (प्रमाणं)प्रयोजनं अस्तीति मन्वानस्येदमुत्तरं —प्रधानप्रत्यासत्तिः सहचोदनातोऽवगता वैषम्यात् पीडिता भवति। साम्ये पुनः यथाभ्यनुज्ञातैव भवति। तत्सिद्ध्यर्थं नियमोऽभ्युपगन्तव्यः। स च प्रथमप्रवृत्तिपूर्वक इति तथैव व्याख्यायते। सौर्यादिदर्शनमिदानीं किमर्थम्?

पुनरपेक्षायां प्रयोजनमस्तीति मन्वानस्येदमुत्तरं—प्रधानप्रत्यासत्तिः सहचोदनाऽवगता वैषम्यात् पीडिता स्यात्। साम्ये पुनः यथाभ्यनुज्ञातैव भवतीति। अस्यार्थः—प्रथमप्रवृत्तिवशेन द्वितीयादिपदार्थानुष्ठानक्रमावगमो नियम्यत इति एतावति प्रदर्शिते इयमाशङ्काऽवतरति—प्रवृत्त्यवस्थायां हि यथा प्रथमपदार्थानुष्ठानं क्रमनियमनिरपेक्षमवगम्यते तथा द्वितीयादिपदार्थानुष्ठानमपि। यथावगति चानुष्ठानं सर्वेषामपि क्रमनियमनिरपेक्षं युक्तम्। पुनर्द्वितीयादिपदार्थानुष्ठान[ने]क्रमनियमापेक्षायां तु प्रयोजनं नास्ति अनियतक्रमतया प्रथमप्रवृत्तिर्या तयैवानुष्ठानक्रमसिद्धिरिति न शक्यते प्रथमपदार्थप्रवृत्तिक्रमेणोत्तरपदार्थक्रमावगमः कर्तुमितीमामाशङ्कामपनिनीषुः भाष्यकार उत्तरं लिखितवान् प्रयोगचोदनया सहाङ्गैः प्रधानानां यौगपद्येनानुष्ठानस्य चोदितत्वात् पुरुषाशक्त्या यावद्व्यवधानमनुप्रविशति तावदेव विधिरनुमन्यते नान्यत्। तत्र यदि प्रथमपदार्थप्रवृत्तिक्रमेणोत्तरेषामपि पदार्थानामनुष्ठानं भवति तदा सर्वेषामपि सदृशमेव व्यवधानम्। इतरथा कस्यचिदतिसन्निधानं कस्यचिदतिव्यवधानमिति वैषम्ये सति प्रयोगचोदनावगते सन्निधानव्यवधाने उभे अपि बाधिते स्याताम्। अनवगतसन्निधानाश्रयणेपि हि यथावगतसन्निधानबाधो भवत्येवेति प्रयोगचोदनानुपालनाय पुनः क्रमनियमापेक्षास्तीति। प्रावृत्तिकेच क्रमे स्वीक्रियमाणे तदनुपालनमिति **तत्सिद्ध्यर्थं** प्रयोगचोदनावगतप्रधानप्रत्यासत्तिसिद्ध्यर्थं प्रावृत्तिकक्रम**नियमोऽभ्युपगन्तव्यः**। नन्वेवं सति प्रयोगचोदनावगतप्रधानप्रत्यासत्तिनिबन्धनोऽयं क्रमनियम इति न प्रावृत्तिको व्यपदेष्टुं युक्तः, तत्राह—**स च नियमः प्रथमप्रवृत्तिपूर्वक इति तथैव व्याख्यायते। सौर्यादिदर्शनमिदानीं किमर्थं?** एकप्रयोगानुप्रवेशाभावे न युक्तं कृत्स्नं गुणकाण्डापवर्जनं सौर्यादिषु।

यदि क्रमावगतिमात्रतयैव क्रम आद्रियते सौर्यादिषु कः प्रद्वेषः। न खलु कश्चित्। अनुष्ठानानौपयिकतया तु प्रतीतमपि त्यज्यते वर्णस्वरूपमिव पदेषु (वाक्येषु) एकत्वमिव ग्रहेषु उभयत्वमिव हविष्षु नैतावता औपयिकस्यापि त्याग उपपद्यते।

प्राजापत्येषु तु एकप्रयोगचोदनाचोदितत्वात् युक्तमेकैकपदार्थापवर्जनमिति स्पष्टत्वे द्वैतस्य सौर्यादिदर्शनं पूर्वपक्षोक्तं किमर्थमिति। अस्याप्यस्ति प्रयोजनं इदमप्याशङ्कानिराकरणार्थैवोपन्यस्तमिति का पुनराशङ्का? तामाह—**यदि क्रमावगतिमात्रतयैव क्रम आद्रियते सौर्यादिषु कः प्रद्वेषः।** अस्यार्थः—सौर्यादिष्वपि बहुषु प्रधानेषु एकैकस्य पदार्थस्य सकलप्रधानसंबन्धितया युगपदनुष्ठानाशक्तेरवश्यंभाविनि क्रमे द्वितीयादिष्वपि पदार्थेषु तथैव क्रमोऽवगम्यते। अवगतिमात्रेण क्रमस्यादर इति तस्यापि प्रावृत्तिकः क्रमः प्राप्नोतीति। अथ प्रधानस्य साङ्गस्य विहितत्वात् तत्र सौर्यादिषु कृत्स्नमेव गुणकाण्डमपवृज्येत नैकैकः पदार्थ इतीहापि तथा स्यात्। अथात्र एकैकस्यापवर्जनं तत्रापि तथा स्यादिति सौर्यादिसाम्याशङ्का। संप्रत्याशङ्कानिराकरणायाह—**न खलुकश्चित् प्रद्वेषः। अनुष्ठानानौपयिकतया तत्र प्रतीतमपि त्यज्यते।** सौर्यादीनां भिन्नप्रयोगचोदनाचोदितानां सहानुष्ठानाभावात् यद्यपि [1]प्रावृत्तिकः क्रमोऽवगम्यते तथापि अनुष्ठानोपायभूतोऽसौ न भवतीति त्यज्यते। प्राजापत्येषु तु प्रधानप्रत्यासत्त्यनुगुणोऽनुष्ठानौपयिक इति स्वीक्रियते। अवगतस्यापि परित्यागे दृष्टान्तमाह—**वर्णस्वरूपमिव पदेषु।** यथा वर्णस्वरूपं एकैकवर्णस्वरूपं प्रतीतमपि [2]वाचकावस्थायामेकैकस्य वर्णस्वरूपस्यानुपायभूतत्वात् त्यज्यते। **एकत्वमिव ग्रहेषु।** यथा ग्रहं संमार्ष्टीत्यनुपायभूतमेकत्वम्। साधनपरिच्छेदद्वारेण हि संख्या उपायतां याति। न च परिच्छिन्ने साधने ग्रहाख्यसाध्यसाधने पुनस्तदपेक्षाऽस्तीति। **उभयत्वमिव हविष्षु।** यथा 'यस्योभयं हविरार्तिमार्च्छति' इति उभयत्वमनुपायभूतं त्यज्यते **नैतावताऽनुपायभूतस्य** त्यागो दृष्ट इत्येतावता **औपयिकस्यापि** उपायभूतस्यापि **त्याग उपपद्यते।** उपसंहरति

---

(1) प्रवृत्तितः (2) वाचकावाचक

अतोऽपेक्षितं प्रतिपन्नमाद्रियते। प्रतिपन्नमप्यनपेक्षितमुपेक्षणीयमेव। ननु चैवं सति प्रतिपत्तिरनर्थिका प्राप्नोति। केन वोक्तं प्रतिपत्तेर(न) र्थवत्त्वं अर्थवत्प्रतिपत्तिरेवार्थवत्त्वे हेतुः न प्रतिपत्तिमात्रं, नाप्रतिपत्तिः प्रतिपत्तिपर्यन्तैवेति सूक्तम्।

॥ ६ ॥ [1]स्थानाच्चोत्पत्तिसंयोगात् ॥ १३ ॥

अत्र भाष्यकारेण त्रिणवादिष्वदर्शनात समाम्नाय[क्रम]स्य विद्यमानस्याप्यविषयतां मन्वानैः इदमुदाहृतमित्यविषयतां मत्वेदमुदाहृतं सह पशूनालभत इति।

—अतोऽपेक्षितं प्रतिपन्नमाद्रियते'। प्रतिपन्नमप्यनपेक्षितमुपेक्षणीयमेव। ननु चैवं सति प्रतिपत्तिरनर्थिका प्रयोजनशून्या प्राप्नोति इति। चोद्यमात्रं परिहरति—केन वोक्तं प्रतिपत्तेरर्थवत्त्वं प्रयोजनवत्त्वम्। अर्थवत्प्रतिपत्तिरेव अर्थवत्त्वे हेतुः न प्रतिपत्तिमात्रं, तच्छून्या प्रयोजनशून्या प्रतिपत्तिः। प्रतिपत्तिमात्रपर्यन्तैवेति सूक्तम्। अत्राधिकरणे संक्षेपार्थोऽयम्—अनियतक्रमेण प्रथमपदार्थेऽनुष्ठिते द्वितीयपदार्थे पुनः प्रधानप्रत्यासत्त्यनुग्रहाय क्रमापेक्षा भवति। तत्र येनैव क्रमेण प्रथमपदार्थोऽनुष्ठितः स एव क्रमः परिगृह्यते। तस्मिन्नेव गृह्यमाणे यथावगतप्रधानप्रत्यासत्त्यनुग्रहादिति।

स्थानाच्चोत्पत्तिसंयोगात्। अत्र भाष्यकारेण त्रिणवादिष्वदर्शनात् समाम्नायक्रमस्य-विद्यमानस्याविषयतां मन्वानैरिदमुदाहृतम् इत्यविषयतां मत्वैतदुदाहृतम्—सह पशूनालभत इति। अत्रेत्थं योजना—अत्र किल भाष्यकारेण प्रथममुदाहृतं त्रिणवेनौजस्कामं याजयेदिति। स्तोमविवृद्धौ आनीयमाना ऋचः किमनियतेन क्रमेण प्रयोक्तव्या उत यथासमाम्नायक्रममिति संशयं कृत्वा त्रिणवादिशब्देषु विधायकेषु पाठक्रमाभावादनियम इति पूर्वपक्षं कृत्वा स्थान क्रमेणैव प्रयोक्तव्या इति राद्धान्तयित्वेदमुक्तम्—'अत्र मन्त्रसमाम्नायपाठक्रमेणायं क्रमनियम इति' न पाठक्रमाद्भेद इत्यनेन च दोषेण स्थानक्रमस्यायमविषय इति मत्वा 'सह पशूनालभत'

---

(1) P. 1295

अत्र च अधिकरणान्तरसिद्धमर्थमुपादाय सहपशूना-लभत इति सवनीयस्थाने सहत्वमिति स्थिते कः क्रमनियम इति चिन्त्यते किमत्रापि प्रवृत्तिरेव निमित्तं उत निमित्तान्तरमस्तीति। तत्र पूर्वपक्षवादी अवश्यंभाविनि क्रमे यदि प्रवृत्तिर्नेष्यते पूर्वावगतपाठादेव नियम इति मन्यते। राद्धान्तवादी तु सहवचनेन स्थानस्याबाधितत्वात सवनीयस्यैव पूर्वमनुष्ठानं न्याय्यमित्युक्तवान्।

इत्युदाहरणान्तरं दत्तम्। अत्र भाष्यकारेणेदमुदाहृतं सहपशूनालभत इति संबन्धः। किं कृत्वेत्यत्राह—**त्रिणवेनोजस्कार्ममिति स्थानक्रमस्याविषयं मत्वा।** किमित्यविषयतां मन्यत इत्यत्राह—**त्रिणवादिष्वदर्शनात्** समाम्नायक्रमस्य भ्रान्तैः पैरर्विद्यमानस्य पाठक्रमस्य मन्त्रगतस्याविषयतां मन्यानैरिदमुदाहृतमिति त्रिणवादिचोदनासु पाठक्रमस्यादर्शनात् नायं पाठक्रमस्य विषय इति मन्वानैरिदमुदाहृतम्। परमार्थतस्तु पाठक्रमस्यायं विषय इति विधिपाठक्रमो वा भवतु मन्त्रपाठक्रमो वा; सर्वथा पाठक्रम एवायमिति हेतोः नायं स्थानक्रमस्य विषय इति मत्वा भाष्यकारेणान्यदुदाहृतमिति। अत्र चोदाहरणे **अधिकरणान्तरसिद्धमर्थमुपादाय सह पशूनालभत** इत्यनेन **सवनीयस्थाने सहत्वं** चोदितमिति **स्थिते कः क्रमनियम इति चिन्त्यते—किमत्रापि प्रवृत्तिरेव निमित्तं** सोमविकाराणां सोमपूर्वकत्वात सोमे या प्रवृत्तिः[1] पूर्वमग्नीषोमीयः तदनन्तरं सवनीयः तदनन्तरमनूबन्ध्य इति सैव किमत्रापि क्रमनियमनिमित्तं **उत निमित्तान्तरमपि** स्थानाख्य-**मस्तीति** विचारः। **तत्र पूर्वपक्षवादी अवश्यंभाविनि क्रमे यदि प्रवृत्तिर्नेष्यते** प्रयोगान्तरवर्तित्वात **पूर्वावगतपाठादेव नियम इति मन्यते। सिद्धान्तवादी तु सहवचनेन स्थानस्याबाधितत्वात् सवनीयस्यैव पूर्वमनुष्ठानं न्याय्यमित्युक्तवान्।** अस्यार्थः—सह पशूनालभत इत्यनेन वचनेन सवनीयस्थाने सर्वेषामालम्भस्य चोदितत्वात् सवनीयस्थानमबाधितम्। आश्विनग्रहणोत्तरकालता तत्र। यद्यग्नीषोमीयस्तस्मिन् कालेऽनुष्ठीयते तदा श्रुतकालबाधः स्यात्। तस्मात सवनीय एव पूर्वमालब्धव्यः।

---

(1) G. **सोमयागप्रवृत्तिः**

यद्येवमग्नीषोमीयानुबन्ध्ययोः का वार्ता ? कथं पौर्वापर्यं अत्र। किमनयाऽनुपन्यस्तया चिन्तया ? यद्वा स्थानवत् कालबाधोऽप्ययुक्त इति अग्नीषोमीय एव पूर्वम्। यद्येवं सवनीयादपि तर्हि पूर्वत्वं भवितुमर्हति। न। विहितत्वात् सवनीयकालस्य प्रचयावगम्यत्वादग्नीषोमीयकालस्य। विधानार्थत्वाच्च प्रचयस्य विहितं बलीयः। एवं तर्हि बलाबलचिन्तेयम् (न प्रमाणस्यार्थोन्नियमो युक्तः)। नैवं, स्थिते प्रमाणान्तरत्वे बलवदबलत्वमिति सूक्तम्।

॥ ७ ॥ [1]मुख्यक्रमेण चाङ्गानां तदर्थत्वात् ॥ १४ ॥

यद्येवमग्नीषोमीयानुबन्ध्ययोः का वार्ता ? कथं पूर्वापरकालता। वक्ष्यमाणेन दुष्टाशयेन पृच्छति। राद्धान्ती तु पूर्वपक्षिण आशयमजानन्निव ब्रूते—किमनयाऽनुपन्यस्तया चिन्तया ? यद्वा स्थानवत्कालबाधोऽप्ययुक्त इति अग्नीषोमीय एव पूर्वं प्रकृतावनुबन्ध्यापेक्षया पूर्वकालताऽग्नीषोमीयस्यावगता। अतस्तदनुग्रहायाग्नीषोमीय एव पूर्वं प्रयोक्तव्यः। यद्येवं सवनीयादपि तर्हि पूर्वं भवितुमर्हति। सवनीयादपि हि प्रकृतौ पूर्वकालता अग्नीषोमीयस्यावगतेति। न। विहितत्वात् सवनीयकालस्य। आश्विनं ग्रहं गृहीत्वेति सवनीयकालो विहितः प्रचयावगम्यत्वादग्नीषोमीयकालस्य बहुषु पशुषु विहितेषु भिन्नकालेषु पूर्वापरकालताऽवगम्यते। ततः किमित्याह—विधानार्थत्वात् प्रचयस्य विहितं बलीयः। विधानस्य हि प्रचय आर्थः न पुनः प्रचय एव विधीयते। अतो विहितं बलीयः। यदि पाठक्रमबाधेन स्थानक्रमेणानुष्ठानं कल्प्यते एवं तर्हि बलाबलचिन्तेयं न प्रमाणान्तरोपन्यासः नैवं, स्थिते प्रमाणत्वे बलवदबलत्वमिति युक्तम्।

मुख्यक्रमेण चाङ्गानाम्। इहाधिकरणे मुख्यक्रमेणाङ्गानां क्रमः प्रतिपाद्यते। तत्र यास्तावद्विकृतयः क्रमेण पठ्यन्ते तासां प्रधानचोदनापरिगृहीतत्वात् आतिदेशिकाना-

---

(1) P. 1297

यत्र यौगपद्येन चोदना सारस्वतौ भवत इति तत्र किं प्रमाणान्तरमस्ति क्रमनियमस्य अङ्गानां उत यथेष्टा प्रवृत्तिरिति। तन्त्रेणोच्चारणाच्छास्त्रस्य न क्रमः प्रतीयते इत्यभिप्रायः।

एवं प्राप्तेऽभिधीयते—मुख्ये क्रमदर्शनात् अङ्गेष्वपि क्रमो युक्तः। एवं च सति यावदनुज्ञातं व्यवधानं भविष्यति। अनियमे हि अनुज्ञातातिक्रमः। क्रमबाधो न युक्त इति।

॥ ८ ॥ [1]प्रकृतौ तु स्वशब्दत्वाद्यथाक्रमं प्रतीयेत ॥ १५ ॥

इदानीं पाठमुख्ययोर्विरोधे चिन्त्यते। तत्र मुख्या-

मङ्गानां प्रधानचोदनापाठक्रमेणैवाङ्गानां क्रम इति न तास्तावदिहोदाहरणम्। यान्यपि तास्वेवौपदेशिकान्यङ्गानि तेषामपि वा पाठक्रमेणैव क्रमः। एतेनैव न्यायेन न प्रकृतयोऽप्यत्रोदाहरणानि। किन्तु या एव विकृतयो युगपच्चोदिताः तासां प्रधानपाठक्रमाभावात न पाठक्रमेणाङ्गानां क्रमनियमस्सिद्ध्यतीति ता एवोदाहरणम्। तदाह— यत्र यौगपद्येन चोदना सारस्वतौ भवत इति तत्र किं प्रमाणान्तरमस्ति क्रमनियमस्याङ्गानां उत यथेष्टा प्रवृत्तिरिति। तन्त्रेणोच्चारणाच्छास्त्रस्य न क्रमः प्रतीयत इत्यभिप्रायः पूर्वपक्षिणः। प्रधानचोदना पाठक्रमाभावात् तद्गृहीतानामङ्गानामपि न क्रमः प्रतीयत इति। एवं प्राप्तेऽभिधीयते मुख्ये क्रमदर्शनादङ्गेऽपि क्रमः प्रतीयत इति युक्तम् याज्ययोः क्रमवत्त्वात् प्रधानयोः क्रमः प्रतीयते यत्क्रमके च प्रधाने तदङ्गान्यपि तत्क्रमकान्येव युक्तानि। किमेवं भविष्यति? एवं च यावदनुज्ञातं व्यवधानं भविष्यति। अनियमे हि अनुज्ञातातिक्रमः स्यात्। तस्मान्नियमो युक्तः। याज्यानिबन्धनमुख्यक्रमाभिधानमत्र सौहृदमात्रम्। अनियमपक्षेऽपि मुख्यक्रमानुष्ठानेन भाव्यम्।

प्रकृतौ तु स्वशब्दत्वात्। इदानीं पाठमुख्ययोर्विरोधे चिन्त्यते। तत्र मुख्या-

(1) P. 1297

र्थत्वादङ्गानां मुख्यक्रमो बलीयानिति पूर्वः पक्षः। एवं च प्रयोगचोदनानुग्रहः प्रत्यासत्तेः। अत्राभिधीयते—न प्रतीतस्य बाधो युक्तः पाठाच्च निरपेक्षात् क्रमोऽवगतोऽङ्गानां नान्यापेक्षया बाधितुं युक्तः। ननु च प्रत्यासत्तेः प्राधान्याच्च बलवत्तोक्ता। सत्यमुक्ता—अयुक्ता तु सा। यथाप्रतीतं हि प्रयोगवचनो गृह्णाति। न प्रयोगवचनादङ्गावगतिः। अङ्गं सत प्रयोगवचनेन गृह्यत इत्युक्तम्। तस्मात यथावगमं प्रत्यासत्तिः। न प्रत्यासत्तेरवगमोऽङ्गानां, अतः पाठो बलीयानिति युक्तम्। उक्तं च स्वशब्दत्वादिति।

र्थत्वादङ्गानां मुख्यक्रम एव बलीयानिति पूर्वः पक्षः। प्रधानं हि मुख्यं प्रधानानुगुणा चाङ्गकल्पना। तेन प्रधानानुसारेण यः क्रम आपतति स एव बलीयानिति। एवं च प्रयोगचोदनानुग्रहः प्रत्यासत्तेः प्रयोगचोदना हि युगपदनुष्ठानं बोधयति। तत्र पुरुषाशक्तिमात्रेण यावद्व्यवधानमुपनिपतति तावदेवानुमन्यते। नान्यत। अनुज्ञातव्यवधानमात्रस्वीकारेऽसावनुगृहीता भवति। मुख्यक्रमाङ्गीकारे च यावदनुज्ञातव्यवधानम्। इतरथा परकीयाङ्गव्यवधानमापद्येत। अत्राभिधीयते—न प्रतीतस्य बाधो युक्तः। पाठाच्च निरपेक्षात् क्रमोऽवगतोऽङ्गानां नान्यापेक्षया बाधितुं युक्तः। अन्तरङ्गभूतो हि पाठक्रमः निरपेक्षावगमात। बहिरङ्गभूतश्च मुख्यक्रमापेक्षया उपजायमानत्वात्। ननु प्रत्यासत्तेः प्राधान्याच्च मुख्यक्रमस्य बलवत्ता उक्तेति पूर्वपक्षस्मारणम्। सत्यमुक्ता। अयुक्ता तु सा। कथमिति। यथाप्रतीतं हि प्रयोगवचनो गृह्णाति। न प्रयोगवचनादवगतिरङ्गानाम्। तत्र चाङ्गानि स्वपाठात वलृप्तक्रमाण्येव प्रयोगवचनेन गृह्यन्ते। कथमेतदित्याह—अङ्गं सत् प्रयोगवचनेन गृह्यत इत्युक्तम्। 'प्रापितानभिसमीक्ष्य प्रयोगवचन उपसंहरति' इत्यनेन ग्रन्थेन। तस्माद्यथावगमं प्रत्यासत्तिः। न प्रत्यासत्तेरेवावगमोऽङ्गानाम्। अतः पाठो बलीयानिति युक्तम्। उक्तं च स्वशब्दत्वादिति। किमुक्तं भवति ? स्वशब्दत्वेनान्तरङ्गता पाठस्योक्ता।

॥ ९ ॥ [1]मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशः सः ॥ १६ ॥

मन्त्रब्राह्मणपाठविरोधे किं बलीय इति। अनियम इति प्राप्ते उच्यते—मन्त्रक्रमो बलीयानिति। कुतः? पाठस्यानन्यपरत्वात्। प्रयोज्यत्वान्मन्त्राणाम्। ननु ब्राह्मणेप्यनन्यपर एव पाठक्रमः। यत्पुनः (क्रमोत्पत्तिः)कर्मोत्पत्तिः प्रयोजनमित्युक्तं, वाक्यस्य तत्प्रयोजनं न पाठक्रमस्य। उच्यते—उत्पत्त्यर्थः स पाठक्रमः, न प्रयोगार्थ इत्युक्तं भवति। मन्त्रे पुनः प्रयोगार्थः क्रमो भवतीति बलवत्त्वम्।

मन्त्रतस्तु विरोधे स्यात्। मन्त्रब्राह्मणपाठक्रमविरोधे किं बलीय इति सन्देहे यदि मन्त्रो बलीयान् तदा मन्त्रक्रमेणानुष्ठानम्। अथ ब्राह्मणं बलीयः तदा ब्राह्मणक्रमेणानुष्ठानम्। **तत्रानियम एव** उभयोरपि पाठस्वरूपत्वादिति प्राप्ते उच्यते—**मन्त्रक्रमो बलीयान् कुतः? पाठस्यानन्यपरत्वात् प्रयोज्यत्वान्मन्त्राणाम्।** अस्यार्थः—प्रयोक्तुमेव मन्त्राः पठ्यन्ते। तेन तेषां यः पाठः स प्रयोगार्थैवावगम्यते। अतो यत्क्रमका एव मन्त्राः आम्नायन्ते तत्क्रमका एव ते प्रयोक्तव्याः मन्त्रैश्च स्मृतं कर्म कर्तव्यम् इति कर्माण्यपि तत्क्रमकाण्येव प्रयोक्तव्यानीति। **ननु ब्राह्मणेप्यनन्यपर एव** अनुष्ठानक्रमपर एव **पाठक्रमः। यत्पुनः कर्मोत्पत्तिः प्रयोजनमित्युक्तं, वाक्यस्य तत्प्रयोजनं न पाठक्रमस्य। उच्यते—उत्पत्त्यर्थः स पाठक्रमः न प्रयोगार्थ इत्युक्तं भवति** अप्रयोज्यत्वात् ब्राह्मणवाक्यानाम्। **मन्त्रे पुनः प्रयोगार्थः क्रमोऽपीति बलवत्त्वम्।** एतदुक्तं भवति- मन्त्रेषु यः पाठक्रमः स प्रयोज्यमन्त्रगतः साक्षात्प्रतीयते। ब्राह्मणपाठक्रमस्तु न साक्षात्प्रयोज्यगतः किन्तु विधिक्रमदर्शनात् विधेयेऽपि क्रमः कल्पयितव्यः स क्लृप्तमन्त्रक्रमविरोधे नात्मानं लभत इति।

(1) P. 1298　(2) वाक्यस्य

॥ १० ॥ [1]तद्वचनाद्विकृतौ यथा प्रधानं स्यात् ॥ १७ ॥

किं मुख्यक्रमाद्विकृतौ क्रमः उत पाठक्रमात् प्रकृतौ यथा निर्ज्ञातोऽङ्गक्रमः विकृतावपि तथैव प्रयोक्तव्य इति। किं युक्तं? प्रयोगार्थत्वात् क्रमस्य विकृतौ प्रयोगावगमात् यथाविकृति प्रयोग इति पूर्वः पक्षः।

राद्धान्तस्तु न निर्ज्ञातक्रमं प्रयोगवचनो बाधितुमर्हति। निर्ज्ञातस्य हि प्रयोगो अङ्गानामिव क्रमस्य(इह)। अनिर्ज्ञाते हि हेत्वन्तरकल्पना न निश्चिते। तस्माद्यथा प्रकृतौ तथा विकृतावप्यङ्गानां प्रयोग इति।

तद्वचनाद्विकृतौ। किं मुख्यक्रमाद्विकृतौ क्रमः उत पाठक्रमात् प्रकृतौ यथा निर्ज्ञातोऽङ्गक्रमो विकृतावपि तथैव प्रयोक्तव्य इति विचारः। किं युक्तं? प्रयोगार्थत्वात् क्रमस्य [2]अविततस्य प्रयोगानुपपत्तेः विकृतौ च प्रयोगावगमात् यथाविकृति प्रयोग इति पूर्वः पक्षः। यद्यपि प्रकृतौ प्रयोगान्तरे क्रमान्तरमवगतं तथापीह विकृतिज्ञाप्ये प्रयोगान्तरे यथाविकृति मुख्यक्रमेणैवानुष्ठानं युक्तमिति। अनेनैव च विशेषेण प्रकृतौ स्वशब्दत्वादित्यतोऽधिकरणान्तरारम्भः। राद्धान्तस्तु न निर्ज्ञातक्रमं प्रयोगं प्रयोगवचनो वैकृतो बाधितुमर्हति। यद्यपि प्रयोगान्तरं तथापि प्रयोज्यानामभेदात् क्रमापेक्षायां य एव तेषां प्रयोगान्तरे क्रमो निर्ज्ञातः स एव तावद्बुद्धिस्थो भवतीति न क्रमान्तरकल्पनावकाशोऽस्ति निर्ज्ञातस्य हि क्रमस्य प्रयोगोऽङ्गानामिव। यथाऽङ्गानि प्रकृतौ निर्ज्ञातान्येव विकृतौ प्रयुज्यन्ते तथा क्रमोऽपि। अनिर्ज्ञाते हि वस्तुनि स्वरूपावधारणाय सर्वत्र हेत्वन्तरकल्पना भवति न निर्ज्ञाते। तदाह वार्तिककारः(श्लो) यावदज्ञातसन्दिग्धं ज्ञेयं तावत्प्रमित्स्यते। प्रमिते तु प्रमातॄणां प्रमौत्सुक्यं विहन्यते॥ इति। तस्माद्यथा प्रकृतौ तथा विकृतावप्यङ्गानां प्रयोग इति।

---

(1) P. 1299 (2) G. वाक्यस्य

॥ ११ ॥ विकृतिः प्रकृतिधर्मत्वात् तत्काला स्यात् यथा-शिष्टम् ॥ १८ ॥

सद्यस्कालद्व्यहकालचिन्ता। केयं क्रमचिन्तायां? क्रम-सिध्यर्थेति ब्रूमः। सद्यस्कालतायामन्यथा क्रमो भवति। द्व्यह-कालतायां चान्यथा। तस्माद्युक्तो विचारः। तत्र प्रकृतिवदिति द्व्यहकालतां मन्यते पूर्वपक्षवादी। अहरन्तरेपि सवनश्रुतेर-विशेषात्। राद्धान्ती तु कालान्तरश्रवणात् न प्राकृतं कालमपेक्षत इति सद्यस्कालतां मन्यते। सवनानि चैकाहः संबन्धान्येव श्रुत्याऽव-गम्यमानानि न कारणादृतेऽहरन्तरापेक्षाणि युक्तानि कल्पयितुम्।

विकृतिः। सद्यस्कालद्व्यहकालचिन्ता। केयं क्रमचिन्तायां? इत्यनेन सङ्गतिर्नास्तीत्याक्षिपति। क्रमसिद्ध्यर्थेति ब्रूमः सद्यस्कालतायामन्यथा क्रमो भवति। द्व्यहकालतायां चान्यथा। तस्माद्युक्तो विचारः। तत्र प्रकृतिवदिति द्व्यहकालतां मन्यते पूर्वपक्षवादी। अहरन्तरेपि सवनश्रुतेरविशेषात्। तत्र हि औपदेशिकेनातिदेशिकं बाध्यते यत्र द्वयोरसंभवः। इह तु द्वयमपि संभवतीति प्राकृती द्व्यहकालता स्वीक्रियते। वैकृती च प्राह्णादिकालता अहरन्तरवर्तिन्यपि प्राह्णादौ प्राह्णादिशब्दस्याविशेषादिति। राद्धान्ती तु कालान्तरश्रवणान्न प्राकृतं कालमपेक्षत इति सद्यस्कालतां मन्यते। अस्यार्थः—सर्वत्र वैकृत उपदेशः कार्यविषयः उपदेशकल्प्यं च कार्यम्। तत्र प्रकृतौ द्व्यहोपदेशेन कालकार्यं यत्प्राप्तं तत्रैव विकृतावपि कालान्तरमुपदिश्यते न पुनरहरवयवकार्ये। प्रकृतावहरवयवकार्यस्यावलप्तत्वात्। ततश्च वैकृतेनैव कालेन प्राकृतकार्यसिद्धेर्न पुनः प्राकृतकालापेक्षाऽस्तीति सद्यस्कालतैव युक्तेति। ननु तथापि कथमेकाहसंबन्धो लभ्यत इत्याह—सवनानि चैकाहस्संबन्धान्येव श्रुत्याऽवगम्यमानानि न कारणादृते अहरन्तरापेक्षाणि युक्तानि कल्पयितुम्। अस्यार्थः—अहरवयवभूतानि प्राह्णादीनि। तानि अवयवीभूतमहराक्षिप्य पर्यवस्यन्ति। तत्र चैकाहाक्षेपेणैवोपपत्तौ नाहरन्तराक्षेपः

दर्शनमुक्तम् ।

॥ १२ ॥ अङ्गानां मुख्यकालत्वाद्यथोक्तमुत्कर्षे स्यात् ॥ २३ ॥

अश्रूयमाणानामुत्कर्षवाक्येऽपकर्षवाक्ये च किमित्युत्कर्षापकर्षौ। सत्यं श्रुतस्य पदार्थस्य उत्कर्षोऽपकर्षो वा श्रूयते न पुनरुपरितनमाधस्त्यं वाऽकृत्वेति। न चेदिदमवगम्यते क्रमादवगतमनुष्ठानं केन वार्यते। अतः किमत्रोत्कर्षवाक्येऽश्रुतत्वं करिष्यति। अन्यतः सिद्धेः। तस्मात युक्तमुक्तं—तदादि वाऽभिसंबन्धात् तदन्तमपकर्षे स्यादिति।

क्रमत इति न्यायबलेन प्राह्वादीनि श्रुतानि समानाहर्वर्तीन्येव प्रतीयन्त इति। दर्शनमुक्तम्।

अङ्गानां मुख्यकालत्वात्। **अश्रूयमाणानामुत्कर्षवाक्येऽपकर्षवाक्ये च किमित्युत्कर्षापकर्षौ।** अनेन पूर्वपक्षमाह। सर्वं शब्दावगम्यं चोदनास्विति किमित्यश्रूयमाणानामुत्कर्षापकर्षौ भवत इत्यर्थः। **सत्यं श्रुतस्य पदार्थस्योत्कर्षोऽपकर्षो वा श्रूयते न पुनरुपरितनमाधस्त्यं वा अकृत्वेति। न चेदिदमवगम्यते क्रमावगतमनुष्ठानं केन वार्यते?** अस्यार्थः। यद्युपरितनमनुष्ठानं परित्यज्य केवल एवोत्कर्षणीय इति श्रुतं स्यात तदा केवलस्योत्कर्षः स्यात्। यदा पुनरुत्कर्षमात्रं श्रूयते तदा प्रागवगतक्रमबलेन उपरितनान्यप्युत्कर्षणीयानि। तानि हि उत्कृष्यमाणान्यभिमतं पदार्थं कृत्वा कर्तव्यानीति प्रकृतावगतम्। अतः क्रमानुग्रहाय तेषमुपरितनानामप्युत्कर्षेण भवितव्यम्। तथाऽपकर्षेऽपि आधस्त्यमकृत्वैवापकृष्टः पदार्थः कर्तव्य इत्येवं यद्यश्रोष्यत तदा केवल एवापकृष्यताम्। न चैवम्। अतोऽवगतक्रमानुग्रहायाधस्त्यमपि कर्तव्यम्। तत्कृत्वा तत्रासौ प्रकृतौ कृत इति। **अतः किमत्रोत्कर्षवाक्ये अश्रुतत्वं करिष्यति** नोत्कर्षमपकर्षं च वारयितुं क्षम इत्यर्थः। **अन्यत** एव क्रमादेवोत्कर्षसिद्धेः। यदि श्रवणादेवोत्कर्ष इत्युच्यते तदाऽश्रुतत्वं भवेद्विघातकं **तस्माद्युक्तमुक्तं—तदादि वाऽभिसंबन्धात् तदन्तमपकर्षः स्यादिति।**

॥ १३ ॥ [1]प्रवृत्त्या कृतकालानाम् ॥ २५ ॥

किमलङ्करणादयो धर्माः प्रैषोत्तरकालं कर्तव्या उत पाठादेवावगताः सौमिका इति। तत्र वचनबलात् निर्वापमात्रमेव मध्ये कर्तव्यं, अतोऽनियम इति प्राप्ते अभिधीयते—प्रोक्षणादयः कर्तव्याः अनिर्ज्ञातकर्तव्यता हि पाठान्नियम्यते। न पुनः निर्ज्ञातकर्तव्यतां निरुणद्धि पाठः। प्रैषात् प्रैषार्थकर्तव्यता विज्ञायते। अतः परं तु पाठान्नियमः।

प्रवृत्त्या कृतकालानाम्। **किमलङ्करणादयो धर्माः प्रैषोत्तरकालं कर्तव्याः उत पाठादेवावगताः सौमिका इति।** अस्यार्थः—निर्वापात्पराञ्चो ये पदार्थाः पौरोडाशिकाः अलङ्करणाच्च प्राञ्चः अलङ्करणस्य आदयः अलङ्करणात्प्राग्भाविनः ते किं 'सवनीयान्निर्वपस्व' इति निर्वापप्रैषोत्तरकालं कर्तव्याः निर्वापप्रैषानन्तरकालं हि निर्वापस्तावत्कर्तव्यः। तस्मिंस्तु कृते प्रकृतौ तदनन्तरभाविनो ये दृष्टाः प्रोक्षणप्रभृतयोऽलङ्करणात्प्राग्भाविनः तेऽपि किं कर्तव्याः अलङ्करणं तु वचनेनैव बहिष्पवमानोत्तरकाले श्रुतमिति तत्रैव कर्तव्यम्, उत पाठादेवावगता—स्सौमिकाः पदार्थाः प्रचरणीहोमादयः कर्तव्याः। सौमिकाश्च पदार्थाः पाठतः क्लृप्तक्रमाः तत्र वचनबलान्मध्ये पदार्थान्तरमनुप्रविशति। तत्र यावद्वचनं वाचनिकमिति **निर्वापमात्रमेव मध्ये कर्तव्यम्।** ततः परं च प्रचरणीहोमादय इति उभयथापि पाठक्रम एव। **अतोऽनियम इति प्राप्ते। उच्यते।** अलङ्करणस्य प्राग्भाविनः कर्तव्या इति। कुतः? **अनिर्ज्ञातकर्तव्यता हि पाठान्नियम्यते।** यदनुष्ठानमनिर्ज्ञातं तत्पाठेन नियम्यते। **न पुनर्निर्ज्ञातकर्तव्यतां निरुणद्धि पाठः।** निर्ज्ञातं हि प्रकृतौ निर्वापानन्तरं प्रोक्षणादिकमिति तदेव कर्तव्यम्। **अतः प्रैषात् प्रैषार्थकर्तव्यता विज्ञायते।** तस्मिंस्तु कृते तदनन्तरभाविनोऽपि कर्तव्याः। **अतः परं तु पाठान्नियमः।**

---

(1) P. 1302

॥ १४ ॥ [1]असंयोगात्तु तदेव प्रतिकृष्येत ॥ २७ ॥

दीक्षासु यूपं छिनत्तीत्यपकर्षः श्रूयते तत्र तदन्ताशङ्का-निवृत्त्यर्थमिदमधिकरणम्। अभिसम्बन्धाभावात्। यावद्वचन-मपकर्ष इति।

॥ १५ ॥ [2]प्रासङ्गिकं च नोत्कर्षेदसंयोगात् ॥ २८ ॥

प्रासङ्गिकेऽप्ययं तुल्यो हेतुरिति प्रासङ्गिकं च नोत्कर्षेदित्युक्तम्।

॥ १६ ॥ [3]तथाऽपूर्वम् ॥ २९ ॥

असंयोगात्तु तदेव। दीक्षासु यूपं छिनत्तीत्यपकर्षः श्रूयते। तत्र तदन्ताशङ्का-निवृत्त्यर्थमिदमधिकरणम्। अभिसंबन्धाभावात् यावद्वचनमपकर्ष [4]इति पाठतो नियमेऽवगते एकस्मिन्नपकृष्यमाणे अपरस्याप्यपकर्षेण भवितव्यमिति येयमाशङ्का तन्निवृत्त्यर्थ-मधिकरणमिदम्। प्रकृतौ क्रमस्य क्लृप्तत्वात् प्राकृतस्योत्कर्षापकर्षयोः तदादितदन्तन्यायौ भवतः। इह तु नाद्यापि क्रमकल्पनेति नायं तस्य विषयः।

प्रासङ्गिकं च। प्रासङ्गिकेऽप्ययं तुल्यो हेतुरिति प्रासङ्गिकं च नोत्कर्षेदित्युक्तम्। अस्यार्थः— योऽयमक्लृप्तक्रमत्वेन क्रमाभिसंबन्धाभावः तदादितदन्तन्यायापवादे हेतुः स प्रासङ्गिकेऽपि तुल्यः। पौरोडाशिकयोः आपराग्निकहोमयोः सान्नाय्यकैरनूयाजैः सह क्रमकल्पनाया असम्भवात्। केन तर्हि विशेषेणाधिकरणान्तरारम्भः। उच्यते— पूर्वपक्ष-वादी प्रकृतावनूयाजानामापराग्निकहोमयोश्च क्रमकल्पनादभिसंबन्धं मन्यते। राद्धान्तस्तु यद्यप्यनूयाजस्वरूपं तदेव तथापि संबन्धिनां रूपभेदेन नास्ति क्रमकल्पनेति।

---

(1) P. 1305 (2) 13C6 (3) 1307 (4) G. च तमपेक्षते

पौर्णमास्यां पाठक्रमात् क्रमसंबन्धो निर्ज्ञात इति तदपकर्ष इति तदन्तापकर्षं मन्यते पूर्वपक्षवादी। राद्धान्तवादी तु न पौर्णमासीप्रकृतिकमामावास्यं कर्मेति मन्वानः अपकर्षोत्तर–कालमेव क्रमो नियम्यते शेषाणामिति यावद्वचनमपकर्षमुक्तवात्। कार्यविरोधश्चाभ्युच्चयः।

॥ १७ ॥ [1]सान्तपनीया तूत्कर्षेदग्निहोत्रं सवनवद्वैगुण्यात् ॥ ३० ॥

परार्थमुद्धृतेऽग्नौ प्रसङ्गाद्दते नाग्निहोत्रं होतव्यं इति मन्वानः पूर्वपक्षवादी उत्कर्षमुक्तवान्।

तथाऽपूर्वम्। पौर्णमास्यां पाठात् क्रमसम्बन्धो निर्ज्ञात इति तदन्तस्यापकर्षं मन्यते पूर्वपक्षवादी। पाठक्रमस्य पौर्णमास्यामादृतत्वात् क्लृप्तक्रमाया वेदेः अमावास्यायां प्रतिकृष्यमाणत्वात् अस्या अर्वाचीनानामपि प्रतिकर्षं मन्यते। राद्धान्तवादी तु न पौर्ण–मासीप्रकृतिकं[2] आमावास्यं कर्मेति मन्वानः अपकर्षोत्तरकालमेव क्रमो नियम्यते शेषाणा-मिति यावद्वचनमपकर्ष इत्युक्तवान्। प्रकृतिविकारभावे हि सति शास्त्रार्थावधारणपूर्वकं शास्त्रार्थावधारणम् न स्वातन्त्र्येण। तेन पौर्णमास्यां क्रमकल्पनामपेक्ष्यामावास्यायां न शास्त्रार्थो वर्णयितव्यः। तेन यावदेव वेदिमात्रमपकृष्टं तावदेवामावास्यायां प्रतिकृष्यते। तदुत्तरकालं च तत्र क्रमनियम इति। कार्यविरोधश्चेह हविषां भस्मीभावलक्षणो-ऽभ्युच्चयः।

सान्तपनीया तूत्कर्षेत्। परार्थमुद्धृतेऽग्नौ प्रसङ्गाद्दते नाग्निहोत्रं होतव्यमिति मन्वानः पूर्वपक्षवादी उत्कर्षमुक्तवान्। अत्राधिकरणेऽग्न्युद्धरणकालयोर्द्वयोरङ्गयोः कस्य त्यागो युक्त इति चिन्त्यते। सान्तपनीयार्थमुद्धृतेऽग्नौ दैवान्मानुषाद्वा प्रतिबन्धबलात् सान्तपनीयायामुत्कृष्टायां सायमग्निहोत्रं प्रति पुरुषस्य तावदधिकारो विद्यते जीवनस्याधिकारि-विशेषणस्य विद्यमानत्वात्। ननु च तिर्यगधिकरणे सर्वाङ्गोपसंहारसमर्थस्यैवाधिकार

---

(1) P. 1307 (2) R. प्रवृत्तिकं

राद्धान्तवादी तु निमित्तत्वात्कालस्यानुत्कर्षं मन्यते। कथं पुनः कालो निमित्तं? तस्मिन् सति प्रयोगात न पुनः अधिकारि-विशेषणत्वात ।

इत्युक्तम् । न च सान्तपनीयार्थोद्धृताग्निः अकृतसान्तपनीयः पुनरग्निहोत्रार्थमग्न्युद्धरण-मुपसंहर्तुं शक्नोति । अप्रवृत्ते हि कर्मणि अलौकिकेन स्वरूपेण गार्हपत्यमाहवनीयः प्रविशति नान्यथा । अप्रविष्टश्च कथमुद्ध्रियेत । तस्मादग्न्युद्धरणोपसंहारासामर्थ्यान्नाधिकारसंभवः उच्यते—सत्यमाह भवान् समर्थस्यैवाधिकार इति । किन्तु सामर्थ्यमेवात्र चिन्तनीयं किं तदिति । तत्राहिताग्नित्वादन्यत्राग्न्युद्धरणोपसंहारसामर्थ्यम् । अस्ति चात्र पुरुषस्याहिता-ग्नित्वमिति अग्न्युद्धरणोपसंहारसामर्थ्यमिति अधिकारानपायः । यथा चैवं तथा सर्वशक्त्य-धिकरण एव निपुणतरमुपपादयिष्यामः । तत्रापि सत्यधिकारेऽङ्गलोपेनाप्यनुष्ठानमस्तीति स्थिते चिन्त्यते—किमग्न्युद्धरणमपहाय कालानुग्रहाय तस्मिन्नेव कालेऽग्निहोत्रं हूयतां, उत द्वितीयेऽहनि सान्तपनीयकं कृत्वा पुनरग्निमुद्धृत्य कालमात्रं परित्यज्याग्निहोत्रं हूयतामिति चिन्तायां प्रयोगाङ्गत्वात् कालस्याङ्गाङ्गभूतत्वम् । अतोऽङ्गभूतोद्धरणमेवात्रानुग्राह्यम् । न च परार्थमुद्धृतेऽग्नौ तस्मिन्नेव कालेऽग्निहोत्रं युक्तं कर्तुं, अप्रासङ्गिकत्वादग्निहोत्रस्य यदि हि कालोऽत्रानुग्राह्यः स्यात् तदा तन्त्रमध्याविधानात निशीष्टिवदग्निहोत्रं स्यात् । ततश्च परार्थमुद्धृतेऽग्नौ भवेत् । न चैतदस्ति । तस्मादुत्कर्ष एव तस्य न्याय्य इति पूर्वः पक्षः राद्धान्ती तु निमित्तत्वात्कालस्यानुत्कर्षं मन्यते । एतदुक्तं भवति—निमित्तरूपः कालः तदभावेऽधिकार एव नास्ति । अतो न कालान्तरेऽग्निहोत्रं होतव्यम् । अग्न्युद्धरणाभावे तु अधिकारस्यानपायाद्धोतव्यमित्यनुत्कर्षो युक्तः । **कथं पुनः कालोनिमित्तम्?** यावताऽङ्ग काल उक्तः । उत्तरं—**तस्मिन् सति प्रयोगात् न पुनरधिकारिविशेषणत्वात्**, कालस्य पुरुषानुपसंहार्यत्वात् । यदा स्वयमेव कालो निपतति तदा प्रयोगः कर्तव्यः इत्येतावता निमित्तता कालस्योच्यते न पुनर्भेदादीनामिवाधिकारिविशेषणत्वेन । यदा स्वयमुपनिपाती कालः तदा कालान्तरे पुरुषस्य काले कर्म कर्तुं सामर्थ्यं नास्तीत्यनधिकारः । कालान्तरे

अतो निमित्ते सति नैमित्तिकेन भवितव्यमित्यर्थात् प्रसङ्गसिद्धिः। अतोऽनुत्कर्षः।

॥ १८ ॥ षोडशी चोक्थ्यसंयोगात ॥ ३५ ॥

षोडशिन्यप्यङ्गकालविरोधात कादाचित्कत्वाचोत्कर्षस्य अनुत्कर्षं मन्यते पूर्वपक्षवादी। राद्धान्तवादी तु अवश्यंभावित्वाच्छास्त्रातिक्रमस्य वरं अङ्गशास्त्रातिक्रम इत्युक्तवान्।

इति बृहत्यां पञ्चमाध्यायस्य
प्रथमः पादः

आहिताग्नितया तु अग्न्युद्धरणसामर्थ्यमस्तीत्यनपेतोऽधिकारः। अतो निमित्ते सति नैमित्तिकेन भवितव्यमित्यर्थात् प्रासङ्गिकत्वसिद्धिः। अतोऽनुत्कर्षः।

षोडशी च। षोडशिन्यङ्गकालविरोधात् कादाचित्कत्वाच्चोत्कर्षस्य अनुत्कर्षं मन्यते पूर्ववादी। 'तं पराञ्चमुक्थ्येभ्यो गृह्णाति' इति वचनेन षोडशिनः उक्थ्योत्तरकालता विधीयते। [1]उत्कृष्टेपि चोक्थ्येषु कालस्यानपायॅ एव, शङ्खाभावेऽपि शङ्खवेलाया इव। यदि परमनुत्कर्षे षोडशिनः उक्थ्यैः सह यः प्रतीतः क्रमः स परित्यज्यते स च त्यक्तुमुचित एव। उत्कर्षे षोडश्यङ्गभूतस्तोत्रस्य समयाध्युषितकालबाधप्रसक्तेः। न च समयाध्युषितकालचोदना अत्यन्तासंभाव्यार्था। कादाचित्कत्वादुक्थ्योत्कर्षस्य। यदा हि नोक्थ्योत्कर्षः तदा सर्वमविकलमुपपन्नमिति अङ्गाङ्गबाधाच्च अनङ्गक्रमबाधो न्याय्य इति। राद्धान्तवादी तु अवश्यंभावित्वाच्छास्त्रातिक्रमस्य वरमङ्गशास्त्रस्यातिक्रम इत्युत्कर्षमुक्तवान्। यद्यप्यनङ्गं क्रमः तथापि तावत् नाशास्त्रार्थता क्रमस्य। ततश्च द्वयोः शास्त्रार्थत्वे वरमङ्गशास्त्रस्यातिक्रम इत्युत्कर्षः षोडशिनो युक्तः।

इति शालिकनाथमिश्रकृतायां ऋजुविमलायां
पञ्चिकायां पञ्चमस्याध्यायस्य
प्रथमः पादः

---

(1) G. उत्कृष्ट अर्थात् प्रासङ्गिकेषु

बृहती

पञ्चमाध्यायस्य द्वितीयः पादः ॥

॥ १ ॥ [1]सन्निपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् ॥ १ ॥

ननु च प्रवृत्त्या क्रमो नियतः। किमिदमेकैकस्य कृत्स्नमिति। उच्यते—स्थित एतस्मिन्नधिकरणे तत। इह पुनः पूर्वपक्षवादी मन्यते सकलपदार्थानुष्ठानेनापि सहत्वमुपपद्यत एव। किमिति कालव्यवधानं कल्प्यते। एवमेवानुज्ञातमुपपन्नं भवति।

ऋजुविमला

अथ द्वितीयः पादः

सन्निपाते। ननु च प्रवृत्त्या क्रमो नियतः किमिदमेकैकस्य कृत्स्नमिति। अनेनाधिकरणान्तरारम्भमाक्षिपति। पदार्थानुसमयमाश्रित्य प्रवृत्त्या क्रमानियमो दर्शित इति न पुनः पदार्थानुसमयसाधनं युक्तमिति। **उच्यते—स्थिते एतस्मिन्नधिकरणे तदिति।** एतदधिकरणसिद्धमेव पदार्थानुसमयं अनागतावेक्षणेन तत्र युक्तिबलेनाश्रित्य प्रवृत्तिक्रमश्चिन्त्यत इत्यर्थः। **इह पुनः पूर्वपक्षी मन्यते सकलपदार्थानुष्ठानेनापि सहत्वमुपपद्यत एव। किमिति कालव्यवधानं कल्प्यते एवमेवानुज्ञातमुपपन्नं भवति।** अस्यार्थः—यदि काण्डानुसमयोऽप्याश्रीयते तथाप्यारादुपकारकाणामङ्गानां तन्त्रत्वात् पशूनां सर्वेषां सहप्रयोग उपपद्यत एव। अतः किमिति व्यवधानं कल्प्यते। एकैको हि पशुः स्वकीयैरङ्गैः सह प्रयोक्तव्यः। तत्र पुरुषाशक्त्या यावत्कालं व्यवधानमापतति तावदेव प्रयोगविधिनाऽनुज्ञायते। तत्र यद्येकैकः पदार्थः पश्वन्तरेऽपि क्रियते तदाऽननुज्ञातमपि कालव्यवधानमापद्यते

---

(1) P. 1310

राद्धान्तवादी तु सहत्वचोदनादेकैकस्य पदार्थस्य सहानुष्ठानमवगम्यमानं न शक्यते त्यक्तुम्। अतस्तदनुरोधेन व्यवधानानुज्ञानं न तत्परित्यागेनेति पदार्थानुसमयमुक्तवान्। अधिकरणान्तरं वेति कार्यविरोधात् सहत्वावगमत्यागः पाठवत्।

॥ ३ ॥ [1]मुष्टिकपालावदानाञ्जनाभ्यञ्जनवपनपावनेषु चैकेन ॥ ४ ॥

अस्मिन्नधिकरणे अनावृत्तेनापि मुष्ट्यादिना कृतं शास्त्रार्थं मन्यमानः पूर्वपक्षवादी पदार्थानुसमयमुक्तवान्।

तस्मादेकैकस्मिन् कृत्स्नं गुणकाण्डमपवर्जयितव्यमिति। राद्धान्तवादी तु सहत्वचोदनात् एकैकस्य पदार्थस्य सहानुष्ठानमवगम्यमानं न शक्यते त्यक्तुम्। अतस्तदनुरोधेन व्यवधानानुज्ञानं न तत्परित्यागेनेति पदार्थानुसमयमुक्तवान्। अस्यार्थः—सर्वपशूनां साङ्गानां सहानुष्ठानस्य चोदितत्वात् एकैकमेवाङ्गं सहकर्तव्यमिति भवति। तत्र सन्निपत्योपकारकाण्यङ्गानि कार्यभेददर्शनात् भेदेन कर्तव्यानि। तत्रैकस्मिन्नपि पदार्थे सर्वपशुवर्तिनि कृते तत्पदार्थानुष्ठानपर्यवसानमिति। अनेन प्रकारेण यावत्कालव्यवधानमापतति तावदधिकारविधिरनुमन्यत एव नान्यदिति। तेन पदार्थानुसमय एव युक्तः। अधिकरणान्तरं वेति कार्यविरोधात् सहत्वावगमत्यागं पाठवत् प्रदर्शयितुम्। यः खलु यथाशास्त्रं कार्यं प्रमाणायत्तत्वात् प्रमेयसिद्धेरिति मन्वानः सहत्वश्रवणबलेन पदार्थानुसमयं मन्यते तत्प्रतिबोधनायाधिकरणान्तरं वेत्युक्तम्। निर्ज्ञातं हि कार्यं यत्र पुनर्विरुध्यते तत्र कार्यार्थत्वादनुष्ठानस्य कार्यानुरोधेन काण्डानुसमय एव न्याय्यः। यथा पाटक्रमः कार्यविरोधी त्यज्यते तथा सहत्वमपीति।

मुष्टिकपालावदान। अस्मिन्नधिकरणेऽनावृत्तेनापि मुष्ट्यादिना कृतं शास्त्रार्थं मन्वानः पूर्वपक्षवादी पदार्थानुसमयमुक्तवान्। यद्येकैको मुष्टिरनुसमीयते तदा 'चतुरो

---

(1) P. 1311

राद्धान्तवादी तु चोदनातः पदार्थाध्यवसानं वैदिकेषु च न लोकवत् प्रमाणान्तरावसेयम्। एकं चेदं शास्त्रं चतुरो मुष्टीन्निर्वपतीति द्विर्हविषोऽवद्यतीति च। तस्माच्छास्त्रार्थानुसमयो न्याय्य इति मन्यते।

॥ ४ ॥ [1]संयुक्ते तु प्रक्रमादङ्गं स्यादितरस्य तदर्थत्वात् ॥ ६ ॥

यदि शास्त्रादनुसमयो द्विर्हविषोऽवद्यतीति एकत्वाच्छास्त्रस्य एतावतैवानुसमय एव न्याय्यः इति पूर्वपक्षः।

मुष्टीन्निर्वपति' इति कृत एव शास्त्रार्थो भवति। सहत्वचोदनया सर्वं सहकर्तव्यमिति प्राप्तम्। यच्च सहकर्तव्यतया सर्वं प्राप्तं तस्य सर्वस्यानुसमय इति मुष्ट्याद्यनुसमय एव युक्तः। राद्धान्तवादी तु चोदनातः पदार्थाध्यवसानं वैदिकेषु च न लोकवत् प्रमाणान्तरावसेयम्। एकं चेदं शास्त्रं 'चतुरो मुष्टीन्निर्वपति' इति 'द्विर्हविषोऽवद्यति' इति च। तस्माच्छास्त्रार्थानुसमयो न्याय्य इति मन्यते। अस्यार्थः—यत्खलु शास्त्रेऽङ्गतया निरूपितं तत्कर्तव्यम्। यच्च कर्तव्यं तत् सहकर्तव्यम्। यच्च सहकर्तव्यं तदेवानुसमेतव्यम्। अङ्गावगमश्च वैदिकेषु शास्त्रतः न प्रमाणान्तरतः। शास्त्रेण च चतुर्मुष्टिनिर्वापस्य विधानात् आवृत्तस्यैवाङ्गता प्रतिपादितेत्येतावत एवानुसमयो न्याय्य इति मन्यते। पदार्थाध्यवसानं अङ्गाध्यवसानमित्यर्थः।

संयुक्तेषु तु। यदि शास्त्रादनुसमयो द्विर्हविषोऽवद्यतीति एकत्वाच्छास्त्रस्य एतावतैवानुसमय इति पूर्वपक्षः। शास्त्रेणावदानं विधीयत इति मन्यते पूर्वपक्षवादी। अन्यथा सर्वहुततैव स्यात्। अथावयवेनाप्यवयविनो व्यापार इत्युच्यते तथापि नियमार्थं द्व्यवदानमेव विधीयत इति तस्याङ्गत्वात् तस्यैवानुसमयेन भवितव्यमिति। राद्धान्तस्तु नेदं पदार्थविधानं, किन्तु पदार्थसङ्ख्याविधानमेतत्। अत्रायं भावः—नित्यवच्छेषप्रतिपत्ति-

---

(1) P. 1312

तस्मात प्रदानान्तमेवानुसमेतव्यमिति सिद्धम् ।

॥ ५ ॥ [1]वचनात्तु परिव्याणान्तमञ्जनादि स्यात् ॥ ७ ॥

अर्थाद्यूपधारणमिति पूर्वपक्षवादी पदार्थानुसमयं मन्यते । शास्त्रभेदात शास्त्रार्थानां सह चोदनात् । राद्धान्तवादी तु विहितोपपत्त्यर्थत्वात्क्रमस्य काण्डानुसमयं मन्यते । ननु च दृष्टार्थत्वादन्येनापि तत् क्रियत इत्युक्तम् ।

विधानात सर्वहुतं तावन्नास्ति । तेनावदायैव होमे प्राप्ते नावदानं विधेयं, किन्तु तदर्थाक्षितावदानाश्रिता तु सङ्ख्या तदङ्गत्वेन चोद्यत इति । अतः प्रमाणान्तरप्राप्तावदानोपक्रमप्रदानान्तेनैकपदार्थानुसमय एव न्याय्य इति । **तस्मात्प्रदानान्तमेवानुसमेतव्यमिति सिद्धम् ।**

वचनात्तु । **अर्थाद्यूपधारणमिति पूर्वपक्षवादी पदार्थानुसमयं मन्यते ।** अस्यार्थः—प्रकृतौ यद्यूपधारणं कृतं यजमानेन तदर्थाद्यजमानस्यान्यत्र व्यापृतत्वात् द्वितीयपुरुषधारितस्य यूपस्य अञ्जनादीनां सुकरत्वात् । यजमानधारणवचनं तु सौकर्यप्राप्तानुवादमात्रम् । यश्च प्रकृतावर्थादर्थः संवृत्तः न स विकृतौ चोदकेन प्राप्यते । न च विकृतावप्ययमेवार्थोऽर्थादेव भविष्यतीति शक्यते वक्तुम् शास्त्रार्थानां सहचोदनावगतपदार्थानुसमयविरोधात । अतः पदार्थानुसमय एव न्याय्य इति पूर्वः पक्षः । **शास्त्रभेदात् शास्त्रार्थानां सहत्वचोदनात् ।** शास्त्रभेदाद्धि ते पशुयागशास्त्रार्था भिन्नाः । तेषां चैकप्रयोगचोदनाचोदितानां सहानुष्ठानस्य प्राप्तत्वादिति । **राद्धान्तवादी तु विहितोपपत्त्यर्थत्वात् क्रमस्य काण्डानुसमयमुक्तवान् ।** अस्यार्थः—यथा विहितानां पदार्थानामुपपत्तिर्भवति तथाभूतक्रम आदरणीयः । तत्र यदि पदार्थानुसमय आश्रीयते तदा अञ्जनादिपरिव्याणान्तं यजमानेन यूपस्थानवसर्जनं विहितं सद्बाध्येत । एकेन यजमानेन बहुयूपवर्तिनस्तस्याशक्यत्वात् इति । **ननु दृष्टार्थत्वादन्येनापि तत्क्रियत इत्युक्तम् ।** **अस्यार्थः—यजमानेन**

---

(1) P. 1313

सत्यं यद्यर्थाद् दृष्टार्थता स्यात्। विधौ तु सति दृष्टेप्यर्थे न शास्त्रार्थो व्यतिक्रमितुं शक्यते। दर्शितमेतत्।

॥ ६ ॥ [1]पशुगणे तस्य तस्यापवर्जयेत पश्वेकत्वात् ॥ १० ॥

अत्रापि शास्त्रबाधं मन्वानः काण्डानुसमयं मन्यते पूर्वपक्षवादी। राद्धान्तवादी तु पदार्थानुसमयेप्यबाधं मन्वानः सहचोदनानुग्रहाय पदार्थानुसमय एव न्याय्य इत्युक्तवान्।

यूपस्या[2]नवसर्जनं दृष्टार्थम्। तच्चान्येनापि पुरुषेण शक्यत एव कर्तुमिति पदार्थानुसमयो न हीयत इति। सत्यं यद्यर्थात् दृष्टार्थता स्यात्। अस्यार्थः—द्विविधं हि दृष्टार्थं किञ्चिदर्थादेव प्राप्तम्, किञ्चिच्छास्त्रेण नियमार्थतया विहितम्। तत्र यदर्थादेव प्राप्तं दृष्टार्थं तद्येनैव शक्यते कर्तुं तेनैव क्रियते। यत्पुनः शास्त्रेणैव चोदितं तद्यथाचोदितमेव कर्तव्यं, यजमानश्च शास्त्रचोदित एव। अनियतस्य पुरुषस्य प्रसक्तेर्नियमार्थं यजमानविधानमुपपद्यत एव। तदाह—विधौ तु सति दृष्टेऽप्यर्थे न शास्त्रार्थो [3]व्यतिक्रमितुं शक्यते। दर्शितमेतत्।

पशुगणे। अत्रापि शास्त्रबाधं मन्वानः काण्डानुसमयं मन्यते पूर्वपक्षवादी। यथा पूर्वत्र शास्त्रबाधात् काण्डानुसमयः तथाऽत्रापि "दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवद्यति, सौविष्टकृतान्यवदाय न तावत्येव होतव्यं ऐडान्यवद्यति इति वचनेनावदानत्रयनैरन्तर्यचोदनात् पदार्थानुसमये च तस्य बाधनात् अवदानत्रयानुसमय एव युक्त इति। राद्धान्तवादी तु पदार्थानुसमयेप्यबाधं मन्वानः सहत्वानुग्रहाय पदार्थानुसमय एव न्याय्य इत्युक्तवान्। अस्यार्थः—दैवतावदानानुसमयेऽपि कृते पुनस्सौविष्टकृतानुसमयं कुर्वाणो नैव नैरन्तर्यं बाधते। प्रकृतौ त्वेकत्वात् पशोः एकस्मिन् तथाकृतम्। इह पुनः सहचोदितपशुबहुत्वादेकमेवावदानं सर्वेषु कर्तव्यमिति नास्ति शास्त्रबाधः। तेन सहप्रयोगानु-

---

(1) P. 1314 (2) R. नपसर्जनं (3) G. शास्त्रार्थोप्यति

मन्त्रोच्चारणतन्त्रता च सहत्वे लिङ्गम् ।

॥ ७ ॥ [1]नानाबीजेष्वेकमुलूखलं विभवात् ॥ १२ ॥

कः पुनरत्र विशेषोऽवदानादिहोमपर्यन्तानुसमय इत्यनेनाधिकरणेन । न खलु कश्चिद्विशेषः । किमर्थं तर्हीदमधिकरणं ? विधानात् पदार्थावच्छेदो भवतीति पूर्वपक्षवादिनोऽभिमानः ।

राद्धान्तवादी तु विधेयान्यत्वेन विधानोपपत्तौ न पदार्थावच्छेदाय प्रभवोऽस्तीति पूर्वोक्त एव न्याय्यः । अनेन च

ग्रहाय पदार्थानुसमय एव युक्तः । मन्त्रोच्चारणतन्त्रता च सहत्वे लिङ्गम् । मनोतामन्त्रो हि अवदानप्रकाशकः स दैवतानुसमयपक्षे तन्त्रं भवति । इतरथा सौविष्टकृतावदानव्यवहितत्वात् मनोताप्रकाशनस्य पश्वन्तरे भेदेन मनोतामन्त्रः प्रयोक्तव्यः स्यात् ।

नानाबीजेषु । कः पुनरयं विशेषोऽवदानादिहोमपर्यन्तानुसमय इत्यनेनाधिकरणेन । अस्यार्थः—यथा "संयुक्ते तु प्रक्रमात्" इत्यत्राधिकरणे अवदानादिहोमपर्यन्त एक एव पदार्थ इति तावतोऽनुसमय उक्तः तथेहापि कृष्णाजिनास्तरणादिफलीकरणान्त एक एव पदार्थ इति तावतैवानुसमयो न्याय्य इति । एतेनैव गतार्थमेतदधिकरणमित्याक्षेपः । समाधत्ते न खलुकश्चिद्विशेषः । किमर्थं तर्हीदमधिकरणं ? विशेषमाह—विधानात् पदार्थावच्छेदो भवतीति पूर्वपक्षवादिनोऽभिमानः । अस्यार्थः—कृष्णाजिनास्तरणादीनां पृथक् पृथक् विहितत्वात् पृथक् पदार्थत्वं पृथगङ्गत्वं पृथगेवानुष्ठानप्रयुक्तिरिति तावन्मात्रेणानुसमयः । अवदानं तु [2]न पृथग्विहितमिति माभूत् तावन्मात्रेणैवानुसमयः । राद्धान्तवादी तु वदति विधेयान्यत्वेन विधानोपपत्तेर्न पदार्थावच्छेदाय प्रभवोऽस्तीति पूर्वोक्त एव न्याय्यः । अस्यार्थः—व्रीहीनवहन्तीति वाक्येन तण्डुलीभावहेतुर्व्यापारनिचयश्चोदितः । सर्वे एव हि धातवः फलविशेषावच्छिन्ने व्यापारक्षणनिचये प्रवर्तन्ते । तद्यथा पचिः देवदत्तः

---

(1) P. 1315 (2) G. omits न

विशेषेण तदप्यत्रोदाहरणम् ।

॥ ८ ॥ [1]विकारे त्वनूयाजानां पात्रभेदाऽर्थभेदात् स्यात् ॥ १६ ॥

कः पुनरयं क्रमचिन्तायां पात्रभेदोपन्यासः । क्रमसिद्ध्यर्थ इति ब्रूमः । भेदाभेदे क्रमान्यत्वदर्शनात् । तत्र पूर्वः पक्षो- द्रव्यविकारशङ्कया पात्रविकारशङ्कया च । कालान्यत्वेन चोपपत्तेः ।

पचतीत्यत्र चुल्लिसम्मार्जन-एधोहरण-स्थाल्यधिश्रयण-उदकावसेचन-अग्न्यभिज्वलन-इन्धनक्षेपण तण्डुलावपन-दर्वीघट्टन-विक्लृत्तिपरीक्षा-अवस्रावणावतारणात्मके व्यापारवर्गे । अतोऽवघा- तात्मक एकः कृष्णाजिनास्तरणादिफलीकरणान्तः पदार्थ इति तावतैवानुसमयो युक्तः । अवान्तरविधयस्तु न पदार्थावच्छेदाय प्रभवन्ति, विधेयमात्रभेदेनाप्युपपत्तेः । अनेन च विशेषेण तदप्यत्रोदाहरणम् । जुहोतिचोदनयैवावदानस्यापि गृहीतत्वात् न पृथक् पदार्थतास्तीति अवदानादिहोमान्तेनानुसमयः । पूर्वाधिकरणे भवतु विधानभेदादेव पदार्थभेदः तथापि विधानभेद एवात्र नास्तीति दर्शितमित्यनवद्यम् ।

विकारे त्वनूयाजानाम् । कः पुनरयं क्रमचिन्तायां पात्रभेदोपन्यासः । लक्षणे सङ्गतिर्नास्तीत्यतः[2] । क्रमसिद्ध्यर्थ इति ब्रूमः भेदाभेदे क्रमान्यत्वदर्शनात् । उपभृद्भेदे ह्येकामुपभृतमुपादाय प्रयाजार्थं ग्रहणं कार्यम् । द्वितीयामुपादायानूयाजार्थम् । अभेदे त्वे- कामेवोपादाय ग्रहणद्वयमिति क्रमान्यत्व भवति । अतः क्रमसिद्ध्यर्थैवेयं चिन्तेति । अत्र पूर्वपक्षो द्रव्यविकारशङ्कया । मिश्रीकृत्य ग्रहणे प्रयाजाद्यर्थस्य द्रव्यस्य पृषत्तामात्र- विकारो [3]न पुनरन्यत्वमेवेति । पात्रविकाराशङ्कया च । मर्यादायां क्रियमाणायां उपभृत्त्वं न नश्यति । अपि तु विकारमात्रं तस्यैवेति । कालान्यत्वेन चोपपत्तेः ।

---

(1) P. 1316 (2) नास्तीत्यत्र (3) G. omits this न

राद्धान्तस्तु द्रव्यविकारापत्तेः कालान्यत्वे च ग्रहणयोः सहावगमबाधात् तदनुगुणः पात्रभेदो न्याय्य इति सिद्धम् ।

॥ ९ ॥ [1]प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यात् न ह्यचोदितस्य शेषाम्नानम् ॥ १७ ॥

वैकृतानां पाठक्रमः प्राकृतैर्व्यवधीयते नेति चिन्ता । व्यवधीयत इति पूर्वः पक्षः । पदार्थानुष्ठानेन व्यवधानावगमात् ।

राद्धान्तस्तु वैकृतप्रयोगवचनात् प्राकृतपदार्थावगमात् (अ) व्यवधानम् । अतस्सूक्तं अन्ते तु बादरायण इति ।

एकस्यामेवोपभृति कालान्तरे पृषदाज्यमपि ग्रहीष्यत इति । राद्धान्तस्तु द्रव्यविकारापत्तेः द्रव्यशब्देन च हविः पात्रं चोच्यते तयोर्विकार आपद्यते । स चायुक्तः । हविर्विकाराभ्युपगमे उत्पवनाद्यर्थबाधप्रसङ्गात् । पात्रविकारे चौपभृतत्वनाशापत्तिः । **कालान्यत्वे च ग्रहणयोः सहावगमबाधप्रसङ्गात्** । अतः तदनुगुणः ग्रहणसहत्वानुगुणः पात्रभेदो न्याय्य इति सिद्धम् ।

प्रकृतेः । ननु किमत्र चिन्त्यते ? किं वैकृतं पूर्वं उत प्राकृतमिति । यावता यावदेव[2] प्रधानानन्तरमवगम्यते तदेव तदनन्तरं कर्तव्यमित्यत्राह—**वैकृतानां पाठक्रमः प्राकृतैर्व्यवधीयते नेतिचिन्ता** । प्रधानानन्तर्यमेव सन्दिग्धमित्यर्थः । अत्र पूर्वपक्षमाह —**व्यवधीयत इति पूर्वः पक्षः पदार्थानुष्ठानेन व्यवधानावगमात्** । यदि प्रधानानन्तरं प्राकृताः क्रियन्ते तदा प्रधानेन सह यो वैकृतानां पाठक्रमोऽवगतः स व्यवधीयते । अनुष्ठानेन व्यवधानावगमात् । **राद्धान्तस्तु वैकृतप्रयोगवचनात् प्राकृतपदार्थावगमात् व्यवधानम्** । वैकृतचोदनार्थावच्छेदायैव हि प्राकृताङ्गयुक्तं प्रधानं पठितमिति पाठक्रमत एव वैकृतानां प्राकृतेभ्यः पश्चादनुष्ठानम् । **अतस्सूक्तं-अन्ते तु बादरायण इति** ।

---

(1) P. 1316 (2) G. तावदेव

॥ १० ॥ [1]कृतदेशात्तु पूर्वेषाम् सदेशः स्यात् तेन प्रत्यक्ष-संयोगात् न्यायमात्रमितरत् ॥ २१ ॥

राजसूयेपि विदेवनादयो वैकृतेन पाठेन विरुद्ध्यमाना नान्तेऽनुष्ठानमर्हन्ति । न्यायमात्रमितरदिति ।

एतदुक्तं भवति—नान्तेऽनुष्ठानं केनचित्क्रमेणावगम्यते । किं तर्हि ? पूर्वावगमविरोधात् अन्तेऽनुष्ठानमिति न्यायमात्र-मित्युच्यते ।

कृतदेशात्तु । अत्रेत्थं पूर्वपक्षरचना । सर्वत्र वैकृतानि तावत्प्राकृतानां पश्चात् कर्तव्यानीति स्थितं अन्ते तु बादरायण इति न्यायात् । तत्र यावन्मात्रमपकृष्यते तावत एवापकर्षो युक्तः न तदन्तापकर्षन्यायेन पूर्वेषामपि ; वैकृतत्वेनाक्लृप्तक्रमनियमत्वात् यूप-प्रतिकर्षवदिति । अत्र राद्धान्तमाह—**राजसूयेपि विदेवनादयो वैकृतेन पाठेन विरुध्य-मानाः नान्तेऽनुष्ठानमर्हन्ति** । यत्र श्रुतास्तत्रैव भवितुमर्हन्ति । अस्यार्थः— परस्परं तावत् विदेवनादीनामभिषेकस्य च विकृतौ पाठतः क्रमः प्रतीयते । तत्राभिषेके प्रतिकृष्टे सति चिन्त्यते—किं विदेवनादयोऽन्तेऽनुष्ठेयाः उताभिषेकात्पूर्वमिति । अत्र वैकृतपाठबलेन य एव पाठक्रमः प्रतीयते स एव कल्प्यते । अन्ते त्वनुष्ठानं वैकृतेनैव पाठेन विरुद्ध्यते । **न्यायमात्रमितरदिति** । किमिदं न्यायमात्रमिति ? अयमभिप्रायः—अन्तेपि यदनुष्ठानं तदपि वैकृतपाठबलेनैव प्रधानचोदनागृहीतत्वात् प्राकृतानां वैकृतानां पश्चादेव पाठ इति पूर्वोक्तनीत्या । तदेवं तुल्ये वैकृतपाठे किमिदमुच्यते न्यायमात्रमितरदिति पूर्वपक्षिते राद्धान्तमाह—**एतदुक्तं भवति— नान्तेऽनुष्ठानं केनचित्क्रमेणावगम्यते । किं तर्हि ? पूर्वावगमविरोधादन्तेऽनुष्ठानमिति न्यायमात्रमित्युच्यते** । अस्यार्थः—वैकृतानां यदन्तेऽनुष्ठानं तन्न केनचित् श्रुत्यादिप्रतिपादितेन क्रमेणावगम्यते । किं तर्हि ? प्रधान-चोदनापरिगृहीतत्वेन प्राकृतानां यो वैकृतेभ्यः पूर्वमवगमः तस्य विरोधादन्तेऽनुष्ठानमव-

---

(1) P. 1318

॥ ११ ॥ [1]प्राकृताच्च पुरस्तात् ॥ २२ ॥

अत्रापि प्राकृतक्रमावगमात् प्रयोगचोदनात एव अन्तेऽनुष्ठानं मन्यते पूर्वपक्षवादी। पुनः श्रुतिस्तु अनन्यार्था क्रममेवावगमयतीति राद्धान्तः।

॥ १२ ॥ [2]सन्निपातश्चेद्यथोक्तमन्ते स्यात् ॥ २३ ॥

गम्यते यथावगममनुष्ठानमिति यः पूर्वमवगम्यते स पूर्वमनुष्ठेयः। अन्यथाऽनुष्ठानावगमयोर्विरोधः स्यात। न च तद्युक्तम्। अवगमायत्तत्वादनुष्ठानस्येति। यश्चासौ प्राकृतानां पूर्वमवगमः स आनुमानिकः तेनान्तेनानुष्ठानं न्यायमात्रनिबन्धनम्। यश्च वैकृतानां पाठमात्रनिबन्धनः परस्परक्रमः सः प्रत्यक्षसमधिगम्यः। तत्र प्रत्यक्षस्य शीघ्रप्रवृत्तित्वात तद्वशेन यः क्रमः पूर्वमक्लृप्तत्वात् बलीयानिति तदनुग्रहायाभिषेकात् पूर्वपठितानां विदेवनादीनामपि अपकर्षः। यूपप्रतिकर्षे तु अग्नीषोमीयप्रणयनादीनां यूपेनैव स्वप्राग्भाविभिरपि पदार्थैः प्रत्यक्ष एव पाठक्रम इति न प्रतिकर्षः।

प्राकृताच्च पुरस्तायत्। **अत्रापि प्राकृतक्रमावगमात् प्रयोगचोदनात एवान्तेऽनुष्ठानं मन्यते पूर्वपक्षवादी।** अस्यार्थः— प्राकृतानां पदार्थानां प्रकृतावेव यः क्रमः क्लृप्तः तत्र मध्ये विना वचनेन वैकृतस्यानुप्रवेशो न न्याय्यः इति प्राकृतक्रमवशेन प्रयोगचोदनातः पूर्वं प्राकृतान् पदार्थानवगमयन्त्याः सावित्रहोमादीनामप्यन्तेऽनुष्ठानं न्याय्यमिति— न च दीक्षणीयादिश्रवणं मध्येऽनुप्रवेशमवगमयितुमलम्। क्रमस्यानभिधानात। **पुनः श्रुतिस्तु अनन्यार्था क्रममेवावगमयति।** यद्यपि क्रमो नाभिधीयते तथापि पाठबलेन क्रमोऽवगम्यते। तत्र च पुनः श्रुतेरनन्यपरायास्तात्पर्यमिति तद्बलेन मध्येऽनुप्रवेशः।

---

(1) P. 1318 (2) P. 1319

अत्रापि दीक्षणीयासङ्कीर्तनं पूर्ववत् क्रमार्थं मन्यते पूर्वपक्षवादी। तत्तु पूर्वपदार्थक्रमपरतयैवोक्तमिति(वोपयुक्तमिति)। राद्धान्तवादी तु परस्ताद्यथोक्तं न्याय्यं मन्यते। किं पुनः कारणं पूर्वस्मिन्नेवोपयुज्यते न पुनः परस्मिन्नपीति। अत्रोच्यते—परतोऽनन्यत्वावगमात् पूर्वस्मिंश्चान्यत्वावगतेः युक्तमुक्तम्।

इति बृहत्यां पञ्चमस्य
द्वितीयः पादः

सन्निपातश्चेत्। अत्रापि दीक्षणीयासङ्कीर्तनं पूर्ववत् क्रमार्थं मन्यते पूर्वपक्षवादी। यथा दीक्षणीयायाः पुनः पाठात् सावित्रहोमादिभिस्सह क्रमकल्पना तथा रुक्मप्रतिमोचनादिभिरपीति दीक्षणीयानन्तरमेव तेषां प्रयोगो युक्तः। तत्र दीक्षणीयायाः सङ्कीर्तनं पूर्वपदार्थक्रमपरतयैवोक्तमिति। राद्धान्तवादी परस्ताद्यथोक्तं न्याय्यं मन्यते। किं पुनः कारणं पूर्वस्मिन्नेवोपयुज्यते न पुनः परस्मिन्नपीति। अत्रोच्यते—परतोऽनन्यत्वावगमात् पूर्वस्मिंश्चान्यत्वावगतेः युक्तमुक्तम्। अस्यार्थः—यः पदार्थो वैकृते[तो] दीक्षणीयायाः पूर्वं पठ्यते तस्मिन् बादरायणन्यायादनन्यत्वमवगम्यते। तदनुसारेण पाठस्यासंभवात्। अतस्तत्परत्वं [1]तावच्छ्रुतेः। यस्तु परतः पठ्यते तस्य परभावो बादरायणन्यायेनाप्यविरुद्धः। निरन्तरपाठोऽपि अवश्यं पठितव्यतयाप्युपपद्यते। तेन नैरन्तर्यमपि न शक्यते वक्तुमिति न तत्परत्वं श्रुतेः।

इति श्रीशालिकनाथकृतायां ऋजुविमलायां
पञ्चिकायां पञ्चमाध्यायस्य
द्वितीयः पादः

---

(1) G· त्वात्

बृहत्यां

पञ्चमाध्यायस्य तृतीयः पादः ॥

॥ १ ॥ [1]विवृद्धिः कर्मभेदात् पृषदाज्यवत्तस्य तस्योपदिश्येत ॥१॥

क्रमार्थ एव प्रत्येकसमुदायसम्बन्धश्चिन्त्यते । प्रत्येकसम्बन्धे हि व्यवधानमहत्वं समुदायसम्बन्धे त्वल्पत्वम् । तस्माद्युक्ता चिन्ता । किं पुनर्युक्तं ? प्रत्येकमभिसंबन्ध इति । प्रतिप्रधानं गुणा आवर्तन्त इति न्यायात । ननु च पृथक्त्वनिवेशिनी सङ्ख्येत्युक्तम् । सत्यमुक्तं विधानवशात्तु यथोपपद्यते तथोपकल्पनीयम् ।

ऋजुविमला

तृतीयः पादः

विवृद्धिः । नन्वेषा शेषचिन्तेत्यसङ्गतिमाशङ्क्याह—क्रमार्थ एव प्रत्येकसमुदायसंबन्धश्चिन्त्यते । प्रत्येकं संबन्धे हि व्यवधानमहत्वम् । समुदायसंबन्धे त्वल्पत्वम् । विततिः क्रमः, सा प्रत्येकसंबन्धे महती ; समुदायसंबन्धे त्वल्पेति । तस्माद्युक्तो विचारः । किं पुनर्युक्तं ? प्रत्येकमभिसंबन्ध इति । प्रतिप्रधानं गुणा आवर्तन्त इति न्यायात् । ननु च पृथक्त्वनिवेशिनी सङ्ख्येत्युक्तम् । अस्यार्थः—पृथक्त्वं यत्र समवेतं तत्र द्वित्वादिका सङ्ख्या निविशत इति द्वितीय एवोक्तम् । ततश्चैकैकत्र षडादिसङ्ख्या कथं निविशत इति परं समुदाय एव सङ्ख्याविधानमस्त्विति । सत्यमुक्तम् विधानवशात्तु यथोपपद्यते तथा कल्पनीयम् । अस्यार्थः—यदा तावत्[साहित्यं]उद्देश्यगतविशेषणं स्यात् विवक्षितत्वात विवक्षायां च वाक्यभेदापत्तेः । साहित्यस्याविवक्षायां प्रत्येकमेव सङ्ख्या विधीयत इति निश्चितम् । तदनुरोधेनाभ्यासनिबन्धनं पृथक्त्वमाश्रित्य सङ्ख्योपपद्यत इति कल्पनीयम्—यथा 'त्रिः प्रथमामन्वाह त्रिरुत्तमां' इत्यत्र सामिधेनीनां पञ्चदशत्वम् । यत

---

(1) P. 1320

अत एव 'पञ्चदशान्याज्यानि' इति च प्रत्येकमभिसंबन्धः। अत्रोच्यते—न विधानं पदार्थमन्यथा कर्तुमुत्सहते। पदार्थानुरोधी हि विधिः न विध्यनुरोधिनः पदार्थाः। 'अग्निना सिञ्चेत्' इत्येवमादिषु दर्शितम्। तस्मात् यावत्पृथक्त्वं तावदभ्यासकल्पना न सम्भवतीति समुदायाभिसम्बन्धः। पृषदाज्ये त्वेतद्विपरीतं इति प्रत्येकमभिसंबन्धः। यदप्युक्तं पञ्चदशान्याज्यानीति आवृत्तौ डप्रत्ययं वक्ष्यामः।

॥ २ ॥ [1]स्वस्थानात्तु विवृद्धयेरन् कृतानुपूर्व्यत्वात् ॥ ३ ॥

एव प्रत्येकसंबन्धो न्याय्यः अत एव 'पञ्चदशान्याज्यानि' इत्येवमादिषु प्रत्येकसम्बन्धः पञ्चदशादीनां, अन्यथा तत्रापि समुदायसम्बन्ध एव स्यात्। अत्रोच्यते—न विधानं पदार्थमन्यथा कर्तुमुत्सहते। पदार्थानुरोधी हि विधिः न विध्यनुरोधिनः पदार्थाः अग्निना सिञ्चेदित्येवमादिषु दर्शितम्। अस्यार्थः—सङ्ख्यापदार्थस्तावत् द्वित्वादिकः पृथक्त्वे सति निविशते। पृथक्त्वं च यादृशं समुदाये न तादृशमभ्यासे। तेन विधेयभूत-सङ्ख्यास्वभावालोचनया समुदायसंबन्ध एव सङ्ख्या विधीयत इति पदार्थानुसारेण वाक्यार्थः प्रतीयते। विध्यनुसारेण तूक्तेन न्यायेन प्रत्येकसम्बन्धः। तत्र पदार्थस्वभावो विहन्यते। सोऽप्यन्यथाकर्तुं न शक्यत इति पदार्थानुरोधात् समुदाय एव सङ्ख्याविधिराश्रयणीयः। तस्मात् यावत्पृथक्त्वं तावदभ्यासकल्पना न सम्भवतीति समुदाये सम्बन्धः। पृषदाज्ये त्वेतद्विपरीतम्। तत्र हि कारकत्वेन द्रव्यविधानं क्रियायाश्च कारकम्। न च क्रिया-समुदायः क्रिया। तेन समुदाये संबन्धे तूपपत्तिरिति प्रत्येकसंबन्ध एव न्याय्यः। यदप्युक्तं पञ्चदशान्याज्यानीति आवृत्तौ डप्रत्ययं वक्ष्यामः तेन तत्र न सङ्ख्या विधीयते। किं तर्हि? विशिष्टसङ्ख्याका आवृत्तिः। सा च प्रत्येकसंबन्धेऽप्यविगुणैवेति न विधानपदार्थयोः कश्चिद्विरोध इति यथाविधानमेव सम्बन्धः।

---

(1) P. 1321

सङ्ख्यासम्पत्त्यर्थमभ्यासे प्राप्ते इदं चिन्त्यते—किं दण्डकलितवदभ्यासः उत स्वस्थान इति। समुदायाभिसम्बन्धात् दण्डकलितवदभ्यासम्मन्यते पूर्वपक्षवादी। पूर्वप्रतीतक्रमानुरोधात् स्वस्थाने युक्त इति राद्धान्तः। समुदायसंबन्धस्य तूभयथाप्यविरोधः।

॥ ३ ॥ [1]समिध्यमानवतीं समिद्धवतीं क चान्तरेण धाय्याः स्युः द्यावापृथिव्योरन्तराले समर्हणात् ॥ ४ ॥

ननु वचने सति पूर्वपक्ष एव न सम्भवति। अर्थवादपूर्वकं तद्वचनमिति पूर्वपक्षवादी न्यायानुसारेणापि गच्छत्येवेति मन्यते।

स्वस्थानात्तु। सङ्ख्यासम्पत्त्यर्थमभ्यासे प्राप्ते इदं चिन्त्यते—किं दण्डकलितवदभ्यासः उत स्वस्थान इति। अनेनावान्तरसङ्गतिं एकपादव्यवस्थार्थमाह। निराकृते हि प्रत्येकसम्बन्धे अयं विचार आपतति। अन्यथा स्वस्थानवृद्धिरेव स्यात्। समुदायाभिसम्बन्धात् दण्डकलितं मन्यते पूर्वपक्षवादी। उक्तमेतत् यावत्पृथक्त्वमस्ति तावत् नाभ्यसितव्यमिति। परतस्तु सङ्ख्यासिद्ध्यर्थमभ्यासे कर्तव्ये दण्डकलितवदेवाभ्यासो न्याय्यः। पूर्वप्रतीतक्रमानुरोधात् स्वस्थाने युक्त इति राद्धान्तः। अस्यार्थः—प्रेक्षापूर्वकारी यः पुरुषः स पर्यालोचयति विनाभ्यासेन तावत् क्षेमो नास्ति। तेनाभ्यासोऽवश्याश्रयणीयः। स इदानीं यदि दण्डकलितवत् स्यात् पूर्वप्रतीतक्रम एव बाधः स्यात्। न चासौ युक्तः। तस्मात् स्वस्थानविवृद्धिरेवास्त्विति। समुदायसंबन्धस्य तूभयथाऽविरोधः।

समिध्यमानवतीम्। ननु वचने सति पूर्वपक्ष एव न संभवति—'अन्तराले धाय्या' इति वचने सति नास्ति पूर्वपक्षः, वचनान्न्यायस्य दुर्बलत्वात्। उत्तरं—अर्थवादपूर्वकं तद्वचनमिति पूर्वपक्षवादी न्यायानुसारेणापि गच्छत्येवेति मन्यते। अस्यार्थः

---

(1) P. 1322

राद्धान्तस्तु नायथार्थग्रहणे प्रमाणमस्त्यर्थवादस्य इति न शब्दार्थं न्यायो निरुणद्धि इति न्यायमात्रं तदित्युक्तम्। अतो यथार्थ-वादमेवेदं विधानं न्याय्यं, धाय्याशब्दनिरूपणं तु प्रासङ्गिकम्। प्रदर्शितं च तत्।

॥ ४ ॥ [1]स्तोमविवृद्धौ बहिष्पवमाने पुरस्तात् पर्यासादागन्तवः स्युः तथाहि दृष्टं द्वादशाहे ॥ ७ ॥

न्यायमात्रं वचनं बाधितुं न क्षमत इत्युक्तम्। वचनं चेदं वृषण्वन्तस्तृचा भवन्ति तृच उत्तमः पर्यास इति। ननु द्वादशाहे एतद्वचनं, अतद्विकारेषु केयमाशङ्का।

—अन्तरालत्वेन धाय्यानां योऽयमर्थवादः तत्पूर्वकमिदं वचनम्। न साक्षाच्छ्रूयमाणमस्ति ततश्च कल्प्यवचनं[न]न्यायं बाधितुमलमिति न्यायानुसारेणायमर्थवादो नेय इति पूर्वपक्षवादी मन्यते। **राद्धान्तस्तु नायथार्थग्रहणे प्रमाणमस्त्यर्थवादस्येति।** तेन यथार्थवादमीदृशमेवेदं वचनम्। ननु न्यायोऽत्र प्रमाणमर्थवादस्यायथार्थग्रहणे तत्राह—**न शब्दार्थं न्यायो निरुणद्धि न्यायमात्रं तदित्युक्तम्। अतो यथार्थवादमेवेदं विधानं न्याय्यम्।** नार्थवादस्वरूपातिक्रमेण। **धाय्याशब्दनिरूपणं तु प्रासङ्गिकम्। दर्शितं च तत्।**

स्तोमविवृद्धौ। न्यायमात्रं वचनं बाधितुं न क्षमत इत्युक्तम्। वचनं चेदं वृषण्वन्तस्तृचा भवन्ति। तृच उत्तमः पर्यास" इति। [2]अनेन ऋज्वर्थंमनुभाषते आक्षेप्तुम्। अधुना आक्षिपति—**ननु द्वादशाहे एतद्वचनम्। अतद्विकारेषु केयमाशङ्का।** अस्यार्थः—यदिदमुत्तमस्य तृचस्य पर्यासत्वं विधीयते तत द्वादशाह एव। तत्प्रकरण एवास्य तृचस्य पठितत्वात्। अतश्च क्रत्वन्तरेषु कथमियमाशङ्का—उत्तमात तृचात पर्यासीभूतात् प्रागागन्तुना[3] हि भवितव्यं इति। प्रतिप्रकरणं धर्माणां व्यवस्थितत्वात्,

(1) P. 1323 (2) G. ऋजुत्वार्थं (3) G. आगन्तुभिः

उत्तमशब्दश्रवणात्[1]। किमिदमुत्तमशब्दश्रवणादिति? उत्तमः पर्यासो भवतीति पदार्थाङ्गतां मन्यते पूर्वपक्षवादी। ननु च पदार्थाङ्गत्वे आनर्थक्यमुक्तम्। न तत् पर्यासे भवितुमर्हति। सर्वस्य पर्यासस्यार्थवत्त्वात क्रतुसंबन्धिनी हि पर्याससंज्ञा उद्गीथवत। तस्माद्युक्तमुक्तम्। द्वादशाहविकृतिष्वपि निराकरणीय एवायमर्थ इत्युपन्यासः।

क्रत्वन्तरेष्वपि द्वादशाहविकारेषु या[ता]वच्चोदकप्राप्ता युज्येताप्याशङ्का। अतद्विकारेषु सा अत्यन्तमयुक्ता। समाधत्ते—**उत्तमशब्दश्रवणात्। किमिदमुत्तमशब्दश्रवणादिति उत्तमः पर्यासो भवतीति पदार्थाङ्गतां मन्यते पूर्वपक्षवादी।** उत्तमशब्दश्रवणे सति उत्तमस्य तृचस्य पर्यासत्वं विधीयते न द्वादशाहिकस्यैव। तेनोत्तमतृचरूपपदार्थाङ्गतां मन्यते पूर्वपक्षवादी (अ)विहितं च क्रत्वन्तरेष्वप्युत्तमत्वं इति अस्य तत्रापि पर्यासता विधीयते। **ननु च पदार्थाङ्गत्वे आनर्थक्यमुक्तम्।** यदि पदार्थमात्रे धर्मो विधीयते तदा धर्मविधेरानर्थक्यं स्यात् अपूर्वसंबन्धाभावात्। अतो द्वादशाहसंबन्ध एव उत्तमतृचे पर्यासता—विधिरिति। परिहरति—**न तदानर्थक्यं पर्यासे सम्भवति सर्वस्य पर्यासस्यार्थवत्त्वात्।** विधेयपर्यासस्वरूपमेवेदमीदृशं येन पदार्थमात्रसम्बन्धितयापि विधाने सति आनर्थक्यं नास्ति। **क्रतुसम्बन्धिनी हि पर्याससंज्ञा।** क्रतोरेव ह्यन्तस्य पर्यासशब्दः संज्ञा, निधनादिशब्दवत् निरुपपदात् पर्यासशब्दात् क्रत्वन्तप्रतिपत्तेः। यत्तु भाष्यकारेण क्षेत्रपर्यास इत्युपन्यस्तं तत् सोपपदस्य गौणप्रयोगदर्शनेन क्रत्वन्तवचनत्वप्रतिपत्तय एवेति मन्तव्यम्। यत्र हि अक्रतुसंबन्धि विधेयमवघातादि तत्र माभूत् पदार्थमात्रधर्मता, आनर्थक्यप्रसङ्गात्। यत्र विधेयमेव क्रतुसंबन्धि न तत्रानर्थक्यशङ्केति। एवं तावत् अतद्विकारेष्वस्ति पूर्वपक्षशङ्केति दर्शितम्। संप्रति द्वादशाहविकार एवोदाहरणमिति मत्वा **तद्विकारेष्वपि निराकरणीय एवायमर्थ इत्युपन्यासः।** द्वादशाहविकारेषु चोदकप्राप्त्यापि शङ्कोपपद्यत इत्यर्थः।

(1) मा. श्रवणप्रामाण्यात्

अत्राभिधीयते–नायं पदार्थधर्मः । कस्तर्हि ? क्रतुधर्मः । कथं ? प्रकरणात् द्वादशाहनियोगैक्यमवगम्यते । न क्रत्वन्तरनियोगैक्यम् । ननु च पदार्थानुसारी नियोगः । पदार्थानुसारेऽप्यत्राविरोधात् । तस्मान्न क्रत्वन्तरसंबन्धकल्पनायां प्रमाणमस्ति । द्वादशाहविकारेष्वेवैतत् स्यात् । न वा तत्रापि । अथ वा वृषण्वतां धर्मः । ननु च पदार्थधर्मो न भवतीत्युक्तम्, सत्यमुक्तं,

---

अत्राभिधीयते—नायं पदार्थधर्मः । कस्तर्हि ? क्रतुधर्मः । कथं ? प्रकरणात् द्वादशाहनियोगैक्यमवगम्यते न क्रत्वन्तरनियोगैक्यम् । अवगम्यते । एतदुक्तं भवति—यद्यपि पदार्थमात्रधर्मतया विधानेऽपि विध्यानर्थक्यं नास्ति तथापि द्वादशाहप्रकरणाम्नानात् द्वादशाहनियोगेनैव सहान्विताभिधानात तत्संबन्ध एव पदार्थमात्रे विधानं न क्रत्वन्तरसम्बन्धे । ननु च पदार्थानुसारी नियोगः । अन्यथा द्वादशोपसत्त्वमपि ज्योतिष्टोमस्यैव स्यादिति पदार्थानुसारेण क्रतुमात्रसंबन्ध एव न्याय्य इति चोदयति । उत्तरं—पदार्थानुसारेऽप्यत्राविरोधात् । तत्र ह्यहीनपदं विरुध्यते । इह न कस्यचिद्विरोध इति प्रकरणात द्वादशाहसंबन्ध एव । तस्मान्न [1]क्रत्वन्तरसंबन्धकल्पनायां प्रमाणमस्ति । तदत्र विध्यानर्थक्येनापूर्वसंबन्धिषु विधानमित्येवंरूपं राद्धान्ताभासं निराकर्तुमिदमुक्तं नियोगैक्येनैव नैयोगिके रूपे विधानं नानर्थक्यपरिहारायेति । यदि परं द्वादशाहविकार एवैतत्स्यात् तत्र चोदकतः प्राप्तेः न च वा तत्रापि । अथ वा द्वादशाहविकारेष्वपि नायं धर्मः किं तर्हि वृषण्वतां धर्मः वृषण्वतां तृचानां मध्ये य उत्तमः तृचः तस्यायं पर्यासत्वं धर्मः । न च ते क्रत्वन्तरेषु सन्ति । तस्मात्तेष्वप्यागन्तवोऽन्त एव । उत्तमस्य हि पर्यासत्वविधानात प्राक्पर्यासादागन्तवः स्युः । तन्नास्तीत्युक्तम्—ननु च पदार्थधर्मो न भवतीत्युक्तम् । कथं वृषण्वतां धर्म इत्युच्यते ? सत्यमुक्तं पदार्थधर्मो न

---

(1) G. क्रत्वन्तरधात्वर्थ

न पुनः क्रत्वर्थापरित्यागेनेति। तस्मात्सूक्तं तद्विकारेष्वपि न भवतीति।

॥ ५ ॥ [1]अन्ते तूत्तरयोर्दध्यात् ॥ १३ ॥

कथमत्र पूर्वपक्षो युक्तः, वचनमदृष्ट्वेत्ययुक्तमिदम्। अधीतवेदस्य हि धर्मजिज्ञासा। अयं तर्हि पूर्वः पक्षः। इदमपि द्वादशाह एव वचनम् अत्र विशेषाग्रहणात् तद्विकारेषु भवतु अतद्विकारेषु माभूदिति पूर्वः पक्षः।

भवतीति, न पुनः क्रत्वर्थापरित्यागेनापि। क्रत्वर्थपरित्यागेन पदार्थधर्मो न भवतीत्युक्तम् न पुनः तदपरित्यागेनापि। तेन द्वादशाहिकवृषण्वत्तृचधर्मोऽयं नान्यदीयान्यतृचधर्मः। तस्मादुक्तं[2] तद्विकारेष्वपि न भवति।

अन्ते तूत्तरयोः। ननु कथमत्र पूर्वपक्षः? यावता वचनात् गायत्र्यादिष्वेवागन्तूनां निवेश इति युक्तम्। वचनमदृष्ट्वेत्ययुक्तमिदम्। अधीतवेदस्य हि धर्मजिज्ञासा। अयं तर्हि पूर्वः पक्षः। इदमपि द्वादशाह एव वचनम। न केवलं पूर्वाधिकरणे वृषण्वन्तस्तृचा भवन्ति तृच उत्तमः पर्यास इति द्वादशाहे वचनम्। अपि तु "त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् च अत्र ह्येवावपन्ति अत एवोद्वपन्ति" इतीदमपि द्वादशाह एव। तथापि किमित्याह— अत्र विशेषाग्रहणात् तद्विकारेषु भवतु अतद्विकारेषु मा भूत् इति पूर्वः पक्षः। पूर्वत्र वृषण्वतामयं धर्म इति विशेषग्रहणात् द्वादशाहविकारेषु च तेषामभावात् पर्यासता न भवति। इह तु विशेषग्रहणात् द्वादशाहविकारेषु गायत्र्यादिष्वेवावापः उद्वापश्च विधेयौ। ये क्रतवो न द्वादशाहविकारभूताः

---

(1) P. 1326 (2) छिवक्तं

अत्रोच्यते—आवापनिबन्धनमेतद्वचनं यावदावापं भवितुमर्हति। कथं तर्हि प्रकृतनियोगैक्यं? न, कार्याश्रितत्वादस्य विधेः वृषण्वत्सूपदेशाश्रय इत्युक्तम्।

॥ ६ ॥ [1]ग्रहेष्टकमौपानुवाक्यं सवनचितिशेषः स्यात् ॥ १५ ॥

अत्राप्यङ्गाङ्गिचिन्ता क्रमार्थैव। कथमत्र पूर्वपक्षः?

तेषु माभूदित्यतद्विकार एवालोदाहरणम्। **अत्रोच्यते—आवापनिबन्धनमेतद्वचनं यावदावापं भवितुमर्हति।** अत्र वचने गायत्र्यादयो यज्ञोदरत्वेन स्तूयन्ते तदुपपादनायेदमुच्यते—'अत्र ह्येवावपन्ति अत एवोद्वपन्ती'ति। न चान्यतः सिद्धौ आवापोद्वापौ गायत्र्यादिमात्रविषयौ स्तः इति। 'वचनानि त्वपूर्वत्वात्' इति वचनकल्पना। तच्च वचनं कल्प्यमानमावापमात्रनिबन्धनं यावदावापं भवितुमर्हतीति तावन्मात्रेणैव हेतुसमर्थने यज्ञोदरस्तुत्युपपत्तिः। न ह्यत्र द्वादशाहिकावेवावापोद्वापौ हेतुत्वेनोच्येते अपि तु सामान्यत एव। अतो वचनमपि कल्प्यमानं सामान्यत एव यावदावापविषयं, न पुनः द्वादशाहिकावापविषयम्। **कथं तर्हि प्रकृतनियोगैक्यं?** न, प्रकृतनियोगैक्यं, कार्याश्रितत्वादस्य विधेः, कार्यमावापविषयमाश्रित्य गायत्र्यादीनामयं विधिः। योऽसावावापः स गायत्र्यादिषु कर्तव्यः इति। तेनान्यतः सिद्धावापमाश्रित्य गुणविधिरयम्। तेन प्रकृतनियोगैक्यं नास्ति। न च द्वादशाहिकावापमात्रविषयमिदं वचनं अपि तु आवापमात्रविषयम्। अतः क्रत्वन्तरवर्तिनामपि गायत्र्यादीनामावापोद्वापगोचरत्वमिति न [2]प्रकृतनियोगैक्यम्। **वृषण्वत्तु उपदेशाश्रय इति** विशेषः। उपदिष्टानां वृषण्वतां तृचानामेवोत्तमस्य पर्यासता, नान्यस्य; तेन द्वादशाहनियोगैक्यं तासामिति सिद्धम्।

ग्रहेष्टकम्। नन्वसङ्गतेयं चिन्तेत्याशङ्क्याह—**अत्राप्यङ्गाङ्गिचिन्ता क्रमार्थैव।** सवनचितिशेषत्वे प्रतिचितीष्टकोपधानं प्रतिसवनं च ग्रहणमिति क्रमान्यत्वं भवतीति। **कथमत्र पूर्वः पक्षः** यावता यागाग्निसंबन्धित्वेनोपदेशात् ग्रहेष्टकस्य तच्छेषतैव युक्ता।

---

(1) P. 1325 (2) G. प्रकृति

अत्रोच्यते— कार्यानुप्रवेशित्वान्नियोगार्थस्य नियोगस्य। चितिसवननिष्पत्त्या चानुप्रवेशस्य। तस्माच्चितिसवनशेषोऽयमिति पूर्वः पक्षः।

अत्रोच्यते—उपदेशसिद्ध्यर्थं हि कार्यं न कार्यसिद्ध्यर्थ उपदेशः यागाग्निसंबन्धश्चायं उपदेशः। ननु च न्यायपौनरुक्त्यमिदं अरुणया क्रीणातीति दर्शितम्।

उत्तरं—**कार्यानुप्रवेशान्नियोगार्थस्य चितिसवननिष्पत्त्या चानुप्रवेशस्य।** अस्यार्थः—यावत्किञ्चिदङ्गं तत्सर्वं नियोगार्थं तस्य सर्वस्य कार्यानुप्रवेशात् स्वयं वा तत् कर्तव्यम् किञ्चिद्वा तेन कर्तव्यम्। न ह्यकार्यानुप्रवेशिना सिद्धरूपेण नियोगो निष्पद्यते संपाद्यविषयत्वान्नियोगस्य। तस्मान्नियोगार्थस्य कार्यानुप्रवेशात् पूर्वः पक्षः। नन्वेतावतापि पूर्वपक्षो न सिद्ध्यति यागाग्न्यनुप्रवेशितया नियोगार्थसिद्धेः अत्राह—**चितिसवननिष्पत्त्या चानुप्रवेशस्य** कार्यार्थत्वादिति पूर्वेण संबन्धः। योऽप्यसौ यागाग्न्यनुप्रवेशः सोऽपि चितिसवननिष्पत्त्यैव नान्यथा। तस्मात् यागाग्न्यनुप्रवेशस्यापि चितिसवननिष्पत्त्या कार्यानुप्रवेशात् चितिसवननिष्पत्तिरेवेष्टकोपधानस्य ग्रहणस्य च कार्यम्। यच्च यस्य कार्यं कर्तव्यं तत्तस्य कार्यमिति सवनचिति शेषत्वमेव प्रहेष्टकस्य। उपसंहरति—**तस्माच्चितिसवनशेषोऽयमिति पूर्वः पक्षः।** **अत्रोच्यते—उपदेशसिद्ध्यर्थं हि कार्यं न कार्यसिद्ध्यर्थ उपदेशः। यागाग्निसंबन्धश्चायमुपदेशः।** अस्यार्थः—सत्यं कार्यानुप्रवेशिता नियोगार्थस्य। सा तु उपदेशसिद्ध्यर्था कथं नामोपदिष्टस्य नियोगार्थता स्यादिति न पुनः कार्यमपेक्ष्योपदेशः। **यागाग्निसंबन्धश्चायमुपदेशः।** तस्मात्तत्सिद्धिरेव कार्यं न चितिसवननिष्पत्तिः। यच्च कार्यं तच्छेषतैव युक्तेति यागाग्निशेषतैव प्रहेष्टकस्य। **ननु च न्यायपौनरुक्त्यमिदं अरुणया क्रीणातीति।** अस्यार्थः—अरुणाधिकरणेप्येतदुक्तं उपदेशबलेन आरुण्यस्य क्रयनिष्पत्तिरेव कार्यं, यद्यपि च साक्षात् साधनता नास्ति इति, इहापि तदेवोच्यते यद्यपि साक्षाद्यागाग्निकार्यता नास्ति

तत्रासम्भवादपि भवन्तीति पूर्वपक्षवादी मन्यते। तन्निराकरणार्थमिदम्। प्रयोजनमुक्तम्।

॥ ७ ॥ [1]अन्ते स्युरव्यवायात ॥ १७ ॥

ननु वचने सति अत्र पूर्वपक्षो नोपपद्यते। न नोपपद्यते। सर्वा ब्राह्मणवत्य इत्यनुवादं मन्यते। एवं सति अन्या अन्या इति दर्शनमुपपन्नं भवति

तथाप्युपदेशबलेन तदेव कार्यमिति। **तत्रासंभवादपि भवन्तीति पूर्वपक्षवादी मन्यते। तन्निराकरणार्थमिदम्।** अस्यार्थः—अत्रत्यपूर्वपक्षवादी एवं मन्यते तत्रारुणाधिकरणे अन्येन प्रकारेण कार्यानुप्रवेशाभावात युक्ता उपदेशबलेनारुणिम्नः क्रयकार्यता[2]। इह तु चितिसवननिष्पत्त्यापि चितिकार्यानुप्रवेशितोपपद्यत इति इममेव तत्रत्यं राद्धान्ताभासं निराकर्तुमिदमधिकरणम्। तत्रापि नासम्भवात् क्रयकार्यता किन्तु उपदेशादेव। सम्भवेपि कार्यान्तरस्य उपदेशबलेनैव कार्याश्रयणात् उपदेश एव कार्याश्रयणे हेतुः न कार्यान्तरसंभव इति। **प्रयोजनमुक्तम्।**

अन्ते स्युरव्यवायात्। ननु "यां वै कांचित् ब्राह्मणवतीमिष्टकामभिजानीयात् तां मध्यमायां चितावुपदध्यात्" इति **वचने सति पूर्वपक्ष एवात्र नोपपद्यते।** उत्तरं—**न नोपपद्यते। सर्वा ब्राह्मणवत्य इत्यनुवादं मन्यते।** सर्वा एवेष्टका ब्राह्मणवत्यः सर्वासामेव ब्राह्मणोक्तेनाधिकारविधिना गृहीतत्वात्। विनियुक्तत्वाच्चाधिकारविधिरेवाङ्गानां विनियोजकः सहकार[रि]मात्राणि श्रुत्यादीनि। ततश्च यद्ययं विधिराश्रीयते तदा सर्वासामेव मध्यमायां चितावुपधानात् चित्यन्तराभावप्रसङ्गेन मध्यमत्वानुपपत्तेः वचनमिदं निर्विषयमापद्यते। अतोऽनुवादोऽयं मध्यमायां चितावुपधेयत्वेन याः प्राप्ताः तासामुपधानमनूद्यते। न च प्रमाणान्तरमस्ति, औपानुवाक्यानामिष्टकानां मध्यमायां चितावुपधानमित्यनुपपन्नः पूर्वः पक्षः। **एवं सति अन्या अन्या इति दर्शनमुपपन्नं भवति**—'आवपनं वा उत्तमा चितिः यदन्या अन्या इष्टका उपदधाति'

---

(1) P. 1326 (2) R. क्रियाकार्यता

इति। एवं प्राप्ते अभिधीयते। ब्राह्मणवत्यः श्रुतिविनियुक्ताः परिगृह्यन्ते। किमिति—मन्त्राविनियोज्यत्वाच्छेषाणाम्। समाख्या पुनर्लौकिक्येवेत्युक्तम्। तस्मान्मध्यमायां चितावुपधातव्य इति। ननु च मन्त्रेणापि विनियुज्यमानाः ब्राह्मणेनैव विनियुक्ता न स्वतन्त्रलिङ्गप्रमाणमित्युक्तम्। विशेषाभिप्रायेणेदमुक्तम्. वचनस्यार्थवत्त्वायेत्यदोषः। दर्शने तु मन्त्राभिप्रायेणान्यत्वं वर्णनीयम्।

॥ ८ ॥ [1]प्राग्लोकं पृणायास्तस्यास्सम्पूरणार्थत्वात् ॥ २० ॥

ननु चान्ते बादरायण इति नोपपद्यते, लोकंपृणापि ब्राह्मणवत्येव।

इति। एवं प्राप्ते अभिधीयते। ब्राह्मणवत्यः श्रुतिविनियुक्ताः परिगृह्यन्ते। किमिति। मन्त्रविनियोज्यत्वाच्छेषाणाम्। समाख्या पुनः लौकिक्येवेत्युक्तम्। अस्यार्थः —यदि ग्राहकाभिप्रायेण ब्राह्मणवतीत्युच्यते तदा अवैशेषिकत्वात् वचनमिदमनर्थकं स्यात् अथ विनियोगकारणाभिप्रायेण तदा वैशेषिकत्वाद्वचनस्यार्थवत्ता। न चार्थवत्त्वे संभवत्यानर्थक्यमुचितम्। कथं पुनर्वैशेषिकत्वमिति ? अत्रेदमुत्तरं—मन्त्रविनियोज्यत्वाच्छेषाणां समाख्याविनियोज्यत्वाच्च समाख्यायाश्च लौकिकत्वेन ब्राह्मणत्वाभावात्। तस्मान्मध्यमायां चितावुपधेया इति। ननु मन्त्रेण इत्यादि निगदव्याख्यातम्—विशेषाभिप्रायेणेदमुक्तं वचनार्थवत्त्वायेत्यदोषः। विनियोगविशेषप्रमाणानि श्रुत्यादीनि तदभिप्रायेण ब्राह्मणवती ग्राह्येत्यर्थः। दर्शने तु मन्त्राभिप्रायेणान्यत्वं वर्णनीयम्। अन्यमन्त्रकत्वेनान्यत्वं व्याख्येयं प्राप्तिपूर्वकत्वाद्दर्शनस्य।

प्राग्लोकं पृणायाः। अत्रेदृशो विषयः अग्निप्रकरणे चितिप्रकरणे चितिविशेषमनारभ्यैव सामान्येन 'लोकं पृण छिद्रं पृण' इति पठितमिति। पूर्वपक्षमाक्षिपति—ननु चान्ते बादरायण इति नोपपद्यते लोकंपृणापि ब्राह्मणवत्येव। अस्यार्थः—'यां वै काञ्चित्'

(1) P. 1326

ननु च मन्त्रविधानार्थं तद्वचनम्। ननु च सर्वा एव मन्त्रद्वारेण चोद्यन्ते। सत्यं; तथापीष्टकाभिधानप्रधानोऽयं निर्देशः 'चित्रिणीरुपदधाति' इत्येवमादिषु। इह पुनः 'लोकं पृण छिद्रं पृण' इति मन्त्रप्रधानोऽयं निर्देश इति लैङ्गिक्येवेयम्। अन्ते तु बादरायण इति युक्तम्। राद्धान्तस्तु मन्त्रार्थवादान्यथानुपपत्तेः लैङ्गिका अपि प्रागेव ब्राह्मणवत्य इति युक्तम्।

इत्यनेनौपानुवाक्यकाण्डपठितानां लोकं पृणायाश्च मध्यमायां चितौ उपधानम्[1]। लोकंपृणा हि, सामान्येन विहिता मध्यमायामेव चितावुपधातव्येति विधानमवकल्प्यते। ततश्चैकेनैव वचनेन प्राप्नुवन्तीनामिष्टकानां इदं न युज्यते वक्तुं—अन्ते तु बादरायण इति। समाधत्ते— **ननु च मन्त्रविधानार्थं तद्वचनं,** तेन लोकं पृणा न ब्राह्मणवती। पुनराक्षेप्ताऽऽह—**ननु च सर्वा एव मन्त्रद्वारेण चोद्यन्ते।** या अपि ब्राह्मणवत्त्वेन सम्मताः ता अपि मन्त्रद्वारेण चोद्यन्ते, तेन लोकं पृणापि मन्त्रद्वारेण चोदिता ब्राह्मणवत्येव। समाधाता आह—**सत्यं तथापि इष्टकाभिधानप्रधानोऽयं निर्देशः 'चित्रिणीरुपदधाति' इत्येवमादिषु।** तेनेष्टका एता ब्राह्मणवत्यः। **इह पुनः 'लोकं पृण छिद्रं पृण' इति मन्त्रप्रधानोऽयं निर्देशः इति लैङ्गिक्येवेयम्।** मन्त्रो हि प्रकरणे पठितः कश्चिदर्थं प्रकाशयन्नङ्गम्। [2]शक्नोति चायं चायं मन्त्रः इष्टकामभिधातुमिति मन्त्रविनियोगबलेन इष्टकाया अपि विनियोगः। इह लैङ्गिक्येवेयम्। प्रकरणाधीतमन्त्रविनियोज्यतया चेयं प्रथमप्रविष्टा। औपानुवाक्यकाण्डसमाम्नातास्तु ब्राह्मणवतीत्वेनानुप्रविशन्ति इत्यागन्तवः। **अतोऽन्ते तु बादरायण इति युक्तम्।** ननु लोकं पृणाया लैङ्गिक्या अपि संपूरणार्थतयाव[1]गमादन्ते निवेशोयुक्तः ब्राह्मणवतीनां तु प्राग्लोकं पृणाया इति युक्तम्। उच्यते—न तस्याः पूरणार्थत्वे प्रमाणमस्ति। योऽप्यर्थवादः सोऽपि मन्त्रमेव संपूरणार्थतया स्तौति नेष्टकामिति। **राद्धान्तस्तु मन्त्रार्थवादान्यथानुपपत्तेः लैङ्गिका अपि प्रागेव ब्राह्मणवत्य इति युक्तम्।** अस्यार्थः—मन्त्रस्यापि योऽयं संपूरणार्थवादः स इष्टकाया—

(1) G. विधानं (2) G. adds न

॥ ९ ॥ संस्कृते कर्म संस्काराणां तदर्थत्वात् ॥ २१ ॥

आहिताग्नेरधिकारश्रवणात् आधानेन चाग्नीनामुत्पत्तेः भवत्यनन्तरमधिकार इति पूर्वः पक्षः। आधानानन्तरक्रमसिद्धिश्चानेन प्रकारेणोक्ता। यथा 'आहिताग्निर्न क्लिन्नं दार्वभ्यादध्यात्' इत्येवमादीनाम्। एवं प्राप्तेऽभिधीयते—उभयमप्यग्न्यर्थमित्युक्तम् आहवनीयादिमुखेनाहिताग्नेरधिकारः। न चेष्टिभिर्विनाऽऽहवनीयो भवति इति न कर्मस्वधिकारः। दर्शनं पुनः अग्न्यर्थस्यैव होमस्य।

स्तत्प्रकाश्याया: संपूरणार्थत्वेनोपपद्यते नान्यथा। तस्मादिष्टकापि सम्पूरणार्थैव। अतोऽन्त एव लोकंपृणा युक्तेति। तस्मात् प्रागेव ब्राह्मणवत्य इति युक्तम्।

संस्कृते कर्म। **आहिताग्नेरधिकारश्रवणात् आधानेन चाग्नीनामुत्पत्तेः भवत्यनन्तरमधिकार इति पूर्वः पक्षः।** आहिताग्निरधिकारीति मीमांसकप्रसिद्ध्याश्रयणात्। न चेयं निर्मूला प्रसिद्धिः आधानेनाग्नीनामुत्पत्तेः 'अग्नीनादधीत' इति निरपेक्षाधानश्रवणात् आधानमात्र एव कृतेऽग्निमत्त्वात् क्रतुष्वधिकारो युक्तः। नन्वधिकार एवैवं चिन्तितम् स चासङ्गत इत्यत्राह—**आधानानन्तरक्रमसिद्धिश्चानेन प्रकारेणोक्ता यथा 'आहिताग्निर्न क्लिन्नं दार्वभ्यादध्यात्' इत्येवमादीनां** व्रतानामाधानानन्तरं क्रमसिद्धिः। **एवं प्राप्तेऽभिधीयते। उभयमग्न्यर्थमित्युक्तं** तृतीये। तेन न केवलेनाधानेनाग्नीनामुत्पत्तिः। यश्चाहिताग्नेरधिकारो मीमांसकैरुच्यते असावाहवनीयादिमुखेनाहिताग्निः आहवनीयादिमान् भवति तेनासावेव त्रेतावन्ति कर्माणि शक्नोति कर्तुमित्यधिकारः। **—न चेष्टिभिर्विनाऽऽहवनीयादयो भवन्ति इति न कर्मस्वधिकारो**ऽकृतपवमानेष्टेः पुरुषस्य। **दर्शनं पुनः अग्न्यर्थस्यैव होमस्य।** अग्निं वै सृष्टं' इति यदिदं होमदर्शनं न तन्मुख्याग्निहोत्रविषयं दर्शनम्। उक्तेन न्यायेन तस्याभावात्। किन्तु अन्यस्यैवाग्निसंस्कारार्थस्यैतद्दर्शनम्। तत्रैव प्रशंसनार्थमग्निहोत्रपदं प्रयुक्तम्। 'व्रतानां तु प्रकृत्यर्थ एव भूत—

॥ १० ॥ [1]सञ्चिते त्वग्निचिद्युक्तं प्रापणान्निमित्तस्य ॥ २६ ॥

इहापि चयनानन्तरं व्रतप्राप्तिं मन्यते पूर्वपक्षवादी। अत्रोच्यते—नेदमाहिताग्निना तुल्यम्। तत्र हि अग्न्यर्थमाधानम् इह पुनः अग्निकार्यार्थं चयनं, प्रोक्षणमिव व्रीहिकार्यार्थम्। कार्यं च कृत्स्नक्रतुप्रयोगसाध्यमिति क्रतुसमाप्तावेवाग्निचिदिति। न चाग्निचयननिमित्ता ह्येते नियमाः क्रतोरवगम्यन्ते भेदनहोमवत्

तया निमित्तं नाग्नयो निष्पन्नाः निष्पन्नश्च प्रकृत्यर्थो विनापि पवमानेष्टिभिरिति युक्तं नैमित्तिकम्।

सञ्चिते तु। इहाप्याहिताग्निर्न क्लिन्नं दार्वभ्यादध्यात् इत्येवमादिवत् **चयनानन्तरं व्रतप्राप्तिं मन्यते पूर्वपक्षवादी**। यथाहिताग्निव्रतानामाधानानन्तरमेव प्राप्तिः तथा अग्निचिद्व्रतानामपि चयनानन्तरमेव प्राप्तिरिति पूर्वपक्षवादी मन्यते। कुतः ? प्रकृत्यर्थस्य निमित्तत्वात् भूततयैव। भूते चायं क्विप् अग्निचिदिति। **अत्रोच्यते—नेदमाहिताग्निना तुल्यम्। तत्र हि अग्न्यर्थमाधानं** न पुनः अग्निकार्यक्रत्वर्थं क्रतुषु विनियोगाभावात्। **इह पुनः** प्रकरणाम्नानात् **अग्निकार्यार्थं चयनं प्रोक्षणमिव व्रीहिकार्यार्थम्। कार्यं चेह कृत्स्नक्रतुप्रयोगसाध्यमिति क्रतुसमाप्तावेवाग्निचिदिति।** अतः क्रत्वन्तेऽग्निचिन्नियमः। ननु चाधानमपि अग्न्यर्थमेव आधानपवमानेष्टिसाध्याश्चाग्नय इतीष्ट्यन्त एवाहिताग्निः स्यात्। अतो व्रतैरपीष्ट्यन्त एव भवितव्यमिति। अत्रोच्यते—आधाने कृते अग्निगतमुत्पन्नमेवाधानकार्यमदृष्टसंस्कारः। यदि परं पवमानेष्टीनामकृतत्वात् तत्कृतसंस्काराभावादाहवनीयशब्दो न प्रयुज्यते उभयकृताग्निसंस्कारनिबन्धनत्वादाहवनीयशब्दस्य उभयानुष्ठाने सति प्रयोगात्। तेन आधानानन्तरं भवत्याहिताग्निः न पुनः आहवनीयादिमान् इति। **न चाग्निचयननिमित्ता एते नियमाः क्रतोरवगम्यन्ते भेदनादिहोमादिवत्।** यदि हि क्रत्वङ्गमेते

---

(1) P. 1328

कृतप्रयोगस्याग्निचिदभिधानात्। तस्मात्क्रत्वन्ते नियमा इति सिद्धम्।

॥ ११ ॥ [1]परेणावेदनाद्दीक्षितः स्यात सर्वैर्दीक्षाभिसम्बन्धात ॥२९॥

अत्रापि दीक्षितपदार्थक्रमसिद्ध्यर्थमिदं चिन्त्यते। कियद्भिर्दीक्षितो भवति इति। यावता दीक्षाभिसम्बन्धः तावाद्भिर्दीक्षितो भवतीति पूर्वपक्षवादी मन्यते। सर्वेषामुत्पत्त्यर्थत्वात् यथाऽऽधानेन पवमानेष्टिभिश्चाग्नयः। अन्यथा हि विकल्पः स्यात् प्रत्येकं दीक्षाभिनिर्वृत्तेः। अत एवाभिधानमप्युत्तरकाल-मेव। अत्रोच्यते—दीक्षिष्यमाण इत्यधिकारिपदमिदम्।

नियमाः स्युः तदा अङ्गैर्विना कार्यासिद्धेः न क्रत्वनन्तरभावित्वं स्यात्। किन्तु प्रकृत्यर्थं एव निमित्तमेषां स्यात। न च तदस्ति, कृतप्रयोगस्यैवाग्निचिदभिधानात्। तस्मात् क्रत्वन्ते नियमा इति सिद्धम्।

परेणावेदनात्। नन्वसङ्गतेयं चिन्तेत्यत आह— अत्रापि [2]दीक्षितपदार्थक्रम-सिद्ध्यर्थमिदं चिन्त्यते कियद्भिर्दीक्षितो भवतीति। यावता दीक्षाभिसंबन्धः ताव-द्भिर्दीक्षितो भवतीति पूर्वपक्षवादी मन्यते सर्वेषामुत्पत्त्यर्थत्वात् यथाऽऽधानेन पवमानेष्टि-भिश्चाग्नयः। अस्यार्थः—दण्डेन दीक्षयतीत्येवमादीनामपि दीक्षासंबन्धो विद्यते अलौकिकश्च दीक्षापदार्थः साधनीयः[3]। तेन सह यः संबन्धः स उत्पादकतयैवेति संबन्धबलेनोत्पादकत्वे कल्प्यमाने कल्पनालाघवान्निमित्तानामेवोत्पादकत्वं कल्पनीयमिति। अन्यथा हि विकल्पः स्यात् प्रत्येकं दीक्षार्थनिर्वृत्तेः। यदि दीक्षणीययैव दीक्षितो भवति तदा दण्डादीनामपि दीक्षासंबन्धाविशेषात केवलानामेवोत्पादकत्वे विकल्पः स्यात्। स चायुक्तः। अत एवाभिधानमप्युत्तरकालमेव। अत्रोच्यते—दीक्षिष्यमाण इत्यधिकारिपदमिदम्।

(1) P. 1329 (2) G. यदि पदार्थनिमित्तपदार्थक्रम (3) G. उपादेयः

न चाधिकारानिष्पत्तेर्विषयसिद्धिरिति षष्ठे वक्ष्यामः। तस्मादिष्टेरेव दीक्षितत्वसिद्धिः। समुच्चयश्चैवमुपपन्नो भवति। उत्पत्तिसंस्कारभेदात्। सर्वेषामुत्पत्त्यर्थत्वात अनपेक्षश्रवणाच्च। कथं तर्हि आधानपवमानेष्टीनां समुच्चयः? प्रयोजनान्तराभावात् न तत्र तयोर्ग्राहकं किञ्चिदस्ति। इह पुनर्ज्योतिष्टोमविधेः विकल्पः तुल्यार्थानाम्। तस्मादस्मत्पक्ष एव समुच्चयसिद्धिः। न चाभिधानाभावादर्थाभावः शक्यते वक्तुमिति दर्शितम्।

"आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणः" इत्यधिकारिविशेषणम्। न चाधिकारा[1]निष्पत्तेर्विषयसिद्धिरिति षष्ठे वक्ष्यामः[2] तस्मात् दीक्षणीया तावद्दीक्षोत्पादिके ति सिद्धम्। दण्डादीनां च दीक्षासंबन्धमात्रं प्रतीयते। तच्च संस्कारकत्वेनापि सम्भवतीति। इष्टेस्तु साक्षादुत्पादकत्वमेव। तस्मादिष्टेरेव दीक्षितत्वसिद्धिः समुच्चयश्चैवमेवोपपन्नो भवति उत्पत्तिसंस्कारभेदात्। इष्टिरुत्पादिका दण्डादयस्तूत्पन्नसंस्कारका इति भिन्नकार्यतया समुच्चयो युक्तः। अन्यथा हि विकल्पः स्यात् सर्वेषामुत्पत्त्यर्थत्वात् अनपेक्षश्रवणाच्च। कथं तर्हि आधानपवमानेष्टीनां समुच्चयः आधानस्य पवमानेष्टीनां चोत्पत्त्यर्थत्वात अनपेक्षश्रवणाच्च। उत्तरं—प्रयोजनान्तराभावात् न तत्र तयोर्ग्राहकं किञ्चिदस्ति। इह पुनः ज्योतिष्टोमविधेः विकल्पस्तुल्यार्थानाम्। अस्यार्थः—यद्याधानपवमानेष्टीनामग्निसंस्कारभूतानामेको विधिः ग्राहकः स्यात् तदा तस्य सकृत्प्रयुक्तेः एकमेवानुष्ठानमिति तुल्यकार्यत्वात् एकमेवोपादापयेत्। ततश्च विकल्पः स्यात्। न चैतदस्ति। कामश्रुतयस्त्वाहवनीयादिभिस्साध्या आहवनीयमेव प्रयुञ्जते उभयसंस्कारनिबन्धनं चाहवनीयत्वमिति तत्प्रयुक्तानां युक्तस्समुच्चयः। दण्डादीनां तु ज्योतिष्टोमविधिर्ग्राहकोऽस्तीति एककार्याणां विकल्पः स्यात्। तस्मादस्मत्पक्ष एव समुच्चयसिद्धिः स्यात्। न चाभिधानाभावादर्थाभावश्शक्यते वक्तुमिति दर्शितम्।

---

(1) G. अधिकारसिद्धे (2) G. adds विषयः सिद्धविषयप्रतिपत्तिरधिकारिविशेषणान्निष्पत्तेरिति षष्ठे वक्ष्यामः।

॥ १२ ॥ [1]अङ्गवत्क्रतूनामानुपूर्व्यम् ॥ ३२ ॥

ननु चावश्यंभाविनि क्रमे पाठान्नियम उक्तः। क्रत्वन्तरवदिति च व्यतिरेको वर्णितः भिन्नप्रयोगवचनत्वान्नैषां क्रम उपपद्यत इति। कथमत्र पूर्वपक्षः? उच्यते—अनेकानुष्ठाननिबन्धनोऽयं क्रमः। अनेकं च काम्यं कुर्वतः कामिनः युक्तः क्रमनियम इति पूर्वपक्षवादी मन्यते। कथं तर्हि सर्वस्वारे पाठक्रमः? अर्थाद्बाधो भविष्यतीत्यदोषः। अत्राभिधीयते—विधिवितानचिन्तेयम् न पुरुषेच्छावितानचिन्ता, अचोदनालक्षणत्वात्तस्य

अङ्गवत्क्रतूनाम्। **ननु चावश्यंभाविनि क्रमे पाठान्नियम उक्तः।** अस्यार्थः—यत्रानेकेषां पदार्थानां एकेन कर्त्राऽनुष्ठानं कर्तव्यं तत्रावश्यंभाविनि क्रमे पाठात् क्रमनियम उक्तः। एकाधिकारविधिप्रयुक्तानां च एकेन कर्त्राऽनुष्ठानं प्रयुज्यते न नानाधिकारप्रयुक्तानां; अतस्तत्र कथं पाठात् क्रमनियम आशङ्क्यते। किञ्च **क्रत्वन्तरवदिति** पूर्वपक्षे प्रवृत्त्यधिकरणे यदुपन्यस्तं तत्रापि **व्यतिरेको वर्णितः** वैषम्यमुक्तम्। **भिन्नप्रयोगवचनत्वान्नैषां क्रम उपपद्यत इति।** अतस्तेनैव वैषम्योद्भावनेन क्रत्वन्तराणां पारम्पर्यक्रमनियमो नास्तीति दर्शित एव राद्धान्तः। अतः **कथमत्र पूर्वः पक्षः? उच्यते—अनेकानुष्ठाननिबन्धनोऽयं क्रमः।** **अनेकानि काम्यानि कर्माणि कुर्वतः युक्त एव कामिनः क्रमनियम इति पूर्वपक्षवादी मन्यते।** एकाधिकारप्रयुक्ता वा भवन्तु अनेकाधिकारप्रयुक्ता वा पदार्थाः सर्वथा यत्रानेकेषां पदार्थानामेकेनानुष्ठानं तत्र क्रमः। अनेकानि काम्यानि कर्माण्येकेन कामिना कर्तव्यानीति क्रमे सति पाठादवगतः क्रमनियम आदरिष्यते। **कथं तर्हि सर्वस्वारे पाठक्रमः?** उत्तरं—**अर्थाद्बाधो भविष्यति।** दिष्टां गतिं गतवति यजमाने परतोऽनुष्ठानाभावात् अर्थाख्येन प्रमाणेन बाधो भविष्यतीति **न दोषः। अत्राभिधीयते—विधिवितानचिन्तेयं न पुरुषेच्छावितानचिन्ता।** विधीयन्त इति विधेयाः पदार्था उच्यन्ते। तेषां वितानः अत्राध्याये चिन्त्यते। न पुरुषेच्छावितानचिन्ता। कुतः? **अचोदनालक्षणत्वात्तस्य**

(1) P. 1331

एकस्य चाधिकारविधेरङ्गविधिवितानसंबन्धो नाधिकारमपेक्षते संबन्धाभावात्। असंबन्धस्य च शाब्दतैव न शक्यते वक्तुम्। न च सर्वकामस्याधिकारः योगसिद्ध्यधिकरणे प्रत्युक्तत्वात्। अर्थस्य सम्बन्धविषयत्वात। तस्मात काम्येष्वनियमः।

इच्छावितानस्य। यदि पुरुषेच्छायाः क्रमनियमो भवेत् तदा काम्यानां कर्मणां क्रमनियमो भवेत, अधिकारिविशेषणक्रमेणाधिकारस्यापि क्रमवत्त्वात्। न पुनः इच्छाया अनियमे यथेच्छोत्पादं अनियमेनाधिकारोत्पत्तेः। न चात्र पुरुषेच्छावितानश्चिन्त्यते। तस्याचोदनालक्षणतया चोदनालक्षणवेदार्थविचारेऽसङ्गतत्वात। इच्छाश्रितत्वाच्च तस्य इच्छावदचोदनालक्षणत्वम्। एवं तावत् अचिन्तनीयतोक्त्या पुरुषेच्छावितानस्य तन्निबन्धनः काम्यानां क्रमनियमो नास्तीत्युक्तम्। संप्रति साक्षात कर्मणामेव क्रमो न शाब्द इति दर्शयति —**एकस्य चाधिकारविधेः अङ्गविधिवितानसंबन्धो नाधिकारान्तरमपेक्षते**। एकाधिकारविधिप्रयुक्तानामङ्गप्रधानानां युगपत [1]प्रसक्तानुष्ठानानां पुरुषाशक्त्या वितानसम्बन्धो भवति न पुनरधिकारान्तरमपेक्षते। तेन भिन्नाधिकारप्रयुक्तानां क्रमावतारो नास्तीत्यर्थः। कुतः? **असंबन्धात्** परस्परमधिकाराणां संबन्धाभावात। इदमत्राकूतम्—एकाधिकारानुप्रविष्टानां एकदेशस्थानामिव पङ्क्तिरूपा विततिः नान्यथेत्यर्थः। **असंबन्धस्य** च विधेयासंबन्धस्य च वितानस्य **शाब्दतैव न शक्यते वक्तुम्**। तस्मात अशाब्दोऽयं परस्परक्रमः काम्यानाम्। न च शाब्दस्यानुष्ठातारोऽशाब्दमाद्रियन्ते। यदि तावदेकस्मिन् काले बहवः कामा निपतेयुः तदा युगपदधिकारे सति बहुषु कर्मसु क्रमापेक्षा स्यात्। न चैतदस्ति। कामानाया युगपदुत्पादाभावात्। तदाह— **न च सर्वकामस्याधिकारः**। कुतः? **योगसिद्ध्यधिकरणे प्रत्युक्तत्वात्**। अतः कामतोऽपि कामयौगपद्यादपि न विधेयेषु कर्मसु क्रमसंबन्धः। पाठमात्रे वा आद्रियमाणे सर्वस्वारे पाठक्रमः केन वार्यते। अर्थेनेति चेत् तत्राह—**अर्थस्य संबन्धविषयत्वात्**। अर्थाख्यं प्रमाणं विधेयसंबन्धचोदनालक्षणक्रम[2]विषयत्वात नाचोदनालक्षणे प्रमाणं भवतीति कुतो बाधकम्। **तस्मात् काम्येष्वनियमः**।

---

(1) G. प्रयुक्त (2) G. विषयत्वं

॥ १३ ॥ य एतेनेत्यग्निष्टोमः प्रकरणात् ॥ ३७ ॥

उपरितनस्याधिकरणस्य विषयप्रदर्शनार्थमिदमाधिकरणम्। अग्निष्टोमप्रदर्शनादित्युक्तम्।

॥ १४ ॥ [1]अथान्येनेति संस्थानां सन्निधानात् ॥ ३९ ॥

य एतेनेत्यग्निष्टोमसंस्थस्यावमर्शात् अन्येनेति संस्थान्तरावमर्शं मन्यते पूर्वपक्षवादी। राद्धान्तवादी तु एष वाव प्रथमो यज्ञो यज्ञानामिति यज्ञशब्दश्रुतेः यज्ञान्तरमेवान्यशब्देन

य एतेनेत्यग्निष्टोमः। ननु असङ्गतेयं चिन्तेत्याशङ्क्याह—उपरितनस्याधिकरणस्य विषयप्रदर्शनार्थमिदमधिकरणम्। उपरितनं ह्यधिकरणं क्रमचिन्तार्थं तस्य विषयप्रसिद्ध्यर्थमित्यौपोद्घातिकतया सङ्गतिरित्यर्थः। ज्ञाते हि एतेनेत्यस्यार्थे तदपेक्षोऽन्येनेत्यन्यशब्दार्थो निरूपयितुं शक्यः। "एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः य एतेनानिष्ट्वा अथान्येन यजते" इत्युक्ते ज्योतिष्टोम एव प्रतीयते सर्वसंस्थश्च ज्योतिष्टोमः। अतः सर्वासामेव संस्थानां [2]वाद इति पूर्वः पक्षः। नित्यत्वादग्निष्टोमसंस्थस्य प्रकरणमिति राद्धान्तः। अत्र हि अग्निष्टोमो ज्योतिष्टोमप्रकरणे समाम्नानात् अस्य वाक्यस्य ज्योतिष्टोमस्यैवानेन यज्ञान्तरापेक्षया पूर्वकालतोच्यते अग्निष्टोमसंस्था च नित्या। तेन तत्संस्थस्यैव प्रकरणम् विकृतिभूतानि संस्थान्तराणीत्युक्तं तृतीये। अन्यथा नित्यानित्यसंयोगविरोधप्रसङ्गात्। तेन तत्संस्थस्यैवायं वाद इति।

अथान्येनेति। एतेनेत्यग्निष्टोमसंस्थस्यावमर्शात् अन्येनेति संस्थान्तरावमर्शी पूर्वपक्षवादी मन्यते। समानजातीयापेक्षोऽयमन्यशब्दः। यथा एकपुरुष आगतः अन्यो नेत्युक्ते पुरुषान्तरमेव प्रतीयते तथेहापि संस्थापेक्षयाऽन्यत्वे संस्थान्तरमेव प्रतीयत इति—राद्धान्ती तु एष वाव प्रथमो यज्ञो यज्ञानां इति यज्ञश्रुतेः यज्ञान्तरमेवान्यशब्देन

(1) P. 1333 (2) G. अनुवादः

प्रतीयत इत्युक्तवान्। अग्निष्टोमसंस्थस्य नित्यत्वात् य एतेने-त्युच्यते। तथा चापत्तिविहारावुपपन्नौ भवतः। आपत्त्याक्षेप-समाधानं च दर्शितम्।

॥ १५ ॥ [1]एकस्तोमे वा क्रतुसंयोगात् ॥ ४३ ॥

एकस्तोमानां वाक्यशेषादन्येनेति ग्रहणम्। न चान्येनेत्य-न्यत्वमात्रावगतेः। ननु च वाक्यशेषाद्विशेषावगतिरित्युक्तम्।

प्रतीयत इत्युक्तवान् यज्ञसङ्कीर्तनेन यज्ञान्तरमेवान्यशब्देनोच्यते। यद्येवमेतच्छब्दे-नापि तर्हि ज्योतिष्टोम एवोच्यतां सर्वसंस्थश्चासाविति सर्वसंस्थस्यैव पूर्वत्वमपि स्यात इत्यत्राह—अग्निष्टोमसंस्थस्य नित्यत्वात् य एतेनेत्युच्यते नित्यानित्यसंयोगविरोधेन नित्यसंस्थस्य प्रकरणमिति पूर्वत्वविधौ नित्यत्वादग्निष्टोमसंस्थ एवोच्यते। तथा चापत्तिविहारावुपपन्नौ भवतः। भेदे सत्यापत्तिविहारौ नान्यथा। ज्योतिष्टोमापेक्षया तावुच्येते न नित्यसंस्था-पेक्षया विहारवाक्ये 'यज्ञात्' इति श्रवणात सर्वे च ज्योतिष्टोमा यज्ञ इति। अतोऽर्थवादव-शेनापत्तिविहारविषयो यज्ञान्तरमेव अन्यशब्देनोच्यते। आपत्त्याक्षेपपरिहारौ भाष्य एवोक्तौ।

एकस्तोमे वा। एकस्तोमानां वाक्यशेषादन्येनेति ग्रहणम्। वाक्यशेषे एक-स्तोमाः क्रतवः कीर्त्यन्त इति त एवान्यशब्देनापि ग्राह्याः नचान्येनेत्यन्यत्वमात्रावगतेः नचैकस्तोमा ग्राह्याः अन्यशब्दादन्यमात्रप्रतीतेः। ननु च वाक्यशेषाद्विशेषावगतिरि-त्युक्तम्। अन्यथा हि अर्थवादपदानां अतिपरोक्षा वृत्तिः स्यादित्यर्थः। उत्तरं

(1) P. 1334

सन्दिग्धेषु वाक्यशेषान्निर्णय इत्युक्तम्। इह तु असन्दिग्धैव ज्योतिष्टोमादन्येष्ववगतिरिति अर्थवादमात्रमेतत।

इति बृहत्यां पञ्चमाध्यायस्य
तृतीयः पादः

—सन्दिग्धेषु वाक्यशेषान्निर्णय उक्तः। इह तु असन्दिग्धैव ज्योतिष्टोमादन्येष्ववगतिरिति अर्थवादमात्रमेतत्। न ह्यन्यमात्रे अर्थवादपदानां अतिपरोक्षा वृत्तिः अन्यमात्रग्रहणेऽपि एकस्तोमसङ्कीर्तनमुपपद्यते। संस्थान्तरपरिग्रहणे ज्योतिष्टोमापेक्षया आपत्तिविहारावनुपपन्नावेवेति युक्तमापत्तिविहारविषयकत्वन्तरग्रहणम्।

इति ऋजुविमलापञ्चिकायां पञ्चमस्याध्यायस्य
तृतीयः पादः

बृहत्यां

पञ्चमाध्यायस्य चतुर्थः पादः ॥

॥ १ ॥ [1]क्रमकोपोऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च ॥ १ ॥

अत्र बलाबलचिन्ता। पूर्वपक्षवादिनोऽभिप्रायः अविधेयत्वात्क्रमस्य अवगतेश्च तुल्यत्वाद्विकल्प इति। राद्धान्तस्तु विधेयविरोधादवगतेरेवातुल्यत्वमिति श्रुत्यर्थयोरेव तु बलवत्त्वम्। अत्र श्रुत्यर्थयोर्विरोधे कथं? नैवोदाहरणमस्ति। अर्थ एव

ऋजुविमलापञ्चिकायां

चतुर्थः पादः

क्रमकोपः। 'अत्र बलाबलचिन्ता' इत्यनेन अर्थाच्च इत्यधिकरणे बलाबलचिन्ता न कृतेति दर्शयति। पूर्वपक्षवादिनोऽभिप्रायः अविधेयत्वात् क्रमस्य अवगतेश्च तुल्यत्वाद्विकल्पः इति। राद्धान्तस्तु विधेयविरोधादवगतेरेवातुल्यत्वमिति श्रुत्यर्थयोर्बलवत्त्वमुक्तम्। आश्विनो दशमो गृह्यते तं तृतीयं जुहोति [इति]ग्रहणे दशमता आश्विनस्य दशमप्रातिपदिकाभिहिता वाक्येन विनियुक्ता अङ्गभूता नियोगसिद्ध्यर्थमुपादेयेति विधेया। तस्यां चाश्रीयमाणायां [2]पौर्वापर्यबलेन विशेषे सति यादृशी विततिरवगम्यते सा श्रुतिप्रमाणिका अक्षरमूलत्वात्। तत्र यदि पाठक्रम आद्रियते विहितं दशमत्वमङ्गभूतमेव नोपपद्यते। अतो विधेयविरोधात् पाठक्रमो दुर्बलः। तथा अर्थक्रमे [3]यवाग्वा विधेयायाः पाठक्रमेण होमस्य परस्तात्पाके होमं प्रति साधनत्वानुपपत्तेः विधेयविरोधात् पाठक्रमस्य दुर्बलत्वम्। अत्र श्रुत्यर्थयोर्विरोधे कथं? उत्तरं—नैवोदाहरणमस्ति अथ त्वस्ति अर्थ एव तर्हि

(1) P. 1335 (2) G. पौर्वापर्यविशेषे (3) G. यवागूत्पत्तिपाठक्रमेण

बलीयान् । कार्यं ह्यत्रार्थशब्देनोच्यते । कार्यार्थश्च क्रमः । अतः श्रुतिमपबाधते कार्यविषयत्वात्तस्याः ।

॥ २ ॥ अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् ॥ २ ॥

अत्रापि बलाबलचिन्तैव । प्रवृत्तेः पूर्वप्रवृत्तत्वात् प्रवृत्तिर्बलीयसीति पूर्वपक्षवादी मन्यते । कार्यार्थत्वात्क्रमस्य अवदानस्य च प्रदानोपक्रमत्वात् मुख्यक्रमो बलीयानिति राद्धान्तः । दर्शनमुक्तम् ।

॥ ३ ॥ [1]वचनादिष्टिपूर्वत्वम् ॥ ५ ॥

बलीयान् कार्यं ह्यत्रार्थशब्देनोच्यते । कार्यार्थश्च क्रमः । अतः श्रुतिमपबाधते कार्यविषत्वात्तस्याः । एतदुक्तं भवति—श्रुतिगम्यं कार्यं तेन श्रुत्यर्थयोर्विरोध एव नास्ति । अथ कार्यं कुतश्चित् श्रुतिनिरपेक्षमेवावगतं तदा तद्विरोधिनी श्रुतिर्नादरणीया, कार्यस्य प्रमेयत्वात् श्रुतेश्च प्रमाणत्वात् प्रमेयार्थत्वात् प्रमाणस्येति ।

अवदानाभिघारण । अत्रापि प्रवृत्तिक्रममुख्यक्रमयोः बलाबलचिन्ता । प्रवृत्तेः पूर्वप्रवृत्तत्वात् प्रवत्तिर्बलीयसीति पूर्वपक्षवादी मन्यते । दधिधर्माणां या प्रवृत्तिः अनुष्ठानं सा पूर्वेद्युः प्रवृत्ता । तन्निबन्धनश्चैव प्रवृत्तिक्रमः इति प्रवृत्तिर्बलीयसीति मन्यते । कार्यार्थत्वात्क्रमस्य अवदानस्य च प्रदानोपक्रमत्वात् मुख्यक्रमो बलीयानिति राद्धान्तः । यथा कार्यं निर्वर्ण्यते तथा क्रमो ग्राह्यः कार्यार्थत्वात्तस्य होमश्चावदानादीनां कार्यं, तेन तद्वशेन यः क्रमः स आदरणीयः । प्रदानोपक्रमत्वाच्चावदानादीनां यथाप्रदानमेव क्रमो ग्राह्य इति । दर्शनमुक्तम् ।

---

(1) P. 1337

अत्राप्यक्षरपरं क्रममङ्गीकृत्य चिन्ता। तत्र पूर्वपक्षवादी सोमेन यक्ष्यमाण' इति नाक्षरपरता क्रमस्य सम्भवतीति मन्वानः, इष्टिपूर्वतामेवाह। कथं पुनर्न संभवति? आधानविधानपरत्वाद्वाक्यस्य। दर्शपूर्णमासाविष्ट्वेति तु कालविधानात्सिद्धिः। अत्राभिधीयते—येयमद्यतनी विभक्तिः सा नाधानानन्तर्यादृते सम्भवतीत्यर्थात् अत्रापि क्रमसिद्धिः सोमाधानयोः। क्व पुनरियं न सम्भवति? अधिकारे। अधिकारायत्तश्च विधानं

वचनादिष्टिपूर्वत्वम्। **अत्राप्यक्षरपरं क्रममङ्गीकृत्य चिन्ता।** अक्षरेभ्यः परं[1] अक्षरपरं अक्षरवशेनावगम्यत इति यावत्। न पुनः क्रमपराण्येवाक्षराणि किन्तु कालपराणि कालार्थत्वात्संयोगस्य। तेन कालसंबन्धरूपे पौर्वापर्ये सति विततिविशेषः क्रमात्मकोऽवसीयत इत्यक्षरपरता। **तत्र पूर्वपक्षवादी 'सोमेन यक्ष्यमाण' इति नाक्षरपरता क्रमस्य सम्भवतीति मन्वानः इष्टिपूर्वतामेवाह। कथं पुनर्न संभवति? आधानविधानपरत्वाद्वाक्यस्य।** सोमेन यक्ष्यमाणोऽग्नीनादधीत इति आधानमेव सोमेन यक्ष्यमाणस्य विधीयते [2]न पुनराधानानन्तर्यं सोमयागस्य विधीयते। तदा ह्येवमुच्येत आधानानन्तरं सोमेन यजेतेति। न चैवमुक्तम्—**दर्शपूर्णमासाभ्यामिष्ट्वा इति तु कालविधानात् क्रमसिद्धिः। अत्राभिधीयते—येयमद्यतनी विभक्तिः सा नाधानानन्तर्यादृते सम्भवतीति तत्राप्यर्थात् क्रमसिद्धिः।** सोमेन यक्ष्यमाणोऽग्नीनादधीत इति श्रूयते। तत्रेयं भविष्यदद्यतने विभक्तिः अद्यतनेऽस्यासंभवात आधानानन्तर्यं लक्षयति। यद्यानन्तर्यमपि न लक्षयेत् अनुपपन्नार्थैव हि स्यात्। तेन सोमाधानयोस्तावदानन्तर्यं प्रतीयते। **क्व पुनरियं न संभवति?** कस्यां पुनरवस्थायां किमधिकारे प्रयोगे येयमद्यतनी विभक्तिः आनन्तर्यादृते न संभवति? **अधिकारे।** यदि ज्योतिष्टोमाधिकारे आनन्तर्यमपि न स्यात् तदेयं न संभवतीत्यर्थः। तस्मादनन्तरमधिकारः **अधिकारायत्तं** चानुष्ठानमिति सोमानुष्ठानमनन्तरं प्रतीयत इति

---

(1) G. परम (2) G. न पुनराधानं कर्तव्यं

इत्याधानविधानेऽप्यर्थात् क्रमाक्षेपः। अभ्युच्चयो दर्शितः।

॥ ४ ॥ [1]उत्कर्षाद्वा ब्राह्मणस्य सोमः स्यात् ॥ १० ॥

अस्मिन्नधिकरणे पूर्वाधिकरणार्थस्य विषयविशेषे अवस्थापनम्। यदन्यत्तत्प्रासङ्गिकमेव। यः पुनरयमन्तरागर्भिण्युपन्यासः स किमर्थः? एवमर्थोऽसौ। यद्यनन्तरं सोमाधानं तदा ब्राह्मणस्य कल्पद्वयं सम्भवति। अन्यस्य वा स्वकाले पुनरिष्टिपूर्वकत्वमेवेति नियम्यते।

आधानविधानेऽप्यर्थात् क्रमाक्षेपः। यद्यप्याधानं विधीयते तथाप्यनन्तरानुष्ठानावसितसोमयाग आदधीत इति शास्त्रार्थावगमात्। अतस्सिद्धं आधानानन्तरं सोम इति। अभ्युच्चयो दर्शितः।

उत्कर्षाद्ब्राह्मणस्य। अस्मिन्नधिकरणे पूर्वाधिकरणार्थस्य विषयविशेषेऽवस्थापनम्। यदन्यत् तत् प्रासङ्गिकमेव। अनेनासङ्गतिदोषं परिहरति। अर्थस्तु यदेतत् पूर्वाधिकरणे साधितमिष्टिपूर्वत्वं सोमपूर्वत्वं च उ॰ौ(न)कल्पौ इति तस्य विशेषे ब्राह्मणविषये[2] ऽवस्थापनं क्रियते। अतः किं त्रयाणामपि वर्णानामुभौ कल्पौ उत ब्राह्मणस्य सोमपूर्वत्वमेव इति। कृत्स्नयोर्दर्शपूर्णमासयोरुत्कर्षः; उत एकं हविरुत्कृष्यते ब्राह्मणस्योभौ कल्पाविति मूलविचारोऽयं यदन्यत् किमूर्ध्वं सोमात्कर्मान्तरमिति। तथा हि किं केवला पौर्णमास्युत्कृष्यते ब्राह्मणस्योभौ कल्पौ इति। तत्प्रासङ्गिकं विनाप्यनेन विचारेण पूर्वपक्षसिद्धान्तयोस्सिद्धत्वात्। अत्र भाष्यकारेण कृत्स्नौ दर्शपूर्णमासावुत्कृष्येते ब्राह्मणस्य सोमपूर्वत्वमेवेति साधयित्वाऽनन्तरं इदं विचारितं—किमाधानकालबाधः उत सोमकालबाध इति। तदाक्षिपति—यः पुनरयमन्तरागर्भिण्युपन्यासः स किमर्थः। अस्यार्थः—पूर्वसाधितमेव कल्पद्वयं गृहीत्वेदमधिकरणमारब्धव्यं(ब्धं) अन्यथाऽधिकरणानारम्भात्। अतः सोमकालबाधनसाधनेन कल्पद्वयसाधनात् अन्तरागर्भिण्युपन्यासोऽनर्थकः। उत्तरं—एवमर्थोऽसौ। यद्यनन्तरं सोमाधानं तदा ब्राह्मणस्य कल्पद्वयं संभवति अन्यस्य च स्वकाले पुनरिष्टिपूर्वत्वमेव नियम्यते

---

(1) P. 1337 (2) G. विशेषे

कथं पुनरिदमवगम्यते ब्राह्मणस्यैव कल्पद्वयमिति राद्धान्तस्तु इष्टिपूर्वत्वे हविष उत्कर्षात् तस्मात् सोमाधानं तस्यैव। अन्यथा हि ब्राह्मणस्यैवोत्कर्षेऽनपेक्षितार्थविधानं स्यात। शेषमुक्तम्।

सोमश्चाधानं च सोमाधानम्। यद्यनन्तरं परस्परमव्यवहितं स्यात यद्याधानानन्तरं सोमः स्यात् तदा कल्पद्वयस्यात्मलाभात् ब्राह्मणस्यान्यस्य वा कल्पद्वयं संभवति। स्वकाले पुनः सोमस्येष्टिपूर्वत्वमेवेति तदिदमनुपपन्नं यस्मादेवमुच्यमानेऽधिकरणारम्भं प्रति हेतुत्वात् औपोद्घातिकी चिन्ता स्यात् न पुनरन्तरागर्भिणी। अत्र वदामः। अन्तरागर्भिणीत्वे अयं हेतुः। पूर्वं हि अग्नीषोमीयस्य प्रत्यभिज्ञानेन कर्मान्तरत्वे निरस्ते सति तद्वदाधानस्यापि कर्मान्तरत्वं नास्तीति सिद्धे सति विधेयान्तराभावात् सोमकालबाधे सति सोमाधानयोरानन्तर्यसिद्धिः। अन्यथा स्वकालावस्थित एव सोमे पुरस्तादनन्तरकालभाव्याधानानन्तरमेव विधीयते। नतश्च कल्पद्वयाभावस्यादिति [1]कल्पद्वयसिद्ध्यर्थमन्तरैवेयं चिन्ता क्रियत इति। संप्रति मूलाधिकरणपूर्वपक्षमाह—**कथं पुनरिदमवगम्यते ब्राह्मणस्यैव कल्पद्वयमिति।** न हि कल्पद्वयेऽपि ब्राह्मणश्रवणमस्ति। अतोऽविशेषात सर्वेषामेव कल्पद्वयमिति। **राद्धान्तस्तु इष्टिपूर्वत्वे हविष उत्कर्षात्।** यस्मादिष्टिपूर्वत्वेऽग्नीषोमीयपुरोडाशात्मकस्य हविष उत्कर्षः स च मुक्तसंशयो ब्राह्मणस्यैव। तत इष्टिपूर्वत्वकल्पे ब्राह्मणस्यैकप्रधानन्यूनदर्शपूर्णमासप्रयोगापत्तेरियमपेक्षा उपजायते—केन प्रकारेण ब्राह्मणः प्रथममेव संपूर्णौ दर्शपूर्णमासौ कुर्यात इति। तस्यां चापेक्षायां अपरस्सोमपूर्वत्वकल्पः उपदिश्यते इत्यपेक्षितविधिपर्यालोचनया ब्राह्मणस्यैव सोमपूर्वत्वं विज्ञायत इति सिद्धं ब्राह्मणस्यैव कल्पद्वयम्। तदिदमुपसंहरन्नाह—**तस्मात् सोमाधानं तस्यैव अन्यथा हि ब्राह्मणस्यैवोत्कर्षेऽनपेक्षितार्थविधानं स्यात्।** ब्राह्मणस्यैवैकहविरुत्कर्षे यदि सर्वेषामेव सोमपूर्वत्वं विधीयते तदाऽनपेक्षितार्थविधानं स्यात्। **शेषमुक्तम्।**

---

(1) P. 1325 (2) G. कल्पद्वयस्यार्थसिद्धिमन्तरैवेयं

॥ ६ ॥ [1]पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात् ॥ ११ ॥

एकस्य हविष उत्कर्ष इति स्थिते तद्विशेषावधारणायेदमधिकरणम्। उक्तं च।

॥ ७ ॥ विकृतेः प्रकृतिकालत्वात् सद्यस्कालोत्तरा विकृतिः तयोः प्रत्यक्षशिष्टत्वात् ॥ १२ ॥

पूर्वं न्यायतोऽसम्भवमुक्त्वा तस्मिन्नेवाहनि समाप्त्युपक्रमौ दर्शितवान् सम्भवार्थम्।

पुरोडाशस्त्वनिर्देशे। एकहविष उत्कर्ष इति स्थिते तद्विशेषावधारणायेदमधिकरणम्। अनेनावान्तरसङ्गतिरुक्ता। उक्तं च भाष्यकारेणेदमधिकरणम्।

विकृतेः। पूर्वं न्यायतोऽसंभवमुक्त्वा तस्मिन्नेवाहनि समाप्त्युपक्रमौ दर्शितवान् सम्भवार्थम्। अत्रेदमभिमतम्—इहाधिकरणे न्यायत एव किं विकृतीनां सद्यस्कालता[उत] द्व्यहकालतेति चिन्त्यते। सद्यस्कालतावचनमसदिति कृत्वा चिन्ता। अत्र पूर्वपक्षवादी प्रकृतिविकृत्योः द्व्यहकालतायां पौर्णमासीकालस्याल्पत्वेनासंभवं मन्वानः प्रत्यक्षश्रुतत्वात् प्रकृतेर्द्व्यहकालस्यानुग्रहाय प्रतिपद्येव विकृतीनामुपक्रमसमाप्ती इत्याह। राद्धान्ती तु चोदकप्राप्तद्व्यहकालतानुग्रहाय चतुर्दश्यां विकृतीनामुपक्रमः पञ्चदश्यां च समाप्तिरित्युक्तवान्। प्रति–पन्मात्र(प्र)योगे तु इह पञ्चदशीसंबन्धो द्व्यहकालता चात्यन्तबाधितौ स्याताम्। यथोक्तेन प्रकारेण केवलप्रतिपत्संबन्धो बाधित इति। अक्षरार्थस्त्वित्थं—पूर्वंन्यायतोऽल्पतया पौर्णमासीकालस्योभयसंबन्धाभावात् प्रत्यक्षश्रुततया च प्रकृतेर्द्व्यहकालत्वेन विकृतेर्द्व्यहकालतायां असंभवं पूर्वपक्षदृष्ट्या भाष्यकार उक्त्वा अस्मिन्नेव पञ्चदशेऽहनि द्व्यहकालत्वाय चतुर्दश्युपक्रान्ताया विकृतेः समाप्तिं प्रतिपदि समापयिष्यमाणायाश्च प्रकृतेः उपक्रमं दर्शितवान् द्वयोर्द्व्यहकालतासंभवार्थमिति न वचनप्रतिपक्षता संभवतीति वचनात् सद्यस्कालता

---

(1) P. 1338 (2) G. प्रतिपन्मात्रयोगित्वे

सद्यस्कालतैव विकृतीनामित्युक्तवान् ।

॥ ८ ॥ सान्नाय्याग्नीषोमीयविकाराः ऊर्ध्वं सोमात् प्रकृतिवत् ॥२५॥

॥ ९ ॥ तथा सोमविकाराः दर्शपूर्णमासाभ्याम् ॥ २६ ॥

इहाधिकरणद्वयेप्यधिकारादृते काललक्षणा न सम्भवतीति कृताधिकारस्यैव क्रमस्याधिकार इति तद्विकाराणामप्येवमेवेति युक्तम्। किमर्थं तर्हि अधिकरणद्वयम् ? पूर्वत्र कर्तृतानिर्देशात् नासोमयाजीति सोमयागस्य कर्ता सान्नाय्ये कर्तृतयाऽभिधीयते

विकृतीनामित्युक्तवान् । एवं न्यायतो विचार्य संप्रति तथाऽनुष्ठानं माभूदिति वचनमुद्धाटितं न वचनप्रतिपक्षता न्यायमात्रस्य संभवतीति । द्व्यहकालताकार्ये सद्यस्कालताविधानात् सद्यस्कालतैव विकृतीनामित्युक्तवान् भाष्यकारः ।

सान्नाय्य । तथा सोमविकाराः । अत्र सूत्रकारस्तथाशब्दं प्रयुञ्जानः अधिकरणद्वयेऽपि तुल्यो न्याय इत्याह । स कथं तुल्यो न्याय इत्यत्राह—**इहाधिकरणद्वयेपि नाधिकारादृते काललक्षणा संभवतीति कृताधिकारस्यैव क्रमस्याधिकार इति तद्विकाराणामप्येवमेवेति युक्तम्।** अस्यार्थः—यदि सान्नाय्याग्नीषोमीययोः सोमस्याधिकारो विशेषे नावस्थाप्यते तदा सोमस्य दर्शपूर्णमासयोश्च स्वकीयोत्तरकालतालक्षकत्वं न स्यात् । तस्मात् सान्नाय्याग्नीषोमीययोः योऽधिकारी स कृतसोमः एव । तथा कृतदर्शपूर्णमास एव सोमाधिकारीति यन्त्रिते चाधिकारिणि कालो नियन्तुं शक्यते नान्यथेत्यधिकरणद्वयेपि तुल्यन्यायतेति । यदि तुल्यो न्यायः किमिति तर्हि अधिकरणद्वयमिति तदाह—**किमर्थमधिकरणद्वयमिति ।** उत्तरं-**पूर्वत्र कर्तृतानिर्देशात्** [1]**नासोमयाजीति सोमयागस्य कर्ता सान्नाय्ये कर्तृतयाऽभिधीयते ।** यदि च सोमयाजिनोऽधिकारः स्यात् तदा तथाविधः कर्ता भवेत्, नान्यथा । कृतसोमे चाधिकारिणि बलात् सोमोत्तरकालता भवतीति युक्तं

---

(1) G. सोमयाजीति

द्वितीयाधिकरणे तु दर्शपूर्णमासाभ्यामिष्ट्वेति पुनराशङ्कितवान् कर्तृनिर्देशाभावात्। कथं तर्हि राद्धान्ते न्यायतुल्यता? नाधिकारादृते काललक्षणा सम्भवतीति तुल्यतोक्ता।

इति बृहत्यां पञ्चमाध्यायस्य
चतुर्थः पादः

तत्रोत्तरकालत्वम्। द्वितीयाधिकरणे तु दर्शपूर्णमासाभ्यामिष्ट्वेति नैवमिति पुनराशङ्कितवान्। कर्तृनिर्देशाभावात्। कथं तर्हि राद्धान्ते न्यायतुल्यता? उत्तरं —नाधिकारादृते काललक्षणा सम्भवतीति तुल्यतोक्ता। अस्यार्थः—अत्रापि तु क्त्वा-प्रत्यययोगादिभिः निर्वृत्तदर्शपूर्णमाससमानकर्तृकता सोमस्याप्यवगम्यमाना कृतदर्शपूर्णमास एव सोमे कर्तेत्यवगमयति। न चातथाभूते[2]ऽधिकारिणि तथाभूतस्य कर्तृतोपपद्यते इति लब्धेऽधिकारिणि तद्बलेनैव दर्शपूर्णमासोत्तरकालता सोमस्यावगम्यत इति तुल्यतोक्ता।

इति महामहोपाध्यायशालिकनाथविरचितायां ऋजुविमलायां
पञ्चिकायां पञ्चमाध्यायस्य
चतुर्थः पादः

---

(1) G. भूतोऽधिकारोस्ति

INDEX OF SUTRAS

INDEX OF CITATIONS

ERRATA

पु—पं		शुद्धं
629—6	...	ऊहितव्यम्
659—6	...	लभेतेतिवत्
687—12	...	चमसेषु
700—3	...	प्रकृतिप्राप्तौ
721—11	...	पठ्यते
730 *last*	...	सिद्ध्यति
735—21	...	भाष्यम्
740—2	...	चोदितत्वात्
749—14	...	केन वोक्तं
759—18	...	र्थान्वयसम्भवात्
,, —19	...	विशेषान्वयाभिधानेन
783—8	...	न्योऽभिप्रायश्चो
792—7	...	वाक्यार्थस्य वाक्यार्थस्य च
821—8	...	श्रूयते
838—16	...	विषयविशेषणं
848—18	...	यदानस्य
870—12	...	इदम *for* नेदम
,, — ,,	...	मनङ्गीकृत्य *for* अङ्गीकृत्य
875—10	...	सम्बन्धे
879 -12	...	प्राय *for* पाय
886 11	...	ज्योतिष्टोमे
887—12	...	तदेवोपकारप्रतिपत्तौ
904—6	...	श्रुतोयः
907—7	...	संस्थान्तरेषु
,, —13	...	यद्यग्निष्टोम
912—11	...	याकाचिदिति कर्त
961—11	...	नियमो न (?)

966—1	...	अर्थतश्चानवगमात्
„ —9	...	तु प्रीतेरधि
970—3	...	कश्चिद्विशेषः
987—13	...	आज्य *for* कपाल
990—16	...	गृह्येतापि
1000—21	...	संस्कारकमेव
1019—13	...	मोपसद्भ्यां
1033—12	...	भाष्यकारेण
1056—16	...	वक्ष्यते
1065—14	...	नुपपन्ना
1067—5	...	पिण्डपितृयज्ञस्य
1083—9	...	तात्पर्यं श्रुतेः
„ —13	...	पाठ क्रमः
„ —16	...	पाठ क्रमः
1088—19	...	पुनर्विधेय
1091—19	...	सङ्ख्या
1107—18	...	पाठक्रमः